Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषावश्यक भाष्य

भाग-१

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

:: विशेषावश्यकभाष्य–विषयानुक्रमः (भाग–१) ::

पृ० विषय

१–१६ मूलगाथाकारादिक्रमः ।

१ ● मङ्गलादि ।

३ आवश्यकानुयोगस्य फलयोगमंगल-समुदायार्थद्वारोपिद्वारभेदादीनि च वक्तव्यानि ।

४ आवश्यकमनुयोगश्च कथं ज्ञानक्रियामयः ।

४ अनुयोगदानविधानादि ।

४ स्थविरकल्पक्रमः ।

५ आचार्यपदात्प्राक् देशदर्शनं । शिष्यनिष्पत्तिः पश्चादुद्यतमरणं जिनकल्पादिर्वा ।

५ पञ्च तुलनाः ।

५ जिनकल्पविधिः ।

५ जिनकल्पचर्या ।

८ आदौ नमस्कारानुयोगः कथं न ?

८ नमस्कारः सर्वश्रुतान्तर्गतः ।

९ मङ्गलत्रयम् ।

९ मंङ्गलचर्चा ।

१० किमिति मङ्गलग्रहणम् ।

११ मङ्गलत्रिकव्युत्पत्तिः ।

११ नामादिनिक्षेपाः

१२ सामान्य विशेषनयौ ।

१४ संग्रहव्यव० ।

१६ शब्दनयानां न द्रव्यमंगलं ।

१६ ज्ञ० भव्य० शरीरद्रव्यमंगलं ।

१६ व्यति० द्र० मंगलम् ।

१७ भावमंगलम् ।

१८ नोआगमतो भावमंगलम् ।

१९ नामादयो भावमंगल-हेतवः ।

२० ● नामादिलक्षणम् ।

२१ नामादि वस्तुसत् । बौद्धमतखण्डनम् ।

२१ स्थापनानयः ।

२२ द्रव्यनिक्षेपनयः ।

२३ भावनयः ।

२४ मिथ्यातदितरनयाः ।

२५ नामादयो भेदाभेदकारिणः ।

२५ संग्रहादिसंमता नामादयाः ।

२६ नन्दी ।

२६ ● ज्ञानपंचकम् ।

२८ मत्यादिक्रमहेतवः

२९ प्रत्यक्ष-परोक्षलक्षणे ।

३१ इन्द्रियाणि न ज्ञातृणि ।

३१ ऐन्द्रियकं ज्ञानं परोक्षम् ।

३१ नोइन्द्रियप्रत्यक्षचर्चा ।

३२ मतिश्रुतयोर्लक्षणादिभिर्भेदः ।

३३ श्रुतं शब्दज्ञानरूपं कथं न मतिः ?

३४ एकेन्द्रियाणां कथं श्रुतम् ?

३५ हेतुफलभावाद् मतिश्रुतयोर्भेदः ।

३५ मतिर्द्रव्यश्रुतजन्या स्यात् ।

३७ मति-श्रुतयोर्विशेषः ।

३८ ज्ञानाज्ञानयोर्विशेषः ।

३८ भेदभेदाद् मतिश्रुतयोर्भेदः ।

३९ श्रुतोपलब्धिः श्रुतम् शेषं मतिः ।

३९ द्रव्यश्रुतं किम् ।

४० अक्षरलाभः श्रुतानुसार्येव श्रुतम् ।

४१ 'बुद्धिदिट्ठे अत्थे' पूर्वगतगाथा ।

४२ 'बुद्धिदिट्ठे' इत्यस्यार्थः ।

४२ 'उवलद्धिसमं' इत्यस्यार्थः ।

४३ भाष्यमाणः शब्दः किं मतिः, श्रुतमुभयं वा ?

४४ 'इयरत्थ वि होज्ज सुयं' इत्यस्यार्थः ।

४४ सर्वे श्रुतोपलब्धभावाः वक्तुमशक्याः ।

४५ प्रज्ञापनीयाः अनभिलाप्यानन्तभागे श्रुतनिबद्धाः ।

४५ चतुर्दशपूर्विणो मिथः षट्स्थान पतिताः ।

४६ 'बुद्धिदिट्ठे' गाथायाः स्वीयद्वितीयोऽर्थः ।

४७ श्रुतज्ञानमभिलाप्यविषयकं । मतिज्ञानमुभयविषयकम् ।

४७ 'बुद्धिदिट्ठे' गाथोत्तरार्द्धव्याख्या, मतिज्ञानी नोपालब्धिसमं भाषते ।

४८ मतिश्रुतयोर्वल्क-शुम्बदृष्टान्तमयुक्तम् ।

५० श्रुताननुसारि शब्दमात्रपरिणामयुता मतिः न श्रुतज्ञानम् ।

५० मतिश्रुतयोर्नानक्षराक्षरत्वविशेषः ।

५० श्रुतनिश्रिताऽनिश्रिता मतिः

५१ साक्षरानक्षरे मतिश्रुते

५१ मतिरपि परप्रत्यायिका

५३ करादिचेष्टा न मतेः किन्तु श्रुतस्यैव हेतुः

५४ लक्षणभेदादिभिर्मतिश्रुतयोर्भेदः ।

५४ अवग्रहादि श्रुतनिश्रितं, औत्पत्तिक्यादि न श्रुतनिश्रितम्

५४ अवग्रहादिस्वरूपम्

५५ ईहा–संशयभेदः

५६ अपायधारणापूर्वोत्तरपक्षौ

५७ अविच्युति–वासना–स्मृतिरूपा धारणा

५९ ● व्यञ्जनावग्रहः

५९ व्यञ्जनावग्रहे ज्ञानमात्राणां सिद्धिः

६० व्यञ्जनसमूहे ज्ञानं प्रत्येकव्यञ्जनीय समुदितम्

६१ व्यञ्जनावग्रहभेदाः

६२ श्रोत्रघ्राणयोः कथं विषयसंपर्कः

६३ चक्षुरप्राप्यकारिता, अनुग्रहोपघाताभावात्

६४ मनसोऽप्राप्यकारिता

६५ आत्मा न सर्वव्यापी

६५ द्रव्यमनसो बहिरगमनम्

६५ मनसो न विषयकृतानुग्रहोपघातौ

६६ जीवस्य द्रव्यमनःकृतानुग्रहोपघातौ

६७ स्वप्नेऽपि न मनोगमनम्

६७ स्वप्नानुभूतक्रियायाः फलं नास्ति

६८ स्वप्ने विशिष्टक्रियातत्फलविरहः

६९ स्वप्नस्य निमित्तभावः

६९ सत्यानर्द्धिनिद्रादृष्टान्ताः

७१ मनसो व्यञ्जनावग्रहकाले न मनोव्यापारः

७२ इन्द्रियव्यञ्जनावग्रहकाले न मनोव्यापारः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

७३ मनसो न कोऽप्यनुपलब्धिकालः
७३ चक्षुषोऽप्राप्यकारित्वे कथं न सर्वग्रहणम् ?
७७ विवक्षितार्थावग्रह-ईहापूर्वकः
७८ व्यञ्जनार्थावग्रहयोरव्यक्तविज्ञानयोर्भेदः
७९ ● अर्थावग्रहे विशेषबुद्धिस्वीकारे दोषान्तरम्
८० अर्थावग्रहस्य विशेषज्ञानरूपत्वस्वीकारे समयविरोधादि दोषाः
८१ निर्विकल्पकज्ञानमर्थावग्रह एव
८२ अवग्रहेहापायानां प्रत्येकं भिन्नता
८२ अवग्रहे कथं बह्वादिप्रकाराः
८३ अपेक्षयाऽपायो व्यावहारिकावग्रहः
८३ धारणा-वासना-स्मृतीनां कालः
८४ व्यावहारिकार्थावग्रहे गुणः
८५ ईहा-व्याख्या
८६ अपाय व्याख्या
८६ धारणा-व्याख्या
८६ शेषरूपादिविषयेषु ईहादयः
८७ अवग्रहादयः क्रमेणैव
८८ ज्ञेयस्वभावोऽपि नावग्रहानुत्क्रमानुकूलः
८९ आभिनिबोधिकानेकभेदाः
८९ २८ भेदेषु बुद्धिचतुष्टयान्तर्भावोऽयुक्तः
९० बुद्धिचतुष्टयेऽवग्रहादिमत्त्वघटना
९० अश्रुतनिश्रितं कथं भिन्नम्
९१ बहु-बहुविधादिभेदाः
९२ बाह्याभ्यन्तरनिमित्तवैचित्र्याद् मतिबहुत्वम्
९२ अवग्रहादयो न संशयादिरूपाः
९३ अवग्रहेहयोरसंदिग्धत्वसिद्धिः
९३ संशयादयः कथं ज्ञानम् ?
९३ एकदेश ग्राह्यपि ज्ञानम्
९४ अज्ञानि-ज्ञानिभेदः
९५ एकस्य सर्वमयतासिद्धिः ।
९५ सम्यग्दृष्टिज्ञानगोचरः सर्वम्
९५ सम्यग्दृष्टेः संशयः कथं ज्ञानम् ?
९६ नियतपर्यायग्रहणं कथम् ?
९६ मिथ्यादृष्टेरुपयोगेऽप्यज्ञानपरिणामः
९८ सम्यक्त्वानुगतमेव ज्ञानं ज्ञानफलत्वात्
९८ वस्तुनिष्ठो योग्य एव धर्मो मोक्षसाधकः
९९ सम्यग्दृष्टेः सम्यग्-आराधना
९९ अवग्रहादीनां कालमानम्
१०० स्पृष्टास्पृष्टविषयग्रहणे निर्युक्तिगाथा
१०० शब्दस्य गन्धादि द्रव्याणां च तारतम्यम्
१०० विविधाङ्गुलमानम्
१०१ इन्द्रिय-विषयमानमात्माङ्गुलमेयम्
१०२ इन्द्रियमानमप्यात्माङ्गुलमेयम्
१०२ देहमानमुत्सेधाङ्गुलेन
१०२ नयनविषयप्रमाणम्
१०३ शेषेन्द्रियविषयप्रमाणम्
१०४ शब्दद्रव्याणि मिश्राणि वासितानि च श्रूयन्ते
१०४ भाषाद्रव्याणां समश्रेणिगमनम्
१०५ केन योगेन वाग्द्रव्यादाननिसर्गौ ?
१०५ कथमेक एव काययोगो न ?
१०६ प्राणापानयोगो न पृथक्
१०६ वाग्-मनोयोग-व्याख्या
१०६ मनोवाग्द्रव्याणां कदा ग्रहणमोक्षौ ?
१०७ निसर्जनं ग्रहणापेक्षया सान्तरं, न तु समयापेक्षया
१०८ युगपत् क्रियाद्वयसंभवः
१०९ कायत्रयेण वाग्द्रव्यग्रहणम्
१०९ चतुर्विधा भाषा
११० भाषाया लोकव्यापने कालमानम्
१११ केवलिसमुद्घात-दृष्टान्तोऽनादेशः
१११ त्रि-चतुः-पचसमयैः लोकपूरणम्
१११ विचित्रा सूत्रगतिः
११२ लोकस्य कतिभागे भाषाकतिभागः
११३ जैनसमुद्घातो चतुःसमयः, भाषया लोकपूरणे त्रिसमयम्
११३ भाषाद्रव्येण पराघातः
११४ अचित्तमहास्कन्धे विचित्रविस्रसा
११३ आभिनिबोधपर्यायाः
११४ ईहापोह-विमर्श-मार्गण-गवेषणा-संज्ञा-स्मृति-मति-बुद्धि- प्रज्ञा
११४ आभिनिबोध वचनपर्यायार्थपर्यायाः
११४ अवग्रहादिषु भिन्ना-भिन्नत्वे
११५ अवग्रहादौ कथं मतित्वम्
११५ मतिज्ञानी सर्वद्रव्यादिचतुष्कं जानाति
११६ ● सत्पदादिप्ररुपणा
११६ ● गत्यादिमार्गणाः
११६ गत्यादिषु पूर्वप्रतिपन्नप्रतिपद्यमानाः
११८ सम्यक्त्वोत्पादे नि०व्य०भ्यां विचारणा
११८ व्यवहारेण क्रियाकाले न कार्यम्
११८ निश्चयेन क्रियाकाले कार्यम्
११९ कथं दीर्घक्रियाकालः ?
११९ कथं नारम्भे क्रियादर्शनं
११९ कथमन्त्ये एव कार्यदर्शनम्
११९ क्रियमाणमेव कृतम्
११९ सर्वक्रियाकालोऽनेककार्ययुक्तः
१२० उत्पाद्यं विना उत्पादक्रिया का ?
१२० क्रियमाणे कृते कथं नानवस्था
१२१ व्यवहारनिश्चयतः ज्ञानादिद्वारेषु प्रतिपद्यमानप्रतिपन्नाः
१२२ आभिनि० द्रव्य-प्रमाणं
१२२ क्षेत्रद्वारम्
१२३ क्षेत्र-स्पर्शनाविशेषः
१२३ मतिज्ञानकालः
१२४ अन्तरद्वारम्
१२४ भाग-भावाल्पबहुत्वद्वाराणि
१२५ ● श्रुतज्ञानम्
१२५ अक्षरसंयोगाः तत्प्रत्येकपर्यायाश्चानन्ताः
१२६ श्रुतस्य १४ निक्षेपाः
१२७ अक्षरश्रुतम्
१२७ 'अक्षरं' वर्णे रूढम्
१२७ स्वरव्यञ्जने
१२८ संज्ञाक्षरे १८ लिपिभेदाः
१२८ व्यञ्जनाक्षरे अकारादि
१२८ लब्ध्यक्षरे ज्ञानम्
१२९ द्रव्य-भावश्रुतम्
१२९ लब्ध्यक्षरं प्रत्यक्षेणानुमानेन वा
१२९ अनुमानं सादृश्यादिपञ्चकतः
१३० अनुपलब्धयः
१३१ असंज्ञिनो लब्ध्यक्षरम्
१३१ एकैकमकारादि सर्वद्रव्यपर्यायमानं
१३१ स्व-परपर्यायाः
१३१ परपर्यायाः कथं स्वीयाः ?

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१३२ अक्षरे परपर्यायोपयोगः
१३२ असंबद्धस्यापि स्वपर्यायत्वम्
१३३ एगं जाणइ सव्वं जाणइ
१३३ अक्षरे पर्यायमानं किमर्थम्,
१३४ अभिलाप्यानभिलाप्याः
१३४ आकाशपर्यायानन्ततमभागे पंचद्रव्य-पर्यायाः
१३५ प्रत्याकाशप्रदेशमगुरुलघुपर्याया अनन्ताः
१३५ केवलस्य श्रुतस्य च पर्यायमानतुल्यता ।
१३५ समानपर्यायत्वेऽपि श्रुतकेवलयोर्विशेषः
१३६ न सर्वचैतन्याचरणम्
१३७ उत्कृष्टाक्षरः कस्य ?
१३७ अनक्षरश्रुतम्
१३८ चेष्टायां न श्रुतरूढिः
१३८ संज्ञिश्रुतम्
१३८ एकेन्द्रियादयः संज्ञावन्तोऽपि कथमसंज्ञिनः
१३९ दीर्घकालिकी संज्ञा
१३९ असंज्ञिनामस्पष्टाव्यक्तज्ञाने
१४० हेतुवादोपदेशिनी
१४० दृष्टिवादोपदेशिनी
१४१ जिने न संज्ञा
१४१ कस्य का संज्ञा ?
१४२ आद्यसम्यक्त्वप्राप्तिः
१४२ मिथ्यात्वक्षयोपशमः
१४४ वेदकसम्यक्त्वम्
१४४ सम्यग्मिथ्याश्रुतयोर्भेदः
१४५ सादि-सपर्यवसितश्रुतं
१४६ श्रुतस्य जीवाद् भेदे आपत्तिः
१४६ उत्पादव्ययध्रौव्यव्यापकता
१४७ एकान्तनित्यत्वखण्डनम्
१४८ एकान्तक्षणिकत्वखण्डनम्
१४८ नित्यानित्यत्वसिद्धिः
१४९ श्रुतस्य साद्यादिप्ररूपणा
१४९ गमिकागमिकश्रुतम्
१४९ अङ्गप्रविष्टतदितरश्रुतम्
१५० श्रुतविषयमानम्
१५१ श्रुतज्ञाने न दर्शनम्
१५१ श्रुतज्ञाने अपि पश्यत्ता
१५१ श्रुतग्रहणोपायः
१५२ ८ बुद्धिगुणाः
१५३ ● अवधिज्ञानम्
१५३ अवधिप्रकृतयः
१५४ द्विविधावधिः
१५४ उदयादयो द्रव्यादिनिमित्तकाः
१५४ १४ अवधेः निक्षेपादिद्वाराणि
१५५ १. अवधेर्नामादिसप्तविधनिक्षेपः
१५६ २. अवधिक्षेत्रपरिमाणम्
१५७ जघन्यावधिक्षेत्रं मत्स्यपनकमानम्
१५८ उत्कृष्टावधिक्षेत्रं सर्वबह्वग्निजीवक्षेत्रमानं
१५९ अग्निजीवस्थापनायां षडादेशाः
१६० असंख्येयलोकमानमवधिक्षेत्रम्
१६० अवधिर्विमध्यमक्षेत्रकालमानम्
१६१ अवधिः कियति क्षेत्रे कियत् कालीनं पश्यति
१६२ द्रव्यादिषु यद्वृद्धौ यद्वृद्धिः
१६३ कालसमयक्षेत्रप्रदेशतुलना
१६४ ● औदारिकादिवर्गणाः
१६५ कर्मोपरिध्रुवादिवर्गणाः
१६६ अचित्तमहास्कन्धः
१६७ उत्कृष्टप्रदेशिकस्यावगाहना
१६७ चतुःस्थानपतिता
१६७ क्षेत्रवर्गणाः
१६८ काल-भाववर्गणाः ।
१६८ वर्गणाद्रव्यमध्ये कानि गुरुलघूनि कान्यगुरुलघूनि
१६९ नि० व्य० तः गुरु-लघुविभागः
१६९ गुरुलघ्वादीनामपि ऊर्ध्वाधोगतिवैचित्र्यम्
१७१ अवधिज्ञाने कस्मिन् वर्गणारूपविषये कियत् क्षेत्रं विषयः
१७१ अपरोऽवधि द्रव्याद्युपनिबन्धः
१७२ परमावधिद्रव्यविषयः
१७२ परमावधिक्षेत्रकाल-विषयौ तिरश्चामवधिमानम्
१७४ ● रत्नप्रभादौ अवधिमानम्
१७५ देवानामवधिमानम्
१७७ ३ अवधिसंस्थानम्
१७८ ४ अवधेरानुगामुकद्वारम्
१७९ आधार-उपयोगलब्धितरवस्थानम्
१८० ६ अवधेश्चलद्वारम् षड्गुणहानिवृद्धी
१८० कस्य वृद्धिहान्योः कस्य कियन्मात्रे वृद्धि-हानी ।
१८२ ७ अवधेस्तीव्रमन्दद्वारम्
१८२ फड्डकप्ररूपणा
१८२ फड्डकानां ९ प्रकाराः
१८३ अनुगामिप्रतिपात्योर्विशेषः
१८४ ८ अवधेःप्रतिपातोत्पादद्वारम् ।
१८४ अभ्यन्तरावधिलब्धौ नोभयं समकम्
१८५ उत्पादव्ययौ नैकधर्मेण युगपत्
१८६ ९-१०-११ ज्ञान-दर्शनविभङ्गद्वाराणि
१८७ १२ अवधिदेशद्वारम्
१८८ १३ अवधिक्षेत्रद्वारम्
१८९ पुरुष-लोक-अलोक संबद्धासंबद्धः अवधिः
१८९ १४. अवधेर्गतिद्वारम्
१८९ प्रतिपद्यमान-पूर्वप्रतिपन्नविषये मत्यवध्योर्विशेषः
१९० आमर्षादिलब्धयः
१९१ लब्धिसत्का भाष्यगाथाः
१९२ वासुदेवादीनां बलातिशयः
१९३ क्षीराश्रवादिका ऋद्धयः
१९४ क्षीणमभव्यानां च का लब्धयः ?
१९४ अवधेः संक्षेपप्ररूपणा
१९५ ● मनःपर्यायज्ञानम्
१९५ द्रव्यादिविषयाः
१९५ मनःपर्यायज्ञानी पश्यत्यचक्षुर्दर्शनेन
१९५ मनःपर्यायज्ञानी 'जाणइपासइ इत्युपपत्त्यर्थं विविधमतानि
१९८ ● केवलज्ञानं
२०० कस्य ज्ञानस्य अनुयोगः
२०१ ● 'अनुयोग' शब्दार्थः
२०२ व्याख्यानान्तरहेतुः
२०२ आवश्यकनिक्षेपाः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२०२ शिक्षितादिपदव्याख्या
२०४ अधिकाक्षरे कुणालदृष्टान्तः
२०५ भावाधिक्ये वानरदृष्टान्तः
२०५ हीनाक्षरे विद्याधरदृष्टान्तः
२०६ नोआगमतो द्रव्यावश्यकम्
२०६ अभीक्ष्णाऽऽसेवालोचनायां रत्नदाहकदृष्टांतः
२०७ ● भावावश्यकम्
२०७ आवश्यकस्य १० पर्यायः
२०७ आवश्यकः
२०७ आपाश्रयः
२०७ आवासकः
२०८ अवश्यकरणीय ध्रुवादिपर्यायव्याख्या
२०८ ● द्रव्यश्रुतम्
२०८ अण्डजादि पञ्चविधं सूत्रम् भावश्रुतम्
२०८ नोआगमतो भावश्रुतम्
२०९ 'नो' शब्दचर्चा
२११ 'श्रुत'-पर्यायाः
२११ द्रव्य-'स्कन्धः'
२१२ कृत्स्नाकृत्स्नस्कन्धौ
२१२ भावस्कन्धः
२१३ 'स्कन्ध'पर्यायाः
२१३ षडावश्यकानाम् अर्थाधिकाराः
२१४ अनुयोगद्वारोपन्यासः
२१४ द्वारभेदोपन्यासः
२१४ उपक्रमादिनिरुक्तिकथनम्
२१४ चतुर्द्वारक्रमप्रयोजनोपन्यासः
२१५ भावोपक्रमषडानुपूर्वीणां संक्षिप्तपरिचयः
२१६ उपक्रमस्य षड्भेदाः
२१७ उपक्रमः, परिकर्म-विनाशौ
२१७ द्रव्योपक्रमः
२१७ क्षेत्रोपक्रमः
२१७ कालोपक्रमः कालो द्रव्यपर्यायः
२१८ अप्रशस्तभावोपक्रमः
२१८ त्रिपुत्रीकब्राह्मणी
२१८ भावज्ञानकुशला गणिका अमात्यः ।
२१९ प्रशस्तभावोपक्रमः
२१९ गुरुप्रसादनोपायाः
२१९ राजपुत्र-मुनिविनयः
२२० आनुपूर्व्यां सामायिकावतारः ।
२२१ आनुपूर्वीभङ्गकरणगाथा
२२२ भङ्गकरणदृष्टान्तः
२२२ २. नाम एकविधादि
२२२ ३. प्रमाण द्रव्यादि ४
२२३ त्रिविधो लोकोत्तरागमः
२२३ नयविचारो निषिद्धः
२२४ ४. वक्तव्यता स्वसमयादिः ।
२२४ ५. अर्थाधिकारः
२२४ ६. समवतारः
२२५ २. अनुयोगद्वारं निक्षेपः
२२५ अध्ययनमक्षीणमायः क्षपणा
२२६ निक्षेपे न व्याख्यावसरः
२२६ निक्षेपन्यासनिर्युक्ति–निर्युक्तिद्वारादीनां विषयविभागः
२२७ ३. अनुयोगद्वारम्-अनुगमः
● २६ उद्देशादिद्वाराणां गाथाद्वयम्
२२७ उद्देशनिर्देशयोराक्षेपपरिहारौ
२२८ निर्गमे आक्षेपपरिहारौ
२२९ लक्षणाक्षेप-परिहारौ
२२९ नयद्वारे आक्षेपपरिहारौ
२३० किं कथं द्वारयोराक्षेपपरिहारौ
२३० उपोद्घातोपक्रमयोर्विशेषः
२३३ सूत्रस्पर्शिकनिर्युक्तेरवसरः
२३१ सूत्रे ३२ दोषाः वर्ज्याः
२३३ सूत्रे ८ गुणाः
२३३ ६ गुणाः
२३३ षड्विधं व्याख्यालक्षणम् ।
२३४ पद पदार्थौ
२३४ पदविग्रहः
२३५ चालनाप्रत्यवस्थाने
२३६ ● मध्यमङ्गलम्
२३८ उपोद्घातशास्त्रं सर्वसामान्यम्
२३८ द्रव्यतीर्थम्
२३९ भावतीर्थं संघः
२४० तित्थं = त्रिस्थम्
२४० तित्थं = त्र्यर्थम्
२४१ सुखावतार-सुखोत्तारादि ४ भंगाः
२४१ भावतीर्थं कथं दुःखावतारं दुखोत्तारं च
२२४ 'तीर्थकर'-सिद्धिः
२४२ 'भगवत्'-सिद्धिः
२४३ 'अनुत्तरपराक्रम' सिद्धिः
२४३ 'अमित-ज्ञानी'
२४३ 'तीर्णः सुगतिगतिगतः'
२४३ 'सिद्धिपथप्रदेशकः'
२४४ सिद्धिपथः, 'वन्दे'—
२४४ सर्वजिनान् विशेषतो वीरम्
२४४ महाभागादि वीरविशेषणार्थं भाष्यगाथाः
२४५ सूत्रकर्त्रादिवन्दनम्, गणधरादि निष्ठपूज्यत्वे भाष्यगाथाः
२४६ 'अत्थपुहत्त'-व्याख्या
२४६ १० निर्युक्तयः
२४६ हेतूदाहरणादिस्वरूपम्
२४७ मृगापति–चण्डप्रद्योतदृष्टान्तः
२४९ शब्दे नष्टे कथं तदागतम् ?
२४९ निर्युक्तिशब्दार्थः
२४९ सूत्रपद्धतिर्गुरुं प्रेरयति
२५० अर्हद्गणधराणां शीलकथनफलविशेषा
२५१ ज्ञानपुष्पवृष्टिः बुद्धिपटे अर्हन् कृतार्थोऽपि कथं बोधयति
२५२ सूत्रग्रन्थनप्रयोजनम्
२५४ अर्हद्गणधरवचनतारतम्यम्
२५४ 'निउणं'-व्याख्या
२५५ श्रुतसार– चरणसारनिर्वाणम्
२५५ ज्ञानं मोक्षगौणकारणं चरणं मुख्यकारणम्
२५५ ज्ञानं कथं प्रधानं कारणम् ?
२५६ ज्ञानक्रियोभयं कारणं
२५७ मन्त्रोऽपि न ज्ञानमात्रात् फलम्
२५७ तपःसंयमहीनं ज्ञानमक्षमम्
२५८ संसारसागरादुन्मग्नस्योपदेशः
२५९ निश्चयतः क्रियाहीनो ज्ञानी अज्ञान्येव
२५९ चरणहीनस्य ज्ञानमन्धस्य दीपकोटि-समम्
२५९ क्रियाहीनं ज्ञानं क्लेशफलकमपि
२६० अन्धपङ्गुवत् क्रियाज्ञाने मिथः सापेक्षे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२६१ प्रत्येकमसत् कथं ज्ञानक्रियासमुदाये मोक्षजनकत्वम्
२६१ संयोगात् फलसिद्धौ अन्धपङ्गु-दृष्टान्तः
२६१ ज्ञान-तपः-संयमसंमीलने मोक्षः
२६१ गृहशोधनदृष्टान्तः
२६२ क्रियायां तपः संयमान्तर्भावः
२६२ श्रुतं क्षयोपशमात् न क्षयात्
२६४ सम्यक्त्वाद्यलाभकारणम्
२६४ कर्मणामुत्कृष्टजघन्यस्थिती
२६५ कस्योत्कृष्टस्थितिबन्धे कीदृगपरबन्धः उत्कृष्टजघन्यस्थितिको न
२६५ सामायिकचतुष्कप्रतिपद्यमानकः
२६७ ग्रंथिः का ?
२६७ दर्शनादि गुणावश्यकता हेतुः
२६७ यथाप्रवृत्तादिकरणत्रयम्
२६७ सामायिकलाभे पल्लकादिनव दृष्टान्ताः
२६७ पल्यः
२६८ गिरिसरिदुपलः
२६८ पिपीलिका । पुरुषः पन्थाः
२६९ ज्वरगृहीतः । कोद्रवः सैद्धा०कार्म० मते आद्यानाद्यसम्यक्त्वप्रक्रिया पुञ्जत्रयं च
२७० अभव्यादीनां श्रुतसामा० मात्रलाभः
२७० जलवस्त्रे
२७० देशविरत्यादिलाभः कदा ?
२७१ सम्यक्त्वावरणमनंतानु० मिथ्यात्वं च
२७१ संयोजनाकषायफलम्
२७१ 'कषाय'-शब्दार्थः
२७२ देशविरत्यावरणम्
२७२ सर्वविरत्यावरणम्
२७३ यथाख्यातावरणम्
२७३ रात्रिभोजनविरमणं कथं
२७३ साधुमूलगुणः श्रावकोत्तरगुणः ?
२७४ मूलोत्तरगुणत्वं किम् ?
२७४ सर्वऽतिचाराः संज्वलनोदयजाः ।
२७६ क्षायिकादिचारित्रविचारः
२७६ चारित्रपञ्चभेदाः
२७६ सर्वकषायक्षयादिफलम्
२७७ चारित्रपञ्चकम्
२७७ सामायिकं द्विधा
२७७ सामा० छेदे कथं न प्रतिज्ञालोपः ?
२७८ छेदोपस्थापनीयम्
२७८ परिहारविशुद्धिकम्
२७९ सूक्ष्मसंपरायचारित्रम्
२८० यथाख्यातचारित्रम्
२८१ उपशमतः कथं सामायिकम् ? उपशमक्रमः
२८२ प्रदेशकर्म अनुभावकर्म च
२८४ रोगक्रियावत् प्रदेशवेदनमबाधाकारि
२८३ संज्वलनलोभक्षपणाक्रमः
२८४ बद्धाबद्धायुष्कोपशान्तमोहादनन्तरम् ।
२८४ कषायप्रबलसामर्थ्यम्
२८४ स्तोकमप्यविश्वसनीयम्
२८५ क्षपणाक्रमः
२८६ दर्शनत्रिके क्षीणे किं दर्शनातीतम् ?
२८६ सम्यक्त्वपुद्गलदृष्टान्तौ दृष्टिवस्त्रे
२८६ क्षायिकसम्यक्त्वं कथं विशुद्धतरं ?
२८७ कियत्कर्मक्षये कावस्था ?
२८८ व्य० नि० केवलोत्पत्तिसमयः
२८८ ● व्यवहारनयसमर्थनम् ।
२८८ क्रियानिष्ठाकालैक्ये
२८८ निश्चयनयसमर्थनम्
२८९ संभिन्नलोकालोके संभिन्नत्वं किम् ?
२९० सर्वं ज्ञेयं पञ्चास्तिकायपर्यायमानम्
२९१ जिनप्रवचनोत्पत्त्यादिसंग्रहः नयानुयोगौ समकं व्रजतः
२९१ व्याख्यानविधिरनुगमेऽन्तर्भूतः
२९२ द्वारविधेरादौ कथं व्याख्यानविधिः
२९३ प्रवचनोत्पत्तिः
२९३ प्रवचनाभिधानानि
२९६ प्रवचनम् सूत्रम्
२९४ कमलदृष्टान्तेन प्रवचनसूत्रार्थानाम-भेदः
२९५ त्रयाणामेकार्थता पृथग्बहुपर्यायत्वं च
,, नयभेदेन भिन्नार्थताऽभिन्नार्थता च
,, प्रवचनसूत्रयोः प्रत्येकं पञ्चैकार्थिकानि
,, श्रुतधर्मः =
,, तीर्थः =
,, मार्गः =
२९६ प्रावचनं =
२९६ सूत्र-तन्त्र-ग्रन्थाः =
२९६ पाठशास्त्रे =
२९६ ५ अनुयोगैकार्थिकानि
२९६ अनुयोगनिक्षेपाः
२९७ द्रव्याणामित्याद्यनुयोगः
२९८ क्षेत्रानुयोगः
२९९ कालानुयोगः
२९९ वचनानुयोगः
३०० भावानुयोगः
३०० अनुयोगकरणे पञ्चाभिप्रायाः
३०० अनुयोगे द्रव्यादीनां मिथः समावेशो न वा
३०१ द्रव्यादौ आधारता-आधेयता वा
३०१ अननुयोगदृष्टान्तसप्तकम्
३०१ अननुयोगे वत्सगवान्तरदृष्टान्तः अनर्थपरंपरा च
३०२ क्षेत्राद्यननुयोगे दृष्टान्ताः
३०२ क्षेत्रे कुब्जादृष्टान्तः, काले स्वाध्यायदृष्टान्तः
३०२ वचने बधिरकुटुम्बः मूर्खग्रामेयकश्च
३०३ भावाननुयोगे ७ दृष्टान्ताः
३०३ १. श्रावकभार्या
३०४ २. सार्पदिकः
३०४ ३. कोङ्कणकदारकः
३०४ ४. नकुलः
३०५ ५. कमलामेला
३०६ ६. शाम्बसाहसः
३०५ ७. श्रेणिककोपः
३०६ नियोगः
३०६ भाषा
३०६ विभाषा
३०७ वार्तिकम्
३०७ भाषा–विभाषा- वार्तिकेषु
३०७ काष्ठकर्माद्युदाहरणानि
३०७ काष्ठकर्म
३०८ पुस्तम्
३०८ चित्रम्
३०८ श्रीगृहम्
३०८ पोण्डम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३०८ देशिकः
३०८ व्याख्यानविधौ गुरुशिष्ययोग्यता-विषये गो-दृष्टान्तः
३०९ चन्दनकन्यादृष्टान्तः
३११ चेटी-(जीर्णश्रेष्ठिपुत्री) दृष्टान्तः
३१२ बधिरगोहदृष्टान्तः
३१२ टङ्कणवणिगुपमा
३१२ अयोग्यशिष्यलक्षणानि
३१२ योग्यशिष्यलक्षणानि, गुर्वाराधना - प्रक्रिया
३१३ योगायोग्यशिष्यविषयाः
३१३ १४ मुद्गशैलादिदृष्टान्ताः
३१३ १. मुद्गशैलः
३१४ अयोगस्य सूत्रार्थदाने दोषाः
३१५ २. भावितघटः
३१५ ३ चालनी
३१६ ४. परिपूणकः
३१६ ५. हंसः
३१६ ६. महिषः
३१७ ७. मेषः
३१७ ८-९. मशक-जलूके
३१७ १०. बिडाली
३१७ ११. जाहकः
३१७ १२. गौः
३१८ १३. भेरी
३१८ १४. आभीरी
३१९ ● उपोद्घातद्वाराणि
३१९ ● १. उद्देशद्वारम्
३१९ नामोद्देशः
३१९ स्थापना-द्रव्य-क्षेत्रोद्देशाः
३२२ काल-समास-अङ्गादिसमासोद्देशः
३२२ उद्देशोद्देशभावोद्देशौ
३२२ २. निर्देशद्वारम्
३२२ नाम-स्थापना द्रव्यनिर्देशाः
३२२ क्षेत्र कालनिर्देशौ
३२३ समासनिर्देशोद्देशनिर्देशौ
३२३ भावनिर्देशः प्रस्तुतोद्देशौ च
३२४ व्यवहारनये निर्देशौ
३२५ वचनं वाच्यार्थपर्यायः
३२६ ऋजुसूत्रमते निर्देशकलिङ्गं सामायिकस्य
३२६ वचनं वक्तृधर्मः
३२७ शब्दनये वचनलिङ्गभेदेऽवस्तु ।
३२७ वचनलिङ्गमेव वक्तुः
३२९ ३. निर्गमद्वारम्
३२९ निर्गमनिक्षेपाः
३२९ द्रव्यनिर्गमः
३३० कालनिर्गमः
३३१ प्रशस्ताप्रशस्तभावाः

संक्षिप्त ग्रन्थ परिचय

श्रीमद् जिनभद्रगणिक्षमाश्रमण महाराजे विशेषावश्यकभाष्य ग्रन्थनी रचना द्वारा जैन शासननी जे उत्तमोत्तम सेवा–प्रभावना करी छे तेनुं मूल्यांकन अशक्य छे. ३६०३ गाथा प्रमाण आ महाग्रन्थ अने तेनी विशालज्ञानी श्री मलधारी हेमचन्द्रसूरि महाराज कृत २८००० श्लोक प्रमाण विस्तृत टीकामां आवश्यक–सूत्र अने सामायिक अध्ययननां विविध अंग–प्रत्यंगो अने अनेक पासाओनुं ऊंडाणथी सविस्तर तर्क–युक्ति–दृष्टान्तोथी भरपूर विवेचन कोइ पण बुद्धिशाळीने अहोभाव जगाडी जाय तेवुं छे ।

केटला बधा विषयो आ ग्रन्थमां संकळायेला छे एनो आ ग्रन्थनी विस्तृत विषयसूचि जोनारने सहज ख्याल आवी जशे. संक्षेपमां विषयो आ प्रमाणे छे. प्रारम्भमां मंगळवाद, त्यारबाद पृष्ठ २०० सुधी विस्तृत ज्ञानपंचक प्ररुपणा, ते पछी आवश्यकनो नामादिनिक्षेपथी विचार, श्रुतपदना नामादि निक्षेपो, ते पछी अनुयोगना उपक्रम–निक्षेप–अनुगम अने नय द्वारोनुं विस्तारथी विवरण छे. एमां उपक्रमना नामादि छ निक्षेप, ओघनिष्पन्नादि त्रण निक्षेपनुं द्वार अने अनुगममां उपोद्घातनिर्युक्तिनो सुंदर विस्तार छे. त्यारबाद निर्युक्तिकारनी 'तित्थयरे भगवंते' वाळी मंगलगाथाना विवरणमां तीर्थपदनुं विवेचन सुंदर छे. सामायिक निर्युक्तिना प्रारम्भमां ज्ञान–चारित्रनो गौण–मुख्य भाववाद, ग्रन्थिभेद, सम्यक्त्व–देशविरति तथा सर्वविरति सामायिकादि पांच प्रकारना चारित्र तथा अनुयोग शब्दना नामादि ६ निक्षेप–अननुयोगना नामादि ६ निक्षेप अने एमां श्रावकभार्या वगेरेना सात दृष्टान्तो मननीय छे. त्यार बाद व्याख्यानविधिमां गोणी वगेरे छ दृष्टान्त तथा शिष्यनी योग्यता–अयोग्यताना विचारमां मगशेलीयो पत्थर वगेरे १४ दृष्टान्तो रोचक छे. सामायिकना उपोद्घातमां उद्देशादि २६ द्वारोनुं विस्तृत विवेचन, एमां निर्गम द्वारमां छेल्ले सम्पूर्ण गणधरवाद गूंथी लीधो छे. नयद्वार पण घणुं सरस छे अने एना समवतार द्वार पछी सप्तनिह्नववाद अने ए पछी बोटीक–दिगम्बर वाद प्रासंगिक गूंथी लेवायो छे. सूत्र स्पर्शिकनिर्युक्ति प्रारम्भ करतां नमस्कार महामन्त्रनुं उत्पत्ति आदि १२ द्वारथी विवेचन अने ते पछी सामायिकना 'करेमि' पदथी 'करण'नुं विस्तृत विवेचन अने शेष सामायिक सूत्रना पदोनुं विवरण, आ बधा गूढ अने हृदयंगम विषयोनी तात्त्विक चर्चा अने छणावटथी साचे ज आ ग्रन्थ जैन शासननो सार प्राप्त करवा माटे कूंची समान बनी रहे तेवो छे.

दिव्य दर्शन ट्रस्ट तरफथी पुनर्मुद्रित करवामां आवेल आ ग्रन्थनुं प्रकाशन सर्व जीवोनुं कल्याण करतो यावच्चन्द्र दिवाकरौ झळहळ्या करे एज शुभेच्छा.

–मुनि जयसुंदरविजय

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ अर्हम् ॥

पूज्यपादश्रीजिनभद्रगणिक्षमाश्रमणविरचितम्

पू० मलधारिश्रीहेमचन्द्रसूरिविरचितया शिष्यहितानाम्न्या

बृहद्वृत्त्या विभूषितम् ।

॥ श्री विशेषावश्यकभाष्यम् ॥

(भागः-१)

श्रीसिद्धार्थनरेन्द्रविश्रुतकुलव्योमप्रवृत्तोदयः सद्बोधांशुनिरस्तदुस्तरमहामोहान्धकारस्थितिः ।
दृष्टाशेषकुवादिकौशिककुलप्रीतिप्रणोदक्षमो जीयादस्खलितप्रतापतरणिः श्रीवर्धमानो जिनः ॥ १ ॥

येन क्रमेण कृपया श्रुतधर्म एष आनीय मादृशजनेऽपि हि संप्रणीतः ।
श्रीमत्सुधर्मगणभृत्प्रमुखं नतोऽस्मि तं सूरिसङ्घमनघं स्वगुरूंश्च भक्त्या ॥ २ ॥
आवश्यकप्रतिनिबद्धगभीरभाष्यपीयूषजन्मजलधिर्गुणरत्नराशिः ।
ख्यातः क्षमाश्रमणतागुणतः क्षितौ यः सोऽयं गणिर्विजयते जिनभद्रनामा ॥ ३ ॥
यस्याः प्रसादपरिवर्धितशुद्धबोधाः पारं व्रजन्ति सुधियः श्रुततोयराशेः ।
सानुग्रहा मयि समीहितसिद्धयेऽस्तु सर्वज्ञशासनरता श्रुतदेवताऽसौ ॥ ४ ॥

इह चरणकरणक्रियाकलापतरुमूलकल्पं सामायिकादिषडध्ययनात्मकश्रुतस्कन्धरूपमावश्यकं तावदर्थतस्तीर्थकरैः, सूत्रतस्तु गणधरैर्विरचितम् । अस्य चातीव गम्भीरार्थतां सकलसाधु-श्रावकवर्गस्य नित्योपयोगितां च विज्ञाय चतुर्दशपूर्वधरेण श्रीमद्भद्रबाहुस्वामिनैतद्व्याख्यानरूपा " आभिणिबोहिअनाणं सुयनाणं चेव ओहिनाणं च " इत्यादिप्रसिद्धग्रन्थरूपा निर्युक्तिः कृता । तन्मध्ये च सामायिकाध्ययननिर्युक्तिं विशेषत एवातिबहुविचारदुर्विज्ञेयार्थामतिशयोपकारिणीं चावगम्य केवलामृतरसस्यन्दिवाग्विलासैः श्रीमज्जिनभद्रगणिक्षमाश्रमणपूज्यैस्तदर्थव्याख्याऽऽत्मकमेव 'कयपवयणप्पणामो' इत्यादिगाथासमूहस्वरूपं भाष्यमकारि । तस्य च यद्यपि श्रीजिनभद्रगणिक्षमाश्रमणपूज्यैः, श्रीकोट्याचार्यैश्च वृत्तिर्विहिता वर्तते, तथाऽप्यतिगम्भीरवाक्यात्मकत्वात्, किञ्चित्संक्षेपरूपत्वाच्च दुःषमानुभावतः प्रज्ञादिभिरपचीयमानानां किमपिविस्तराभिधानरुचीनां शिष्याणां नाऽसौ तथाविधोपकारं सांप्रतभावातुं क्षमा; इति विचिन्त्य मुत्कलतरवाक्यप्रबन्धरूपा किमपिविस्तरवती च मन्दमतिनाऽपि मया मन्दतममतिशिष्यावबोधार्थं, श्रुताभ्याससंपादनार्थं च वृत्तिरियमारभ्यते।

तत्र चादौ तावद् विघ्नविनायकोपशमहेतोर्मङ्गलार्थं, शिष्यप्रवृत्तिनिमित्तमभिधेयाद्यभिधानार्थं चाह भाष्यकारः–

कयपवयणप्पणामो वोच्छं चरण-गुणसंगहं सयलं । आवस्सयाणुओगं गुरूवएसाणुसारेणं ॥ १ ॥

व्याख्या– ' वोच्छं ' इति क्रिया, वक्ष्येऽभिधास्य इत्यर्थः । कम् ? इत्याह– 'आवस्सयाणुओगं ति ' अवश्यं कर्तव्यमावश्यकं सामायिकादिरूपम्, क्वचित् 'आवासयाणुओगं' इति पाठः, तत्राऽपि आ समन्ताज्ज्ञानादिगुणैः शून्यं जीवं वासयति तैर्युक्तं करोतीत्यावासकं सामायिकादिरूपमेव, तस्य वक्ष्यमाणशब्दार्थोऽनुयोगो व्याख्यानं विधि-प्रतिषेधाभ्यामर्थप्ररूपणमित्यर्थः, तम् । किंविशिष्टः सन् ? इत्याह– ' कयपवयणप्पणामो त्ति ' प्रोच्यन्तेऽनेन, अस्मात्, अस्मिन् वा जीवादयः पदार्था इति प्रवचनम् ; अथवा प्रशब्दस्याऽव्ययत्वेनाऽनेकार्थद्योतकत्वात् प्रगतं जीवादिपदार्थव्यापकं, प्रधानं, प्रशस्तम्, आदौ वा वचनं प्रवचनं द्वादशाङ्गं गणिपिटकम् ; आदित्वं चाऽस्य विवक्षिततीर्थकरापेक्षया द्रष्टव्यम्, " नमस्तीर्थाय " इति वचनात् तीर्थकरेणाऽपि तन्नमस्करणादिति। अथवा जीवादितत्त्वं प्रवक्तीति प्रवचनमिति व्युत्पत्तेर्द्वादशाङ्गम्, गणिपिटकोपयोगानन्यत्वाद् वा चतुर्विधश्रीश्रमणसङ्घोऽपि प्रवचनमुच्यते । कृतो विहितो यथोक्तप्रवचनस्य प्रणामो नमस्कारो येन मया सोऽहं कृतप्रवचनप्रणामः। किंस्वरूपमावश्यकानुयोगम् ? इत्याह– ' चरण-गुणसंगहं ति ' चर्यते मुमुक्षुभिरासेव्यत इति चरणम्, अथवा चर्यते गम्यते प्राप्यते भवोदधेः परकूलमनेनेति चरणं व्रत-श्रमणधर्मादयो मूलगुणाः, गुण्यन्ते संख्यायन्त इति गुणाः पिण्डविशुद्ध्याद्युत्तरगुणरूपाः, चरणं च गुणाश्च चरणगुणाः; अथवा चरणशब्देन सर्वतो देशतश्च चारित्रमिह विवक्षितम्, गुणशब्देन तु दर्शनज्ञाने, ततश्च चरणं च गुणौ च चरणगुणाः, तेषां संगृहीतिः संग्रहश्चरणगुणसंग्रहः, तम् । स च देशतोऽपि भवतीत्याह– सकलं परिपूर्णम् ॥

१ ख. 'रूपाव' । २ ख. 'गभीरा' । ३ आभिनिबोधिकज्ञानं (मतिज्ञानं) श्रुतज्ञानं चैवाऽवधिज्ञानं च ४ घ. 'स्वरूपा' ।

१ ख. 'भव्यानां' । २ कृतप्रवचनप्रणामो वक्ष्ये चरणगुणसंग्रहं सकलम् । आवश्यकानुयोगं गुरूपदेशानुसारेण ॥ १ ॥ ३ घ. 'समन्ततो ज्ञा' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आह– नन्वावश्यकानुयोगस्तावदावश्यकव्याख्यानम्, चरण-गुणसंग्रहस्तु ज्ञान-दर्शन-चारित्रसंगृहीतिरूपः, ततोऽत्यन्तं भिन्नाधिकरणत्वात् कथमनयोः सामानाधिकरण्यम् ?। सत्यम्, किन्तु "सामाइअं च तिविहं सम्मत्तं सुअं तहा चरित्तं च" इत्यादिवक्ष्यमाणवचनादेकोऽपि सामायिकानुयोगस्तावत् संपूर्णचरण-गुणसंग्राहकः, किं पुनः सकलावश्यकानुयोगः ?। ततश्च संपूर्णचरण-गुणसंग्रहयुक्तत्वादावश्यकानुयोगोऽपि संपूर्णचरण-गुणसंग्रहत्वेनोक्तः, यथा दण्डयोगाद् दण्डः पुरुषः; इत्यदोषः। अथवा चरण-गुणानां संग्रहो यत्रावश्यकानुयोगेऽसौ चरण-गुणसंग्रह इति बहुव्रीहिपक्षे प्रेर्यमेव नास्ति, केवलमस्मिन् पक्षे सकलमिति विशेषणमावश्यकानुयोगस्य चरण-गुणसंग्रहसंपूर्णत्वापेक्षयैव द्रष्टव्यमिति, एतच्च कष्टगम्यमित्युपेक्ष्यते ॥

आह–ननु यदि "सामाइअं च तिविहं" इत्यादिवक्ष्यमाणवचनात् सामायिकस्य संपूर्णचरण-गुणसंग्राहकत्वम्, तर्हि तदनुयोगस्य तद्रूपत्वे किमायातम् ?। नैतदेवम्, सामायिकं हि व्याख्येयम्, अनुयोगस्तु व्याख्यानम्, व्याख्येय-व्याख्यानयोश्चैकाभिप्रायत्वादिहाऽभेदेन विवक्षितत्वाददोषः; इत्यलमतिचर्चयेति ॥

अनेन च संपूर्णचरण-गुणसंग्रहलक्षणेन स्वरूपविशेषणेनाऽऽवश्यकानुयोगस्य महार्थतां दर्शयति भाष्यकारः ॥

आह– ननु यदि त्वयाऽऽवश्यकानुयोगः स्वमनीषिकया वक्ष्यते, तदाऽनादेय एवायं प्रेक्षावताम्, छद्मस्थत्वे सति स्वतन्त्रतयाऽभिधीयमानत्वात्, रथ्यापुरुषवाक्यवत्; इति परवचनमाशङ्क्य तदुपन्यस्तहेतोरसिद्धतामुपदर्शयन्नाह– 'गुरूवएसाणुसारेणं ति' गृणन्ति तत्त्वमिति गुरवस्तीर्थकर–गणधरादयः, तेषामुपदेशो भणनम्, तदनुसारेण तत्पारतन्त्र्येणाऽऽवश्यकानुयोगमहं वक्ष्ये, न तु स्वमनीषिकया; अतः स्वतन्त्रतयाऽभिधीयमानत्वादित्यसिद्धो हेतुरिति भावः। यो हि च्छद्मस्थः सन् परमगुरूपदेशानपेक्षं स्वतन्त्रमेव वक्ति रथ्यापुरुषस्येव, तस्य वचोऽनादेयमिति वयमपि मन्यामहे, केवलं तदिह नास्ति, परमगुरूपदेशानुसारेणैवाऽऽवश्यकानुयोगस्य मयाऽभिधीयमानत्वादिति। तदेवं कृतप्रवचनप्रणामो गुरूपदेशनिश्रया सकलचरण-गुणसंग्रहरूपमावश्यकानुयोगमहं वक्ष्य इति पिण्डार्थः॥

आह–ननु श्रीमद्भद्रबाहुप्रणीता सामायिकनिर्युक्तिरिह भाष्ये व्याख्यास्यते, तत्कथमिदमावश्यकानुयोगोऽभिधीयते ?। नैतदेवम्, अभिप्रायाऽपरिज्ञानात्, तथाहि–सामायिकस्य षड्विधावश्यकैकदेशत्वादावश्यकरूपता तावद् न विरुध्यते, तन्निर्युक्तिस्तु तद्व्याख्यानरूपैव, व्याख्येय-व्याख्यानयोश्चैकाभिप्रायत्वादेकत्वमित्यनन्तरमेवोक्तम्। तस्मात् सामायिकस्य तन्निर्युक्तेश्च सर्वस्याऽप्यावश्यकत्वात्, तस्य चेह व्याख्यायमानत्वादावश्यकानुयोगरूपता भाष्यस्य न विहन्यते; इत्यलं विस्तरेण ॥

अस्याश्च गाथायाः प्रथमपादेन विघ्नसंघातविघातार्थं मङ्गलहेतुत्वादिष्टदेवतानमस्कारः कृतः, शेषपादत्रयेण त्वभिधेय-प्रयोजन-संबन्धाभिधानमकारि। तत्रावश्यकानुयोगं वक्ष्य इति ब्रुवताऽऽवश्यकानुयोगोऽस्य शास्त्रस्याऽभिधेय इति साक्षादेवोक्तम्। प्रयोजन-संबन्धौ तु सामर्थ्यादुक्तौ, तथाहि–संपूर्णचरण-गुणसंग्राहकत्वं दर्शयता ज्ञान-दर्शन-चारित्राधारताऽस्य शास्त्रस्य दर्शिता भवति, तद्रूपाणि च शास्त्राणि पठन-श्रवणादिभिरनुशील्यमानानि स्वर्गा-ऽपवर्गप्राप्तिनिबन्धनानि भवन्तीति प्रतीतमेव, अतः स्वर्ग-मोक्षफलावाप्तिरस्य शास्त्रस्य प्रयोजनमिति सामर्थ्यादुक्तं भवति। अभिधेया-ऽभिधायकयोश्च वाच्य-वाचकभावलक्षणः संबन्धोऽप्यर्थादभिहितो भवति। अस्यां च संबन्ध-प्रयोजना-ऽभिधेयादिचर्चायां बह्वपि वक्तव्यमस्ति, केवलं बहुषु शास्त्रेष्वतिचर्चितत्वेन सुप्रतीतत्वात्, तथाविधसाध्यशून्यत्वाच्च नेहोच्यते। अनेन चाभिधेयाद्यभिधानेन शास्त्रश्रवणादौ शिष्यप्रवृत्तिः साधिता भवति, अन्यथा हि न श्रवणादियोग्यमिदम्, निरभिधेयत्वात्, काकदन्तपरीक्षावत्; इत्याशङ्क्य नेह कश्चित् प्रवर्तते। उक्तं च—

"सीसेपवित्तिनिमित्तं अभिधेयपओयणाइं संबंधो। वत्तव्वाइं सत्थे तस्सुन्नत्तं सुणिज्जिहरा" ॥ १ ॥

एवं मङ्गलाद्यभिधाने व्यवस्थापिते कश्चिदाह– नन्वर्हदादय एवेष्टदेवतात्वेन प्रसिद्धाः, तत्किमिति तान् विहाय ग्रन्थकृता प्रवचनस्य नमस्कारः कृतः ? इति। अत्रोच्यते– "नमस्तीर्थाय" इति वचनादर्हदादीनामपि प्रवचनमेव नमस्करणीयम्, अपरं चार्हदादयोऽप्यस्मदादिभिः प्रवचनोपदेशेनैव ज्ञायन्ते, तीर्थमपि च चिरकालं प्रवचनावष्टम्भेनैव प्रवर्तते, इत्यादिविवक्षयाऽर्हदादिभ्योऽपि प्रवचनस्य प्रधानत्वात्, ज्ञानादिगुणात्मकत्वाच्चेष्टदेवतात्वं न विरुध्यते। प्रवचननमस्कारं च कुर्वद्भिः पूज्यैः सिद्धान्ततत्त्वावगमरसानुरञ्जितहृदयत्वादात्मनः प्रवचनभक्त्यतिशयः प्रख्यापितो भवति, इत्यलमतिविस्तरेण। मङ्गलादिविचारविषये ह्याक्षेपपरिहारादिकमिहैव ग्रन्थकारोऽपि न्यक्षेण वक्ष्यतीति ॥

तदेवमियं गाथा, सर्वोऽपि चायं ग्रन्थो महामतिभिः पूर्वसूरिभिर्गम्भीरवाक्यप्रबन्धैर्व्युत्पन्नभणितिप्रकारेण च व्याख्यातः। तच्च व्याख्यानमित्थं युक्तमपि "गौराङ्ग्यां गौरत्वपाण्डुरोग-" न्यायेन मतिमान्द्यात् सांप्रतकालीनशिष्याणां न तथाविधार्थावगमहेतुतां प्रतिपद्यते, इत्याकलय्य मन्दमतिनाऽपि मया तेषां मन्दतरमतीनां शिष्याणामर्थावगमनिमित्तममुना ऋजुभणितिप्रकारेणेयं गाथा व्या-

---

१ सामायिकं च त्रिविधं सम्यक्त्वं श्रुतं तथा चारित्रं च।

२ "अत्राऽऽत्वारलोपः, आर्षत्वात्" इत्यावश्यकनिर्युक्तिटीकायामस्या एव गाथाया विवरणे श्रीमन्मलयगिरिसूरिः। ३ ध. 'स्याप्यस्या'।

१ ख. 'व्यपोहार्थं'। २ ख. 'सामर्थ्यतो गम्यौ'। ३ क. ग. 'चर्यायां'।

४ शिष्यप्रवृत्तिनिमित्तमभिधेय-प्रयोजने संबन्धः। वक्तव्यानि शास्त्रे तच्छून्यत्वं शृणुयादितरथा ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ख्याता, सर्वोऽपि च ग्रन्थोऽयमनेनोल्लेखेन व्याख्यास्यत इति प्रतिपत्तव्यम् । न च वक्तव्यम्- येषां महामतिपूर्वपुरुषवचनैरर्थावबोधो न संपद्यते, तेषां मन्दबुद्धेर्भवतो वचनेन कुतोऽयं संपत्स्यते ? इति ; यतो जायत एव समानशीलवचनैः समानशीलानामर्थप्रतिपत्तिः, यदाह—

" गामिल्लुआण गामिल्लुएहिं मिच्छाण होन्ति मिच्छेहिं । सम्मं पंडिवत्तीउ अत्थस्स न विबुहभणिएहिं ॥ १ ॥
निअभासाए भणंते समाणसीलम्मि अत्थपडिवत्ती । जायइ मंदस्स वि न उण विबुहसक्कयपबंधेहिं " ॥ २ ॥

इत्यलमतिबहुभाषितेन ॥ इति गाथार्थः ॥ १ ॥

आवश्यकानुयोगोऽत्राऽभिधास्यत इत्युक्तम्, किं पुनरस्य फलादिकं, यदवगम्य वयं तच्छ्रवणादौ प्रवर्तामहे ?; इति प्रेक्षावच्छिष्यवचनमाशङ्क्याऽऽवश्यकानुयोगस्य फलादीन्यभिधित्सुस्तत्संग्रहपरां द्वारगाथामाह—

तस्स फल-जोग-मंगल-समुदायत्था तहेव दाराइं । तब्भेय-निरुत्त-क्कम-पओयणाइं च वच्चाइं ॥ २ ॥

व्याख्या—तस्येत्यावश्यकानुयोगस्य, प्रेक्षावतां प्रवृत्तिनिमित्तं फलं मोक्षप्राप्तिलक्षणं तावदत्र ग्रन्थे वक्तव्यम् । ततोऽस्य योगः शिष्यप्रदाने संबन्धोऽवसरः प्रस्तावो वाच्यः । आवश्यकानुयोगे च क्रियमाणे किं मङ्गलमित्येतदपि निरूपणीयम् । सामायिकाद्यध्ययनानां 'सावज्जजोगविरई उक्कित्तण गुणवओ य पडिवत्ती' इत्यादिगाथया समुदायार्थश्च सावद्ययोगविरत्यादिकोऽभिधानीयः । फलं च योगश्च मङ्गलं च समुदायार्थश्चेति समासः । ' तहेव दाराइं ति ' तथा द्वाराणि चोपक्रमनिक्षेपादीनि कथनीयानि । तेषां द्वाराणां भेदो वक्तव्यः, तद्यथा—आनुपूर्वी-नाम-प्रमाण-वक्तव्यता-ऽर्थाधिकार-समवतारभेदादुपक्रमः षोढा, ओघनिष्पन्न-नामनिष्पन्न-सूत्रालापकनिष्पन्नभेदाद् निक्षेपस्त्रिधा, सूत्र-निर्युक्तिभेदादनुगमो द्विधा, नैगमादिभेदाद् नयाः सप्तविधा इत्यादि । उपक्रमणमुपक्रमः, निक्षेपणं निक्षेप इत्यादि । निरुक्तं च शब्दव्युत्पत्तिरूपं भणनीयम् । तथा 'कम त्ति' तेषामुपक्रमादिद्वाराणां प्रथममुपक्रम एव ततो यथाक्रमं निक्षेपादय एव, इत्येवंरूपो योऽसौ नियतः क्रमः स युक्त्याऽभिधानतो निर्देष्टव्यः, युक्तिं चात्रैव वक्ष्यति; तद्यथा—नानुपक्रान्तं निक्षिप्यते, नाऽ-

---

१ ग्रामीणानां ग्रामीणैर्म्लेच्छानां भवन्ति म्लेच्छैः । सम्यक् प्रतिपत्तयोऽर्थस्य न विबुधभाणितैः ॥ १ ॥
निजभाषया भणति समानशीलेऽर्थप्रतिपत्तिः । जायते मन्दस्यापि न पुनर्विबिधसंस्कृतप्रबन्धैः ॥ २ ॥

२ घ. 'हुन्ति' । ३ घ. 'पडिवत्तीओ' । ४ घ. 'विबुह' ।

५ तस्य फल-योग-मङ्गल-समुदायार्थास्तथैव द्वाराणि । तद्भेद-निरुक्त-क्रम-प्रयोजनानि च वाच्यानि ॥ २ ॥

६ सावद्ययोगविरतिरुत्कीर्तनं गुणवतश्च प्रतिपत्तिः ।

निक्षिप्तमनुगम्यत इत्यादि । तथोपक्रमादिद्वाराणामेव प्रयोजनं शास्त्रोपकाररूपं नगरदृष्टान्तेन वाच्यम्, यथा सप्राकारं महानगरं किमप्यकृतद्वारं लोकस्याऽनाश्रयणीयं भवति, एकादिद्वारोपेतमपि दुःखनिर्गमप्रवेशं जायते, चतुर्द्वारोपेतं तु सर्वजनाभिगमनीयं सुखनिर्गमप्रवेशं च संपद्यते; एवं शास्त्रमप्युपक्रमादिचतुर्द्वारयुक्तं सुबोधम्, सुखचिन्तन-धारणादिसंपन्नं च भवतीति । एवमुपक्रमादिद्वाराणां सुखावबोधादिरूपः शास्त्रोपकारः प्रयोजनमिह वक्ष्यत इति भावः । भेदश्च निरुक्तं च क्रमश्च प्रयोजनं चेति द्वन्द्वं कृत्वा पश्चात् तेषामुपक्रमादिद्वाराणां भेद-निरुक्त-क्रम-प्रयोजनानीत्येवं षष्ठीतत्पुरुषसमासो विधेयः । चः समुच्चये । वाच्यानीति यथायोगमर्थतः सर्वत्र योजितमेव । इति द्वारगाथासंक्षेपार्थः ॥ २ ॥

विस्तरार्थं तु भाष्यकार एव दिदर्शयिषुः "यथोद्देशं निर्देशः" इति कृत्वा प्रेक्षावतां प्रवृत्त्यर्थमावश्यकानुयोगफलप्रतिपादिकां तावद् गाथामाह—

नाण-किरियाहिं मोक्खो तम्मयमावस्सयं जओ तेण । तव्वक्खाणारम्भो कारणओ कज्जसिद्धि त्ति ॥ ३ ॥

व्याख्या—ज्ञानं च सम्यगवबोधरूपम्, क्रिया च तत्पूर्वकसावद्या-ऽनवद्ययोगनिवृत्ति-प्रवृत्तिरूपा ज्ञानक्रिये, ताभ्यां तावद् मोक्षोऽशेषकर्ममलकलङ्काभावरूपः साध्यते, इति सर्वेषामपि शिष्टानां प्रमाणसिद्धमेव, दर्शनस्य ज्ञान एवाऽन्तर्निहितत्वादिति । यदि नाम ज्ञान-क्रियाभ्यां मोक्षः, तर्हि आवश्यकानुयोगस्य किमायातम्, येन फलवत्तया प्रेक्षावतां तत्र प्रवृत्तिः स्यात् ?; इत्याह—तन्मयमावश्यकम्—ताभ्यां ज्ञान-क्रियाभ्यां निर्वृत्तं तन्मयं ज्ञान-क्रियास्वरूपमावश्यकम्, तत्कारणत्वात्; इति भावः । यथा ह्यायुर्वृद्धिकारणत्वेनोपचाराल्लोके घृतमायुरुच्यते, नड्वलोदकं पादरोगः कारणत्वात् तथैवाऽभिधीयते, एवं प्रस्तुतानुयोगविषयीकृतं सामायिकादिषडध्ययनसूत्रात्मकमावश्यकमपि सम्यग्ज्ञान-क्रियाकारणत्वात् तत्स्वरूपमेव, तदध्ययन-श्रवण-चिन्तन-तदुक्ताचरणप्रवृत्तानामवश्यं सम्यग्ज्ञान-क्रियाप्राप्तेः। तस्मादुक्तन्यायेन ज्ञान-क्रियाऽऽत्मकं यत आवश्यकम्, अतस्तस्याऽऽवश्यकस्य व्याख्यानमनुयोगस्तद्व्याख्यानं तस्याऽऽरम्भः प्रेक्षावता क्रियमाणो न विरुध्यते, आवश्यकात् सम्यग्ज्ञान-क्रियाप्राप्तिद्वारेण मोक्षलक्षणफलसिद्धेः ॥

नन्वित्थं तर्हि आवश्यकात् सम्यग्ज्ञान-क्रियाप्राप्तिः, ताभ्यां च मोक्षलक्षणफलसिद्धिः, इत्येवमावश्यकस्यैव पारम्पर्येण मोक्षावाप्तिफलं स्यात्, न पुनस्तदनुयोगस्य; फलचिन्ता त्वस्यैवेह प्रस्तुता, इति चेत् । सत्यम्, किन्त्वावश्यकं व्याख्येयम्, तद्व्याख्यानं चानुयोगः, व्याख्याने च व्याख्येयगत एव सर्वोऽभिप्रायः प्रकटीक्रियते; अतो व्याख्येयस्य यत्फलम्, व्याख्यानस्य त

१ ज्ञानक्रियाभ्यां मोक्षस्तत्सयमावश्यकं यतस्तेन । तद्व्याख्यानारम्भः कारणतः कार्यसिद्धिरिति ॥ ३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुतरामवसेयम् , तयोरेकाभिप्रायत्वात् । तस्माद् मोक्षलक्षणं फलमभिवाञ्छताऽऽवश्यकानुयोगेऽवश्यं प्रवर्तितव्यमेव, ततोऽपि ज्ञान-क्रियाप्राप्तेः, ताभ्यां च मोक्षफलसिद्धिरिति ॥

यदि नाम आवश्यकानुयोगतो ज्ञान-क्रियाऽवाप्तिः, ताभ्यां च मोक्षसिद्धिः, तथापि किमिति तत्र प्रवर्तितव्यम् , न पुनर्यत्र कुत्रचित् षष्टितन्त्रादौ ?; इत्याह– कारणात् कार्यसिद्धिः, नाऽकारणादिति कृत्वा; कारणे हि सुविवेचिते प्रवर्तमानाः प्रेक्षावन्तः समीहितमप्रतिहतं कार्यमासादयन्ति; नाऽकारणे, अन्यथा तृणादपि हिरण्य-मणि-मौक्तिकाद्यवाप्तेः सर्वे विश्वमदरिद्रं स्यात् । कारणं च पारम्पर्येणावश्यकानुयोग एव मोक्षस्य, न षष्टितन्त्रादिकम् , ज्ञान-क्रियाजननद्वारेण तस्य मोक्षसंसाधकत्वात् , इतरस्य तु पारम्पर्येणाऽपि तदसाधकत्वात् ॥ इति गाथार्थः ॥ उक्तं फलद्वारम् ॥ ३ ॥

अथ योगद्वारमभिधित्सुराह—

भव्वस्स मोक्खमग्गाहिलासिणो ठियगुरूवएसस्स । आईए जोग्गमिणं बाल-गिलाणस्स वाऽऽहारं ॥ ४ ॥

व्याख्या–यदादौ प्रतिज्ञातम्– शिष्यप्रदानेऽस्य योगोऽवसरो वाच्य इति । तत्राह– समस्तद्वादशाङ्गस्यध्ययनकालस्यादौ प्रथममिदं षड्विधमावश्यकं योग्यमुपदिशन्ति मुनयः, शेषसमग्रश्रुतप्रदानकालस्यादौ प्रथममेवाऽऽवश्यकप्रदानस्याऽवसर इति भावः । कस्य पुनरिदमावश्यकं योग्यमादिशन्ति मुनयः ?, इत्याह– भव्यस्य मुक्तिगमनयोग्यस्य जन्तोः । स च कश्चिद् दूरभव्योऽसंजातमोक्षमार्गाभिलाषोऽपि भवति, तद्व्यवच्छेदार्थमाह– मोक्षमार्गः सम्यग्ज्ञान-दर्शन-चारित्ररूपस्तमुत्तरोत्तरविशुद्धिरूपमभिलषितुं शीलमस्य स तथा तस्य । अयं चैवंविधोऽपरिणतगुरूपदेशोऽपि स्यात् , तन्निरासार्थमाह– स्थितः कर्तव्यतया परिणतो गुरूपदेशो यस्याऽसौ स्थितगुरूपदेशस्तस्य । किं यथायोग्यमुपदिशन्ति ?, इत्याह– बालग्लानयोरिवाऽऽहारं यथोपदिशन्ति, भिषज इति गम्यते । इदमुक्तं भवति– यथाऽऽदौ बालस्य कोमल-मधुरादिकम्, ग्लानस्य च पेया-मुद्ग-यूषादिकं तत्कालोचितमुत्तरोत्तरबलपुष्ट्यादिहेतुमाहारं योग्यं भिषजः समुपदिशन्ति, तथेहापि भव्यादिविशेषणविशिष्टस्य जन्तोरादाविदमेवाऽऽवश्यकमुत्तरोत्तरगुणवृद्धिहेतुभूतं योग्यमुपदिशन्ति तीर्थकर-गणधरा इति । आवश्यकस्य चादौ शिष्यप्रदानावसरे प्रतिपादिते तदनुयोगस्याऽसौ प्रतिपादित एव द्रष्टव्यः, तयोरेकत्वस्याऽनन्तरमेवाऽऽख्यातत्वात् ॥ इति गाथार्थः ॥ ४ ॥

आह– ननु यस्य भव्यादिविशेषणविशिष्टस्याऽऽदौ योग्यमिदमावश्यकम् , तस्मै योग्यमित्येतावन्मात्रमेव ज्ञात्वा तद् ददत्या-

१ भव्यस्य मोक्षमार्गाभिलाषिणः स्थितगुरूपदेशस्य । आदौ योग्यमिदं बाल–ग्लानयोरिवाऽऽहारम् ॥ ४ ॥

चार्याः, आहोस्विदन्योऽपि तत्र कश्चिद् विधिरपेक्षणीयः ?। इति शिष्यवचनमाशङ्क्याऽस्मिन्नेव योगद्वारे तद्दानविधानादि किञ्चिल्लेशतः प्रासङ्गिकमभिधित्सुराह—

कयपंचनमोक्कारस्स दिन्ति सामाइयाइयं विहिणा । आवासयमायरिया कमेण तो सेसयसुयं पि ॥ ५ ॥

व्याख्या– भव्यादिविशेषणविशिष्टस्यापि शिष्यस्य कृतपञ्चनमस्कारस्य चतुर्थ्यर्थे षष्ठी– कृतपञ्चनमस्काराय मङ्गलार्थमुच्चारितपञ्चनमस्कृतिमङ्गलायेत्यर्थः । सामायिकादिकमावासकं विधिना प्रशस्तं द्रव्य-क्षेत्र-काल-भावरूपेण, प्रशस्तदिगभिमुखव्यवस्थापनादिरूपेण च समयोक्तेन ददत्याचार्याः, न पुनर्योग्यमित्येतावन्मात्रकमेव ज्ञात्वेति भावः । तत ऊर्ध्वमस्मै किं न किञ्चिद् ददति ?, इत्याह– क्रमेण ततः शेषकमप्याचारादि श्रुतं प्रयच्छन्ति यावच्छ्रुतोदधेः पारम् ॥ इति गाथार्थः ॥ ५ ॥

आवश्यकानुयोगप्रदानेऽप्ययमेव विधिरित्यावेदयितुमाह—

तेणेव याऽणुओगं कमेण तेणेव याऽहिगारोऽयं । जेण विणेयहियत्थाय थेरकप्पक्कमो एसो ॥ ६ ॥

चकारोऽपिशब्दार्थः, भिन्नक्रमश्च; ततस्तेनैव पञ्चनमस्कारकरणादिना क्रमेणाऽनुयोगमपि सूत्रव्याख्यानरूपम् , ददत्याचार्या इति वर्तते, अनयोश्च सूत्रप्रदानक्रमा-ऽनुयोगप्रदानक्रमयोर्मध्ये तेनैव प्रस्तुतगाथाप्रक्रान्तेनाऽनुयोगप्रदानक्रमेणाऽयमस्मदभिमतोऽधिकारः, अनुयोगस्यैवेह प्रस्तुतत्वात् , इति भावः । कुतः पुनरिहानुयोगप्रदानक्रमेणैवाऽधिकारः ?, इत्याह– येन कारणेन विनेयहितार्थं शिष्यवर्गस्योत्तरोत्तरगुणप्राप्तिमपेक्ष्येत्यर्थः, स्थविराणां गच्छवासिनां साधूनां योऽसौ कल्पः समाचारविशेषस्तस्यैषोऽनन्तरगाथानिर्दृश्यमाणलक्षणः क्रमः परिपाटीरूपः, तेन कारणेनाऽनुयोगप्रदानक्रमेणैवेहाऽधिकारोऽयमिति ॥ ६ ॥

कः पुनरसौ स्थविरकल्पक्रमः ? इत्याह–

पव्वज्जा-सिक्खावयम-ऽत्थग्गहणं च अनिअओ वासो । निप्फत्ती य विहारो सामायारीठिई चेव ॥ ७ ॥

इह स्थविराणामयं क्रमो यदुत–प्रथमं तावद् योग्याय विनीतशिष्याय विधिवद्दापिताऽऽलोचनाय प्रशस्तेषु द्रव्यादिषु स्वयं

१ कृतपञ्चनमस्काराय ददति सामायिकादिकं विधिना । आवासकमाचार्याः क्रमेण ततः शेषकश्रुतमपि ॥ ५ ॥ ४ ठिई - दि-दृ॥

२ तेनैव चानुयोगं क्रमेण तेनैव चाऽधिकारोऽयम् । येन विनेयहितार्थं स्थविरकल्पक्रम एषः ॥ ६ ॥

३ प्रव्रज्या–शिक्षापदम-ऽर्थग्रहणं चानियतो वासः । निष्पत्तिश्च विहारः सामाचारीस्थितिश्चैव ॥ ७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुणगुरुस्थितेन गुरुणा विधिनैव प्रव्रज्या प्रदातव्या । ततः शिक्षापदमिति शिक्षायाः पदं स्थानं शिक्षापदम्, शिक्षैव वा पदं स्थानं शिक्षापदम्; विधिना प्रव्रजितस्य शिष्यस्य ततः शिक्षाऽधिकारो भवतीत्यर्थः। सा च शिक्षा द्विविधा–ग्रहणशिक्षा, आसेवनाशिक्षा च । तत्र द्वादश वर्षाणि यावत् सूत्रं त्वयाऽध्येतव्यमित्युपदेशो ग्रहणशिक्षा, आसेवनाशिक्षा तु मत्युपेक्षणादिक्रियोपदेशः । आह च–

" सा पुण दुविहा सिक्खा गहणे आसेवणे य नायव्वा । गहणे सुत्ताहिज्झण आसेवण तिप्पकप्पाई " ॥ १ ॥

अन्ये तु– शिक्षाशब्दाद् व्रतमिति पदं पृथक् कृत्वा व्रतमिति कोऽर्थः ?–शिक्षाऽनन्तरं रात्रिभोजनविरमणषष्ठेषु पञ्चसु महाव्रतेषूपस्थाप्यते शिष्यः, इत्येतदपि द्वितीयं व्याख्यानं कुर्वन्ति । एतच्च कल्पचूर्ण्यां चिरन्तनटीकायां च न दृष्टम्, इत्यस्माभिरुपेक्षितम् । ततः सूत्रेऽधीते यद् विनेयः कार्यते, तदाह–'अत्थग्गहणं च त्ति' द्वादश वर्षाण्यधीतसूत्रः सन्नसावर्थग्रहणं कार्यते–तस्य पूर्वाधीतसूत्रस्य द्वादश वर्षाणि यावदेषोऽर्थ ग्राह्यत इत्यर्थः । यथा हि हलारघट्टगन्ध्यादेर्मुक्तो बुभुक्षितो बलीवर्दः प्रथमं तावच्छोभनमशोभनं वा तृणादिकमास्वादमनवगच्छन्नपि सर्वमभ्यवहरति; पश्चाच्च रोमन्थावस्थायां तदास्वादमवगच्छति; एवं विनेयोऽर्थमनवबुध्यमानोऽपि द्वादश वर्षाणि सर्वं सूत्रमधीते, अर्थावगमाभावे च तत् तस्याऽनास्वादं भवति; अर्थग्रहणावस्थायां तु तदवगमात् सुस्वादमाप्यायकं च जायते, अतोऽधीतसूत्रेण द्वादश वर्षाण्यवश्यमर्थः श्रोतव्यः । यथा वा कृषीबलः शाल्यादिधान्यं प्रथमं वपति, ततः पालयति, लुनाति, मलति, पुनीते, गृहमानयति, पश्चात्तु निराकुलचित्तस्तदुपभोगं करोति, तदभावे वपनादिपरिश्रमस्य निष्फलत्वप्रसङ्गात्; एवं शिष्योऽपि सूत्रमधीत्य यदि तदर्थं न शृणुयात्, तदा तदध्ययनप्रयासो विफल एव स्यात्; तस्मात् सूत्राध्ययनानन्तरमवश्यमेव द्वादश वर्षाणि तदर्थः श्रोतव्यः । तस्माद् यत एवं स्थविरकल्पक्रमो यदुत–प्रथमं प्रव्रज्या, ततः सूत्राध्ययनम्, ततोऽप्यर्थग्रहणमिति; अतोऽनुयोगप्रदानक्रमेणैवेहाऽधिकार इत्येवं प्रस्तुतमभिसंबध्यते । सूत्राध्ययनानन्तरभावी हि तदर्थव्याख्यानरूपः स्थविरकल्पक्रमदृष्टोऽनुयोग एवावश्यकस्य शास्त्रकृता वक्तुमारब्धः, अतः सूत्राध्ययनकालस्यातिक्रान्तत्वेनेह विवक्षितत्वादनुयोगस्यैवाऽभिधित्सितत्वात् तत्प्रदानक्रमेणैवाऽधिकार इति भावः । एतावच्चाऽस्यां गाथायां प्रकृतोपयोगि । यत्पुनरन्यद् व्याख्यास्यते– ' अनिअओ वासो निप्फत्ती य विहारो' इत्यादि, तत् प्रासङ्गिकमित्यवगन्तव्यम् । तत्र 'अनिअओ वासो त्ति' ततोऽस्य गृहीतसूत्रार्थस्य शिष्यस्याऽनियतो वासः क्रियते, ग्रामनगरसंनिवेशादिष्वनियतनिवासेनैष गृहीतसूत्रार्थः शिष्यो यद्याचार्यपदयोग्यः, तदा जघन्यतोऽपि सहायद्वयं दत्त्वाऽऽत्मतृ-

१ क. 'गुणस्थितेन' । ख. ग. 'गुणस्थितेन' ।

२ सा पुनर्द्विविधा शिक्षा ग्रहणमासेवनं च ज्ञातव्ये । ग्रहणं सूत्राध्ययनमासेवनं तूपकल्पादि ॥ १ ॥ ३ क. ख. ग. ततो ।

तीयो द्वादश वर्षाणि यावद् नानादेशदर्शनं नियमेन कार्यत इत्यर्थः, आचार्यपदानर्हस्य त्वनियमः । आचार्यपदार्होऽपि किमिति देशदर्शनं कार्यते ? इति चेत् । उच्यते– स हि नानादेशेषु पर्यटंस्तीर्थकराणां जन्मादिभूमीः पश्यति; ताश्च दृष्ट्वाऽत्र जाताः, इह दीक्षां प्रतिपन्नाः, अस्मिंश्च देशे निर्वृता भगवन्तः, इत्याद्यध्यवसायतो हर्षातिरेकात् तस्य सम्यक्त्वस्थैर्यं भवति, अन्येषां च स पश्चात् तत्स्थिरतामुत्पादयति, श्रुताद्यतिशायिनश्चाचार्यादीन् नानास्थानेषु पश्यतः सूत्रार्थेषु सामाचार्यां चाऽस्य विशेषोपलम्भो भवति, नानादेशभाषासमाचारांश्चैष बुध्यते, ततश्च तत्तद्देशजानामपि विनेयानां तत्तद्भाषया धर्मं कथयति, ततः प्रतिबोध्य तान् प्रव्राजयति, पूर्वप्रव्रजितास्तु तदुपसंपदं प्रतिपद्यन्ते, निःशेषास्मद्भाषासमाचारकुशलोऽयमिति शिष्याणां तदुपरि प्रीतियोगश्च जायते, इत्यादिगुणदर्शनादनियतवासः । 'निप्फत्ती य त्ति' एवं चानियतवासेन द्वादश वर्षाणि पर्यटतस्तस्याऽऽचार्यपदार्हशिष्यत्वेनाऽऽत्मनो निष्पत्तिर्भवति, अन्येषां च प्रभूतशिष्याणां तदन्तिके निष्पत्तिर्जायत इति । 'विहारो त्ति' एवं शिष्यत्वेन निष्पत्तौ, सूरिपदे च प्राप्ते, स्वपरोपकारकरणेन दीर्घे च पर्याये परिपालिते, अन्यस्मिंश्च योग्यशिष्ये आचार्यपदे व्यवस्थापिते, ततोऽनन्तरं विहरणं विशेषेण भगवदभिहितमार्गे पराक्रमणं विहारो विशेषानुष्ठानरूपोऽनेन कर्तव्यः । स च द्विविधः– भक्तपरिज्ञे-ङ्गिनी-पादपोपगमनलक्षणमभ्युद्यतमरणम्, जिनकल्प-परिहारविशुद्धिककल्प-यथालन्दिककल्पप्रतिपत्तिर्वा । आस्मिंश्च द्विविधेऽपि विहारे सामाचारी ज्ञात्वाऽनुष्ठेया । सा चाऽऽद्ये मरणलक्षणे विहारे–

"निप्फाइआ य सीसा सउणी जह अण्डयं पयत्तेण । बारससंवच्छरियं सो संलेहं अह करेइ ॥ १ ॥
चत्तारि विचित्ताइं विगईनिज्जूहिआइं चत्तारि । संवच्छरे उ दोन्नि उ एगन्तरियं च आयामं ॥ २ ॥
नाइविगिट्ठो य तवो छम्मासे परिमियं च आयामं । अन्ने वि य छम्मासे होइ विगिट्ठं तवो कम्मं ॥ ३ ॥
वासं कोडिसहिअं आयामं कट्टु आणुपुव्वीए । गिरिकंदरं तु गंतुं पायवगमणं अह करेइ " ॥ ४ ॥

इत्यादिका ज्ञातव्या । द्वितीये तु विहारे जिनकल्पादिप्रतिपत्तौ सामाचारी निर्दिश्यते–तत्र जिनकल्पादि प्रतिपित्सुनाऽऽदावेव पूर्वापररात्रकाले तावदिदं चिन्तनीयम्–विशुद्धचारित्रानुष्ठानेन कृतं मयाऽऽत्महितम्, शिष्याद्युपकारतः परहितं च, निष्पन्नाश्चेदानीं मम

१ निष्पादिताश्च शिष्याः शकुनी यथाऽण्डकं प्रयत्नेन । द्वादशसांवत्सरिकं स संलेखमथ करोति ॥ १ ॥
चत्वारि विचित्राणि विकृतिनिर्यूहितानि चत्वारि (वर्षाणि) । संवत्सरौ तु द्वौ त्वेकान्तरितं चाऽऽयामम् ॥ २ ॥
नातिविकृष्टं च तपः षण्मासान् परिमितं चाऽऽयामम् । अन्यानपि च षण्मासान् भवति विकृष्टं तपः कर्म ॥ ३ ॥
वर्षं कोटिसहितं आयामं कृत्वाऽऽनुपूर्व्या । गिरिकन्दरां तु गत्वा पादपगमनमथ करोति ॥ ४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गच्छपरिपालनक्षमाः शिष्याः, ततो विशेषेणैव सांप्रतं ममाऽऽत्महितमनुष्ठातुमुचितमिति। विचिन्त्य चेदं सति परिज्ञाने आत्मीयमायुःशेषं स्वयमेव पर्यालोचयति, तदभावेऽन्यमतिशयिनमाचार्यादिकं पृच्छति; तत्र स्तोके स्वायुषि भक्तपरिज्ञादीनामन्यतरद् मरणं प्रतिपद्यते। अथ दीर्घमायुः, केवलं जङ्घाबलपरिक्षीणः, तदा वृद्धवासं स्वीकुरुते; पुष्टायां तु शक्तौ जिनकल्पादिप्रतिपत्तिमुररीकरोति। तत्र जिनकल्पं प्रतिपित्सुना प्रथममेव तावत् पञ्चभिस्तुलनाभिरात्मा तोलनीयः, तद्यथा–

"[1]तवेण सत्तेण सुत्तेण एगत्तेण बलेण य। तुलणा पंचहा वुत्ता जिणकप्पं पडिवज्जओ" ॥ १ ॥

तुलना, भावना, परिकर्म चेत्येकार्थानि। तत्राऽऽचार्यो-पाध्याय-प्रवर्तक-स्थविर-गणावच्छेदकलक्षणाः प्रायः पञ्चैव जनाः प्रशस्ताभिरेताभिः पञ्चभिर्भावनाभिर्जिनकल्पं प्रतिपित्सवः प्रथममेवाऽऽत्मानं भावयन्ति। अप्रशस्तास्तु-कन्दर्प-देवकिल्बिषका-ऽऽभियोगिकाऽसुर-संमोहस्वरूपाः पञ्च भावनाः सर्वथा दूरतः परित्यजन्ति। तत्र तपसाऽऽत्मानं भावयंस्तथा बुभुक्षां पराजयते यथा देवाद्युपसर्गादिनाऽनेषणादिकरणतो यदि षण्मासान् यावदाहारं न लभते, तथापि न बाध्यते। सत्त्वभावनया तु भयं पराजयते, तत्र भयजयार्थं रात्रौ सुप्तेषु शेषसाधुषूपाश्रय एव कायोत्सर्गं कुर्वतः प्रथमा सत्त्वभावना भवति, द्वितीयादिकास्तूपाश्रयबाह्यादिप्रदेशेषु। आह च–

"[2]पढमा उवस्सयम्मि बीया बाहिं तइया चउक्कम्मि। [3]सुण्णहरम्मि चउत्थी अह पंचमिया मसाणम्मि" ॥ १ ॥

सूत्रभावनया तु स्वनामवत् सूत्रं परिचितं तथा करोति यथा रात्रौ दिवा चोच्छ्वासप्राणस्तोकलवमुहूर्तादिकं कालं सूत्रपरावर्तनानुसारेणैव सर्वं सम्यगवबुध्यते। एकत्वभावनया चाऽऽत्मानं भावयन् सङ्घाटिकसाध्वादिना सह पूर्वमवृत्तानालाप-सूत्रार्थ-सुखदुःखादिप्रश्न–मिथःकथादिव्यतिकरान् सर्वानपि परिहरति, ततो बाह्यममत्वे मूलत एव व्यवच्छेदिते पश्चाद् देहो-पध्यादिभ्योऽपि भिन्नमात्मानं पश्यन् सर्वथा तेष्वपि निरभिष्वङ्गो भवति। बलभावनायां बलं द्विविधम्– शारीरम्, मानसधृतिबलं च। तत्र शारीरमपि बलं जिनकल्पार्हस्य शेषजनातिशायिक्रमेष्टव्यम्, तपःप्रभृतिभिस्त्वपकृष्यमाणस्य यद्यपि शारीरं बलं तथाविधं न भवति, तथापि धृतिबलेनाऽऽत्मा तथा भावयितव्यो यथा महद्भिरपि परीषहोपसर्गैर्न बाध्यते। एताभिः पञ्चभिर्भावनाभिर्भाविताऽऽत्मा जिनकल्पिकप्रतिरूपो गच्छेऽपि प्रतिवसन्नाहारादि परिकर्म प्रथममेव करोति, तत्राहारे तृतीयपौरुष्यामवगाढायां वल्ल-चणकादिकमन्तं प्रान्तं रूक्षं च–

---

१ तपसा सत्त्वेन सूत्रेणैकत्वेन बलेन च। तुलना पञ्चधोक्ता जिनकल्पं प्रतिपद्यमानस्य ॥ १ ॥ × धैर्य-। Δ त्व-।

२ प्रथमा उपाश्रये द्वितीया बहिस्तृतीया चतुष्के। शून्यगृहे चतुर्थी अथ पञ्चमी श्मशाने ॥ १ ॥ Δ सङ्घाटि-। ५ ज्ञायक-।

३ ग. 'सुन्नअगारे'। ४ ख, घ. छ. 'मनोधृतिबलम्'। ५ क. ग. 'जनातिशायक'।

"[1]संसट्ठमसंसट्ठा उद्धड तह होइ अप्पलेवा य। उग्गहिआ पग्गहिआ उज्झिअधम्मा य सत्तमिया" ॥ १ ॥

एतासां सप्तानां पिण्डैषणानां मध्ये आद्यद्वयवर्जे शेषपञ्चानां मध्यादन्यतरैषणाद्वयाभिग्रहेणाऽऽहारं गृह्णाति– एकया भक्तम्, अपरया त्वेषणया पानकमिति। एवमाद्यागमोक्तविधिना गच्छान्तर्गतः पूर्वमेवाऽऽत्मानं परिकर्म्य ततो जिनकल्पं प्रतिपित्सुः सङ्घं मीलयति, तदभावे स्वगणं तावदवश्यमाह्वयते। ततस्तीर्थकरसमीपे, तदभावे गणधरसंनिधाने, तदसत्त्वे चतुर्दशपूर्वधरान्तिके, तदसंभवे दशपूर्वधराभ्यर्णे, तदलाभे तु वटा-ऽश्वत्था-ऽशोकवृक्षादीनामासन्नौ जिनकल्पमभ्युपगच्छति। निजपदव्यवस्थापितं सूरिम्, सबालवृद्धं गच्छम्, विशेषतः पूर्वविरुद्धांश्च क्षमयति, तद्यथा–

"[2]जइ किंचि पमाएणं न सुट्ठु मे वट्टिअं मए पुव्वि। तं भे! खामेमि अहं निस्सल्लो निक्कसाओ य ॥ १ ॥
आणंदमंसुपायं कुणमाणा ते वि भूमिगयसीसा। खामंति ते जहरिहं जहारिहं खामिआ तेणं ॥ २ ॥
खामेंतस्स गुणा खलु निस्सल्लयविणयदीवणा मग्गे। लाघवियं एगत्तं अप्पडिबन्धो अ जिणकप्पो" ॥ ३ ॥

निजपदस्थापितसूरिप्रभृतीनामनुशास्तिं प्रयच्छति, तद्यथा–

"[3]पालेज्ज सगणमेयं अप्पडिबद्धो य होज्ज सव्वत्थ। एसो हु परंपरओ तुमं पि अंते कुणसु एवं" ॥ १ ॥

---

१ संसृष्टासंसृष्टे उद्धृता तथा भवत्यल्पलेपा च। उद्गृहीता प्रगृहीता उज्झितधर्मा च सप्तमी ॥ १ ॥

संसृष्टाभ्यां तत्स्वरण्टिताभ्यां हस्तपात्राभ्यां भिक्षा संसृष्टा, असंसृष्टाभ्यां तु ताभ्यामसंसृष्टा, स्थाल्यादिभ्यः स्वार्थं भोजनाय उक्षिप्ता उद्धृता, निर्लेपं पृथुकादि तत्स्वरूपाऽल्पलेपा, भोजनकाले शरावाद्याहितभोज्यवस्तुमध्यादुत्पाटिता, भोजनार्थं करोपात्तभोज्यमध्याद् दातुमिष्टा प्रगृहीता, अन्याऽनभिलष्यमाणा परित्यज्यमानभक्ताद्यन्नरूपा उज्झितधर्मा इति।

२ यदि किञ्चित् प्रमादेन न सुष्ठु युष्माकं वर्तितं मया पूर्वम्। तं भगवन्! क्षमयाम्यहं निःशल्यो निष्कषायश्च ॥ १ ॥
आनन्दाश्रुपातं कुर्वाणास्तेऽपि (साधवः) भूमिगतशीर्षाः। क्षमयन्ति ते यथार्हं यथार्हं क्षमितास्तेन ॥ २ ॥
क्षमयतश्च गुणाः खलु निःशल्यकविनयदीपना मार्गे। लाघवमेकत्वमप्रतिबन्धश्च जिनकल्पः ॥ ३ ॥

३ पालयेः स्वगणमेतमप्रतिबद्धश्च भवेः सर्वत्र। एष खलु परम्परकस्त्वमप्यन्ते कुर्या एवम् ॥ १ ॥

४ "एष च परम्परकः शिष्याचार्यक्रमो यदव्यवच्छित्तिकारकं शिष्यं निष्पाद्य शक्तौ सत्यामभ्युद्यतविहारः प्रतिपत्तव्यः, त्वमप्यन्ते शिष्यनिष्पादनादिकार्यपर्यवसाने एवमेव कुर्याः" इति बृहत्कल्पभाष्यटीकायां श्रीक्षेमकीर्तिसूरिः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुव्वपउत्तं विणयं मा हु पमाएहि विणयजोग्गेसु । जो जेण पगारेणं उवजुज्जइ तं च जाणाहि ॥ २ ॥
ओमो समराइणिओ अप्पतरसुओ य मा एणं तुब्भे । परिभवह एस तुम्हवि विसेसओ संपयं पुज्जो ॥ ३ ॥

इत्यादिशिक्षां दत्त्वा गच्छाद् विनिर्गते चक्षुर्गोचरातीते तस्मिन्नानन्दिताः साधवः प्रतिनिवर्तन्ते । उक्तं च–

"पक्खीव पत्तसहिओ सभंडगो वच्चए निरवइक्खो । धीरो घणवन्दाओ च नीहरिओ विज्जुपुंजो व्व ॥ १ ॥
सीहम्मि व मन्दरकन्दराओ गच्छा विणिग्गए तम्मि । चक्खुविसयमइगए अ इंति आणंदिआ साहू ॥ २ ॥
आभोएउं खेत्तं निव्वाघाएण मासनिव्वाहिं । गन्तूण तत्थ विहरे साहू पडिवन्नजिणकप्पो" ॥ ३ ॥

एवं च प्रतिपन्नजिनकल्पो यत्र ग्रामे मासकल्पं चतुर्मासकं वा करिष्यति, तत्र षड् भागान् कल्पयति । ततश्च यत्र भागे एकस्मिन् दिने गोचरचर्यायां हिण्डितस्तत्र पुनरपि सप्तम एव दिवसे पर्यटति, भिक्षाचर्यां ग्रामान्तरगमनं च तृतीयपौरुष्यामेव करोति । चतुर्थपौरुषी च यत्राऽवगाहते, तत्र नियमादवतिष्ठते । भक्तं पानकं च पूर्वोक्तैषणाद्वयाभिग्रहेणाऽलेपकृदेव गृह्णाति । एषणादिविषयं मुक्त्वा न केनापि सार्धं जल्पति, एकस्यां च वसतौ यद्यप्युत्कृष्टतः सप्त जिनकल्पिकाः प्रतिवसन्ति, तथापि परस्परं न भाषन्ते । उपसर्गपरीषहान् सर्वानपि सहत एव, रोगेषु चिकित्सां न कारयत्येव, तद्वेदनां तु सम्यगेव विषहते, आपातसंलोकादिदोषरहित एव स्थण्डिले उच्चारादीन् करोति, नाऽस्थण्डिले;

"अममत्तअपरिकम्मा नियमा जिणकप्पियाण वसहीओ । एमेव य थेराणं मोत्तूण पमज्जणं एक्कं" ॥ १ ॥

---

१ पूर्वप्रवृत्तं विनयं मा खलु प्रमादयेर्विनययोग्येषु । यो येन प्रकारेण उपयुज्यते तं च जानीहि ॥ १ ॥
अवमः समरात्निकोऽल्पतरश्रुतश्च मा एनं यूयम् । परिभवत एष युष्माकमपि सांप्रतं पूज्यः ॥ ३ ॥
" ये च ते बहुश्रुतपर्यायज्येष्ठादयो विनययोग्या गौरवार्हास्तेषु पूर्वप्रवृत्तं यथोचितं विनयं मा प्रमादयेः–प्रमादेन परिहारयेः, यश्च साधुर्येन तपः-स्वाध्याय–वैयावृत्त्यादिना प्रकारेणोपयुज्यते–निर्जरां प्रत्युपयोगमुपयाति, तं च जानीहि–तं तथैव प्रवर्तयेरित्यर्थः । अथ साधूनामनुशिष्टिं प्रयच्छति–"ओमो" अवमोऽयं, समरात्निकोऽयम्, अल्पश्रुतो वाऽयमस्मदपेक्षया, अतः किमर्थमस्याऽऽज्ञानिर्देशं वयं कुर्महे ? इति मा यूयमेनं परिभवत, यत एष युष्माकं सांप्रतमस्मत्स्थानीयत्वाद् गुरुतरगुणाधिकत्वाच्च विशेषतः पूज्यः, न पुनरवज्ञातुमुचित इति भावः " इति बृहत्कल्पस्यैतस्या एव गाथाद्वयाष्टीकायां श्रीक्षेमकीर्तिसूरिः ।
२ पक्षीव पत्रसहितः सभाण्डकः (सपात्रकः) व्रजति निरपेक्षः । धीरो घनवृन्दाच्च निःसृतो विद्युत्पुञ्ज इव ॥ १ ॥
सिंहे इव मन्दरकन्दराया गच्छाद् विनिर्गते तस्मिन् । चक्षुर्विषयमतिगते च यान्त्यानन्दिताः साधवः ॥ २ ॥
आभोग्य (विज्ञाय) क्षेत्रं निर्व्याघातेन (विघ्नाभावेन) मासनिर्वाहि (मासनिर्वहणसमर्थं) । गत्वा तत्र विहरेत् साधुः प्रतिपन्नजिनकल्पः ॥ ३ ॥
३ अममत्वाऽपरिकर्माणो नियमाज्जिनकल्पिकानां वसतयः । एवमेव च स्थविराणां मुक्त्वा प्रमार्जनमेकम् ॥ १ ॥

इति वचनात् परिकर्मरहितायां वसतौ तिष्ठति, यद्युपविशति तदा नियमादुत्कुटुक एव, न तु निषद्यायाम्, औपग्रहिकोपकरणस्यैवाऽभावादिति । मत्तकरि-व्याघ्र-सिंहादिके च संमुखे समापतत्युन्मार्गगमनादिना ईर्यासमितिं न भिनत्ति, इत्याद्यन्याऽपि जिनकल्पिकानां सामाचारी समयसमुद्रादवगन्तव्या । 'ठिई चेव त्ति' तथा पूर्वोक्ते द्विविधेऽपि विहारे स्थितिः श्रुतसंहननादिका ज्ञातव्या, तथाहि– जिनकल्पिकस्य तावज्जघन्यतो नवमस्य पूर्वस्य तृतीयमाचारवस्तु, उत्कर्षतस्त्वसंपूर्णानि दश पूर्वाणि श्रुतं भवति । प्रथमसंहननो वज्रकुड्यसमानाऽवष्टम्भश्चायं भवति । स्वरूपेण पञ्चदशस्वपि कर्मभूमिषु, संहृतस्त्वकर्मभूमिष्वपि भवति । उत्सर्पिण्यां व्रतस्थस्तृतीयचतुर्थारकयोरेव; जन्ममात्रेण तु द्वितीयारकेऽपि, अवसर्पिण्यां तु जन्मना तृतीयचतुर्थारकयोरेव, व्रतस्थस्तु पञ्चमारकेऽपि; संहरणेन तु सर्वस्मिन्नपि काले प्राप्यते । प्रतिपद्यमानकः सामायिक-च्छेदोपस्थापनीयचारित्रयोः, पूर्वप्रतिपन्नस्तु सूक्ष्मसंपराय– यथाख्यातचारित्रयोरप्युपशमश्रेण्यामवाप्यते । प्रतिपद्यमानानामुत्कृष्टतः शतपृथक्त्वम्, पूर्वप्रतिपन्नानां तु सहस्रपृथक्त्वं जिनकल्पिकानां लभ्यते । जिनकल्पिकः प्रायोऽपवादं नाऽऽसेवते, जङ्घाबलपरिक्षीणस्त्वविहरमाणोऽप्याराधकः । आवश्यिकी–नैषेधिकी–मिथ्यादुष्कृत–गृहिविषयपृच्छो-पसंपल्लक्षणाः पञ्च सामाचार्योऽस्य भवन्ति, न त्विच्छादयः । अन्ये त्वाहुः–आवश्यिकी–नैषेधिकी–गृहस्थोपसंपल्लक्षणास्तिस्र एव भवन्ति, आरामादिनिवासिन ओघतः पृच्छादीनामप्यसंभवादिति । लोचं चाऽसौ नित्यमेव करोति, इत्येवमाद्यपराऽपि स्थितिर्जिनकल्पिकानामागमादवसेया । परिहारविशुद्धिककल्प-सामाचार्यादिवक्तव्यताऽत्रैव ग्रन्थे पुरस्ताद् वक्ष्यते । यथालन्दिकानां तु "तवेण सत्तेण सुत्तेण" इत्यादिका भावनादिवक्तव्यता यथा जिनकल्पिकानाम्; यस्तु विशेषः स लेशतः प्रोच्यते–तत्रोदकार्द्रः करो यावता शुष्यति, तत आरभ्योत्कृष्टतः पञ्च रात्रिन्दिवानि यावत्कालोऽत्र समयपरिभाषया लन्दमित्युच्यते । ततश्च पञ्चरात्रिन्दिवलक्षणस्योत्कृष्टस्य लन्दस्यानतिक्रमेण चरन्तीति यथालन्दिकाः । पञ्चको हि गणोऽमुं कल्पं प्रतिपद्यते, ग्रामं च गृहपङ्क्तिरूपाभिः षड्भिर्वीथीभिर्जिनकल्पिकवत् परिकल्पयन्ति, किन्त्वेकैकस्यां वीथ्यां पञ्च पञ्च दिनानि पर्यटन्तीत्युत्कृष्टलन्दिचारिणो यथालन्दिका उच्यन्ते । एते च प्रतिपद्यमानका जघन्यतः पञ्चदश भवन्ति; उत्कृष्टतस्तु सहस्रपृथक्त्वम्; पूर्वप्रतिपन्नास्तु जघन्यतः कोटिपृथक्त्वम्, उत्कृष्टतोऽपि कोटिपृथक्त्वं भवन्ति । एते च यथालन्दिका द्विविधा भवन्ति–गच्छे प्रतिबद्धाः, अप्रतिबद्धाश्च; गच्छे च प्रतिबन्धोऽमीषां कारणतः, किञ्चिदश्रुतस्यार्थस्य श्रवणार्थमिति मन्तव्यमिति । पुनरेकैकशो द्विविधाः– जिनकल्पिकाः, स्थविरकल्पिकाश्च । ये जिनकल्पं प्रतिपत्स्यन्ते ते जिनकल्पिकाः, ये तु पुनरपि स्थविरकल्पं समाश्रयिष्यन्ते ते स्थविरकल्पिकाः । एतेषां च स्थविरकल्पिक-जिनकल्पिकभेदाभिन्नानां यथालन्दिकानां परस्परमयं विशेषः, यदाह–

---

१ ख. ग. 'दुक्कुक' । दुक्कुटुक- ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

"[1]थेराणं नाणत्तं अतरंतं अप्पिणन्ति गच्छस्स । गच्छे निरवज्जेणं करेन्ति सव्वं पि परिकम्मं ॥ १ ॥
एक्केक्कपडिग्गहगा सप्पाउरणा हवंति थेरा उ । जेसिं उण जिणकप्पे न य तेसिं वत्थपायाणि ॥ २ ॥
निप्पडिकम्मसरीरा अवि अच्छिमलं पि नेअ अवणिंति । विसहंति जिणा रोगं कारिंति कयाइ न तिगिच्छं ॥ ३ ॥

इत्यलं विस्तरेण, तदर्थिना तु कल्पग्रन्थोऽन्वेषणीय इति । तस्माद् यतः प्रव्रज्या-शिक्षापदानन्तरमर्थग्रहणं विधेयम्, ततोऽर्थ-व्याख्यारूपेणाऽनुयोगेनाऽयमधिकारः सूत्राध्ययनकालस्यातिक्रान्तत्वेन तस्यैवेह प्रस्तुतत्वादिति स्थितम् ॥ इति गाथार्थः ॥ ७ ॥

आह- कृतपञ्चनमस्काराय शिष्याय सामायिकादिश्रुतं ददत्याचार्याः, तेनैव च क्रमेणाऽनुयोगमित्युक्तम्, यदि नामैवमुक्तं ततः किम् ?, इत्याह-

आईए[2] नमोक्कारो जइ पच्छाऽऽवासयं तओ पुव्वं । तस्स भाणिएऽणुओगे जुत्तो आवसयस्स तओ ॥ ८ ॥

यदीत्यभ्युपगमे, यद्यादौ नमस्कारो दीयते ततः पश्चात् सामायिकाद्यावश्यकम्, ततस्तदेतदनेन न्यायेनाऽऽपतितं यदुत- पूर्वं प्रथमं तस्य नमस्कारस्य भणिते कृतेऽनुयोगे व्याख्याने ततो युक्तः कर्तुमावश्यकस्याऽनुयोगः; व्याख्येयाऽनुरोधेनैव हि व्याख्यानं प्रवर्तते, व्याख्येयस्य चावश्यकस्यादौ नमस्कारो देयत्वेन भवद्भिरभ्युपगम्यते, अतस्तस्यानुयोगे कृते आवश्यकस्याऽसौ कर्तुमुचितः, तत आद्यगाथायां 'नमोक्काराणुओगपुव्वयं आवस्सयाणुओगं वोच्छं' इति वक्तुं युक्तमिति भावः ॥ इति गाथार्थः ॥ ८ ॥

अत्रोत्तरमाह—

सो[4] सव्वसुअक्खन्धब्भन्तरभूओ जओ तओ तस्स । आवासयाणुओगादिगहणगहिओऽणुओगो वि ॥९॥

स नमस्कारः सर्वेषामप्यावश्यक-दशवैकालिको-त्तराध्ययनादिश्रुतस्कन्धानामभ्यन्तर्भूतोऽन्तर्गतो यतः, ततस्तस्य नमस्कार-

१ स्थविराणां नानात्वमशक्नुवन्तमर्पयन्ति गच्छस्य । गच्छे निरवद्येन कुर्वन्ति सर्वमपि परिकर्म ॥ १ ॥
एकैकप्रतिग्रहका सप्रावरणा भवन्ति स्थविरास्तु । येषां पुनर्जिनकल्पो न च तेषां वस्त्रपात्राणि ॥ २ ॥
निष्प्रतिकर्मशरीरा अप्यक्ष्मिमलमपि नैवाऽपनयन्ति । विषहन्ते जिनाः (जिनकल्पिकाः) रोगं कारयन्ति न कदापि चिकित्साम् ॥ ३ ॥
२ आदौ नमस्कारो यदि पश्चादावश्यकं ततः पूर्वम् । तस्य भणितेऽनुयोगे युक्त आवश्यकस्य ततः ॥ ८ ॥
३ नमस्कारानुयोगपूर्वकमावश्यकानुयोगं वक्ष्ये ।
४ स सर्वश्रुतस्कन्धाभ्यन्तरभूतो यतस्ततस्तस्य । आवश्यकानुयोगादिग्रहणगृहीतोऽनुयोगोऽपि ॥ ९ ॥

स्य, आदिशब्दो भिन्नक्रमे, आवश्यकादिश्रुतस्कन्धानुयोगग्रहणगृहीतोऽनुयोगोऽपि, न केवलमावश्यकादिश्रुतस्कन्धग्रहणेन तदन्तर्गतत्वाद् नमस्कारः स्वरूपेण गृह्यते, किन्त्वावश्यकादिश्रुतस्कन्धानुयोगग्रहणेन नमस्कारानुयोगोऽपि गृह्यत इत्यपिशब्दार्थः, ततश्चावश्यकानुयोगं वक्ष्य इत्युक्तेन नमस्कारानुयोगोऽपि भणनीयत्वेन प्रतिज्ञातो द्रष्टव्य इति भावः ॥ इति गाथार्थः ॥ ९ ॥

कथं पुनर्नमस्कारस्य सर्वश्रुतस्कन्धाभ्यन्तरता विज्ञायते ?, इत्याह-

तस्स पुणो[1] सव्वसुयब्भंतरया पढममंगलग्गहणा । जं च पिहो न पढिज्जइ नंदीए सो सुयक्खंधो ॥१०॥

तस्य च नमस्कारस्य, सर्वाणि च तानि श्रुतानि चाऽऽवश्यकश्रुतस्कन्धादीनि तदभ्यन्तरता प्रतीयते । कुतः ?, इत्याह- सकलमाङ्गलिकवस्तुनः प्रथमं च तन्मङ्गलं च प्रथममङ्गलं तदध्यवसायेन सर्वश्रुतस्यादौ ग्रहणं प्रथममङ्गलग्रहणं तस्मात्; इदमुक्तं भवति- "मङ्गलाणं[2] च सव्वेसिं पढमं हवइ मङ्गलं" इति वचनात् प्रथममङ्गलत्वाभिप्रायेण सर्वश्रुतानामादौ नमस्कारस्य ग्रहणात् तदभ्यन्तरता प्रतीयत एव । कारणान्तरमप्याह- 'जं चेत्यादि' यद् यस्माच्चाऽसौ नमस्कारो नन्द्यध्ययने आवश्यक-दशवैकालिकादिश्रुतस्कन्धवत् तेभ्यः पृथक् 'सुअक्खंधो त्ति' श्रुतस्कन्धत्वेन न पठ्यते, येनाऽस्य पृथक् तेभ्यः श्रुतस्कन्धरूपता स्यात्, श्रुतरूपश्चाऽसौ, ततः पृथक् श्रुतस्कन्धत्वाभावे सामर्थ्यात् सर्वश्रुताभ्यन्तरतैवाऽस्य न्याय्या । तस्माद् नन्द्यध्ययनेऽप्यस्य श्रुतस्कन्धत्वेन पृथगनुपादानं सर्वश्रुताभ्यन्तरताज्ञापनार्थमेव ॥ इति गाथार्थः ॥ १० ॥

यतश्चैवं नन्द्यां श्रुतस्कन्धत्वेन पृथगनुपादानात् सर्वश्रुताभ्यन्तरत्वेन ज्ञापितोऽसौ नमस्कारः, तत एवैतत् कृतं भद्रबाहुस्वामिना । किम् ?, इत्याह-

तेणं चिय सामाइयसुत्ताणुगमाइओ नमोक्कारं । वक्खाणेउं गुरवो वयंति सामाइयसुयत्थं ॥ ११ ॥

येनैवोक्तन्यायेन नन्द्यामसौ सर्वश्रुताभ्यन्तरतया ज्ञापितः, तेनैव कारणेन सामायिकसूत्रानुगमस्यादौ नमस्कारं व्याख्याय गुरवो भद्रबाहुस्वामिनो वदन्ति-अर्थव्याख्यानद्वारेण प्रकटयन्ति सामायिकश्रुतार्थम्। यदि हि पृथगसौ श्रुतस्कन्धः स्यात् तदा "आवस्सयस्स

१ तस्य पुनः सर्वश्रुताभ्यन्तरता प्रथममङ्गलग्रहणात् । यच्च पृथग् न पठ्यते नन्द्यां स श्रुतस्कन्धः ॥ १० ॥
२ मङ्गलानां च सर्वेषां प्रथमं भवति मङ्गलम् । ३ क. घ. छ. 'होइ' ।
४ तेनैव सामायिकसूत्रानुगमादितो नमस्कारम् । व्याख्यानय्य (व्याख्याय) गुरवो वदन्ति सामायिकसूत्रार्थम् ॥ ११ ॥
५ आवश्यकस्य दशवैकालिकस्य तथोत्तराध्ययाना-ऽऽचाराङ्गयोः, सूत्रकृताङ्गे निर्युक्तिम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दसकालिअस्स तह उत्तरज्झमा-ऽऽयारे, सूयगडे निज्जुत्ति" इत्यादिग्रन्थे आवश्यकस्य निर्युक्तिं प्रतिज्ञाय नमस्कारस्य निर्युक्तिकरणमसंगतमेव स्यात्; तस्मात् तत्करणादेव सर्वश्रुताभ्यन्तरताऽस्य प्रतीयते। अतो व्यवस्थितमिदम्– आवश्यकानुयोगप्रतिज्ञाविधानेनैव नमस्कारानुयोगः संगृहीत एव, करिष्यते च नमस्कारनिर्युक्तिव्याख्यानावसरे भाष्यकारोऽपि तदनुयोगम्; इत्यलं विस्तरेण ॥ इति गाथार्थः ॥ तदेवं सप्रसङ्गमभिहितं योगद्वारम् ॥ ११ ॥

अथ तृतीयं मङ्गलद्वारमधिकृत्याऽऽह–

[1]बहुविग्घाइं सेयाइं तेण कयमंगलोवयारेहिं । घेत्तव्वो सो सुमहानिहिव्व जह वा महाविज्जा ॥ १२ ॥

"श्रेयांसि बहुविघ्नानि भवन्ति महतामपि" इति वचनाद् येन बहुविघ्नानि श्रेयांसि भवन्ति तेन कारणेन परमश्रेयोरूपत्वात् कृतमङ्गलोपचारैरेव स आवश्यकानुयोगो ग्रहीतव्यः। किंवत् ?, इत्याह– शोभनमहारत्नादिनिधिवद्, महाविद्यावद् वा ॥ इति गाथार्थः॥१२॥

क्व पुनस्तन्मङ्गलं शास्त्रस्येष्यते ?, इत्याह–

[2]तं मंगलमाईए मज्झे पज्जन्तए य सत्थस्स । पढमं सत्थत्थाऽविग्घपारगमणाय निद्दिट्ठं ॥ १३ ॥

तद् मङ्गलं शास्त्रस्यादौ क्रियते, तथा मध्ये, पर्यन्ते चेति । अर्थैकैकस्य करणफलमाह– प्रथममङ्गलं तावच्छास्त्रार्थस्याऽविघ्नेन पारगमनाय निर्दिष्टम् ॥ इति गाथार्थः ॥ १३ ॥

[3]तस्सेव य थेज्जत्थं मज्झिमयं, अंतिमं पि तस्सेव । अव्वोच्छित्तिनिमित्तं सिस्सपसिस्साइवंसस्स ॥१४॥

तस्यैव शास्त्रस्य[+] प्रथममङ्गलकरणाऽनुभावादविघ्नेन परम्परा[×]मुपागतस्य स्थैर्यार्थं स्थिरताऽऽपादनार्थं मध्यमं मङ्गलम्, निर्दिष्टमिति वर्तते, 'अन्तिमं पीति' अन्त्यमपि मङ्गलं तस्यैव शास्त्रार्थस्य मध्यममङ्गलसामर्थ्येन स्थिरीभूतस्याऽव्यवच्छित्तिनिमित्तम्, कस्य, योऽसौ शास्त्रार्थः ?, इत्याह– शिष्यप्रशिष्यादिवंशगतस्येत्यर्थः। शिष्यप्रशिष्यादिवंशे शास्त्रार्थस्याऽव्यवच्छेदनिमित्तं चरममङ्गलमिति भावः ॥ इति गाथार्थः ॥ १४ ॥

---

१ बहुविघ्नानि श्रेयांसि तेन कृतमङ्गलोपचारैः। ग्रहीतव्यः स सुमहानिधिरिव यथा वा महाविद्या ॥ १२ ॥

२ तद् मङ्गलमादौ मध्ये पर्यन्तके च शास्त्रस्य। प्रथमं शास्त्रार्थाऽविघ्नपारगमनाय निर्दिष्टम् ॥ १३ ॥ ×परंपार ॥

३ तस्यैव च स्थैर्यार्थं मध्यमकम्, अन्तिममपि तस्यैव। अव्यवच्छित्तिनिमित्तं शिष्यप्रशिष्यादिवंशस्य ॥ १४ ॥ +शास्त्र(अर्थस्य)-]

[1]मंगलकरणा सत्थं न मंगलं, अह च मंगलस्सावि । मंगलमओऽणवत्था न मंगलममंगलत्ता वा ॥१५॥

प्रेरकः प्राह– भो आचार्य ! त्वदीयं शास्त्रं न मङ्गलं प्राप्नोति। कुतः ?, इत्याह– मङ्गलकरणात् अमङ्गले हि मङ्गलमुपादीयते, यत्तु स्वयमेव मङ्गलं तत्र किं मङ्गलविधानेन ?, न हि शुक्लं शुक्लीक्रियते, नापि स्निग्धं स्नेह्यते; तस्माद् तन्मङ्गलोपादानान्यथानुपपत्तेः शास्त्रं न मङ्गलम्। अथ मङ्गलं शास्त्रम्, मङ्गलस्याऽपि सतस्तस्याऽन्यद् मङ्गलं क्रियत इत्यभ्युपगम्यते; अत एवं सति तर्ह्यनवस्था– मङ्गलानामवस्थानं न क्वचित् प्राप्नोति, तथाहि– यथा मङ्गलस्याऽपि सतः शास्त्रस्याऽन्यद् मङ्गलमुपादीयते, तथा मङ्गलस्याऽपि तद्रूपस्य सतोऽन्यद् मङ्गलमुपादेयम्, तस्याऽप्यन्यत्, अपरस्याऽप्यन्यत्, इत्येवमनवस्था आपतन्ती केन वार्यते ?! अथ शास्त्रे यदुपात्तं मङ्गलं तस्यान्यमङ्गलकरणाभावत इयं नेष्यते। तत्र दूषणमाह– 'न मङ्गलमिति' शास्त्रमङ्गलीकरणार्थमुपात्तमङ्गलस्याऽनवस्थाभयेनाऽन्यमङ्गलाकरणेन तद् मङ्गलं न स्यात्, अन्यमङ्गलाभावात्, शास्त्रवत्, इत्यर्थः; इदमुक्तं भवति– यदि मङ्गलस्याऽपरमङ्गलविधानाभावेनाऽनवस्था नेष्यते, तर्हि यथा मङ्गलमपि शास्त्रमन्यमङ्गलेऽकृते मङ्गलं न भवति, तथा मङ्गलमप्यन्यमङ्गलेऽविहिते मङ्गलं न भवेत्, न्यायस्य समानत्वात्। तथा च किमनिष्टं स्यात् ?, इत्याह– अमङ्गलता मङ्गलाभावः– शास्त्रे यद् मङ्गलमुपात्तं तदन्यमङ्गलशून्यत्वाद् न मङ्गलम्, तस्य च मङ्गलत्वाभावे शास्त्रमपि न मङ्गलम्, इति व्यक्त एव मङ्गलाभाव इति भावः। वाशब्दः पक्षान्तरसूचकः– अनवस्था, मङ्गलाभावो वेत्यर्थः ॥ इति गाथार्थः ॥ १५ ॥

अत्रोत्तरमाह–

[2]सत्थत्थन्तरभूयम्मि मंगले होज्ज कप्पणा एसा । सत्थम्मि मंगले किं अमंगलं काऽणवत्था वा? ॥ १६ ॥

शास्त्रादावश्यकादेरर्थान्तरभूते भेदवति मङ्गले उपादीयमाने भवेद् घटेत परेण विधीयमाना '[3]मंगलकरणा सत्थं न मंगलं' इत्यादिका कल्पना दोषोत्प्रेक्षालक्षणा; शास्त्रे त्वावश्यकादिके परममङ्गलस्वरूपेऽभ्युपगम्यमाने, तद्भिन्ने मङ्गले चाऽनुपादीयमाने हन्त ! किममङ्गलम्, का वाऽनवस्था त्वया प्रेर्यते ?। तस्मादाकाशरोमन्थनमेव परस्य दोषोद्भावनमिति भावः। आह– यदि शास्त्रं स्वयमेव

+त्वभावो-। १ मङ्गलकरणाच्छास्त्रं न मङ्गलम्, अथ च मङ्गलस्याऽपि। मङ्गलमतोऽनवस्था न मङ्गलममङ्गलत्वाद् वा ॥ १५ ॥ × त्वाभाव-।

२ शास्त्रार्थान्तरभूते मङ्गले भवेत् कल्पनैषा। शास्त्रे मङ्गले (मङ्गलरूपे) किममङ्गलं काऽनवस्था वा ?॥ १६ ॥ ३ गाथा १५।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मङ्गलम्, तर्हि 'तं मंगलमाईए' इत्यादिवचनात् मङ्गलं तत्र किमित्युपादीयते ?। सत्यम्, किन्तु 'सीसमइमंगलपरिग्गहत्थमेत्तं[फ] तदभिहाणं' इत्यादिना वक्ष्यते सर्वमत्रोत्तरम्, मा त्वरिष्ठाः ॥ इति गाथार्थः ॥ १६ ॥

अथ समर्थवादितयाऽर्थान्तरभूतत्वमपि मङ्गलस्याऽभ्युपगम्य समर्थयन्नाह—

[1]अत्थंतरे वि सइ मंगलम्मि नामंगला-ऽणवत्थाओ। स-पराणुग्गहकारिं पईव इव मंगलं जम्हा ॥ १७ ॥

शास्त्रादर्थान्तरे भेदवत्यपि मङ्गलेऽभ्युपगम्यमाने सति नाऽमङ्गलता शास्त्रस्य, नाऽप्यनवस्था। कुतः ?, इत्याह— यस्मात् स्व-परानुग्रहकारि मङ्गलम्, प्रदीपवत्—यथा हि प्रदीप आत्मानं प्रकाशयमानः स्वस्याऽनुग्राहको भवति, गृहोदरवर्तिनस्तु घटपटाद्यर्थानाविष्कुर्वाणः परेषामनुग्राहकः संपद्यते, न तु स्वप्रकाशे प्रदीपान्तरमपेक्षते; यथा च लवणं रसवत्यामात्मनि च सलवणतामुपदर्शयत् स्वपरानुग्राहकं भवति, न त्वात्मनः सलवणतायां लवणान्तरमपेक्षते। एवमर्थान्तरभूतं मङ्गलमपि निजसामर्थ्याच्छास्त्रे स्वात्मनि च मङ्गलतां व्यवस्थापयत् स्व-परानुग्राहकं भवति। ततो मङ्गलाद् मङ्गलरूपतापाप्तौ शास्त्रस्य तावद् नाऽमङ्गलता। यदा च मङ्गलमात्मनो मङ्गलरूपतायां मङ्गलान्तरं नापेक्षते, तदाऽनवस्थाऽपि दूरोत्सारितैव ॥ इति गाथार्थः ॥ १७ ॥

पुनरन्यथा परः प्रेरयति—

[2]मंगलतियंतरालं न मंगलमिहत्थओ पसत्तं ते। जइ वा सव्वं सत्थं मंगलमिह किं तियग्गहणं ? ॥१८॥

इह मङ्गलविचारप्रक्रमे, अर्थतोऽर्थापत्त्या एतत् ते तव आचार्य ! प्रसक्तं प्राप्तम्। किं तत् ?, इत्याह— मङ्गलानामादि-मध्याऽवसानलक्षणं त्रिकं मङ्गलत्रिकं तस्याऽन्तरालद्वयलक्षणमन्तरालं न मङ्गलमिति। यदा हि 'तं मंगलमाईए मज्झे पज्जंतए य सत्थस्स' इत्यादिवचनादादिमध्यावसानलक्षणेषु त्रिष्वेव नियतस्थानेषु मङ्गलमुपादीयते, तदा तदव्याप्तमन्तरालद्वयमर्थापत्त्यैवाऽमङ्गलं प्राप्नोतीति भावः। पर एवाह— यदि वा सिद्धान्तवादिन् ! एवं ब्रूयास्त्वं यदुत— सर्वमेव शास्त्रं मङ्गलमिति प्रागेवोक्तम्, अतः किमेवं प्रेर्यते ?। हन्त ! तर्हि 'तं मंगलमाईए' इत्यादिना किमिह मङ्गलत्रिकग्रहणं कृतम् ?। न हि सर्वस्मिन्नपि शास्त्रे मङ्गले 'आदौ मध्येऽवसाने च मङ्गलम्' इत्युच्यमानं युक्तियुक्तत्वमनुभवति। तस्मादपान्तरालद्वयस्याऽमङ्गलत्वं वा प्रतिपद्यस्व, मङ्गलत्रयग्रहणं वा मा कृथा इति भावः ॥ इति गाथार्थः ॥ १८ ॥

१ गाथा २०। २ अर्थान्तरेऽपि सति मङ्गले नामङ्गलाऽनवस्थे। स्व-परानुग्रहकारि प्रदीप इव मङ्गलं यस्मात् ॥ १७ ॥ फ मित्तं-।

३ मङ्गलत्रिकान्तरालं न मङ्गलमिहाऽर्थतः प्रसक्तं ते। यदि वा सर्वं शास्त्रं मङ्गलमिह किं त्रिकग्रहणम् ? ॥ १८ ॥ ४ गाथा १३।

आचार्यः प्राह—

[1]सत्थे तिहा विहत्ते तदन्तरालपरिकप्पणं कत्तो ?। सव्वं च निज्जरत्थं सत्थमओऽमंगलमजुत्तं ॥१९॥

बुद्ध्या शास्त्रे त्रिधा विभक्ते तस्य शास्त्रस्यान्तरालं तदन्तरालं तस्य परिकल्पनं कुतः संभवति ?— न कुतश्चिदित्यर्थः। यथा हि संपूर्णे मोदकादिवस्तुनि त्रिखण्डे विकल्पितेऽन्तरालं न संभवति; तथाऽत्रापि, इति कस्याऽमङ्गलता स्यात् ? इति। यदि नाम शास्त्रं त्रिधा विभक्तम्, तथापि कथं तस्य सर्वस्याऽपि मङ्गलता ? इत्याह— सर्वं चावश्यकादि शास्त्रं निर्जरार्थं कर्मापगमरूपा निर्जरा अर्थः प्रयोजनमस्येति निर्जरार्थम्; तथा च सति तपोवत् स्वयमेव मङ्गलमिदमिति सामर्थ्याद् गम्यते। यदि नाम निर्जरार्थत्वात् तपोवत् स्वयमेवाऽऽवश्यकादिशास्त्रं मङ्गलम्; ततः किम् ?, इत्याह—अतोऽमङ्गलमयुक्तम्, यतः सर्वमेव शास्त्रं मङ्गलम्, अतो मङ्गलात्मनि तस्मिंस्त्रिधा विभक्ते यदुच्यते 'अपान्तरालद्वयममङ्गलम्' तदयुक्तमित्यर्थः। यदि हि शास्त्रं स्वयं मङ्गलं न भवेत् तदाऽन्यमङ्गलाऽव्याप्तत्वात् क्वापि तदमङ्गलं भवेत्, यदा तु सर्वमपि स्वयमेव तद् मङ्गलम्, तदा क्वापि तस्याऽमङ्गलता न युक्तेति भावः ॥ इति गाथार्थः ॥ १९ ॥

अथ प्रेरकः प्राह—

[2]जइ मंगलं सयं चिय सत्थं तो किमिह मंगलग्गहणं ?। सीसमइमंगलपरिग्गहत्थमेत्तं[×] तदभिहाणं ॥२०॥

यदि हि स्वयमेव शास्त्रं मङ्गलमिष्यते तदा '[3]तं मंगलमाईए मज्झे' इत्यादिवचनात् किमिह मङ्गलग्रहणं क्रियते ?, सत एव मङ्गले मङ्गलविधानस्याऽनर्थकत्वादिति भावः। इति परेण प्रेरिते गुरुराह— 'सिस्सेत्यादि' शिष्यस्य मतिः शिष्यमतिस्तस्या मङ्गलपरिग्रहः सोऽर्थः प्रयोजनमस्य तत् तथा तदर्थमेव शिष्यमतिमङ्गलपरिग्रहार्थमात्रं तदभिधानं मङ्गलाभिधानमित्यर्थः; इदमुक्तं भवति— शास्त्रादनर्थान्तरभूतमेव मङ्गलमुपादीयते, नाऽर्थान्तरमिति प्रागेवोक्तम्, नन्दिर्हि मङ्गलत्वेनाऽभिधास्यते, सा च पञ्चज्ञानात्मिका, ततः शास्त्राण्यावश्यकादीनि सर्वाण्यपि श्रुतज्ञानरूपतया नन्द्यन्तर्गतान्येव, नन्दिरपि श्रुतरूपत्वेनाऽऽवश्यकादिशास्त्रान्तर्गतैव। तस्माद् नन्देर्मङ्गलत्वेनाऽभिधाने शास्त्रान्तर्गतमेव मङ्गलमभिहितं भवति। तत्रापि नाऽमङ्गलस्य सतः शास्त्रस्य मङ्गलताऽऽपादनार्थं तदभिधानम्,

१ शास्त्रे त्रिधा विभक्ते तदन्तरालपरिकल्पनं कुतः ?। सर्वं च निर्जरार्थं शास्त्रमतोऽमङ्गलमयुक्तम् ॥ १९ ॥ × मित्तं-।

२ यदि मङ्गलं स्वयमेव शास्त्रम्, तदा किमिह मङ्गलग्रहणम् ?। शिष्यमतिमङ्गलपरिग्रहार्थमात्रं तदभिधानम् ॥ २०॥ ३ गाथा १३।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

किन्तु शिष्यमतिमङ्गलपरिग्रहार्थम्, शिष्यो हि तस्मिन्नभिहिते 'मङ्गलमेतच्छास्त्रम्' इत्येवं स्वमतौ तन्मङ्गलतापरिग्रहं करोतीति भावः ॥ इति गाथार्थः ॥ २० ॥

आह- किं मङ्गलमपि मङ्गलबुद्ध्या गृहीतमेव स्वकार्यं करोति, नान्यथा ?। एवमेतत्, इत्याह-

[1]इह मंगलं पि मंगलबुद्धीए मंगलं जहा साहू । मंगलतियबुद्धिपरिग्गहे वि नणु कारणं भणिअं ॥२१॥

इह लोके, मङ्गलमपि सद् वस्तु मङ्गलबुद्ध्या गृह्यमाणमभिनन्द्यमानं वा मङ्गलं भवति । यथा साधुः, साधुर्हि स्वयं मङ्गलभूतोऽपि तद्बुद्ध्या गृह्यमाण एव प्रशस्तचेतोवृत्तेर्भव्यस्य मङ्गलकार्यं करोति, अमङ्गलबुद्ध्या तु गृह्यमाणं मङ्गलमपि तत्कार्यं न करोति, यथा स एव साधुः कालुष्योपहतचेतोवृत्तेरभव्यस्य । अत्राह कश्चित्- नन्वेवं सत्यऽमङ्गलमप्यसाध्वादिकं मङ्गलबुद्ध्या गृह्यमाणं तत्कार्यं करिष्यति, न्यायस्य समानत्वात्। तदयुक्तम्, असाधोः स्वतो मङ्गलरूपताया अभावात्, सत्यमणिर्हि सत्यमणितया गृह्यमाणो ग्रहीतुर्गौरवमापादयति, न त्वसत्यमणिः सत्यमणितया, इत्यलं प्रसङ्गेन । आह- यद्येवम्, तर्ह्येकमेव मङ्गलमस्तु, तेनापि हि शिष्यमतिमङ्गलपरिग्रहः सेत्स्यति, किं मङ्गलत्रयकरणेन ?, इत्याह- 'मंगलतियेत्यादि' मङ्गलत्रये हि कृते शिष्यस्य बुद्धौ तत्परिग्रहो भवति । तेनाऽपि किमिति चेत् ?, इत्याह- ननु तत्रापि 'पढमं सत्थत्थाविग्घपारगमणाय निद्दिट्ठं' इत्यादिना कारणं निमित्तं प्रागेव भणितं किमिति विस्मार्यते ?। न च वक्तव्यमेकेनैव मङ्गलेन तत् कारणत्रयं सेत्स्यति, यतो यथैव शास्त्रं मङ्गलमपि सद् मङ्गलबुद्धिपरिग्रहमन्तरेण मङ्गलं न भवति साधुवत्, तथा शास्त्रस्याऽऽदि-मध्या-ऽवसानानि मङ्गलरूपाण्यपि मङ्गलबुद्धिपरिग्रहं विना न मङ्गलकार्यं कुर्वन्ति, इति मङ्गलत्रयाभिधानम् ॥ इति गाथार्थः ॥ २१ ॥

तदेवं मङ्गलाभिधानमुपपत्तिभिर्व्यवस्थाप्य मङ्गलशब्दार्थं निरूपयितुमाह-

[2]मंगिज्जएऽधिगम्मइ जेण हिअं तेण मंगलं होइ । अहवा मंगो धम्मो तं लाइ तयं समादत्ते ॥२२॥

'अगि-रगि-लगि-वगि-मगि' इत्यादौ मगिर्गत्यर्थो धातुः, अतस्तस्याऽलचप्रत्ययान्तस्य मङ्ग्यतेऽधिगम्यते साध्यते यतो हितमनेन तेन कारणेन मङ्गलं भवति । अथवा मङ्ग इति धर्मस्याऽऽख्या, 'ला आदाने' धातुः, ततश्च मङ्गं लाति समादत्ते इति मङ्गलं

१ इह मङ्गलमपि मङ्गलबुद्ध्या मङ्गलं, यथा साधुः । मङ्गलत्रिकबुद्धिपरिग्रहेऽपि ननु कारणं भणितम् ॥ २१ ॥ २ गाथा १३॥फ ई-।

२ मङ्ग्यतेऽधिगम्यते येन हितं तेन मङ्गलं भवति । अथवा मङ्गो धर्मस्तं लाति तकं समादत्ते ॥ २२ ॥

धर्मोपादानहेतुरित्यर्थः ॥ इति गाथार्थः ॥ २२ ॥

अहवा निवायणाओ मंगलमिट्ठत्थपगइपच्चयओ । सत्थे सिद्धं जं जह तयं जहाजोगमाओज्जं ॥ २३ ॥

अथवा निपातनाद् मङ्गलमिति साध्यते । कथम् ?, इत्याह-इष्टार्थप्रकृतिप्रत्ययतः, तत्रेष्टो विवक्षितोऽर्थो यासां ता इष्टार्थाः प्रकृतयः; तद्यथा-'मकि मण्डने' 'मन ज्ञाने' 'मदी हर्षे' 'मुद मोद-स्वप्न-गतिषु' 'मह पूजायाम्' इत्येवमादिः प्रत्ययस्त्वेतासां प्रकृतीनां सर्वत्र 'अलच्' एव विधीयते, ततो मङ्गलमिति रूपं निपात्यते । व्युत्पत्तिस्त्वेवम्-मङ्क्यतेऽलंक्रियते शास्त्रमनेनेति मङ्गलम्, तथा मन्यते ज्ञायते निश्चीयते विघ्नाभावोऽनेन, तथा माद्यन्ति हृष्यन्ति मुदमनुभवन्ति, मोदन्ते, शेरते विघ्नाभावेन निष्पकम्पतया सुप्ता इव जायन्ते, शास्त्रस्य पारं गच्छन्त्यनेनेति, तथा मह्यन्ते पूज्यन्तेऽनेनेति मङ्गलमिति । एवमादि व्याकरणशास्त्रे यद् यथा निपातनं सिद्धम्, तद् यथायोगं यथासंबन्धमत्र स्वधियाऽऽयोज्यं लक्षणज्ञैः ॥ इति गाथार्थः ॥ २३ ॥

[2]मं गालयइ भवाओ मंगलमिहेवमाइ नेरुत्ता । भासंति सत्थवसओ नामाइ चउव्विहं तं च ॥ २४ ॥

अथवा मां गालयति भवादिति मङ्गलं संसारादपनयतीत्यर्थः । इह मङ्गलविचारे एवमादि नैरुक्ताः शब्दविदः शास्त्रवशतो व्याकरणानुसारेण भाषन्ते मङ्गलशब्दार्थं व्याचक्षते । आदिशब्दात् शास्त्रस्य मा भूद् गलो विघ्नोऽस्मादिति मङ्गलम्, अथवा शास्त्रस्य मा भूद् गलो नाशोऽस्मिन्निति मङ्गलम्, सम्यग्दर्शनादिमार्गलयनाद् वा मङ्गलमित्यादि द्रष्टव्यम्, इत्यलं विस्तरेण । इह तत्त्व-पर्याय-भेदैर्व्याख्या, तत्र तत्त्वं शब्दार्थरूपम्, तत्त्ववद् निर्णीतम्। पर्यायास्तु मङ्गलं, शान्तिः, विघ्नविद्रावणमित्यादयः स्वयमेव द्रष्टव्याः भेदांस्तु स्वयमेव निरूपयितुमाह-'नामाइ चउव्विहं तं चेति, तच्च मङ्गलं नामादिभेदतश्चतुर्विधं भवति । तद्यथा-नाममङ्गलम्, स्थापनामङ्गलम्, द्रव्यमङ्गलम्, भावमङ्गलं च ॥ इति गाथार्थः ॥ २४ ॥

तत्र नाम किमुच्यते ? इत्याशङ्क्य सामान्येन नाम्नस्तावल्लक्षणमाह-

[3]पज्जायाऽणभिधेयं ठिअमण्णत्थे तयत्थनिरवेक्खं । जाइच्छिअं च नामं जावदव्वं च पाएण ॥ २५ ॥

१ अथवा निपातनाद् मंगलमिष्टार्थप्रकृतिप्रत्ययतः । शास्त्रे सिद्धं यद् यथा तद् यथायोगमायोज्यम् ॥ २३ ॥ × उज्जो-।० स्वसु-।

२ मां गालयति भवाद् मङ्गलमित्येवमादि नैरुक्ताः । भाषन्ते शास्त्रवशतो नामादि चतुर्विधं तच्च ॥ २४ ॥ + मति-कान्तिषु-।

३ पर्यायाऽनभिधेयं स्थितमन्यार्थे (अन्यत्रार्थे वा) तदर्थनिरपेक्षम्। यादृच्छिकं च नाम यावद्द्रव्यं च प्रायेण ॥ २५ ॥ फ अलजोव-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

यत् कस्मिंश्चिद् भृतकदारकादौ इन्द्राद्यभिधानं क्रियते, तद् नाम भण्यते। कथंभूतं तत् ?, इत्याह– पर्यायाणां शक्र-पुरन्दर-पाकशासन-शतमख-हरिप्रभृतीनां समानार्थवाचकानां ध्वनीनामनभिधेयमवाच्यम्, नामवतः पिण्डस्य संबन्धी धर्मोऽयं नाम्न्युपचरितः, स हि नामवान् भृतकदारकादिपिण्डः किलैकेन संकेतितमात्रेणेन्द्रादिशब्देनैवाऽभिधीयते, न तु शेषैः शक्र-पुरन्दर-पाकशासनादिशब्दैः, अतो नामयुक्तपिण्डगतधर्मो नाम्न्युपचरितः पर्यायानभिधेयमिति। पुनरपि कथंभूतं तन्नाम ?, इत्याह– 'ठिअमण्णत्थे त्ति' विवक्षिताद् भृतकदारकादिपिण्डादन्यश्चासावर्थश्चाऽन्यार्थो देवाधिपादिः, सद्भावतस्तत्र यत् स्थितम्, भृतकदारकादौ तु संकेतमात्रतयैव वर्तते; अथवा सद्भावतः स्थितमन्वर्थे– अनुगतः संबद्धः परमैश्वर्यादिकोऽर्थो यत्र सोऽन्वर्थः शचीपत्यादिः। सद्भावतस्तत्र स्थितं भृतकदारकादौ तर्हि कथं वर्तते ?, इत्याह– तदर्थनिरपेक्षं तस्येन्द्रादिनाम्नोऽर्थस्तदर्थः परमैश्वर्यादिस्तस्य निरपेक्षं संकेतमात्रेणैव तदर्थशून्ये भृतकदारकादौ वर्तते, इति पर्यायानभिधेयम्, स्थितमन्यार्थे, अन्वर्थे वा; तदर्थनिरपेक्षं यत् कचिद् भृतकदारकादौ इन्द्राद्यभिधानं क्रियते तद् नाम, इतीह तात्पर्यार्थः। प्रकारान्तरेणाऽपि नाम्नः स्वरूपमाह– यादृच्छिकं चेति, इदमुक्तं भवति– न केवलमनन्तरोक्तम्, किन्त्वन्यत्राऽवर्तमानमपि यदेवमेव यदृच्छया केनचिद् गोपालदारकादेरभिधानं क्रियते, तदपि नाम, यथा डित्थो डवित्थ इत्यादि। इदं चोभयरूपमपि कथंभूतम् ?, इत्याह– यावद् द्रव्यं च प्रायेणेति– यावदेतद्वाच्यं द्रव्यमवतिष्ठते तावदिदं नामाऽप्यवतिष्ठत इति भावः। किं सर्वमपि ?; न, इत्याह– प्रायेणेति, मेरु-द्वीप-समुद्रादिकं नाम प्रभूतं यावद्द्रव्यभावि दृश्यते; किञ्चित् त्वन्यथाऽपि समीक्ष्यते, देवदत्तादिनामवाच्यानां द्रव्याणां विद्यमानानामप्यपरापरनामपरावर्तस्य लोके दर्शनात्। सिद्धान्तेऽपि यदुक्तम्– "नामं आवकहिअं ति" तत् प्रतिनियतजनपदादिसंज्ञामेवाऽङ्गीकृत्य, यथोत्तराः कुरव इत्यादि। तदेवं प्रकारद्वयेन नाम्नः स्वरूपमुक्तम्, एतच्च तृतीयप्रकारस्योपलक्षणम्, पुस्तक-पत्र-चित्रादिलिखितस्य वस्त्वभिधानभूतेन्द्रादिवर्णावलीमात्रस्याऽप्यन्यत्र नामत्वेनोक्तत्वादिति। एतच्च सामान्येन नाम्नो लक्षणमुक्तम्, प्रस्तुते त्वेवं योज्यते– यत्र मङ्गलार्थशून्ये वस्तुनि मङ्गलमिति नाम क्रियते, तद् वस्तु नाम्ना नाममात्रेण मङ्गलमिति कृत्वा नाममङ्गलमित्युच्यते। पुस्तकादिलिखितं च यद् मङ्गलमिति वर्णावलीमात्रम्, तदपि नाम च तद् मङ्गलं चेति कृत्वा नाममङ्गलमित्यभिधीयते॥ इति गाथार्थः॥ २५॥

अथ सामान्येनैव स्थापनायाः स्वरूपमाह–

जं पुण[1] तयत्थसुन्नं[2] तयभिप्पाएण तारिसागारं। कीरइ व निरागारं इत्तरमियरं व सा ठवणा॥ २६॥

---

१ नाम यावत्कथिकमिति। २ यत् पुनस्तदर्थशून्यं तदभिप्रायेण तादृशाकारम्। क्रियते वा निराकारमित्वरमितरद् वा सा स्थापना॥ २६॥

सा स्थापनाऽभिधीयते, यत् किम् ?, इत्याह–यत् क्रियते इन्द्रादिस्थापनारूपतया विधीयते वस्तु, पुनःशब्दो नामलक्षणात् स्थापनालक्षणस्य वैसदृश्यद्योतकः। केन ?, इत्याह– तदभिप्रायेण तस्य सद्भूतेन्द्रस्याऽभिप्रायोऽध्यवसायस्तेन। कथंभूतं तद् वस्तु ?, इत्याह– तदर्थशून्यं स चाऽसावर्थश्च तदर्थः सद्भूतेन्द्रलक्षणस्तेन शून्यं तदर्थशून्यम्। पुनरपि कथंभूतम् ?, तादृशाकारं सद्भूतेन्द्रसमानाकारम्, वाशब्दस्य भिन्नक्रमत्वाद् निराकारं वा सद्भूतेन्द्राकारशून्यमित्यर्थः, चित्र-लेप्य-काष्ठ-पाषाणादिषु तादृशाकारं भवति, अक्षादिषु तु निराकारमित्यर्थः। पुनः किंभूतम् ?, इत्वरम्–अल्पकालीनम्, इतरद्वा यावत्कथिकम्। तत्रेत्वरं चित्राक्षादिगतम्, यावत्कथिकं तु नन्दीश्वरचैत्यप्रतिमादि; तदपि हि 'तिष्ठतीति स्थापना' इति स्थापनात्वेन समये निर्दिष्टमेव। तदिदमिह तात्पर्यम्–यद् वस्तु सद्भूतेन्द्रार्थशून्यं सत् तद्बुद्ध्या तादृशाकारं निराकारं वा, स्तोककालं यावत्कथिकं वा स्थाप्यते सा स्थापनेति। प्रकृते योजना त्वित्थं क्रियते–चित्रकर्मादिगतः परममुनिः स्थापनं स्थापना तया मङ्गलम्, स्थाप्यत इति वा स्थापना तया मङ्गलं स्थापनामङ्गलमिति व्यपदिश्यते॥ इति गाथार्थः॥ २६॥

अथ भाष्यकारः स्वयमेव नाम-स्थापनामङ्गलयोरुदाहरणमुपदर्शयन्नाह—

जह[1] मंगलमिह नामं जीवा-ऽजीवो-भयाण देसीओ। रूढं जलणाईणं ठवणाए सोत्थिआईणं॥ २७॥

यथाशब्द उदाहरणोपन्यासार्थः। क यथा ?, इत्याह– जीवा-ऽजीवोभयानां ज्वलनादीनां देशीतो देशीभाषया मङ्गलमिति नाम रूढम्, तत्र जीवस्याऽप्रेर्मङ्गलमिति नाम रूढम्, सिन्धुविषयेऽजीवस्य दवरकवलनकस्य मङ्गलमिति नाम रूढम्, लाटदेशे जीवाजीवोभयस्य तु मङ्गलमिति नाम रूढं वन्दनमालायाः, दवरिकादीनामिहाऽचेतनत्वात्, पत्रादीनां तु सचेतनत्वाज्जीवाजीवोभयत्वं भावनीयम्। स्वस्तिकादीनां तु या स्थापना लोके तस्या रूढं स्थापनामङ्गलत्वमिति शेषः॥ इति गाथार्थः॥ २७॥

अथ द्रव्यलक्षणमाह–

दवए[2] दुयए दोरवयवो विगारो गुणाण संदावो। दव्वं भव्वं भावस्स भूअभावं च जं जोग्गं॥ २८॥

'दु द्रु गतौ' इति धातुः, ततश्च द्रवति तांस्तान् स्वपर्यायान् प्राप्नोति मुञ्चति वेति तद् 'द्रव्यम्' इत्युत्तरार्धादानीय सर्वत्र संबध्यते, तथा द्रूयते स्वपर्यायैरेव प्राप्यते मुच्यते चेति द्रव्यम्, यान् किल पर्यायान् द्रव्यं प्राप्नोति तैस्तदपि प्राप्यते, यांश्च मुञ्चति तैस्तदपि

---

१ यथा मङ्गलमिह नाम जीवा-ऽजीवो-भयानां देशीतः। रूढं ज्वलनादीनां स्थापनायाः स्वस्तिकादीनाम्॥ २७॥ २ दुवए-।

२ द्रवति द्रूयते दोरवयवो विकारो (वा) गुणानां संद्रावः। द्रव्यं भव्यं भावस्य भूतभावं च यद् योग्यम्॥ २८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुच्यत इति भावः । तथा द्रवति तांस्तान् पर्यायान् गच्छतीति द्रुः सत्ता तस्या एवाऽवयवो विकारो वेति द्रव्यम्, अवान्तरसत्तारूपाणि हि द्रव्याणि महासत्ताया अवयवो विकारो वा भवन्त्येवेति भावः । तथा गुणा रूपरसादयस्तेषां संद्रवणं संद्रावः समुदायो घटादिरूपो द्रव्यम् । तथा 'भव्वं भावस्स त्ति-' भविष्यतीति भावस्तस्य भावस्य भाविनः पर्यायस्य यद् भव्यं योग्यं तदपि द्रव्यम्, राज्यपर्यायाऽर्हकुमारवत् । तथा भूतभावं चेति– भूतः पश्चात्कृतो भावः पर्यायो यस्य तद् भूतभावं तदपि द्रव्यम्, अनुभूतघृताधारत्वपर्यायरिक्तघृतघटवत् । चशब्दाद् भूतभविष्यत्पर्यायं च द्रव्यमिति ज्ञातव्यम्, भूतभविष्यद्घृताधारत्वपर्यायरिक्तघृतघटवदिति । एतदपि भूतभावं तथा भूतभविष्यद्भावं च कथंभूतं सद् द्रव्यम् ?, इत्याह– यद् योग्यम्, भूतस्य भावस्य भूतभविष्यतोश्च भावयोरिदानीमसत्त्वेऽपि यद् योग्यमर्हं तदेव द्रव्यमुच्यते; नाऽन्यत्, अन्यथा सर्वेषामपि पर्यायानामनुभूतत्वादनुभविष्यमाणत्वाच्च सर्वस्याऽपि पुद्गलादेर्द्रव्यत्वप्रसङ्गात् ॥ इति गाथार्थः ॥ २८ ॥

आह विनेयः– ननु सामान्येन द्रव्यलक्षणमवगतम्, परं द्रव्यमङ्गलं किमभिधीयते ? इति प्रस्तुतं निवेद्यताम्, इत्याह–

[1]आगमओऽणुवउत्तो मंगलसद्दाणुवासिओ वत्ता । तन्नाणलद्धिसहिओ वि नोवउत्तो त्ति तो दव्वं ॥ २९ ॥

इह द्रव्यमङ्गलं तावद् द्विधा भवति– आगमतः– आगममाश्रित्य, नोआगमतश्च– नोआगममाश्रित्य, तत्राऽऽगमो मङ्गलशब्दार्थज्ञानस्वरूपोऽत्राऽभिप्रेतः, तमाश्रित्य 'द्रव्यं' द्रव्यमङ्गलमिति पर्यन्ते संबन्धः । कोऽसौ ?, इत्याह– वक्ता मङ्गलशब्दार्थप्ररूपकः । किं सर्वोऽपि ?, न, इत्याह– अनुपयुक्तः तदुपयोगशून्यः । किं विशिष्टः ?, इत्याह– मङ्गलशब्दानुवासितः मङ्गलशब्दार्थज्ञानावरणक्षयोपशमसंस्कारानुरञ्जितमनाः; तज्ज्ञानलब्धिमानिति यावत् । ननु यदि तज्ज्ञानलब्धिमांस्तर्हि किमिति द्रव्यम् ?, इत्याह– 'तन्नाणेत्यादि' तज्ज्ञानलब्धिसहितोऽपि मङ्गलशब्दार्थज्ञानावरणक्षयोपशमवानपि; नोपयुक्तस्तत्र मङ्गलशब्दार्थे यस्मादसौ, 'तो त्ति' तस्माद् द्रव्यमङ्गलम् । इदमुक्तं भवति– ' अनुपयोगो द्रव्यम् ' इति वचनाद् मङ्गलशब्दार्थं जानन्नपि तत्रानुपयुक्तस्तं प्ररूपयंस्तज्ज्ञानलब्धिसहितोऽप्यागमतो द्रव्यमङ्गलमेव ॥ इति गाथार्थः ॥ २९ ॥

अत्राह कश्चित्– ननु कोऽयमागमो यमाश्रित्य द्रव्यमङ्गलमिदमभिधीयते ? । अत्रोच्यते– मङ्गलशब्दार्थज्ञानमत्राऽऽगमः । तर्हि प्रेर्यते, किम् ?, इत्याह–

---

१ ग-'भवत्येव' । २ आगमतोऽनुपयुक्तो मङ्गलशब्दानुवासितो वक्ता । तज्ज्ञानलब्धिसहितोऽपि नोपयुक्त इति तस्माद् द्रव्यम् ॥ २९ ॥

३ क. ख. ग. ' रूपो ' । ४ ख. 'मङ्गलशब्दार्थज्ञानवानपि' ।

[1]जइ नाणमागमो तो कह दव्वं दव्वमागमो कह णु ? । ओगमकारणमाया देहो सद्दो यतो दव्वं ॥३०॥

यदि मङ्गलशब्दार्थज्ञानमागमः; तर्हि तद्वक्ताऽसौ कथं द्रव्यमङ्गलम् ?, आगमस्य भावमङ्गलत्वेन द्रव्यमङ्गलत्वानुपपत्तेः । अथ द्रव्यम्– द्रव्यमङ्गलमसौ तर्हि आगमः कथम् ? येनाऽऽगमत आगममाश्रित्येत्युच्यते; द्रव्ये आगमस्याऽभावात्, भावे वा भावमङ्गलत्वप्रसङ्गात् । तस्मादागमतो द्रव्यमङ्गलमिति दूरविरुद्धमिदम् । इति परेणोक्ते आचार्यः प्राह– आगमेत्यादि, इदमुक्तं भवति– आगमत इत्युक्तेनैतद् भवता बोद्धव्यं यदुत– न साक्षादेवाऽऽगमोऽत्राऽस्ति, किं तर्हि ?, आगमस्य मङ्गलशब्दार्थज्ञानलक्षणस्य यत् कारणं निमित्तं तदेवेह विद्यत इत्यवगन्तव्यम् । किं पुनस्तदागमस्य कारणमिहाऽवसेयम् ?, इत्याह– अनुपयुक्तस्य वक्तुः संबन्धी आत्मा जीवो देहः शब्दश्च, जीवशरीरे हि तावदागमस्य कारणम्, तदाधारविरहितस्याऽऽगमस्याऽसंभवात् । शब्दोऽपि प्रत्याय्य शिष्यगताऽऽगमस्य कारणमेव, तमन्तरेण तस्याऽभावात् । यच्च कारणं तद् द्रव्यं भवत्येव " भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके, तद् द्रव्यम् " इत्यादिवचनात्, इत्याह– 'तो त्ति-' यत एवम्, तस्माद् द्रव्यं द्रव्यमङ्गलमिदमित्यर्थः । यद्यागमकारणमेवेह विद्यते, तर्हि कथमिदमागमो येनाऽऽगमतो द्रव्यमङ्गलं स्यात् ? इति चेत् । उच्यते– आगमस्य कारणभूता आत्मादयोऽपि कारणे कार्योपचारादागमत्वेनोच्यन्ते, भवति च कारणे कार्यव्यपदेशः, यथा–' तन्दुलान् वर्षति पर्जन्यः ' । तस्मादागमतो द्रव्यमङ्गलं न विरुध्यते ॥ इति गाथार्थः ॥ ३० ॥

अथ— "[2]नत्थि नयेहिं विहूणं सुत्तं अत्थो य जिणमए किंचि । आसज्ज उ सोयारं नये नयविसारओ बूया" ॥ १ ॥

इति वचनाज्जिनमते सर्वेऽपि पदार्था नयैर्विचारणीयाः, इत्यतो द्रव्यमङ्गलमपि नयैर्विचारयन्नाह–

[3]एगो मंगलमेगं णेगा णेगाइं णेगमनयस्स । संगहनयस्स एक्कं सव्वं चिय मंगलं लोए ॥ ३१ ॥

वक्ष्यमाणशब्दार्थस्य नैगमनयस्य मतेनैकोऽनुपयुक्तो मङ्गलशब्दार्थप्ररूपक एकं द्रव्यमङ्गलम्, अनेके त्वनुपयुक्तास्तत्प्ररूपका अनेकानि द्रव्यमङ्गलानि । अयं हि नयः सामान्यं विशेषांश्चाऽभ्युपगच्छत्येव, तत्र विशेषवादित्वपक्षे एकोऽनुपयुक्त एकं द्रव्यमङ्गलम्; अनेके त्वनुपयुक्ता अनेकानि द्रव्यमङ्गलानीत्युपपद्यत एव, विशेषाणां पृथग्भिन्नत्वादिति । संग्रहनयस्य तु वक्ष्यमाणस्वरूपस्य केवलसामान्यवादिनो मतेन

---

१ यदि ज्ञानमागमस्तस्मात् कथं द्रव्यं, द्रव्यमागमः कथं नु ? । आगमकारणमात्मा देहः शब्दो यतो द्रव्यम् ॥ ३० ॥ × मङ्गलता-।

२ नास्ति नयैर्विहीनं सूत्रमर्थश्च जिनमते किञ्चित् । आसाद्य तु श्रोतारं नयेन च विशारदो ब्रूयात् ॥ १ ॥

३ एको मङ्गलमेकननेकेऽनेकानि नैगमनयस्य । संग्रहनयस्यैकं सर्वमेव मङ्गलं लोके ॥ ३१ ॥ ४ ख. 'त्युच्यते' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वस्मिन्नपि लोके एकमेव द्रव्यमङ्गलम् ; सर्वेषां द्रव्यमङ्गलत्वसामान्यादव्यतिरिक्तत्वात् , व्यतिरेके चाऽद्रव्यमङ्गलत्वप्राप्तेः, सामान्यस्य च त्रिभुवनेऽप्येकत्वात् ॥ इति गाथार्थः ॥ ३१ ॥

एतदेवाह–

ऐक्कं निच्चं निरवयवमकिरियं सव्वगं च सामन्नं । निस्सामन्नत्ताओ नत्थि विसेसो खपुप्फं व ॥ ३२ ॥

एकमद्वितीयत्वादेकसंख्योपेतं सामान्यम् । एकमपि क्षणिकं स्यात् , तत्राह– नित्यमनपोयि । नित्यमप्याकाशवत् सावयवं स्यात् , तन्निरवयवत्वे सवितुरुदयाऽस्तमनाऽयोगात् , इत्यत्राह– निरवयवमनंशं, पूर्वापरकोटिशून्यत्वादिति । निरवयवमपि परमाणुवत् सक्रियं स्यात् , अत आह– अक्रियं क्रियारहितम् , परिस्पन्दविनिर्मुक्तत्वादिति । अक्रियमपि दिगादिवत् सर्वगतं न स्यात् , अत्राह– सर्वगं च सकललोकाऽवाप्तसत्ताकम् । इदमित्थंभूतं सामान्यमेवाऽस्ति, न तु विशेषः कश्चनाऽपि विद्यते । कुत इत्याह– निःसामान्यत्वात् सामान्यविरहितत्वात् , खपुष्पवत् , यच्चाऽस्ति तत् सामान्यविरहितं न भवति, यथा घटः । तस्मादेकस्माद् द्रव्यमङ्गलसामान्यादव्यतिरिक्तत्वाद् तद्व्यतिरेके चाऽद्रव्यमङ्गलताप्रसङ्गात् सामान्यस्य च त्रिभुवनेऽप्येकत्वादेकमेव संग्रहनयमते द्रव्यमङ्गलम् , इति स्थितम् ॥ इति गाथार्थः ॥ ३२ ॥

अत्र विशेषवादिनयमतस्थितः कश्चिदाह– ननु कथमनेकानि द्रव्यमङ्गलानि न संभवन्ति ?, यथा हि वनस्पतिरित्युक्ते वृक्ष-गुल्म-लता-वीरुदादयो विशेषा एव प्रतीयन्ते; न पुनस्तदतिरिक्तः कश्चिद् वनस्पतिः, एवमिहाऽपि द्रव्यमङ्गलमित्युक्तेऽनुपयुक्ततत्स्वरूपकलक्षणा विशेषा एवाऽवगम्यन्ते; न तु तदधिकं किञ्चित् सामान्यम् , अतः किं शून्य इवाऽस्मिन् जगत्येवमभिधीयते– 'निस्सामन्नत्ताओ नत्थि विसेसो खपुप्फं व' इति ?, इति विशेषवादिना प्रोक्ते सामान्यवादी संग्रहः प्राह– ननु यत एव वनस्पतिरित्युक्ते वृक्षादयः प्रतीयन्ते, अत एव ते तदनर्थान्तरभूताः, हस्तस्येवाऽङ्गुलयः, इह यस्मिन्नुच्यमाने यत् प्रतीयते, तत् ततो व्यतिरिक्तं न भवति, यथा हस्त इत्युक्तेऽङ्गुल्यादयः प्रतीयमाना हस्ताद् न व्यतिरिक्ताः, प्रतीयन्ते च वनस्पतिरित्युक्ते वृक्षादयः, इत्यमी न वनस्पतिव्यतिरिक्ताः, ततो न सामान्यादतिरिक्तः कोऽपि विशेषः समस्ति, इत्येकमेव सर्वत्र द्रव्यमङ्गलमिति । अथोपपत्त्यन्तरेणाऽपि सामान्यवाद्येव वृक्षादीनां सर्वेषामपि वनस्पतिसामान्यरूपतां समर्थयन्नाह–

---

१ एकं नित्यं निरवयवमक्रियं सर्वगं च सामान्यम् । निःसामान्यत्वाद् नास्ति विशेषः खपुष्पमिव ॥ ३२ ॥ २ ख. 'पायम्' ॥

चूओ वणस्सइच्चिय मूलाइगुणो त्ति तस्समूहो व्व । गुम्मादओ वि एवं सव्वे न वणस्सइविसिट्ठा॥३३॥

'चूतः' आम्रो वनस्पतिरेव वनस्पतिसामान्यं न व्यभिचरतीत्यर्थः, इति प्रतिज्ञा, मूल-कन्द-स्कन्ध-त्वक्-शाखा-प्रवाल-पत्र-पुष्प-फल-बीजादिगुणत्वादिति हेतुः, चूतसमूहवदिति दृष्टान्तः; इह यो यो मूलादिगुणः स स वनस्पतिसामान्यरूप एव, यथा चूतसमूहः, मूलादिगुणश्च चूतः, तस्माद् वनस्पतिसामान्यरूप एव, गुल्मादयोऽप्येवं वाच्याः, तथाहि– विशेषवादिना विशेषतयाऽभ्युपगम्यमानो गुल्मोऽपि वनस्पतिसामान्यरूप एव, मूलादिगुणत्वात् , गुल्मसमूहवत् , इति । एवमन्येषामपि लतादिविशेषाणां वनस्पतिसामान्यादव्यतिरिक्तत्वं साधनीयम् । तद्व्यतिरेके सर्वत्र मृन्मयत्वादिप्रसङ्गो बाधकं प्रमाणम् । तस्मात् सामान्यमेवाऽस्ति, न विशेषाः ॥ इति गाथार्थः ॥ ३३ ॥

किञ्च—

सामन्नाउ विसेसो अन्नोऽणन्नो व होज्ज, जइ अण्णो । सो नत्थि खपुप्फं पिवऽणण्णो सामन्नमेव तयं ॥३४॥

भो विशेषवादिन् ! सामान्याद् विशेषोऽन्यो वा स्यात् , अनन्यो वा ?, इति विकल्पद्वयम् । यद्याद्यो विकल्पः, तर्हि नास्त्येव विशेषः, निःसामान्यत्वात् , खपुष्पवत्– इह यद् यत् सामान्यविनिर्मुक्तं तत् तद् नास्ति, यथा गगनारविन्दम् , सामान्यविरहितश्च विशेषवादिना विशेषोऽभ्युपगम्यते, तस्माद् नास्त्येवाऽयमिति । अथाऽनन्य इति द्वितीयः पक्षः कक्षीक्रियते, हन्त ! तर्हि सामान्यमेवाऽसौ, तदनन्यत्वात् , सामान्यात्मवत् , यद् यस्मादनन्यत् तत् तदेव, यथा सामान्यस्यैवाऽऽत्मा, अनन्यश्च सामान्याद् विशेषः, इति सामान्यमेवाऽयमिति । यदि चाऽतिपक्षपातितया सामान्येऽपि विशेषोपचारः क्रियते, तर्हि न कांचित् कचित् क्षतिः; न ह्युपचारेणोच्यमानो भेदस्तात्त्विकमेकत्वं बाधितुमलम् , तस्मात् सामान्यमेवाऽस्ति न विशेषः । इति संग्रहनयमतेन सर्वत्रैकमेव द्रव्यमङ्गलम् ॥ इति गाथार्थः॥३४॥

तदेवं संग्रहेण स्वाभिमते सामान्ये प्रतिष्ठिते विशेषवादिनौ नैगमव्यवहारावाहतुः–

नं विसेसत्थंतरभूअमत्थि सामण्णमाह ववहारो । उवलंभववहाराभावाओ खरविसाणं व ॥ ३५ ॥

---

१ चूतो वनस्पतिरेव मूलादिगुण इति तत्समूह इव । गुल्मादयोऽप्येवं सर्वे न वनस्पतिविशिष्टाः ॥ ३३ ॥

२ सामान्याद् विशेषोऽन्योऽनन्यो वा भवेत् , यद्यन्यः । स नास्ति खपुष्पमिव, अनन्यः सामान्यमेव तत् ॥ ३४ ॥

३ क. 'द्वितीयपक्षः' । ४ क. 'कदाचित् क्षतिः' । ख. ग. 'काचित् क्षतिः' ।

५ न विशेषार्थान्तरभूतमस्ति सामान्यमाह व्यवहारः । उपलम्भव्यवहाराभावात् खरविषाणमिव ॥ ३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु भोः सामान्यवादिन् ! भवतोऽपि वनस्पतिसामान्यं बकुलाऽशोक-चम्पक-नाग-पुन्नागा-ऽऽम्र-सर्जा-ऽर्जुनादिविशेषेभ्योऽर्थान्तरं वाऽभ्युपगम्येत, अनर्थान्तरं वा ?। यद्यर्थान्तरम्, तर्हि नास्त्येव तद् विशेषव्यतिरेकेण, उपलब्धिलक्षणप्राप्तस्य तस्योपलम्भव्यवहाराभावात्, खरविषाणवत्। क एवमाह ?, व्यवहारनयः, उपलक्षणत्वाद् विशेषवादी नैगमश्च। एतौ हि लोकव्यवहारानुयायिनौ, तद्व्यवहारश्च प्रायो विशेषनिष्ठ एव, इति विशेषानेव समर्थयत इति भावः। अथानुपलब्धिलक्षणप्राप्तं तदभ्युपगम्यते, तथाऽपि नास्ति, विशेषेभ्यः सर्वथाऽन्यत्वात्, गगनकुसुमवदिति। अथ विशेषेभ्योऽनर्थान्तरं तदिति द्वितीयपक्षः, तर्हि विशेषा एव तत्, तेभ्योऽनर्थान्तरभूतत्वात्, विशेषाणामात्मस्वरूपवादिति। यदि च विशेषेष्वपि सामान्योपचारः क्रियते, तर्हि न काचित् क्षतिः, न ह्यौपचारिकमेकत्वं तात्त्विकमनेकत्वं बाधते ॥ इति गाथार्थः ॥ ३५ ॥

एतदेव समर्थयते–

चूयाईएहिंतो को सो अण्णो वणस्सई नाम ?। नत्थि विसेसत्थंतरभावाओ सो खपुप्फं व ॥ ३६ ॥

चूतादिभ्यो विशेषेभ्योऽन्यः को नाम वनस्पतिः, यो व्रण-पिण्डी-पादलेपादिके लोकव्यवहारे उपयुज्येत ? न कोऽपीत्यर्थः। तस्मात् समस्तलोकसंव्यवहारानुपयोगित्वाद् नास्ति सामान्यम्, खपुष्पवत् इति पूर्वोक्तमेवार्थं निगमनद्वारेणाह–'नत्थीत्यादि' तस्माद् नास्त्यसौ सामान्यवादिनाऽभ्युपगम्यमानो वनस्पतिः सद्रूपेभ्यो विशेषेभ्योऽर्थान्तरभावात् खपुष्पवत्; सद्रूपेभ्यो हि विशेषेभ्योऽर्थान्तरं भवत् असद्रूपमेव भवति तथाभूतं च नास्त्येव खपुष्पवत् ॥ इति गाथार्थः ॥ ३६ ॥

किं पुनः कारणं येन नैगमव्यवहारौ विशेषान् समर्थयतः ?, इत्याह—

[3]जं नेगमववहारा लोअव्ववहारतप्परा सो य। पाएण विसेसमओ तो ते तग्गाहिणो दो वि ॥ ३७ ॥

यद् यस्माद् नैगमव्यवहारौ लोकव्यवहारतत्परौ, स च लोकव्यवहारस्त्यागाऽऽदानादिकः प्रायेण विशेषमयो विशेषनिष्ठ एव दृश्यते, सामान्यस्य व्रणपिण्ड्यादौ लोकेऽनुपयोगात्। 'वनं' 'सेना' इत्यादौ क्वचित् कश्चित् कथञ्चित् सामान्यस्याऽपि दृश्यते उपयोगः, इति प्रायोग्रहणम्। यत एवम्, तस्मात् तौ नैगमव्यवहारौ द्वावपि तद्ग्राहिणौ विशेषाभ्युपगमपरौ ॥ इति गाथार्थः ॥३७॥

---

१ चूतादिभ्यः कः सोऽन्यो वनस्पतिर्नाम ?। नास्ति विशेषार्थान्तरभावात् स खपुष्पमिव ॥ ३६ ॥

२ यद् नैगमव्यवहारौ लोकव्यवहारतत्परौ, स च। प्रायेण विशेषमयस्तस्मात् तौ तद्ग्राहिणौ द्वावपि ॥ ३७ ॥

अत्र परः प्राह—

[1]तेसिं तुल्लमयत्ते को णु विसेसोऽभिहाणओ अन्नो ?। तुल्लत्ते वि इहं नेगमस्स वत्थंतरे भेओ ॥ ३८ ॥

तयोर्नैगमव्यवहारयोस्तुल्यमतत्वे उक्तन्यायेन विशेषवादितया सदृशाभिप्रायत्वे सति 'णु' वितर्के, अभिधानं नाम ततोऽन्यस्तद् वर्जयित्वाऽपरः को विशेषः ? न कश्चिदित्यर्थः। एको नैगमः; अपरस्तु व्यवहार इत्येवमनयोर्नामैव भिद्यते न त्वभिप्राय इति भावः। आचार्य आह–'तुल्लत्ते' इत्यादि, इह विशेषाऽभ्युपगमे यद्यपि नैगमस्य व्यवहारेण सह तुल्यत्वं सदृशाभिप्रायत्वम्, तथापि तस्मिन् सत्यपि वस्त्वन्तरे सामान्यादिके भेदो नानात्वमस्त्येव ॥ इति गाथार्थः ॥ ३८ ॥

अथवा नैगमव्यवहारयोरनेन तुल्यमतत्वाऽऽख्यापनेन सामान्यविशेषग्राहकस्य नैगमस्य संग्रहव्यवहारनयद्वयेऽन्तर्भावः सूचितो द्रष्टव्य इति दर्शयन्नाह—

[2]जो सामण्णग्गाही स नेगमो संगहं गओ अहवा। इयरो ववहारमिओ जो तेण समाणनिद्देसो ॥३९॥

अथवेति प्रकारान्तरेण समाधानमुच्यत इत्यर्थः। तत्र नैगमस्तावत् सामान्यं मन्यते विशेषांश्च। ततो यः सामान्यग्राही नैगमः स संग्रहं गतः प्राप्तोऽन्तर्भूत इति यावत्, इतरस्तु विशेषग्राही स व्यवहारनयमितः प्राप्तोऽन्तर्गतो यो नैगमनयस्तेन सह व्यवहारनयस्याऽयं समाननिर्देशः '[3]जं नेगमववहारा' इत्यादिना तुल्यनिर्देशः। ततश्च 'तेसिं[4] तुल्लमयत्ते को णु विसेसो' इत्यादिना यदेकत्वं परेण प्रेरितं तदस्माकं न क्षतिमावहति, नैगमस्य संग्रहव्यवहारनयद्वयेऽन्तर्भावस्येष्टत्वेन सिद्धसाधनादिति भावः। यद्येवं नैगमः संख्यायास्त्रुट्यति, तथा च सति षडेव नयाः प्रसजन्तीति चेत्। मौत्सुक्यं भजस्व, सर्वमन्नार्थे पुरस्ताद् वक्ष्यामः ॥ इति गाथार्थः ॥ ३९ ॥

अथ ऋजुसूत्रनयमतेन द्रव्यमङ्गलं विचारयितुमाह–

[5]उज्जुसुअस्स सयं संपयं च जं मंगलं तयं एक्कं। नातीतमणुप्पन्नं मंगलमिट्ठं परक्कं व ॥ ४० ॥

---

१ तयोस्तुल्यमतत्वे को नु विशेषोऽभिधानतोऽन्यः ?। तुल्यत्वेऽपीह नैगमस्य वस्त्वन्तरे भेदः ॥ ३८ ॥ ×मतख्यापनेन-।

२ यः सामान्यग्राही स नैगमः संग्रहं गतोऽथवा। इतरो व्यवहारमितो यस्तेन समाननिर्देशः ॥ ३९ ॥

३ गाथा ३७। ४ गाथा ३८।

५ ऋजुसूत्रस्य स्वकं सांप्रतं च यद् मङ्गलं तदेकम्। नातीतमनुत्पन्नं मङ्गलमिष्टं परकीयं वा ॥ ४० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

ऋजु अतीताऽनागतपरिहारेण परकीयपरिहारेण वाऽकुटिलं वस्तु सूत्रयतीति ऋजुसूत्रो नयस्तस्य स्वकमात्मीयमेव, तथा सांप्रतं च वर्तमानक्षणभाव्येव यद् द्रव्यमङ्गलं तदेवैकमभिमतम् । अनभिमतप्रतिषेधमाह–नातीतम्, अतिक्रान्तसमयभावि, नाऽप्यनुत्पन्नं भविष्यत्समयभावि द्रव्यमङ्गलम्, अस्येष्टम् । 'परकं व' परकीयं वा यद् द्रव्यमङ्गलं तदप्यस्य नेष्टम्, विवक्षितैकमज्ञापकस्याऽऽत्मानं विहाय यत् परस्मिन् वर्तते तदपि द्रव्यमङ्गलमसौ नेच्छतीत्यर्थः । मन्दमतिशिक्षार्थबोधार्थश्चाऽनभिमतप्रतिषेधः, अन्यथा ह्यभिमते कथितेऽनभिमतमर्थापत्तितो गम्यत एव ॥ इति गाथार्थः ॥ ४० ॥

अमुमेवार्थं प्रयोगोपदर्शनद्वारेण समर्थयन्नाह–

नातीतमणुप्पन्नं परकीयं वा पओअणाभावा । दिट्ठंतो खरसिंगं परधणमहवा जहा विफलं ॥४१॥

अतीतमनुत्पन्नं वस्तु नास्तीति प्रतिज्ञा, प्रयोजनस्य विवक्षितफलस्य तत्राऽभावात् सर्वप्रयोजनाऽकरणादित्यर्थ इत्ययं हेतुः, दृष्टान्तस्तु खरशृङ्गम्, असत्त्वे चातीताऽनागतयोर्द्रव्यमङ्गलता दूरोत्सारितैव, धर्मिसत्त्व एव धर्माणामुपपद्यमानत्वादिति । द्वितीयप्रयोगः क्रियते– परकीयमपि यज्ञदत्तसंबन्ध्यपि वस्तु देवदत्तापेक्षया नास्त्येव, प्रयोजनाऽकरणात् खरविषाणवदिति हेतुदृष्टान्तौ तावेव, अथवा यथा परस्य यज्ञदत्तस्य धनं देवदत्तापेक्षया विफलं प्रयोजनाऽसाधकं सद् नास्ति, तथा सर्वमपि परकीयं नास्तीति द्वितीयो दृष्टान्तः । इति कुतः परकीयस्याऽपि द्रव्यमङ्गलत्वम् ? ॥ इति गाथार्थः ॥ ४१ ॥

शब्द–समभिरूढै–वंभूतास्तु विशुद्धनयत्वादागमतो द्रव्यमङ्गलं नेच्छन्त्येव; कस्मात् ?, इत्याह—

जाणं नाणुवउत्तोऽणुवउत्तो वा न याणइ जम्हा । जाणंतोऽणुवउत्तोत्ति बिंति सद्दादयोऽवत्थुं ॥ ४२ ॥

जम्हा इति यस्मात् जानन्नवबुध्यमानो 'मङ्गलं' इति गम्यते, नानुपयुक्तो न तज्ज्ञानोपयोगशून्यो भवति, ज्ञायकस्य ज्ञानोपयोगनान्तरीयकत्वात् । अनुपयुक्तो वा तत्र न तज्जानीते न तस्य ज्ञायकोऽसौ व्यपदिश्यते, अज्ञायकत्वाभिमतवत्, काष्ठादिवद् वेत्यर्थः । तस्माज्जानन्ननुपयुक्तश्चेत्येतदप्यवस्तु असदभाव इति यावत्; एतद् ब्रुवते शब्दादयः शब्द-समभिरूढै-वंभूतनयाः ॥ इति गाथार्थः ॥ ४२ ॥

---

१ नातीतमनुत्पन्नं परकीयं वा प्रयोजनाभावात् । दृष्टान्तः खरशृङ्गं परधनमथवा यथा विफलम् ॥ ४१ ॥ + शिष्या ,

२ जानन् नाऽनुपयुक्तः अनुपयुक्तो वा न जानाति यस्मात् । जानन्ननुपयुक्त इति ब्रुवते शब्दादयोऽवस्तु ॥ ४२ ॥

अत्राऽर्थे उपपत्तिमाह—

[1]हेऊ विरुद्धधम्मत्तणा हि जीवो व्व चेअणारहिओ । न य सो मङ्गलमिट्ठं तयत्थसुन्नोत्ति पावं व ॥४३॥

जानन्ननुपयुक्तश्चेत्येतदवस्तु इत्यस्यामनन्तरातिक्रान्तगाथापर्यन्तकृतप्रतिज्ञायामयं हेतुः । कः ?, इत्याह–'विरुद्धधम्मत्तणा हि त्ति' विरुद्धौ धर्मौ यत्र तत् तथा तद्भावस्तस्माद् विरुद्धधर्मत्वादिति । दृष्टान्तमाह– यथा जीवश्चेतनारहितः । इदमुक्तं भवति– यथा जीवश्चेतनारहितश्च, माता च वन्ध्या चेत्यादि विरुद्धधर्माध्यासादवस्तु, एवं ज्ञायकश्चाऽनुपयुक्तश्चेत्येतदप्यवस्त्वेव । भवतु वा ज्ञायकोऽनुपयुक्तश्च, तथापि नास्माकमसौ मङ्गलत्वेनेष्टः, तदर्थशून्यत्वाद् मङ्गलार्थशून्यत्वात्, पापवदिति । भावमङ्गलग्राहिणो ह्यमी कथं द्रव्यमङ्गलमिच्छन्ति ?, इति भावः । इति गाथार्थः ॥ ४३ ॥

तदेवं विचारितं नयैर्द्रव्यमङ्गलम्, तथा च सति समर्थितमागमतो द्रव्यमङ्गलम् । अथ नोआगमतस्तदभिधीयते । तच्च ज्ञशरीर— भव्यशरीर-तद्व्यतिरिक्तभेदात् त्रिधा । तत्र ज्ञशरीर-भव्यशरीरलक्षणभेदद्वयमाह–

[2]मंगलपयत्थजाणयदेहो भव्वस्स वा सजीवोत्ति । नोआगमओ दव्वं आगमरहिओ त्ति जं भणिअं ॥४४॥

'नोआगमओ दव्वं त्ति' नोआगमतो ज्ञशरीरं द्रव्यमङ्गलमित्यर्थः । कः ?, इत्याह– मङ्गलपदार्थज्ञस्य देहः, इदमुक्तं भवति– इह मङ्गलपदार्थः पूर्वं येन स्वयं सम्यग् विज्ञातः; परेभ्यश्च प्ररूपितः, तस्य संबन्धी जीवविप्रमुक्तः सिद्धशिलातलादिगतो देहोऽतीतकालनयानुवृत्त्याऽतीतमङ्गलपदार्थज्ञानाऽऽधारत्वाद् नोआगमतो द्रव्यमङ्गलमुच्यते । नोशब्दस्येह सर्वनिषेधवचनत्वात्; आगमस्य च सर्वथाऽत्राऽभावाद् नोआगमता द्रष्टव्या, अतीतमङ्गलपदार्थज्ञानलक्षणाऽऽगमपर्यायकारणत्वात् तु द्रव्यमङ्गलता, यथाऽतीतघृताधारपर्यायकारणत्वाद् रिक्तघृतकुम्भे घृतघटतेति । 'भव्वस्स व त्ति' वाशब्दो द्वितीयपक्षसमुच्चये, भव्यस्य च मङ्गलपदार्थज्ञानयोग्यस्य संबन्धी 'देहः' इति वर्तते, स जीवः सचेतनो नोआगमतो भव्यशरीरद्रव्यमङ्गलमित्यर्थः । इदमत्र हृदयम्– य इदानीं मङ्गलपदार्थं न जानीते, भविष्यति तु काले ज्ञास्यति; तस्य संबन्धी सचेतनो देहो भविष्यत्कालनयाऽनुवृत्त्या भविष्यन्मङ्गलपदार्थज्ञानाधारत्वाद् नोआगमतो भव्यशरीरद्रव्यमङ्गलमिति । अत्रापि नोशब्दस्य सर्वनिषेधपरत्वात्; आगमस्य चेदानीमभावाद् नोआगमता समवसेया । भविष्यत्काले

---

१ हेतुर्विरुद्धधर्मत्वाद् हि जीव इव चेतनारहितः । न च स मङ्गलमिष्टं तदर्थशून्य इति पापमिव ॥ ४३ ॥

२ मङ्गलपदार्थज्ञायकदेहो भव्यस्य वा सजीव इति । नोआगमतो द्रव्यमागमरहित इति यद् भणितम् ॥ ४४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

मङ्गलपदार्थज्ञानलक्षणस्याऽऽगमस्य कारणत्वात् तु द्रव्यमङ्गलता, यथा भविष्यद्घृताधारपर्यायकारणत्वाद् रिक्तघृतकुम्भे घृतघटता । नोआगमत इत्येतद् विवृण्वन्नाह—'आगमरहिओ इत्यादि' नोशब्दस्य सर्वनिषेधवचनत्वाद् नोआगमत इत्यनेनैतदुक्तं भवति, किम् ?, इत्याह—मङ्गलपदार्थज्ञस्य भव्यस्य च संबन्धी अचेतनः सचेतनश्च देहो वर्तमानकाले सर्वथैवाऽऽगमरहितः ॥ इति गाथार्थः ॥ ४४ ॥

तदेवं सर्वनिषेधवचनत्वे नोशब्दस्यैवमुदाहरणमुपदर्शितम्, यदिवा देशनिषेधपरेऽपि नोशब्दे एतत् संबध्यत एवेति दर्शयन्नाह—

अहवा नो देसम्मिं, नोआगमओ तदेगदेसाओ । भूयस्स भाविणो वाऽऽगमस्स जं कारणं देहो ॥ ४५ ॥

अथवा 'नो' इति नोशब्दः 'देसम्मि त्ति' देशनिषेधवचनो विवक्ष्यत इत्यर्थः । ततश्च नोआगमत इति कोऽर्थः ?, इत्याह—तदेकदेशादागमैकदेशमाश्रित्य द्रव्यमङ्गलमित्यर्थः । किं पुनस्तत् ? इति चेत् । मङ्गलपदार्थज्ञस्याऽचेतनः, भव्यस्य तु सचेतनो देह इत्यनुवर्तमानं संबध्यते । कः पुनरिहाऽऽगमस्यैकदेशो यमाश्रित्य नोआगमतो द्रव्यमङ्गलमिदं स्यात् ? इति । अत्रोच्यते—यथोक्तो ज्ञ—भव्यशरीररूपो देह एवाऽत्राऽऽगमैकदेशः । ननु जडस्य देहस्य कथमागमैकदेशता ?, इति । अत्राह— 'भूयस्सेत्यादि' यद् यस्मादचेतनो देहो भूतस्याऽतीतस्य मङ्गलपदार्थज्ञानलक्षणस्याऽऽगमस्य कारणं हेतुः, सचेतनस्तु भव्यदेहो भाविनो यथोक्तस्याऽऽगमस्य कारणम्; तस्माद् निजकार्यस्याऽऽगमस्यैकदेशे वर्तत एव; कारणं हि कार्यस्यैकदेशे वर्तत एव, यथा मृत्तिका घटस्य । अभेद एव घट-मृत्तिकयोरिति चेत् । नैवम्, भेदाऽभेदयोरेव जैनैरिष्टत्वात्, यद् वक्ष्यति—

" नत्थि पुढवीविसिट्ठो घडो त्ति जं तेण जुज्जइ अण्णो । जं पुण घडो त्ति पुव्वं नासी पुढवी तओ अण्णो " ॥ १ ॥

आह—ननु मङ्गलपदार्थज्ञानस्य परिणामिकारणं जीव एव, ततस्तस्य स्वकार्यैकदेशे वृत्तिरस्तु; यथा मृत्तिकायाः, शरीरं त्वागमस्य परिणामिकारणं न भवति; अतः कथं तस्य तदेकदेशवृत्तिता ? । सत्यम्, किन्तु " अण्णोण्णाणुगयाणं इमं च तं च त्ति विभयणमजुत्तं, जह खीरपाणियाणं " इत्यादिवचनात् संसारिणो जीवस्य शरीरेण सहाऽभेद एव व्यवह्रियते, अतो जीवस्य परिणामिकारणत्वे शरीरस्याऽपि तद् विवक्ष्यते, इत्यस्याऽऽगमैकदेशता न विरुध्यते । भवत्वेवम्, तथाप्यागमतो द्रव्यमङ्गलं प्राग् यदुक्तं तेन सहाऽस्य को भेदः ?, तत्रापि हि " आगमकारणमाया देहो सदो य " इति वचनाच्छरीरमेव द्रव्यमङ्गलमुक्तम्; अत्रापि च तदेव, इति

१ अथवा नो देशे, नोआगमतस्तदेकदेशात् । भूतस्य भाविनो वाऽऽगमस्य यत् कारणं देहः ॥ ४५ ॥ ✕ ३-।

२ नास्ति पृथिवीविशिष्टो घट इति यत् तेन युज्यतेऽनन्यः । यत् पुनर्घट इति पूर्वं नासीत् पृथिवी ततोऽन्यः ॥ १ ॥

३ अन्योऽन्याऽनुगतानामिदं च तच्चेति विभजनमयुक्तम्, यथा क्षीरपानीययोः । ४ गाथा ३० ।

कथं नैकत्वम् ? । सत्यम्, किन्तु प्रागुपयोगरूप एवाऽऽगमो नास्ति, लब्धितस्तु विद्यत एव, अत्र तूभयस्वरूपोऽपि नास्ति, कारणमात्रस्यैव सत्त्वात्, इति विशेषः ॥ इति गाथार्थः ॥ ४५ ॥

तदेवं दर्शितं ज्ञशरीर—भव्यशरीरलक्षणं नोआगमतो द्रव्यमङ्गलभेदद्वयम्, सांप्रतं ज्ञशरीर—भव्यशरीरव्यतिरिक्तस्वरूपं तत्तृतीयभेदमुपदर्शयन्नाह—

जाणय—भव्वसरीराऽइरित्तमिह दव्वमङ्गलं होइ । जा मङ्गल्ला किरिआ तं कुणमाणो अणुवउत्तो ॥ ४६ ॥

इह तावद् भावतः परमार्थतो मङ्गलं द्विविधम्—जिनप्रणीत आगमः, तत्प्रणीता मङ्गल्या प्रत्युपेक्षणादिक्रिया च । इतश्च पूर्वमागमतो नोआगमतश्च यद् द्रव्यमङ्गलमुक्तं तत्सर्वमागममङ्गलापेक्षमेव, ज्ञशरीर—भव्यशरीरव्यतिरिक्तं तु द्रव्यमङ्गलं मङ्गल्यक्रियामेवाऽऽश्रित्य भणिष्यत इति परिभावनीयम् । अथ गाथार्थो व्याख्यायते— तत्र ज्ञशरीर—भव्यशरीराभ्यां व्यतिरिक्तमिह द्रव्यमङ्गलं भवति । कः ?, इत्याह— अनुपयुक्तः, तां कुर्वाणो या । किम् ?, इत्याह—या प्रत्युपेक्षण—प्रमार्जनादिका मङ्गल्या क्रिया । इदमुक्तं भवति— योऽनुपयुक्तो जिनप्रणीतां मङ्गलरूपां प्रत्युपेक्षणादिक्रियां करोति, स नोआगमतो ज्ञशरीर—भव्यशरीरातिरिक्तं द्रव्यमङ्गलम्; उपयोगरूपोऽत्राऽऽगमो नास्तीति नोआगमता । ज्ञशरीर—भव्यशरीरयोर्ज्ञानापेक्षा द्रव्यमङ्गलता; अत्र तु क्रियापेक्षा, अतस्तद्व्यतिरिक्तत्वम्, अनुपयुक्तस्य क्रियाकरणात् तु द्रव्यमङ्गलत्वं भावनीयम्, उपयुक्तस्य तु क्रिया यदि गृह्येत तदा भावमङ्गलतैव स्यादिति भावः ॥ इति गाथार्थः ॥ ४६ ॥

अथ प्रकारान्तरेणापि प्रस्तुतमङ्गलमाह—

जं भूयभावमङ्गलपरिणामं तस्स वा जयं जोग्गं । जं वा सहावसोहणवन्नाइगुणं सुवण्णाइ ॥ ४७ ॥

तं पि य हु भावमङ्गलकारणओ मङ्गलं ति निद्दिट्ठं । नोआगमओ दव्वं नोसद्दो सव्वपडिसेहे ॥ ४८ ॥

नोआगमतो ज्ञशरीर—भव्यशरीरव्यतिरिक्तं द्रव्यं द्रव्यमङ्गलमित्यर्थ इति द्वितीयगाथोत्तरार्धे संबन्धः । किं तत् ?, इत्याह—यद् भूतभावमङ्गलपरिणामम्, इह भावमङ्गलशब्देन चरणकरणक्रियाकलापोऽभिप्रेतः, तस्य परिणमनं परिणतिः प्रवृत्तिर्भावमङ्गल-

१ ज्ञार्थक—भव्यशरीरातिरिक्तमिह द्रव्यमङ्गलं भवति । या मङ्गल्या क्रिया तां कुर्वाणोऽनुपयुक्तः ॥ ४६ ॥ ✕ ३-।

२ यद् भूतभावमङ्गलपरिणामं, तस्य वा यद् योग्यम् । यद् वा स्वभावशोभनवर्णादिगुणं सुवर्णादि ॥ ४७ ॥ + यत्तम्-।
तदपि च यस्माद् भावमङ्गलकारणतो मङ्गलमिति निर्दिष्टम् । नोआगमतो द्रव्यं नोशब्दः सर्वप्रतिषेधे ॥ ४८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परिणामः, भूतः पूर्वं संजातो भावमङ्गलपरिणामो यस्य तद् भूतभावमङ्गलपरिणामम्; साम्प्रतं तु तच्छून्यम्, तत्पुनः कस्यापि शरीरं जीवद्रव्यं वा; तद् नोआगमतो ज्ञशरीर--भव्यशरीरव्यतिरिक्तं द्रव्यमङ्गलं बोद्धव्यम् । 'तस्स वा जयं जोग्गं ति' अथवा तस्य यथोक्तस्य भावमङ्गलपरिणामस्य यद् योग्यमर्हं शरीरं जीवद्रव्यं वा, तद् नोआगमतो ज्ञशरीर--भव्यशरीरव्यतिरिक्तं द्रव्यमङ्गलम् । अथवा यत् स्वभावत एव शोभनवर्णादिगुणं सुवर्णादिकं वस्तु, आदिशब्दाद् रत्न--दध्य--ऽक्षत--कुसुम--मङ्गलकलशादिपरिग्रहः; तदेतज्ज्ञ--भव्यशरीरव्यतिरिक्तं द्रव्यमङ्गलम् । ननु कथं तद् मङ्गलम्?, इत्याह-- 'तं पीत्यादि' हुर्यस्मादर्थे, यस्मात् तदपि सुवर्णादिकं कस्यापि भावमङ्गलकारणत्वाद् मङ्गलं निर्दिष्टम् । यच्च कारणं तद् "भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके, तद् द्रव्यम्" इत्यादिवचनाद् द्रव्यतयाऽपि व्यपदिश्यते, अतो द्रव्यमङ्गलं भवति । नोशब्दः सर्वप्रतिषेधे, आगमस्येह सर्वथैवाऽभावादिति । पूर्वं ज्ञ-भव्यशरीरयोः केवलमागमाभावापेक्षं द्रव्यमङ्गलत्वमुक्तम्, अत्र तु क्रियाऽभावमाश्रित्येति भावनीयम् ॥ इति गाथाद्वयार्थः ॥ ४७ ॥ ४८ ॥

तदेवं प्रतिपादितमागमतो नोआगमतश्च द्रव्यमङ्गलम् । अथ भावमङ्गलमुच्यते, तस्य च लक्षणं नाम-स्थापना-द्रव्याणामिव भाष्यकृता केनापि कारणेन नोक्तम् । तच्चेत्थमवगन्तव्यम्

"भावो विवक्षितक्रियाऽनुभूतियुक्तो हि वै समाख्यातः । सर्वज्ञैरिन्द्रादिवदिहेन्दनादिक्रियाऽनुभवात्" ॥ १ ॥ इति ।

अत्राऽयमर्थः-- भवनं विवक्षितरूपेण परिणमनं भावः, अथवा भवति विवक्षितरूपेण संपद्यत इति भावः । कः पुनरयम्?, इत्याह-- वक्तुर्विवक्षिता इन्दन-ज्वलन-जीवनादिका या क्रिया तस्या अनुभूतिरनुभवनं तया युक्तो विवक्षितक्रियानुभूतियुक्तः, सर्वज्ञैः समाख्यातः । क इव?, इत्याह--'इन्द्रादिवत्' स्वर्गाधिपादिवत्, आदिशब्दाज्ज्वलन-- जीवादिपरिग्रहः । सोऽपि कथं भावः?, इत्याह-- 'इन्दनादिक्रियानुभवात्' इति, आदिशब्देन ज्वलन-जीवनादिक्रियास्वीकारः । विवक्षितेन्दनादिक्रियाऽन्वितो लोके प्रसिद्धः पारमार्थिकपदार्थो भाव उच्यते । भावश्चासौ मङ्गलं च भावमङ्गलम्, भावतो वा परमार्थतो मङ्गलं भावमङ्गलमिति प्रस्तुतयोजना ॥ एतदपि द्विविधम्-- आगमतः, नोआगमतश्च । तत्राऽऽगमतस्तावदाह--

[1]मंगलसुयउवउत्तो आगमओ भावमंगलं होइ । नोआगमओ भावो सुविसुद्धो खाइयाईओ ॥ ४९ ॥

मङ्गलं च तच्छ्रुतं च मङ्गलश्रुतं मङ्गलशब्दार्थज्ञानमित्यर्थः, तस्मिन्नुपयुक्तो 'वक्ता' इति गम्यते, आगमतो भावमङ्गलं भवति ।

---

१ मङ्गलश्रुतोपयुक्त आगमतो भावमङ्गलं भवति । नोआगमतो भावः सुविशुद्धः क्षायिकादिकः ॥ ४९ ॥

अत्राह-- ननु मङ्गलपदार्थज्ञानोपयोगमात्रेण कथं सर्वोऽपि वक्ता भावमङ्गलमुच्यते?, तदुपयोगमात्रस्यैव तद्रूपताया युक्तिसंगतत्वात्, न ह्यग्निज्ञानोपयुक्तो माणवकोऽग्निरेव भवितुमर्हति, दाह--पाकादिक्रियाकरणप्रसङ्गादिति । अत्रोच्यते-- उपयोगः, ज्ञानं, संवेदनं, प्रत्यय इति तावदनर्थान्तरम्, अर्थाभिधानप्रत्ययाश्च लोके सर्वत्र तुल्यनामधेयाः, वाच्यः पृथुबुध्नोदराऽऽकारोऽर्थोऽपि घट उच्यते, तद्वाचकमभिधानमपि घटोऽभिधीयते, तज्ज्ञानरूपः प्रत्ययोऽपि घटो व्यपदिश्यत इत्यर्थः, तथा हि लोके वक्तारो भवन्ति--किमिदं पुरतो दृश्यते?, घटः; किमसौ वक्ति?, घटम्; किमस्य चेतसि स्फुरति?, घटः । एवं च सति यद् घट इति ज्ञानं तदव्यतिरिक्तो ज्ञाता तल्लक्षणो गृह्यते, अन्यथा यदि ज्ञानज्ञानिनोरव्यतिरेको न स्यात् तदा ज्ञाने सत्यपि ज्ञानी नोपलभेत वस्तुनिवहम्, अतन्मयत्वात्, प्रदीपहस्तान्धवत्, पुरुषान्तरवद् वा । न चाऽनाकारं तज्ज्ञानम्, पदार्थान्तरवद् विवक्षितपदार्थस्याऽप्यपरिच्छेदप्रसङ्गात् । अपिच, घटादिज्ञान--तद्वतोर्व्यतिरेके बन्धाद्यभावः प्राप्नोति, यथा हि ज्ञाना-ऽज्ञान-सुख-दुःखादिपरिणामस्याऽन्यत्वे आकाशस्य बन्धादयो न भवन्ति, एवं जीवस्यापि न भवेयुरिति भावः ॥ आह— यदि घटोपयोगानन्यत्वाद् देवदत्तोऽपि घटः; अग्न्युपयोगानन्यत्वाच्च माणवकोऽप्यग्निः, तर्हि जलाहरण-दाह--पाकाद्यर्थक्रियाप्रसङ्गः । तदयुक्तम्, न हि सर्वोऽपि घटो जलाहरणं करोति, नापि समस्तोऽप्यग्निर्दाह--पाकाद्यर्थक्रियां साधयति, कोणेऽवाङ्मुखीकृतघटेन भस्मच्छन्नवह्निना च व्यभिचारात् । न चाऽसौ न घटः, नाग्निर्वा, लोकप्रतीतिबाधाप्रसङ्गात् । तस्माद् मङ्गलपदार्थज्ञानोपयोगाऽनन्यत्वादागमतस्तदुपयुक्तो भावमङ्गलमिति स्थितम् ॥ नोआगमतस्तु आगमस्य सर्वनिषेधमाश्रित्य सुविशुद्धः प्रशस्तः क्षायिक--क्षायोपशमिकादिको भावो भावमङ्गलम्, भाव एव मङ्गलं भावमङ्गलमिति कृत्वा । उपलक्षणव्याख्यानादागमवर्जज्ञानचतुष्टय--दर्शन--चारित्राणि च नोआगमतो भावमङ्गलतया वाच्यानि; भावतः परमार्थतो मङ्गलं भावमङ्गलमिति कृत्वा ॥ इति गाथार्थः ॥ ४९ ॥

प्रकारान्तरेणाऽपि नोआगमतो भावमङ्गलमाह--

अहवा सम्मद्दंसण--नाण--चरित्तोवओगपरिणामो । नोआगमओ भावो नोसद्दो मिस्सभावम्मि ॥ ५० ॥

अथवा प्रतिक्रमण--प्रत्युपेक्षणादिक्रियां कुर्वाणस्य यो ज्ञान--दर्शन--चारित्रोपयोगपरिणामः, स नोआगमतो भावो भावमङ्गलं भवति । नोशब्दश्चाऽत्र मिश्रवचनः, यस्माद् नाऽसौ ज्ञान--दर्शन--चारित्रोपयोगपरिणामः केवल एवाऽऽगमः, चारित्रादेरपि सद्भावात्, नाऽप्यनागम एव, ज्ञानस्याऽपि विद्यमानत्वात्, इति मिश्रता ॥ इति गाथार्थः ॥ ५० ॥

---

१ अथवा सम्यग्दर्शन--ज्ञान--चारित्रोपयोगपरिणामः । नोआगमतो भावो नोशब्दो मिश्रभावे ॥ ५० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अथाऽन्येन प्रकारेणाह--

अहवेह नमुक्काराइनाण-किरिआविमिस्सपरिणामो । नोआगमओ भण्णइ जम्हा से आगमो देसे ॥ ५१ ॥

अथवेह नोआगमतो भावमङ्गलाधिकारे नमस्करणं नमस्कारोऽर्हदादिप्रणतिरित्यर्थः, स आदिर्येषां स्तोत्रादीनां ते नमस्कारादयस्तेषु ज्ञानोपयोगो नमस्कारादिज्ञानम्, क्रिया शिरसि करकमलमुकुलविधानादिका, नमस्कारादिज्ञानं च क्रिया च नमस्कारादिज्ञानक्रिये ताभ्यां विमिश्रश्चासौ परिणामश्च । स किम् ?, इत्याह- 'नोइत्यादि' चैत्यवन्दनाद्यवस्थायां यो नमस्कारादिज्ञान-क्रियामिश्रितपरिणामः स नोआगमतो भावमङ्गलं भण्यत इत्यर्थः । कुतः ?, इत्याह- यस्मात् 'से' तस्यैव भावतः परिणामस्याऽऽगमो नमस्कारादिज्ञानोपयोगलक्षणो देशे एकदेशेऽवयवे वर्तते, नोशब्दश्चैकदेशवचनः ॥ इति गाथार्थः ॥ ५१ ॥

तदेवमुपदर्शितं नाम-स्थापना-द्रव्य-भावभेदतश्चतुर्विधं मङ्गलम् । एतेषु च नामादिमङ्गलेष्वाद्यत्रयस्याऽन्योऽन्यभेदं पश्यन् परः प्रेरयति—

अभिहाणं दव्वत्तं तयत्थसुन्नत्तणं च तुल्लाइं । को भाववज्जिआणं नामाईणं पइविसेसो ? ॥ ५२ ॥

भाववर्जितानां भावमेकं वर्जयित्वा शेषाणां नामादीनां नाम-स्थापना-द्रव्याणामित्यर्थः, कः प्रतिविशेषः ? न कश्चिदित्यर्थः । कुतः ?, इति चेत् । उच्यते-यत एतानि त्रिष्वपि तुल्यानि । कानि पुनस्तानि ?, इत्याह- अभिधानं तावद् नाम त्रिष्वपि तुल्यम्, नामवति पदार्थे, स्थापनायां, द्रव्ये च मङ्गलाभिधानमात्रस्य सर्वत्र भावात् । तथा द्रव्यत्वमपि त्रिष्वपि तुल्यम्, यतो "जैस्स णं जीवस्स वा अजीवस्स वा मंगलं ति नाम कीरइ" इत्यादिवचनाद् नामनि तावद् द्रव्यमेवाऽभिसंबध्यते, स्थापनायामपि "यत् स्थाप्यते" इति वचनाद् द्रव्यमेवाऽऽयोज्यते, द्रव्ये तु द्रव्यत्वं विद्यत एव, इति त्रिष्वपि द्रव्यत्वस्य तुल्यता । तथा तदर्थशून्यत्वं च भावार्थशून्यत्वं च त्रिष्वपि समानम्, नाम--स्थापना-द्रव्येषु भावमङ्गलस्याऽभावात् । तस्मादभिधान-द्रव्यत्व--भावार्थशून्यत्वानां समानत्वाद् नाम-स्थापना-द्रव्याणां परस्परमभेदः, भावे तु तदर्थशून्यत्वं नास्ति; इत्येतावताऽसौ नामादिभ्यो विशेष्यत इति भावः ॥ इति गाथार्थः ॥५२॥

परेणैवमविशेषे प्रेरिते यो विशेषः, तमभिधित्सुः सूरिराह—

---

१ अथवेह नमस्कारादिज्ञान-क्रियाविमिश्रपरिणामः । नोआगमतो भण्यते यस्मात् तस्याऽऽगमो देशे ॥ ५१ ॥

२ अभिधानं द्रव्यत्वं तदर्थशून्यत्वं च तुल्यानि । को भाववर्जितानां नामादीनां प्रतिविशेषः ? ॥ ५२ ॥

३ यस्य जीवस्य वाऽजीवस्य वा मङ्गलमिति नाम क्रियते ।

आगारोऽभिप्पाओ बुद्धी किरिया फलं च पाएण । जह दीसइ ठवणिंदे न तहा नामे न दव्विंदे ॥ ५३ ॥

यथा स्थापनेन्द्रे आकारो लोचनसहस्र-कुण्डल-किरीट-शचीसंनिधान-करकुलिशधारण-सिंहासनाऽध्यासनादिजनितातिशयो देहसौन्दर्यभावो दृश्यते; तथा स्थापनाकर्तुश्च यथा सद्भूतेन्द्राभिप्रायो विलोक्यते; तथा द्रष्टुश्च यथा तदाकारदर्शनादिन्द्रबुद्धिरुपजायते; यथा चैनमुपसेवमानानां तद्भक्तिपरिणतबुद्धीनां नमस्करणादिका क्रिया संवीक्ष्यते; फलं च यथा प्रायेणोपलभ्यते पुत्रोत्पत्त्यादिकम्, न तथा नामेन्द्रे; नाऽपि द्रव्येन्द्रे । ततो नाम-द्रव्याभ्यां तावद् व्यक्त एव भेदः स्थापनाया इति भावः ॥ इति गाथार्थः ॥ ५३ ॥

तदेवं स्पष्टतया लक्ष्यमाणत्वादादावेव नाम-द्रव्याभ्यां स्थापनाया भेदमभिधाय नाम-स्थापनाभ्यां द्रव्यस्य भेदमभिधित्सुराह-

भावस्स कारणं जह दव्वं भावो अ तस्स पज्जाओ । उवओग-परिणइमओ न तहा नामं नवा ठवणा ॥५४॥

यथाऽनुपयुक्तवक्तृप्रभृतिकं साधुद्रव्येन्द्रादिकं वा द्रव्यं भावस्योपयोगरूपस्य भावेन्द्रपरिणतिरूपस्य वा यथासंख्येन कारणं निमित्तं भवति, यथा च 'उवओग-परिणइमओ त्ति' उपयोगमयो भावेन्द्रपरिणतिमयश्च भावो यथासंख्येन तस्याऽनुपयुक्तवक्तृप्रभृतिकस्य साधुद्रव्येन्द्रादिकस्य वा द्रव्यस्य पर्यायो धर्मो भवति, न तथा नाम, नाऽपि स्थापनेति । इदमुक्तं भवति- यथाऽनुपयुक्तो वक्ता द्रव्यं कदाचिदुपयुक्तत्वकाले तस्योपयोगलक्षणस्य भावस्य कारणं भवति, सोऽपि वोपयोगलक्षणो भावस्तस्याऽनुपयुक्तवक्तृरूपस्य द्रव्यस्य पर्यायो भवति, यथा वा साधुजीवो द्रव्येन्द्रः सन् भावेन्द्ररूपायाः परिणतेः कारणं भवति; सोऽपि वा भावेन्द्रपरिणतिरूपो भावस्तस्य साधुजीवद्रव्येन्द्रस्य पर्यायो भवति, न तथा नाम-स्थापने । अतस्ताभ्यां द्रव्यस्य भेदः, नान्नस्तु स्थापना-द्रव्याभ्यां भेदः सामर्थ्यादेवाऽवसीयत इति। तदेवं यद्यपि परप्रेरितप्रकारेण नाम-स्थापना-द्रव्याणामभेदः; तथाप्युक्तरूपेण प्रकारान्तरेण भेदः सिद्ध एव, न हि दुग्ध-तक्रादीनां श्वेतत्वादिनाऽभेदेऽपि माधुर्यादिनाऽपि न भेदः, अनन्तधर्माध्यासितत्वाद् वस्तुन इति भावः ॥ इति गाथार्थः ॥५४॥

तदेवं भेदव्याख्यापक्षे समर्थिते भूयोऽप्यपरेण प्रकारेणाऽऽह परः-

इह भावो चिय वत्थुं तयत्थसुन्नेहिं किं व सेसेहिं ? । नामादओ वि भावा जं ते वि हु वत्थुपज्जाया ॥५५॥

---

१ आकारोऽभिप्रायो बुद्धिः क्रिया फलं च प्रायेण । यथा दृश्यते स्थापनेन्द्रे न तथा नाम्नि न द्रव्येन्द्रे ॥ ५३ ॥

२ भावस्य कारणं यथा द्रव्यं भावश्च तस्य पर्यायः । उपयोग-परिणतिमयो न तथा नाम नवा स्थापना ॥ ५४ ॥

३ इह भाव एव वस्तु तदर्थशून्यैः किं वा शेषैः ? । नामादयोऽपि भावा यत् तेऽपि खलु वस्तुपर्यायाः ॥ ५५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इह नामादिविचारे प्रक्रान्ते भाव एव वस्तु, विवक्षितार्थक्रियासाधकत्वात्, उभयसंमतवस्तुवत्; न हि भावेन्द्रवद् विवक्षितार्थसाधनसमर्था गोपालदारकाद्या नामेन्द्रादयः, अतः किमत्र शेषैर्भावार्थशून्यैर्नामादिभिः ? न किञ्चिदित्यर्थः । अत्रोत्तरमाह–'नामादओ इत्यादि' इदमुक्तं भवति– यदि सामान्येनैव भावो वस्तुत्वेनाऽभ्युपगम्यते, तदा सिद्धसाध्यता, यतो नामादयोऽपि, आदिशब्दात् स्थापना–द्रव्यपरिग्रहः, भावाः भावविशेषा इत्यर्थः । कुतः ?, इत्याह– यद् यस्मात् तेऽपि नामादयो वस्तुनः पर्याया धर्माः, तथाहि– अविशिष्टे इन्द्रवस्तुन्युच्चरिते नामादिकं भेदचतुष्टयमपि प्रतीयते– किमनेन नामेन्द्रो विवक्षितः, आहोस्वित् स्थापनेन्द्रः, द्रव्येन्द्रः, भावेन्द्रो वा ? इति । ततः सामान्यस्येन्द्रवस्तुनश्चत्वारोऽप्यमी पर्यायाः, इति नामादयोऽपि भावविशेषा एव, इति भावस्य वस्तुत्वसाधने न किञ्चिद् नः क्षूयते; पर्यायः, भेदः, भाव इत्यनर्थान्तरत्वात् । अथ विशिष्टार्थक्रियासाधकं भावेन्द्रादिकं भावमाश्रित्य वस्तुत्वं साध्यते, तथापि न काचित् क्षतिः, यतो भावेन्द्रादेर्भावस्य विशिष्टार्थक्रियानिर्वर्तकत्वे नामेन्द्रादिपर्यायाणामपि तद् द्रष्टव्यमेव, द्रव्यरूपतया पर्यायाणां परस्परमभेदात् ॥ इति गाथार्थः ॥ ५५ ॥

अथवा भावमङ्गलादिकारणत्वाद् नामादीन्यपि भावमङ्गलादिरूपाण्येव, इति दर्शयन्नाह—

अहवा नामं--ठवणा--दव्वाइं भावमङ्गलंगाइं । पाएण भावमङ्गलपरिणामनिमित्तभावाओ ॥ ५६ ॥[1]

अथवा नाम–स्थापना–द्रव्याणि भावमङ्गलस्यैवाऽङ्गानि कारणानि । कुतः ?, इत्याह– 'पाएण इत्यादि' भावमङ्गलपरिणामो भावमङ्गलोपयोगो भावमङ्गलसाध्वादिपरिणतिरूपो वा, तन्निमित्तभावात् तत्कारणत्वादित्यर्थः । यच्च यस्य कारणं तत् तद्व्यपदेशं लभत एव, यथा 'आयुर्घृतम्' 'रूपको भोजनम्' इत्यादि । क्लिष्टकर्मणां केषाञ्चिद् नामादीनि भावमङ्गलकारणानि न भवन्त्यपि, इति प्रायो ग्रहणम् । मङ्गलविचारश्चेह प्रक्रान्तः; तेन भावमङ्गलकारणानि नामादीन्युक्तानि, यावता भावेन्द्रादेरपि तानि कारणत्वेन द्रष्टव्यान्येव । तस्माद् भावमङ्गलादिकारणत्वाद् नामादीन्यपि तद्रूपाण्येव, इति भावस्य वस्तुत्वसाधने नामादीनामपि तत्कारणत्वात् तद् न क्षूयते ॥ इति गाथार्थः ॥ ५६ ॥

अथ नामादीनां भावमङ्गलकारणत्वे उदाहरणान्याह—

जह मङ्गलाभिहाणं सिद्धं विजयं जिणिंदनामं च । सोऊण, पेच्छिऊण य जिणपडिमालक्खणाईणि॥५७॥[2]

१ अथवा नाम--स्थापना--द्रव्याणि भावमङ्गलाङ्गानि । प्रायेण भावमङ्गलपरिणामनिमित्तभावात् ॥ ५६ ॥

२ यथा मङ्गलाभिधानं सिद्धं विजयं जिनेन्द्रनाम च । श्रुत्वा, प्रेक्ष्य च जिनप्रतिमालक्षणादीनि ॥ ५७ ॥

परिनिव्वुयमुणिदेहं भव्वजइजनं सुवन्नमल्लाई । दट्ठूण भावमङ्गलपरिणामो होइ पाएण ॥ ५८ ॥[3]

यथेत्युदाहरणोपदर्शनार्थः, तद्यथेत्यर्थः । मङ्गलमितिशब्दरूपमभिधानम्, तथा 'सिद्धं' सिद्धाभिधानम्; विजयाभिधानम्; जिनेन्द्रादिनाम च केनचिदुच्चरितं श्रुत्वा कस्यचित् प्रायेण सम्यग्दर्शनादिको भावमङ्गलपरिणामो भवति, इति नाम्नो भावमङ्गलकारणत्वे उदाहरणम् । तथा प्रेक्ष्य चाऽवलोक्य जिनप्रतिमालक्षणादीनि जिनप्रतिमा-स्वस्तिकादीनीत्यर्थः, आदिशब्दादनगारपदादिपरिग्रहः, भावमङ्गलपरिणामो भवतीत्यत्राऽपि संबध्यते । एतत्तु स्थापनाया भावमङ्गलकारणत्वे उदाहरणम् । अथ द्रव्यस्य तत्कारणत्वे दृष्टान्तमाह– परिनिर्वृतो मुक्तिं गतो योऽसौ मुनिस्तदेहम्, तथा भव्ययतिर्भविष्यद्यतिपर्यायो योऽसौ जनस्तम्, तथा सुवर्णमाल्यादि च दृष्ट्वा प्रायेण सम्यग्दर्शनादिभावमङ्गलपरिणामो भवतीति । अतस्तत्कारणत्वाद् नामादीन्यपि भावमङ्गलानि, इति स्थितम् ॥ इति गाथाद्वयार्थः ॥ ५७ ॥ ५८ ॥

ननु नामादीन्यपि यदि भावमङ्गलानि, तर्हि किं तान्यपि तीर्थकरादिवत् पूज्यानि ?, इत्याशङ्क्याह–

किं पुण तमणेगंतियमच्चन्तं च न जओऽभिहाणाई । तव्विवरीअं भावे तेण विसेसेण तं पुज्जं ॥ ५९ ॥[4]

नामादीन्यप्युक्तयुक्त्या भावमङ्गलानि । किं पुनः ?, यो विशेषः स उच्यते– तदभिधानादित्रयमनैकान्तिकम्, समीहितफलसाधने निश्चयाभावात्, तथाऽऽत्यन्तिकं च यतो न भवति, आत्यन्तिकप्रकर्षप्राप्ततथाविधविशिष्टफलसाधकत्वाभावात् । भावे भावविषयं तु मङ्गलमुक्तविपरीतस्वरूपम्, तेन विशेषतो यथा तत् पूज्यम्, नैवमितराणि ॥ इति गाथार्थः ॥ ५९ ॥

तदेवं भिन्नवस्तुषु विशेषतश्चिन्त्यमानानां नामादीनां प्रधानेतरभावो दर्शितः, सामान्यतः पुनर्विचिन्त्यमानानां सर्ववस्तुषु प्रत्येकं चतुर्णामप्यमीषां सद्भावः प्राप्यत एव, इति दर्शयन्नाह–

अहवा वत्थूभिहाणं नामं, ठवणा य जो तदागारो । कारणया से दव्वं, कज्जावन्नं तयं भावो॥ ६० ॥[5]

अथवा सर्वस्यापि घट–पटादिवस्तुनो यदात्मीयमभिधानं तद् नामः यथोर्ध्वकुण्डलेष्वायतवृत्तग्रीवो घटः, आतानवितानीभू-

२ परिनिर्वृतमुनिदेहं भव्ययतिजनं सुवर्णमाल्यादि । दृष्ट्वा भावमङ्गलपरिणामो भवति प्रायेण ॥ ५८ ॥ * लोष्ट्वा–।

३ किं पुनस्तदनैकान्तिकमत्यन्तं च न यतोऽभिधानादि । तद्विपरीतं भावे तेन विशेषेण तत् पूज्यम् ॥ ५९ ॥

४ अथवा वस्त्वभिधानं नाम, स्थापना च यत्तदाकारः । कारणता तस्य द्रव्यं, कार्यापन्नं तद् भावः ॥ ६० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततन्तुसन्तानः पट इत्यादि। स्थापना पुनर्यस्तस्यैव सर्वस्य वस्तुनो निज आकारः। भाविकपालादिकार्यापेक्षया तु या 'स' तस्य सर्वस्यापि वस्तुनः कारणता हेतुता तद् द्रव्यम्, "भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके, तद् द्रव्यम्" इति वचनात्। मृत्पिण्डादिवस्तुनस्तु कार्यापन्नं जन्यत्वापन्नं तदेव घटादिकं सर्वं वस्तु भावोऽभिधीयते, भवनं भाव इति कृत्वा। इत्थं सर्वं वस्तु चतूरूपाऽविनाभूतं द्रष्टम्, एवमेव सम्यग्दर्शनव्यवस्थानात्, सर्वनयसमूहात्मकत्वाज्जिनमतस्य। तदेवं सर्वस्यापि वस्तुनश्चतूरूपतायां किमुच्यते 'इह भावो चिय वत्थुं तयत्थसुन्नेहिं किं व सेसेहिं' इत्यादि[1]?। न चैकस्मिन्नेव वस्तुन्येककालं विद्यमानानां पर्यायाणां मध्ये 'अयं वस्तु' 'अपरस्त्ववस्तु' इति वक्तुं शक्यते, द्रव्यरूपतया सर्वेषामपि तेषामेकत्वादिति भावः॥ इति गाथार्थः॥६०॥

अस्मिंश्च नामादिरूपचतुष्टये नामनयः प्रधानं नामैव मन्यते। तत्र ये सुगतमतानुसारिणो "न शब्दे शब्दाः सन्ति" इत्यादिवचनाद् नाम्नो वस्तुधर्मत्वमेव नेच्छन्ति, तान् प्रति नामनयः प्राह—

[2]वत्थुसरूवं नामं तप्पच्चयहेउओ सधम्म व्व। वत्थुं नाऽणभिहाणा होज्जाऽभावो विवाऽवच्चो॥६१॥

नामनयस्याऽयमभिप्रायः—वस्तुनः स्वरूपं नाम, तत्प्रत्ययहेतुत्वात्, स्वधर्मवत्, इह यद् यस्य प्रत्ययहेतुस्तत् तस्य धर्मः, यथा घटस्य स्वधर्मा रूपादयः, यच्च यस्य धर्मो न भवति न तत् तस्य प्रत्ययहेतुः, यथा घटस्य धर्माः पटस्य, संपद्यते च घटाभिधानाद् घटे संप्रत्ययः, तस्मात् तत् तस्य धर्मः[इति]; सिद्धश्च हेतुरावयोः, घटशब्दात् पटादिव्यवच्छेदेन घट(इति)प्रतिपत्त्यनुभूतेः। सर्वं च वस्तु नामरूपतां न व्यभिचरतीति दर्शयन्नाह—'वत्थुमित्यादि' यदि वस्तुनो नामरूपता न स्यात् तदा तद् वस्त्वेव न भवेदिति संबन्धः। कुतः?, इत्याह—अनभिधानादभिधानरहितत्वादित्यर्थः। अवाच्योऽभिधानरहितत्वेनाऽनभिधेयो योऽसावभावः षष्ठभूतादिलक्षणस्तद्वदिति दृष्टान्तः, इह यदभिधानरहितं तद् वस्त्वेव न भवति, यथाऽभिधानरहितत्वेनाऽवाच्यः षष्ठभूतलक्षणोऽभावः; अभिधानरहितं च वस्त्वभ्युपगम्यते परैः, ततोऽवस्तुत्वमेवाऽस्य भवेद्, अवस्तुत्वे च कुतस्तत्प्रत्ययहेतुत्वलक्षणस्य हेतोर्वृत्तिः, येनाऽनैकान्तिकता स्यात्?। तत्र तद्वृत्तौ वा तस्याऽपि वस्तुत्वमेव भवेत्, स्वप्रत्ययजनकत्वात्, घटादिवदिति। विपक्ष एव वृत्तेरभावाद् विरुद्धताऽप्यसंभविनीति। तस्माद् वस्तुधर्म एव नामेति स्थितम्। न च 'नद्यास्तीरे गुडभृतशकटम्' इत्यादिशब्दात् प्रवृत्तस्य कदाचिद् वस्त्वप्राप्तेरवस्तुधर्मता तस्येत्याशङ्कनीयम्, प्रत्यक्षादिप्रमाणानामपि तत्प्रसङ्गात्— तेभ्योऽपि हि प्रवृत्तस्य कदाचिद् वस्त्वप्राप्तेः। अबाधितेभ्यस्तेभ्यः प्रवृत्तौ भवत्येवा-

---

१ घ. छ. 'हेतुभूतता'। २ गाथा ५५। ३ वस्तुस्वरूपं नाम तत्प्रत्ययहेतुतः स्वधर्म इव। वस्तु नाऽनभिधानाद् भवेदभाव इवाऽवाच्यः॥ ६१॥
४ ख. ग. 'यस्य हेतु'। ५ नाम्नि। ६ तत्प्रत्ययहेतुत्वलक्षणहेतुप्रवर्तने। ७ नाम्नोऽपि। नाम्नि तत्प्रत्ययहेतुत्वलक्षणहेतुप्रवर्त्तने वा नाम्नोऽपि॥

र्थप्राप्तिरिति चेत्। तदेतदिहाऽपि समानम्, सुविवेचितादाप्तप्रणीतशब्दाद् वस्तुप्राप्तेरत्राऽप्यवश्यंभावित्वात्, इत्यादि बहुत्र वक्तव्यम्; तत्तु नोच्यते, ग्रन्थगहनताप्रसङ्गात्, अन्यत्रोक्तत्वाच्च॥ इति गाथार्थः॥ ६१॥

किञ्च—

[1]संसयविवज्जया वाऽणज्झवसाओऽहवा जदिच्छाए। होज्जत्थे पडिवत्ती न वत्थुधम्मो जया नामं॥ ६२॥

यदा वस्तुधर्मो नाम नेष्यते तदा वक्त्रा घटशब्दे समुच्चारिते श्रोतुः 'किमयमाह?' इत्येवं संशय एव स्यात्, न घटप्रतिपत्तिः। अथवा घटशब्दे प्रोक्ते पटप्रतिपत्तिलक्षणो विपर्ययः स्यात्। अथवा 'न जाने किमप्यनेनोक्तम्' इति चित्तव्यामोहेन वस्त्वप्रतिपत्तिरूपोऽनध्यवसायः स्यात्। यदि वा यदृच्छयाऽर्थे प्रतिपत्तिर्भवेत्— कदाचिद् घटस्य, कदाचित् पटस्य, कदाचित्तु स्तम्भस्येत्यादिः; न चैवं भवति। तस्माद् वस्तुधर्म एव नाम॥ इति गाथार्थः॥ ६२॥

अपि च—

[2]वत्थुस्स लक्ख-लक्खण-संववहाराऽविरोहसिद्धीओ। अभिहाणाऽहीणाओ बुद्धी सद्दो य किरिया य॥६३॥

वस्तुनो जीवादेः। किम्?, इत्याह— अभिधानाऽधीना नामाऽऽयत्ताः। काः?, इत्याह— लक्ष्यं च लक्षणं च संव्यवहारश्च लक्ष्य-लक्षण-संव्यवहारास्तेषामविरोधेनाऽविपर्ययेण सिद्धयः प्रतिष्ठाः। तत्र लक्ष्यं जीवत्वादि, लक्षणमुपयोगः, संव्यवहारोऽध्येषण-प्रेषणादिः। तथा बुद्धि-शब्द-क्रियाश्च 'अभिधानाऽधीनाः' इत्यत्राऽपि संबध्यते। तत्र बुद्धिर्वस्तुनिश्चयरूपा, शब्दो घटादिध्वनिरूपः, क्रिया चोत्क्षेपणा-ऽवक्षेपणादिका। तस्मादभिधानमेव वस्तु सत्, तदाऽऽयत्ताऽऽत्मलाभत्वात् सर्वव्यवहाराणाम्॥ इति गाथार्थः॥ ६३॥

तदेवं शब्दनयेन निजमते स्थापिते स्थापनानयः प्राह—

[3]आगारो चिय मइ-सद्द-वत्थु-किरिया-फलाऽभिहाणाइं। आगारमयं सव्वं जमणागारं तयं नत्थि॥६४॥

आकार एव आकारमात्ररूपाण्येव। कानि?, इत्याह—मतीत्यादि, मतिश्च शब्दश्चेत्यादिद्वन्द्वः। तत्र मतिस्तावज्ज्ञेयाऽऽकारग्रह-

---

१ संशयविपर्ययौ वाऽनध्यवसायोऽथवा यदृच्छया। भवेदर्थे प्रतिपत्तिर्न वस्तुधर्मो यदा नाम॥ ६२॥
२ वस्तुनो लक्ष्य-लक्षण-संव्यवहाराऽविरोधसिद्धयः। अभिधानाधीनाः बुद्धिः शब्दश्च क्रिया च॥ ६३॥
३ आकार एव मति-शब्द-वस्तु-क्रिया-फला-ऽभिधानानि। आकारमयं सर्वं यदनाकारं तद् नास्ति॥ ६४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णपरिणतत्वादाकारवती, तदनाकारवत्त्वे तु 'नीलस्येदं संवेदनं न पीतादेः' इति नैयत्यं न स्यात्, नियामकाभावात्; नीलाद्याकारो हि नियामकः, यदा च स नेष्यते तदा 'नीलग्राहिणीयंमतिर्न पीतादिग्राहिणी' इति कथं व्यवस्थाप्यते ?, विशेषाभावात्, तस्मादाकारवत्येव मतिरभ्युपगन्तव्या। शब्दोऽपि पौद्गलिकत्वादाकारवानेव। घटादिकं वस्त्वाकारवत्त्वेन प्रत्यक्षसिद्धमेव। क्रियाऽप्युत्क्षेपणा-ऽवक्षेपणादिका क्रियावतोऽनन्यत्वादाकारवत्येव। फलमपि कुम्भकारादिक्रियासाध्यं घटादिकं मृत्पिण्डादिवस्तुपर्यायरूपत्वादाकारवदेव। अभिधानमपि शब्दः, स च पौद्गलिकत्वादाकारवानित्युक्तमेव। तस्माद् यदस्ति तत् सर्वमाकारमयमेव; यत्त्वनाकारं तद् नास्त्येव, वन्ध्यापुत्रादिरूपत्वात् तस्य ॥ इति गाथार्थः ॥ ६४ ॥

अथ प्रयोगद्वारेणाऽनाकारं वस्तु निराचिकीर्षुराह-

नं[1] पराणुमयं वत्थु आगाराऽभावओ खपुप्फं व। उवलंभ-ववहाराऽभावाओ नाणागारं च ॥ ६५ ॥

परस्याऽऽकारवद्वस्तुनिषेधकस्याऽनुमतमभिप्रेतं सामर्थ्याद् यदनाकारं वस्तु तद् नास्ति, आकाराभावात्, खपुष्पवत्। अपरमपि हेतुद्वयमाह-'उवलंभेत्यादि' 'नाणागारमिति' नास्त्यनाकारं वस्तु, सर्वथैवाऽनुपलभ्यमानत्वात्, तेनाऽणीयसोऽपि व्यवहारस्याऽभावाच्च, इति पर्यन्तवर्ती चकारोऽत्र योजनीयः, खपुष्पवदिति दृष्टान्तो हेतुद्वयेऽपि स एव ॥ इति गाथार्थः ॥ ६५ ॥

तदेवं स्थापनानयेनोक्ते द्रव्यनयः प्राह-

देव्वपरिणाममित्तं[2] मोत्तूणाऽऽगारदरिसणं किं तं ?। उप्पायव्वयरहिअं दव्वं चिय निव्वियारं तं ॥६६॥

को हि नाम स्थापनानयस्याऽऽकारग्रहः ?, यस्माद् द्रवतीति द्रव्यमनादिमदुत्प्रेक्षितपर्यायप्रवृह्लाधारं मृदादि पूर्वपर्यायमात्रतिरोभावेऽग्रेतनपर्यायमात्राऽऽविर्भावः परिणामो द्रव्यस्य परिणामो द्रव्यपरिणामः स एव तन्मात्रं तद् मुक्त्वा किमन्यदाऽऽकारदर्शनम्, येनोच्यते 'आगारो चिय मइ-सद्द-वत्थु-' इत्यादि ?। ननु द्रव्यमेव तत्। किंविशिष्टम् ?, उत्पाद-व्ययरहितं, निर्विकारं- उत्फण-विफण-कुण्डलिताकारसमन्वितसर्पद्रव्यवद् विकाररहितम्; किं हि नाम तत्राऽपूर्वमुत्पन्नम्, विद्यमानं वा विनष्टम्, येन विकारः स्यात् ?, इति भावः ॥ इति गाथार्थः ॥ ६६ ॥

---

१ न परानुमतं वस्तु आकाराऽभावात् खपुष्पमिव। उपलम्भ-व्यवहाराऽभावाद् नाऽनाकारं च ॥ ६५ ॥ + मेत्तं - दि.द.॥

२ द्रव्यपरिणाममात्रं मुक्त्वाऽऽकारदर्शनं किं तत् ?। उत्पादव्ययरहितं द्रव्यमेव निर्विकारं तत् ॥ ६६ ॥ ३ गाथा ६४।

ननु कथमुत्पादादिरहितमुच्यते, यावता सर्पादिके द्रव्ये उत्फण-विफणादयः पर्याया उत्पद्यमाना निवर्तमानाश्च प्रत्यक्षेणैव दृश्यन्ते ?, इत्याह-

आविब्भाव-तिरोभावमेत्तपरिणामकारणमचिन्तं। निच्चं बहुरूवं पि य नडो व्व वेसंतरावन्नो ॥ ६७ ॥

आविर्भावश्च तिरोभावश्च तावेव तन्मात्रं तदेव परिणामस्तस्य कारणं द्रव्यम्, यथा सर्पे उत्फण-विफणावस्थयोरिति; न ह्यत्राऽपूर्वं किञ्चिदुत्पद्यते, किं तर्हि ?, छन्नरूपतया विद्यमानमेवाऽऽविर्भवति। नाऽप्याविर्भूतं सद् विनश्यति, किन्तु च्छन्नरूपतया तिरोभावमेवाऽऽसादयति। एवं च सत्याऽऽविर्भाव-तिरोभावमात्र एव कार्योपचारात् कारणत्वमस्यौपचारिकमेव। तस्मादुत्पादादिरहितं द्रव्यमुच्यत इति। आह- ननु यद्येकस्वभावं निर्विकारं द्रव्यम्, तर्ह्यनन्तकालभाविनामनन्तानामप्याविर्भाव-तिरोभावानामेकहेलयैव कारणं किमिति न भवति ?, इत्याह- अचिन्त्यमचिन्त्यस्वभावं द्रव्यम्, तेनैकस्वभावस्याऽपि तस्य क्रमेणैवाऽऽविर्भाव-तिरोभावप्रवृत्तिः, सर्पादिद्रव्येष्वेकस्वभावेष्वप्युत्फण-विफणादिपर्यायक्रमप्रवृत्तेः प्रत्यक्षसिद्धत्वादिति। ननु यद्येवम्, उत्फण-विफणादिबहुरूपत्वात् पूर्वाऽवस्थापरित्यागेन चोत्तरावस्थाऽधिष्ठानाद् अनित्यता द्रव्यस्य किमिति न भवति ? इति चेत्, इत्याह- वेषान्तरापन्ननटवद् बहुरूपमपि द्रव्यं नित्यमेव, इदमुक्तं भवति- यथा नायक-विदूषक-कपि-राक्षसादिपात्रावसरेषु वेषान्तराण्यापन्नो वेषान्तरापन्नो नटो बहुरूपः, एवमुत्फण-विफणादिभावैर्यद्यपि द्रव्यमपि बहुरूपम्, तथापि नित्यमेव, स्वयमविकारित्वात्, आकाशवत्- यथा हि घट-पटादिसंबन्धेन बहुरूपमप्याकाशं स्वयमविकारित्वाद् नित्यम्, एवं द्रव्यमपीति भावः ॥ इति गाथार्थः ॥ ६७॥

कारणमेव च सर्वत्र त्रिभुवने विद्यते; न कचित् कार्यम्, यच्च कारणं तत् सर्वं द्रव्यमेव, इति दर्शयन्नाह-

पिंडो[2] कारणमिट्ठं पयं व परिणामओ तहा सव्वं। आगाराइ न वत्थुं निक्कारणओ खपुप्फं व ॥६८॥

मृदादिपिण्डः कारणमिष्टं कारणमात्रमेवाऽभ्युपगम्यते। कुतः ?, इत्याह- परिणामित्वात् परिणमनशीलत्वात्, पयोवद् दुग्धवत्। यथा च पिण्डः, तथाऽन्यदपि सर्वं स्थास-कोश-कुशूलादिकं त्रैलोक्यान्तर्गतं वस्तु कारणमात्रमेव, परिणामित्वात्, पयोवत्, यैद् यत् कारणं तत् सर्वं द्रव्यमेव, इति द्रव्यनयस्य स्वपक्षसिद्धिः। ननु मृत्पिण्डादीनां कार्यभूताः स्थास-कोश-कुशूल-घटादयः प्रत्यक्षेणैव दृश्यन्ते, संबन्धिशब्दश्च कारणशब्दः सर्वदैव कार्यापेक्ष एव प्रवर्तते, तत् कथं कारणमात्रमेवाऽस्ति, न कार्यम् ?, इति चेत्।

---

१ आविर्भाव-तिरोभावमात्रपरिणामकारणमचिन्त्यम्। नित्यं बहुरूपमपि च नट इव वेषान्तरापन्नः ॥ ६७ ॥

२ पिण्डः कारणमिष्टं पय इव परिणामतस्तथा सर्वम्। आकारादिर्न वस्तु निष्कारणतः खपुष्पमिव ॥ ६८ ॥ ३ ध. छ. 'यच्च का'।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नैवम्, आविर्भाव-तिरोभावमात्र एव कार्योपचारात्, उपचारस्य चाऽवस्तुत्वात्[x]। इति स्वपक्षं व्यवस्थाप्य परपक्षं दूषयितुमाह–'आगारे-त्यादि' द्रव्यमात्रं विहाय स्थापनादिनयैर्यदाऽऽकारादिकमभ्युपगम्यते, तत् सर्वमवस्तु। कुतः ?, इत्याह– निष्कारणत्वात् कारणमात्र-रूपतयाऽनभ्युपगमात्, तदभ्युपगमे त्वस्मत्पक्षवर्तित्वप्रसङ्गात्, इह यत् कारणं न भवति तद् न वस्तु, यथा गगनकुसुमम्, अकारणं च परैरभ्युपगम्यते सर्वमाकारादिकम्, अतोऽवस्तु ॥ इति गाथार्थः ॥ ६८ ॥

तदेवं द्रव्यनयेन स्वपक्षे व्यवस्थापिते भावनयः प्राह–

भोवत्थंतरभूअं किं दव्वं नाम भाव एवायं। भवनं पइक्खणं चिय भावावत्ती विवत्ती य ॥ ६९ ॥

भावेभ्यः पर्यायेभ्योऽर्थान्तरभूतं भिन्नं किं नाम द्रव्यम्, येनोच्यते–'दव्वपरिणाममित्तमित्यादि'?।ननु भाव एवाऽयं यदिदं दृश्यते त्रिभुवनेऽपि वस्तुनिकुरम्बमिति । यदि हि किञ्चिदनादिकालीनमवस्थितं सद् वस्तु वस्त्वन्तरारम्भे व्याप्रियेत तदा न्याय्या स्यादियं कल्पना, यावता प्रतिक्षणं भवनमेवाऽनुभूयते । किमुक्तं भवति ?, इत्याह– भावस्यैकस्य पर्यायस्याऽऽपत्तिरुज्जूतिः, अपरस्य तु विप-त्तिर्विनाशः।

" नै निहाणगया भग्गा पुन्नो नत्थि अणागए। निव्वुया नेय चिट्ठंति आरग्गे सरसवोवमा " ॥ १ ॥

इति वचनात् पूर्वस्य क्षणस्य निवृत्तिः, अपरस्य तूत्पत्तिरित्यर्थः ॥ इति गाथार्थः ॥ ६९ ॥

आह–ननु ये भावस्याऽऽपत्ति-विपत्ती प्रोच्येते ते तावद्धेत्वन्तरमपेक्ष्य भवतः, यच्च हेत्वन्तरमपेक्षते तदेवाऽवस्थितं कारणं, तदेव द्रव्यम्, अतो ' भोवत्थंतरभूअं किं दव्वं ' इत्यादिनाऽयुक्तमेव द्रव्यमपाक्रियते, इत्याशङ्क्याह–

नै य भावो भावन्तरमवेक्खए किन्तु हेउनिरवेक्खं। उप्पज्जइ तयणन्तरमवेइ तमहेउअं चेव ॥ ७० ॥

न च भावो घटादिरुत्पद्यमानो भावान्तरं मृत्पिण्डादिकमपेक्षते, किन्तुहेतुनिरपेक्ष एवोत्पद्यते । अपेक्षा हि विद्यमानस्यैव भवति। न च मृत्पिण्डादिकारणकाले घटादि कार्यमस्ति, अविद्यमानस्य चाऽपेक्षायां खरविषाणस्याऽपि तथाभावप्रसङ्गात् । यदि चो-त्पत्तिक्षणात् प्रागपि घटादिरस्ति, तर्हि किं मृत्पिण्डाद्यपेक्षया ?, तस्य स्वत (घटस्य) एव विद्यमानत्वात् । अथोत्पन्नः सन् घटादिः पश्चाद्

---

[5] आरग्गे॥ १ भावार्थान्तरभूतं किं द्रव्यं नाम, भाव एवाऽयम्। भवनं प्रतिक्षणमेव भावापत्तिर्विपत्तिश्च ॥ ६९ ॥ २ गाथा ६६। + कार्यत्वो ॥
२ न निधानगता भग्ना पुन्नो नास्त्यनागते। निर्वृता नैव तिष्ठन्ति आराग्रे सर्षपोपमाः ॥ १ ॥ ४ गाथा ६९। [Δ] मेत्त-दि.द.॥
५ न च भावो भावान्तरमपेक्षते किन्तु हेतुनिरपेक्षम्। उत्पद्यते तदनन्तरमपैति तदहेतुकं चैव ॥ ७० ॥ [x] कार्यस्योपचारस्य वस्तुत्वात्॥

मृत्पिण्डादिकमपेक्षते। हन्त ! तदिदं मुण्डितशिरसो दिनशुद्धिपर्यालोचनम्, यदि हि स्वत एव कथमपि निष्पन्नो घटादिः, किं तस्य पश्चाद् मृत्पिण्डाद्यपेक्षया ?। अथोत्पद्यमानतावस्थायामसौ तमपेक्षते । केयं नामोत्पद्यमानता ?। न तावदनिष्पन्नावयवता, स्वयमनि-ष्पन्नस्य खरविषाणस्येवाऽपेक्षाऽयोगात्। नापि निष्पन्नावयवता, स्वयं निष्पन्नस्य परापेक्षावैयर्थ्यात्। नाप्यर्धनिष्पन्नावयवता, वस्तुनः सांशताप्रसङ्गात्; तत्र चाऽवयविकल्पनादावनेकदोषोपनिपातसंभवात्। किञ्च, सांशतायामपि किमनिष्पन्नोंशः कारणमपेक्षते, निष्पन्नो वा, उभयं वा ?। न तावदाद्यपक्षद्वयम्, निष्पन्ना-ऽनिष्पन्नयोरपेक्षायाः प्रतिषिद्धत्वात् । उभयपक्षोऽपि न श्रेयान्, उभयपक्षोक्तदो-षप्रसङ्गात्। तस्माद् मृत्पिण्डाद्युत्तरकालं भवनमेव घटादेस्तदपेक्षा, मृत्पिण्डादेरपि कार्यत्वाभिमताद् घटादेः प्राग्भावित्वमेव कारण-त्वम्, न पुनर्घटादिजन्मनि व्याप्रियमाणत्वम् । व्यापारो हि तद्वतो भिन्नः, अभिन्नो वा ?। यदि भिन्नः, तर्हि तस्य निर्व्यापार-ताप्रसङ्गः। [1]अथाऽभिन्नः, तर्हि व्यापाराऽभावः । कारणव्यापारजन्यं जन्मापि जन्मवतो भिन्नम्, अभिन्नं वा ?। भेदे जन्मवतोऽज-न्मप्रसङ्गः। अभेदे तु, जन्माभावः। तस्मात् पूर्वोत्तरकालभावित्वमात्रेणैवाऽयं कार्य-कारणभावो वस्तूनां लोके प्रसिद्धः, न जन्य-जनकभा-वेन। यदपि मृत्पिण्ड-घटादीनां पूर्वोत्तरकालभावित्वम्, तदप्यनादिकालात् तथाप्रवृत्तक्षणपरम्परारूढम्, न पुनः कस्यचित् केनचिद् निर्व-र्तितम्, इति न कस्यचिद् भावस्य कस्यापि संबन्धिन्यपेक्षा। ततो हेत्वन्तरनिरपेक्ष एव सर्वो भावः समुत्पद्यत इति स्थितम्। विनश्यति तर्हि कथम् ?, इत्याह–'तयणन्तरमित्यादि' तदनन्तरमुत्पत्तिसमनन्तरमेवाऽपैति विनश्यति भावः। तदपि च विनशनमहेतुकमेव। मुद्गरो-पनिपातादिसव्यपेक्षा एव घटादयो विनाशमाविशन्तो दृश्यन्ते, न निर्हेतुकाः, इति चेद्। नैवम्, विनाशहेतोरयोगात्, तथाहि– मुद्गरा-दिना विनाशकाले किं घटादिरेव क्रियते, आहोस्वित् कपालादयः, उत तुच्छरूपोऽभावः ? इति त्रयी गतिः। तत्र न तावद् घटादिः, तस्य स्वहेतुभूतकुलालादिसामग्रीत एवोत्पत्तेः। नापि कपालादयः, तत्करणे घटादेस्तदवस्थत्वप्रसङ्गात्, न ह्यन्यस्य करणेऽन्यस्य निवृत्ति-र्युक्तिमती, एकनिवृत्तौ शेषभुवनत्रयस्यापि निवृत्तिप्रसङ्गात् । नापि तुच्छरूपोऽभावः, खरशृङ्गस्येव नीरूपस्य तस्य कर्तुमशक्यत्वात्, करणे वा घटादेस्तदवस्थताप्रसङ्गात्, अन्यकरणेऽन्यनिवृत्त्यसंभवात् । घटादिसंबन्धेनाऽभावो विहितस्तेन घटादेर्निवृत्तिः, इति चेत्। न, संबन्धस्यैवाऽनुपपत्तेः, तथाहि– किं पूर्वं घटः पश्चादभावः, पश्चाद् वा घटः पूर्वमभावः, समकालं वा घटाभावौ ? इति विकल्प-त्रयम्। तत्राऽऽद्यविकल्पद्वयपक्षे संबन्धानुपपत्तिरेव, संबन्धस्य द्विष्ठत्वेन भिन्नकालयोस्तदसंभवात्, अन्यथा भविष्यच्छङ्खचक्रवर्त्या-दीनामतीतैः सगरादिभिरपि संबन्धप्राप्तेः। तृतीयविकल्पपक्षेऽपि घटा-ऽभावयोर्यदि क्षणमात्रमपि सहावस्थितिरभ्युपगम्यते, तर्ह्यसं-

---

१ ख. 'वयवित्व' । २ क. 'अथ चाऽभिन्नः' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सारमप्यसौ स्यात्, विशेषाभावात्; तथा च सति स एव घटादेस्तादवस्थ्यप्रसङ्गः। घटाद्युपमर्देनाऽभावो जायते, अतो घटादिनिवृत्तिः, इति चेत्। ननु कोऽयमुपमर्दो नाम ?। न तावद् घटादिः, तस्य स्वहेतुत एवोत्पत्तेः। नापि कपालादयः, तद्भावे घटादेस्तादवस्थ्यप्रसङ्गात्। नापि तुच्छरूपोऽभावः, एवं हि सति घटाद्यभावेन घट्टाद्यभावो जायत इत्युक्तं स्यात्, न चैतदुच्यमानं हास्यं न जनयति, आत्मनैवाऽत्मभवनानुपपत्तेः। तस्माद् मुद्गरादिसहकारिकारणवैसदृश्याद् विसदृशः कपालादिक्षण उत्पद्यते, घटादिस्तु क्षणिकत्वेन निर्हेतुकः स्वरसत एव निवर्तते, इत्येतावन्मात्रमेव शोभनम्। अतो हेतुव्यापारनिरपेक्षा एव समुत्पन्ना भावाः क्षणिकत्वेन स्वरसत एव विनश्यन्ति, न हेतुव्यापारात्, इति स्थितम्। तस्माज्जन्म-विनाशयोर्न किञ्चित् केनचिदपेक्ष्यते, अपेक्षणीयाभावाच्च न किञ्चित् कस्यचित् कारणम्। तथा च सति न किञ्चिद् द्रव्यम्, किन्तु पूर्वापरीभूताऽपरापरक्षणरूपाः पर्याया एव सन्त इति। अत्र बहु वक्तव्यम्, तत्तु नोच्यते, ग्रन्थगहनताभयात्, सुगतशास्त्रेषु विस्तरेणोक्तत्वाच्च॥ इति गाथार्थः॥ ७०॥

यदपि द्रव्यवादिना 'पिण्डो कारणमिट्ठं पयं न परिणामओ' इत्याद्युक्तम्, तत्राऽस्माभिरप्येतद् वक्तुं शक्यत एवेति। किम् ?, इत्याह–

[3]पिण्डो कज्जं पइसमयभावाउ जह दहिं तहा सव्वं। कज्जाभावाउ[+] नत्थि कारणं खरविसाणं व॥ ७१॥

मृदादिपिण्डः कार्यमेव, न तु कारणम्। कुतः ?, इत्याह– प्रतिसमयमपरापरक्षणरूपेण भावात्, दध्यादिवदिति। प्रतिसमयमपरापरक्षणभवनमसिद्धमिति चेत्। न, वस्तूनां पुराणादिभावाऽन्यथानुपपत्तेः। उक्तं च–

"प्रतिसमयं यदि न भवेदपरापररूपतेह वस्तूनाम्। न स्यात् पुराणभावो न युवत्वं नापि वृद्धत्वम्॥ १॥
जन्मानन्तरसमये न स्याद् यद्यपररूपताऽर्थानाम्। तर्हि विशेषाभावाद् न शेषकालेऽपि सा युक्ता"॥ २॥

किं पिण्ड एव कार्यम् ?। न, इत्याह– तथा सर्वं, यथा प्रतिसमयं भावात् पिण्डः कार्यं तथा सर्वमपि घटपटादिकं वस्तुनिकुरम्बम्, तत एव हेतोः कार्यत्वमपि द्रष्टव्यमित्यर्थः। अनभिमतप्रतिषेधमाह– 'कज्जाभावाउ इत्यादि' पराभ्युपगतं कारणं कारणाख्यं वस्तु नास्ति। कुतः ?, इत्याह– कार्याभावात् तत्र कार्यत्वाऽभ्युपगमाभावात् प्रतिसमयभवनानभ्युपगमादित्यर्थः। इह यत् प्रतिसमयमपरापररूपेण न भवति तद् वस्तु नास्ति, यथा खरविषाणम्, प्रतिसमयमभवन्तश्चाऽभ्युपगम्यन्ते परैर्मृत्पिण्डादयः, तस्माद् न सन्तीति भावः॥ इति गाथार्थः॥ ७१॥

×प्रेम॥ १ स्वभावात्। २ गाथा ६८। ३ पिण्डः कार्यं प्रतिसमयभावाद् यथा दधि तथा सर्वम्। कार्याभावाद् नास्ति कारणं खरविषाणमिव॥ ७१॥+ओ०।

तदेवं नामादिनयानां परस्परविप्रतिपत्तिमुपदर्श्योपसंहारपूर्वकं मिथ्येतरभावं दर्शयितुमाह—

एवं विवयंति नया मिच्छाभिनिवेसओ परोप्परओ। इयमिह सव्वनयमयं जिणमयमणवज्जमच्चंतं॥७२॥

एवमुक्तप्रकारेण परस्परतो मिथ्याभिनिवेशाद् विवदन्ते विवादं कुर्वन्ति नामनयादयो नयाः। ततश्च मिथ्यादृष्टय एते, असंपूर्णार्थग्राहित्वात्, गजगात्राभिन्नदेशसंस्पर्शने बहुविधविवादमुखरजात्यन्धद्वन्दवत्। यदि नामैते मिथ्यादृष्टयः, तर्हि निर्मिथ्यं किम् ?, इत्याह– इदमिहैव लोके वर्तमानमनुभवप्रत्यक्षसिद्धं जिनमतं जैनाभ्युपगमरूपम्। कथंभूतम् ?, सर्वनयमयं निःशेषनयसमूहाभ्युपगमनिर्वृत्तम्, अत्यन्तमनवद्यं नामादिनयपरस्परोद्भाविताऽविद्यमाननिःशेषदोषं, संपूर्णार्थग्राहित्वात्, चक्षुष्मतां समन्तात् समस्तहस्तिशरीरदर्शनोल्लापवत्॥ इति गाथार्थः॥ ७२॥

तथा च संपूर्णार्थग्रहरूपं जिनमतमेव दर्शयति–

[2]नामाइभेअसद्द-त्थ-बुद्धिपरिणामभावओ निययं। जं वत्थुमत्थि लोए चउपज्जायं तयं सव्वं॥ ७३॥

घट-पटादिकं यत् किमपि वस्त्वस्ति लोके, तत् सर्वं प्रत्येकमेव नियतं निश्चितं चत्वारः पर्याया नामा--ऽऽकार--द्रव्य–भावलक्षणा यत्र तच्चतुष्पर्यायम्; न पुनर्यथा नामादिनयाः प्राहुर्यथा–केवलनाममयं वा, केवलाकाररूपं वा, केवलद्रव्यताश्लिष्टं वा, केवलभावात्मकं वेति भावः। कुतश्चतुष्पर्यायमेव ?, इत्याह–'नामादिभेएत्यादि' नामादिभेदेष्वेकत्वपरिणतिसंवलितनामा--ऽऽकार--द्रव्य--भावेष्वेवेत्यर्थः, शब्दश्चाऽर्थश्च बुद्धिश्च शब्दा-ऽर्थ बुद्धयस्तासां परिणामस्तस्य भावः सद्भावस्तस्मात्, नामादिभेदेषु समुदितेष्वेव योऽयं शब्दा-ऽर्थ-बुद्धीनां परिणामसद्भावस्तस्माद्धेतोः सर्वं चतुष्पर्यायं वस्त्वित्यर्थः। प्रयोगः–यत्र शब्दा-ऽर्थ बुद्धिपरिणामसद्भावः, तत् सर्वं चतुष्पर्यायम्, चतुष्पर्यायत्वाभावे शब्दादिपरिणामभावोऽपि न दृष्टः, यथा शशशृङ्गे, तस्माच्छब्दादिपरिणामसद्भावे सर्वत्र चतुष्पर्यायत्वं निश्चितमिति भावः; इदमुक्तं भवति– अन्योऽन्यसंवलितनामादिचतुष्टयात्मन्येव वस्तुनि घटादिशब्दस्य तदभिधायकत्वेन परिणतिर्दृष्टा, अर्थस्यापि पृथुबुध्नोदराद्याकारस्य नामादिचतुष्टयात्मकतयैव परिणामः समुपलब्धः, बुद्धेरपि तदाकारग्रहणरूपतया परिणतिस्तदात्मन्येव वस्तुन्यवलोकिता। न चेदं दर्शनं भ्रान्तम्, बाधकाभावात्। नाप्यदृष्टाशङ्कयाऽनिष्टकल्पना युक्तिमती, अतिप्रसङ्गात्; न हि दिनकराऽस्त-

---

१ एवं विवदन्ति नया मिथ्याभिनिवेशतः परस्परतः। इदमिह सर्वनयमयं जिनमतमनवद्यमत्यन्तम्॥ ७२॥

२ नामादिभेदशब्दा–ऽर्थ–बुद्धिपरिणामभावतो नियतम्। यद् वस्त्वस्ति लोके चतुष्पर्यायं तत् सर्वम्॥ ७३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मयोदयोपलब्धरात्रिन्दिवादिवस्तूनां बाधकसंभावनयाऽन्यथात्वकल्पनासंगतिमावहति । न चेहापि दर्शना-ऽदर्शने विहायाऽन्यद् निश्चायकं प्रमाणमुपलभामहे । तस्मादेकत्वपरिणत्यापन्ननामादिभेदेष्वेव शब्दादिपरिणतिदर्शनात् सर्वं चतुष्पर्यायं वस्त्विति स्थितम् ॥ इति गाथार्थः ॥ ७३ ॥

आह– ननु यदि नामादिचतुष्पर्यायं सर्वं वस्तु, तर्हि किं नामादीनां भेदो नास्त्येव ?, इत्याह–

[1]इय सव्वभेअसंघायकारिणो भिन्नलक्खणा एते । उप्पाया इति यं पिव धम्मा पइवत्थुमाउज्जा ॥ ७४ ॥

इत्येवं ये पूर्वं भिन्नलक्षणा भिन्नस्वरूपा धर्मा नामादयः प्रोक्तास्ते प्रतिवस्त्वायोज्या आयोजनीया इति संबन्धः । कथंभूताः सन्तः ?, इत्याह– भेदश्च संघातश्च भेदसंघातौ, सर्वस्य स्वाश्रयभूतवस्तुनो भेदसंघातौ तौ कर्तुं शीलं येषां ते सर्वभेदसंघातकारिणो निजाश्रयस्य सर्वस्याऽपि वस्तुनः कथञ्चिद् भेदकारिणः, कथञ्चित्त्वभेदकारिण इत्यर्थः, तथाहि– केनचिदिन्द्र इत्युच्चरितेऽन्यः प्राह– किमनेन नामेन्द्रो विवक्षितः, आहोस्वित् स्थापनेन्द्रः, द्रव्येन्द्रः, भावेन्द्रो वा ? । नामेन्द्रोऽपि द्रव्यतः किं गोपालदारकः, हालिकदारकः, क्षत्रियदारकः, ब्राह्मणदारकः, वैश्यदारकः, शूद्रदारको वा ? इत्यादि । तथा क्षेत्रतोऽपि नामेन्द्रः किं भारतः, ऐरवतः, महाविदेहजो वा ? इत्यादि । कालतोऽपि किमतीतकालसंभवी, वर्तमानकालभावी, भविष्यन् वा ? इत्यादि; अतीतकालभाव्यपि किमितोऽनन्ततमसमयभावी, असंख्याततमसमयभावी, संख्याततमसमयभावी वा ? इत्यादि । भावतोऽपि किं कृष्णवर्णः, गौरवर्णः, दीर्घः, मन्थरो वा ? इत्यादि । तदेवमेकोऽपि नामेन्द्रस्याऽऽश्रयभूतोऽर्थस्तावद् द्रव्य-क्षेत्र-काल-भावभेदाधिष्ठितोऽनन्तभेदत्वं प्रतिपद्यते । तथा स्थापना-द्रव्य-भावाश्रयस्याऽप्युक्तानुसारतः प्रत्येकमनन्तभेदत्वमनुसरणीयम् । इत्येवमेते नामादयो भेदकारिणः । अभेदकारिणस्तर्हि कथम् ? इति चेत् । उच्यते– यदैकस्मिन्नपि वस्तुनि नामादयश्चत्वारोऽपि प्रतीयन्ते तदाऽभेदविधायिनः, तथाहि– एकस्मिन्नपि शचीपत्यादौ 'इन्द्र' इति नाम, तदाकारस्तु स्थापना, उत्तरावस्थाकारणत्वं तु द्रव्यत्वम्, दिव्यरूप–संपत्ति-कुलिशधारण-परमैश्वर्यादिसंपन्नत्वं तु भाव इति चतुष्टयमपि प्रतीयते । तस्मादेवं सर्वस्य स्वाऽऽश्रयभूतस्य वस्तुनो भेद-संघातकारिणो भिन्नलक्षणा एते नामादयो धर्मा उत्पाद-व्यय-ध्रौव्यत्रिकवत् प्रतिवस्तु आयोजनीयाः परस्पराऽविनाभाविनः प्रतिवस्तु द्रष्टव्या इति तात्पर्यम् ॥ इति गाथार्थः ॥ ७४ ॥

इह च–

---

१ अन्वयव्यतिरेकापरपर्यायौ प्रत्यक्षानुपलम्भावित्यर्थः । ख 'पि दर्शनं विहाय' । × मतौ ॥

२ इति सर्वभेदसंघातकारिणो भिन्नलक्षणा एते । उत्पादा इति यदिव धर्मा प्रतिवस्त्वायोज्याः ॥७४॥ ३ घ. छ 'कालभावी वर्तमानकालसंभवी' ।

" नत्थि नएहिं विहूणं सुत्तं अत्थो अ जिणमए किंचि । आसज्ज उ सोआरं नएण य विसारओ बूया "

इति वचनाज्जिनमते सर्वं वस्तु प्रायो नयैर्विचार्यते, अतो नाम-स्थापनादीनपि प्रस्तुतान् नयैर्विचारयन्नाह–

[3]नामाइतियं दव्वट्ठियस्स भावो य पज्जवनयस्स । संगह--ववहारा पढमगस्स सेसा य इयरस्स ॥ ७५ ॥

एतेषु नामादिषु मध्ये नाम-स्थापना-द्रव्यनिक्षेपत्रयं द्रव्यास्तिकनयस्यैवाऽभिमतं न पर्यायास्तिकस्य, नामादिनिक्षेपत्रयस्य विवक्षितभावशून्यत्वात्; पर्यायास्तिकस्य तु भावग्राहित्वादिति । 'भावो' भावनिक्षेपः पुनः पर्यायास्तिकनयस्याऽभिमतो नेतरस्य, तस्य द्रव्यमात्रग्राहित्वेन भावाऽनवलम्बित्वादिति । आह– ननु नया नैगमादयः प्रसिद्धाः, ततस्तैरेवाऽयं विचारो युज्यते, अथ तेऽत्रैव द्रव्य-पर्यायास्तिकनयद्वयेऽन्तर्भवन्ति, तर्ह्युच्यतां कस्य कस्मिन्नन्तर्भावः ?, इत्याशङ्क्याह– 'संगहेत्यादि' नैगमस्तावत् सामान्यग्राही संग्रहेऽन्तर्भवति, विशेषग्राही तु व्यवहारे; संग्रहव्यवहारौ तु प्रस्तुतनयद्वयस्य मध्ये प्रथमकस्य द्रव्यास्तिकस्य मतमभ्युपगच्छतः– द्रव्यास्तिकमतेऽन्तर्भवत इति तात्पर्यम् । शेषास्तु ऋजुसूत्रादय इतरस्य द्वितीयस्य पर्यायास्तिकस्य मतमभ्युपगच्छन्तोऽत्रैवाऽन्तर्भवन्तीति हृदयम् । आचार्यसिद्धसेनमतेन चेह ऋजुसूत्रस्य पर्यायास्तिकेऽन्तर्भावो दर्शितः, सिद्धान्ताभिप्रायेण तु संग्रह-व्यवहारवद् ऋजुसूत्रस्याऽपि द्रव्यास्तिक एवाऽन्तर्भावो द्रष्टव्यः, तथा चोक्तं सूत्रे–

[2]" उजुसुयस्स एगे अणुवउत्ते आगमओ एगं दव्वावस्सयं पुहत्तं नेच्छइ " इति ।

तदनेनाऽस्य द्रव्यवादित्वं दर्शितम्, इति कथं पर्यायास्तिकेऽन्तर्भावः स्यात् ? ॥ इति गाथार्थः ॥ ७५ ॥

आह–ननु संग्रहादिनया नामनिक्षेपं सर्वमप्येकत्वेनेच्छन्ति; भेदेन वा ?, एवं स्थापनादिनिक्षेपेष्वपि प्रत्येकं वक्तव्यम्, इत्याशङ्क्याह–

[4]जं सामन्नग्गाही संगिण्हइ तेण संगहो निययं । जेण विसेसग्गाही ववहारो तो विसेसेइ ॥ ७६ ॥

---

१ पृष्ठ २६ । २ नामादित्रिकं द्रव्यास्तिकस्य भावश्च पर्यवनयस्य । संग्रह-व्यवहारौ प्रथमकस्य शेषाश्चेतरस्य ॥ ७५ ॥ × पुहुत्तं-।+ नियथं।

३ ऋजुसूत्रस्यैकोऽनुपयुक्त आगमत एकं द्रव्यावश्यकं पृथक्त्वं नेच्छति.। अनुयोगद्वारसूत्रस्थोऽयं पाठः, तट्टीका चेयम्– "उजुसुयस्सेत्यादि–ऋजु अतीता-ऽनागत-परकीयपरिहारेण प्राञ्जलं वस्तु सूत्रयत्यभ्युपगच्छतीति ऋजुसूत्रः, अयं हि वर्तमानकालभाव्येव वस्तु अभ्युपगच्छति, नाऽतीतम्, विनष्टत्वात्; नाऽप्यनागतम्, अनुत्पन्नत्वात्; वर्तमानकालभाव्यपि स्वकीयमेव मन्यते, स्वकार्यसाधकत्वात्, स्वधनवत्; परकीयं तु नेच्छति स्वकार्याऽप्रसाधकत्वात्, परधनवत् । तस्मादेको देवदत्तादिरनुपयुक्तोऽस्य मते आगमत एकं द्रव्यावश्यकमिति । 'पुहत्तं नेच्छइ त्ति' अतीता-ऽनागतभेदतः परकीयभेदतश्च पृथक्त्वं पार्थक्यं नेच्छत्यसौ, किं तर्हि ? वर्तमानकालीनं स्वकमेव चाऽभ्युपैति, तच्चैकमेवेति" ।

४ यत् सामान्यग्राही संगृह्णाति तेन संग्रहो नियतम् । येन विशेषग्राही व्यवहारस्तस्माद् विशेषयति ॥ ७६ ॥ (नियथं)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]मङ्गलमहवा नन्दी चउव्विहा मङ्गलं च सा नेया । दव्वे तूरसमुदओ भावम्मि य पञ्च नाणाइं ॥७८॥

सूत्रस्य सूचकत्वाद् नोआगमतो भावमलङ्गस्यैव च प्रस्तुतत्वाद् मङ्गलशब्देनेह नोआगमतो भावमङ्गलमिति द्रष्टव्यम् । अथवा-शब्दस्तु पूर्वोक्तपक्षत्रयापेक्षया विकल्पार्थः, ततश्चायमर्थः– यदि वा नोआगमतो भावमङ्गलमन्यद् द्रष्टव्यम् । किं तत् ?, इत्याह– 'नंदी' नन्दनं नन्दी, नन्दन्ति समृद्धिमवाप्नुवन्ति भव्यप्राणिनोऽनयेति वा नन्दी, इयं च सूत्रे सामान्योक्तावपि व्याख्यानतो विशेषप्रतिपत्तेरिह ज्ञानपञ्चकरूपा गृह्यते । सामान्यरूपेण तु चिन्त्यमानाऽसौ मङ्गलवद् नामादिचतुर्विधा भवति । एतदेवाह–'चउव्विहेत्यादि' तत्र 'नन्दी' इति यत् कस्यचिद् नाम क्रियते सा नामनन्दी । अक्षादिषु स्थापिता स्थापनानन्दी । द्रव्यनन्दी तु द्विविधा– आगमतः, नोआगमतश्च । तत्राऽऽगमतो नन्दीपदार्थज्ञोऽनुपयुक्तः, नोआगमतस्तु ज्ञ-भव्यशरीरोभयव्यतिरिक्ता द्रव्यनन्दी द्वादशप्रकारस्तूर्यसमुदयः, तद्यथा–

" [2]भंभा-मुगुन्द-मद्दल-कडंब-झल्लरि-हुडुक्क-कंसाला । काहल-तलिमा वंसो संखो पणवो य बारसमो " ॥ १ ॥

इह च ' दव्वे तूरसमुदओ ' इत्यनेन ज्ञ-भव्यशरीरव्यतिरिक्ता द्रव्यनन्दी सूत्रेऽपि दर्शिता, नामनन्द्यादिस्वरूपं तु पूर्वोक्तनाममङ्गलाद्यनुसारेण सुज्ञेयत्वाद् नोक्तमिति । भावनन्द्यपि द्विधा– आगमतः, नोआगमतश्च । आगमतो नन्दिपदार्थज्ञस्तत्रोपयुक्तः । नोआगमतस्त्वाह–' भावम्मि येत्यादि ' भावे भावनन्द्यां विचार्यमाणायां पुनः ' नोआगमतो भावनन्दी ' इति शेषः । का पुनरियम् ?, इत्याह– पञ्च ज्ञानानि आगमस्य ज्ञानपञ्चकैकदेशत्वात् नोशब्दस्य चेहाप्येकदेशवाचित्वादिति भावः । इयमेव चेह नोआगमतो भावमङ्गलत्वेन प्रस्तुतगाथादौ निर्दिष्टा ॥ इति गाथार्थः ॥ ७८ ॥

कानि पुनस्तानि पञ्च ज्ञानानि ?, इत्याह–

[3]आभिणिबोहियनाणं सुयनाणं चेव ओहिनाणं च । तह मणपज्जवनाणं केवलनाणं च पंचमयं ॥ ७९ ॥

आभिनिबोधिकज्ञानम्, श्रुतज्ञानम्, अवधिज्ञानम्, मनःपर्ययज्ञानम्, केवलज्ञानमिति पञ्च ज्ञानानि । एतानि च भाष्यकारो विस्तरतः स्वयमेव व्याख्यास्यति ॥ ७९ ॥

---

१ मङ्गलमथवा नन्दी चतुर्विधा मङ्गलं च सा ज्ञेया । द्रव्ये तूर्यसमुदयो भावे च पञ्च ज्ञानानि ॥ ७८ ॥ + पर्याय-॥
२ भम्भा-मुकुन्द-मर्दल-कडम्ब-झल्लरी-हुडुक्क-कंसालाः । काहल-तलिमौ वंशः सङ्खः पणवश्च द्वादशः ॥ १ ॥
३ आभिनिबोधिकज्ञानं श्रुतज्ञानं चैवाऽवधिज्ञानं च । तथा मनःपर्यवज्ञानं केवलज्ञानं च पञ्चमकम् ॥ ७९ ॥

[1]मङ्गलमहवा नन्दी चउव्विहा मङ्गलं च सा नेया । दव्वे तूरसमुदओ भावम्मि य पञ्च नाणाइं ॥७८॥

सूत्रस्य सूचकत्वाद् नोआगमतो भावमलङ्गस्यैव च प्रस्तुतत्वाद् मङ्गलशब्देनेह नोआगमतो भावमङ्गलमिति द्रष्टव्यम् । अथवा-शब्दस्तु पूर्वोक्तपक्षत्रयापेक्षया विकल्पार्थः, ततश्चायमर्थः– यदि वा नोआगमतो भावमङ्गलमन्यद् द्रष्टव्यम् । किं तत् ?, इत्याह– 'नंदी' नन्दनं नन्दी, नन्दन्ति समृद्धिमवाप्नुवन्ति भव्यप्राणिनोऽनयेति वा नन्दी, इयं च सूत्रे सामान्योक्तावपि व्याख्यानतो विशेषप्रतिपत्तेरिह ज्ञानपञ्चकरूपा गृह्यते । सामान्यरूपेण तु चिन्त्यमानाऽसौ मङ्गलवद् नामादिचतुर्विधा भवति । एतदेवाह–'चउव्विहेत्यादि' तत्र 'नन्दी' इति यत् कस्यचिद् नाम क्रियते सा नामनन्दी । अक्षादिषु स्थापिता स्थापनानन्दी । द्रव्यनन्दी तु द्विविधा– आगमतः, नोआगमतश्च । तत्राऽऽगमतो नन्दीपदार्थज्ञोऽनुपयुक्तः, नोआगमतस्तु ज्ञ-भव्यशरीरोभयव्यतिरिक्ता द्रव्यनन्दी द्वादशप्रकारस्तूर्यसमुदयः, तद्यथा–

" [2]भंभा-मुगुन्द-मद्दल-कडंब-झल्लरि-हुडुक्क-कंसाला । काहल-तलिमा वंसो संखो पणवो य बारसमो " ॥ १ ॥

इह च ' दव्वे तूरसमुदओ ' इत्यनेन ज्ञ-भव्यशरीरव्यतिरिक्ता द्रव्यनन्दी सूत्रेऽपि दर्शिता, नामनन्द्यादिस्वरूपं तु पूर्वोक्तनाममङ्गलाद्यनुसारेण सुज्ञेयत्वाद् नोक्तमिति । भावनन्द्यपि द्विधा– आगमतः, नोआगमतश्च । आगमतो नन्दिपदार्थज्ञस्तत्रोपयुक्तः । नोआगमतस्त्वाह–' भावम्मि येत्यादि ' भावे भावनन्द्यां विचार्यमाणायां पुनः ' नोआगमतो भावनन्दी ' इति शेषः । का पुनरियम् ?, इत्याह– पञ्च ज्ञानानि आगमस्य ज्ञानपञ्चकैकदेशत्वात् नोशब्दस्य चेहाप्येकदेशवाचित्वादिति भावः । इयमेव चेह नोआगमतो भावमङ्गलत्वेन प्रस्तुतगाथादौ निर्दिष्टा ॥ इति गाथार्थः ॥ ७८ ॥

कानि पुनस्तानि पञ्च ज्ञानानि ?, इत्याह–

[3]आभिणिबोहियनाणं सुयनाणं चेव ओहिनाणं च । तह मणपज्जवनाणं केवलनाणं च पंचमयं ॥ ७९ ॥

आभिनिबोधिकज्ञानम्, श्रुतज्ञानम्, अवधिज्ञानम्, मनःपर्ययज्ञानम्, केवलज्ञानमिति पञ्च ज्ञानानि । एतानि च भाष्यकारो विस्तरतः स्वयमेव व्याख्यास्यति ॥ ७९ ॥

१ मङ्गलमथवा नन्दी चतुर्विधा मङ्गलं च सा ज्ञेया । द्रव्ये तूर्यसमुदयो भावे च पञ्च ज्ञानानि ॥ ७८ ॥ × पर्याय-।
२ भम्भा-मुकुन्द-मर्दल-कडम्ब-झल्लरी-हुडुक्क-कंसालाः । काहल-तलिमौ वंशः सङ्खः पणवश्च द्वादशः ॥ १ ॥
३ आभिनिबोधिकज्ञानं श्रुतज्ञानं चैवाऽवधिज्ञानं च । तथा मनःपर्यवज्ञानं केवलज्ञानं च पञ्चमकम् ॥ ७९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

तत्राऽऽभिनिबोधिकज्ञानशब्दार्थं दर्शयन्नाह–

[1]अत्थाभिमुहो नियओ बोहो जो सो मओ अभिनिबोहो । सो चेवाऽऽभिणिबोहिअमहव जहाजोगमाउज्जं॥८०॥

बोधनं बोधः, 'ऋ गतौ' अर्यते गम्यते ज्ञायत इत्यर्थः, तस्याभिमुखस्तद्ग्रहणप्रवणः–अर्थबलाऽऽयातत्वेन तन्नान्तरीयकोऽवश्य इत्यर्थः, अयमभिशब्दस्याऽर्थो दर्शितः, एवंभूतश्च बोधः क्षयोपशमाद्यपाटवेऽनिश्चयात्मकोऽपि स्यात्, अतो नियतो निश्चित इति निशब्देन विशिष्यते– रसाद्यपोहेन ' रूपमेवेदं ' इत्यवधारणात्मक इत्यर्थः । उक्तं च " एवमवग्रहोऽपि निश्चितमवगृह्णाति, कार्यत उपलब्धेः " अन्यथाऽवग्रहकार्यभूतोऽपायोऽपि निश्चयात्मको न स्यादिति भावः । आह– ननु नियतोऽर्थोभिमुख एव भवति, ततो नियतत्वविशेषणमेवाऽस्तु, किमाभिमुख्यविशेषणेन ? । तदयुक्तम्, द्विचन्द्रज्ञानस्य तैमिरिकं प्रति नियतत्वे सत्यप्यर्थाभिमुख्याभावादिति । एवं च सति अर्थाभिमुखो नियतो यो बोधः स तीर्थकर-गणधरादीनामभिनिबोधो मतोऽभिप्रेतः । ' सो चेवाभिणिबोहियमिति ' स एवाऽभिनिबोध एवाऽऽभिनिबोधिकम्,विनयादिपाठादभिनिबोधशब्दस्य"विनयादिभ्यष्ठक्"[पा०-५।४।३४]इत्यनेन स्वार्थ एव ठक्प्रत्ययः; यथा विनय एव वैनयिकमिति । 'अहव जहाजोगमाउज्जं ति' अथवा नेह स्वार्थिकप्रत्ययो विधीयते, किन्तु यथायोगं यथासंबन्धमायोजनीयं–घटमानसंबन्धानुसारेण स्वयमेव वक्तव्यमित्यर्थः, तद्यथा– अर्थाभिमुखे नियते बोधे भवमाभिनिबोधिकम्, तेन वा निर्वृत्तं, तन्मयं वा, तत्प्रयोजनं वाऽऽभिनिबोधिकम्, तच्च तज्ज्ञानं चाऽऽभिनिबोधिकज्ञानम् ॥ इति गाथार्थः ॥ ८० ॥

तदेवमाभिनिबोधिकशब्दवाच्यं ज्ञानमुक्तम् । अथवा ज्ञानम्, क्षयोपशमः, आत्मा वा तद्वाच्य इति दर्शयन्नाह–

[2]तं तेण तओ तम्मि व सो वाऽभिणिबुज्झए तओ वा तं । तं तेण तओ तम्मि व सुणेइ सो वा सुअं तेणं ॥८१॥

'तं ति' आभिमुख्येन निश्चितत्वेनाऽवबुध्यते संवेदयते आत्मा तदित्यभिनिबोधोऽवग्रहादिज्ञानं, स एवाऽऽभिनिबोधिकम्, अथवा आत्मा तेन प्रस्तुतज्ञानेन, तदावरणक्षयोपशमेन वा करणभूतेन घटादि वस्त्वभिनिबुध्यते, तस्माद् वा प्रकृतज्ञानात्, क्षयोपशमाद्वाऽभिनिबुध्यते; तस्मिन् वाऽधिकृतज्ञाने, क्षयोपशमे वा सत्यभिनिबुध्यतेऽवगच्छतीत्यभिनिबोधो ज्ञानं, क्षयोपशमो वा । 'सो वाऽभिणिबुज्झए त्ति' अथवाऽभिनिबुध्यते वस्त्वभिगच्छतीत्यभिनिबोधः । असावात्मैव, ज्ञान-ज्ञानिनोः कथञ्चिदव्यतिरेकादिति, स एवाऽऽभिनिबोधिकम् । 'तओ वा तमिति' न केवलं ' अत्थाभिमुहो नियओ ' इत्यादिव्युत्पत्त्याऽऽभिनिबोधिकमुक्तम्; किन्तु यतः 'तं तेण

---

१ अर्थाभिमुखो नियतो बोधो यः स मतोऽभिनिबोधः । स चैवाभिनिबोधिकमथवा यथायोगमायोज्यम् ॥ ८० ॥

२ तत् तेन ततस्तस्मिन् वा स वाऽभिनिबुध्यते ततो वा तत् । तस् तेन ततस्तस्मिन् वा शृणोति स वा श्रुतं तेन ॥ ८१ ॥ ३ गाथा ८० ।

तओ तम्मि ' इत्यादि व्युत्पत्त्यन्तरमस्ति, ततोऽपि कारणात् तदाभिनिबोधिकमुच्यत इत्यर्थः । नन्वात्म-क्षयोपशमयोराभिनिबोधिकशब्दवाच्यत्वे ज्ञानेन सह कथं समानाधिकरणता स्यात् ? । सत्यम्, किन्तु ज्ञानस्याऽऽत्माश्रयत्वात्, क्षयोपशमस्य च ज्ञानकारणत्वादुपचारतोऽत्रापि पक्षे आभिनिबोधिकशब्दो ज्ञाने वर्तते, ततश्चाऽऽभिनिबोधिकं च तज्ज्ञानं चाभिनिबोधिकज्ञानमिति समानाधिकरणसमास इत्यदोषः ॥

अथ श्रुतव्युत्पत्तिमाह– ' तं तेणेत्यादि ' श्रूयत आत्मना तदिति श्रुतं शब्दः, अथवा श्रूयतेऽनेन श्रुतज्ञानावरणक्षयोपशमेन, श्रूयते तस्मात् क्षयोपशमात्, श्रूयते तस्मिन् क्षयोपशमे सतीति श्रुतं क्षयोपशमः । 'सुणेइ सो व त्ति'ति शृणोतीति श्रुतम्, असावात्मेति वा व्युत्पत्तिरित्यर्थः । 'सुयं तेणेति' येनैवं व्युत्पत्तिस्तेन कारणेन श्रुतमुच्यत इत्यर्थः । इह च शब्दस्य श्रुतज्ञानकारणत्वात् क्षयोपशमस्य तद्धेतुत्वादात्मनश्च कथञ्चित् तदव्यतिरेकादुपचारतः श्रुतं च तज्ज्ञानं च श्रुतज्ञानम् ॥ इति गाथार्थः ॥ ८१ ॥

अथाऽवधेर्व्युत्पादनार्थमाह–

[1]तेणाव हीयए तम्मि वाऽवहाणं तओऽवही सो य मज्जाया । जं तीए दव्वाइ परोप्परं मुणंइ तओऽवहित्ति॥८२॥

ततः कारणादवधिरित्युच्यते । यतः किम् ?, इत्याह– ' तेणाव हीयए त्ति ' अवशब्दस्याऽव्ययत्वेनाऽनेकार्थत्वादधोऽधो विस्तृतं धीयते परिच्छिद्यते रूपि वस्तु तेन ज्ञानेनेत्यवधिः, अथवा अव-मर्यादया एतावत्क्षेत्रं पश्यन्, एतावन्ति द्रव्याणि, एतावन्तं कालं पश्यतीत्यादिपरस्परनियमितक्षेत्रादिलक्षणया धीयते परिच्छिद्यते रूपि वस्तु तेनेत्यवधिः । 'तम्मि व त्ति' अथवा अवशब्दस्यार्थद्वयं तथैवाऽवधीयते जीवेन तस्मिन् सति वस्त्वित्यवधिः, अकारस्य लुप्तस्याऽदर्शनात् 'अवहाणं' ति वा शब्दोऽनुवर्तते; ततश्चाऽथवाऽवधानमवधिः साक्षादर्थपरिच्छेदनमित्यर्थः, अथवाऽवधीयते तस्माज्जीवेन साक्षाद् वस्त्वित्यवधिरित्युपलक्षणव्याख्यानात् स्वयमेव द्रष्टव्यम् । 'सो य मज्जाय त्ति' स चोक्तस्वरूपोऽवधिर्मर्यादयाऽर्थपरिच्छेदने प्रवर्तमानत्वादुपचारतो मर्यादा । एतदेवाह–'जं तीए इत्यादि'पुंलिङ्गोऽप्यवधिशब्दः प्राकृतत्वात् स्त्रीत्वेन निर्दिष्टः, ततश्च यद् यस्मात् कारणात् तेनाऽनन्तरोक्तेनाऽवधिना जीवो द्रव्यादि ' मुणति ' जानाति । कथंभूतं सत् ?, इत्याह– परस्परं नियामितमिति शेषः । वक्ष्यति च–

" [2]अंगुलमावलिआणं भागमसंखेज्ज दोसु संखेज्जा । अंगुलमावलिअन्तो आवलिआ अंगुलपुहत्तं " ॥ १ ॥

---

१ तेनाऽव धीयते तस्मिन् वाऽवधानं ततोऽवधिः स च मर्यादा । यत् तेन द्रव्यादि परस्परं जानाति ततोऽवधिः ॥ ८२ ॥ + करण ॥

२ अङ्गुलावलिकयोर्भागमसंख्येयं द्वयोः संख्येयौ । अङ्गुलावलिकान्तरावलिका अङ्गुलपृथक्त्वम् ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

[1]हत्थम्मि मुहुत्तन्तो दिवसंतो गाउयम्मि बोधव्वे " इत्यादि ॥

तस्मादनया परस्परोपनिबन्धलक्षणया मर्यादया यतो जीवस्तेनाऽवधिना द्रव्यादिकं 'मुणति' (जानाति), ततोऽवधिरप्युपचारात् मर्यादेति भावः । अवधिश्चासौ ज्ञानं चेत्यवधिज्ञानम्, इति प्रक्रमलब्धेन ज्ञानशब्देन समासः ॥ इति गाथार्थः ॥ ८२ ॥

अथ मनःपर्यायज्ञानविषयां व्युत्पत्तिमाह–

[2]पज्जवणं पज्जयणं पज्जाओ वा मणम्मि मणसो वा । तस्स व पज्जायादिनाणं मणपज्जवं [3]नाणं ॥ ८३ ॥

'पज्जवणं ति' 'अव गत्यादिषु' इति वचनादवनं गमनं वेदनमित्यवः, परिः सर्वतोभावे, पर्यवनं समन्तात् परिच्छेदनं पर्यवः । काऽयम् ?, इत्याह–'मणम्मि मणसो व त्ति' मनसि मनोद्रव्यसमुदाये ग्राह्ये, मनसो वा ग्राह्यस्य संबन्धी पर्यवो मनःपर्यवः, स चासौ ज्ञानं च मनःपर्यवज्ञानम् । अथवा 'पज्जयणं ति' 'अय वय मय'- इत्यादिदण्डकधातुः, अयनं गमनं वेदनमित्ययः, परिः सर्वतोभावे, पर्ययनं सर्वतः परिच्छेदनं पर्ययः । क्व पुनरसौ ?, इत्याह–'मणम्मि मणसो व त्ति' मनसि ग्राह्ये, मनसो वा ग्राह्यस्य संबन्धी पर्ययो मनःपर्ययः स चासौ ज्ञानं च मनःपर्ययज्ञानम् । 'पज्जाओ व त्ति' अथवा 'इण् गतौ' अयनं, आयः, लाभः, प्राप्तिरिति पर्यायाः, परिस्तथैव, समन्तादायः पर्यायः । क्व ?, इत्याह– 'मणम्मि मणसो व त्ति' मनसि ग्राह्ये, मनसो वा ग्राह्यस्य पर्यायो मनःपर्यायः, स चासौ ज्ञानं च मनःपर्यायज्ञानम् । एवं तावज्ज्ञानशब्देन सह सामानाधिकरण्यमङ्गीकृत्योक्तम् ॥

अथ वैयधिकरण्यमङ्गीकृत्याह– 'तस्स वेत्यादि' वाशब्दः पक्षान्तरसूचकः, तस्येति मनसः, पर्यायाः, पर्यवाः, पर्ययाः, धर्मा इत्यनर्थान्तरमिति; आदिशब्दात् पर्यव–पर्ययपरिग्रहः, ततश्चायमर्थः– अथवा तस्य मनसो ग्राह्यस्य संबन्धिनो बाह्यवस्तुचिन्तनानुगुणा ये पर्यायाः, पर्यवाः, पर्ययास्तेषां तेषु वा 'इदमित्थंभूतमनेन चिन्तितम्' इत्येवंरूपं ज्ञानं मनःपर्यायज्ञानं, मनःपर्यवज्ञानं, मनःपर्ययज्ञानं चेति ज्ञानशब्देन सह व्यधिकरणः समासः । अत एव " पायं च नाणसद्दो नामसमाणाहिगरणोऽयं " इत्यत्र प्रायोग्रहणं करिष्यति ॥ इति गाथार्थः ॥ ८३ ॥

अथ केवलज्ञानविषयं शब्दार्थमाह–

[4]केवलमेगं सुद्धं सगलमसाहारणं अणन्तं च । पायं च नाणसद्दो नामसमाणाहिगरणोऽयं ॥ ८४ ॥

---

१ हस्ते मुहूर्तान्तर्दिवसान्तर्गव्यूते बोद्धव्यः । २ पर्यवनं पर्ययनं पर्यायो वा मनसि मनसो वा । तस्य वा पर्यायादिज्ञानं मनःपर्ययं ज्ञानम् ॥८३॥

३ ख ग 'दि ना' । ४ घ छ 'ज्जवन्नाणं' ॥ ५ गाथा ८४ । ६ केवलमेकं शुद्धं सकलमसाधारणमनन्तं च । प्रायश्च नामशब्दो नामसमानाधिकरणोऽयम् ॥८४॥

केवलमिति व्याख्येयं पदम् । ततः केवलमिति कोऽर्थः ?, इत्याह-- एकमसहायमिन्द्रियादिसाहाय्यानपेक्षित्वात्, तद्भावे शेषच्छाद्मस्थिकज्ञाननिवृत्तेर्वा शुद्धं निर्मलं सकलावरणमलकलङ्कविगमसंभूतत्वादिति । सकलं परिपूर्णं संपूर्णज्ञेयग्राहित्वात्, असाधारणमनन्यसदृशं तादृशाऽपरज्ञानाभावात्, अनन्तम्, अप्रतिपातित्वेनाऽविद्यमानपर्यन्तत्वात्, इत्येकादिष्वर्थेषु केवलशब्दोऽत्र वर्तते, केवलं च तज्ज्ञानं च केवलज्ञानमिति समासः । आह– नन्वाभिनिबोधिकादीनि ज्ञानवाचकानि नामान्येव भाष्यकृता " अत्थाभिमुहो नियओ " इत्यादौ सर्वत्र व्युत्पादितानि, ज्ञानशब्दस्तु न क्वचिदुपात्तः, स कथं लभ्यते ?, इत्याशङ्क्याह– ' पायं चेत्यादि ' प्रक्रमलब्धो ज्ञानशब्द आभिनिबोधिक–श्रुतादिभिर्ज्ञानाभिधायकैर्नामभिः समानाधिकरणः स्वयमेव योजनीयः, स च योजित एव, तद्यथा– आभिनिबोधिकं च तज्ज्ञानं च, श्रुतं च तज्ज्ञानं चेत्यादि । क्वचिद् वैयधिकरण्यसमासोऽपि संभवतीति प्रायोग्रहणम् । स च मनःपर्यायज्ञाने दर्शित एव, अन्यत्राऽपि च यथासंभवं द्रष्टव्यः ॥ इति गाथार्थः ॥ ८४ ॥

तदेवं ज्ञानपञ्चकस्याप्यभिधानार्थे कथिते आह कश्चित्– नन्वादौ मतिश्रुतोपन्यासः किमर्थः ? इति । अत्राऽऽचार्यः प्राह–

[1]जं सामि--काल-कारण-विसय-परोक्खत्तणेहिं तुल्लाइं । तब्भावे सेसाणि य तेणाईए मइ-सुयाइं ॥ ८५ ॥

तेन कारणेनादौ मति-श्रुते निर्दिष्टे । येन, किम् ?, इत्याह– 'जं सामीत्यादि' इति संटङ्कः । मतिशब्दोऽत्राऽऽभिनिबोधिकसमानार्थो द्रष्टव्यः, आभिनिबोधिकं ह्यौत्पत्तिक्यादिमतिप्रधानत्वाद् मतिरित्यप्युच्यते । यद् यस्मात् कारणात् स्वामि--काल--कारण--विषय--परोक्षत्वैस्तुल्ये समानस्वरूपे मति-श्रुते, तेनाऽऽदौ निर्दिष्टे इत्यर्थः । तत्र स्वामी तावदनयोरेक एव " जत्थ मइनाणं तत्थ सुयनाणं " इत्याद्यागमवचनादिति । कालोऽपि द्विधा– नानाजीवापेक्षया, एकजीवापेक्षया च । स चाऽयं द्विविधोऽप्यनयोस्तुल्य एव, नानाजीवापेक्षया द्वयोरपि सर्वकालमनुच्छेदाद्; एकजीवापेक्षया तूभयोरपि निरन्तरसातिरेकसागरोपमषट्षष्टिस्थितिकत्वेनाऽत्रैवाऽभिधास्यमानत्वादिति । कारणमपीन्द्रिय-मनोलक्षणं स्वावरणक्षयोपशमस्वरूपं च द्वयोरपि समानम् । उभयस्याऽपि सर्वद्रव्यादिविषयत्वाद् विषयतुल्यता । परनिमित्तत्वाच्च परोक्षत्वसमता । ननु यद्येवमनयोः परस्परं तुल्यता, तर्ह्येकत्र द्वयोरप्युपन्यासोऽस्तु, आदावेव तु तदुपन्यासः कथम् ?, इत्याह–'तब्भावे इत्यादि' तद्भावे मति--श्रुतज्ञानसद्भाव एव शेषाण्यवध्यादीनि ज्ञानान्यवाप्यन्ते; नान्यथा, न हि स कश्चित् प्राणी भूतपूर्वः, अस्ति, भविष्यति वा, यो मति--श्रुतज्ञाने अनासाद्य प्रथममेवाऽवध्यादीनि शेषज्ञानानि प्राप्तवान्, प्राप्नोति, प्राप्स्यति वेति भावः । ततस्तदवाप्तौ शेषज्ञानाऽवाप्तेश्चादौ मति-श्रुतोपन्यासः ॥ इति गाथार्थः ॥ ८५ ॥

---

१ यद् स्वामि--काल--कारण--विषय--परोक्षत्वैस्तुल्यानि । तद्भावे शेषाणि च तेनाऽऽदौ मति--श्रुते ॥ ८५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

भवतु तर्ह्यादौ मति-श्रुतोपादानम्, केवलं पूर्वं मतिः, पश्चात्तु श्रुतमित्यत्र किं कारणम्, यावता विपर्ययोऽपि कस्माद् न भवति ?, इत्याह—

मइपुव्वं जेण सुयं तेणाईए मई, विसिट्ठो वा । मइभेओ चेव सुयं तो मइसमणंतरं भणियं ॥ ८६ ॥

मतिः पूर्वं प्रथममस्येति मतिपूर्वं येन कारणेन श्रुतज्ञानं, तेन श्रुतस्यादौ मतिः, तीर्थकर-गणधरैरुक्तेति शेषः, न ह्यवग्रहादि-रूपे मतिज्ञाने पूर्वमप्रवृत्ते क्वापि श्रुतमप्रवृत्तिरस्तीति भावः । 'विसिट्ठो वा मइभेओ चेव सुयं ति' यदि वा इन्द्रियाऽनिन्द्रियनिमित्त-द्वारेणोपजायमानं सर्वं मतिज्ञानमेव, केवलं परोपदेशादागमवचनत्वाच्च भवन् विशिष्टः कश्चिद् मतिभेद एव श्रुतं; नान्यत् । ततो मूल-भूताया मतेरादौ विन्यासः, तद्भेदरूपं तु श्रुतज्ञानं तत्समनन्तरं भणितमित्यदोषः । 'मइपुव्वं जेण सुयं' इत्यादिकश्चाऽर्थः पुरतः प्रपञ्चेन भणिष्यते ॥ इति गाथार्थः ॥ ८६ ॥

अथ मतिश्रुतानन्तरमवधेः, तत्समनन्तरं च मनःपर्यायज्ञानस्योपन्यासे कारणमाह—

[1]काल-विवज्जय-सामित्त-लाभसाहम्मओऽवही तत्तो । माणसमित्तो छउमत्थ-विसय-भावादिसामण्णा ॥८७॥

ततो मति-[+]श्रुताभ्यामनन्तरमवधिर्निर्दिष्टः । कुतः ?, इत्याह— काल-विपर्यय—स्वामित्वलाभसाधर्म्यात् । तत्र नानाजीवापेक्षया, एकजीवापेक्षया च मति-श्रुताभ्यां सहाऽवधेः समानस्थितिकालत्वात् कालसाधर्म्यम् । यथा च मिथ्यात्वोदये मति—श्रुतज्ञाने अज्ञानरूपं विपर्ययं प्रतिपद्येते, तथाऽवधिरपि, इति विपर्ययसाधर्म्यम् । य एव च मति—श्रुतयोः स्वामी स एवाऽवधेरपि, इति स्वामिसाधर्म्यम् । लाभोऽपि कदाचित् कस्यचिदमीषां त्रयाणामपि ज्ञानानां युगपदेव भवति, इति लाभसाधर्म्यम् । 'माणसमित्तो इत्यादि' इतोऽवधे-रनन्तरं मनोविषयत्वाद् मनसि भवं मानसं मनःपर्यायज्ञानं युक्तम् । कुतः ?, इत्याह— छद्मस्थ—विषय—भावादिसामान्यात्; आदिश-ब्दात् प्रत्यक्षत्वादिसामान्यं गृह्यते, समानस्य भावः सामान्यं साम्यं तस्मादित्यर्थः । तत्र यथाऽवधिज्ञानं छद्मस्थस्यैव भवति तथा मनः-पर्यायज्ञानमपीति च्छद्मस्थसाम्यम् । उभयोरपि पुद्गलमात्रविषयत्वाद् विषयसाम्यम् । द्वयोरपि क्षायोपशमिकभाववृत्तित्वाद् भावसाम्यम् । द्वितयस्याऽपि साक्षाद्दर्शित्वात् प्रत्यक्षत्वसाम्यम् । एवमन्यापि प्रत्यासत्तिरभ्यूह्या ॥ इति गाथार्थः ॥ ८७ ॥

---

१ मतिपूर्वं येन श्रुतं तेनादौ मतिः, विशिष्टो वा । मतिभेदश्चैव श्रुतं तस्माद् मतिसमनन्तरं भणितम् ॥ ८६ ॥ + श्रुताभ्यावधि-॥

२ काल—विपर्यय—स्वामित्व—लाभसाधर्म्यतोऽवधिस्ततः । मानसमितः छद्मस्थ—विषय—भावादिसामान्यात् ॥ ८७ ॥

अथ केवलज्ञानस्य सर्वोपरिनिर्देशे कारणमाह—

[1]अन्ते केवलमुत्तम-जइसामित्तावसाणलाभाओ । एत्थं च मइ-सुयाइं परोक्खमियरं च पच्चक्खं ॥ ८८ ॥

अन्ते सर्वज्ञानानामुपरि केवलज्ञानमभिहितम् । कुतः ?, इत्याह— भावप्रधानत्वाद् निर्देशस्य—उत्तमत्वात्, सर्वोत्तमं हि केवल-ज्ञानम्, अतीता—ऽनागत—वर्तमाननिःशेषज्ञेयस्वरूपावभासित्वादिति । यथा च मनःपर्यायज्ञानस्य यतिरेव स्वामी, तथा केवलज्ञान-स्यापि, ततो यतिस्वामित्वसाम्याद् मनःपर्यायज्ञानानन्तरं केवलज्ञानमभिहितम् । तथा समस्तापरज्ञानानामवसान एवाऽस्य लाभाद-वसान एव निर्देश इति । तदेवमुपन्यासक्रमे समर्थिते सत्याह कश्चित्—नन्वेतानि पञ्च ज्ञानानि किं परोक्षस्वरूपाणि, आहोस्वित् प्रत्य-क्षाणि ? इति । अत्राह— 'एत्थं चेत्यादि' एतेषु पञ्चसु ज्ञानेषु मध्ये मति—श्रुते परोक्षे, इतरत्[+]त्ववध्यादि ज्ञानत्रयं प्रत्यक्षम् ॥ इति गाथार्थः ॥ ८८ ॥

तत्र प्रत्यक्षस्य लक्षणमाह—

[2]जीवो अक्खो अत्थव्वावण-भोयणगुणण्णिओ जेण । तं पइ वट्टइ नाणं जं पच्चक्खं तयं तिविहं ॥८९॥

अक्षस्तावज्जीव उच्यते । केन हेतुना ?, इत्याह— 'अत्थव्वावणेत्यादि' अर्थव्यापन-भोजनगुणान्वितो येन, तेनाऽक्षो जीवः, इदमुक्तं भवति— 'अशू व्याप्तौ' अश्नुते ज्ञानात्मना सर्वार्थान् व्याप्नोतीत्युणादिनिपातनादक्षो जीवः, अथवा 'अश भोजने' अश्नाति समस्तत्रिभुवनाऽन्तर्वर्तिनो देवलोकसमृद्ध्यादीनर्थान् पालयति भुङ्क्ते वेति निपातनादक्षो जीवः, अश्नातेर्भोजनार्थत्वाद्, भुजेश्च पालनाऽ-भ्यवहारार्थत्वादिति भावः । इत्येवमर्थव्यापन-भोजनगुणयुक्तत्वेन जीवस्याऽक्षत्वं सिद्धं भवति । तमक्षं जीवं प्रति साक्षाद्गतमिन्द्रि-यनिरपेक्षं वर्तते यज्ज्ञानं तत् प्रत्यक्षम् । तच्चाऽवधि-मनःपर्याय-केवलज्ञानभेदात् त्रिविधं त्रिप्रकारम्, तस्यैव साक्षादर्थपरिच्छेदकत्वेन जीवं प्रति साक्षाद् वर्तमानत्वात् ॥ इति गाथार्थः ॥ ८९ ॥

अथ परोक्षज्ञानस्वरूपमाह—

[3]अक्खस्स पोग्गलकया जं दव्विन्दिय-मणा परा तेणं । तेहिं तो जं नाणं परोक्खमिह तमणुमाणं व ॥९०॥

---

१ अन्ते केवलमुत्तम—यतिस्वामित्वा—ऽवसानलाभात् । अत्र च मति-श्रुते परोक्षमितरच्च प्रत्यक्षम् ॥ ८८ ॥ + च-।

२ जीवोऽक्षोऽर्थव्यापन-भोजनगुणान्वितो येन । तं प्रति वर्तते ज्ञानं यत् प्रत्यक्षं तकत् त्रिविधम् ॥ ८९ ॥

३ अक्षस्य पुद्गलकृतानि यद् द्रव्येन्द्रिय-मनांसि पराणि तेन । तैस्तस्माद् यज्ज्ञानं परोक्षमिह तदनुमानमिव ॥ ९० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यद् यस्माद् द्रव्येन्द्रियाणि द्रव्यमनश्च, अक्षस्य जीवस्य पराणि भिन्नानि वर्तन्ते। कथंभूतानि पुनर्द्रव्येन्द्रिय-द्रव्यमनांसि ?, इत्याह–पुद्गलकृतानि पुद्गलस्कन्धनिचयनिष्पन्नानि, हेतुद्वारेण चेदं विशेषणं द्रष्टव्यम्–पुद्गलकृतत्वाद्, येन द्रव्येन्द्रिय-मनांसि जीवस्य परभूतानि, तेन तेभ्यो यद् मति-श्रुतलक्षणं ज्ञानमुत्पद्यते, तत् तस्य साक्षादनुत्पत्तेः परोक्षम्, अनुमानवदिति। इदमुक्तं भवति–अपौद्गलिकत्वादमूर्तो जीवः, पौद्गलिकत्वात् तु मूर्तानि द्रव्येन्द्रिय-मनांसि, अमूर्ताच्च मूर्तं पृथग्भूतम्, ततस्तेभ्यः पौद्गलिकेन्द्रिय-मनोभ्यो यद् मति-श्रुतलक्षणं ज्ञानमुपजायते, तद् धूमादेरग्न्यादिज्ञानवत् परनिमित्तत्वात् परोक्षमिह जिनमते परिभाष्यते॥ इति गाथार्थः॥९०॥

ये तु वैशेषिकादयोऽक्षमिन्द्रियं प्रति गतं प्रत्यक्षम्, शेषं तु परोक्षमिति मन्यन्ते, तद्दर्शनमपाकर्तुमाह—

[1]केसिंचि इंदिआइं अक्खाइं, तदुवलद्धि पच्चक्खं। तन्नो, ताइं जं मचेअणाइं जाणंति न घडो व्व॥ ९१॥

केषांचिद् वैशेषिकादीनां मतेनाऽक्षाणि स्पर्शनादीनीन्द्रियाण्युच्यन्ते, न जीव इति भावः। 'तदुवलद्धि पच्चक्खं ति' तेषामिन्द्रियाणां येयं साक्षाद्घटाद्यर्थोपलब्धिर्घटादिज्ञानं तत् प्रत्यक्षम्, अन्यत् तु परोक्षमिति। अङ्गीक्रियतां तर्हि तन्मतमित्याह–'तन्नो इत्यादि' तदेतद् वैशेषिकादिमतं न युक्तम्, यतस्तानीन्द्रियाण्यचेतनानि, ततश्च न जानन्ति न वस्तुस्वरूपमुपलभन्ते, घटवत्, तथाहि–यदचेतनं तत् सर्वमपि न जानाति, यथा घटादि, अचेतनानि चेन्द्रियाणि, इति कुतस्तेषामुपलब्धिः ? या प्रत्यक्षं स्यादिति भावः। तथा इन्द्रियाणां ज्ञानशून्यत्वे मूर्तिमत्त्व-स्पर्शादिमत्त्वादयोऽपि हेतवो वाच्याः॥ इति गाथार्थः॥ ९१॥

नान्विन्द्रियाणि न जानन्ति, इति प्रत्यक्षविरोधिनी प्रतिज्ञा, तेषां साक्षात्कारेणाऽर्थोपलब्धेरनुभवप्रत्यक्षेण प्रतिभाणि प्रसिद्धत्वात्, इत्याशङ्क्याह—

[2]उवलद्धा तत्थाऽऽया तव्विगमे तदुवलद्धसरणाओ। गेहगवक्खोवरमे वि तदुवलद्धाऽणुसरिया वा॥ ९२॥

'तत्थ त्ति' तत्र चक्षुरादीन्द्रिये करणतया व्याप्रियमाणे उपलब्धा वस्तूनां बोद्धा आत्मैव द्रष्टव्यः, न त्विन्द्रियम्। कुतः ?, इत्याह–'तव्विगमेत्यादि' तस्य चक्षुरादीन्द्रियस्य विगमेऽभावेऽपीत्यर्थः, तदुपलब्धस्य पराभ्युपगमेनेन्द्रियोपलब्धस्याऽर्थस्य स्मरणात्। क इव ?, इत्याह–तेन गृहगवाक्षेण करणभूतेनोपलब्धस्य योषिदाद्यर्थस्य योऽनुस्मर्ता देवदत्तादिः स इव, वाशब्दस्येवार्थत्वात्। क सति ?, इत्याह– गृहगवाक्षस्योपरमेऽप्यभावेऽपि सतीत्यर्थः। अत्र प्रयोगः– इह यो यैषूपरतेष्वपि तदुपलब्धानर्थाननुस्मरति स तत्रो-

---

१ केषांचिदिन्द्रियाणि अक्षाणि, तदुपलब्धिः प्रत्यक्षम्। तन्न, तानि यदचेतनानि जानन्ति न घट इव॥ ९१॥.

२ उपलब्धा तत्राऽऽत्मा तद्विगमे तदुपलब्धस्मरणात्। गेहगवाक्षोपरमेऽपि तदुपलब्धाऽनुस्मर्ता वा (इव)॥ ९२॥

पलब्धा दृष्टः, यथा गृहगवाक्षोपलब्धानामर्थानां तद्विगमेऽप्यनुस्मर्ता देवदत्तादिः, अनुस्मरति चेन्द्रियविगमेऽपि तदुपलब्धमर्थमात्मा, तस्मात् स एवोपलब्धा, यदि पुनरिन्द्रियाण्युपलम्भकानि स्युः, तदा तद्विगमे कस्याऽनुस्मरणं स्यात् ?। न ह्यन्येनोपलब्धेऽर्थेऽन्यस्य स्मरणं युक्तम्, अतिप्रसङ्गात्, अस्ति चाऽनुस्मरणम्। तस्माद् 'न जानन्तीन्द्रियाणि' इति स्थितेयं प्रतिज्ञा, तद्बाधकत्वेनोक्तस्याऽनुभवप्रत्यक्षस्य यथोक्तानुमानबाधितत्वेन भ्रान्तत्वादिति॥

अत्राह–कस्येदं दर्शनं यत् स्वतन्त्राणीन्द्रियाण्युपलब्धिमन्ति ?, वयं हि ब्रूमः– यदिन्द्रिय-मनोनिमित्तमात्मनो ज्ञानमुत्पद्यते तत् प्रत्यक्षम् "आत्मा मनसा युज्यते, मन इन्द्रियेण, इन्द्रियं चार्थेन" इति वचनादिति। हन्त ! एवं सति परानिमित्तत्वादनुमानवत् परोक्षत्वमस्य प्रागेव 'अक्खस्स पोग्गलकया जं दव्विंदिय-मणा परा तेणं' इत्यादिग्रन्थेनोक्तम्, इति कुतस्तस्य प्रत्यक्षता ?। अथ ज्ञानशून्येऽपीन्द्रियेज्ञाननिमित्तत्वेन साक्षाद् व्याप्रियमाणत्वादुपचारेण 'अक्षमिन्द्रियं प्रति वर्तते' इति प्रत्यक्षता प्रोच्यते। हन्त ! तर्हि 'इन्द्रियोपलब्धिः प्रत्यक्षम्' इत्येतल्लक्षणमिह न घटते, जीवोपलब्धित्वादस्याः। संव्यवहारमात्रेण तु प्रत्यक्षत्वमस्याऽस्माभिरप्यनन्तरमभ्युपगंस्यते, इति सिद्धसाध्यतैव॥ इति गाथार्थः॥ ९२॥

तदेवमिन्द्रिय–मनोनिमित्तज्ञानस्य परोक्षतां प्रतिपाद्य प्रयोगोपन्यासेन तामेव द्रढयन्नाह—

[3]इंदिय-मणोनिमित्तं परोक्खमिह संसयादिभावाओ। तक्कारणं परोक्खं जहेह साभासमणुमाणं॥ ९३॥

यदिन्द्रिय-मनोनिमित्तं ज्ञानमुपजायते तदात्मनः परोक्षम्। कुतः ?, इत्याह– संशयादिभावादिति, आदिशब्दाद् विपर्यया-ऽनध्यवसाय-निश्चयपरिग्रहः। तत्कारणमिति तानीन्द्रिय-मनांसि कारणं यस्य साभासानुमानस्य सम्यगनुमानस्य च तत् तत्कारणं ज्ञानमन्यत्राऽपि परोक्षं दृष्टम्, यथा साभासमनुमानं सम्यगनुमानं चेत्येवं लुप्तचकारस्य दर्शनाद् दृष्टान्तद्वयमिह द्रष्टव्यम्। तत्र संशय-विपर्ययाऽनध्यवसायसंभवलक्षणे हेतौ प्रथमो दृष्टान्तः, निश्चयसंभवस्वरूपे तु हेतौ द्वितीयो दृष्टान्तः, तथाहि प्रयोगः–यदिन्द्रिय-मनोनिमित्तं ज्ञानं तत् परोक्षम्, संशय-विपर्यया ऽनध्यवसायानां तत्र संभवात्, इन्द्रिय-मनोनिमित्ताऽसिद्धा-ऽनैकान्तिक-विरुद्धानुमानाभासवत्, इति प्रथमः प्रयोगः; यदिन्द्रिय-मनोनिमित्तं ज्ञानं तत् परोक्षम्, तत्र निश्चयसंभवात्, धूमादेरग्न्याद्यनुमानवत्, इति द्वितीयः; यत् पुनः प्रत्यक्षं तत्र संशय-विपर्यया-ऽनध्यवसाय-निश्चया न भवन्त्येव, यथाऽवध्यादिषु, इति विपर्ययः। ननु निश्चयसंभवलक्षणो हेतुरवध्यादिष्वपि वर्तत

---

१ गाथा ९०। २ ख. 'मस्सा'। ३ इन्द्रिय-मनोनिमित्तं परोक्षमिह संशयादिभावात्। तत्कारणं परोक्षं यथेह साभासमनुमानम्॥ ९३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यनैकान्तिक इति चेत् । नैवम् , अभिप्रायाऽपरिज्ञानात्, संकेत-स्मरणादिपूर्वको हि निश्चयोऽत्र विवक्षितः, तादृशश्चाऽयमवध्यादिषु नास्ति, ज्ञानविशेषत्वात् तेषाम् , इत्यदोषः ॥ इति गाथार्थः ॥ ९३ ॥

तदेवमविशेषितमिन्द्रिय-मनोनिमित्तं ज्ञानं पक्षीकृत्य संशयादिसंभवहेतुद्वारेण परोक्षत्वं साधितम् । सांप्रतं विशेषत एव मति-श्रुते पक्षीकृत्य हेत्वन्तरेणापि तत् शिष्याधिगिषुराह—

[1]होन्ति परोक्खाइं मइ-सुयाइं जीवस्स परनिमित्ताओ । पुव्वोवलद्धसंबंधसरणाओ वाणुमाणं व ॥९४॥

मति-श्रुते जीवस्य परोक्षे, परनिमित्तत्वात् , पूर्वोपलब्धसंबन्धस्मरणद्वारेण जायमानत्वाद् वा, अनुमानवत् ॥ इति गाथार्थः॥९४॥

आह– नन्विन्द्रिय-मनोनिमित्तं ज्ञानं परोक्षमिति यदुक्तं तदुत्सूत्रमेव, यतः सूत्रे[2] प्रोक्तम्– " [3]पंचक्खं दुविहं पन्नत्तं, तं जहा– इन्दियपच्चक्खं च नोइंदियपच्चक्खं च" इति । सत्यम् , किन्तु येयमिन्द्रियजज्ञानस्य प्रत्यक्षता प्रोक्ता सा संव्यवहारमात्रत एव, परमार्थतस्तु परोक्षमेवेदम् । तथाच भाष्यकारो विषयविभागमुपदर्शयन्निदमेवाह—

[4]एगंतेण परोक्खं लिंगियमोहाइयं च पच्चक्खं । इंदिय-मणोभवं जं तं संववहारपच्चक्खं ॥ ९५ ॥

' एगंतेण परोक्खं लिंगियमिति ' बाह्ये धूमादौ लिङ्गे भवं लैङ्गिकं यज्ज्ञानं तदेकान्तेनाऽऽत्मन इन्द्रिय-मनसां [5]चाऽसाक्षात्कारेणोपजायमानत्वादेकान्तपरोक्षम्– इन्द्रिय-मनोभिर्गृहीते बाह्ये धूमादौ लिङ्गेऽन्यादिविषयं यज्ज्ञानमुत्पद्यते तदेकान्तेन परोक्षम् , इन्द्रिय-मनसामात्मनश्च तद्ग्राह्यार्थस्यैकान्तेन परोक्षत्वात्, इति भावः । ' ओहाइयं च पच्चक्खमिति ' 'एकान्तेन' इत्यत्राऽपि वर्तते, ततश्चाऽवधि-मनःपर्याय-केवललक्षणं ज्ञानत्रयमेकान्तेनाऽऽत्मनः प्रत्यक्षम् , बाह्यलिङ्गमन्तरेणेन्द्रिय-मनोनिरपेक्षत्वेन च जीवस्य वस्तुसाक्षात्कारित्वादिति । ' इंदियमणोभवमित्यादि ' यत्पुनरिन्द्रिय-मनोभवं ज्ञानं तत् संव्यवहारप्रत्यक्षम् , लिङ्गमन्तरेणैव यदिन्द्रिय-मनसां वस्तुसाक्षात्कारित्वेन ज्ञानमुपजायते तत् तेषां प्रत्यक्षत्वाल्लोकव्यवहारमात्रापेक्षया प्रत्यक्षमुच्यते, न परमार्थत इत्यर्थः, इन्द्रिय-मनःसु अचेतनत्वेन ज्ञानहेत्तेरभावादिति प्रागेवोक्तम् । एतामेव च संव्यवहारप्रत्यक्षतामपेक्ष्याऽऽगमेऽपीन्द्रियप्रत्यक्षमित्युक्तम् , परमार्थतस्त्ववध्यादिकमेव प्रत्यक्षम् , आत्मनः प्रत्यक्षत्वात् , इदं तु तस्य परोक्षम् , परनिमित्तत्वात्, अनुमानादिवत् , इत्यनेकधा प्रोक्तमेव ॥

---

१ भवतः परोक्षे मति-श्रुते जीवस्य परनिमित्तात् । पूर्वोपलब्धसंबन्धस्मरणाद् वाऽनुमानमिव ॥ ९४ ॥ + नन्ध्यध्ययने- ॥
२ नन्ध्यध्ययने । ३ प्रत्यक्षं द्विविधं प्रज्ञप्तम्, तद्यथा– इन्द्रियप्रत्यक्षं च नोइन्द्रियप्रत्यक्षं च । ५ वा- ॥
४ एकान्तेन परोक्षं लैङ्गिकमवध्यादिकं च प्रत्यक्षम् । इन्द्रिय-मनोभवं यत् तत् संव्यवहारप्रत्यक्षम् ॥ ९५ ॥

आह–ननु भाष्यकारेणाऽपि कुत एतल्लब्धं यदुत–इन्द्रियमनोभवं ज्ञानं संव्यवहारत एव प्रत्यक्षम् , न परमार्थतः ?; न ह्यत्र सूत्रे किमप्येवं विशेषतः प्रोक्तमस्ति ' इन्द्रियप्रत्यक्षम् ' इति सामान्येनैव निर्देशात् । सत्यम्, किन्तु प्रदेशान्तरे प्रोक्तम्–" [1]परोक्खं दुविहं पन्नत्तं, तं जहा– आभिणिबोहिअनाणं परोक्खं च, सुयनाणं परोक्खं च " इति । न चाऽऽभिनिबोधिक-श्रुताभ्यामन्यदिन्द्रियनिमित्तं ज्ञानमस्ति यत् परमार्थतः प्रत्यक्षं स्यादिति ॥

आह–यद्येवम्, तर्हि यल्लिङ्गमन्तरेणैव साक्षादिन्द्रियनिमित्तं ज्ञानमुत्पद्यते तत् परमार्थतः प्रत्यक्षमस्तु, यत्तु धूमादिलिङ्गादग्न्यादिविषयं लैङ्गिकं ज्ञानं तत् परोक्षस्वरूपे आभिनिबोधिक-श्रुते इष्यताम्, इत्यागमस्य प्रदेशद्वयोक्तमपि समर्थितं भवति । तदयुक्तम्, धूमादिलिङ्गादग्न्यादिविषयलैङ्गिकज्ञानस्येन्द्रियनिमित्तत्वाभावात्, इन्द्रियं हि प्रत्युत्पन्नकालमात्रभाव्येव वस्तु गृह्णाति, लिङ्गात् तु वह्न्यादिरर्थस्त्रिकालविषयोऽप्यनुमीयते । तस्माल्लैङ्गिकं ज्ञानं मनोनिमित्तमेव भवति, नेन्द्रियनिमित्तम्, इन्द्रिय-मनोनिमित्ते च मति-श्रुते अत्रैव वक्ष्येते, इति कथं केवलमनोविषयस्य लैङ्गिकज्ञानस्यैव मति-श्रुतरूपता स्यात् ? । किञ्च, इन्द्रियजज्ञानस्य मति-श्रुताभ्यां पार्थक्ये षष्ठज्ञानप्रसङ्गः स्यात् । तस्मादिन्द्रियजज्ञानस्य मति-श्रुतयोरेवाऽन्तर्भावः, तथा च सति मति-श्रुतयोः परोक्षत्वे तस्याऽपि पारमार्थिकं परोक्षत्वमेव, मनोनिमित्तस्यापि ज्ञानस्य परनिमित्तत्वादनुमानवत् परोक्षत्वं प्रागेवोक्तम् । न च वक्तव्यम्–आगमे तत् तस्य न क्वचिद् विशेषतोऽभिहितम्, यतो मति-श्रुतयोरागमे परोक्षत्वस्य विशेषतोऽभिधानात्, मनोनिमित्तस्याऽपि च ज्ञानस्य तदन्तःपातित्वादिन्द्रियजज्ञानस्येव परोक्षत्वं सिद्धमेव ॥

आह--ननु " इंदियपच्चक्खं च नोइंदियपच्चक्खं च " इत्यत्र मनोनिमित्तज्ञानस्य सिद्धान्ते प्रत्यक्षत्वमुक्तम्, यतो नोइन्द्रियं तत्र मन उच्यते, तस्येन्द्रियैकदेशवृत्तित्वात्, नोशब्दस्य चैकदेशवचनत्वात्; ततश्च नोइन्द्रियनिमित्तं प्रत्यक्षं नोइन्द्रियप्रत्यक्षमिति व्युत्पत्त्या मनोनिमित्तज्ञानस्य प्रत्यक्षतैव स्यात्, कथं परोक्षता ? इति । तदयुक्तम्, आगमार्थाऽपरिज्ञानात्, तत्र हि नोशब्दः सर्वनिषेधवचनः, ततश्चेन्द्रियाभाव एव नोइन्द्रियमुच्यते, तथा च सति नोइन्द्रियेणेन्द्रियाभावेनाऽऽत्मनः प्रत्यक्षं नोइन्द्रियप्रत्यक्षमिति समासः, सर्वथेन्द्रियप्रवृत्तिरहितानि चाऽऽत्मनः प्रत्यक्षाण्यवधि-मनःपर्याय-केवलान्येव भवन्ति, न पुनर्मनोनिमित्तं ज्ञानम् । यदि पुनर्नोइन्द्रियं तत्र मनो व्याख्यायेत, तदा नोइन्द्रियनिमित्तं प्रत्यक्षमिति मनोनिमित्तमेवाऽवध्यादि ज्ञानं प्रत्यक्षं स्यात्, तथा च सति मनःपर्याप्त्याऽपर्याप्तस्य मनुष्य-देवादेरवधिज्ञानं न स्यात्, मनसोऽभावात्, तच्चाऽयुक्तम्, "[2]चुएमि त्ति जाणइ" इति वचनेन सिद्धान्ते तस्याऽवधिज्ञानाभ्युपगमा-

---

१ नन्दीसूत्रस्येति गम्यते । २ परोक्षं द्विविधं प्रज्ञप्तम्, तद्यथा– आभिनिबोधिकज्ञानं परोक्षं च श्रुतज्ञानं परोक्षं च । ३ च्यवे इति जानाति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त् । किंच, सिद्धानामपि प्रत्यक्षज्ञानाभावः स्यात्, अमनस्कत्वात् तेषाम् । अपरं च, मनोनिमित्तं ज्ञानं मनोद्रव्यद्वारेणैव जायते; ततश्च परनिमित्तत्वादनुमानवत् परोक्षमेव तत् कथं प्रत्यक्षं स्यात् ?। किञ्च, यद्येतत् परमार्थतः प्रत्यक्षं स्यात् तदा परोक्षत्वेनोक्तयोर्मति-श्रुतयोर्नान्तर्भवेत्, ततश्च मतेरष्टाविंशतिभेदभिन्नत्वं न स्यात्, मनोज्ञानसंबन्धिनामवग्रहादिभेदानां पार्थक्यप्रसङ्गात्, तत्पार्थक्ये षष्ठज्ञानाऽऽपत्तिश्च स्यादिति । तस्मादिन्द्रिय-मनोभवं ज्ञानं परनिमित्तत्वात् परोक्षम्, मति-श्रुतान्तर्भावाच्च परमार्थतः परोक्षम्; संव्यवहारतस्तु प्रत्यक्षमिति स्थितम् ॥ इति गाथार्थः ॥ ९५ ॥

तदेवं ज्ञानपञ्चके यत् प्रत्यक्षं यच्च परोक्षं तद् दर्शितम्, साम्प्रतं " 'जं सामि-काल-कारण-विसय-परोक्खत्तणेहिं तुल्लाइं " इति यदुक्तं प्राक्, तदुपजीव्य परः प्राह—

सामित्ताइविसेसाभावाओ मइसुएगया नाम । लक्खण-भेआदिकयं नाणत्तं तयविसेसे वि ॥ ९६ ॥

परः प्राह– ननु पूर्वं मति-श्रुतयोः स्वामि-कालादिभिस्तुल्यत्वमभिदधानैर्भवद्भिः स्वहस्ताङ्काराकर्षणमनुष्ठितम्, यत एवं सति स्वामित्वादिभिर्विशेषाभावाद् मति-श्रुतयोरेकतैव प्राप्ता, न भेदः स्यात्; तथा च न ज्ञानपञ्चकसिद्धिः, धर्मभेदे हि वस्तूनां भेदः स्यात्; तदभेदे तु घट-तत्स्वरूपयोरिवाऽभेद एव श्रेयानिति भावः । अत्राऽऽचार्यः प्रत्युत्तरमाह-- ' लक्खणेत्यादि ' तेषां स्वामित्वादीनामविशेषस्तदविशेषस्तत्र सत्यपि मति-श्रुतयोर्नानात्वं भिन्नत्वमस्ति । किंकृतम् ?, इत्याह– लक्षणभेदादिकृतं, आदिशब्दाद् वक्ष्यमाणकार्यकारणभावादिपरिग्रहः, इदमुक्तं भवति– यद्यपि स्वामि-कालादिभिर्मतिश्रुतयोरेकत्वम्, तथापि लक्षण-कार्यकारणभावादिभिर्नानात्वमस्त्येव, घटाकाशादीनामपि हि सत्त्व-प्रमेयत्वा-ऽर्थक्रियाकारित्वादिभिः साम्येऽपि लक्षणादिभेदाद् भेद एव । यदि पुनर्बहुभिर्धर्मैर्भेदे सत्यपि किञ्चिद्धर्मसाम्यमात्रादेवाऽर्थानामेकत्वं प्रेर्यते, तदा सर्वं विश्वमेकं स्यात्, किं हि नाम तद् वस्त्वस्ति यस्य वस्त्वन्तरैः सह कैश्चिद् धर्मैर्न साम्यमस्ति ?। तस्मात् स्वाम्यादिभिस्तुल्यत्वेऽपि लक्षणादिभिर्मति-श्रुतयोर्भेदः ॥ इति गाथार्थः ॥ ९६ ॥

तान्येव लक्षणादीनि पुरतो विस्ताराभिधेयात् संपिण्डयैकगाथया दर्शयति—

लक्खणभेआ हेऊफलभावओ भेयइन्दियविभागा । वाग-क्खर-मूए-यरभेआ भेओ मइ-सुयाणं ॥ ९७ ॥

लक्षणभेदाद् भिन्नलक्षणत्वाद् मति-श्रुतयोर्भेदः । तथा मतिज्ञानं हेतुः, श्रुतं तु तत्फलं तत्कार्यम्; इति हेतुफलभावात् तयो-

---

१ गाथा ८५ । २ स्वामित्वादिविशेषाभावाद् मति-श्रुतैकता नाम । लक्षण-भेदादिकृतं नानात्वं तदविशेषेऽपि ॥ ९६ ॥ + ज -॥

३ लक्षणभेदाद् हेतुफलभावाद् भेदेन्द्रियविभागात् । वल्काक्षरमूकेतरभेदाद् भेदो मति-श्रुतयोः ॥ ९७ ॥

र्भेदः । तथा ' भेअ त्ति ' विभागशब्दोऽत्रापि योज्यते, ततश्च भेदानां विभागो विशेषो भिन्नत्वं भेदविभागः, तस्मादपि मति-श्रुतयोर्भेदः, अवग्रहादिभेदादष्टाविंशत्यादिभेदं हि मतिज्ञानं वक्ष्यते ' अक्खर सन्नी सम्मं ' इत्यादि वक्ष्यमाणवचनाच्चतुर्दशादिभेदं च श्रुतज्ञानम्, इति भेदविभागात् तयोर्भेद इति भावः । ' इंदियविभाग त्ति ' तत्त्वतः श्रोत्रविषयमेव श्रुतज्ञानम्, शेषेन्द्रियविषयमपि मतिज्ञानम्, इत्येवं वक्ष्यमाणादिन्द्रियविभागाच्च तयोर्भेदः । 'वागेत्यादि' वल्कश्चाऽक्षरं च मूकं च वल्कादिप्रतिपक्षभूतानीतराणि च वल्का-ऽक्षर-मूकेतराणि तैर्योऽसौ भेदस्तस्मादपि मति-श्रुतयोर्भेद इत्यर्थः, तथाहि-- " अन्ने मग्गंति मई वग्गसमा सुंवसरिसयं तु सुत्तं " इत्यादिना ग्रन्थेन कारणत्वाद् वल्कसदृशं मतिज्ञानं, सुंवसदृशं तु श्रुतज्ञानं कार्यत्वादित्यत्रैव वक्ष्यते । तत्र वल्कः पलाशादित्वग्रूपः, शुम्बं त्वितरशब्देनेहोपात्तं तज्जनिता दवरिकोच्यते । ततश्चायमभिप्रायः– यथा वलनादिसंस्कृतो विशिष्टावस्थापन्नः सन् वल्को ' दवरिका ' इत्युच्यते, तथा परोपदेशार्हद्वचनसंस्कृतं विशिष्टावस्थाप्राप्तं सद् मतिज्ञानं श्रुतमभिधीयते, इत्येवं वल्केतरभेदाद् मति-श्रुतयोर्भेदः । तथा–

' अन्ने अणक्खर-क्खरविसेसओ मइ-सुयाइं भिन्दन्ति । जं मइनाणमणक्खरमक्खरमियरं च सुयनाणं ' ॥ १ ॥

इत्यादिग्रन्थेन वक्ष्यमाणादक्षरेतरभेदात् तयोर्भेदः । तथा–

' सँपरप्पचायणओ भेओ मूये-यराण वाऽभिहिओ । जं सुयं मइनाणं सपरप्पचायगं सुत्तं ' ॥ १ ॥

इत्याद्यभिधास्यमानवचनाद् मूकेतरभेदाद् मति-श्रुतयोर्भेदः । इति गाथासंक्षेपार्थः, विस्तरार्थं तु भाष्यकारः स्वत एव वक्ष्यति । इयं च गाथा बहुष्वादर्शेषु न दृश्यते, केवलं क्वचिदादर्शेऽपि दृष्टा, अतीव सोपयोगा च, इत्यस्माभिः किञ्चिद् व्याख्यातेति ॥ ९७ ॥

तत्र "यथोद्देशं निर्देशः " इति कृत्वा लक्षणभेदं तावदाह–

जमभिनिबुज्झइ तमभिनिबोहो जं सुणइ तं सुयं भणियं । सद्दं सुणइ जइ तओ नाणं तो नाऽऽयभावो तं ॥ ९८ ॥

यज्ज्ञानं कर्तृ, वस्तु कर्मताऽऽपन्नमभिनिबुध्यतेऽवगच्छति तज्ज्ञानमभिनिबोधस्तदाभिनिबोधिकं तद् मतिज्ञानमिति यावत्, 'जं सुणईत्यादि' यत् पुनर्जीवः शृणोति तच्छ्रुतम्, इत्येवं सूत्रोक्तलक्षणभेदाद् मति–श्रुतयोर्भेदः । तथा च सूत्रम्–"जइ वि सामित्ताईहिं अविसेसो, तह वि पुणोऽत्थाऽऽयरिआ नाणत्तं पण्णवयंति, तं जहा– अभिनिबुज्झइ त्ति आभिणिबोहियं, सुणेइ त्ति सुयं "

---

१ अक्षरं संज्ञि सम्यक् । २ गाथा १५४ । ३ गाथा १६२ । ४ गाथा १७१ ।

५ यदभिनिबुध्यते तदभिनिबोधः, यत् शृणोति तत् श्रुतं भणितम् । शब्दं शृणोति यदि सको ज्ञानं ततो नात्मभावस्तत् ॥ ९८ ॥

६ यद्यपि स्वामित्वादिभिरविशेषः, तथापि पुनरत्राऽऽचार्या नानात्वं प्रज्ञपयन्ति, तद्यथा– अभिनिबुध्यते इत्याभिनिबोधिकम्, शृणोतीति श्रुतम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादि । अत्राह प्रेरकः– यदि नाम यदाऽऽत्मा शृणोति तच्छ्रुतमिति श्रुतज्ञानस्य लक्षणमुच्यते, हन्त ! तर्हि शब्दमेव शृणोति जीव इति सकलजगत्प्रतीतमेव । ततः किं क्षूयते ?, इत्याह– 'जइ तओ इत्यादि' यदि च सकः स शब्दो ज्ञानं श्रुतरूपम्, 'तो त्ति' ततो नात्मनो जीवस्य भावः परिणामस्तच्छ्रुतं प्राप्नोति, शब्दस्य श्रुतत्वेनेष्टत्वात्, तस्य च पौद्गलिकत्वेन मूर्तत्वात् (आत्मनस्त्वमूर्तत्वात्,) मूर्तस्य चामूर्तपरिणामत्वायोगात्, आत्मनः परिणामश्च श्रुतज्ञानमिष्यते तीर्थकरादिभिः, इति कथं न विरोधः ? इति भावः ॥ इति गाथार्थः ॥९८॥

अत्राचार्यः प्रत्युत्तरयति–

सुयकारणं जओ सो सुयं च तक्कारणं ति तो तम्मि । कीरइ सुओवयारो सुयं तु परमत्थओ जीवो ॥९९॥[1]

यतो यस्मात् कारणात् स शब्दो वक्त्राऽभिधीयमानः श्रोतृगतस्य श्रुतज्ञानस्य कारणं निमित्तं भवति, श्रुतं च वक्तृगतश्रुतोपयोगरूपं व्याख्यानकरणादौ तस्य वक्त्राऽभिधीयमानस्य शब्दस्य कारणं जायते, इत्यतस्तस्मिन् श्रुतज्ञानस्य कारणभूते कार्यभूते वा शब्दे श्रुतोपचारः क्रियते । ततो न परमार्थतः शब्दः श्रुतम्, किन्तूपचारत इत्यदोषः । परमार्थतस्तर्हि किं श्रुतम् ?, इत्याह–'सुयं त्वित्यादि' परमार्थतस्तु जीवः श्रुतम्, ज्ञान-ज्ञानिनोरनन्यभूतत्वात् । तथा च पूर्वमभिहितम्– शृणोतीति श्रुतमात्मैवेति । तस्मात् श्रूयत इति श्रुतमिति कर्मसाधनपक्षे द्रव्यश्रुतमेवाभिधीयते, शृणोतीति श्रुतमिति; कर्तृसाधनपक्षे तु भावश्रुतमात्मैव; इति न काचिदनात्मभावता श्रुतज्ञानस्य ॥ इति गाथार्थः ॥ ९९ ॥

अथ प्रकारान्तरेणापि मति-श्रुतयोर्लक्षणभेदमाह–

इंदिय-मणोनिमित्तं जं विण्णाणं सुयाणुसारेणं । नियतत्थुत्तिसमत्थं तं भावसुयं मई सेसं ॥ १०० ॥[2]

इन्द्रियाणि च स्पर्शनादीनि मनश्च, इन्द्रिय-मनांसि, तानि निमित्तं यस्य तदिन्द्रियमनोनिमित्तम्, इन्द्रिय-मनोद्वारेण यद् विज्ञानमुपजायत इत्यर्थः । तत् किम् ?, इत्याह– तद् भावश्रुतं श्रुतज्ञानमित्यर्थः । इन्द्रिय-मनोनिमित्तं च मतिज्ञानमपि भवति, अतस्तद्व्यवच्छेदार्थमाह– 'श्रुतानुसारेणेति' श्रूयत इति श्रुतं द्रव्यश्रुतरूपं शब्द इत्यर्थः, स च संकेतविषयपरोपदेशरूपः, श्रुतग्रन्थात्मकश्चेह गृह्यते, तदनुसारेणैव यदुत्पद्यते तत् श्रुतज्ञानम्, नान्यत् । इदमुक्तं भवति– संकेतकालप्रवृत्तं श्रुतग्रन्थसंबन्धिनं वा घटादिशब्दमनुसृत्य वाच्यवाचकभावेन

१ श्रुतकारणं यतः स श्रुतं च तत्कारणमिति ततस्तस्मिन् । क्रियते श्रुतोपचारः श्रुतं तु परमार्थतो जीवः ॥ ९९ ॥

२ इन्द्रिय-मनोनिमित्तं यद् विज्ञानं श्रुतानुसारेण । निजकार्थोक्तिसमर्थं तद् भावश्रुतं मतिः शेषम् ॥ १०० ॥

संयोज्य 'घटो घटः' इत्याद्यन्तर्जल्पाकारमन्तःशब्दोल्लेखान्वितमिन्द्रियादिनिमित्तं यज्ज्ञानमुदेति तच्छ्रुतज्ञानमिति । तच्च कथंभूतम् ?, इत्याह– 'निजकाऽर्थोक्तिसमर्थमिति' निजकः स्वस्मिन् प्रतिभासमानो योऽसौ घटादिरर्थस्तस्योक्तिः परस्मै प्रतिपादनं तत्र समर्थं क्षमं निजकाऽर्थोक्तिसमर्थम्, अयमिह भावार्थः– शब्दोल्लेखसहितं विज्ञानमुत्पन्नं स्वप्रतिभासमानार्थप्रतिपादकं शब्दं जनयति, तेन च परः प्रत्याय्यते, इत्येवं निजकाऽर्थोक्तिसमर्थमिदं भवति, अभिलाप्यवस्तुविषयमिति यावत् । स्वरूपविशेषणं चैतत्, शब्दानुसारेणोत्पन्नज्ञानस्य निजकार्थोक्तिसामर्थ्याऽव्यभिचारादिति । 'मई सेसं ति' शेषमिन्द्रिय-मनोनिमित्तमश्रुतानुसारेण यदवग्रहादिज्ञानं, तद् मतिज्ञानमित्यर्थः ॥

अत्राह कश्चित्– ननु यदि शब्दोल्लेखसहितं श्रुतज्ञानमिष्यते, शेषं तु मतिज्ञानम्, तदा वक्ष्यमाणस्वरूपोऽवग्रह एव मतिज्ञानं स्यात्, न पुनरीहा-ऽपायादयः, तेषां शब्दोल्लेखसहितत्वात्; मतिज्ञानभेदत्वेन चैते प्रसिद्धाः, तत् कथं श्रुतज्ञानलक्षणस्य नाऽतिव्याप्तिदोषः ?, कथं च न मतिज्ञानस्याव्याप्तिप्रसङ्गः ?। अपरं च, अङ्गा-ऽनङ्गप्रविष्टादिषु "अक्खर सन्नी सम्मं साइअं खलु सपज्जवसियं च" इत्यादिषु च श्रुतभेदेषु मतिज्ञानभेदस्वरूपाणामवग्रहे-हादीनां सद्भावात् सर्वस्यापि तस्य मतिज्ञानत्वप्रसङ्गात्, मतिज्ञानभेदानां चेहा–ऽपायादीनां साभिलापत्वेन श्रुतज्ञानत्वप्राप्तेरुभयलक्षणसंकीर्णतादोषश्च स्यात् ॥ अत्रोच्यते–यत् तावदुक्तम्– अवग्रह एव मतिज्ञानं स्यात्, न त्वीहादयः, तेषां शब्दोल्लेखसहितत्वात् । तदयुक्तम्, यतो यद्यपीहादयः साभिलाषाः, तथापि न तेषां श्रुतरूपता, श्रुतानुसारिण एव साभिलापज्ञानस्य श्रुतत्वात् । अथाऽवग्रहादयः श्रुतानिश्रिता एव सिद्धान्ते प्रोक्ताः, युक्तितोऽपि चेहादिषु शब्दाभिलापः सङ्केतकालाद्याकर्णितशब्दानुसरणमन्तरेण न सङ्गच्छते, अतः कथं न तेषां श्रुतानुसारित्वम् ?। तदयुक्तम्, पूर्वं श्रुतपरिकर्मितमतेरेवैते समुपजायन्त इति श्रुतनिश्रिता उच्यन्ते, न पुनर्व्यवहारकाले श्रुतानुसारित्वमेतेष्वस्ति, वक्ष्यते च– 'पुव्वं सुयपरिकम्मियमइस्स जं संपयं सुयाईयं, तं सुयनिस्सियं' इत्यादि । यदपि युक्तितोऽपि चेत्याद्युक्तम्, तदपि न समीचीनम्, संकेतकालाद्याकर्णितशब्दपरिकर्मितबुद्धीनां व्यवहारकाले तदनुसरणमन्तरेणाऽपि विकल्पपरम्परापूर्वकविविधवचनप्रवृत्तिदर्शनात्, न हि पूर्वप्रवृत्तसंकेताः, अधीतश्रुतग्रन्थाश्च व्यवहारकाले प्रतिविकल्पन्ते– एतच्छब्दवाच्यत्वेनैतत्पूर्वं मयाऽवगतमित्येवंरूपं संकेतम्, तथाऽमुकस्मिन् ग्रन्थे एतदित्थमभिहितमित्येवं श्रुतग्रन्थं चाऽनुसरन्तो दृश्यन्ते, अभ्यासपाटववशात् तदनुसरणमन्तरेणाऽप्यनवरतं विकल्पभाषणप्रवृत्तेः । यत्र तु श्रुतानुसारित्वं तत्र श्रुतरूपताऽस्माभिरपि न निषिध्यते । तस्मात् श्रुतानुसारित्वाभावेन श्रुतत्वाभावादीहा–ऽपाय-धारणानां सामस्त्येन मतिज्ञानत्वाद् न मतिज्ञानलक्षणस्याऽव्याप्तिदोषः, श्रुतरूपतायाश्च श्रुतानुसारिष्वेव साभिलापज्ञानविशेषेषु भावाद् न श्रुतज्ञानलक्षणस्याऽतिव्याप्तिकृतो दोषः । अपरं चाङ्गा-ऽनङ्गप्रविष्टादिश्रुतभेदेषु मतिपूर्वमेव श्रुतमिति वक्ष्यमाणवचनात् प्रथमं शब्दाद्यवग्रहणकालेऽवग्रहादयः समुपजायन्ते, एते

१ ख. घ. छ 'नुसारिणो ज्ञा' । २ अक्षरं सांज्ञि सम्यक् सादिकं खलु सपर्यवसितं च । ३ पूर्वं श्रुतपरिकर्मितमतेर्यत् सांप्रतं श्रुतातीतम्, तत् श्रुतनिश्रितम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चाऽश्रुतानुसारित्वाद् मतिज्ञानम्, यस्तु तेष्वङ्गा-ऽनङ्गप्रविष्टश्रुतभेदेषु श्रुतानुसारी ज्ञानविशेषः स श्रुतज्ञानम्। ततश्चाङ्गा-ऽनङ्गप्रविष्टादिश्रुतभेदानां सामस्त्येन मतिज्ञानत्वाभावात्, ईहादिषु च मतिभेदेषु श्रुतानुसारित्वाभावेन श्रुतज्ञानत्वासंभवाद् नोभयलक्षणसंकीर्णतादोषोऽप्युपपद्यत इति सर्वं सुस्थम्। न चेह मति-श्रुतयोः परमाणु-करिणोरिवाऽत्यन्तिको भेदः समन्वेषणीयः, यतः प्रागेवोक्तम्– विशिष्टः कश्चिद् मतिविशेष एव श्रुतम्, पुरस्तादपि च वक्ष्यते– वल्कसदृशं मतिज्ञानं तज्जनितदवरिकारूपं श्रुतज्ञानम्, न च वल्क-शुम्बयोः परमाणु-कुञ्जरवदात्यन्तिको भेदः, किन्तु कारणकार्यभावकृत एव, स चेहापि विद्यते, मतेः कारणत्वेन, श्रुतस्य तु कार्यत्वेनाऽभिधास्यमानत्वात्। न च कारण-कार्ययोरैकान्तिको भेदः; कनककुण्डलादिषु, मृत्पिण्डकुण्डादिषु च तथाऽदर्शनात्। तस्मादवग्रहापेक्षयाऽनभिलापत्वात्, ईहाद्यपेक्षया तु साभिलापत्वात् साभिलापा-ऽनभिलापं मतिज्ञानम्, अश्रुतानुसारि च; संकेतकालप्रवृत्तस्य श्रुतग्रन्थसंबन्धिनो वा शब्दस्य व्यवहारकालेऽननुसरणात्। श्रुतज्ञानं तु साभिलापमेव, श्रुतानुसारेव च, संकेतकालप्रवृत्तस्य श्रुतग्रन्थसंबन्धिनो वा शब्दरूपस्य श्रुतस्य व्यवहारकालेऽवश्यमनुसरणादिति स्थितम्॥ इति गाथार्थः॥ १००॥

अथ श्रुतज्ञानलक्षणस्याऽव्याप्तिदोषमुद्भावयन्नाह परः–

[1]जइ सुयलक्खणमेयं तो न तमेगिंदियाण संभवइ। दव्वसुयाणुभावम्मि वि भावसुयं सुत्तजइणो व्व॥१०१॥

यदि श्रुतज्ञानस्येदमनन्तरगाथोक्तं लक्षणमिष्यते– श्रुतानुसारि ज्ञानं यदि श्रुतमभ्युपगम्यत इत्यर्थः, तदा तदेकेन्द्रियाणां न सम्भवति न घटते, शब्दानुसारित्वस्य तेष्वसम्भवात्; तदसम्भवश्च मनःप्रभृतिसामग्र्यभावात्, इष्यते चाऽऽगमे "एगिन्दिया नियमं दुयन्नाणी, तं जहा–मइअन्नाणी य सुयअन्नाणी य" इति वचनादेकेन्द्रियाणामपि श्रुतमात्रम्, इत्यव्यापकमेवैतद् लक्षणम्। अत्रोत्तरमाह–'दव्वसुयेत्यादि' द्रव्यश्रुतं शब्दस्तस्याऽभावेऽप्येकेन्द्रियाणां भावश्रुतमभ्युपगन्तव्यम्, सुप्तयतेरिवः इदमुक्तं भवति–यद्यप्येकेन्द्रियाणां कारणवैकल्याद् द्रव्यश्रुतं नास्ति, तथापि स्वापाद्यवस्थायां साध्वादेरिवाऽशब्दकारणं, अशब्दकार्यं च श्रुतावरणक्षयोपशममात्ररूपं भावश्रुतं केवलिदृष्टममीषां मन्तव्यम्; न हि स्वापाद्यवस्थायां साध्वादिः शब्दं न शृणोति, न विकल्पयतीत्येतावन्मात्रेण तस्य श्रुतज्ञानाभावो व्यवस्थाप्यते, किन्तु स्वापाद्यवस्थोत्तरकालं व्यक्तीभवद् भावश्रुतं दृष्ट्वा पयसि सर्पिरिव प्रागपि तस्य तदासीदिति व्यवह्रियते, एवमेकेन्द्रियाणामपि सामग्रीवैकल्याद् यद्यपि द्रव्यश्रुताभावः, तथाऽप्यावरणक्षयोपशमरूपं भावश्रुतमवसेयम्, परमयोगिभिर्दृष्ट-

---

१ यदि श्रुतलक्षणमेतत् ततो न सदेकेन्द्रियाणां संभवति। द्रव्यश्रुताभावेऽपि भावश्रुतं सुप्तयतेरिव॥ १०१॥

२ एकेन्द्रिया नियमतो अज्ञानाः, तद्यथा–मत्यज्ञानाश्च श्रुताज्ञानाश्च।

त्वाद्, वल्ल्यादिष्वाहार-भय-परिग्रह-मैथुनसंज्ञादेस्तल्लिङ्गस्य दर्शनाच्चेति॥

आह– ननु सुप्तयतिलक्षणदृष्टान्तेऽपि तावद् भावश्रुतं नावगच्छामः, तथाहि– श्रुतोपयोगपरिणत आत्मा शृणोतीति श्रुतम्, श्रूयते तदिति वा श्रुतमित्यनयोर्मध्ये कया व्युत्पत्त्या सुप्तसाधोः श्रुतमभ्युपगम्यते?। तत्राद्यः पक्षो न युक्तः, सुप्तस्य श्रुतोपयोगाऽसंभवात्। द्वितीयोऽपि न संगतः, तत्र शब्दस्य वाच्यत्वात्, तस्याऽपि च स्वपतोऽसंभवादिति। सत्यम्, किन्तु शृणोत्यनेन, अस्माद्, अस्मिन् वेति व्युत्पत्तिरिहाश्रीयते, एवं च श्रुतज्ञानावरणक्षयोपशमो वाच्यः संपद्यते, स च सुप्तयतेः, एकेन्द्रियाणां चाऽस्तीति न किञ्चित् परिहीयते॥ इति गाथार्थः॥ १०१॥

अथ दृष्टान्त-दार्ष्टान्तिकयोर्वैषम्याऽऽपादनेनैकेन्द्रियाणां श्रुतसद्भावं विघटयन्नाह–

[2]भावसुयं भासा-सोयलद्धिणो जुज्जए न इयरस्स। भासाभिमुहस्स जयं सोऊण य जं हवेज्जाहि॥१०२॥

भावश्रुतं युज्यत इति संबन्धः। कस्य युज्यते?, इत्याह– भाषा-श्रोत्रलब्धिमतः भाषालब्धिमतः, श्रवणेन्द्रियलब्धिमतश्चेत्यर्थः। कथंभूतं यद्भावश्रुतम्?, इत्याह– भाषाभिमुखस्य शब्दमभिधित्सोः 'प्रथममेव मध्ये एतत् प्रतिपादयामि' इत्युपयोगरूपं यद् भवेत्, श्रुत्वा वा परोदीरितां भाषां यद् भवेत् 'एतदनेन प्रतिपादितम्' इतिः इह च यथासंख्यमवगन्तव्यम्– भाषालब्धिमतः प्रथमं भवेत्, श्रवणेन्द्रियलब्धिमतस्तु द्वितीयं भवेदिति। 'न इयरस्स त्ति' इतरस्य तु भाषा-श्रोत्रलब्धिरहितस्य भावश्रुतं न युज्यते, अयमभिप्रायः– यस्य सुप्तसाधोर्भाषा-श्रोत्रलब्धिरस्ति, तस्योत्थितस्य परप्रतिपादन-परोदीरितशब्दश्रवणादिलक्षणं भावश्रुतकार्यं दृश्यते, तदर्शनाच्च सुप्तावस्थायामपि तस्य लब्धिरूपतया तदाऽऽसीदित्यनुमीयते, यस्य त्वेकेन्द्रियस्य भाषा-श्रोत्रलब्धिरहितत्वेन कदाचिदपि भावश्रुतकार्यं नोपलभ्यते, तस्य कथं तदस्तीति प्रतीयेत?॥ इति गाथार्थः॥ १०२॥

अत्रोत्तरमाह—

[3]जेह सुहुमं भावेंदियनाणं दव्विंदियावरोहे वि। तह दव्वसुयाभावे भावसुयं पत्थिवाईणं॥ १०३॥

इह केवलिनो विहाय शेषसंसारिजीवानां सर्वेषामप्यतिस्तोक-बहु-बहुतर-बहुतमादितारतम्यभावेन द्रव्येन्द्रियेष्वसत्स्वपि लब्धीन्द्रियपञ्चकावरणक्षयोपशमः समस्त्येवेति परममुनिवचनम्। ततश्च यथा येन प्रकारेण पृथिव्यादीनामेकेन्द्रियाणां श्रोत्र-चक्षु र्घ्राण-

---

१ भावश्रुतं भाषा-श्रोत्रलब्धिमतो युज्यते नेतरस्य। भाषाभिमुखस्य यत् श्रुत्वा च यद् भवेताम्॥ १०२॥

२ यथा सूक्ष्मं भावेन्द्रियज्ञानं द्रव्येन्द्रियावरोधेऽपि। तथा द्रव्यश्रुताभावे भावश्रुतं पृथ्व्यादीनाम्॥ १०३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रसनलक्षणानां प्रत्येकं निर्वृत्त्यु-पकरणरूपाणां द्रव्येन्द्रियाणां तत्प्रतिबन्धककर्मोदयतत्क्षयोपशमविशेषेऽप्यभावेऽपि सूक्ष्ममव्यक्तं लब्ध्युपयोगरूपं श्रोत्रादिभावेन्द्रियज्ञानं भवति, लब्धीन्द्रियावरणक्षयोपशमसंभूताऽणीयसी ज्ञानशक्तिर्भवतीत्यर्थः। तथा तेनैव प्रकारेण द्रव्यश्रुतस्य द्रव्येन्द्रियस्थानीयस्याऽभावेऽपि भावश्रुतं भावेन्द्रियज्ञानकल्पं पृथिव्यादीनां भवतीति प्रतिपत्तव्यमेव। इदमुक्तं भवति-एकेन्द्रियाणां तावच्छ्रोत्रादिद्रव्येन्द्रियाभावेऽपि भावेन्द्रियज्ञानं किञ्चिद् दृश्यत एव, वनस्पत्यादिषु स्पष्टतल्लिङ्गोपलम्भात्, तथाहि-कलकण्ठोद्गीर्णमधुरपञ्चमोद्गारश्रवणात् सद्यः कुसुम-पल्लवादिप्रसवो विरहकवृक्षादिषु श्रवणेन्द्रियज्ञानस्य व्यक्तं लिङ्गमवलोक्यते। तिलकादितरुषु पुनः कमनीयकामिनीकमलदलदीर्घशरादिन्दुधवललोचनकटाक्षविक्षेपात् कुसुमाद्याविर्भावश्चक्षुरिन्द्रियज्ञानस्य, चम्पकाद्यंहिपेषु तु विविधसुगन्धिगन्धवस्तुनिकुरम्बोन्मिश्रविमलशीतलसलिलसेकात् तत्प्रकटनं घ्राणेन्द्रियज्ञानस्य, बकुलादिभूरुहेषु तु रम्भातिशायिप्रवररूपवरतरुणभामिनीमुखप्रदत्तस्वच्छसुस्वादुसुराभिवारुणीगण्डूषास्वादनात् तदाविष्करणं रसनेन्द्रियज्ञानस्य, कुरबकादिविटपिष्वशोकादिद्रुमेषु च घनपीनोन्नतकठिनकुचकुम्भविभ्रमापभ्राजितकुम्भीनकुम्भरणन्मणिवलयक्वणत्कङ्कणाभरणभूषितभव्यभामिनीभुजलताऽवगूहनसुखाद् निष्पिष्टप्रवरागचूर्णशोणतलतत्पादकमलपार्ष्णिप्रहाराच्च झगिति प्रसून-पल्लवादिप्रभवः स्पर्शनेन्द्रियज्ञानस्य स्पष्टं लिङ्गमभिवीक्ष्यते। ततश्च यथैतेषु द्रव्येन्द्रियासत्त्वेऽप्येतद् भावेन्द्रियजन्यं ज्ञानं सकलजनप्रसिद्धमस्ति, तथा द्रव्यश्रुताभावे भावश्रुतमपि भविष्यति। दृश्यते हि जलाद्याहारोपजीवनाद् वनस्पत्यादीनामाहारसंज्ञा, संकोचनवल्ल्यादीनां तु हस्तस्पर्शादिभीत्याऽवयवसंकोचनादिभ्यो भयसंज्ञा, विरहक-तिलक-चम्पक-केशरा-ऽशोकादीनां तु मैथुनसंज्ञा दर्शितैव, बिल्वपलाशादीनां तु निधानीकृतद्रविणोपरिपादमोचनादिभ्यः परिग्रहसंज्ञा। न चैताः संज्ञा भावश्रुतमन्तरेणोपपद्यन्ते। तस्माद् भावेन्द्रियपञ्चकावरणक्षयोपशमाद् भावेन्द्रियपञ्चकज्ञानवद् भावश्रुतावरणक्षयोपशमसद्भावाद् द्रव्यश्रुताभावेऽपि यच्च यावच्च भावश्रुतमस्त्येवैकेन्द्रियाणाम्, इत्यलं विस्तरेण। तर्हि '[2]जं विण्णाणं सुयाणुसारेणं' इति श्रुतज्ञानलक्षणं व्यभिचारि प्राप्नोति, श्रुतानुसारित्वमन्तरेणाप्येकेन्द्रियाणां भावश्रुताभ्युपगमादिति चेत्। नैवम्, अभिप्रायाऽपरिज्ञानात्, शब्दोल्लेखसहितं विशिष्टमेव भावश्रुतमाश्रित्य तल्लक्षणमुक्तम्, यच्चैकेन्द्रियाणामौघिकमविशिष्टभावश्रुतमात्रं तदावरणक्षयोपशमस्वरूपम्, तच्छ्रुतानुसारित्वमन्तरेणापि यदि भवति, तथापि न कश्चिद् व्यभिचारः॥ इति गाथार्थः॥ १०३॥

पुनरप्याह परः—

[3]एवं सव्वपसंगो, न तदावरणाणमक्खओवसमा। मइ-सुयनाणावरणक्खओवसमओ मइ-सुयाइं॥१०४॥

+नि। १ क. ग. घ. छ. 'यज्ञानं'। २ गाथा १००। ३ एवं सर्वप्रसङ्गः, न तदावरणानामक्षयोपशमात्। मति-श्रुतज्ञानावरणक्षयोपशमतो मति-श्रुते॥ १०४॥

यदि भाषा-श्रोत्रलब्धिरहितानामपि काष्ठकल्पानां पृथिव्याद्येकेन्द्रियाणां स्पष्टं किमप्यनुपलभ्यमानमपि केनापि वागाडम्बरमात्रेण ज्ञानं व्यवस्थाप्यते, तर्हि सर्वेषामपि केवलज्ञानपर्यन्तानां पञ्चानामपि ज्ञानानां प्रसङ्गः सद्भावस्तेषां प्राप्नोतीत्यर्थः-- पञ्चापि ज्ञानान्येकेन्द्रियाणां सन्ति, इत्येतदपि कस्माद् नोच्यते?, स्पष्टानुपलम्भस्य विशेषाभावादिति भावः। अत्रोत्तरमाह-तदेतन्न। कुतः?, इत्याह-तदावरणानामवधि-मनःपर्याय-केवलज्ञानावारककर्मणामक्षयोपशमादिति, अक्षयाच्चेति स्वयमपि द्रष्टव्यम्; इदमुक्तं भवति-केवलज्ञानं तावत् स्वाऽऽवारककर्मणः क्षय एव जायते, अवधि-मनःपर्यायज्ञाने तु तस्य क्षयोपशमे भवतः, एतच्चैकेन्द्रियाणां नास्ति, तत्कार्यादर्शनात्, आगमेऽनुक्तत्वाच्च; इति न सर्वज्ञानप्रसङ्गः। मति-श्रुते अपि तर्हि मा भूताम्, इति चेत्। इत्यत्राह-'मइत्यादि' मति-श्रुतज्ञानावरणक्षयोपशमस्त्वेकेन्द्रियाणामस्त्येव, तत्कार्यदर्शनात्, सिद्धान्तेऽभिहितत्वाच्च। ततश्च तत्क्षयोपशमसद्भावाद् मति-श्रुते भवत एव तेषाम्॥ इति गाथार्थः॥ १०४॥

तदेवं सप्रसङ्गः प्रदर्शितो लक्षणभेदाद् मति-श्रुतयोर्भेदः, सांप्रतं हेतुफलभावात् तमुपदर्शयन्नाह-

[1]मइपुव्वं सुयमुत्तं न मई सुयपुव्विया विसेसोऽयं। पुव्वं पूरण-पालणभावाओ जं मई तस्स॥ १०५॥

"[2]मइपुव्वगं सुत्तं" इति वचनादागमे मतिः पूर्वं यस्य तद् मतिपूर्वं श्रुतमुक्तम्, न पुनर्मतिः श्रुतपूर्विका, इत्यनयोरयं विशेषः। यदि ह्येकत्वं मति-श्रुतयोर्भवेत्, तदैवंभूतो नियमेन पूर्व-पश्चाद्भावो घट-तत्स्वरूपयोरिव न स्यात्, अस्ति चायम्, ततो भेद इति भावः किमिति पुनर्मतिपूर्वमेव श्रुतमुक्तम्?, इत्याह- यद् यस्मात् कारणात् तस्य श्रुतस्य मतिः पूर्वं प्रथममेवोपपद्यते। कुतः?, इत्याह-'पूरणेत्यादि' पॄधातुः पालन-पूरणयोरर्थयोः पठ्यते, तस्य च पिपर्तीति पूर्वम्, इति निपात्यते। ततश्च श्रुतस्य पूरणात् पालनाच्च मतिर्यस्मात् पूर्वमेव युज्यते, तस्माद् मतिपूर्वमेव श्रुतमुक्तम्, पूर्वशब्दश्चायमिह कारणपर्यायो द्रष्टव्यः, कार्यात् पूर्वमेव कारणस्य भावात् "[3]सम्यग्ज्ञानपूर्विका (सर्व) पुरुषार्थसिद्धिः" इत्यादौ तथादर्शनाच्च। ततश्च मतिपूर्वं श्रुतमिति कोऽर्थः?, श्रुतज्ञानं कार्यम्, मतिस्तत्कारणम्, कार्य-कारणयोश्च मृत्पिण्ड-घटयोरिव कथञ्चिद् भेदः प्रतीत एवेति भावः॥ इति गाथार्थः॥ १०५॥

पूर्णादिधर्मानेव मतेर्भावयन्नाह—

[4]पूरिज्जइ पाविज्जइ दिज्जइ वा जं मईए नाऽमइणा। पालिज्जइ य मईए गहियं इहरा पणस्सेज्जा॥ १०६

x पूरण-+सुत्तं/१ मतिपूर्वं श्रुतमुक्तं न मतिः श्रुतपूर्विका, विशेषोऽयम्। पूर्वं पूरण-पालनभावाद् यद् मतिस्तस्य॥ १०५॥ २ मतिपूर्वकं श्रुतम्॥ ३ धर्मोत्तराचार्यस्य न्यायबिन्दौ प्रथमपरिच्छेदे आदिमं सूत्रम्। ४ पूर्यते प्राप्यते दीयते वा यद् मत्या नाऽमत्या। पाल्यते च मत्या गृहीतमितरथा प्रणश्येत्॥१०६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनुमेक्षादिकालेऽभ्यूह्य श्रुतपर्यायवर्धनेन मत्यैव श्रुतज्ञानं पूर्यते पोष्यते पुष्टिं नीयत इत्यर्थः, तथा मत्यैवाऽन्यतस्तत् प्राप्यते गृह्यते, तथा मत्यैव तदन्यस्मै दीयते व्याख्यायते, नाऽमत्या न मतिमन्तरेणेत्यर्थः, प्राकृतत्वात् पुंलिङ्गनिर्देशः । तथा गृहीतं सदेतत् परावर्तन-चिन्तनद्वारेण मत्यैव पाल्यते स्थिरीक्रियते, इतरथा मत्यभावे तद् गृहीतमपि प्रणश्येदेवेत्यर्थः । श्रुतज्ञानस्यैते पूरणादयोऽर्था विशिष्टाभ्यूहधारणादीनन्तरेण कर्तुं न शक्यन्ते, अभ्यूहादयश्च मतिज्ञानमेव, इति सर्वथा श्रुतस्य मतिरेव कारणम्, श्रुतं तु कार्यम्, कार्य-कारणभावश्च भेदे सत्येवोपपद्यते, अभेदे पट-तत्स्वरूपयोरिव तदनुपपत्तेः । तस्मात् कारण-कार्यरूपत्वाद् मति-श्रुतयोर्भेदः ॥ इति गाथार्थः ॥ १०६ ॥

अथ श्रुतस्य मतिपूर्वतां विघटयन्नाह—

+ णाणाणण्णाणाणि य समकालाइं जओ मइ-सुयाइं । तो न सुयं मइपुव्वं मइणाणे वा सुयन्नाणं ॥ १०७ ॥

इह मति-श्रुते वक्ष्यमाणयुक्त्या द्विविधे—सम्यग्दृष्टेर्ज्ञानस्वरूपे, मिथ्यादृष्टेस्त्वज्ञानस्वभावे । तत्र ज्ञाने अज्ञाने चैते प्रत्येकं समकालमेव भवतः, तत्क्षयोपशमलाभस्याऽऽगमे युगपदेव निर्देशात् । यतश्चैते ज्ञाने अज्ञाने च मति-श्रुते पृथक् समकाले भवतः, ततो न श्रुतं मतिपूर्वं युज्यते, न हि सममेवोत्पन्नयोः सव्ये-तरगोविषाणयोरिव पूर्व-पश्चाद्भावः संगच्छते । अथोत्सूत्रोऽप्यसदाग्रहवशात् स न त्यज्यते, इत्याह–'मइणाणे वा इत्यादि' इदमुक्तं भवति–मतिज्ञाने समुत्पन्ने तत्समकालं च श्रुतज्ञानेऽनभ्युपगम्यमाने श्रुताज्ञानं जीवस्य प्रसज्यते, श्रुतज्ञानानुत्पादेऽप्यपि तदनिवृत्तेः, न च ज्ञाना-ऽज्ञानयोः समकालमवस्थितिरागमे क्वचिदप्यनुमन्यते, विरोधात्–ज्ञानस्य सम्यग्दृष्टिसंभवित्वात्, अज्ञानस्य तु मिथ्यादृष्टिभावित्वात् ॥ इति गाथार्थः ॥ १०७ ॥

अत्र प्रतिविधानमाह—

इह[1] लद्धिमइ-सुयाइं समकालाइं, न तूवओगो सिं । मइपुव्वं सुयमिह पुण सुओवओगो मइप्पभवो ॥१०८॥

ननु ध्वान्ध्यविजृम्भितमिदं परस्य, अभिप्रायापरिज्ञानात्, तथाहि–द्विविधे मति-श्रुते तदावरणक्षयोपशमरूपलब्धितः, उपयोगतश्च । तत्रेह लब्धितो ये मति-श्रुते ते एव समकालं भवतः, यस्त्वनयोरुपयोगः स युगपद् न भवत्येव, किन्तु केवलज्ञान-दर्शनयोरिव तथास्वाभाव्यात् क्रमेणैव प्रवर्तते । अत्र तर्हि लब्धिमङ्गीकृत्य मतिपूर्वता श्रुतस्योक्ता भविष्यतीति चेत् । नैवम्, इत्याह-मतिपूर्वं श्रुतम्, इह

+ णाणा-। १ ज्ञाने अज्ञाने च समकाले यतो मति–श्रुते । ततो न श्रुतं मतिपूर्वं मतिज्ञाने वा श्रुताऽज्ञानम् ॥ १०७ ॥
२ इह लब्धिमति–श्रुते समकाले न तूपयोगोऽनयोः । मतिपूर्वं श्रुतमिह पुनः श्रुतोपयोगो मतिप्रभवः ॥ १०८ ॥

तु श्रुतोपयोग एव मतिप्रभवोऽङ्गीक्रियते, न लब्धिरिति भावः, श्रुतोपयोगो हि विशिष्टमन्तर्जल्पाकारं श्रुतानुसारि ज्ञानमभिधीयते, तच्चाऽवग्रहे–हादीनन्तरेणाऽऽकस्मिकं न भवति, अवग्रहादयश्च मतिरेव, इति तत्पूर्वता श्रुतस्य न विरुध्यते ॥ इति गाथार्थः ॥ १०८ ॥

तदेवं मतिपूर्वं श्रुतमिति समर्थितम्, परस्तु मतेरपि श्रुतपूर्वताऽऽपादनेनाऽविशेषमुद्भावयन्नाह—

सोऊण[2] जा मई भे सा सुयपुव्व त्ति तेण न विसेसो । सा दव्वसुयप्पभवा भावसुयाओ मई नत्थि ॥१०९॥

परस्माच्छब्दं श्रुत्वा तद्विषया 'भे' भवतामपि या मतिरुत्पद्यते सा श्रुतपूर्वा श्रुतकारणैव, शब्दस्य श्रुतत्वेन प्रागुक्तत्वात्, तस्याश्च मतेस्तत्प्रभवत्वेन भवतामपि सिद्धत्वात् । ततश्च 'न विसेसो त्ति' अन्योन्यपूर्वभावितायां मति-श्रुतयोर्न विशेष इत्यर्थः । तथा च सति 'नं[3] मई सुयपुव्विय त्ति' यदुक्तं प्राक्, तदयुक्तं प्राप्नोतीति भावः ॥ अत्रोत्तरमाह– परस्माच्छब्दमाकर्ण्य या मतिरुत्पद्यते, सा हन्त ! शब्दस्य द्रव्यश्रुतमात्रत्वाद् द्रव्यश्रुतप्रभवा, न भावश्रुतकारणा, एतत् तु न केनापि वार्यते, किन्त्वेतदेव वयं ब्रूमो यदुत– भावश्रुताद् मतिर्नास्ति, भावश्रुतपूर्विका मतिर्न भवतीत्यर्थः, द्रव्यश्रुतप्रभवा तु भवतुः को दोषः ? ॥ इति गाथार्थः ॥ १०९ ॥

ननु भावश्रुतादूर्ध्वं मतिः किं सर्वथा न भवति ?, इत्याह–

कज्जतया[3], न उ कमसो कमेण को वा मइं निवारेइ ? । जं तत्थावत्थाणं सुयस्स सुत्तोवओगाओ॥ ११० ॥

भावश्रुताद् मतिः कार्यतयैव नास्तीत्यनन्तरोक्तगाथावयवेन संबन्धः । 'न उ कमसो त्ति' क्रमशस्तु मतिर्नास्तीत्येवं न, किं तर्हि ?, क्रमशः साऽस्ति, इत्येतत् सर्वोऽपि मन्यते, अन्यथा आमरणावधि श्रुतमात्रोपयोगप्रसङ्गात् । यदि क्रमशः साऽस्ति, तर्हि क्रमेण भवन्त्यास्तस्या भवन्तः किं कुर्वन्ति ?, इत्याह–'कमेणेत्यादि' वाशब्दः पातनार्थे, सा च कृतैव, क्रमेण भवन्तीं मतिं को निवारयति ?, मत्या श्रुतोपयोगो जन्यते, तदुपरमे तु निजकारणकलापात् सदैव प्रवृत्ता पुनरपि मतिरवतिष्ठते, पुनस्तथैव श्रुतं, तथैव च मतिः, इत्येवं क्रमेण भवन्त्या मतेर्निषेधका वयं न भवाम इत्यर्थः । किमिति ?, इत्याह–यद् यस्मात् कारणात् तत्र तस्यां मतौ अवस्थानं स्थितिर्भवति, श्रुतोपयोगाच्च्युतस्य ततः क्रमेण मतिं न निषेधयामः । इदमुक्तं भवति–यथा सामान्यभूतेन सुवर्णेन स्वविशेषरूपाः कङ्कण-ऽङ्गुलीयकादयो जन्यन्ते, अतस्ते तत्कार्यव्यपदेशं लभन्त एव, सुवर्णं त्वतज्जन्यत्वात् तत्कार्यतया न व्यवह्रियते, तस्य कारणान्तरेभ्यः सिद्धत्वात्, कङ्कणादिविशेषोपरमे तु सुवर्णावस्थानं क्रमेण न निवार्यते; एवं मत्याऽपि सामान्यभूतया स्वविशेषरूपश्रुतोपयोगो जन्यते, अतस्तत्कार्यं स उच्यते,

x चुयस्स-। १ श्रुत्वा या मतिर्भवतां सा श्रुतपूर्वेति तेन न विशेषः । सा द्रव्यश्रुतप्रभवा भावश्रुताद् मतिर्नास्ति ॥ १०९ ॥ २ गाथा १०५ ।
३ कार्यतया, नं तु क्रमशः क्रमेण को वा मतिं निवारयति ? । यत् तत्रावस्थानं श्रुतस्य श्रुतोपयोगतः ॥ ११० ॥ (-चुतस्य)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मतिस्त्वतज्जन्यत्वात् तत्कार्यतया न व्यपदिश्यते, तस्या हेत्वन्तरात् सदा सिद्धत्वात्, स्वविशेषभूतश्रुतोपयोगोपरमे तु क्रमायातं मत्यवस्थानं न निवार्यते, आमरणान्तं केवलश्रुतोपयोगप्रसङ्गात् ॥ इति गाथार्थः ॥ ११० ॥

तदेवं भावश्रुतं मतिपूर्वं व्यवस्थाप्य मतान्तरमुपदर्शयन्नाह–

[1]दव्वसुयं मइपुव्वं भासइ जं नाविचिंतियं केइ । भावसुयस्साभावो पावइ तेसिं न य विसेसो ॥ १११ ॥

'केइ त्ति' ' मतिपूर्वं श्रुतम् ' इत्यत्रागमवचने केचिदेवं व्याचक्षते । किम् ?, इत्याह– द्रव्यश्रुतं शब्दरूपं मतिपूर्वम्, न भावश्रुतम् । तत्र युक्तिमाह– 'भासइ जं नाविचिंतियं ति' यद् यस्मात् कारणात् अविचिन्तितमविवक्षितं न कोऽपि भाषते न शब्दमुदीरयति, यच्च विवक्षाज्ञानं तत् किल मतिरिति तेषामभिप्रायः, ततश्च मतिपूर्वं द्रव्यश्रुतं सिद्धं भवति । एतस्मिन् व्याख्याने दोषमाह–तेषामेवं व्याख्यातॄणां भावश्रुतस्य सर्वथैवाऽभावः प्राप्नोति, यतो वक्तृगतं विवक्षोपयोगज्ञानं तैरेव मतित्वेन व्याख्यातम्, अन्यथा शब्दस्य मतिपूर्वकत्वाभावात्, श्रोतुरपि शब्दं श्रुत्वा प्रथमं यदवग्रहादिज्ञानं तत् तावद् मतिरेव, ऊर्ध्वमपि च तस्या भावश्रुतं नाभ्युपगन्तव्यम्, 'मतिपूर्वं भावश्रुतम्' इत्यस्मत्पक्षवर्तित्वप्रसङ्गात् । यदशृण्वतोऽभाषमाणस्य चाऽनुप्रेक्षादिष्वन्तर्जल्पारूपितं ज्ञानं विपरिवर्तते तद् भावश्रुतं भविष्यतीति चेत् । तदयुक्तम्, यतस्तदपि यद्यवग्रहाद्यात्मकमतिपूर्वं तदा भावश्रुतं नेष्टव्यम्, अस्मत्पक्षाभ्युपगमप्राप्तेरेव । अथ मतिपूर्वं तद् नेष्यते, तथापि तत् सविकल्पकत्वेन मतिरेव, शब्दविवक्षाज्ञानवत्; शब्दविवक्षाज्ञानेऽपि हि शब्दविकल्पोऽस्ति, तमन्तरेण शब्दाभिधानासंभवात्, न चासौ भावश्रुतत्वेनेष्टः; तस्माद् मतेरनन्तरं सर्वत्र शब्दमात्रस्यैवोत्थानम्, न भावश्रुतस्य; अस्मत्पक्षाङ्गीकरणप्रसङ्गात्, विकल्पज्ञानानि च विवक्षाज्ञानवद् मतित्वेनोक्तान्येव, इति सर्वत्र भावश्रुताभावः प्रसजति । भवतु स तर्हि, इति चेत् । इत्याह– 'न य विसेसो त्ति' भावश्रुताभावे मति-श्रुतयोर्विशेषो भेदश्चिन्तयितव्यो न स्यात्, स हि द्वयोरेवोपपद्यते । यदा च मतिरेवास्ति, न भावश्रुतम्, तदा तस्याः केन सह भेदचिन्ता युज्येत ? इति भावः । द्रव्यश्रुतरूपेण शब्देन सह मतेर्भेदचिन्ता भविष्यतीति चेत् । तदयुक्तम्, ज्ञानपञ्चकविचारस्येहाऽधिकृतत्वात्, तदधिकारे च शब्देन सह भेदचिन्ताया अप्रस्तुतत्वात् । चिन्त्यतां वा 'मतिपूर्वं द्रव्यश्रुतम् ' इत्येवं मतेः शब्देनापि सह विशेषः, किन्तु सोऽपि न घटते ॥ इति गाथार्थः ॥ १११ ॥

कुतो न घटते ?, इत्याह–

---

१ द्रव्यश्रुतं मतिपूर्वं भाषते यद् नाऽविचिन्तितं केचित् । भावश्रुतस्याभावः प्राप्नोति तेषां न च विशेषः ॥ १११ ॥

[1]दव्वसुयं बुद्धीओ सा वि तओ जमविसेसओ तम्हा । भावसुयं मइपुव्वं दव्वसुयं लक्खणं तस्स ॥११२॥

यदिति यस्मात् कारणाद् यथा द्रव्यश्रुतं शब्दो बुद्धेर्मतेः सकाशाद् भवतीति भवद्भिः प्रतिपाद्यते, तथा हन्त ! साऽपि बुद्धिस्ततः शब्दात् श्रोतुर्भवत्येव । ततश्च 'मइपुव्वं सुयमुत्तं न मई सुयपुव्विया विसेसोऽयं' इति मति-श्रुतयोर्भेदप्रतिपादनार्थं योऽसौ विशेषोऽत्र प्रतिपादयितुं प्रस्तुतः, स द्वयोरप्यन्योन्यं [3]पूर्वभावितायाः समानत्वाद् न प्राप्नोति, इत्यनन्तरगाथापर्यन्तावयवेन संबन्धः । तस्मात् तेषां मतेऽविशेषतः कारणाद् यदस्माभिः प्राक् समर्थितम्–भावश्रुतं मतिपूर्वमिति, तदेव युक्तियुक्तम् । शब्दलक्षणं तु द्रव्यश्रुतं तस्य भावश्रुतस्य लक्ष्यते गम्यतेऽनेनेति लक्षणं लिङ्गम् ॥ इति गाथार्थः ॥ ११२ ॥

कुतस्तत् तस्य लक्षणम् ?, इत्याह–

[4]सुयविण्णाणप्पभवं दव्वसुयमियं जओ विचिंतेउं । पुव्वं, पच्छा भासइ लक्खिज्जइ तेण भावसुयं ॥११३॥

श्रुतविज्ञानप्रभवं सविकल्पकविवक्षाज्ञानकार्यं शब्दरूपं द्रव्यश्रुतमिदं यत् परैर्मतिपूर्वत्वेनेष्यते, कथं पुनस्तद्भावश्रुतप्रभवं विज्ञायते ?, इत्याह– यतः सर्वोऽपि पूर्वं विचिन्त्य वक्तव्यमर्थं चित्ते विकल्प्य पश्चात् शब्दं भाषते, यच्च तच्चिन्ताज्ञानं तच्छ्रुतानुसारित्वाद् भावश्रुतम्, इति भावश्रुतप्रभवता द्रव्यश्रुतस्य विज्ञायते; यच्च यस्मात् प्रभवति तत् तस्य कार्यम्, अतस्तेन कार्यभूतेन द्रव्यश्रुतेन स्वकारणभूतं भावश्रुतं लक्ष्यत इति तत् तस्य लक्षणमुक्तम्, अस्ति भावश्रुतमत्र, तत्कार्यस्य शब्दस्य श्रवणात्, इत्येवं तेन भावश्रुतस्य लक्ष्यमाणत्वादिति । द्रव्यश्रुतस्य च भावश्रुतलक्षणता मतान्तरवादिनां विपर्यस्तत्वप्रतिपादनार्थमुपदर्शिता, भावश्रुतप्रभवस्यापि शब्दस्य तैर्मतिपूर्वत्वप्रतिपादनात् ॥ इति गाथार्थः ॥ ११३ ॥

अथ यथा मति-श्रुतयोः कार्य-कारणभावाद् भेदः, तथा तयोः प्रत्येकं स्वस्थानेऽपि सम्यक्त्व-मिथ्यात्वपरिग्रहाद् भेद एवेत्यनुषङ्गतो दर्शयितुं नन्द्यध्ययनागमे मति-श्रुतयोः कार्य-कारणभावेन भेदप्रतिपादनानन्तरमिदं सूत्रमस्ति, तद् यथा "अविसेसिया मई

+द्रव्यश्रुतं भाव०

१ द्रव्यश्रुतं बुद्धेः साऽपि ततो यदविशेषतस्तस्मात् । भावश्रुतं मतिपूर्वं द्रव्यश्रुतं लक्षणं तस्य ॥ ११२ ॥ २ गाथा १०५ ।

३ घ. 'पूर्वभाववयोः' । ४ श्रुतविज्ञानप्रभवं द्रव्यश्रुतमिदं यतो विचिन्त्य । पूर्वं, पश्चाद् भाषते लक्ष्यते तेन भावश्रुतम् ॥ ११३ ॥

५ अविशेषिता मतिर्मतिज्ञानं च मत्यज्ञानं च, विशेषिता मतिः–सम्यग्दृष्टेर्मतिर्मतिज्ञानम्, मिथ्यादृष्टेर्मतिर्मत्यज्ञानं; एवं अविशेषितं श्रुतं श्रुतज्ञानं श्रुताज्ञानं च, विशेषितं श्रुतम्–सम्यग्दृष्टेः श्रुतं श्रुतज्ञानम्, मिथ्यादृष्टेः श्रुतं श्रुताज्ञानम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मइनाणं च मइअन्नाणं च, विसेसिया मई–सम्मद्दिट्ठिस्स मई मइनाणं, मिच्छादिट्ठिस्स मई मइअन्नाणं; एवं अविसेसियं सुयं सुयनाणं सुयअन्नाणं च, विसेसियं सुयं–सम्मद्दिट्ठिस्स सुयं सुयनाणं, मिच्छादिट्ठिस्स सुयं सुयअन्नाणं" सम्यग्दृष्टि-मिथ्यादृष्टिसंबन्धतोऽविशेषितेन मतिशब्देन मतिज्ञानं मत्यज्ञानं च द्वे अपि प्रतिपाद्येते, सम्यग्दृष्टित्वविशेषितेन तु मतिशब्देनैव मतिज्ञानमेवाऽभिधीयते, एवं श्रुतेऽपि वाच्यमिति सूत्रभावार्थः। तदेतदानुषङ्गिकं सूत्रोक्तमनुवर्तमानो भाष्यकारोऽप्याह—

अविसेसिया मइ च्चिय सम्मद्दिट्ठिस्स सा मइण्णाणं। मइअन्नाणं मिच्छद्दिट्ठिस्स सुयं पि एमेव ॥ ११४ ॥

सम्यग्दृष्टि-मिथ्यादृष्टिभावेनाऽविशेषिता मतिर्मतिरेवोच्यते, न तु मतिज्ञानं मत्यज्ञानं चेति निर्धार्य व्यपदिश्यते, सामान्यरूपायां तस्यां ज्ञाना-ऽज्ञानविशेषयोर्द्वयोरप्यन्तर्भावात्। यदा तु सम्यग्दृष्टेरेव संबन्धिनी सा मतिर्विवक्ष्यते, तदा मतिज्ञानमिति निर्दिश्यते। यदा तु मिथ्यादृष्टिसंबन्धिनी तदा मत्यज्ञानम्। एवं श्रुतमप्यविशेषितं श्रुतमेव, विशेषितं तु सम्यग्दृष्टेः श्रुतज्ञानं, मिथ्यादृष्टेस्तु श्रुताज्ञानम्, सम्यग्दृष्टिसंबन्धिनो बोधस्य सर्वस्यापि ज्ञानत्वात्; मिथ्यादृष्टिसत्कस्य त्वज्ञानत्वात्॥ इति गाथार्थः॥ ११४॥

ननु यथा मति-श्रुताभ्यां सम्यग्दृष्टिर्घटादिकं जानीते, व्यवहरति च; तथा मिथ्यादृष्टिरपि, तत् किमिति तस्य सत्कं सर्वमप्यज्ञानमुच्यते?, इत्याशङ्क्याह–

सद्-सदविसेसणाओ भवहेउजदिच्छिओवलम्भाओ। नाणफलाभावाओ मिच्छद्दिट्ठिस्स अण्णाणं ॥११५॥

सच्चाऽसच्च सद्-सती तयोरविशेषणमविशेषस्तस्माद् हेतोः, मिथ्यादृष्टेः संबन्धि व्यवहारमात्रेण ज्ञानमपि निश्चयतोऽज्ञानमुच्यते, सतो ह्यसत्त्वेनाऽसद् विशिष्यते, असतोऽपि च सत्त्वेन सद् भिद्यते। मिथ्यादृष्टिश्च घटे सत्त्व-प्रमेयत्व-मूर्तत्वादीन्, स्तम्भ-रम्भा-ऽम्भोरुहादिष्वाद्यत्र्यादींश्च पटादिधर्मान् सतोऽप्यसत्त्वेन प्रतिपद्यते, 'सर्वप्रकारैर्घट एवायम्' इत्यवधारणात्। अनेन ह्यवधारणेन सन्तोऽपि सत्त्व-प्रमेयत्वादयः पटादिधर्मा न सन्तीति प्रतिपद्यते, अन्यथा सत्त्व-प्रमेयत्वादिसामान्यधर्मद्वारेण घटे पटादीनामपि सद्भावात् 'सर्वथा घट एवायम्' इत्यवधारणानुपपत्तेः, 'कथञ्चिद् घट एवाऽयम्' इत्यवधारणे त्वनेकान्तवादाभ्युपगमेन सम्यग्दृष्टित्वप्रसङ्गात्, तथा पट-पुट-नट-शकटादिरूपं घटेऽसदपि सत्त्वेनाऽयमभ्युपगच्छति 'सर्वैः प्रकारैर्घटोऽस्त्येव' इत्यवधारणात्, 'स्यादस्त्येव घटः' इत्यव-

१ अविशेषिता मतिरेव सम्यग्दृष्टेः सा मतिज्ञानम्। मत्यज्ञानं मिथ्यादृष्टेः श्रुतमप्येवमेव ॥ ११४ ॥ + विशेष्यते।

२ सदसदविशेषणाद् भवहेतुयदृच्छोपलम्भात्। ज्ञानफलाभावाद् मिथ्यादृष्टेरज्ञानम् ॥ ११५ ॥

धारणे तु स्याद्वादाश्रयणात् सम्यग्दृष्टित्वप्राप्तेः। तस्मात् सद-सतोरविशेषाभावादुन्मत्तकस्येव मिथ्यादृष्टेर्बोधोऽज्ञानम्। तथा विपर्यस्तत्वादेव भवहेतुत्वात् तद्बोधोऽज्ञानम्। तथा पशुवधहेतुत्वात् तद्बोधोऽज्ञानम्। तथा पशुवध-तिलादिदहन-जलाद्यवगाहनादिषु संसारहेतुषु मोक्षहेतुत्वबुद्धेः, दया-प्रशम-ब्रह्मचर्या-ऽऽकिञ्चन्यादिषु तु मोक्षकारणेषु भवहेतुत्वाध्यवसायतो यदृच्छोपलम्भात् तस्याऽज्ञानम्। तथा विरत्यभावेन ज्ञानफलाभावाद् मिथ्यादृष्टेरज्ञानम्॥ इति गाथार्थः॥ ११५॥

तदेवं सप्रसङ्गः प्रतिपादितो हेतु-फलभावादपि मति-श्रुतयोर्भेदः, सांप्रतं भेदभेदात् तयोस्तमभिधातुमाह–

भेयकयं च विसेसणमट्ठावीसइविहंगभेयाइ। इंदियविभागओ वा मइ-सुयभेओ जओऽभिहियं ॥११६॥

भेदा अवग्रहादयः, अङ्गा-ऽनङ्गप्रविष्टत्वादयश्च, तत्कृतं वा मति-श्रुतयोर्विशेषणं भेदः, यतोऽवग्रहादिभेदादष्टाविंशत्यादिविधं मतिज्ञानं 'वक्ष्यते' इति शेषः, श्रुतज्ञानं त्वङ्गाऽनङ्गप्रविष्टत्वादिभेदमभिधास्यते। अथवा इन्द्रियविभागाद् मति-श्रुतयोर्भेदः, यतोऽन्यत्र पूर्वगतेऽभिहितम्॥ इति गाथार्थः॥ ११६॥

किमभिहितम्?, इत्याह–

सोइंदिओवलद्धी होइ सुयं सेसयं तु मइनाणं। मोत्तूण दव्वसुयं अक्खरलंभो य सेसेसु ॥ ११७ ॥

इन्द्रो जीवस्तस्येदमिन्द्रियम्, श्रूयतेऽनेनेति श्रोत्रम्, तच्च तदिन्द्रियं चेति श्रोत्रेन्द्रियम्, उपलम्भनमुपलब्धिर्ज्ञानम्, श्रोत्रेन्द्रियेणोपलब्धिः श्रोत्रेन्द्रियोपलब्धिरिति तृतीयासमासः, श्रोत्रेन्द्रियस्य वोपलब्धिः श्रोत्रेन्द्रियोपलब्धिरिति षष्ठीसमासः, श्रोत्रेन्द्रियद्वारकं ज्ञानमित्यर्थः, श्रोत्रेन्द्रियेणोपलब्धिर्यस्येति बहुव्रीहिणाऽन्यपदार्थे शब्दोऽप्यधिक्रियते। ततश्चाद्यसमासद्वये श्रोत्रेन्द्रियद्वारकमभिलापप्लावितोपलब्धिलक्षणं भावश्रुतमुक्तं द्रष्टव्यम्, बहुव्रीहिणा तु तस्यां भावश्रुतोपलब्धावनुपयुक्तस्य वदतो द्रव्यश्रुतम्, तदुपयुक्तस्य तु वदत उभयश्रुतमभिहितं वेदितव्यम्। इह च व्यवच्छेदफलत्वात् सर्वं वाक्यं सावधारणं भवति, इष्टश्चाऽवधारणविधिः प्रवर्तते; ततः 'चैत्रो धनुर्धर एव' इत्यादिष्विवेहाऽयोगव्यवच्छेदेनाऽवधारणं द्रष्टव्यम्, तद्यथा– श्रुतं श्रोत्रेन्द्रियोपलब्धिरेव, न तु श्रोत्रेन्द्रियोपलब्धिः श्रुतमेवेति; श्रोत्रेन्द्रियोपलब्धिस्तु श्रुतं मतिर्वा भवति, यथा धनुर्धरश्चैत्रोऽन्यो वेति, श्रोत्रेन्द्रियोपलब्धेरवग्रहे-हादिरूपाया मतित्वात्,

१ भेदकृतं च विशेषणमष्टाविंशतिविधाङ्गभेदादि। इन्द्रियविभागतो वा मति-श्रुतभेदो यतोऽभिहितम् ॥ ११६ ॥ × ला-। + ध-।

२ श्रोत्रेन्द्रियोपलब्धिर्भवति श्रुतं शेषकं तु मतिज्ञानम्। मुक्त्वा द्रव्यश्रुतमक्षरलाभश्च शेषेषु ॥ ११७ ॥ ५ तस्मिन्-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुतानुसारिण्यास्तु श्रुतत्वादिति; यदि पुनः श्रोत्रेन्द्रियोपलब्धिः श्रुतमेवेत्यवधार्यते, तदा तदुपलब्धेर्मतित्वं सर्वथैव न स्यात्, इष्यते च कस्याश्चित् तदपीति भावः। यदि श्रोत्रेन्द्रियोपलब्धिः श्रुतम्, तर्हि शेषं किं भवतु ?, इत्याह– 'सेसयं त्वित्यादि' श्रोत्रेन्द्रियोपलब्धिं विहाय शेषकं यच्चक्षुरादीन्द्रियचतुष्टयोपलब्धिरूपं तद् मतिज्ञानं 'भवति' इति वर्तते। तुशब्दः समुच्चये, स चैवं समुच्चिनोति न केवलं शेषेन्द्रियोपलब्धिर्मतिज्ञानम्, किन्तु श्रोत्रेन्द्रियोपलब्धिश्च काचिदवग्रहे-हादिमात्ररूपा मतिज्ञानं भवति; तथा च सत्यनन्तरमवधारणव्याख्यानमुपपन्नं भवति। 'सेसयं तु मइनाणं' इति सामान्येनैवोक्ते शेषस्य सर्वस्याऽप्युत्सर्गेण मतित्वे प्राप्ते सत्यपवादमाह– 'मोत्तूणं दव्वसुयं ति' पुस्तकादिलिखितं यद् द्रव्यश्रुतं तद् मुक्त्वा परित्यज्यैव शेषं मतिज्ञानं द्रष्टव्यम्, पुस्तकादिन्यस्तं हि भावश्रुतकारणत्वात् शब्दवद् द्रव्यश्रुतमेव, इति कथं मतिज्ञानं स्यात् ?, इति भावः। न केवलं श्रोत्रेन्द्रियोपलब्धिः श्रुतम्, किन्तु यश्च शेषेषु चतुर्षु चक्षुरादीन्द्रियेषु श्रुतानुसारिसाभिलापविज्ञानरूपोऽक्षरलाभः सोऽपि श्रुतम्, न त्वक्षरलाभमात्रम्; तस्येहा-ऽपायाद्यात्मके मतिज्ञानेऽपि सद्भावादिति॥

आह– यदि चक्षुरादीन्द्रियाक्षरलाभोऽपि श्रुतम्, तर्हि यदाद्यगाथावयवे 'श्रोत्रेन्द्रियोपलब्धिरेव श्रुतम्' इत्यवधारणं कृतम्, तद् नोपपद्यते, शेषेन्द्रियोपलब्धेरपीदानीं श्रुतत्वेन समर्थितत्वात्। नैतदेवम्, शेषेन्द्रियाक्षरलाभस्यापि श्रोत्रेन्द्रियोपलब्धिरूपत्वात्, स हि श्रुतानुसारिसाभिलापज्ञानरूपोऽत्राधिक्रियते, श्रोत्रेन्द्रियोपलब्धिरपि चैवंभूतैव श्रुतमुक्ता; ततश्च साभिलापविज्ञानं शेषेन्द्रियद्वारेणाऽप्युत्पन्नं योग्यतया श्रोत्रेन्द्रियोपलब्धिरेव मन्तव्यम्, अभिलापस्य सर्वस्यापि श्रोत्रेन्द्रियग्रहणयोग्यत्वादिति॥

अत्राह– ननु 'सोइंदिओवलद्धी होइ सुयं' 'तथा 'अक्खरलम्भो य सेसेसु' इत्युभयवचनाच्छ्रुतज्ञानस्य सर्वेन्द्रियनिमित्तता सिद्धा, तथा 'सेसयं तु मइनाणं' इति वचनात्, तुशब्दस्य समुच्चयाच्च मतिज्ञानस्यापि सर्वेन्द्रियकारणता प्रतिष्ठिता; भवद्भिस्त्विन्द्रियविभागाद् मति-श्रुतयोर्भेदः प्रतिपादयितुमारब्धः, स चैवं न सिध्यति, द्वयोरपि सर्वेन्द्रियनिमित्ततायास्तुल्यत्वप्रतिपादनादिति। अत्रोच्यते– साधूक्तं भवता, किन्तु यद्यपि शेषेन्द्रियद्वाराऽऽयातत्वात् तदक्षरलाभः शेषेन्द्रियोपलब्धिरुच्यते, तथाऽप्यभिलापात्मकत्वादसौ श्रोत्रेन्द्रियग्रहणयोग्य एव, ततश्च तत्त्वतः श्रोत्रेन्द्रियोपलब्धिरेवाऽयम्। तथा च सति परमार्थतः सर्वं श्रोत्रविषयमेव श्रुतज्ञानम्, मतिज्ञानं तु तद्विषयं शेषेन्द्रियविषयं च सिद्धं भवति; अत इत्थमिन्द्रियविभागाद् मति-श्रुतयोर्भेदो न विहन्यते; इत्यलं विस्तरेण॥ इति पूर्वगतगाथासंक्षेपार्थः॥ ११७॥

अथ विस्तरार्थमभिधित्सुर्भाष्यकार एव परेण पूर्वपक्षं कारयितुमाह–

सोओवलद्धी[1] जइ सुयं न नाम सोउग्गहादओ बुद्धी। अह बुद्धीओ न सुयं अहोभयं संकरो नाम॥११८॥

'श्रोत्रोपलब्धिरेव श्रुतम्' इत्यवधारणार्थमनवगच्छतः 'श्रुतमेव तदुपलब्धिः' इत्येवं च तदर्थमबुध्यमानस्य परस्य वचनमिदम्, तद्यथा– यदि श्रोत्रोपलब्धिः श्रुतमेव, तर्हि 'नाम' इति कोमलामन्त्रणे, अहो ! श्रोत्रेन्द्रियद्वारोत्पन्ना अवग्रहे-हादयो बुद्धिर्मतिज्ञानं न प्राप्नुवन्ति, तदुपलब्धेः सर्वस्या अपि श्रुतत्वेनाऽवधारणात्। मा भूवंस्ते मतिज्ञानम्, किं नः क्षूयते ? इति चेत्। नैवम्, तथा सति तस्य वक्ष्यमाणाऽष्टाविंशतिभेदभिन्नत्वहानेः। अथैतद्दोषभयाद् बुद्धिस्तेऽभ्युपगम्यन्ते, ततस्तर्हि न ते श्रुतम्, तथा च सति 'सोइन्दिओवलद्धी होइ सुयं' इत्यसंगतं प्राप्नोति। अथोभयदोषपरिहारार्थं 'उभयं' बुद्धिश्च श्रुतं च ते इष्यन्ते। तर्ह्येवं सत्येकस्थानमीलितक्षीर-नीरयोरिव संकरः संकीर्णता मति-श्रुतयोरापद्यते, न पृथग्भावः। अथवा 'यदेव मतिस्तदेव श्रुतं, यदेव च श्रुतं तदेव मतिः' इत्येवमभेदोऽप्यनयोः स्यात्, इति स्वयमेव द्रष्टव्यम्; भेदश्चेह तयोः प्रतिपादयितुं प्रस्तुतः, तदेतच्छान्तिकरणप्रवृत्तस्य वेतालोत्थानम्॥ इति प्रेरकगाथार्थः॥ ११८॥

तदेतत् प्रेर्यं केचिद् यथा परिहरन्ति, तथा तावद् दर्शयन्नाह–

केई[2] बेन्तस्स सुयं सद्दो सुणओ मइ त्ति, तं न भवे। जं सव्वो च्चिय सद्दो दव्वसुयं तस्स को भेयो ?॥११९॥

'सोइंदिओवलद्धी' इत्यत्र श्रोत्रेन्द्रियेणोपलब्धिर्यस्येति केवलबहुव्रीह्याश्रयणात् श्रोत्रेन्द्रियोपलब्धिः शब्द एवेति केचिद् मन्यन्ते, स च प्रज्ञापकस्य ब्रुवतः श्रूयत इति कृत्वा श्रुतम्, शृण्वतस्तु श्रोतुरवग्रहे-हा-ऽपायादिरूपेण मन्यते ज्ञायत इति मतिः। एवं च सत्युभयमुपपन्नं भवति, श्रोतृगताऽवग्रहादीनां च श्रुतत्वं परिहृतं भवति। आचार्यः प्राह– 'तं न भवे त्ति' तदेतत् केषाञ्चिद् मतं युक्तं न भवति। कुतः ?, इत्याह– यद् यस्मात् कारणाद् ब्रुवतः श्रोतुश्च संबन्धी सर्व एव शब्दो द्रव्यश्रुतम्, द्रव्यश्रुतमात्रत्वेन च सर्वत्र तुल्यस्य सतस्तस्य शब्दस्य को भेदः को विशेषः, येनासौ वक्तरि श्रुतं, श्रोतरि तु मतिः स्यात् ?। यदपि 'श्रूयत इति श्रुतं' 'मन्यत इति मतिः' उच्यते, तत्रापि धात्वन्तरमात्रकृत एव विशेषः, शब्दस्तु स एव श्रूयते स एव मन्यते, इति न क्वचिदुभयं दृश्यते॥ इति गाथार्थः॥ ११९॥

---

१ श्रोत्रोपलब्धिर्यदि श्रुतं न नाम श्रोत्रावग्रहादयो बुद्धिः। अथ बुद्धयो न श्रुतमथोभयं संकरो नाम॥ ११८॥ २ गाथा ११७।

३ केचिद् ब्रुवतः श्रुतं शब्दः शृण्वतो मतिरिति, तद् न भवेत्। यत् सर्व एव शब्दो द्रव्यश्रुतं तस्य को भेदः ?॥ ११९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दूषणान्तरमप्याह–

[1]किंवा नाणेऽहिगए सद्देणं जइ य सद्दविन्नाणं । गहियं तो को भेयो भणओ सुणओ व जो तस्स ?॥१२०॥

यदि वा ज्ञाने ज्ञानविचारेऽधिकृते किं पुद्गलसङ्घातरूपेण शब्देन गृहीतेन कार्यम्, अप्रस्तुतत्वात् ? । अथ श्रोत्रेन्द्रियोपलब्धि-शब्देन शब्दविज्ञानं गृह्यत इति । अत्राह–'जइ येत्यादि' यदि च श्रोत्रेन्द्रियोपलब्धेः शब्दस्य कारणभूतत्वात् कार्यभूतत्वाच्चोपचारतो वक्तृगतं श्रोतृगतं च शब्दविज्ञानं श्रोत्रेन्द्रियोपलब्धिशब्दवाच्यत्वेन गृहीतम्, तच्च ब्रुवतः श्रुतं शृण्वतस्तु मतिरित्युच्यते । हन्त ! तत-स्तर्हि तस्य विज्ञानस्य ब्रुवतः शृण्वतो वा यो भेदो विशेषः, स कः ? इति कथ्यताम्, येन तद् वक्तुः श्रुतं, श्रोतुश्च मतिः स्यात् ? इति नास्त्यसौ विशेषः, शब्दज्ञानत्वाविशेषादिति भावः । किञ्च, एवं सति श्रोतुरपि कदाचिच्छ्रुत्यनन्तरमेव ब्रुवतः सैव शब्दजनिता तन्मतिरव-शिष्टा श्रुतं प्रसजति 'बेन्तस्स सुयं' '[3]सुणओ मई' इत्यभ्युपगमात्; ततश्च तदेवैकत्वं मति-श्रुतयोः, इति कोऽतिशयः कृतः स्यात् ? इति । किञ्च, यदि शृण्वतः सर्वदैव मतिरित्ययमेकान्तः, तर्हि यदेतद् व्यक्तं सर्वत्रोच्यते– आचार्यपारम्पर्येणेदं श्रुतमायातमिति, तदसत् प्राप्नोति, तीर्थकरादर्वाक् सर्वेषामपि श्रोतृत्वेन मतिज्ञानस्यैवोपपत्तेः । अथ नैवम्, तर्ह्येकत्वं मति-श्रुतयोः ॥ इति गाथार्थः ॥ १२० ॥

तदेवं '[2]केई बेन्तस्स सुयं' इत्यादि दूषयित्वा प्रस्तुतप्रकरणोपसंहारव्याजेन परमेव शिक्षयन्नाह–

[3]भणओ सुणओ व सुयं तं जमिह सुयाणुसारि विण्णाणं । दोण्हं पि सुयाईयं जं विन्नाणं तयं बुद्धी ॥१२१॥

तस्माद् 'ब्रुवतः श्रुतं, शृण्वतस्तु मतिः' इत्येतद् न युक्तम्; उक्तदूषणात्, अनागमिकत्वाच्च । किं तर्हि युक्तम् ? इति चेत् । उच्यते– भणतः शृण्वतो वा यत् किमपि श्रुतानुसारि परोपदेशार्हद्वचनानुसारि विज्ञानं, तदिह सर्वं श्रुतम्, यत् पुनर्द्वयोरपि वक्तृ-श्रोत्रोः श्रुतातीतं हृषीक-मनोमात्रनिमित्तमवग्रहादिरूपं विज्ञानं, तत् सर्वं बुद्धिर्मतिज्ञानमित्यर्थः । तदेवं द्वयोरपि वक्तृ-श्रोत्रोः प्रत्येकं मति-श्रुते यथोक्तस्वरूपे अभ्युपगन्तव्ये, न पुनरेकैकस्यैकैकमिति भावः ॥ इति गाथार्थः ॥ १२१ ॥

भवत्वेवम्, किन्तु 'सोओवलद्धी जइ सुयं न नाम सोउग्गहादओ बुद्धी' इत्यादिना यः परेण पूर्वपक्षो व्यधायि, तस्य तर्हि कः परिहारः ? इत्याशङ्क्य भाष्यकार एवेदानीं 'सोइंदिओवलद्धी होइ सुयं' इत्यादिमूलगाथां विवृण्वन्नाह–

---

१ किंवा ज्ञानेऽधिकृते शब्देन, यदि च शब्दविज्ञानम्। गृहीतं ततः को भेदो भणतः शृण्वतश्च यस्तस्य ? ॥ १२० ॥ २ गाथा ११९ । ३ भणतः शृण्वतो वा श्रुतं तद् यदिह श्रुतानुसारि विज्ञानम्। द्वयोरपि श्रुतातीतं यद् विज्ञानं तद् बुद्धिः ॥ १२१ ॥ ४ गाथा ११८ । ५ गाथा ११७ ।

[1]सोइंदिओवलद्धी चेव सुयं न उ तई सुयं चेव । सोइंदिओवलद्धी वि काइ जम्हा मइन्नाणं ॥ १२२॥

इह श्रोत्रेन्द्रियोपलब्धिशब्दस्य तृतीया-षष्ठीसमासः, बहुव्रीहिश्च; आद्यसमासद्वयेन भावश्रुतम्, बहुव्रीहिणा तु भावश्रुतानुपयु-क्तस्य वदतो द्रव्यश्रुतम्, तदुपयुक्तस्य तु ब्रुवत उभयश्रुतं गृहीतमिति प्राग्वृत्तौ दर्शितं सर्वं द्रष्टव्यम् । अवधारणविधिमपि प्रागुपदर्शि-तमाह– 'श्रोत्रेन्द्रियोपलब्धिरेव श्रुतं' इत्येवमवधारणीयम् । 'न उ तई ति' न पुनः 'सा श्रोत्रेन्द्रियोपलब्धिः श्रुतमेव' इति । कुतो नैवमवधार्यते ?, इत्याह– यस्माच्छ्रोत्रेन्द्रियोपलब्धिरपि काचिदश्रुतानुसारिणी अवग्रहे-हादिमात्ररूपा मतिज्ञानमेव, अतः 'श्रोत्रेन्द्रियोपल-ब्धिः श्रुतमेव' इति नावधार्यत इति भावः । एवं च सति '[2]नं नाम सोउग्गहादओ बुद्धी' इत्यादि परेण यत् प्रेरितं, तत् परिहृतं भवति, श्रोत्रावग्रहादीनामपि बुद्धिरूपतायाः समर्थितत्वात् ॥ इति गाथार्थः ॥ १२२ ॥

तदेवमवधारणविधिना श्रोत्रावग्रहादीनां मतित्वं समर्थितम्, यदि वा '[3]सेसयं तु मइनाणं' इत्यत्र योऽसौ तुशब्दः, ततोऽपि तेषां तत् समर्थ्यत इति दर्शयन्नाह–

[4]तुसमुच्चयवयणाओ व काई सोइन्दिओवलद्धी वि । मइरेवं सइ सोउग्गहादओ हुन्ति मइभेया ॥ १२३॥

'[3]सेसयं तु मइनाणं' इत्यत्र योऽसौ तुशब्दः समुच्चयवचनः, ततश्च किमुक्तं भवति ?–शेषकं मतिज्ञानं, काचिदनपेक्षित-परोपदेशार्हद्वचना श्रोत्रेन्द्रियोपलब्धिश्च मतिज्ञानमित्येवं वा श्रोत्रावग्रहादयो भवन्ति मतिभेदाः । तथा च सति मतेरष्टाविंशतिभेदत्वं न परिहीयते, ततश्च '[2]नं नाम सोउग्गहादओ बुद्धी' इत्यादि परमेर्यं प्रतिक्षिप्तमेव ॥ इति गाथार्थः ॥ १२३ ॥

मूलगाथाया व्याख्यातशेषं व्याख्यानयन्नाह—

[5]पत्ताइगयं सुयकारणं ति सद्दो व्व तेण दव्वसुयं । भावसुयमक्खराणं लाभो सेसं मइन्नाणं ॥ १२४ ॥

मूलगाथायां 'श्रोत्रावग्रहादयः, शेषकं च मतिज्ञानम्, इत्युक्ते शेषस्य सर्वस्याऽप्युत्सर्गतो मतित्वे प्राप्ते, अपवादः–'[3]मोत्तूणं दव्वसुयं ति' इत्युक्तम् । तत्र किं तद् द्रव्यश्रुतं यदिह वर्ज्यते ?, इत्याह भाष्यकारः–पत्रादिगतं पुस्तक-पत्रादिलिखितम्, तेन कार-णेन द्रव्यश्रुतं, येन किं ?, इत्याह– श्रुतकारणमिति । किंवत् ?, इत्याह– शब्दवदिति यथा भावश्रुतकारणत्वाच्छब्दो द्रव्यश्रुतम्,

---

१ श्रोत्रेन्द्रियोपलब्धिश्चैव श्रुतं न तु सा श्रुतं चैव । श्रोत्रेन्द्रियोपलब्धिरपि काचिद् यस्माद् मतिज्ञानम् ॥ १२२ ॥ २ गाथा ११८ । ३ गाथा ११७ । ४ तुसमुच्चयवचनाद् वा काचिच्छ्रोत्रेन्द्रियोपलब्धिरपि । मतिरेवं सति श्रोत्रावग्रहादयो भवन्ति मतिभेदाः ॥ १२३ ॥ ५ पत्रादिगतं श्रुतकारणमिति शब्द इव तेन द्रव्यश्रुतम्। भावश्रुतमक्षराणां लाभः शेषं मतिज्ञानम् ॥ १२४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा पुस्तक-पत्रादिन्यस्तमपि तत्कारणत्वाद् द्रव्यश्रुतमित्यर्थः। तद् मुक्त्वा शेषं शेषचक्षुरादीन्द्रियोपलब्धिरूपं मतिज्ञानम्। 'भावसुयमक्खराणमित्यादि' न केवलं श्रोत्रेन्द्रियोपलब्धिः श्रुतम्, यश्च श्रुतानुसारित्वाद् भावश्रुतं भावश्रुतरूपः शेषेषु चक्षुरादीन्द्रियेष्वक्षराणां लाभः परोपदेशार्हद्वचनानुसारिण्यक्षरोपलब्धिरित्यर्थः, सोऽपि श्रुतम्, इत्येवं मूलगाथायां संबन्धः कार्य इति हृदयम्, स च प्राग् वृत्तौ कृत एव। तस्माच्चाक्षरलाभाच्चक्षुरादीन्द्रियेषु यच्छेषमश्रुतानुसार्यवग्रहे-हाद्युपलब्धिरूपं, तद् मतिज्ञानम्, इत्येवमिहाऽप्येतत् संबध्यते॥ इति गाथार्थः॥ १२४॥

अथ परः पूर्वापरविरोधमुद्भावयन्नाह–

[1]जइ सुयमक्खरलाभो न नाम सोओवलद्धिरेव सुयं। सोओवलद्धिरेवक्खराइं सुइसंभवाउ त्ति॥ १२५॥

इयमपि प्राग् मूलगाथावृत्तौ दर्शितार्थैव, तथापि विस्मरणशीलानामनुग्रहार्थं किञ्चिद् व्याख्यायते। ननु यद्युक्तन्यायेन शेषेन्द्रियाक्षरलाभोऽपि श्रुतम्, तर्हि 'श्रोत्रेन्द्रियोपलब्धिरेव श्रुतम्' इति यदवधारणं कृतं, तदसङ्गतं प्राप्नोति, शेषेन्द्रियाक्षरलाभस्यापि श्रुतत्वात्। अत्रोत्तरमाह–'सोओवलद्धिरेवेत्यादि' यद्यसौ शेषेन्द्रियाक्षरलाभोऽपि श्रोत्रेन्द्रियोपलब्धिर्न स्यात्, तदा स्यादेवाऽवधारणमसंगतम्, तच्च नास्ति, यतः शेषेन्द्रियद्वाराऽऽयातज्ञानेऽपि प्रतिभासमानान्यक्षराणि श्रोत्रेन्द्रियोपलब्धिरेव॥

अहो! महदाश्चर्यं, यतो यदि शेषेन्द्रियाक्षरलाभः, कथं श्रोत्रोपलब्धिः?; सा चेत्, कथं शेषेन्द्रियाक्षरलाभः?, इत्याशङ्क्याह–'सुइसंभवाउ त्ति' शेषेन्द्रियज्ञानप्रतिभासभाञ्जि अक्षराणि श्रोत्रोपलब्धिरेव। कुतः?, इत्याह– तेषां श्रुतेः श्रवणस्य संभवात्, इदमुक्तं भवति– अभिलापरूपाणि ह्येतान्यक्षराणि, अभिलापश्च तस्मिन् वा विवक्षिते काले, अन्यदा वा; तत्र वा विवक्षिते पुरुषे, अन्यत्र वा श्रवणयोग्यत्वाच्छ्रोत्रेणोपलभ्यते। अतः श्रोत्रोपलम्भयोग्यत्वेन श्रुतिसंभवात् सर्वोऽप्यभिलापः श्रोत्रोपलब्धिरेव; इति न किञ्चिदवधारणं विरुध्यते॥ इति गाथार्थः॥ १२५॥

किं सर्वोऽपि शेषेन्द्रियाक्षरलाभः श्रुतम्, आहोस्वित् कश्चिदेव?, इत्याह–

[2]सोऽवि हु सुयक्खराणं जो लाभो तं सुयं मई सेसा। जइ वा अणक्खरच्चिय सा सव्वा न प्पवत्तेज्जा॥१२६॥

---

१ यदि श्रुतमक्षरलाभो न नाम श्रोत्रोपलब्धिरेव श्रुतम्। श्रोत्रोपलब्धिरेवाऽक्षराणि श्रुतिसंभवादिति॥ १२५॥

२ सोऽपि खलु श्रुताक्षराणां यो लाभस्तत् श्रुतं मतिः शेषः। यदि वाऽनक्षरैव सा सर्वा न प्रवर्तेत॥ १२६॥

सोऽपि च शेषेन्द्रियाक्षरलाभः स एव श्रुतं, यः किम्?, इत्याह– यः श्रुताक्षराणां लाभः, न सर्वः, यः संकेतविषयशब्दानुसारी, सर्वज्ञवचनकारणो वा विशिष्टः श्रुताक्षरलाभः, स एव श्रुतम्, न त्वश्रुतानुसारी; ईहा-ऽपायादिषु परिस्फुरदक्षरलाभमात्रमित्यर्थः। 'जइ व त्ति' यदि पुनरक्षरलाभस्य सर्वस्यापि श्रुतेन क्रोडीकरणादनक्षरैव मतिरभ्युपगम्येत, तदा सा यथाऽवग्रहे-हा-ऽपायधारणारूपा सिद्धान्ते प्रोक्ता, तथा सर्वाऽपि न प्रवर्तेत सर्वाऽपि मतित्वं नानुभवेदित्यर्थः, किन्त्वनक्षरत्वादवग्रहमात्रमेव मतिः स्यात्, न त्वीहादयः, तेषामक्षरलाभात्मकत्वात्। तस्माच्छ्रुतानुसार्येवाऽक्षरलाभः श्रुतम्, शेषं तु मतिज्ञानम्॥ इति गाथार्थः॥ १२६॥

तदेवं व्याख्याता भाष्यकृताऽपि 'सोइंदिओवलद्धी' इत्यादिगाथा; सांप्रतं त्वस्यां यः श्रुतविषयः पर्यवसितोऽर्थः प्रोक्तो भवति, तं संपिण्ड्योपदर्शयति–

[3]दव्वसुयं भावसुयं उभयं वा किं कहं व होज्ज त्ति। को वा भावसुयंसो दव्वाइसुयं परिणमेज्जा?॥१२७॥

इह 'सोइंदिओवलद्धी' इत्येतस्यां गाथायां 'मोत्तूणं दव्वसुयं' इत्यनेन पुस्तकादिन्यस्तं द्रव्यश्रुतमुक्तम्, अक्षरलाभवचनात्तु भावश्रुतम्, श्रोत्रेन्द्रियोपलब्धिवचनेन तु शब्दः, तद्विज्ञानं चेत्युभयश्रुतमुक्तम्। तत्राऽनन्तरवक्ष्यमाणपूर्वगतगाथायामेतच्चिन्त्यते– किं तद् द्रव्यादिश्रुतम्?, कथं वा तद् भवति?, को वा कियान् वेत्यर्थः, भावश्रुतस्यांशो भागो द्रव्यश्रुतं द्रव्यश्रुतरूपतया, आदिशब्दादुभयश्रुतरूपतया वा परिणमेत्?॥ इति गाथार्थः॥ १२७॥

का पुनरसौ पूर्वगतगाथा?, इत्याह–

[4]बुद्धिदिट्ठे अत्थे जे भासइ तं सुयं मईसहियं। इयरत्थ वि होज्ज सुयं उवलद्धिसमं जइ भणेज्जा॥ १२८॥

मति-श्रुतयोर्भेदोऽत्र विचार्यत्वेन प्रस्तुतः, इत्यतः केचिदेतां गाथां तदनुयायित्वेन व्याख्यानयन्ति; भाष्यकारस्तु तेनाऽपि प्रकारेण पश्चाद् व्याख्यास्यति, सांप्रतं तु प्रस्तावनाऽनुयायित्वेन तावद् व्याख्यायते– तत्र बुद्धिः श्रुतरूपेह गृह्यते, तया दृष्टा गृहीताः पर्यालोचिता बुद्धिदृष्टा अभिलाप्या अर्थाः पदार्थाः, ते च बहवः सन्ति, अतस्तन्मध्याद् वक्ता यान् भाषते वक्ति तच्छ्रुतम्। कथं यान् भाषते?, इत्याह– मतिः श्रुतोपयोगरूपा तत्सहितं यथा भवति, एवं यान् भावान् भाषते तच्छ्रुतमुभयरूपमित्यर्थः। इदमुक्तं भवति–

---

१ गाथा ११७। २ द्रव्यश्रुतं भावश्रुतमुभयं वा किं कथं वा भवेदिति। को वा भावश्रुतांशो द्रव्यादिश्रुतं परिणमेत्?॥ १२७॥

३ बुद्धिदृष्टेऽर्थे यान् भाषते तत् श्रुतं मतिसहितम्। इतरत्राऽपि भवेत् श्रुतमुपलब्धिसमं यदि भणेत्॥ १२८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुतात्मकबुद्ध्युपलब्धानर्थांस्तदुपयुक्तस्यैव वदतो द्रव्यश्रुतभावश्रुतरूपमुभयश्रुतं भवति, तच्छ्रुतमित्युक्तेऽपि सामर्थ्यादुभयश्रुतं लभ्यते 'जे भासइ' इत्यनेन शब्दरूपस्य द्रव्यश्रुतस्य सूचितत्वात्, 'बुद्धिदिट्ठे अत्थे' इत्यनेन, 'मईसहियं' इत्यनेन च भावश्रुतस्याऽभिधित्सितत्वादिति। तदेतावता 'सोइंदिओवलद्धी' इत्यादिगाथोक्तस्योभयश्रुतस्य स्वरूपमुक्तम्; यान् पुनः प्रथमं श्रुतबुद्ध्या दृष्टानपि पश्चादभ्यासबलादेवाऽनुपयुक्तो वक्ति तद् द्रव्यश्रुतम्, इत्येतावद् गाथायामनुक्तमपि सामर्थ्याद् गम्यते; तथा यान् श्रुतबुद्ध्या पश्यत्येव, न तु मनसि स्फुरतोऽपि भाषते तद् भावश्रुतम्, इतीदमपि स्वयमेवाऽवगन्तव्यम्। तदेतावता किं तद् द्रव्यादिश्रुतम्?, कथं वा तद् भवति?, इत्येवं चिन्तितम्। अथ 'कौ वा भावसुयंसो' इत्यादि चिन्त्यते- तत्र भावश्रुतमुभयश्रुताद् द्रव्यश्रुताच्चाऽनन्तगुणम्, एतस्माच्चोभयश्रुतं द्रव्यश्रुतं चानन्ततमे भागे वर्तत इति भावनीयम्, वाचः क्रमवर्तित्वात्, आयुषश्च परिमितत्वात् सर्वेषामपि भावश्रुतविषयभूतानामर्थानामनन्ततममेव भागं वक्ता भाषत इति भावः। ततश्च भावश्रुतस्याऽनन्ततम एव भागो द्रव्यश्रुतत्वेनोभयश्रुतत्वेन च परिणमतीत्युक्तं भवति। एतच्च सर्वमनन्तरमेव भाष्यकारः स्वयमेव विस्तरतो भणिष्यतीत्यलं विस्तरेण॥

आह- ननु यानुपयुक्तो भाषते तदुभयश्रुतम्, यांस्त्वनुपयुक्तो वक्ति तद् द्रव्यश्रुतमित्युक्तम्; यांस्तर्हि न भाषते, केवलं श्रुतबुद्ध्या पश्यत्येव, तत्रापि द्रव्यश्रुतरूपता, उभयश्रुतरूपता च किमिति नेष्यते?; इत्याशङ्क्याह-'इयरत्थ वीत्याद्युत्तरार्धं' 'जे भासइ तं सुयं' इत्युक्ते तत्प्रतियोगिस्वरूपमभाषमाणावस्थाभावि भावश्रुतमेव इतरत्र शब्दवाच्यं भवति। ततश्चायमर्थः-द्रव्यश्रुतोभयश्रुताभ्यामितरत्रापि भावश्रुते भवेत् श्रुतं-द्रव्यश्रुतरूपता, उभयश्रुतरूपता वा भवेदित्यर्थः। यदि किं स्यात्?, इत्याह-उपलम्भनमुपलब्धिस्तत्समं तत्प्रमाणं यदि भणेत्-यावद् वस्तुनिकुरम्बमुपलभते तावत्सर्वमुपयुक्तोऽनुपयुक्तो वा यदि वदेदित्यर्थः; एतच्च नास्ति, श्रुतोपलब्ध्या उपलब्धानामर्थानामनन्तत्वात्, वाचः क्रमवर्तित्वात्, आयुषश्च परिमितत्वादिति। तस्मादभिलाप्यानां श्रुतोपलब्ध्या समुपलब्धानां भावानां मध्यात् सर्वेणाऽपि जन्मनाऽनन्ततममेव भागं भाषते वक्ता, अतस्तत्रैवाऽनुपयुक्तस्य वदतो द्रव्यश्रुतरूपता, उपयुक्तस्य तु वदत उभयश्रुतरूपता भवेत्, नेतरत्र भावश्रुते, भाषणस्यैवाऽसंभवात्॥ इति पूर्वगतगाथार्थः॥ १२८॥(ग्रन्थाग्रं - २०००)

तदेवं व्याख्याताऽस्माभिरियं गाथा, साम्प्रतं भाष्यकारस्तद्व्याख्यानमाह—

[1]जे सुयबुद्धिदिट्ठे सुयमइसहिओ पभासई भावे। तं उभयसुयं भन्नइ दव्वसुयं जे अनुवउत्तो॥ १२९॥

गतार्थैव, नवरं सुखार्थं किञ्चिद् व्याख्यायते-श्रुतरूपा यका बुद्धिस्तया दृष्टाः पर्यालोचिता ये भावास्तन्मध्याद् 'मईसहियं'

१ गाथा ११७। २ गाथा १२७। ३ यान् श्रुतबुद्धिदृष्टान् श्रुतमतिसहितः प्रभाषते भावान्। तदुभयश्रुतं भण्यते द्रव्यश्रुतं यानुपयुक्तः॥ १२९॥ ४ गाथा १२८।

इत्यस्य तात्पर्यव्याख्यानमाह-- श्रुतात्मकमतिसहितः श्रुतोपयुक्त इति यावत्, यान् भावान् प्रभाषते तद् द्रव्य-भावरूपमुभयश्रुतं भण्यते। यान् पुनरनुपयुक्तो भाषते तद् द्रव्यश्रुतं शब्दमात्रमेवेत्यर्थः। यांस्तु श्रुतबुद्ध्या पर्यालोचयत्येव केवलं, न तु भाषते, तद् भावश्रुतमित्यर्थाद् गम्यते॥ इति गाथार्थः॥ १२९॥

उत्तरार्धव्याख्यानयाह—

[1]इयरत्थ वि भावसुये होज्ज तय तस्समं जइ भणिज्जा। न य तरइ तत्तियं सो जमणेगगुणं तयं तत्तो॥१३०॥

यद् भाषते तदुभयश्रुतं द्रव्यश्रुतं वेत्युक्ते भावश्रुतमेवेतरत्रशब्दवाच्यं गम्यते। ततश्चेतरत्राऽपि भावश्रुते भवेत् तद् द्रव्यश्रुतमुभयश्रुतं वा, यदि तत्सममुपलब्धिसमं भणेत्, तच्च नास्ति, यस्माच्छ्रुतज्ञानी स्वबुद्ध्या यावदुपलभते तावद् वक्तुं 'न तरति' न शक्नोति। कुतः?, इत्याह-यद् यस्मात् कारणात् ततो भाषाविषयीकृताच्छ्रुतात् तदशक्यभाषणक्रियं भावश्रुतमनेकगुणमनन्तगुणम्, अतो नोपलब्धिसमं भणति॥ इति गाथार्थः॥ १३०॥

उपलब्धिसममित्येतस्य समासविधिमाह-

[2]सह उवलद्धीए वा उवलद्धिसमं तया व जं तुल्लं। जं तस्समकालं वा न सव्वहा तरइ वोत्तुं जे॥१३१॥

यद् भाषणमुपलब्ध्या सह वर्तते तदुपलब्धिसमम्, प्राकृतशैलीनिपातनात् सहस्य समभावः, या या श्रुतोपलब्धिस्तया तया सह यद् भाषणं तदुपलब्धिसममित्यर्थः, 'तया व जं तुल्लं ति' तया वोपलब्ध्या यत्तुल्यं समानं तदुपलब्धिसमं-यावती काचिच्छ्रुतोपलब्धिस्तत्तुल्यं तत्संख्यं यद्भाषणं तद् वोपलब्धिसममित्यर्थः। 'जं तस्समकालं वेति' तयोपलब्ध्या समकालं वा यद् भाषणं तदुपलब्धिसमम्, यथा मध्ये शूलं वेदयतस्तत्समकालमेवाऽन्यस्मै तद्व्यथाकथनम्, एवमन्तः सर्वामपि श्रुतोपलब्धिमनुभवतस्तत्समकालमेव यद् भाषणं तद् वोपलब्धिसममिति भावः। किं बहुना?, सर्वथा सर्वस्मिन्नपि समासविधावयं तात्पर्यार्थः। कः?, इत्याह-श्रुतज्ञानी यावच्छ्रुतबुद्ध्या समुपलभते, तावत् सर्वं न तरति न शक्नोति वक्तुम्। 'जे' इत्यलङ्कारमात्रे॥ इति गाथार्थः॥१३१॥

अथ कथं पुनरन्ये एतां गाथां मति-श्रुतभेदार्थे व्याख्यानयन्ति?, इत्याह-

१ इतरत्राऽपि भावश्रुते भवेत् तत् तत्समं यदि भणेत्। न च तरति (शक्नोति) तावत् स यदनेकगुणं तत् ततः॥ १३०॥ ×-चे-।
२ सहोपलब्ध्या वोपलब्धिसमं तया वा यत् तुल्यम्। यत् तत्समकालं वा न सर्वथा तरति (शक्नोति) वक्तुम्॥ १३१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]केई बुद्धिदिट्ठे मइसहिए भासओ सुयं, तत्थ । किं सद्दो मइरुभयं भावसुयं सव्वहाऽजुत्तं ॥ १३२ ॥

इह केचनाऽप्याचार्या मति-श्रुतयोर्भेदं प्रतिपिपादयिषवो 'बुद्धिदिट्ठे अत्थे जे भासइ' इत्यादिमूलगाथायां 'बुद्धिः श्रुतबुद्धिः' इति न व्याख्यानयन्ति, किन्तु 'बुद्धिर्मतिः' इति व्याचक्षते । ततश्च बुद्ध्या मत्या दृष्टेषु बहुष्वर्थेषु मध्ये कांश्चित् तद्दृष्टानर्थान् मति-सहितान् भाषमाणस्य श्रुतं भवति ॥

आह– ननु मतिज्ञान्येव मतिसहितो भवति, तत् कथमर्थानां मतिसहितत्वं विशेषणम् ?। सत्यम्, किन्तु मूलगाथायां 'मई-सहियं' इति वचनाद् मत्युपयोगे वर्तमानोऽत्र वक्ता गृह्यते, अतस्तस्य मत्युपयोगसहितत्वादर्थानामप्युपचारतस्तत्सहितत्वमुच्यते। तस्माद् मतिज्ञानदृष्टानर्थांस्तदुपयुक्तस्यैव भाषमाणस्य श्रुतं भवतीति तात्पर्यम्; अनुपयुक्तस्य तु वदतो द्रव्यश्रुतम्, पारिशेष्यादभाषमाणस्य पदार्थपर्यालोचनमात्ररूपं मतिज्ञानम्, इति मति-श्रुतयोर्भेदः । तदेवं कैश्चिद् मूलगाथायाः पूर्वार्धे व्याख्याते सूरिर्दूषणमाह–'तत्थ किं सद्दो इत्यादि' तत्र तैरेवं व्याख्याते भावश्रुतं सर्वथैवाऽयुक्तं स्यात् सर्वथा तदभावः प्राप्नोतीत्यर्थः, तथाहि– किं भाष्यमाणः शब्दो भावश्रुतम्, मतिर्वा, उभयं वा ? इति त्रयी गतिः । अस्य च त्रितयस्य मध्ये नैकमपि भावश्रुतं युक्तमिति भावः॥इति गाथार्थः॥१३२॥

कथम् ?, इत्याह–

[2]सद्दो ता दव्वसुयं मइराभिणिबोहियं नवा उभयं । जुत्तं, उभयाभावे भावसुयं कत्थ तं किंवा ? ॥१३३॥

मत्युपयुक्तस्य शब्दमुदीरयतो यस्तावच्छब्दः स द्रव्यश्रुतमेव, इति कथं भावश्रुतं स्यात् ?, मतिस्त्वाभिनिबोधिकज्ञानम् । भवतु तर्हि मति-शब्दलक्षणमुभयं समुदितं भावश्रुतम्, इत्याह– 'नवा उभयं जुत्तं ति' नैव यथोक्तमुभयं समुदितमपि भावश्रुतं युक्तम्, प्रत्येकावस्थायां तद्भावाभावात्, न हि प्रत्येकं सिकताकणेष्वसत् तैलं समुदितावस्थायामपि भवतीति भावः । तदेवमुभयस्य स्वतन्त्रस्याऽस्वतन्त्रस्य वा भावश्रुतत्वेनाऽभावे सति तद् भावश्रुतं क्व शब्दादौ ?, किंवा तत् ?, न किञ्चिदिति भावः ॥ इति गाथार्थः ॥ १३३ ॥

अथ भाषापरिणतिकाले मतेः किमप्याधिक्यमुपजायते, इत्युभयस्य श्रुतत्वं न विरुध्यते; इत्याह–

+उ-1 १ केचिद् बुद्धिदृष्टान् मतिसहितान् भाषमाणस्य श्रुतं, तत्र । किं शब्दो मतिरुभयं भावश्रुतं सर्वथाऽयुक्तम् ॥ १३२ ॥

२ गाथा १२८ । ३ शब्दस्तावद् द्रव्यश्रुतं मतिराभिनिबोधिकं नवोभयम् । युक्तं, उभयाभावे भावश्रुतं क्व तत् किंवा ? ॥ १३३ ॥

[1]भासापरिणइकाले मईए किमहियमहण्णहत्तं वा ? । भासासंकप्पविसेसमेत्तओ वा सुयमजुत्तं ॥१३४॥

मतेरन्तर्विज्ञानविशेषस्य भाषापरिणतिकाले शब्दप्रारम्भवेलायां पूर्वावस्थातः किमधिकं रूपं संपद्यते ?, येनोभयावस्थायां सा ज्ञानान्तरं स्यात् श्रुतव्यपदेशः स्यादित्यर्थः । 'अहण्णहत्तं वेति' अथवा अन्यथात्वं किं मतेर्भाषापरिणतिकाले निर्मूलत एवाऽन्यथा-भावः कः, येन श्रुतत्वं स्यात् ?, न कश्चिंदिति भावः । भाषाऽऽरम्भ एवाऽत्र विशेषः, इति चेत्; इत्याह--'भासेत्यादि' भाषायाः संकल्पारम्भः स एव विशेषमात्रं, मात्रशब्दो मनागपि विकारभवननिषेधार्थः, तस्माद् भाषासंकल्पविशेषमात्राद् मतेः श्रुतत्वमयुक्तम्; एतदुक्तं भवति-- अन्तर्विज्ञानस्य स्वयमविशिष्टस्य बाह्यक्रियारम्भादत्यन्तजातिभेदाभ्युपगमे धावन-वल्गन-करास्फोटनादिबाह्यक्रियाऽऽनन्त्याद् मतेरानन्त्यमेव स्यात्, स्वयं चाऽनुपजातविशेषाणां ज्ञानानां शब्दपरिणतिसंनिधानमात्रत एव ज्ञानान्तरत्वेऽतिप्रसङ्गः स्यात्, अवध्यादिष्वपि तथाप्राप्तेः ॥ इति गाथार्थः ॥ १३४ ॥

तदेवं कैश्चिद् विहितं मूलगाथायाः पूर्वार्धव्याख्यानं दूषितम्, अथोत्तरार्धव्याख्यानमुपदर्श्य दूषयितुमाह--

[2]इयरत्थ वि मइनाणे होज्ज सुयं ति किह तं सुयं होइ ? । किह व सुयं होइ मई सलक्खणावरणभेयाओ?॥१३५॥

'बुद्धिदिट्ठे अत्थे' इत्यत्र बुद्धिर्यैर्मतिज्ञानं व्याख्यातम्, तन्मतेन 'इयरत्थ वि होज्ज सुयं उवलद्धिसमं जइ भणेज्जा' इत्यु-त्तरार्धगतस्येतरत्रशब्दस्य मतिज्ञानमेव वाच्यम्, शब्दसहितमतेर्द्रव्यभावश्रुतत्वेनोक्तत्वात्, तदितरस्य मतिज्ञानस्यैव तत्र संभवात् । ततश्च तद्व्याख्यानमनूद्य दूषयति– इतरत्रापि मतिज्ञाने श्रुतं भवेद् यद्युपलब्धिसमं भाषेत इति यत्तैरुच्यते, तदयुक्तम्, यतो हन्त ! यद् मतिज्ञानं, तत् कथं श्रुतं भवितुमर्हति ?। श्रुतं चेत्, कथं वा तद् मतिर्भवेत् ?। कुतः पुनरित्थं न भवति ?, इत्याह– मति-श्रुतयोर्यत् स्वकीयं लक्षणं, कर्म चाऽऽवारकं, तयोर्भेदेनाऽऽगमे प्रतिपादनात् । यदि च यदेव मतिज्ञानं तदेव श्रुतम्, यदेव च श्रुतं तदेव मतिज्ञानं स्यात्, तदा लक्षणा-ऽऽवरणभेदोऽपि तयोर्न स्यात् ॥ इति गाथार्थः ॥ १३५ ॥

तदेवं 'बुद्धिदिट्ठे अत्थे जे भासइ' इत्यादिमूलगाथां मति-श्रुतभेदप्रतिपादनपरतया व्याचिख्यासोः परस्य 'मतिर्भावश्रुतं न युज्यते' इति प्रतिपादितम् । यदि तु द्रव्यश्रुतं साऽभ्युपगम्यते तदा न दोषः, इत्युपदर्शयन्नाह–

---

१ भाषापरिणतिकाले मत्या किमधिकमथाऽन्यथात्वं वा ? । भाषासंकल्पविशेषमात्रतो वा श्रुतमयुक्तम् ॥ १३४ ॥

२ इतरत्रापि मतिज्ञाने भवेत् श्रुतमिति कथं तत् श्रुतं भवति ? । कथं वा श्रुतं भवति मतिः स्वलक्षणाऽऽवरणभेदात् ? ॥ १३५ ॥ ३ गाथा १२८ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अहव मई दव्वसुयत्तमेउ भावेण सा विरुज्झेज्जा । जो असुयक्खरलाभो तं मइसहिओ पभासेज्जा ॥१३६॥

अथवा मतिर्द्रव्यश्रुतत्वमेतु- आगच्छतु न तत्र वयं निषेद्धारः, केवलमेतदेव निर्बन्धेनाऽभिदध्मो यदुत– भावेन भावश्रुतत्वेन सा मतिर्विरुध्येत दर्शितन्यायेन विरोधमनुभवेत्, इदमुक्तं भवति– 'केई बुद्धिविट्ठे मइसहिए भासओ सुयं' इत्यत्र गाथार्धे योऽसौ श्रुतशब्दः स यदि द्रव्यश्रुतवाचित्वेन व्याख्यायते तदा विरोधो न भवति । कथम् ?, इति चेत् । उच्यते– बुद्धिर्मतिस्तद्दृष्टान् मत्युपयोगसहितानर्थान् भाषमाणस्य सा मतिः शब्दलक्षणस्य द्रव्यश्रुतस्य कारणत्वाद् द्रव्यश्रुतम्, अभाषमाणस्य तु मतिज्ञानम्, इत्येवं मति-द्रव्यश्रुतयोर्भेदः प्रोक्तो भवति, न तु मति-श्रुतज्ञानयोः केवलं विरोधपरिहारमात्रमित्थमुपकल्पितं भवति ॥

अत्राह कश्चित्– ननु यदि मत्युपयोगे वर्तमानो भाषेत कश्चित्, तदा द्रव्यश्रुतकारणत्वाद् मतिः स्याद् द्रव्यश्रुतम्, एतच्च न भविष्यति; इत्याह– ' जो असुयेत्यादि ' योऽश्रुतानुसार्यक्षरलाभः, तं मत्युपयोगे वर्तमानो भाषेत वक्ता, नात्र कश्चित् संदेहः; यस्तु श्रुतानुसार्यक्षरलाभस्तं श्रुतोपयोगे एव वर्तमानो भाषेत, अतो न तच्छब्दस्य मतिः कारणम्, श्रुतपूर्वत्वात् तस्येति भावः; इदमुक्तं भवति– यः परोपदेशार्हद्वचनलक्षणं श्रुतमनुसृत्याऽक्षरलाभोऽन्तः स्फुरति तं श्रुतोपयोगे एव वर्तमानो भाषते, यस्त्वश्रुतानुसारी स्वमत्यैव पर्यालोचित ईहा-ऽपायेषु स्फुरत्यक्षरलाभः, तं यदा मत्युपयोगसहित एव भाषते, तदा तस्य शब्दलक्षणस्य द्रव्यश्रुतस्य कारणत्वाद् भवत्येव मतिर्द्रव्यश्रुतम् ॥ इति गाथार्थः ॥ १३६ ॥

अथाऽस्मिन्नेव मतेर्द्रव्यश्रुतत्वपक्षे ' ईयरत्थ वि होज्ज सुयं ' इत्यादौ मूलगाथाया उत्तरार्धे योऽर्थः संपद्यते तमाचार्यः प्रदर्शयन्नाह—

ईयरम्मि वि मइनाणे होज्ज तयं तस्समं जइ भणेज्जा । न य तरइ तत्तियं सो जमणेगगुणं तयं तत्तो ॥१३७॥

भाषमाणस्य मतिर्द्रव्यश्रुतमित्युक्तम्, अतोऽभाषमाणावस्थाभावि मतिज्ञानमितरत्रशब्दवाच्यं भवति । ततश्चेतरत्राप्यभाषमाणावस्थाभाविनि मतिज्ञाने भवेत् तद् द्रव्यश्रुतं यदि तत्समं मतिज्ञानोपलब्धिसमं भणेत्, यावद् मतिज्ञानेनोपलभते तावत् सर्वं वदेदित्यर्थः; एतच्च नास्ति । कुतः ? इत्याह– न च नैव 'तरति' शक्नोति स यावद् मतिज्ञानेनोपलभते तावद् वक्तुम् । कुतः ? इत्याह–

---

१ अथवा मतिर्द्रव्यश्रुतत्वमेतु भावेन सा विरुध्येत । योऽश्रुताक्षरलाभस्तं मतिसहितः प्रभाषेत ॥ १३६ ॥ २ गाथा १३२ ।

३ गाथा १२८ । ४ इतरस्मिन्नपि मतिज्ञाने भवेत् तत् तत्समं यदि भणेत् । न च तरति (शक्नोति) तावत् स यदेनकगुणं तत् ततः ॥ १३७ ॥

यद् यस्मात् ततो वक्तुं शक्यात् तत् सर्वमपि मतिज्ञानोपलब्धमनेकगुणमनन्तगुणम् ॥ इति गाथार्थः ॥ १३७ ॥

अत्र विनेयः प्राह–

कैह मइ-सुओवलद्धा तीरंति न भासिउं, बहुत्ताओ । सव्वेण जीविएण वि भासइ जमणंतभागं सो ॥१३८॥

नन्वनन्तरगाथायां मत्युपलब्धाः सर्वेऽपि वक्तुं न शक्यन्त इत्युक्तम्, पूर्वं तु श्रुतोपलब्धा अपि सर्वेऽभिधातुं न पार्यन्त इत्यभिहितम्; तदेतत् कथं, यद् मति-श्रुतोपलब्धा भावा न तीर्यन्ते भाषितुम् ? । अत्राह– बहुत्वात् प्राचुर्यात् । तत्रैतत् स्यात्– कुतः पुनरेतावद् बहुत्वं तेषां निश्चितम् ? इत्याह– यद् यस्मात् कारणात् सर्वेणाऽप्यायुषा स मति-श्रुतज्ञानी समुपलब्धानामर्थानामनन्ततममव भागं भाषत इत्यागमे निर्णीतम्, तस्माद् बहुत्वावगमः ॥ इति गाथार्थः ॥ १३८ ॥

अथ मत्याद्युपलब्धार्थानां सामस्त्येनाऽभिधानाशक्यत्वे पूर्वोक्तम्, अपरमपि च हेतुं विषयविभागेनाऽभिधित्सुराह–

तीरंति न वोत्तुं जे सुओवलद्धा बहुत्तभावाओ । सेसोवलद्धभावा साभव्वबहुत्तओऽभिहिया ॥१३९॥

सर्वेऽपि श्रुतोपलब्धा भावा न तीर्यन्ते न पार्यन्ते वक्तुम् । 'जे' इति पूर्ववदेव । कुतस्ते वक्तुं न पार्यन्ते ?, इत्याह– बहुत्वभावाद् बहुत्वसद्भावादेवेत्यवधारणीयम्, न तु तत्स्वाभाव्यादित्यभिप्रायः । ' सेसोवलद्धभावा साभव्वत्ति ' शेषं श्रुतादन्यत् प्रस्तुतं मतिज्ञानं, समानवक्तव्यताप्रस्तावलब्धानि मत्य-ऽवधि-मनःपर्याय–केवलानि वा शेषाणि तेन तैर्वा उपलब्धा ज्ञाताः शेषोपलब्धास्ते च ते भावाश्चेति समासः, स्वाभाव्यादेवाऽनभिलाप्यात्मकत्वादेव न तीर्यन्ते भाषितुम् ॥

आह– नन्वेते यथाऽनभिलाप्यत्वादभिधातुं न शक्यन्ते, तथा बहुत्वादपि, तत् किमित्यनभिलाप्यस्वभावत्वमेवैकमत्र हेतुत्वेनोच्यते ?। सत्यम्, किन्त्वभिलाप्यत्वे सति बहुत्वा-ऽल्पत्वचिन्ता क्रियमाणा विभ्राजते, ये तु मूलत एवाऽनभिलाप्यास्तेषु बहुत्वलक्षणो हेतुरुच्यमानोऽपि निष्फल एव, अनभिलाप्यात्मकत्वेनैवाऽभिधानाशक्यत्वस्य सिद्धत्वादिति ॥ किञ्च, ' बहुत्तओऽभिहियं त्ति बहुत्वाच्छेषोपलब्धा भावा यथा वक्तुं न शक्यन्ते तथा ' कैह मइसुओवलद्धा तीरन्ति न भासिउं, बहुत्ताओ ' इत्याद्यनन्तरगाथायामभिहिता एव, इति किं बहुत्वहेतूपन्यासेन ?, पौनरुक्त्यप्रसङ्गात् । शेषज्ञानेषु मध्ये मतिरेव स तत्र प्रोक्तः, अत्र त्ववध्यादीन्यपि गृहीतानि सन्ति, अतस्तदर्थमयमिहापि वक्तव्य इति चेत् । नैवम्, मतेरुपलक्षणत्वेनाऽवध्यादिष्वप्यसौ तत्र द्रष्टव्य इत्यदोषः । यद्येवम्, तर्हि

---

१ कथं मतिश्रुतोपलब्धा तीर्यन्ते न भाषितुं, बहुत्वात् । सर्वेण जीवितेनाऽपि भाषते यदनन्तभागं सः ॥ १३८ ॥ मते–।

२ तीर्यन्ते न वक्तुं श्रुतोपलब्धा बहुत्वात् । शेषोपलब्धभावा स्वाभाव्य-बहुत्वतोऽभिहिताः ॥ १३९ ॥ ३ गाथा १३८ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुतस्याऽपि बहुत्वलक्षणो हेतुः प्रागुक्त एव, किमितीह पुनरप्युच्यत ? इति चेत् । सत्यम्, किन्तु श्रुतोपलब्धा बहुत्वात्, शेषोपलब्धास्तु तत्स्वाभाव्याद् न शक्यन्तेऽभिधातुम्, इति विषयविभागदर्शनार्थं तस्येह पुनरुपन्यासः ॥

अपरस्त्वाह— ननु मत्याद्युपलब्धानामपि केषाञ्चिदभिलाप्यत्वात् किमुच्यते ' सेसोवलद्धभावा साभव्वत्ति ' ? । सत्यम्, किन्तु तेषां श्रुताविषयत्वेनैवाऽभिधानाशक्यत्वस्योक्तत्वाददोषः ॥ इति गाथार्थः ॥ १३९ ॥

विनेयः पृच्छति—

कत्तो एत्तियमेत्ता भावसुय-मईण पज्जया जेसिं ? । भासइ अणंतभागं, भण्णइ जम्हा सुएऽभिहियं ॥१४०॥

कुतः पुनरेतावन्तो भावश्रुत-मत्योः पर्याया उपलब्धार्थविषया विशेषाः, येषां सर्वेणापि जन्मनाऽनन्तभागमेव भाषत इति प्रागुक्तम् ?। अत्र गुरुराह—भण्यतेऽत्रोत्तरम्— यस्मात् सूत्रे आगमे वक्ष्यमाणमभिहितम्, तस्मात्तयोरेतावन्तः पर्यायाः ॥ इति गाथार्थः॥१४०॥

किं तत् सूत्रेऽभिहितम् ? इत्याह—

पण्णवणिज्जा भावा अणंतभागो उ अणभिलप्पाणं । पण्णवणिज्जाणं पुण अणंतभागो सुयनिबद्धो ॥१४१॥

प्रज्ञाप्यन्ते प्ररूप्यन्त इति प्रज्ञापनीया वचनपर्यायत्वेन श्रुतज्ञानगोचरा इत्यर्थः । के ? भावा ऊर्ध्वाधस्तिर्यग्लोकान्तर्निविष्टभूभवन-विमान-ग्रह-नक्षत्र-तारका-ऽर्केन्द्रादयस्ते सर्वेऽपि मिलिताः । किम् ? इत्याह—अनन्ततम एव भागे वर्तन्ते । केषाम् ?, अत्राह— अनभिलाप्यानामर्थपर्यायत्वेनाऽवचनगोचरापन्नानामित्यर्थः, अनभिलाप्यवस्तुराशेरभिलाप्यपदार्थसार्थः सर्वोऽप्यनन्ततम एव भागे वर्तत इत्यर्थः । प्रज्ञापनीयपदार्थानां पुनरनन्तभाग एव चतुर्दशपूर्वलक्षणे श्रुते निबद्धो भगवद्भिर्गणधरैः साक्षाद् ग्रथितः ॥ इति गाथार्थः ॥१४१॥

कुतः पुनरेतद् विज्ञायते यदुत— प्रज्ञापनीयानामनन्तभाग एव श्रुतनिबद्धः ?, इत्याह—

जं चोद्दसपुव्वधरा छट्ठाणगया परोप्परं होंति । तेण उ अणंतभागो पण्णवणिज्जाण, जं सुत्तं ॥१४२॥

यद् यस्मात् कारणाच्चतुर्दशपूर्वधराः षट्स्थानपतिताः परस्परं भवन्ति, हीनाधिक्येनेति शेषः, तथाहि— सकलाभिलाप्यवस्तु-

१ कुत एतावन्मात्रा भावश्रुत-मत्योः पर्याया येषाम् ? । भाषतेऽनन्तभागं, भण्यते यस्मात् श्रुतेऽभिहितम् ॥ १४० ॥

२ प्रज्ञापनीया भावा अनन्तभागस्तु अनभिलाप्यानाम् । प्रज्ञापनीयानां पुनरनन्तभागः श्रुतनिबद्धः ॥ १४१ ॥

३ यच्चतुर्दशपूर्वधराः षट्स्थानगताः परस्परं भवन्ति । तेन तु अनन्तभागः प्रज्ञापनीयानां, यत् सूत्रम् ॥ १४२ ॥

वेदितया य उत्कृष्टश्चतुर्दशपूर्वधरः, ततोऽन्यो हीन-हीनतरादिः, आगमे इत्थं प्रतिपादितः,तद्यथा—"[1]अणंतभागहीणे वा, असंखेज्जभागहीणे वा, संखेज्जभागहीणे वा, संखेज्जगुणहीणे वा, असंखेज्जगुणहीणे वा, अणंतगुणहीणे वा" । यस्तु सर्वस्तोकाऽभिलाप्यवस्तुज्ञायकतया सर्वजघन्यः, ततोऽन्य उत्कृष्ट उत्कृष्टतरादिरप्येवं प्रोक्तः, तद्यथा "[2]अणंतभागब्भहिए वा, असंखेज्जभागब्भहिए वा, संखेज्जभागब्भहिए वा; संखेज्जगुणब्भहिए वा, असंखेज्जगुणब्भहिए वा, अणंतगुणब्भहिए वा" । तदेवं यतः परस्परं षट्स्थानपतिताश्चतुर्दशपूर्वविदः, तस्मात् कारणात् यत् सूत्रं चतुर्दशपूर्वलक्षणं तत् प्रज्ञापनीयानां भावानामनन्तभाग एवेति । यदि पुनर्यावन्तः प्रज्ञापनीया भावास्तावन्तः सर्वेऽपि सूत्रे निबद्धा भवेयुः, तदा तद्वेदिनां तुल्यतैव स्यात्, न षट्स्थानपतितत्वमिति भावः ॥ इति गाथार्थः ॥ १४२ ॥

आह— ननु यदि सर्वेऽपि चतुर्दशपूर्वविदः, तर्हि कथं तेषां परस्परं हीनाधिक्यम् ? इत्याह—

[3]अक्खरलंभेण समा ऊणाहिया होंति मईविसेसेहिं । ते वि य मईविसेसे सुयनाणब्भंतरे जाण ॥१४३॥

चतुर्दशपूर्वगतसूत्रलक्षणेनाऽक्षरलाभेन समास्तुल्याः सर्वेऽपि चतुर्दशपूर्वविदः, ऊनाधिकास्ते मतिविशेषैर्भवन्ति क्षयोपशमवैचित्र्याद् यथोक्ताक्षरलाभानुसारिभिरेव तैस्तैर्गम्यार्थविषयैर्विचित्रैर्बुद्धिविशेषैर्हीनाधिका भवन्तीत्यर्थः । इह च मतिशब्दोपादानविभ्रमात् ते मतिविशेषा मा भूवन्नाभिनिबोधिकज्ञानविशेषाः, इत्यत आह— ' ते वि येत्यादि ' इदमुक्तं भवति— मतिशब्देनेह श्रुतमतिर्विवक्षिता, न त्वाभिनिबोधिकमतिः । ततश्च यैश्चतुर्दशपूर्वविदो हीनाधिकास्तानपि च मतिविशेषान् श्रुतज्ञानाभ्यन्तरे जानीहि श्रुतज्ञानान्तर्भाविन एव विद्धि, न त्वाभिनिबोधिकान्तर्वर्तिन इति भावः । यद्येवं ' ते वि य मईविसेसे सुयनाणं चेव जाणाहि ' इत्येवमेव प्रगुणं कस्माद् नोक्तम्, किमभ्यन्तरशब्दोपादानक्लेशेन ? । नैतदेवम्, अस्यापि न्यायस्य दृष्टत्वात्, अङ्गाभ्यन्तरादिव्यपदेशवत्, यथा ह्यङ्गमेवाऽङ्गाभ्यन्तरम्, एवं श्रुतमेव श्रुताभ्यन्तरमित्युक्तं भवति; अथवा छन्दोभङ्गभयादभ्यन्तरग्रहणम्, यदि वा ' सुयनाण- ' इत्यनेन चतुर्दशपूर्वलक्षणं श्रुतमधिक्रियते, ततश्च तानपि गम्यान् मतिविशेषांश्चतुर्दशपूर्वाक्षरलाभरूपस्य श्रुतस्यैवाऽभ्यन्तरे जानीहि त्वं, न व्यतिरिक्तानिति शिष्योपदेशः, चतुर्दशभिरपि हि पूर्वैः कश्चित् साक्षात्, कश्चित्तु गम्यतया सर्वोऽप्यभिलाप्यः पदार्थोऽभिधीयत एवः ततश्च गम्या अपि मतिविशेषास्तदन्तर्भाविन एव, तदनुसारित्वात् ॥ इति गाथार्थः ॥ १४३ ॥

१ अनन्तभागहीना वा, असंख्येयभागहीना वा, संख्येयभागहीना वा; संख्येयगुणहीना वा, असंख्येयगुणहीना वा, अनन्तगुणहीना वा ।

२ अनन्तभागाभ्यधिका वा, असंख्येयभागाभ्यधिका वा, संख्येयभागाभ्यधिका वा, संख्येयगुणाभ्यधिका वा, असंख्येयगुणाभ्यधिका वा, अनन्तगुणाभ्यधिका वा ।

३ अक्षरलाभेन समा ऊनाधिका भवन्ति मतिविशेषैः । तानपि च मतिविशेषान् श्रुतज्ञानाभ्यन्तरे जानीहि ॥ १४३ ॥ ४ घ. छ ' कास्तु ' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

चतुर्दशपूर्वलक्षणश्रुतानुसारित्वेन यदेतद् मतिविशेषाणां तदन्तर्भावित्वमुक्तम्, तदेव समर्थयन्नाह–

[1]जे अक्खराणुसारेण मईविसेसा तयं सुयं सव्वं । जे उण सुयनिरवेक्खा सुद्धं चिय तं मइन्नाणं ॥१४४॥

येऽक्षरानुसारेण श्रुतग्रन्थमनुसृत्य जायन्ते मतिविशेषास्तत् सर्वं श्रुतमेव, इत्यसकृदुक्तम् । ये तु यथोक्तश्रुतनिरपेक्षाः स्वयमेवोत्प्रेक्षितवस्तुतत्त्वा मतिविशेषाः समुत्पद्यन्ते तच्छुद्धं मतिज्ञानमेव, इत्येतदप्यनेकधा प्रागप्यभिहितम् । तस्माच्चतुर्दशपूर्वगताक्षरानुसारेण जायमानाः प्रस्तुतमतिविशेषाः सर्वे श्रुतमेव ॥ इति गाथार्थः ॥ १४४ ॥

तदेवं द्रव्यश्रुतादिश्रुतस्वरूपप्रतिपादनप्रकारेण 'बुद्धिदिट्ठे अत्थे जे भासइ' इत्यादिमूलगाथां व्याख्याय '[2]केई बुद्धिदिट्ठे मइसहिए भासओ'[3][4] इत्यादिना दर्शितमपि विशेषदूषणाभिधित्सया पुनरपि मतान्तरमुपदर्शयन्नाह—

[5]केइ अभासिज्जन्ता सुयमणुसरओ वि जे मइविसेसा । मन्नंति ते मइच्चिय भावसुयाभावओ, तन्नो ॥१४५॥

केचिद् व्याख्यातारः 'मन्नंति ते मइ चियत्ति' तान् मतिविशेषान् श्रुतमनुसरतोऽपि मतिरेवेति मन्यन्ते । ये किम् ? इत्याह– येऽभाष्यमाणा येषु शब्दप्रवृत्तिर्नास्तीत्यर्थः, श्रुतानुसारिणोऽपि मतिविशेषा ये शब्दप्रवृत्तिरहिताः केवलं हृद्येव विपरिवर्तन्ते[6] ते मतिज्ञानमेवेति केचिद् मन्यन्त इति भावः । तदेतद् न । कुतः ?, इत्याह– भावश्रुताभावप्रसङ्गात्, तदभावश्च '[7]किं सद्दो मइरुभयं भावसुयं सव्वहाऽजुत्तं' 'सद्दो ता दव्वसुयं मइराभिणिबोहियं नवा उभयं' इत्यादिपूर्वोक्तग्रन्थाद् भावनीयम् ॥ इति गाथार्थः ॥ १४५ ॥

किञ्च,

किर्हं मइ-सुयनाणविऊ छट्ठाणगया परोप्परं होज्जा ? । भासिज्जंतं मोत्तुं जइ सव्वं सेसयं बुद्धी ॥ १४६ ॥

यदि भाष्यमाणं मुक्त्वा शेषकं सर्वमपि बुद्धिर्मतिज्ञानमित्यर्थः, तर्हि मति-श्रुतज्ञानाभ्यां विदन्तीति मति-श्रुतज्ञानवेदिनः परस्परं स्वस्थाने परस्थाने च कथं षट्स्थानपतिताः स्युः ? न कथञ्चिदित्यर्थः, तथाहि-सर्वेणाऽपि जन्मना मति-श्रुतोपलब्धानामर्थानामनन्तभाग एव भाष्यत इति प्रागिहैवोक्तम् । ततश्च मतिज्ञानी श्रुतज्ञानिनः सकाशात् सदैवाऽनन्तगुणाधिकः, श्रुतज्ञानी त्वितरस्माद् नित्यमनन्त-

---

१ येऽक्षरानुसारेण मतिविशेषास्तत् श्रुतं सर्वम् । ये पुनः श्रुतनिरपेक्षाः शुद्धमेव तद् मतिज्ञानम् ॥ १४४ ॥ २ गाथा १२८ । ३ गाथा १३२ ।
४ केचिदभाष्यमाणाः श्रुतमनुसरतोऽपि ये मतिविशेषाः । मन्यन्ते तान् मतिरेव, भावश्रुताभावतः, तद् न ॥१४५॥ ५ क.ग. 'न्ते मति' । ६ गाथा १३२।
७ गाथा १३३ । ८ कथं मति-श्रुतज्ञानविदः षट्स्थानगताः परस्परं भवेयुः ? । भाष्यमाणं मुक्त्वा यदि सर्वं शेषकं बुद्धिः ॥ १४६ ॥

गुणहीन एव प्राप्नोति, इति न तावत् परस्थाने षट्स्थानपतितत्वम् । स्वस्थानेऽपि श्रुतज्ञानी अन्यस्मात् श्रुतज्ञानिनः संख्यातेनैव हीनोऽधिको वा स्यात्, न त्वसंख्यातेन, अनन्तेन वा, भाषकचतुर्दशपूर्वविदां संख्येयवर्षायुष्कत्वेनाऽसंख्येयस्याऽनन्तस्य वा भाषणस्यैवाऽसंभवादिति । अस्यैव च विशेषणदूषणस्याऽभिधानार्थं पुनरत्रेदं मतान्तरमुपन्यस्तम्, अन्यथा हि 'केई बुद्धिदिट्ठे मइसहिए भासओ सुयं' इत्यादिना सर्वमिदं प्रागभिहितमेव ॥ इति गाथार्थः ॥ १४६ ॥

तदेवं 'बुद्धिदिट्ठे अत्थे' इत्यादिपूर्वगतगाथा श्रुतस्वरूपाभिधायिना प्रकारेण व्याख्याता, मति-श्रुतयोश्च भेदस्य व्याख्येयत्वेन प्रस्तुतत्वात् तदभिधायकत्वेनापि मतान्तरेण व्याख्याता, तच्च व्याख्यानमयुक्तत्वाद् दूषितम् । अथाऽऽत्माभिमतेन निरवद्यमति-श्रुतभेदप्रकारेणैतां व्याख्यातुमाह–

[3]सामन्ना वा बुद्धी मइ-सुयनाणाइं तीए जे दिट्ठा । भासइ, संभवमेत्तं गहियं न उ भासणामेत्तं ॥१४७॥

मइसहियं भावसुयं तं नियमभासओ वि मइरन्ना । मइसहियं ति जमुत्तं सुओवउत्तस्स भावसुयं ॥ १४८ ॥

स्वविहितप्रथमव्याख्यानापेक्षया वाशब्दो यदिवेत्यर्थः, 'बुद्धिदिट्ठे अत्थे' इत्यत्र येयं बुद्धिः, असौ सामान्या गृह्यते ; ततः किम् ? इत्याह–'मइ-सुयनाणाइं ति' मति-श्रुतज्ञाने द्वे अपि बुद्धिरिहेत्यर्थः, तया मतिश्रुतज्ञानात्मिकया बुद्ध्या ये दृष्टा भावास्तेषु मध्ये यान् भाषते तद् भावश्रुतमित्युत्तरगाथायां संबन्धः । भाषत इत्यत्र च भाषणस्य संभवमात्रं गृहीतम्, न तु भाषणमात्रम् । ततश्चेदमुक्तं भवति– तत्राऽन्यत्र वा देशे, तदाऽन्यदा वा काले, स चाऽन्यो वा पुरुषः, सति सामग्रीसंभवे निश्चयेनैतान् भाषत एव, इत्येवं यान् भावानन्तर्विकल्पे प्लवमानान् भाषणयोग्यतायां व्यवस्थापयति, तेऽभाष्यमाणा अपि भाषणयोग्याः सन्तो भावश्रुतं भवन्ति, न तु भाष्यमाणा एवेति भावः । एवं च सति मत्युपलब्धानामनभिलाप्यानामर्थानां भाषणायोग्यत्वाद् भावश्रुतत्वमपाकृतं भवति, भाषणयोग्यानां त्वभाष्यमाणानामपि सर्वेषां विकल्पप्रतिभासिनामर्थानां भावश्रुतत्वमावेदितं भवति । अत एव पर्यवसितमर्थं द्वितीयगाथायामाह– नियतं निश्चितं तद् भावश्रुतमभाषमाणस्यापि भवति, योग्यतामात्रेणैव भाषणस्य गृहीतत्वादिति भावः ॥

आह– ये सामान्यबुद्धिदृष्टा अर्था ये भाषणयोग्याः, यदि तेषां भावश्रुतत्वम्, तर्हि मतिज्ञानानन्तर्वर्त्यपायविकल्पावभासिनामपि तत्प्रसङ्गः, न हि तेऽपि न भाषणयोग्याः इत्याशङ्क्याह–'मतिसहितमिति' । अस्य व्याख्यानमाह–'मइसहियं तीत्यादि' मतिसहितमिति

---

१ गाथा १३२ । २ गाथा १२८ । ३ सामान्या वा बुद्धिर्मति-श्रुतज्ञाने तया ये दृष्टाः । भाषते, संभवमात्रं गृहीतं न तु भाषणामात्रम् ॥ १४७ ॥
४ छटु-। मतिसहितं भावश्रुतं तद् नियतमभाषमाणस्याऽपि मतिरन्या । मतिसहितमिति यदुक्तं श्रुतोपयुक्तस्य भावश्रुतम् ॥ १४८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

यदुक्तं तस्य कः तात्पर्यार्थः ? इत्याह– श्रुतोपयुक्तस्यैव भाषमाणस्याभाषमाणस्य वा भावश्रुतं भवति, नाऽन्यस्य ; इदमुक्तं भवति– मतिसहितमिति श्रुतमतिसहितं यथा भवति, एवं यान् भाषते त एव भावश्रुतम्, नाऽन्ये[1]। ततश्च श्रुतोपयुक्तस्यैव भाषणयोग्यानर्थान् विकल्पयतो भावश्रुतं सिद्धं भवति। एवं च सति श्रुतानुसारित्वाभावेन श्रुतोपयुक्तत्वस्याऽसंभवाद् मतिविकल्पस्य भाषणयोग्यत्वे सत्यपि कुतो भावश्रुतत्वम् ? इति ॥

आह– ननु सामान्या बुद्धिरिह गृहीता, श्रुतोपयुक्तत्वे च गृह्यमाणे कथं मतिदृष्टत्वमर्थानां संभवति ?, श्रुतबुद्धिदृष्टत्वस्यैव तत्र संभवात्। नैतदेवम्, मतिपूर्वं हि श्रुतम्, ततो यत्र श्रुतबुद्धिदृष्टत्वं तत्र मतिदृष्टत्वमस्त्येव, इति न काचित् क्षतिः, इत्यलमतिचर्चितेन।

तदेवं श्रुतज्ञानोपयुक्तः सामान्यबुद्धिदृष्टानर्थान् संभवतो यान् भाषते तद् भावश्रुतमिति स्थितम्। नन्वर्थानां कथं भावश्रुतत्वम् ? ज्ञानस्यैव तत्संभवात्। सत्यम्, किन्तु विषय-विषयिणोरभेदोपचाराद् भावश्रुते प्रतिभासमाना अर्था अपि भावश्रुतम्, इत्यदोषः। 'मइरन्नत्ति' यथोक्ताद् भावश्रुतादन्या व्यतिरिक्ता मतिर्द्रष्टव्या, इदमुक्तं भवति– येऽभिलाप्या अपि सन्तो घटादयः श्रुतानुसारित्वाभावेन श्रुतोपयुक्तैर्न विकल्प्यन्ते, ये चाऽर्थपर्यायत्वेन वाचकध्वनेरभावाद् मूलत एवाऽभिलपितुमशक्या अनभिलाप्याः, ते यस्यां विज्ञप्तौ प्रतिभासन्ते, सा मतिरित्यवगन्तव्या, न तु श्रुतम्, अभिलाप्यवस्तुविषयायां[Δ] श्रुतानुसारित्वाभावात्, अनभिलाप्यवस्तुविषयायां[×] तु भाषणायोग्यत्वात् ॥ इति गाथाद्वयार्थः ॥ १४७ ॥ १४८ ॥

अथेष्टतोऽवधारणविधिमुपदर्शयन्नाह—

[2]जे भासइ चेय तयं सुयं तु न उ भासओ सुयं चेव। केई मईए वि दिट्ठा जं दव्वसुयत्तमुवयंति ॥१४९॥

'बुद्धिदिट्ठे अत्थे जे भासइ' इत्यत्र यान् कदाचित् संभवमात्रेण भाषत एव तच्छ्रुतमित्येवमेवावधारणीयम्, न तु भाषमाणस्य श्रुतमेवेति यान् भाषते तच्छ्रुतमेवेत्येवं[×] नावधार्यत इत्यर्थः। कुतः ? इत्याह– यद् यस्मात् कारणात् केचिदभिलाप्याः पदार्था मत्याऽपि दृष्टा अवग्रहेणाऽवगृहीताः, ईहया त्वीहिताः, अपायविकल्पेन तु निश्चिता इत्यर्थः, द्रव्यश्रुतत्वमुपयान्ति शब्दलक्षणेन द्रव्यश्रुतेन भाष्यन्त इत्यर्थः। यदि च भाषमाणस्य श्रुतमेवेत्यवधार्येत, तदैषामपि श्रुतत्वं स्यात्, न चैतदिष्यते, श्रुतानुसारित्वाभावेन श्रुतोपयुक्तत्वस्य तेष्वसंभवात्, तस्माद् यथोक्तमेवाऽवधारणम् ॥ इति गाथार्थः ॥ १४९ ॥ +न द्रव्योभयश्रुते-|Δविज्ञप्तौ-|×तच्छ्रुतमित्येतद्-|

१ यान् भाषत एव तत् श्रुतं तु न तु भाषमाणस्य श्रुतमेव। केचिद् मत्याऽपि दृष्टा यद् द्रव्यश्रुतत्वमुपयान्ति ॥१४९॥ २ गाथा १२८। ३ ख. 'तमित्येतदवधा'।

अथ यथोक्तव्याख्यानलब्धमति-श्रुतभेदोपदर्शनपूर्वकमुपसंहरन्नाह–

[3]एवं धणिपरिणामं सुयनाणं उभयहा मइन्नाणं। जं भिन्नसहावाइं ताइं तो भिन्नरूवाइं ॥ १५० ॥

एवं प्रागुक्तप्रकारेण केवलाऽभिलाप्यार्थविषयत्वात् सर्वमपि श्रुतज्ञानं ध्वनिपरिणाममेव, ध्वनेः शब्दस्य परिणमनं विपरिवर्तनं परिणामो यत्र तद् ध्वनिपरिणामं[4] भवत्येव, श्रुतानुसारित्वेनोत्पन्नमेव ह्येतदिष्यते, श्रुतं च संकेतकालभाविपरोपदेशरूपः, श्रुतग्रन्थरूपश्च द्विविधः शब्दोऽत्राऽधिकृतः, तदनुसारेण चोत्पन्ने ज्ञाने ध्वनिपरिणामो भवत्येवेति। मतिज्ञानं तूभयथाऽपि भवति– शब्दपरिणामम्, अशब्दपरिणामं च, अभिलाप्यानभिलाप्यपदार्थविषयं ह्येतत्। ततश्च श्रुतानपेक्षत्वमत्यैव विकल्प्यमानेष्वभिलाप्येषु ध्वनिपरिणामोऽस्मिन्नपि प्राप्यते। अनभिलाप्यविषयतायां तु नासौ तत्र लभ्यते, अनभिलाप्यपदार्था हि स्वयमेव बुध्यमाना अपि वाचकध्वनेरभावाद् विकल्पयितुं, परस्मै प्रतिपादयितुं वा न शक्यन्ते, यथा नालिकेरद्वीपाऽऽयातस्य वह्व्यादयः क्षीरे-क्षु-गुड-शर्करादिमाधुर्यतारतम्यादयो वा ; इति कुतस्तद्विषयतायां ध्वनिपरिणामः ?। अभिलाप्यपदार्थेभ्योऽनन्तगुणाश्चाऽनभिलाप्याः सन्ति। ततोऽभिलाप्या-ऽनभिलाप्यवस्तुविषयत्वाच्छब्दा-ऽशब्दपरिणामं मतिज्ञानमिति स्थितम्। अथोपसंहरति–'तो त्ति' तस्मात् ते मतिश्रुते स्वामि-कालादिभिरविशेषेऽपि भिन्नरूपे भेदवती मन्तव्ये। कुतः ? इत्याह– यद् यस्मात् कारणाद् द्वे अपि भिन्नस्वभावे- उक्तन्यायेनैकस्य ध्वनिपरिणामित्वात्, अपरस्य तूभयस्वभावत्वात् ॥ इति गाथार्थः ॥ १५० ॥

तदेवं मूलगाथायां 'बुद्धिदिट्ठे अत्थे जे भासइ तं सुयं मईसहियं' इत्येतत् पूर्वार्धं 'सामण्णा वा बुद्धी' इत्यादिना व्याख्यातम्। अथ 'इयरत्थ वि होज्ज सुयं उवलद्धिसमं जइ भणेज्जा' इत्येतदुत्तरार्धं व्याचिख्यासुराह–

[5]इयर त्ति मइन्नाणं तओ वि जइ होइ सद्दपरिणामो। तो तम्मि वि किं न सुयं भासइ जं नोवलद्धिसमं ?॥१५१॥

'इयरत्थ वि होज्ज सुयं' इति मूलगाथोत्तरार्धे इतरशब्दस्य किं वाच्यम् ?, इत्याह– इतरदिति मतिज्ञानं तत्राऽभिसंबध्यते, इत्याचार्येणोक्ते परः प्राह–'तओ वि जइ होइ सद्दपरिणामो तो तम्मि वि किं न सुयं ति' तत इति सप्तम्यन्तात् तस्प्रत्ययः, ततश्च

१ ख. घ. छ 'हारमाह'। २ एवं ध्वनिपरिणामं श्रुतज्ञानमुभयथा मतिज्ञानम्। यद् भिन्नस्वभावे ते ततो भिन्नरूपे ॥ १५० ॥
३ क. ग. 'पयित्वात्'। ४ घ. छ. 'णामं श्रुता'। ५ गाथा १२८। ६ गाथा १४७।
७ इतरदिति मतिज्ञानं ततोऽपि यदि भवति शब्दपरिणामः। ततस्तस्मिन्नपि किं न श्रुतं भाषते यद् नोपलब्धिसमम् ? ॥ १५१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'[1]उभयहा मइन्नाणं' इति वचनाद् यदि तस्मिन्नपि मतिज्ञाने शब्दपरिणामो भवति, ततस्तस्मिन्नपि किं न श्रुतं-तदपि भावश्रुतरूपतां किं न प्रतिपद्यते[+]? इत्यर्थः, शब्दपरिणामस्य श्रुतत्वेनोक्तत्वादिति भावः। अत्राऽऽचार्य उत्तरमाह-'भासइ जं नोवलद्धिसमं ति' यद् यस्मात् कारणादुपलब्धिसमं मतिज्ञानी न भाषते, ततो न मतिज्ञानस्य श्रुतरूपता॥ इति गाथार्थः॥ १५१॥

कथं पुनरुपलब्धिसममसौ न भणति? इत्याह-

[2]अभिलप्पा-ऽणभिलप्पा उवलद्धा तस्समं च नो भणइ। तो होउ उभयरूवं उभयसहावं ति काऊण॥१५२॥

प्रागुक्तन्यायेनाऽभिलाप्या-ऽनभिलाप्याः पदार्था मतिज्ञानोपलब्धाः, एवंभूतोपलब्ध्या च समं भणितुं न शक्नोत्येव, अनभिलाप्यानां सर्वथैव वक्तुमशक्यत्वादिति भावः॥

अत्र परः प्राह-'तो होउ इत्यादि' ततस्तर्हि भवतु मतिज्ञानमुभयरूपं श्रुत-मतिरूपम्। कुतः?, इत्याह- उभयस्वभावमिति कृत्वा, अभिलाप्या-ऽनभिलाप्यवस्तुविषयत्वेन द्विस्वभावत्वादित्यर्थः; इदमुक्तं भवति- यदभिलाप्यपदार्थानुपलभते भाषते च, तत् श्रुतज्ञानमस्तु; अनभिलाप्यपदार्थांस्तु भाषणाऽयोग्यान् यदवगच्छति, तद् मतिज्ञानं भवति॥ इति गाथार्थः॥ १५२॥

अत्रोत्तरमाह-

[3]जं भासइ तं पि जओ न सुयादेसेण किन्तु समईए। न सुओवलद्धितुल्लं ति वा जओ नोवलद्धिसमं॥१५३॥

यदपि किञ्चिदभिलाप्यवस्तूपलब्धं मतिज्ञानी भाषते तदपि यतो न श्रुतादेशेन, किन्तु स्वमत्या, अतो न तत् श्रुतमिति। इदमुक्तं भवति- परोपदेशः, श्रुतग्रन्थश्च श्रुतमिहोच्यते, तदादेशेन तु तदनुसारेण विकल्प्य यदा भाषते, तदा श्रुतोपयुक्तस्य भाषणात् श्रुतमुपपद्यत एव; यत्र तु स्वमत्यैव पर्यालोच्य भाषते न तु श्रुतानुसारेण, तत्र श्रुतोपयुक्तत्वाभावाद् मतिज्ञानमेव। तदेवं 'भासइ जं नोवलद्धिसमं' इत्यस्य गाथावयवस्य 'अभिलप्पा-णभिलप्पा उवलद्धा' इत्यादिना व्याख्यानं कुर्वताऽऽचार्येण मतिज्ञानी मतिज्ञानोपलब्ध्या समं न भाषते, अतस्तत्रोपलब्धिसमं भाषणं न भवति, इत्यतो न मतिज्ञाने श्रुतरूपतेत्युक्तम्; श्रुतज्ञानी त्वभिलाप्यानुपलभते, तांश्च भाषते, अतस्तत्रैवोपलब्धिसमत्वस्य सद्भावात् श्रुतरूपतेति भावः॥

---

१ गाथा १५०। २ अभिलाप्या-ऽनभिलाप्या उपलब्धास्तत्समं च न भणति। ततो भवत्वभयरूपमुभयस्वभावमिति कृत्वा॥ १५२॥ + प्रतिपाद्यत-॥

३ यद् भाषते तदपि यतो न श्रुतादेशेन किन्तु स्वमत्या। न श्रुतोपलब्धितुल्यमिति वा यतो नोपलब्धिसमम्॥१५३॥ ४ गाथा १५१। ५ गाथा १५२।

सांप्रतं तु मतिज्ञानी श्रुतोपलब्ध्या तुल्यं समं न भाषत इत्येवमुपलब्धिसमत्वाभावमुपदर्शयन्नाह-'न सुओवलद्धीत्यादि' वाशब्दः प्रकारान्तरद्योतकः, ततश्च न श्रुतोपलब्ध्या तुल्यं मतिज्ञानी भाषत इति वा, यतो यस्मात् कारणाद् नोपलब्धिसमं मतिज्ञानिनो भाषणम्, तस्माद् न तत्र श्रुतरूपता, इदमुक्तं भवति- श्रुतोपलब्धौ परोपदेशार्हवचनलक्षणश्रुतानुसारेणोपलब्धानर्थान् भाषते, मत्युपलब्धौ तु तदुपलब्धानेव, इत्यतो न मतिज्ञानिनो भाषणं श्रुतोपलब्धिसमम्। ततश्च न तत्र श्रुतसंभवः॥ इति गाथार्थः॥ १५३॥

तदेवं '[4]सोइंदिओवलद्धी होइ सुयं' इत्यादिर्मूलगाथया तत्त्वतः श्रोत्रेन्द्रियविषयमेव श्रुतज्ञानम्, सर्वेन्द्रियविषयं च मतिज्ञानमित्येवं मति-श्रुतयोर्भेदः प्रतिपादितः; तत्प्रतिपादनक्रमे च '[5]बुद्धिर्दिट्ठे अत्थे जे भासइ' इत्यादिगाथा समायाता, सा च द्रव्य-भावोभयश्रुतरूपाऽभिधायकत्वेन मति-श्रुतयोर्भेदाभिधानपरतया च व्याख्याता, तद्व्याख्याने चाऽवसिते इन्द्रियविभागादपि मति-श्रुतयोर्भेदः।

सांप्रतं वल्क-शुम्बोदाहरणात् तमभिधित्सुराह-

[6]अन्ने मन्नंति मई वग्गसमा सुंबसरिसयं सुत्तं। दिट्ठन्तोऽयं जुत्तिं जहोवणीओ न संसहइ॥ १५४॥

अन्ये केचनाऽप्याचार्या मन्यन्ते। किम्?, इत्याह- वल्कसमा वल्कसदृशी मतिः, ततः सैव यदा शब्दतया संदर्भिता भवति- तज्जनितो यदा शब्द उत्तिष्ठतीत्यर्थः, तदा तदुत्थशब्दसहिता श्रुतमुच्यते, तच्च शुम्बसदृशं वल्कजनितदवरिकातुल्यं श्रुतं भवति, एवं तदभ्युपगमः शोभन इति चेत्। नैवमित्याह- 'दिट्ठंतोऽयमित्यादि' अयं वल्कशुम्बदृष्टान्तो यथा तैरुपनीतः- उक्तप्रकारेण प्रकृते योजितः, तथा युक्तिं न सहते- न क्षमते, अन्यथा त्वस्मदभिमतवक्ष्यमाणप्रकारेणोपनीयमान एषोऽपि युक्तिक्षमो भविष्यतीति भावः॥ इति गाथार्थः॥ १५४॥

कुतो न संसहते? इत्याह-

[7]भावसुयाभावाओ संकरओ निव्विसेसभावाओ। पुव्वुत्तलक्खणाओ सलक्खणावरणभेयाओ॥१५५॥

नैष दृष्टान्तो युक्तिं क्षमत इति सर्वत्र साध्यम्, मतेरनन्तरं शब्दमात्रस्यैव भावेन भावश्रुतस्याऽभावप्रसङ्गात्। अथ मतिसहितोऽयं

---

१ गाथा ११७। २ ख. 'सूत्रगा'। ३ गाथा १२८। ४ ख. 'णतस्तम'। ×त्वेव

५ अन्ये मन्यन्ते मतिर्वल्कसमा शुम्बसदृशं श्रुतम्। दृष्टान्तोऽयं, युक्तिं यथोपनीतो न संसहते॥ १५४॥

६ ख. 'गमे शोभनं'। ७ भावश्रुताभावात् संकरतो निर्विशेषभावात्। पूर्वोक्तलक्षणात् स्वलक्षणा-ऽऽवरणभेदात्॥ १५५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शब्दो न केवल इति तत्र भावश्रुतत्वं भविष्यति । तदयुक्तम् । कुतः ? इत्याह– संकरः सांकर्यं, संकीर्णत्वम्, मिश्रत्वमिति यावत्, मति-श्रुतयोस्तस्य प्राप्तेः । निर्विशेषभावाद् वा– यदेव मतिज्ञानम्, तदेव भावश्रुतमिति प्रतिपादनादेकमेव किञ्चित् स्यात्, नोभयमिति भावः । अस्तु विशेषाभाव इति चेद् । नैवम् । कुतः ? इत्याह– स्वलक्षणावरणभेदात् । कथंभूतात् ? इत्याह– पूर्वोक्तलक्षणात् ' 'किह व सुयं होइ मई सलक्खणावरणभेयाओ ' इति पूर्वाभिहितगाथावयवोक्तस्वरूपात्, इदमुक्तं भवति– अभिनिबुध्यत इत्याभिनिबोधिकम्, श्रूयत इति श्रुतम्, इत्यादिकं मति-श्रुतयोर्यत् स्वकीयं स्वकीयं लक्षणम्, आवारकं च कर्म, तयोर्भेदात् पूर्वाभिहितस्वरूपाद् मति-श्रुतयोर्निर्विशेषभावो न युज्यते । यदि हि तयोर्निर्विशेषता-एकत्वं स्यात्, तदा लक्षणभेदः, आवरणभेदश्च पूर्वोक्तस्वरूपो न स्यादिति भावः ॥ इति गाथार्थः ॥ १५५ ॥

अथ द्रव्य–भावश्रुतयोरनेन दृष्टान्तेन भेदः प्रतिपाद्यते, सोऽपि न युक्त इति दर्शयन्नाह—

[+] [२]कप्पेज्जेज्ज व सो भाव-दव्वसुत्तेसु तेसु वि न जुत्तो । मइ-सुयभेयावसरे जम्हा किं सुयविसेसेणं ? ॥ १५६ ॥

यदि वा भाव-द्रव्यश्रुतयोः सः–वल्क-शुम्बोदाहरणाद्भेदः कल्प्येत–भावश्रुतं हि कारणत्वात् किल वल्कसदृशं, शब्दलक्षणं तु द्रव्यश्रुतं कार्यत्वात् शुम्बप्रतिमम्, इत्येवमनयोर्भेद इष्येतेति भावः । तयोरप्यसौ न युक्तः । कुतः ? इत्याह– यस्माद् मति-श्रुतयोर्भेदाभिधानेऽवसरप्राप्ते 'किं सुयविसेसेणं ति' श्रुतयोर्द्रव्य-भावश्रुतलक्षणयोर्विशेषो भेदः श्रुतविशेषस्तेनाऽभिहितेन किं ?– असंबद्धत्वाद् न किञ्चिदित्यर्थः ॥ इति गाथार्थः ॥ १५६ ॥

अथाऽन्यथा पराभिप्रायमाशङ्कमानः प्राह—

[३]अहसुयक्खरपरिणामा व जा मई वग्गकप्पणा तम्मि । दव्वसुयं सुम्बसमं किं पुण तेसिं विसेसेणं ? ॥१५७॥

श्रुतानुसार्यक्षरपरिणामो यस्यां सा श्रुतानुसार्यक्षरपरिणामा न तथा– श्रुतानुसारित्वरहितशब्दमात्रपरिणामाऽन्विता या मतिरित्यर्थः, तस्यां वा वल्ककल्पना क्रियते, तज्जनितशब्दरूपं तु द्रव्यश्रुतं शुम्बसदृशम्, अतस्तयोः प्रस्तुतोदाहरणाद् भेदो युक्तियुक्तो भविष्यति । श्रुतानुसार्यक्षरपरिणामा मतिर्भावश्रुतमेव स्यात्, अतः पूर्वस्माद् न विशिष्येत, इत्यश्रुताक्षरपरिणामित्वं विशेषणम् । सा च

+ कप्पि–। १ गाथा १३५ । २ कल्प्येत वा स भाव-द्रव्यश्रुतयोस्तयोरपि न युक्तः । मति-श्रुतभेदावसरे यस्मात् किं श्रुतविशेषेण ? ॥१५६॥
३ अश्रुताक्षरपरिणामा वा या मतिर्वल्ककल्पना तस्याम् । द्रव्यश्रुतं शुम्बसमं किं पुनस्तयोर्विशेषेण ? ॥ १५७ ॥

पर्युदासाश्रयणादश्रुतानुसारिणा शब्देनैवाऽन्विता गृह्यते, न तु शब्दपरिणामरहिताऽवग्रहरूपा, तस्याः शब्दजनकत्वाभावेनाऽनन्तरं शुम्बसदृशद्रव्यश्रुताभावादिति ॥

अत्रोत्तरमाह– 'किं पुण तेसिं विसेसेणं ति' किं पुनस्तयोर्यथोक्तमति-द्रव्यश्रुतयोर्विशेषेण भेदेनोक्तेन ?– अप्रस्तुतत्वाद् न किञ्चिदित्यर्थः । श्रुतज्ञाननैव सहाऽत्र मतेर्भेदो विचारयितुं प्रक्रान्तः, इत्यतः किं द्रव्यश्रुतेन सह तच्चिन्तया ? इति भावः ॥इति गाथार्थः॥१५७॥

एतदेव भावयन्नाह–

[१]इहइं जेणाहिकओ नाणविसेसो न दव्व-भावाणं । न य दव्व-भावमेत्ते वि जुज्जए सोऽसमंजसओ ॥ १५८ ॥

इहास्मिन् प्रक्रमे येन कारणेन ज्ञानयोरेव मति-श्रुतलक्षणयोर्विशेषो भेदोऽधिकृतो न तु द्रव्य-भावयोर्मतिज्ञान-द्रव्यश्रुतलक्षणयोः, इत्यतः किं तद्भेदाऽभिधानेन ? इति । नच यथोक्तद्रव्य-भावयोरप्यसौ युज्यते । कुतः ? इत्याह– असमञ्जसतो दृष्टान्त-दार्ष्टान्तिकयोर्वैसदृश्यात् ॥ इति गाथार्थः ॥ १५८ ॥

तथाहि–

[२]जह वग्गा सुंबत्तणमुवेंति सुंबं च तं तओऽणण्णं । न मई तहा धणित्तणमुवेइ जं जीवभावो सा ॥१५९॥

यथा वल्काः शुम्बत्वमुपयान्ति-आत्माऽव्यतिरिक्तशुम्बपरिणामापन्नाः शुम्बमित्युच्यन्ते, न तु शुम्बाद् व्यतिरिक्ताः; तदपि च शुम्बं तेभ्यो वल्केभ्योऽनन्यरूपमव्यतिरिक्तम् ; न तथा मतिर्ध्वनित्वमुपैति, यद् यस्मात् कारणात् सा मतिराभिनिबोधिकज्ञानत्वेन जीवभावो जीवपरिणामः, शब्दस्तु मूर्तत्वाद् न जीवभावः, इत्यतः कथममूर्तपरिणामा मतिर्मूर्तध्वनिपरिणाममुपगच्छेत् ? अमूर्तस्य मूर्तपरिणामविरोधात् । तस्माद् दृष्टान्त-दार्ष्टान्तिकयोर्वैषम्यादिदमपि व्याख्यानमुपेक्षणीयम् ॥ इति गाथार्थः ॥ १५९ ॥

पुनः परवचनमाशङ्क्य तस्यैव शिक्षणार्थमाह–

[४]अह उवयारो कीरइ पभवइ अत्थंतरं पि जं जत्तो । तं तम्मयं ति भण्णइ, तो मइपुव्वं जओ भणियं ॥१६०॥

---

१ ख. 'न्तयेत्? इति'। २ इह येनाऽधिकृतो ज्ञानविशेषो न द्रव्य-भावयोः । न च द्रव्य-भावमात्रेऽपि युज्यते सोऽसमञ्जसतः ॥ १५८ ॥
३ यथा वल्काः शुम्बत्वमुपयान्ति शुम्बं च तत् ततोऽनन्यत् । न मतिस्तथा ध्वनित्वमुपैति यज्जीवभावः सा ॥ १५९ ॥ ×अवग्रहरूपा मत्याः ।
४ अथोपचारः क्रियते प्रभवत्यर्थान्तरमपि यद् यस्मात् । तत् तन्मयमिति भण्यते, ततो मतिपूर्वं यतो भणितम् ॥ १६० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भावसुयं, तेण मई वग्गसमा सुंबसरिसयं तं च। जं चिंतिऊण तया तो सुयपरिवाडिमणुसरइ ॥ १६१॥

अथोपचारः क्रियते–उपचारविधिराश्रीयते, ततश्चाऽर्थान्तरमपि यद् यस्माद् प्रभवति तत् तन्मयमिति भण्यते, यथा "तदपथ्यमिन्तं विक्रियाविस्तरमुपगतम्" "तदेकं वचनमेतावन्तं विपाकमापन्नम्" इत्यादि; ततश्चाऽतन्मयेऽपि ध्वनौ मतिगता ज्ञानमयतोपचर्यते। तथा च सति वल्क–शुम्बसादृश्येन मति–श्रुतयोरयं भेदः सिद्धो भवति ॥

एवमुक्ते आचार्यः सुहृद् भूत्वा परं शिक्षयति– 'तो मइपुव्वमित्यादि' हन्त! यद्युपचारवादी भवान्, ततो मतिपूर्वं भावश्रुतं यस्मादागमे भणितं, तेन कारणेन मतिर्वल्कसमा, तच्च भावश्रुतं शुम्बसदृशम्, इत्येवं दृष्टान्तोपनयं कुरु, येनोपचारमन्तरेणाऽपि सर्वं सुस्थं भवति, यथा हि वल्काः शुम्बकारणं, तथा मतिरपि भावश्रुतस्य, यथा च शुम्बं वल्कानां कार्यं तथा भावश्रुतमपि मतेः। कुतः? इत्याह– यद् यस्मात् कारणात् तया मत्या चिन्तयित्वा ततः श्रुतपरिपाटिमनुसरति– वाच्यवाचकभावेन परोपदेशश्रुतग्रन्थयोजनां वस्तुनि करोति; तस्माद् मतिश्रुतयोर्वल्कशुम्बयोरिव कार्यकारणभावाद् भेदसिद्धिः, इत्येवं दृष्टान्तोपनयो युक्तिं संसहते, न तु परोक्तप्रकारेण ॥ इति गाथाद्वयार्थः ॥ १६० ॥ १६१ ॥

तदेवं वल्क-शुम्बोदाहरणादप्यभिहितो मति-श्रुतयोर्भेदः; सांप्रतं त्वक्षरा-ऽनक्षरभेदात् तमभिधित्सुः पराभिप्रायं तावदुपन्यस्यन्नाह–

[3]अन्ने अणक्खर-ऽक्खरविसेसओ मइ-सुयाइं भिंदंति। जं मइनाणमणक्खरमक्खरमियरं च सुयनाणं ॥१६२॥

अन्ये केचनापि सूरयोऽनक्षरा-ऽक्षरवद्विशेषतो मति-श्रुते भिन्दन्ति, यद् यस्मात् किल मतिज्ञानमनक्षरम्, श्रुतज्ञानं त्वक्षरवद् भवति, इतरच्चाऽनक्षरवदुच्छ्वसितादीत्यर्थः ॥ इति गाथार्थः ॥ १६२ ॥

अत्राचार्यो दूषणमाह–

[4]जइ मइरणक्खरच्चिय भवेज्ज नेहादओ निरभिलप्पे। थाणु-पुरिसाइपज्जायविवेगो किह णु होज्जाहि? ॥१६३॥

यदि हन्त! मतिरनक्षरैव स्यात्–अक्षराभिलापरहितैव भवताऽभ्युपगम्यते, तर्हि निरभिलाप्येऽप्रतिभासमानाभिलापे स्थाण्वा-

---

१ भावश्रुतं, तेन मतिर्वल्कसमा शुम्बसदृशं तच्च। यच्चिन्तयित्वा तया ततः श्रुतपरिपाटिमनुसरति ॥ १६१ ॥ २ ख. 'मुपेतम्'।

३ अन्येऽनक्षरा-ऽक्षरविशेषतो मति-श्रुते भिन्दन्ति। यद् मतिज्ञानमनक्षरमक्षरमितरच्च श्रुतज्ञानम् ॥ १६२ ॥ + चिंते-।।

४ यदि मतिरनक्षरैव भवेद् नेहादयो निरभिलाप्ये। स्थाणु-पुरुषादिपर्यायविवेकः कथं नु भवेत्? ॥ १६३ ॥

दिके वस्तुनि ईहादयो न प्रवर्तेरन्। ततः किम्?, इत्युच्यते– तस्यां मतावनक्षरत्वेन स्थाण्वादिविकल्पाभावात् 'स्थाणुरयं पुरुषो वा' इत्यादिपर्यायाणां वस्तुधर्माणां विवेको वितर्कोऽन्वय-व्यतिरेकादिना परिच्छेदो न स्यात्, तथाहि– यदनक्षरं ज्ञानं न तत्र स्थाणु-पुरुषपर्यायादिविवेकः, यथाऽवग्रहे, तथा चेहादयः, तस्मात् तेष्वपि नासौ प्राप्नोति ॥ इति गाथार्थः ॥ १६३ ॥

अथ विभ्रान्तस्य परस्योत्तरमाह—

[2]सुयनिस्सियवयणाओ अह सो सुयओ मओ न बुद्धीओ। जइ सो सुयवावारो तओ किमन्नं मइन्नाणं?॥१६४॥

आगमे मतिज्ञानं द्विधा प्रोक्तम्– श्रुतनिश्रितमवग्रहे-हादिचतुष्कम्, अश्रुतनिश्रितं चौत्पत्तिक्यादिबुद्धिचतुष्टयम्। ततश्च सूरिरित्थं पराभिप्रायमाशङ्कते– अथैवं परो ब्रूयात्– आगमे श्रुतनिश्रितत्वेनापि मतिज्ञानस्य भणनात् श्रुतात् श्रुततोऽक्षरात्मकादसौ स्थाणु-पुरुषादिपर्यायविवेको मतः, न बुद्धेर्न मतेः सकाशात्, तस्याः स्वयमनक्षररूपत्वात्। अत्रोत्तरमाह– 'जइ सो इत्यादि' यदि हन्त! स स्थाणु-पुरुषादिपर्यायविवेकः श्रुतव्यापारः, तर्ह्यवग्रहं मुक्त्वा किमन्यद् मतिज्ञानम्? न किञ्चिदित्यर्थः। यदि स्थाणु-पुरुषादिपर्यायविवेकोऽक्षरात्मकत्वात् श्रुतव्यापार इष्यते, तदेहा-ऽपायादयो मतिभेदाः सर्वेऽप्यक्षरात्मकत्वात् श्रुतत्वमापन्नाः, इत्यतोऽक्षराऽभिलापरहितमवग्रहं मुक्त्वा शेषस्येहादिभेदभिन्नस्य सर्वस्याऽपि मतिज्ञानस्याऽभावप्रसङ्ग इति भावः ॥ इति गाथार्थः ॥ १६४ ॥

अथाऽन्यथा परस्य वचनमाशङ्क्य दूषयितुमाह–

[3]अह सुयओ वि विवेगं कुणओ न तयं सुयं सुयं नत्थि। जो जो सुयवावारो अन्नो वि तओ मई जम्हा ॥१६५॥

अथ श्रुतादपि स्थाणु-पुरुषादिविवेकं कुर्वतः प्रमातुर्न तत् श्रुतम्, किन्तु मत्यभावभीत्या मतित्वेनाऽभ्युपगयम्ते; हन्त! तर्ह्येकत्र संधित्सतोऽन्यतः प्रच्यवते, यत एवं सति श्रुतं क्वचिदपि नास्ति– श्रुताभावः प्राप्नोतीत्यर्थः। कुतः? इत्याह– यो यश्चरणकरणादिप्रतिपादनलक्षणोऽन्योऽपि श्रुतस्याऽऽचारादेर्व्यापारः सकोऽसौ यस्माद् मतिज्ञानमेव, अक्षरात्मकत्वात्, स्थाणु-पुरुषादिपर्यायविवेकवत् ॥ इति गाथार्थः ॥ १६५ ॥

अथ स्थाणु-पुरुषादिपर्यायविवेको मतिश्च, श्रुतं च भविष्यति; अतो नैकस्याऽप्यभावप्रसङ्ग इत्याह–

---

२ श्रुतनिश्रितवचनादथाऽसौ श्रुततो मतो न बुद्धेः। यदि स श्रुतव्यापारस्ततः किमन्यद् मतिज्ञानम्? ॥ १६४ ॥

३ अथ श्रुततोऽपि विवेकं कुर्वतो न तच्छ्रुतं श्रुतं नास्ति। यो यः श्रुतव्यापारोऽन्योऽपि सको मतिर्यस्मात् ॥ १६५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

मइकाले वि जइ सुयं तो जुगवं मइ-सुओवओगा ते। अह नेवं एगयरं पवज्जओ जुज्जए न सुयं ॥१६६॥

स्थाणु-पुरुषादिपर्यायविवेकलक्षणे मतिकालेऽपि यदि श्रुतव्यापार इष्यते, ततो युगपदेव मति-श्रुतोपयोगौ ते तव प्रसज्येते, न चैतद् युक्तम्, समकालं ज्ञानद्वयोपयोगस्य निषिद्धत्वात्। अथैतद्दोषभयाद् नैवमुपयोगद्वयं युगपदभ्युपगम्यते, तर्ह्येकतरं मतिपद्यमानस्य– स्थाणु-पुरुषादिपर्यायविवेककाले मतिज्ञानं श्रुतज्ञानं वेच्छतो भवत इत्यर्थः, किम्? इत्याह– 'जुज्जए न सुयं ति' श्रुतमिह प्रतिपत्तुं न युज्यते, किन्तु मतिज्ञानमेव, इदमुक्तं भवति– "सावकाशा-ऽनवकाशयोरनवकाशो विधिर्बलवान्" इति न्यायादन्यत्राऽनवकाशं मतिज्ञानमेवैकं तवैकतरं प्रतिपद्यमानस्येह प्रतिपत्तुं युज्यते; न तु श्रुतम्, तस्याऽन्यत्र श्रुतानुसारिण्याचारादिज्ञानविशेषे सावकाशत्वात्। एवं च सति स्थाणु-पुरुषादिपर्यायविवेको मतेरेव, न तु श्रुतात्, स चाऽक्षराभिलापसमनुगत एव, इति नैकान्तेन मतिज्ञानमनक्षरमिति भावः॥ इति गाथार्थः॥ १६६॥

किञ्च, अक्षरानुगतत्वमात्रमुपलभ्य स्थाणु-पुरुषादिपर्यायविवेको भवताश्रुतनिश्रित उक्तः, एवं चातिप्रसङ्गः प्राप्नोतीति दर्शयति–

जइ सुयनिस्सियमक्खरमणुसरओ तेण मइचउक्कं पि। सुयनिस्सियमावन्नं तुह तं पि जमक्खरप्पभवं॥१६७॥[1]

यदि स्थाणु-पुरुषादिपर्यायविवेकविधानेनाऽक्षरमनुसरतः प्रमातुर्ज्ञानं श्रुतनिश्रितं भवता प्रोच्यते, तेन तर्ह्यौत्पत्तिक्यादिमतिचतुष्कमपि तव श्रुतनिश्रितमापन्नम्, यस्मात् तदप्यक्षरप्रभवं वर्णाऽऽलिङ्गितमित्यर्थः– तदपि हि नेहादिविरहेण जायते, ईहादयश्च न वर्णाभिलापमन्तरेण संभवन्ति। तस्माद् मतिचतुष्कमपि त्वदभिप्रायेण श्रुतनिश्रितमायातम्, न चैतदस्ति, आगमेऽश्रुतनिश्रितत्वेन तस्याऽभिधानात्। तस्माद् देवानांप्रियेणाऽद्यापि श्रुतनिश्रितस्य स्वरूपमेव नाऽवगम्यते, तत् किं वयं ब्रूमः?॥ इति गाथार्थः॥ १६७॥

तदेवं श्रुतनिश्रितवचनश्रवणमात्राद् विभ्रान्तस्तत्स्वरूपमजानानः परो युक्तिभिर्निराकृतोऽपि विलक्षीभूतः प्राह–

जइ तं सुएण न तओ जाणइ सुयनिस्सियं कहं भणियं?[2]। जं सुयकओवयारं पुव्विं इण्हिं तयणवेक्खं॥ १६८॥

यदि तं स्थाणु-पुरुषादिपर्यायसंघातं श्रुतेन न जानाति सकोऽसौ ज्ञानी, तर्हि श्रुतनिश्रितमेवावग्रहादिकं सूत्रे कथं केन प्रका-

---

१ मतिकालेऽपि यदि श्रुतं ततो युगपद् मति-श्रुतोपयोगौ ते। अथ नैवमेकतरं प्रपद्यमानस्य युज्यते न श्रुतम्॥ १६६॥

२ यदि श्रुतनिश्रितमक्षरमनुसरतस्तेन मतिचतुष्कमपि। श्रुतनिश्रितमापन्नं तव तदपि यदक्षरप्रभवम्॥ १६७॥

३ यदि तत् श्रुतेन न सको जानाति, श्रुतनिश्रितं कथं भणितम्?। यत् श्रुतकृतोपचारं पूर्वमिदानीं तदनपेक्षम्॥ १६८॥

रेण भणितम्?– मतिः स्वयमनक्षरैव, यस्त्विहाऽक्षरोपलम्भः स यदि श्रुतनिश्रितो नेष्यते, तर्हि कथमन्यथाऽसौ घटिष्यते?। इति विस्मयभयाऽऽपूरितहृदयस्य परस्याऽयं प्रश्न इति भावः॥

अत्रोच्यते– ननु भवानेव प्रष्टव्यो योऽसमीक्षितमित्थं प्रभाषते– योऽक्षरोपलम्भः स सर्वोऽपि श्रुतनिश्रयेति। अथ न ज्ञायते भवता, तर्हि वयमेव ब्रूमः, श्रूयताम्– 'जं सुयेत्यादि' श्रुतं द्विविधम्– परोपदेशः, आगमग्रन्थश्च। व्यवहारकालात् पूर्वं तेन श्रुतेन कृत उपकारः संस्काराधानरूपो यस्य तत् कृतश्रुतोपकारं, यज्ज्ञानमिदानीं तु व्यवहारकाले तस्य पूर्वप्रवृत्तस्य संस्काराधायकश्रुतस्याऽनपेक्षमेव प्रवर्तते तत् श्रुतनिश्रितमुच्यते, न त्वक्षराभिलापयुक्तत्वमात्रेणेति भावः॥ इति गाथार्थः॥ १६८॥

एतदेव भावयन्नाह–

पुव्वं सुयपरिकम्मियमइस्स जं संपयं सुयाईयं। तं निस्सियमियरं पुण अणिस्सियं मइचउक्कं तं॥ १६९॥[1]

व्यवहारकालात् पूर्वं यथोक्तरूपेण श्रुतेन परिकर्मिता– आहितसंस्कारा मतिर्यस्य स तथा तस्य साध्वादेर्यत् साम्प्रतं व्यवहारकाले श्रुतातीतं श्रुतनिरपेक्षं ज्ञानमुपजायते तच्छ्रुतनिश्रितमवग्रहादिकं सिद्धान्ते प्रतिपादितम्। इतरत् पुनरश्रुतनिश्रितम्, तच्चौत्पत्तिक्यादिमतिचतुष्कं द्रष्टव्यम्, श्रुतसंस्कारानपेक्षया सहजत्वात् तस्य॥

अत्राह– ननु

"भरनित्थरणसमत्था तिवग्गसुत्तत्थगहियपेयाला। उभओलोगफलवई विणयसमुत्था हवइ बुद्धी"॥ १॥[2]

इत्यादिवचनात् तत्रापि मतिचतुष्के वैनयिकी मतिः श्रुतनिश्रिता समस्ति। सत्यम्, किन्तु सकृच्छ्रुतनिश्रितत्वे सत्यपि बाहुल्यमङ्गीकृत्याऽश्रुतनिश्रितं तदुच्यत इत्यदोषः*। तस्माद् यदुक्तम्–'जं मइनाणमणक्खरमक्खरमियरं च सुयनाणं' इति। तदयुक्तम्, मतेरनक्षरत्वे

---

१ पूर्वं श्रुतपरिकर्मितमतेर्यत् सांप्रतं श्रुतातीतम्। तद् निश्रितमितरत् पुनरनिश्रितं मतिचतुष्कं तत्॥ १६९॥

२ भरनिस्तरणसमर्था त्रिवर्गसूत्रार्थगृहीतप्रमाणा। उभयलोकफलवती विनयसमुत्था भवति बुद्धिः॥ १॥ ३ गाथा १६२।

* इममेवाऽभिप्रायं नन्दाध्ययनेऽस्या एव गाथाया विवरणस्थले श्रीमन्मलयगिरिसूरिरप्याह–तथा. "नन्वश्रुतनिश्रिता बुद्धयो वक्तुमभिप्रेताः, ततो यद्यस्या त्रिवर्गसूत्रार्थगृहीतसारत्वम्, ततोऽश्रुतनिश्रितत्वे नोपपद्यते, न हि श्रुताभ्यासमन्तरेण त्रिवर्गसूत्रार्थगृहीतसारत्वं संभवति। अत्रोच्यते—इह प्रायोवृत्तिमाश्रित्याऽश्रुतनिश्रितत्वमुक्तम्, ततः स्वल्पश्रुतभावेऽपि न कश्चिद्दोषः" इति।

"इहातिगुरुकार्यं दुर्निर्वहत्वाद् भर इव भरस्तच्चिस्तरणे समर्था भरनिस्तरणसमर्थाः, त्रयो वर्गास्त्रिवर्गा लोकरूढ्या धर्मा-ऽर्थ-कामास्तदर्जनोपायप्रतिपादकं यत् सूत्रं यश्च तदर्थस्तौ त्रिवर्गसूत्रार्थौ, तयोर्गृहीतं पेयालं प्रमाणं सारो वा यया सा तथाविधा" इति मल्लिदीकायां व्याख्यातोऽस्या अर्थः॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

स्थाणु-पुरुषादिपर्यायविवेकाभावप्रसङ्गात्, श्रुतनिश्रितत्वस्य चाऽन्यथा समर्थितत्वादिति स्थितम् ॥ इति गाथार्थः ॥ १६९ ॥

यद्यनक्षरा मतिर्न भवति, तर्हि 'लक्खणभेया हेऊफलभावओ' इत्यादिगाथायां मतिज्ञातोऽक्षरा-ऽनक्षरभेदाद् मति- श्रुतयोर्भेदः कथं गमनीयः ? इत्याह—

[1]उभयं भावक्खरओ अणक्खरं होज्ज वंजणक्खरओ। मइनाणं सुत्तं पुण उभयं पि अणक्खरक्खरओ॥१७०॥

इहाऽक्षरं तावद् द्विविधम्-द्रव्याक्षरम्, भावाक्षरं च । तत्र द्रव्याक्षरं पुस्तकादिन्यस्ताऽकारादिरूपम्, तालवादिकारणजन्यः शब्दो वा; एतच्च व्यज्यतेऽर्थोऽनेनेति व्यञ्जनाक्षरमप्युच्यते । भावाक्षरं त्वन्तःस्फुरदकारादिवर्णज्ञानरूपम् । एवं च सति 'भावक्खरओ त्ति' भावाक्षरमाश्रित्य मतिज्ञानं भवेत् । कथंभूतम् ? इत्याह- 'उभयं ति' उभयरूपम्- अक्षरवत्, अनक्षरं चेत्यर्थः; मतिज्ञानभेदे श्रवग्रहे भावाक्षरं नास्तीति तदनक्षरमुच्यते, ईहादिषु तु तद्भेदेषु तदस्तीति मतिज्ञानमक्षरवत् प्रतिपाद्यत इति भावः । 'अणक्खरं होज्ज वंजणक्खरओ त्ति' व्यञ्जनाक्षरं द्रव्याक्षरमित्यनर्थान्तरम्, तदाश्रित्य मतिज्ञानमनक्षरं भवेत्, न हि मतिज्ञाने पुस्तकादिन्यस्ताकारादिकं शब्दो वा व्यञ्जनाक्षरं विद्यते, तस्य द्रव्यश्रुतत्वेन रूढत्वात्, द्रव्यमतित्वेनाऽप्रसिद्धत्वादिति। 'सुत्तं पुणेत्यादि' सूत्रं श्रुतज्ञानं, पुनरुभयमपि- द्रव्यश्रुतम्, भावश्रुतं चेत्यर्थः, प्रत्येकमनक्षरतः, अक्षरतश्च भवेत्; इदमुक्तं भवति—

"[2]ऊससियं नीससियं निच्छूढं खासियं च छीयं च। निस्सिंघियमणुसारं अणक्खरं छेलियाईअं" ॥ १ ॥

इत्यादिवचनाद् द्रव्यश्रुतमनक्षरम्- पुस्तकादिन्यस्ताक्षररूपम्, शब्दरूपं च; तदेव साक्षरं, भावश्रुतमपि श्रुतानुसार्यकारादिवर्णविज्ञानात्मकत्वात् साक्षरम्, पुस्तकादिन्यस्ताकाराद्यक्षररहितत्वाच्छब्दाभावाच्च तदेवाऽनक्षरम्, पुस्तकादिन्यस्ताक्षरस्य शब्दस्य च द्रव्यश्रुतान्तःपातित्वेन भावश्रुतेऽसत्त्वात्; तदेवं मतेर्भावश्रुतस्य च साक्षरा-ऽनक्षरकृतो नास्ति विशेषः, प्रत्येकं द्वयोरप्यक्षरानक्षररूपत्वेनोक्तत्वात्; केवलं सामान्येन 'श्रुतं' इत्युक्ते तन्मध्ये द्रव्यश्रुतं लभ्यत इति कृत्वा तत्र द्रव्यश्रुतमाश्रित्य द्रव्याक्षरमस्ति, मतौ तु तन्नास्ति, तस्या द्रव्यमतित्वेनाऽरूढत्वादिति । एवमनयोर्द्रव्याक्षरापेक्षया साक्षरा-ऽनक्षरत्वकृतो भेदः ॥ इति गाथार्थः ॥ १७० ॥

तदेवमक्षरे-तरभेदाद् मति-श्रुतयोर्भेदमभिधाय मूके-तरभेदात् तमभिधित्सुराह—

---

१ गाथा ९७। २ उभयं भावाक्षरतोऽनक्षरं भवेद् व्यञ्जनाक्षरतः। मतिज्ञानं सूत्रं पुनरुभयमपि अनक्षरा-ऽक्षरतः ॥ १७० ॥

३ उच्छ्वसितं निःश्वसितं निक्षिप्तं कासितं च क्षुतं च। निःसिङ्घितमनुस्वारमनक्षरं सेण्टितादिकम् ॥ १ ॥

[1]सं-परप्पच्चायणओ भेओ मूअेयराण वाऽभिहिओ। जं मूयं मइनाणं स-परप्पच्चायगं सुत्तं ॥ १७१ ॥

अन्यैस्तु कैश्चिदाचार्यैः स्व-परप्रत्यायनतो मति-श्रुतयोर्भेदोऽभिहितः। कयोरिव ? इत्याह- मूके-तरयोरिव- यथा हि मूकः स्वमात्मानमेव प्रत्याययति प्रतीतिपथं नयति, न तु परम्, तत्प्रत्यायनहेतुवचनाभावात्; इतरस्त्वमूकः स्वं परं च प्रत्याययति, वचनसद्भावात्। तथा च सति यथा मूक-मुखरयोर्भेदः, एवं मति-श्रुतयोरपि, यद् यस्मात् परप्रत्यायनहेतुद्रव्याक्षराभावाद् मूकं मतिज्ञानम्, मुखरं तु श्रुतज्ञानम्, कुतः ?, स्व-परप्रत्यायकत्वात्- द्रव्याक्षरसद्भावेन परप्रत्यायकत्वस्याऽपि तत्र लभ्यमानत्वादिति भावः ॥ इति गाथार्थः ॥ १७१ ॥

एतदाचार्यो मति-श्रुतयोस्तुल्यताऽऽपादनेन किञ्चिद् दूषयितुमाह—

[2]सुयकारणं ति सद्दो सुयमिह सो य परबोहणं कुणइ। मइहेयवो वि हि परं बोहेंति कराइचिट्ठाओ ॥ १७२ ॥

इह तावद् भवन्तं पृच्छामः- हन्त ! शब्दः श्रुतमुच्यते, उपलक्षणत्वात् पुस्तकादिन्यस्ताऽक्षरविन्यासश्च श्रुतमभिधीयते 'सुयकारणं ति' श्रुतकारणत्वात्- कारणे कार्योपचारादिति भावः। स च शब्दः, पुस्तकादिन्यस्ताक्षरविन्यासश्च परबोधनं परप्रत्यायनं करोतीत्येवं परतः श्रुतज्ञानं परप्रत्यायकमुच्यते, न तु स्वतः; इति तावद् भवतोऽभिप्रायः। एतच्च मतिज्ञानेनाऽपि समानम्। कुतः ? इत्याह- हि यस्माद् मतिहेतवोऽपि मतिजनका अपि करादिचेष्टाविशेषाः परं बोधयन्त्येव, तथाहि- अक्षरात्मकत्वात् किल शब्दः, पुस्तकादिन्यस्ताक्षरविन्यासश्च श्रुतस्य कारणम्, कर-शीर्षादिचेष्टास्तु अक्षररहितत्वात् किल मतिज्ञानस्य हेतवः- कर-वक्त्रसंयोगे हि कृते भुजिक्रियाविषया किल मतिरुत्पद्यते, शीर्षे च धूनिते निवृत्ति-प्रवृत्तिविषया सा समुपजायते, इत्येवं मतिहेतवः करादिचेष्टा अपि परप्रबोधिका एव ॥ इति गाथार्थः ॥ १७२ ॥

यदि मतिहेतवोऽपि परं प्रबोधयन्ति, ततः किम् ? इत्याह-

[3]न परप्पबोहयाइं जं दो वि सरूवओ मइ-सुयाइं। तक्कारणाइं दोण्ह वि बोहेंति तओ न भेओ सिं ॥१७३॥

---

१ स्व-परप्रत्यायनतो भेदो मूके-तरयोरिवाऽभिहितः। यद् मूकं मतिज्ञानं स्व-परप्रत्यायकं श्रुतम् ॥ १७१ ॥

२ श्रुतकारणमिति शब्दः श्रुतमिह स च परबोधनं करोति। मतिहेतवोऽपि हि परं बोधयन्ति करादिचेष्टाः ॥ १७२ ॥

३ न परप्रबोधके यद् द्वे अपि स्वरूपतो मति-श्रुते। तत्कारणानि द्वयोरपि बोधयन्ति ततो न भेदोऽनयोः ॥ १७३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मतिहेतूनामपि परप्रबोधकत्वे सति 'न भेओ सिं' अनयोर्मति-श्रुतयोर्न भेदः । कुतः ? इत्याह– 'तउ त्ति' ततस्तस्मात् कारणात्। कस्मात् ? इत्याह–यद् यस्माद् द्वे अप्येते मति-श्रुते स्वरूपतो विज्ञानाऽऽत्मना न परप्रबोधके, विज्ञानस्य मूकत्वेन परप्रबोधकत्वायोगात्, अवध्यादिवदिति । अथ श्रुतस्य यत् कारणं शब्दादिकं तत् परप्रबोधकम्, इत्येतावता मतिज्ञानाद् विशिष्यते श्रुतज्ञानम्। नन्वेतद् मतिज्ञानेऽपि समानम्, तत्कारणस्याऽपि करचेष्टादेः परावबोधकत्वादिति । एतदेवाह– तानि च तानि पूर्वोक्तरूपाणि कारणानि च तत्कारणानि द्वयोरपि मति-श्रुतज्ञानयोर्यथासंख्यं शब्दादीनि, करचेष्टादीनि च परं बोधयन्त्येव, इति कोऽनयोर्विशेषः ?, न कश्चिदित्यर्थः । इति किमुच्यते– मूके-तरभेदाद् भेदः ? ॥ इति गाथार्थः ॥ १७३ ॥

तदेवं परोक्ते व्यभिचारिते ततो निरुत्तरं विलक्षीभूतं तूष्णीम्भावमापन्नं परमवलोक्य संजातकारुण्यः स्वयमेव सूरिरुत्तरमाह–

दव्वसुयमसाहारणकारणओ परविबोहयं होज्जा । रूढं ति व दव्वसुयं सुयं ति रूढा न दव्वमई ॥ १७४ ॥

द्रव्यश्रुतं पुस्तकन्यस्ताक्षरशब्दरूपं श्रुतज्ञानस्यैव कारणम्, न तु मतेः, इति श्रुतज्ञानं प्रत्यसाधारणकारणत्वाद् द्रव्यश्रुतं परप्रबोधकं भवेत्, न तु करादिचेष्टाः, तासां मति-श्रुतोभयकारणत्वेन साधारणकारणत्वादिति भावः; इदमुक्तं भवति– पुस्तकादिन्यस्ताक्षररूपं, शब्दात्मकं च द्रव्यश्रुतम्, श्रुतज्ञानस्य मतिपूर्वकत्वाद् यद्यप्यानन्तर्येणाऽवग्रहे-हादीन् जनयति, तथाऽप्यक्षररूपत्वाद् मुख्यतया श्रुतज्ञानस्यैव किलाऽसाधारणं कारणमुच्यते, कारणत्वेनोपचारतः श्रुतज्ञानेऽन्तर्भवति, परप्रबोधकत्वेन च तत् सर्वस्याऽपि विदितमिति । एवं कारणस्य परप्रबोधकत्वाच्छ्रुतज्ञानं परप्रबोधकं घटते, करादिचेष्टास्तु मतिज्ञानस्याऽसाधारणकारणं न भवन्ति, श्रुतज्ञानहेतुत्वादपि कर-वक्त्रसंयोगादिकार्यां हि करचेष्टायां दृष्टायां न केवलं तद्विषया अवग्रहादय उत्पद्यन्ते, किन्तु 'भोक्तुमिच्छत्यसौ' इत्यादिश्रुतानुसारिविकल्पात्मकं श्रुतज्ञानमप्युपजायत इति । अतोऽसाधारणकारणत्वाभावात् करादिचेष्टाः परमार्थतो मतिज्ञानस्य कारणमेव न संभवन्ति, ततश्च न तत्रान्तर्भवन्ति; तथा च सति न मतिज्ञानं परप्रबोधकम् । अथवा 'दव्वसुयमसाहारणकारणउ त्ति' द्रव्यश्रुतं पुस्तकादिन्यस्ताऽऽचारादिग्रन्थाक्षररूपम्, गुरुजनोदीरितदेशनाशब्दस्वरूपं च परप्रबोधकं भवेत् । कुतः ? इत्याह– असाधारणस्य मोक्षं प्रत्यनन्यसाधारणकारणस्य क्षायिकज्ञान-दर्शन-चारित्रलक्षणस्य वस्तुकलापस्य कारणत्वाद् हेतुत्वात्; ततश्च तद्द्वारेण श्रुतज्ञानमपि परप्रबोधकं घटते; करादिचेष्टास्तु यद्यपि मतिज्ञानस्य कारणम्, तथापि यथोक्तो विशिष्टः परप्रबोधस्तासु प्रायो

---

१ द्रव्यश्रुतमसाधारणकारणतः परविबोधकं भवेत् । रूढमिति वा द्रव्यश्रुतं श्रुतमिति रूढा न द्रव्यमतिः ॥ १७४ ॥

न संभवति, अतो विशिष्टपरप्रबोधाभावाद् न ताः परप्रबोधिकाः, तथा च सति न तद्द्वारेणाऽपि मतिज्ञानं परप्रबोधकम् । इति सूत्रस्य सूचकत्वात् सोपस्कारः पूर्वार्धस्याऽर्थोऽत्रसेयः ॥

अथोत्तरार्धस्य व्याख्या प्रस्तूयते– 'रूढं ति वेत्यादि' वेत्यथवा, भवतु मतिज्ञानस्य कारणं करादिचेष्टा, तथापि सा 'द्रव्यमतिः' इत्येवमागमे क्वचिदपि न रूढा; द्रव्यश्रुतं पुनः पूर्वोक्तस्वरूपं 'श्रुतं' इत्येवं सर्वत्र रूढम् । ततश्च यद्यपि करादिचेष्टा मतिज्ञानस्य कारणं, परप्रबोधिका च; तथापि द्रव्यमतित्वेनाऽरूढत्वात् कारणे कार्योपचारतो मतिरूपतया न व्यवह्रियते । अतो मतिज्ञानात् तस्याः पृथग्भूतत्वाद् न तद्द्वारेण तस्य परप्रबोधकत्वम्, द्रव्यश्रुतं तु कारणे कार्योपचारतः श्रुतज्ञानत्वेन प्ररूप्यते, इति तद्द्वारेणाऽस्य परप्रबोधकत्वमुपपद्यत एव । इति युक्तो मूके-तरभेदाद् मति-श्रुतयोर्भेदः । ततश्च 'तंकारणाइं दोण्ह वि बोहेंति तओ न भेओ सिं' इत्येतदपास्तं भवति ॥ इति गाथार्थः ॥ १७४ ॥

तदेवं करादिचेष्टाया मतिकारणत्वमभ्युपगम्योक्तम्, सांप्रतं सा मतेः कारणमेव न भवति, किन्तु श्रुतस्येति दर्शयन्नाह—

सा[3] वा सद्दत्थो च्चिय तया वि जं तम्मि पच्चओ होइ। कत्ता वि हु तदभावे तदभिप्पाओ कुणइ चिट्ठं॥१७५॥

यदिवा सा करादिचेष्टा कर-वक्त्रसंयोगादिलक्षणा । किम् ? इत्याह– शब्दार्थ एव शब्दो वक्तृसमुदीरितवचनरूपस्तस्याऽर्थः शब्दार्थः श्रोतृगतज्ञाने प्रतिभासमानतदभिधेयवस्तुरूपः श्रुतज्ञानमिति तात्पर्यम् । किमित्यसौ शब्दार्थ एव ? इत्याह– यद् यस्मात् कारणात् तयाऽपि कर्त्रा विहितया तस्मिन् शब्दार्थे भोजनेच्छादिलक्षणे प्रतिपत्तुः प्रत्ययो भवति । तथा कर्तापि तदभावे शब्दाभावे जिह्वारोगादिसद्भावात् शब्दोदीरणसामर्थ्याभाव इत्यर्थः, 'तदभिप्पाउ त्ति' तस्मिन् शब्दार्थे भोजनेच्छादिलक्षणे परस्मै प्रतिपादयितव्येऽभिप्रायो मनोविकल्पो यस्याऽसौ तदभिप्रायः करोति चेष्टां कर-वक्त्रसंयोगादिलक्षणाम्; इदमुक्तं भवति– यद्यपि करादिचेष्टाऽनन्तरभावेनाऽवग्रहादीन् जनयति, तथापि शब्दार्थ एव सा श्रुतज्ञानमेवेत्यर्थः, यस्मात् तयापि विहितया तत्र शब्दार्थप्रत्ययो भवति । अतः शब्दार्थप्रत्ययजनकत्वात् कारणे कार्योपचारात् शब्दार्थप्रत्यय एव सा, न पुनर्मतिः; तथा कर्तापि 'भोक्तुमिच्छत्यसौ' इत्यादि प्रतिपत्ता जानात्वित्यभिप्रायवानेव भाषणशक्त्यभावे करादिचेष्टां करोति । ततश्च कर्त्राऽपि शब्दार्थद्योतनाभिप्रायेण क्रियमाणत्वात् करादिचेष्टा शब्दार्थ एव । ततश्चैषाऽपि श्रुतकारणत्वात् श्रुत एवान्तर्भवति, शब्दवत्, न मतौ,

---

१ क. 'अतोऽपि वि'। २ गाथा १७३। ३ सा वा शब्दार्थ एव तयाऽपि यत् तस्मिन् प्रत्ययो भवति । कर्तापि खलु तदभावे तदभिप्रायः करोति चेष्टाम् ॥१७५॥ ४ क. ग. 'तात्पर्यार्थः'। ५ क. ग. 'कर्त्रा श'।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा च सत्येषा परमार्थतो मतेः कारणमेव न भवति, अतः कारणद्वारेणाऽपि न परप्रत्यायकं मतिज्ञानम्, श्रुतं तु तद्द्वारेण परावबोधकम्। इति युक्तो मूके-तरभेदाद् मति-श्रुतयोर्भेदः ॥ इति गाथार्थः ॥ १७५ ॥

॥ मति-श्रुतयोर्भेदचिन्ताधिकारः समाप्तः ॥

तदेवं स्वामि-काल-कारणादिभिरभेदेऽपि लक्षण-भेद-हेतुफलभावादिभिर्मति-श्रुतयोर्विस्तरतो भेदमभिधायोपसंहरन्नाह–

मेइ-सुयनाणविसेसो भणिओ तल्लक्खणाइभेएणं । पुव्वं आभिणिबोहियमुद्दिट्ठं तं परूवेस्सं ॥ १७६ ॥

मति-श्रुतज्ञानयोर्विशेषो भेदो भणितः । केन ? इत्याह– तयोर्लक्षणादिभिर्भेदः, अथवा स चासौ अनन्तरोक्तो लक्षणादिभेदश्च तल्लक्षणादिभेदस्तेन । सांप्रतं त्वाभिनिबोधिकज्ञानं प्ररूपयिष्ये विस्तरतो व्याख्यास्यामि । शेषश्रुतादिपरिहारेण किमित्याभिनिबोधिकं प्रथमं प्ररूप्यते ? इत्याह– यस्माज्ज्ञानपञ्चके पूर्वमादौ तदुद्दिष्टमुपन्यस्तम्, तस्माद् " यथोद्देशं निर्देशः " इति कृत्वा तत् प्रथमं व्याख्यास्यामि ॥ इति गाथार्थः ॥ १७६ ॥

तत्त्व-भेद-पर्यायैश्च व्याख्या, तत्र तत्त्वं लक्षणम्, तच्च प्रागेवोक्तम् । अथ तद्भेदनिरूपणार्थमाह–

इंदिय-मणोनिमित्तं तं सुयनिस्सियमहेयरं च पुणो । तत्थेक्केक्कं चउभेयमुग्गहो-प्पत्तियाईयं ॥ १७७ ॥

इन्द्रिय-मनोनिमित्तं यत् प्रागुक्तमाभिनिबोधिकज्ञानम्, तद् द्विभेदं भवति– श्रुतनिश्रितम्, इतरच्चाऽश्रुतनिश्रितम् । अथशब्दो वाक्यालङ्कारार्थः । तत्र श्रुतं संकेतकालभावी परोपदेशः, श्रुतग्रन्थश्च, पूर्वं तेन परिकर्मितमतेर्व्यवहारकाले तदनपेक्षमेव यदुत्पद्यते तत् श्रुतनिश्रितम्; यत्तु श्रुतापरिकर्मितमतेः सहजमुपजायते तदश्रुतनिश्रितम् । तत्र तयोः श्रुतनिश्रिता-ऽश्रुतनिश्रितयोर्मध्ये एकैकं चतुर्भेदम् । कथम् ? इत्याह– यथासंख्यमवग्रहादिकम्, औत्पत्तिक्यादिकं च– अवग्रहे-हा-ऽपाय-धारणाभेदात् श्रुतनिश्रितं चतुर्विधम्, औत्पत्तिकी-वैनयिकी-कर्मजा-पारिणामिकीलक्षणबुद्धिभेदात्त्वश्रुतनिश्रितं चतुर्भेदमित्यर्थः । यद्यप्यौत्पत्तिक्यादिबुद्धिचतुष्टयेऽप्यवग्रहादयो विद्यन्ते, तथापि ' पुव्वमदिट्ठमसुयमवेइ य तक्खणविसुद्धगहियत्था ' इत्यादिवक्ष्यमाणवचनात् परोपदेशाद्यनपेक्षत्वात् ते श्रुतनिश्रिता न भवन्ति, शेषास्त्ववग्रहादयः पूर्वं श्रुतपरिकर्मणाऽनन्तरेण न संभवन्ति, ईहादिगताभिलापस्य परोपदेशाद्यन्तरेणाप्युपपत्तेः, इति ते श्रुत-

१ मति-श्रुतज्ञानाविशेषो भणितस्तल्लक्षणादिभेदेन । पूर्वमाभिनिबोधिकमुद्दिष्टं तत् प्ररूपयिष्ये ॥ १७६ ॥ + अन्तरेण-॥ × णानुप०-।

(मवेदिन्) २ इन्द्रिय-मनोनिमित्तं तच्छ्रुतनिश्रितमथेतरच्च पुनः । तत्रैकैकं चतुर्भेदमवग्रहौ-त्पत्तिक्यादिकम् ॥ १७७ ॥ ३ पूर्वमदृष्टमश्रुतमवैति च तत्क्षणविशुद्धगृहीतार्था ।

निश्रिता उच्यन्ते । औत्पत्तिक्यादिषु त्वीहाद्यभिलापस्य तथाविधकर्मक्षयोपशमजत्वात् परोपदेशाद्यन्तरेणाऽप्युपपत्तेरिति भावः ॥ इति गाथार्थः ॥ १७७ ॥

तत्र श्रुतनिश्रितानवग्रहादींस्तावद् निर्युक्तिकारः प्राह—

उग्गहो ईहअवाओ य धारणा एव होंति चत्तारि । आभिणिबोहियनाणस्स भेयवत्थू समासेणं ॥ १७८ ॥

रूप-रसादिभेदैरनिर्देश्यस्याऽव्यक्तस्वरूपस्य सामान्यार्थस्याऽवग्रहणं परिच्छेदनमवग्रहः । तेनाऽवगृहीतस्यार्थस्य भेदविचारणं वक्ष्यमाणगत्या विशेषान्वेषणमीहा । तयेहितस्यैवाऽर्थस्य व्यवसायस्तद्विशेषनिश्चयोऽपायः । चशब्दोऽवग्रहादीनां पृथक् पृथक् स्वातन्त्र्यप्रदर्शनार्थः, तेनैतदुक्तं भवति– अवग्रहादेरीहादयः पर्याया न भवन्ति, पृथग्भेदवाचकत्वादिति । निश्चितस्यैव वस्तुनोऽविच्युत्यादिरूपेण धरणं धारणा । एवकारः क्रमद्योतनपरः, अवग्रहादीनामुपन्यासस्याऽयमेव क्रमो नान्यः, अवगृहीतस्यैवेहनात्, ईहितस्यैव निश्चयात्, निश्चितस्यैव धारणादिति । एवमेतान्याभिनिबोधिकज्ञानस्य चत्वार्येव भेदवस्तूनि समासेन संक्षेपेण भवन्ति, विस्तरतस्त्वष्टाविंशत्यादिभेदभिन्नमिदं वक्ष्यत इति भावः । तत्र भिद्यन्ते परस्परमिति भेदा विशेषास्त एव वस्तूनि भेदवस्तूनीति समासः ॥ इति गाथार्थः ॥१७८॥

अथ निर्युक्तिकार एवाऽवग्रहादीन् व्याख्यानयन्नाह—

अत्थाणं उग्गहणं अवग्गहं तह वियालणं ईहं । ववसायं च अवायं धरणं पुण धारणं बेंति ॥ १७९ ॥

अर्थानां रूपादीनां प्रथमं दर्शनानन्तरमेवाऽवग्रहणमवग्रहं ब्रुवत इति संबन्धः । तथा विचारणं पर्यालोचनं 'अर्थानाम्' इति वर्तते, ईहनमीहा तां ब्रुवते; इदमुक्तं भवति– अवग्रहादुत्तीर्णोऽपायात् पूर्वं सद्भूतार्थविशेषोपादानाभिमुखोऽसद्भूतार्थविशेषत्यागसंमुखश्च प्रायः काकनिलयनादयः स्थाणुधर्मा अत्र वीक्ष्यन्ते, न तु शिरःकण्डूयनादयः पुरुषधर्मा इति मतिविशेष ईहेति । विशिष्टोऽवसायो व्यवसायो निश्चयस्तं व्यवसायम्, 'अर्थानाम्' इतीहापि वर्तते, अवायमपार्थं वा ब्रुवते; एतदुक्तं भवति– स्थाणुरेवाऽयमित्यवधारणात्मकः प्रत्ययोऽवायः, अपायो वेति; चशब्द एवकारार्थः, व्यवसायमेवाऽवायम्, अपार्थं वा ब्रुवत इत्यर्थः । धृतिर्धरणम्, 'अर्थानाम्' इति वर्तते, अपायेन विनिश्चितस्यैव वस्तुनोऽविच्युति-स्मृति-वासनारूपं धरणमेव धारणां ब्रुवत इत्यर्थः । पुनःशब्दस्याऽवधारणार्थत्वाद् ब्रुवत इत्यनेन शास्त्रस्य

१ अवग्रह ईहाऽपायश्च धारणैव भवन्ति चत्वारि । आभिनिबोधिकज्ञानस्य भेदवस्तूनि समासेन ॥ १७८ ॥

२ अर्थानामवग्रहणमवग्रहं तथा विचारणमीहाम् । व्यवसायं चाऽपार्थं धरणं पुनर्धारणां ब्रुवते ॥ १७९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

परतन्त्र्यमुक्तम्– इत्थं तीर्थकर-गणधरा ब्रुवत इति ॥

अन्ये त्वेवं पठन्ति– " अत्थाणं उग्गहणम्मि उग्गहो " इत्यादि, तत्राऽर्थानामवग्रहणे सत्यवग्रहो नाम मतिभेद इत्येवं ब्रुवते, एवमीहादिष्वपि योज्यम्; भावार्थस्तु पूर्ववदेव । अथवा प्राकृतशैल्याऽर्थवशाद् विभक्तिपरिणाम इति सप्तमी द्वितीयार्थे द्रष्टव्या ॥ इति गाथार्थः ॥ १८० ॥

अथैतदेवाऽवग्रहादिस्वरूपं भाष्यकारो विवृण्वन्नाह–

[1]सामण्णत्थावग्गहणमुग्गहो भेयमग्गणमहेहा । तस्सावगमोऽवाओ अविच्चुई धारणा तस्स ॥ १८० ॥

अन्तर्भूताऽशेषविशेषस्य केनापि रूपेणाऽनिर्देश्यस्य सामान्यस्याऽर्थस्यैकसामयिकमवग्रहणं सामान्यार्थावग्रहणम्, अथवा सामान्येन सामान्यरूपेणाऽर्थस्याऽवग्रहणं सामान्यार्थावग्रहणमवग्रहो वेदितव्यः। अथाऽनन्तरमीहा प्रवर्तते। कथम्भूतेयम्? इत्याह– भेदमार्गणम्– भेदा वस्तुनो धर्मास्तेषां मार्गणमन्वेषणं विचारणं प्रायः काकनिलयनादयः स्थाणुधर्मा अत्र वीक्ष्यन्ते, न तु शिरःकण्डूयनादयः पुरुषधर्मा इत्येवं वस्तुधर्मविचारणमीहेत्यर्थः । तस्यैवेहयेहितस्य वस्तुनस्तदनन्तरमवगमनमवगमः स्थाणुरेवाऽयमित्यादिरूपो निश्चयोऽवायोऽपायो वेति । तस्यैव निश्चितस्य वस्तुनोऽविच्युति-स्मृति-वासनारूपं धरणं धारणा; सूत्रेऽविच्युतेरुपलक्षणत्वात् ॥ इति गाथार्थः ॥१८०॥

अत्र चाऽवग्रहादारभ्य परैः सह विप्रतिपत्तयः सन्ति, इत्यवग्रहविषयां तां तावद् निराकर्तुमाह–

[2]सामण्णविसेसस्स वि केई उग्गहणमुग्गहं बेंति । जं मइरिदं तयं ति च, तं नो बहुदोसभावाओ ॥ १८१ ॥

सामान्यं चासौ विशेषश्च सामान्यविशेषस्तस्याऽपि, न केवलं सामान्यार्थस्य, इत्यपिशब्दः, अवग्रहणमवच्छेदनं केचन व्याख्यातारोऽवग्रहं ब्रुवते । किंकारणम्? इत्याह– 'जं मइरिदं तयं ति चेति' यद् यस्मात् कारणादमुतः शब्दादिलक्षणसामान्यविशेषग्राहकाऽवग्रहादनन्तरं इदं, तदिति च, इति विमर्शलक्षणा मतिरनुधावति– ईहा प्रवर्तत इत्यर्थः, यदनन्तरं चेहादिप्रवृत्तिः सोऽवग्रह एव, यथा व्यञ्जनावग्रहानन्तरभावी अव्यक्ताऽनिर्देश्यसामान्यमात्रग्राही अवग्रहः, प्रवर्तते च शब्दादिसामान्यविशेषग्राहकाऽवग्रहानन्तरमीहादिः, तस्मादवग्रह एवऽयम्; तथाहि– दूरात् शङ्खादिसंबन्धिनि शब्दे सामान्यविशेषात्मके रूपादिभ्यो भिन्ने[3] गृहीते प्रवर्तत एवायं विमर्शः– किमयं शार्ङ्गः,

१ सामान्यार्थावग्रहणमवग्रहो भेदमार्गणमथेहा । तस्यावगमोऽपायोऽविच्युतिर्धारणा तस्य ॥ १८० ॥

२ सामन्यविशेषस्याऽपि केचिदवग्रहणमवग्रहं ब्रुवते । यद् मतिरिदं तदिति च, तद् नो बहुदोषभावाद् ॥ १८१ ॥ ३ क. 'भिन्नेऽवगृ' ।

शार्ङ्गो वा शब्दः ?। शार्ङ्गश्चेत् किं महिषीशृङ्गोद्भवः, महिषशृङ्गजो वा ?। महिषीशृङ्गसंभवश्चेत्, किं प्रसूतमहिषीशृङ्गसंभवः, अप्रसूतमहिषीशृङ्गसमुद्भूतो वा ? इत्यादि । यतश्चानन्तरमित्थं विमर्शेनेहाप्रवृत्तिर्न भवति, अन्तर्मुहूर्तेः, क्षयोपशमाभावाद् वा, स पुनरपायः ॥

तदेतत् परोक्तं दूषयितुमाह–'तं नो इत्यादि' तदेतत् परोक्तं न । कुतः ? इत्याह– बहवश्च ते दोषाश्च तेषां भाव उपनिपातस्तस्मात्, एवं हि सर्वायुषाऽप्यपायप्रवृत्तिर्न स्यात्, यथोक्तविमर्शप्रवृत्तेरनिष्ठितत्वात् । न च पूर्वमनीहिते प्रथमोऽपि शब्दनिश्चयो युक्तः, यतश्च पूर्वमीहा प्रवर्तते नाऽसाववग्रहः, किन्त्वपाय एवेत्यादि सर्वं पुरस्ताद् वक्ष्यते ॥ इति गाथार्थः ॥ १८१ ॥

अन्ये त्वीहायां विप्रतिपद्यन्ते, तन्मतमुपन्यस्य दूषयन्नाह–

[1]ईहा संसयमेत्तं केई, न तयं तओ जमन्नाणं । मइनाणंसा चेहा कहमन्नाणं तई जुत्तं ? ॥ १८२ ॥

किमयं स्थाणुः, आहोस्वित् पुरुषः ? इत्यनिश्चयात्मकं संशयमात्रं यदुत्पद्यते तदीहेति केचित् प्रतिपद्यन्ते । तदेतद् न घटते । कुतः ? इत्याह– यद् यस्मात् कारणात् । 'तउ त्ति' असौ संशयोऽज्ञानम् । भवतु तर्ह्यज्ञानमपीहा, इति चेत्, इत्याह– 'मईत्यादि' मतिज्ञानांशश्च मतिज्ञानभेदश्चेहा वर्तते । न च ज्ञानभेदस्याऽज्ञानरूपता युज्यते; एतदेवाह– ' कहमित्यादि ' कथं केन प्रकारेणाऽज्ञानं युक्तम् ? न कथञ्चिदित्यर्थः । केयमित्याह–'तई ति' असौ मतिज्ञानांशरूपेहा, संशयस्य वस्त्वप्रतिपत्तिरूपत्वेनाऽज्ञानात्मकत्वात्, ईहायास्तु ज्ञानभेदत्वेन ज्ञानस्वभावत्वात्; ज्ञाना-ऽज्ञानयोश्च परस्परपरिहारेण स्थितत्वाद् नाऽज्ञानरूपस्य संशयस्य ज्ञानांशात्मकेहारूपत्वं युक्तमिति भावः ॥ इति गाथार्थः ॥ १८२ ॥

आह– ननु संशये-हयोः किं कश्चिद् विशेषोऽस्ति, येनेहारूपत्वं संशयस्य निषिध्यते ? इत्याशङ्क्य तयोः स्वरूपभेदमुपदर्शयन्नाह—

[2]जमणेगत्थालंबणमपज्जुदासपरिकुंठियं चित्तं । सेय इव सव्वप्पयओ तं संसयरूवमन्नाणं ॥ १८३ ॥
तं चिय सयत्थहेऊ-ववत्तिवावारतप्परममोहं । भूया-ऽभूयविसेसायाण-च्चायाभिमुहमीहा ॥ १८४ ॥

१ ईहा संशयमात्रं केचित्, न तत् सको यदज्ञानम् । मतिज्ञानांशश्चेहा कथमज्ञानं सा युक्तम् ? ॥ १८२ ॥

२ यदनेकार्थालम्बनमपर्युदासपरिकुण्ठितं चित्तम् । शेत इव सर्वात्मतस्तत् संशयरूपमज्ञानम् ॥ १८३ ॥
तदेव सदर्थहेतूपपत्तिव्यापारतत्परममोघम् । भूता-ऽभूतविशेषाऽऽदान-त्यागाभिमुखमीहा ॥ १८४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

यच्चित्तं यन्मनोऽनेकार्थालम्बनमनेकार्थप्रतिभासाऽऽन्दोलितम्, अत एव पर्युदसनं पर्युदासो निषेधो न तथाऽपर्युदासोऽनिषेधस्तेन, तथोपलक्षणत्वादविधिना च परिकुण्ठितं जडीभूतं सर्वथाऽवस्तुनिश्चयरूपतामापन्नम्, किं बहुना ? 'सेय इंहेत्यादि' शेत इव स्थापितीव सर्वात्मना न किञ्चिच्चेतयते, वस्त्वप्रतिपत्तिरूपत्वात्, तदेवंविधं चित्तं संशय उच्यत इत्यर्थः, तच्चाऽज्ञानम्, वस्त्ववबोधरहितत्वादिति। यत् पुनस्तदेव चेतो वक्ष्यमाणस्वरूपं तदीहेति संबन्धः। कथंभूतं सत् ? इत्याह– 'भूया-भूयेत्यादि' भूतः क्वचिद् विवक्षितप्रदेशे स्थाण्वादिरर्थः, अभूतस्तत्राऽविद्यमानः पुरुषादिः, तावेव पदार्थान्तरेभ्यो विशिष्यमाणत्वाद् विशेषौ, तयोरादान-त्यागाभिमुखं– भूतार्थविशेषोपादानस्याऽभिमुखम्, अभूतार्थत्यागस्याऽभिमुखमिति यथासंख्येन संबन्धः। यतः कथंभूतम् ? इत्याह– सदर्थहेतूपपत्तिव्यापारतत्परं हेतुद्वारेणेदं विशेषणम्– सदर्थहेतूपपत्तिव्यापारतत्परत्वाद् भूता-ऽभूतविशेषादान-त्यागाभिमुखमिति भावः, तत्र हेतुः साध्यार्थगमकं युक्तिविशेषरूपं साधनम्, उपपत्तिः संभवघटनम्– विवक्षितार्थस्य संभवव्यवस्थापनम्। ततश्च हेतुश्चोपपत्तिश्च हेतूपपत्ती सदर्थस्य विवक्षितप्रदेशेऽरण्यादौ विद्यमानस्य स्थाण्वादेरर्थस्य हेतू-पपत्ती सदर्थहेतूपपत्ती तद्विषयो व्यापारो घटनं चेष्टनं सदर्थहेतू-पपत्तिव्यापारस्ततस्तत्परं तन्निष्ठमिति समासः। अत एवाऽमोघमर्थबलायातत्वेनाऽविफलमभिव्यास्वरूपम्, तदेवंभूतं चेतः 'ईहा' इति संबन्धः कृत एवः इदमुक्तं भवति- केनचिदरण्यदेशं गतेन सवितुरस्तमयसमये ईषदवकाशमासादयति तमिस्रे दूरवर्ती स्थाणुरुपलब्धः, ततोऽस्य विमर्शः समुत्पन्नः–किमयं स्थाणुः, पुरुषो वा ? इति। अयं च संशयत्वादज्ञानम्। ततोऽनेन तस्मिन् स्थाणौ दृष्ट्वा वल्ल्यारोहणम्, प्रविलोक्य काक-कारण्डव-कादम्ब-क्रौञ्च-कीरशकुन्तकुलनिलयनम्, कृतश्चैतसि हेतुव्यापारः, यथा स्थाणुरयम्, वल्ल्युत्सर्पण-काकादिनिलयनोपलम्भात्। तथा संभवपर्यालोचनं च व्यधायि, तद् यथा– अस्ताचलान्तरिते सवितरि, प्रसरति चेषत्तमिस्रे महारण्येऽस्मिन् स्थाणुरयं संभाव्यते, न पुरुषः, शिरःकण्डूयन-कर-ग्रीवाचलनादेस्तद्व्यवस्थापकहेतोरभावात्; ईदृशे च प्रदेशेऽस्यां वेलायां प्रायस्तस्याऽसंभवात्। तस्मात् स्थाणुनाऽत्र सद्भूतेन भाव्यम्, न पुरुषेण। तदुक्तम्–

"अरण्यमेतत् सविताऽस्तमागतो न चाऽधुना संभवतीह मानवः। प्रायस्तदेतेन खगादिभाजा भाव्यं स्मरारातिसमाननाम्ना" ॥ १ ॥

एतच्चेदृशं चित्तं 'ईहा' इत्युच्यते, निश्चयाभिमुखत्वेन संशयादुत्तीर्णत्वात्, सर्वथानिश्चयेऽपायत्वप्रसङ्गेन निश्चयादधोवर्तित्वाच्च। इति संशये-हयोः प्रतिविशेषः ॥ इति गाथाद्वयार्थः ॥ १८३ ॥ १८४ ॥

अथाऽपाय-धारणागतविप्रतिपत्तिनिराचिकीर्षया परमतमुपदर्शयन्नाह—

---

१ घ. छ. ज. 'चित्तं संशयरूपं सं'।

[1]केई तयण्णविसेसावणयणमेत्तं अवायमिच्छन्ति। सब्भूयत्थविसेसावधारणं धारणं बेंति ॥ १८५ ॥

तच्छब्दस्याऽनन्तरगाथोक्तो भूतोऽर्थः संबध्यते, तस्मात् तत्र भूताद् विद्यमानात् स्थाण्वादेर्योऽन्यस्तत्प्रतियोगी तत्राऽविद्यमानः पुरुषादिस्तद्विशेषाः शिरःकण्डूयन-चलन-स्पन्दनादयस्तेषां पुरोवर्तिनि सद्भूतेऽर्थेऽपनयनं निषेधनं तदन्यविशेषापनयनं तदेव तन्मात्रम्, अपायमिच्छन्ति, केचनाऽपि व्याख्यातारः– अपायनमपनयनमपाय इति व्युत्पत्त्यर्थविभ्रमितमनस्का इति भावः। अवधारणं धारणा इति च व्युत्पत्त्यर्थभ्रमितास्ते धारणां ब्रुवते। किं तत् ? इत्याह– सद्भूतार्थविशेषावधारणं सद्भूतस्तत्र विवक्षितप्रदेशे विद्यमानः स्थाण्वादिरर्थविशेषस्तस्य 'स्थाणुरेवाऽयं' इत्यवधारणं सद्भूतार्थविशेषावधारणमिति समासः ॥ इति गाथार्थः ॥ १८५ ॥

तदेतद् दूषयितुमाह–

[2]कासइ तयन्नवइरेगमेत्तओऽवगमणं भवे भूए। सब्भूयसमण्णयओ तदुभयओ कासइ न दोसो ॥ १८६ ॥

'भूए त्ति' तत्र विवक्षितप्रदेशे भूते विद्यमानेऽर्थे स्थाण्वादौ 'कासइ त्ति' कस्यचित् प्रतिपत्तुस्तदन्यव्यतिरेकमात्रादवगमनं निश्चयो भवति– तस्मात् स्थाण्वादेर्योऽन्यः पुरुषादिरर्थस्तस्य व्यतिरेकः स एव तदन्यव्यतिरेकमात्रं तस्मात् स्थाण्वाद्यर्थनिश्चयो भवतीत्यर्थः; तद्यथा– यतो नेह शिरःकण्डूयनादयः पुरुषधर्मा दृश्यन्ते; ततः स्थाणुरेवाऽयमिति। कस्यापि सद्भूतसमन्वयतः– सद्भूतस्तत्र प्रदेशे विद्यमानः स्थाण्वादिरर्थस्तस्य समन्वयतोऽन्वयधर्मघटनाद् भूतेऽर्थेऽवगमनं निश्चयो भवेत्, यथा स्थाणुरेवाऽयम्, वल्ल्युत्सर्पण-वयोनिलयनादिधर्माणामिहाऽन्वयादिति। कस्यचित् पुनस्तदुभयादन्वय-व्यतिरेकोभयात् तत्र भूतेऽर्थेऽवगमनं भवेत्; तद्यथा– यस्मात् पुरुषधर्माः शिरःकण्डूयनादयोऽत्र न दृश्यन्ते, वल्ल्युत्सर्पणादयस्तु स्थाणुधर्माः समीक्ष्यन्ते, तस्मात् स्थाणुरेवाऽयमिति। न चैवमन्वयात्, व्यतिरेकात्, उभयाद् वा निश्चये जायमाने कश्चिद् दोषः, परव्याख्याने तु वक्ष्यमाणन्यायेन दोष इति भावः ॥ इति गाथार्थः ॥ १८६ ॥

कथं पुनस्तद्व्याख्याने न दोषः ?, इत्याह–

[3]सव्वो वि य सोऽवाओ भेए वा होंति पंच वत्थूणि। आहेवं चिय चउहा मई तिहा अन्नहा होइ ॥१८७॥

---

१ केचित् तदन्यविशेषापनयनमात्रमपायमिच्छन्ति। सद्भूतार्थविशेषावधारणं धारणां ब्रुवते ॥ १८५ ॥ + स्थानेन –।

२ कस्यचित् तदन्यव्यतिरेकमात्रतोऽवगमनं भवेद् भूते। सद्भूतार्थसमन्वयतस्तदुभयतः कस्यचिद् न दोषः ॥ १८६ ॥

३ सर्वोऽपि च सोऽपायो भेदे वा भवन्ति पञ्च वस्तूनि। आहैवमेव चतुर्धा मतिस्त्रिधाऽन्यथा भवति ॥ १८७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

यस्माद् व्यतिरेकाद्, अन्वयाद्, उभयाद् वा भूतार्थविशेषावधारणं कुर्वतो योऽध्यवसायः स सर्वोऽप्यपायः प्रस्तुतस्थाण्वादिवस्तुनिश्चयः, न तु सद्भूतार्थविशेषावधारणं धारणेति भावः, तस्माद् न दोषः ॥

आह– ननु यथा मया व्याख्यायते– सद्भूतार्थविशेषावधारणं धारणा, तथा किं कश्चिद् दोषः समुपजायते, येनाऽऽत्मीयव्याख्यानपक्षे इदमित्थमभिधीयते 'न दोषः' इति ?। एतदाशङ्क्याह– ' भेए वेत्यादि ' वाशब्दः पातनायां गतार्थः, व्यतिरेकोऽपायः, अन्वयस्तु धारणा, इत्येवं मतिज्ञानतृतीयभेदस्याऽपायस्य भेदेऽभ्युपगम्यमाने पञ्च वस्तूनि पञ्च भेदा भवन्ति, 'आभिनिबोधिकज्ञानस्य' इति गम्यते; तथाहि– अवग्रहे-हा-ऽपाय-धारणालक्षणाश्चत्वारो भेदास्तावत् त्वयैव पूरिताः, पञ्चमस्तु भेदः स्मृतिलक्षणः प्राप्नोति– अविच्युतेः स्वसमानकालभाविन्यपायेऽन्तर्भूतत्वात्, वासनायास्तु स्मृत्यन्तर्गतत्वेन विवक्षितत्वात्, स्मृतेरनन्यशरणत्वाद् मतेः पञ्चमो भेदः प्रसज्यत इति भावः ॥

' आहेत्यादि ' पुनरप्याह परः– ननु यथैव मया व्याख्यायते– व्यतिरेकमुखेन निश्चयोऽपायः, अन्वयमुखेन तु धारणा, इत्येवमेव चतुर्धा चतुर्विधा मतिर्भवति युक्तितो घटते । अन्यथा तु व्याख्यायमाने– अन्वय-व्यतिरेकयोर्द्वयोरप्यपायत्वेऽभ्युपगम्यमाने इत्यर्थः । किम् ?, इत्याह– त्रिधा- अवग्रहे-हा-ऽपायभेदतस्त्रिभेदा मतिर्भवति, न पुनश्चतुर्धा, धारणाया अघटमानकत्वादिति भावः ॥ इति गाथार्थः ॥ १८७ ॥

कथं पुनर्धारणाऽभावः ?, इत्याह–

कोऽणुवओगम्मि धिई पुणोवओगे य सा जओऽवाओ ?। तो नत्थि धिई, भण्णइ इदं तदेवेति जा बुद्धी॥१८८॥

नणु साऽवायब्भहिया जओ य सा वासणाविसेसाओ । जा याऽवायाणन्तरमविच्चुई सा धिई नाम ॥१८९॥

अनुपयोगे उपयोगोपरमे सति का धृतिः– का नाम धारणा ? न काचिदित्यर्थः, इदमुक्तं भवति– इह तावद् निश्चयोपायमुखेन घटादिके वस्तुनि अवग्रहे-हा-ऽपायरूपतयाऽन्तर्मुहूर्तप्रमाण एवोपयोगो जायते । तत्र चाऽपाये जाते या उपयोगसातत्यलक्षणाऽविच्युतिर्भवताऽभ्युपगम्यते, साऽपाय एवाऽन्तर्भूता, इति न ततो व्यतिरिक्ता। या तु तस्मिन् घटाद्युपयोगे उपरते सति संख्येयमसं-

१ काऽनुपयोगे धृतिः पुनरुपयोगे च सा यतोऽपायः ? । ततो नास्ति धृतिर्भण्यते इदं तदेवेति या बुद्धिः ॥ १८८ ॥
ननु साऽपायाऽभ्यधिका यतश्च सा वासनाविशेषात् । या चाऽपायानन्तरमविच्युतिः सा धृतिर्नाम ॥ १८९ ॥

ख्येयं वा कालं वासनाऽभ्युपगम्यते,'इदं तदेव' इतिलक्षणा स्मृतिश्चाङ्गीक्रियते, सा मत्यंशरूपा धारणा न भवति, मत्युपयोगस्य प्रागेवोपरतत्वात् । पुनरपि कालान्तरोपयोगे धारणा भविष्यतीति चेत्, इत्याह–'पुणो इत्यादि' कालान्तरे पुनर्जायमानोपयोगेऽपि याऽन्वयमुखोपजायमानाऽवधारणरूपा धारणा मयेष्यते, सा यतोऽपाय एव भवताऽभ्युपगम्यते 'सव्वो वि य सोऽवाओ' इत्यादिवचनात्; ततस्तत्रापि नास्ति धृतिर्धारणा, पुनरप्युपयोगोपरमेऽपि पूर्वोक्तयुक्त्यैव तदभावः; तस्मादुपयोगकालेऽन्वयमुखाऽवधारणरूपाया धारणायास्त्वयाऽनभ्युपगमात्, उपयोगोपरमे च मत्युपयोगाभावात्, तदंशरूपाया धारणाया अघटमानकत्वात् त्रिधैव भवदभिप्रायेण मतिः प्राप्नोति, न चतुर्धा, इति पूर्वपक्षाभिप्रायः ॥

अत्रोत्तरमाह– 'भण्णईत्यादि' भण्यतेऽत्र प्रतिविधानम् । किम् ?, इत्याह– ' इदं वस्तु तदेव यत् प्रागुपलब्धं मया ' इत्येवंभूता कालान्तरे या स्मृतिरूपा बुद्धिरुपजायते, नन्विह सा पूर्वप्रवृत्तादपायाद् निर्विवादमभ्यधिकैव, पूर्वप्रवृत्ताऽपायकाले तस्या अभावात्; सांप्रतापायस्य तु वस्तुनिश्चयमात्रफलत्वेन पूर्वापरदर्शनानुसंधानाऽयोगात् । ततश्च साऽनन्यरूपत्वाद् धृतिर्धारणा नामेति पर्यन्ते संबन्धः । यतश्च यस्माच्च वासनाविशेषात्– पूर्वोपलब्धवस्त्वाहितसंस्कारलक्षणात् तद्विज्ञानावरणक्षयोपशमसान्निध्यादित्यर्थः, सा 'इदं तदेव' इतिलक्षणा स्मृतिर्भवति । साऽपि वासनाऽपायादभ्यधिकेति कृत्वा धृतिर्नाम, इतीहापि संबन्धः । 'जा याऽवायेत्यादि' या चाऽपायादनन्तरमविच्युतिः प्रवर्तते साऽपि धृतिर्नाम । इदमुक्तं भवति– यस्मिन् समये 'स्थाणुरेवाऽयम्' इत्यादिनिश्चयस्वरूपोऽपायः प्रवृत्तः, ततः समयादूर्ध्वमपि 'स्थाणुरेवाऽयम्, स्थाणुरेवाऽयम्' इत्यविच्युता याऽन्तर्मुहूर्तं क्वचिदपायप्रवृत्तिः साऽप्यपायाऽविच्युतिः प्रथमप्रवृत्तापायादभ्यधिकेति धृतिर्धारणा नामेति । एवमविच्युति-वासना-स्मृतिरूपा धारणा त्रिधा सिद्धा भवति ॥

अत्राह काश्चित्– नन्वविच्युति-स्मृतिलक्षणौ ज्ञानभेदौ गृहीतग्राहित्वाद् न प्रमाणम्, द्वितीयादिवारा प्रवृत्ताऽपायसाध्यस्य वस्तुनिश्चयलक्षणस्य कार्यस्य प्रथमवारा प्रवृत्तापायेनैव साधितत्वात् । न च निष्पादितक्रिये कर्मणि तत्साधनायैव प्रवर्तमानं साधनं शोभां बिभर्ति, अतिप्रसङ्गात्- कुठारादिभिः कृतच्छेदनादिक्रियेष्वपि वृक्षादिषु पुनस्तत्साधनाय तेषां प्रवृत्त्यापत्तेः । स्मृतेरपि पूर्वोत्तरकालभाविज्ञानद्वयगृहीत एव वस्तुनि प्रवर्तमानतया कुतः प्रामाण्यम् ?। न च वक्तव्यं पूर्वोत्तरदर्शनद्वयाऽनधिगतस्य वस्त्वेकत्वस्य ग्रहणात् स्मृतिः प्रमाणम्, पूर्वोत्तरकालदृष्टस्य वस्तुनः कालादिभेदेन भिन्नत्वात्, एकत्वस्यैवाऽसिद्धत्वादिति । वासना तु किंरूपा ? इति वाच्यम् । संस्काररूपेति चेत् । कोऽयं नाम संस्कारः ?– स्मृति-ज्ञानावरणक्षयोपशमो वा, तज्ज्ञानजननशक्तिर्वा, तद्वस्तुविकल्पो वा ? इति

१ गाथा १८७ । २ घ. छ. ज. 'च्युत्या या' । + नन्वहो-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रयी गतिः । तत्राद्यपक्षद्वयमयुक्तम्, ज्ञानरूपत्वाभावात्, तद्भेदानां चेह विचार्यत्वेन प्रस्तुतत्वात् । तृतीयपक्षोऽप्ययुक्त एव, संख्येयमसंख्येयं वा कालं वासनाया इष्टत्वात्, एतावन्तं च कालं तद्वस्तुविकल्पाऽयोगात् । तदेवमविच्युति-स्मृति-वासनारूपायास्त्रिविधाया अपि धारणाया अघटमानत्वात् त्रिधैव मतिः प्राप्नोति, न चतुर्धा ॥

अत्रोच्यते—यत् तावद् गृहीतग्राहित्वादविच्युतेरप्रामाण्यमुच्यते, तदयुक्तम्, गृहीतग्राहित्वलक्षणस्य हेतोरसिद्धत्वात्, अन्यकालविशिष्टं हि वस्तु प्रथमप्रवृत्ताऽपायेन गृह्यते, अपरकालविशिष्टं च द्वितीयादिवारा प्रवृत्ताऽपायेन । किञ्च, स्पष्ट-स्पष्टतर-स्पष्टतमभिन्नधर्मैकवासनाजनकत्वादप्यविच्युतिप्रवृत्तद्वितीयाद्यपायविषयं वस्तु भिन्नधर्मकमेव, इति कथमविच्युतेर्गृहीतग्राहिता ? । स्मृतिरपि पूर्वोत्तरदर्शनद्वयानधिगतं वस्त्वेकत्वं गृह्णाना न गृहीतग्राहिणी । न च वक्तव्यं कालादिभेदेन भिन्नत्वाद् वस्तुनो नैकत्वम्, कालादिभिर्भिन्नत्वेऽपि सत्त्व-प्रमेयत्व-संस्थानरूपादिभिरेकत्वात् । वासनापि स्मृति-विज्ञानावरणकर्मक्षयोपशमरूपा, तद्विज्ञानजननशक्तिरूपा चेष्यते । सा च यद्यपि स्वयं ज्ञानरूपा न भवति, तथापि पूर्वप्रवृत्ताऽविच्युतिलक्षणज्ञानकार्यत्वात्, उत्तरकालभाविस्मृतिरूपज्ञानकारणत्वाद्योपचारतो ज्ञानरूपाऽभ्युपगम्यते । तद्वस्तुविकल्पपक्षस्त्वनभ्युपगमादेव निरस्तः । तस्मादविच्युति-स्मृति-वासनारूपाया धारणायाः स्थितत्वाद् न मतेस्त्रैविध्यम्, किन्तु चतुर्धा सेति स्थितम् ॥ इति गाथाद्वयार्थः ॥ १८८ ॥ १८९ ॥

अथैतां स्वाभिमतां धारणां व्यवस्थाप्य परं प्रत्याह—

तं इच्छंतस्स तुहं वत्थूणि य पंच, नेच्छमाणस्स[1] । किं होउ सा अभावो भावो नाणं व तं कयरं ? ॥१९०॥

अस्मदभिमतामनन्तरप्रतिष्ठितस्वरूपां तां धारणामिच्छतस्तव पञ्च वस्तूनि— पञ्चाऽऽभिनिबोधिकज्ञानभेदाः प्राप्नुवन्ति, अपायस्यैकस्याऽपि भेदद्वयरूपताभ्युपगमेन भेदचतुष्टयस्य त्वयाऽपि पूरितत्वात्, पञ्चमस्य तु मदुक्तस्य धारणालक्षणस्य प्रसङ्गादिति भावः । अथास्मदभ्युपगता धारणा त्वया नेष्यते, तर्हि ' नेच्छमाणस्स किं होउ इत्यादि ' तां मदभ्युपगतां धारणामनिच्छतोऽप्रतिपद्यमानस्य तव सा मदभ्युपगता धारणा किं भवतु-अभावो-अवस्तु, आहोस्विद् भावो- वस्तु ? इति विकल्पद्वयम् । किञ्चातः ? न तावदभावः, भावत्वेनाऽनुभूयमानत्वात् । न च तथाऽनुभूयमानस्याऽभावत्वमाधातुं शक्यते, अतिप्रसङ्गात्— घटादिष्वपि तथात्वप्राप्तेः; तेऽपि ह्यनुभववशेनैव भावरूपा व्यवस्थाप्यन्ते । यदि चाऽनुभवोऽप्यप्रमाणम्, तदा घटादिष्वपि भावरूपतायामनाश्वास इति भावः । अथ भावोऽसौ,

---

१ तामिच्छतस्तव वस्तूनि च पञ्च, नेच्छतः । किं भवतु साऽभावो भावो ज्ञानं वा तद् कतरत् ? ॥ १९० ॥ ✕ स्स-।

तर्हि वक्तव्यम्— ज्ञानम्, अज्ञानं वा ? । न तावदज्ञानम्, चिद्रूपतयाऽनुभूयमानत्वात् । अथ ज्ञानम्, तदपि मति-श्रुता-ऽवधि-मनःपर्याय-केवलेभ्यो ज्ञानान्तरस्याऽभावात् तेषां मध्ये कतमत् ? इति वाच्यम् । न तावत् श्रुतादिचतुष्टयरूपम्, अनभ्युपगमात्, तल्लक्षणाऽयोगाच्च । मतिज्ञानं चेत्, तदपि नाऽवग्रहे-हा-ऽपायरूपम्, तल्लक्षणासंभवात् ' णेणु साऽवायब्भहिया ' इत्यादिनाऽपायाभ्यधिकत्वेन साधितत्वाच्च । तस्मादन्वय-व्यतिरेकाभ्यां निश्चयः सर्वोऽप्यपायः, अविच्युति-स्मृति-वासनारूपा तु पारिशेष्यद्वारेणैव, इति स्थितम् ॥ इति गाथार्थः ॥ १९० ॥

तदेवं निरुत्तरीकृतोऽप्यविलक्षितृतयाऽन्येन प्रेरकेणाह—

तुज्झं बहुयरभेया भणइ मई होई धिइबहुत्ताओ । भण्णइ न जाइभेओ इट्ठो मज्झं जहा तुज्झं ॥ १९१॥

अत्र प्रेरको भणति । किम् ?, इत्याह— 'तुज्झमित्यादि' इत्थमाचार्य ! तव बहुतरभेदा मतिर्भवति । कुतः ?, इत्याह— धृतेर्धारणाया बहुत्वाद् बहुभेदत्वादित्यर्थः— धारणाया एकस्या अप्यविच्युति-वासना-स्मृतिलक्षणभेदत्रययुक्तत्वादवग्रहे-हा-ऽपायैः सह षड्भेदा मतिः प्राप्नोतीति भावः । अत्र प्रतिविधानमाह— 'भण्णईत्यादि' भण्यतेऽत्रोत्तरम्— जातेर्भेदो जातिभेदो व्यक्तिपक्ष इत्यर्थः, स इह धारणाविचारे मम नेष्टो नाभिप्रेतः, किन्तु धारणासामान्यरूपा जातिरेव ममाऽभिप्रेता । कस्य यथा ?, इत्याह— यथा तव 'अवग्रहविषये' इति शेषः; इदमुक्तं भवति— यथाऽवग्रहो व्यञ्जना-ऽर्थावग्रहभेदादुभयरूपोऽवग्रहसामान्यादेकस्त्वयाऽपीष्टः, अन्यथा मतेः पञ्चविधत्वप्रसङ्गात्; तथा त्रिरूपाऽपि धारणा तत्सामान्यादेकरूपैव; इति चतुर्विधैव मतिः, न बहुतरभेदा ॥ इति गाथार्थः ॥ १९१ ॥

एतदेव भावयन्नाह—

सा भिन्नलक्खणाऽवि हु धिइसामन्नेण धारणा होइ । जह उग्गहो दुरूवो उग्गहसामन्नओ एक्को ॥१९२॥

सा धारणा, अविच्युति-वासना-स्मृतीनां भिन्नस्वरूपत्वेन भिन्नलक्षणाऽपि सती धारणासामान्याव्यतिरेकादेकैव भवति; यथाऽवग्रहो व्यञ्जना-ऽर्थावग्रहभेदाद् द्विरूपोऽप्यवग्रहसामान्याव्यतिरेकादेकः परस्याऽपि सिद्धः, अन्यथा मतेः पञ्चविधत्वापत्तेः ॥ इति गाथार्थः ॥ १९२ ॥

---

१ गाथा १८९ । २ ध. छ. ज. 'कारणेनाह'। ३ तव बहुतरभेदा भणति मतिर्भवति धृतिबहुत्वात् । भण्यते न जातिभेद इष्टो मम यथा तव ॥१९१॥

४ सा भिन्नलक्षणाऽपि खलु धृतिसामान्येन धारणा भवति । यथाऽवग्रहो द्विरूपोऽवग्रहसामान्यत एकः ॥ १९२ ॥ २ करणेनाह-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

तदेवमवग्रहादिभेदचतुष्टयविषया निराकृताः सर्वे अपि परविप्रतिपत्तयः, तन्निराकरणप्रक्रमे चानन्तरमवग्रहो द्विरूपः प्रोक्तः। स च कथं द्विरूपो भवति ? इत्याशङ्क्य तद्द्विरूपताकथनव्याजेन पूर्वं यान्याभिनिबोधिकज्ञानस्याऽवग्रहादीनि चत्वारि भेदवस्तून्युक्तानि, तेष्वेव मध्येऽवग्रहं तावद् व्याचिख्यासुराह–

[1]तत्थोग्गहो दुरूवो गहणं जं होइ वंजण-त्थाणं। वंजणओ य जमत्थो तेणाईए तयं वोच्छं ॥ १९३ ॥

तत्राऽवग्रहणमवग्रहो द्विरूपो यथा भवति, तथा प्रोच्यते। कथम् ?, इत्याह– यद् यस्माद् ग्रहणं व्यञ्जनाऽर्थयोरेव भवेत्, अन्यस्य ग्राह्यस्याऽभावात्। ततश्च विषयद्वैविध्यादवग्रहो द्विविध इति भावः। अपरं च, यद्यस्मात् कारणाद् वक्ष्यमाणन्यायेन प्राप्यकारिष्विन्द्रियेषु व्यञ्जनतो- व्यञ्जनावग्रहादनन्तरमेव, अर्थो- अर्थावग्रहो भवति, तेनाऽऽदौ प्रथमतस्तकं व्यञ्जनावग्रहमेव वक्ष्ये॰॥ इति गाथार्थः॥ १९३॥

तत्र व्यञ्जनं तावत् किमुच्यते ?, इत्याह–

[2]वंजिज्जइ जेणत्थो घडो व्व दीवेण वंजणं तं च। उवगरणिंदियसद्दाइपरिणयद्दव्वसंबंधो ॥ १९४ ॥

व्यज्यते प्रकटीक्रियतेऽर्थो येन, दीपेनेव घटः, तद् व्यञ्जनम्। किं पुनस्तत् ?, इत्याह– 'तं चेत्यादि', तच्च व्यञ्जनमुपकरणेन्द्रियशब्दादिपरिणतद्रव्यसंबन्धः– इन्द्रियं द्विविधम्- द्रव्येन्द्रियं, भावेन्द्रियं च। तत्र निर्वृत्त्यु-पकरणे द्रव्येन्द्रियम्, लब्ध्यु-पयोगौ भावेन्द्रियम्। निर्वृत्तिश्च द्विधा– अङ्गुलासंख्येयभागादिमानौ कदम्बकुसुमगोलक-धान्यमसूर-काहला-क्षुरप्राकारमांसगोलकरूपा, शरीराकारा च श्रोत्रादीन्द्रियाणां पञ्चानामपि यथासंख्यमन्तर्निर्वृत्तिः; कर्णशष्कुलिकादिरूपा तु बहिर्निर्वृत्तिः। तत्र कदम्बकुसुमगोलकाकारमांसखण्डादिरूपाया अन्तर्निर्वृत्तेः शब्दादिविषयपरिच्छेदहेतुर्यः शक्तिविशेषः स उपकरणेन्द्रियम्, शब्दादिश्च श्रोत्रादीन्द्रियाणां[+] विषयः, आदिशब्दाद् रस-गन्ध-स्पर्शपरिग्रहः; तद्भावेन परिणतानि च तानि भाषावर्गणादिसंबन्धीनि द्रव्याणि च शब्दादिपरिणतद्रव्याणि, उपकरणेन्द्रियं च शब्दादिपरिणतद्रव्याणि च, तेषां परस्परं संबन्ध उपकरणेन्द्रिय-शब्दादिपरिणतद्रव्यसंबन्धः; एष तावद् व्यञ्जनमुच्यते। अपरं चेन्द्रियेणाऽप्यर्थस्य व्यज्यमानत्वात् तदपि व्यञ्जनमुच्यते। तथा शब्दादिपरिणतद्रव्यनिकुरम्बमपि व्यज्यमानत्वाद् व्यञ्ज-

---

१ छ. 'कथं हि द्वि'। २ तत्राऽवग्रहो द्विरूपो ग्रहणं यद्भवति व्यञ्जना-ऽर्थयोः। व्यञ्जनतश्च यदर्थस्तेनादौ तकं वक्ष्ये ॥ १९३ ॥ + श्रोत्रादिन्द्रियाणां विषयः।

३ व्यज्यते येनाऽर्थो घट इव दीपेन व्यञ्जनं तच्च। उपकरणेन्द्रियशब्दादिपरिणतद्रव्यसंबन्धः ॥ १९४ ॥ ४ ज. 'मानक'।

नमभिधीयत इति। एवमुपलक्षणव्याख्यानात् त्रितयमपि यथोक्तं व्यञ्जनमवगन्तव्यम्। ततश्चेन्द्रियलक्षणेन व्यञ्जनेन शब्दादिपरिणतद्रव्यसंबन्धस्वरूपस्य व्यञ्जनस्याऽवग्रहो व्यञ्जनावग्रहः, अथवा तेनैव व्यञ्जनेन शब्दादिपरिणतद्रव्यात्मकानां व्यञ्जनानामवग्रहो व्यञ्जनावग्रहः; इत्युभयत्राऽप्येकस्य व्यञ्जनशब्दस्य लोपं कृत्वा समासः॥ इति गाथार्थः॥ १९४॥

अत्राऽऽक्षेपं, परिहारं चाभिधित्सुराह–

[1]अण्णाणं सो बहिराइणं व तक्कालमणुवलंभाओ। न तदंते तत्तो च्चिय उवलंभाओ तओ नाणं ॥१९५॥

स व्यञ्जनावग्रहोऽज्ञानं ज्ञानं न भवति, तस्योपकरणेन्द्रिय-शब्दादिपरिणतद्रव्यसंबन्धस्य कालस्तत्कालस्तस्मिन् ज्ञानस्यानुपलम्भात् स्वसंवेदनेनाऽसंवेद्यमानत्वात्; बधिरादीनामिव– यथा हि बधिरादीनामुपकरणेन्द्रियस्य शब्दादिविषयद्रव्यैः सह संबन्धकाले न किमपि ज्ञानमनुभूयते, अननुभूयमानत्वाच्च तन्नास्ति, तथेहाऽपीति भावः॥ अत्रोत्तरमाह– 'न तदंते इत्यादि' नासौ जडरूपतया ज्ञानरूपेणाऽननुभूयमानत्वादज्ञानम्, किं तर्हि ?, [+]सकोऽसौ व्यञ्जनावग्रहो ज्ञानमेव। कुतः ?, तदन्ते- तस्य व्यञ्जनावग्रहस्यान्ते, तत एव ज्ञानात्मकस्याऽर्थावग्रहोपलम्भस्य भावात्, तथाहि– यस्य ज्ञानस्यान्ते तज्ज्ञेयवस्तूपादानात् तत एव ज्ञानमुपजायते तज्ज्ञानं दृष्टम्, यथाऽर्थावग्रहपर्यन्ते तज्ज्ञेयवस्तूपादानत ईहासद्भावादर्थावग्रहो ज्ञानम्, जायते च व्यञ्जनावग्रहस्य पर्यन्ते तज्ज्ञेयवस्तूपादानात् तत एवाऽर्थावग्रहज्ञानम्, तस्माद् व्यञ्जनावग्रहो ज्ञानम्॥ इति गाथार्थः॥ १९५॥

तदेवं व्यञ्जनावग्रहे यद्यपि ज्ञानं नानुभूयते, तथापि ज्ञानकारणत्वादसौ ज्ञानम्, इत्येवं व्यञ्जनावग्रहे ज्ञानाभावमभ्युपगम्योक्तम्। साम्प्रतं ज्ञानाभावोऽपि तत्राऽसिद्ध एवेति दर्शयन्नाह–

[2]तक्कालम्मि वि नाणं तत्थत्थि तणुं ति तो तमव्वत्तं। बहिराईणं पुण सो अन्नाणं तदुभयाभावा ॥१९६॥

तत्कालेऽपि तस्य व्यञ्जनसंबन्धस्य कालेऽपि तत्राऽनुपहतेन्द्रियसंबन्धिनि व्यञ्जनावग्रहे ज्ञानमस्ति, केवलमेकतेजोऽवयवप्रकाशवत् तनु– अतीवाऽल्पमिति; अतोऽव्यक्तं स्वसंवेदनेनापि न व्यज्यते। यद्यव्यक्तम्, कथं तदस्तीति ज्ञायते ? इति चेत्। मा त्वरिष्ठाः, 'जइ वण्णाणमसंखेज्जसमइसद्दाइदव्वसब्भावे' इत्यादिनाऽनन्तरमेव तदस्तित्वयुक्तेर्वक्ष्यमाणत्वात्। दृष्टान्ते तु ज्ञानाभावेऽविप्रतिपत्ति-

---

१ अज्ञानं स बधिरादीनामिव तत्कालमनुपलम्भात्। न तदन्ते तत एवोपलम्भात् सको ज्ञानम् ॥ १९५ ॥ + तको-।

२ तत्कालेऽपि ज्ञानं तत्राऽस्ति तनु इत्यतस्तदव्यक्तम्। बधिरादीनां पुनः सोऽज्ञानं तदुभयाभावात् ॥ १९६ ॥ ३ गाथा २०० ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रिति दर्शयन्नाह– बधिरादीनाम्, आदिशब्दादुपहतघ्राणादीन्द्रियाणां पुनः स व्यञ्जनावग्रहोऽज्ञानं ज्ञानं न भवतीत्यत्राऽविप्रतिपत्तिरेव। कुतः ?, इत्याह– तच्च तदुभयं च तदुभयं तस्याऽभावाज्ज्ञानकारणत्वाभावात्, अव्यक्तस्याऽपि च ज्ञानस्याऽभावात् ॥ इति गाथार्थः ॥ १९६ ॥

अथ पुनरप्याक्षेपं, परिहारं चाभिधित्सुराह—

कहमव्वत्तं नाणं च सुत्त-मत्ताइसुहुमबोहो व्व। सुत्तादओ सयं वि य विन्नाणं नावबुज्झंति॥ १९७ ॥

परः सासूयमाह– ननु कथं 'ज्ञानम्, अव्यक्तं च' इत्युच्यते ? तमः-प्रकाशाद्यभिधानवद् विरुद्धत्वाद् नेदं वक्तुं युज्यत इति भावः। अत्रोत्तरमनन्तरमेवोक्तम्– एकतेजोऽवयवप्रकाशवत् सूक्ष्मत्वादव्यक्तम्। अथ पुनरप्युच्यते– सुप्त-मत्त-मूर्च्छितादीनां सूक्ष्मबोधवदव्यक्तं ज्ञानमुच्यत इति न दोषः। सुप्तादीनां तदात्मीयज्ञानं स्वसंविदितं भविष्यतीति चेत्। नैतदेवमित्याह– सुप्तादयः स्वयमपि तदात्मीयविज्ञानं नाऽवबुध्यन्ते न संवेदयन्ति, अतिसूक्ष्मत्वात् ॥ इति गाथार्थः ॥ १९७ ॥

आह– यदि तैरपि सुप्तादिभिस्तदात्मीयज्ञानं न संवेद्यते, तर्हि तत् तेषामस्तीत्येतत् कथं लक्ष्यते ?, इत्याह—

लक्खिज्जइ तं सिमिणायमाणवयणदाणाइचिट्ठाहिं। जं नामइपुव्वाओ विज्जंते वयणचिट्ठाओ॥ १९८ ॥

तत् सुप्तादीनां ज्ञानमस्तित्वेन लक्ष्यते। कुतः ?, स्वप्नायमानवचनदानादिचेष्टाभ्यः, सुप्तादयोऽपि हि स्वप्नायमानाद्यवस्थायां केचित् किमपि भाषमाणा दृश्यन्ते, शब्दिताश्चौघतो वाचं प्रयच्छन्ति, संकोच-विकोचा-ऽङ्गभङ्ग-जृम्भित-कूजित-कण्डूयनादिचेष्टाश्च कुर्वन्ति, न च तास्ते तदा वेदयन्ते, नापि च प्रबुद्धाः स्मरन्ति। तर्हि कथं तच्चेष्टाभ्यस्तेषां ज्ञानमस्तीति लक्ष्यते ?, इत्याह– 'जमित्यादि' यद् यस्मात् कारणाद् नाऽमतिपूर्वास्ता वचनादिचेष्टा विद्यन्ते, किन्तु मतिपूर्विका एव, अन्यथा काष्ठादीनामपि तत्प्रसङ्गात्; अतस्ताभ्यस्तत् तेषामस्तीति लक्ष्यत एव, धूमादग्निरिव ॥ इति गाथार्थः ॥ १९८ ॥

आह– नन्वात्मीयमपि चेष्टितं किं कश्चिद् न जानाति, येन सुप्तादीनां स्वचेष्टिताऽसंवेदनमुच्यते ?, इत्याशङ्क्याह–

---

१ कथमव्यक्तं ज्ञानं च सुप्त-मत्तादिसूक्ष्मबोध इव। सुप्तादयः स्वयमपि च विज्ञानं नावबुध्यन्ते ॥ १९७ ॥

२ लक्ष्यते तत् स्वप्नायमानवचनदानादिचेष्टाभ्यः। यद् नाऽमतिपूर्वा विद्यन्ते वचनचेष्टाः ॥ १९८ ॥

जग्गन्तो वि न जाणइ छउमत्थो हिययगोयरं सव्वं। जं तज्झवसाणाइं जमसंखेज्जाइं दिवसेण ॥१९९॥

हृदयं मनो गोचरः स्थानं यस्य तद् हृदयगोचरं 'अध्यवसायनिकुरम्बं' इति गम्यते, तज्जाग्रदपि च्छद्मस्थः सर्वमपरिशेषं न जानाति- न संवेदयते, आस्तां पुनः सुप्तः। कुतः ?, इत्याह– अध्यवसानानि– अध्यवसायस्थानरूपाणि केवलिगम्यानि सूक्ष्माणि यत एकेनाऽप्यन्तर्मुहूर्तेनाऽसंख्येयानि यान्त्यतिक्रामन्ति, किं पुनः सर्वेणापि दिवसेन ?। न चैतानि च्छद्मस्थः सर्वाण्यपि संवेदयते। ततश्च यथैतानि च्छद्मस्थैरसंवेद्यमानान्यपि केवलिदृष्टत्वात् सत्त्वेनाऽभ्युपगम्यन्ते, तथा व्यञ्जनावग्रहज्ञानमपि[2] ॥ इति गाथार्थः ॥ १९९ ॥

आह– ननु सुप्तादीनां ज्ञानं वचनादिचेष्टाभ्यो गम्यत इत्युक्तम्, तत्तावदभ्युपगच्छामः, व्यञ्जनावग्रहे तु ज्ञानरूपतागमकं लिङ्गं न किञ्चिदुपलभामहे, अतो जडरूपत्वाद् नासौ ज्ञानमिति ब्रूमः, इत्याशङ्क्याह–

जइ वण्णाणमसंखेज्जसमइमद्दाइदव्वसब्भावे। किह चरमसमयसद्दाइदव्वविण्णाणसामत्थं ?॥ २००॥

वाशब्दः पातनासूचकः, सा च कृतैव। ततश्च हन्त ! यद्यज्ञानं व्यञ्जनावग्रहः। क सति ?, इत्याह– असंख्येयसमयशब्दादिद्रव्यसद्भावेऽपि सति, इत्यपिशब्दो गम्यते। कथं तर्हि चरमसमयशब्दादिद्रव्याणां विज्ञानजननसामर्थ्यम् ? न कथञ्चिदित्यर्थः। इदमुक्तं भवति– व्यञ्जनावग्रहे तावत् प्रतिसमयमसंख्येयान् समयान् यावच्छ्रोत्रादीन्द्रियैः सह शब्दादिविषयद्रव्याणि संबध्यन्ते। ततश्च यद्यसंख्येयसमयान् यावच्छ्रोत्रादीन्द्रियैः सह शब्दादिविषयद्रव्यसंबन्धसद्भावेऽपि सति व्यञ्जनावग्रहरूपं ज्ञानं नाभ्युपगम्यते, कथं तर्हि चरमसमये श्रोत्रादीन्द्रियैः सह संबद्धानां शब्दादिविषयद्रव्याणां परेणाऽप्यर्थावग्रहलक्षणविज्ञानजननसामर्थ्यमिष्यते ?, तदभ्युपगन्तुं न युज्यत इति भावः। यदि हि शब्दादिविषयद्रव्याणां श्रोत्रादीन्द्रियैः सह संबन्धे आद्यसमयादेवाऽऽरभ्य ज्ञानमात्रा काचित् प्रतिसमयमाविर्भवन्ती नाभ्युपगम्यते, तर्हि चरमसमयेऽप्येकस्मादेवैषा न युज्यते, तथा च सत्यर्थावग्रहादिज्ञानानामप्यनुदयप्रसङ्गः ॥ इति गाथार्थः ॥ २०० ॥

---

१ जाग्रदपि न जानाति च्छद्मस्थो हृदयगोचरं सर्वम्। यत् तदध्यवसानानि यदसंख्येयानि दिवसेन ॥ १९९॥

२ एके तु यथा जलकणैर्द्वित्रिःसिक्तोऽप्यभिनवः शरावो नार्द्रीभवति, पुनः पुनः सिच्यमानस्तु शनैस्तिम्यति; एवमिन्द्रियैरर्था गृह्यमाणा द्वादिसमयेषु न व्यक्तीभवन्ति, पुनः पुनरवग्रहे तु तथा स्युः, इति व्यक्तावग्रहात् प्रागव्यक्तावग्रहः, स एव व्यञ्जनावग्रहः, अव्यक्तं वस्तु च व्यञ्जनम्, इति साधयन्ति। एतच्च न युक्तम्, सर्वविषयिविषयाणां व्यक्ता-ऽव्यक्तत्वात्, तथा च दर्शनवत् सर्वेन्द्रियेभ्योऽपि व्यञ्जनावग्रहः स्यात्, न चैतत् सांप्रतम्, "न चक्षुरनिन्द्रियाभ्याम्" (तत्त्वार्थ० १-१९) इति सूत्रेण तस्य सर्वेन्द्रियाजन्यत्वात्, इत्यपि द्रष्टव्यम् ॥

३ यदि वाऽज्ञानमसंख्येयसमयशब्दादिद्रव्यसद्भावे। कथं चरमसमयशब्दादिद्रव्यविज्ञानसामर्थ्यम् ? ॥ २०० ॥. ४ घ. छ. ज. 'चरिम'।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

तथाहि—

जं सव्वहा न वीसुं सव्वेसु वि तं न रेणुतेल्लं व । पत्तेयमणिच्छंतो कहमिच्छसि समुदए नाणं ? ॥२०१॥

यद् वस्तु सर्वथा सर्वप्रकारैर्विष्वक् पृथग् नास्ति तत् समुदायेऽपि नाऽभ्युपगन्तव्यम्, यथा रेणुकणनिकरे प्रतिरेणुकमविद्यमानं तैलम् ; एवं चेत्, तर्हि त्वमपि प्रत्येकमनिच्छन् कथं समुदये ज्ञानमिच्छसि ? । इदमुक्तं भवति– यदीन्द्रियविषयसंबन्धस्य प्रथमसमयादारभ्य व्यञ्जनावग्रहसंबन्धिनोऽसंख्येयान् समयान् यावत् प्रतिसमयं पुष्टिमाबिभ्रतीं ज्ञानमात्रां काञ्चिदपि नेच्छसि, तर्हि चरमसमयशब्दादिविषयद्रव्यसंबन्धेन संपूर्णे समुदायेऽपि कथं तामिच्छसि ?– चरमसमयशब्दादिविषयद्रव्यसंबन्धे यदर्थावग्रहज्ञानमभ्युपगम्यते, तदपि प्रत्येकमसङ्ख्यरमासिकताकणे तैलवद् न प्राप्नोतीति भावः । तस्मात् तिलेषु तैलवत् सर्वेष्वपि समयेषु प्रत्येकं यच्च यावच्च ज्ञानमस्तीति प्रतिपत्तव्यम् ॥ इति गाथार्थः ॥ २०१ ॥

किञ्च—

[2]समुदाए जइ णाणं देसूणे समुदए कहं नत्थि ?। समुदाए वाऽभूयं कह देसे होज्ज तं सयलं ? ॥२०२॥

समुदायज्ञानवादिन् ! यदि विषयद्रव्यसंबन्धसमयानामसंख्येयानां समुदाये ज्ञानमर्थावग्रहलक्षणमभ्युपगम्यते, तर्हि चरमसमयलक्षणो योऽसौ देशस्तेन न्यूने समुदाये– चरमैकसमयोनेष्वसंख्यातेषु समयेष्वित्यर्थः, तत् कथं नास्ति?, समस्त्येव,प्रमाणोपपन्नत्वात्; तथाहि– सर्वेष्वपि शब्दादिद्रव्यसंबन्धसमयेषु ज्ञानमस्तीति प्रतिजानीमहे, ज्ञानोपकारिशब्दादिद्रव्यसंबन्धसमयसमुदायैकदेशत्वादिति हेतुः, अर्थावग्रहसमयवदिति दृष्टान्तः॥ अत्राह– ननु शब्दादिविषयोपादानसमयसमुदाये ज्ञानं केनाऽभ्युपगम्यते, येन समुदायैकदेशत्वात् प्रथमादिसमयेषु सर्वेष्वपि तत् प्रतिज्ञायते ?; मया ह्येकस्मिन्नेव चरमसमये शब्दादिद्रव्योपादाने ज्ञानमसत्व इष्यते, इत्याशङ्क्याह– 'समुदाए वाऽभूयमित्यादि ' चशब्दो वाशब्दो वा पातनायाम्, सा च कृतैव । तत्र यद्येकस्मिन्नेव चरमसमये ज्ञानमभ्युपगम्यते , तदाऽसौ सर्वसमयसमुदायापेक्षया तावदेकदेश एव । ततश्चानेनैकदेशेनोने शेषसमयसमुदाये यदभूतं ज्ञानं तत्कथं हन्त ! चरमसमयलक्षणे देशेऽकस्मादेव सकलमखण्डं भवेत् , अप्रमाणोपपन्नत्वात् ?; तथाहि– नैकस्मिंश्चरमशब्दादिद्रव्योपादानसमये ज्ञानमुपजायते, एकसमयमात्र-

---

१ यत् सर्वथा न विष्वक् सर्वेष्वपि तद् न रेणुतैलमिव । प्रत्येकमनिच्छन् कथमिच्छसि समुदये ज्ञानम् ? ॥ २०१ ॥ २ क. छ. 'ध्यादिद्र' ।

२ समुदाये यदि ज्ञानं देशोने समुदये कथं नास्ति ?। समुदाये वाऽभूतं कथं देशे भवेत् तत् सकलम् ? ॥ २०२ ॥

शब्दादिद्रव्योपादानात्, व्यञ्जनावग्रहाऽऽद्यसमयवदिति। स्यादेतत्, चरमसमयेऽर्थावग्रहज्ञानमनुभवप्रत्यक्षेणाऽप्यनुभूयते, ततः प्रत्यक्षविरोधिनीयं प्रतिज्ञा । तदयुक्तम् , 'चरमसमय एव समग्रं ज्ञानमुत्पद्यते' इतिभवत्प्रतिज्ञातस्यैव प्रत्यक्षविरोधात्, चरमतन्तौ समस्तपटोत्पादवचनवत् । तथा, सर्वेष्वपि शब्दादिद्रव्यसंबन्धसमयेषु ज्ञानमस्तीत्यादिपूर्वोक्तानुमानाविरोधश्च भवत्पक्षस्य ॥ इति गाथार्थः ॥ २०२ ॥

तस्मात् किमिह स्थितम् ? , इत्याह—

[1]तंतू पडोवगारी न समत्तपडो य, समुदिया ते उ। सव्वे समत्तपडओ तह नाणं सव्वसमएसु ॥ २०३ ॥

यथैकस्तन्तुः पटोपकारी वर्तते, तमन्तरेणाऽपि समग्रस्य तस्याऽभावात् , न चासौ तन्तुरेतावता समस्तः पटो भवति, पटैकदेशत्वात् तस्य, समुदिताः पुनस्ते तन्तवः सर्वे समस्तपटव्यपदेशभाजो भवन्ति; तथाऽत्रापि सर्वेष्वपि समुदितेषु समयेषु ज्ञानं भवति, नैकस्मिंश्चरमसमये । ततश्चार्थावग्रहसमयात् पूर्वसमयेषु तदेव ज्ञानमतीवाऽस्फुटं व्यञ्जनावग्रह उच्यते; चरमसमये तु तदेव किञ्चित्स्फुटतरावस्थामापन्नमर्थावग्रह इति व्यपदिश्यते । अतो यद्यपि सुप्त-मत्त-मूर्च्छितादिज्ञानस्येव व्यक्तं तथाविधं व्यञ्जनावग्रहज्ञानसाधकं लिङ्गं नास्ति, तथापि यथोक्तयुक्तितो व्यञ्जनावग्रहे सिद्धं ज्ञानम् ॥ इति गाथार्थः ॥ २०३॥

तत्त्व-भेद-पर्यायैर्व्याख्या , तत्र तत्त्वं व्यञ्जनावग्रहस्य स्वरूपमुक्तम् । अथ तस्य भेदान् निरूपयितुमाह—

[2]नयण-मणोवज्जिंदियभेयाओ वंजणोग्गहो चउहा । उवघाया-णुग्गहओ जं ताइं पत्तकारीणि ॥ २०४ ॥

स च व्यञ्जनावग्रहश्चतुर्धा भवति । कुतः ?, इत्याह– नयन-मनोवर्जेन्द्रियभेदात् । इदमुक्तं भवति– विषयस्य, इन्द्रियस्य च यः परस्परं संबन्धः प्रथममुपश्लेषमात्रम् ; तद्व्यञ्जनावग्रहस्य विषयः । स च विषयेण सहोपश्लेषः प्राप्यकारिष्वेव स्पर्शन-रसन-घ्राण-श्रोत्रलक्षणेषु चतुरिन्द्रियेषु भवति, न तु नयन-मनसोः । अतस्ते वर्जयित्वा शेषस्पर्शनादीन्द्रियचतुष्टयभेदाच्चतुर्विध एव व्यञ्जनावग्रहो भवति । ननविन्द्रियत्वे तुल्येऽपि केयं मुखपरीक्षिका– यच्चतुर्षु स्पर्शनादीन्द्रियेषु सोऽभ्युपगम्यते,नान्यत्र ?, इत्याह– 'उवघायेत्यादि'यद् यस्मात् तान्येव स्पर्शन-रसन-घ्राण-श्रोत्रलक्षणानि चत्वारीन्द्रियाणि प्राप्तकारीणि, न तु नयन-मनसी । ततो यथोक्तेन्द्रियचतुष्कभेदाच्चतुर्विध एवाऽसौ भवति, इति काऽत्र मुखपरीक्षिका ? इति । तत्र विषयभूतं शब्दादिकं वस्तु प्राप्तं संश्लेषद्वारेणाऽऽसादितं कुर्वन्ति परिच्छिन्द-

---

१ तन्तुः पटोपकारी न समस्तपटश्च, समुदितास्ते । सर्वे समस्तपटकस्तथा ज्ञानं सर्वसमयेषु ॥ २०३ ॥ २ ज. 'सर्वेऽपि स' ।

२ नयन-मनोवर्जेन्द्रियभेदाद् व्यञ्जनावग्रहश्चतुर्धा । उपघाता-ऽनुग्रहतो यत् तानि प्राप्तकारीणि ॥ २०४ ॥ ४ घ. छ. 'यत्वतुल्यत्वेऽपि' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

न्तीति प्राप्तकारीणि प्राप्यकारीणि स्पृष्टार्थग्राहिणीत्यर्थः । कुतः पुनरेतान्येव प्राप्यकारीणि ?, इत्याह– उपघातश्चानुग्रहश्चोपघाताऽनुग्रहौ तयोर्दर्शनात्– कर्कशकम्बलादिस्पर्शने, त्रिकटुकाद्यास्वादने, अशुच्यादिपुद्गलाऽऽघ्राणे, भेर्यादिशब्दश्रवणे, त्वक्क्षणनाद्युपघातदर्शनात् ; चन्दना-ऽङ्गना-हंसतूलादिस्पर्शने, क्षीर-शर्कराद्यास्वादने, कर्पूरपुद्गलाद्याघ्राणे, मृदु-मन्द्रशब्दाद्याकर्णने तु शैत्याद्यनुग्रहदर्शनादित्यर्थः। नयनस्य तु निशितकरपत्र-सेल्लु-भल्लादिवीक्षणेऽपि पाटनाद्युपघातानवलोकनात्, चन्दना-ऽगुरु-कर्पूराद्यवलोकनेऽपि शैत्याद्यनुग्रहाननुभवात्; मनसस्तु वह्न्यादिचिन्तनेऽपि दाहाद्युपघाताऽदर्शनात्, जल-चन्दनादिचिन्तायामपि च पिपासोपशमाद्यनुग्रहासंभवाच्च ॥ इति गाथार्थः ॥२०४॥

अत्र परः प्राह—

[1]जुज्जइ पत्तविसयया फरिसण-रसणे न [2]सोत्त-घाणेसु । गिण्हंति सविसयमिओ जं ताइं भिन्नदेसं पि ॥२०५॥

प्राप्तः स्पृष्टो विषयो ग्राह्यवस्तुरूपो ययोस्ते प्राप्तविषये तयोर्भावः प्राप्तविषयता सा युज्यते घटते । कस्मिन्?, इत्याह– स्पर्शनं च रसनं चेति समाहारद्वन्द्वस्तस्मिन्, स्पर्शन-रसनेन्द्रियद्वय इत्यर्थः । अनभिमतप्रतिषेधमाह– न श्रोत्र-घ्राणयोः प्राप्तविषयता युज्यते, यद् यस्मात् कारणादितो विवक्षितात् स्वदेशाद् भिन्नदेशमपि स्वविषयमेते गृह्णीतः, अस्याऽर्थस्याऽनुभवसिद्धत्वात् , न हि शब्दः कश्चिच्छोत्रेन्द्रिये प्रविशन्नुपलभ्यते, नापि श्रोत्रेन्द्रियं शब्ददेशे गच्छत् समीक्ष्यते । न चाभ्यामन्येनाऽपि प्रकारेण विषयस्पर्शनं घटते, 'दूर एष कस्याऽपि शब्दः श्रूयते' इत्यादिजनोक्तिश्च श्रूयते । कर्पूर-[3]कुसुम-कुङ्कुमादीनां तु दूरस्थानामपि गन्धो निर्विवादमनुभूयते, दृश्यते च । तस्माच्छ्रोत्र-घ्राणयोः प्राप्तविषयता न युज्यत एव ॥ इति गाथार्थः ॥ २०५ ॥

अत्रोच्यते—

[4]पावंति सद्द-गन्धा ताइं गंतुं सयं न गिण्हन्ति । जं ते पोग्गलमइया सक्किरिया वाउवहणाओ ॥२०६॥

धूमो व्व, संहरणओ दाराणुविहाणओ विसेसेणं । तोयं व नियंबाइसु पडिघायाओ य वाउ व्व ॥२०७॥

व्याख्या– 'पावंति सद्द-गन्धा ताइं ति' शब्द-गन्धौ कर्तृभूतौ, ते श्रोत्र-घ्राणेन्द्रिये कर्मतापन्ने, अन्यत आगत्य प्राप्नुतः स्पृशत

---

१ युज्यते प्राप्तविषयता स्पर्शन-रसने न श्रोत्र-घ्राणयोः । गृह्णीतः स्वविषयमितो यत् ते भिन्नदेशमपि ॥२०५॥ २ घ. छ. ज. 'सोय-घा'। ३ क. ग. 'कुङ्कुम-कुसुमादी'

४ प्राप्नुतः शब्द-गन्धौ ते गत्वा स्वयं न गृह्णीतः । यत् तौ पुद्गलमयौ सक्रियौ वायुवहनात् ॥ २०६ ॥
धूम इव, संहरणतो द्वारानुविधानतो विशेषेण । तोयमिव नितम्बादिषु प्रतिघाताच्च वायुरिव ॥ २०७ ॥

इति प्रतिज्ञा । अनभिमतप्रकारप्रतिषेधमाह– 'गंतुं सयं न गिण्हंति त्ति' 'ताइं' इत्यत्रापि संबध्यते । ततश्च ते श्रोत्र-घ्राणे कर्तृभूते पुनः स्वयं शब्द-गन्धदेशं गत्वा न गृह्णीतः 'शब्द-गन्धौ'इति विभक्तिव्यत्ययेन संबध्येते , आत्मनोऽबाह्यकरणत्वात् श्रोत्र-घ्राणयोः, स्पर्शन-रसनवदिति । ननु शब्द-गन्धावपि श्रोत्र-घ्राणे कुतः प्राप्नुतः ?, इत्याह– 'जं ते पोग्गलमइया सक्किरिय त्ति' यद् यस्मात्कारणात् तौ शब्द-गन्धौ सक्रियौ गत्यादिक्रियावन्तौ, तस्मादन्यत आगत्य श्रोत्र-घ्राणे प्राप्नुतः । कथम्भूतौ सन्तौ सक्रियौ तौ ?, इत्याह– पुद्गलमयौ । यदि पुनरपौद्गलिकत्वादमूर्तौ स्याताम् , तदा यथा जैनमतेन सक्रियेष्वाकाशादिषु गतिक्रिया नास्ति, तथैतयोरपि न स्यात्, इत्यालोच्य पुद्गलमयत्वविशेषणमकारि, पुद्गलमयत्वे सति सक्रियाविति भावः ; यच्चैवम्भूतम् , तत्र गतिक्रियाऽस्त्येव, यथा पुद्गलस्कन्धेष्विति ॥ आह– ननु पुद्गलमयत्वेऽपि सति शब्द-गन्धयोर्गतिक्रियाऽस्तीति कुतो निश्चीयते ?, इत्याह– 'वाउवहणाओ धूमो व्व त्ति' वायुना वहनं नयनं वायुवहनं तस्मात् । इदमुक्तं भवति– यथा पवनपटलेनोह्यमानत्वाद् धूमो गतिक्रियावान् , एवं शब्द-गन्धावपि तेनोह्यमानत्वात् तद्वन्तौ । तथा, संहरणतो गृहादिषु पिण्डीभवनाद् धूमवदेव क्रियाभाजौ तौ । तथा, विशेषेण द्वारानुविधानतस्तोयवत् तद्वन्तावेतौ । तथा, पर्वतनितम्बादिषु प्रतिघातात् प्रतिस्खलनाद् वायुवदेतौ गतिक्रियाऽऽश्रयौ ॥ इति गाथाद्वयार्थः ॥२०६॥२०७॥

हेत्वन्तरेणाऽपि शब्द-गन्धयोः सयुक्तिकं गतिक्रियावत्त्वं समर्थयन्नाह—

[1]गिण्हंति पत्तमत्थं उवघाया-णुग्गहोवलद्धीओ । बाहिज्ज-पूइ-नासारिसादओ कहमसंबद्धे ? ॥ २०८ ॥

प्राप्तमन्यत आगत्यात्मना सह संबद्धं शब्द-गन्धलक्षणमर्थं गृह्णीतः ' श्रोत्र-घ्राणेन्द्रिये ' इति गम्यते । एतेन शब्द-गन्धयोराग[illegible]क्रिया प्रतिज्ञाता भवति । कुतः प्राप्तमेव गृह्णीतः ?, इत्याह– उपघातश्चानुग्रहश्चोपघाता-ऽनुग्रहौ तयोरुपलब्धेः, तथाहि– भेर्यादिमहाशब्दप्रवेशे श्रोत्रस्य बाधिर्यरूप उपघातो दृश्यते, कोमलशब्दश्रवणे त्वनुग्रहः; घ्राणस्याऽप्यशुच्यादिगन्धप्रवेशे पूतिरोगा-ऽर्शोव्याधिरूप उपघातोऽवलोक्यते, कर्पूरादिगन्धप्रवेशे त्वनुग्रहः । शब्द-गन्धासंबन्धेऽपि श्रोत्र-घ्राणयोरेतावनुग्रहो-पघातौ भविष्यत इति चेत्, इत्याह ' बाहिज्जेत्यादि ' बाधिर्यं च पूतिश्च नासाकोथलक्षणो रोगविशेषः, नासार्शांसि च, तानि आदिर्येषां शैवोपघाता-ऽनुग्रहाणां ते तथा भूताः कथं घटामुपगच्छेयुः ? । क्व सति ?, इत्याह– असंबद्धे स्वहेतुभूते शब्द-गन्धलक्षणे 'वस्तुनि' इति गम्यते। इदमुक्तं भवति–श्रोत्र-घ्राणाभ्यां सह संबद्धा एव शब्द-गन्धाः स्वकार्यभूतं बाधिर्याद्युपघातम् , अनुग्रहं वा जनयितुमलम् , नाऽन्यथा, सर्वस्याऽपि तज्जनने प्राप्तेरतिप्रसङ्गात् ॥ इति गाथार्थः ॥ २०८ ॥

---

१ ज. 'था जिन' । २ गृह्णीतः प्राप्तमर्थमुपघाता-नुग्रहोपलब्धेः । बाधिर्य-पूति-नासार्शआदयः कथमसंबद्धे ? ॥ २०८ ॥ ×(अक्रि०-१)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

तदेवं स्पर्शन-रसन-घ्राण श्रोत्राणां प्राप्यकारित्वं समर्थितम्; सांप्रतं 'नयण-मणोवज्जिंदियभेयाओ' इत्यादिना सूचितं नयन-मनसोरप्राप्यकारित्वमभिधित्सुर्नयनस्य तावदाह—

[1]लोयणमपत्तविसयं मणो व्व जमणुग्गहाइसुण्णं ति। जल-सूरालोयाइसु दीसंति अणुग्गह-विघाया॥२०९॥

अप्राप्तोऽसंबद्धोऽसंश्लिष्टो विषयो ग्राह्यवस्तुरूपो यस्य तदप्राप्तविषयं लोचनम्, अप्राप्यकारीत्यर्थः, इति प्रतिज्ञा। कुतः?, इत्याह— यद् यस्मादनुग्रहादिशून्यम्, आदिशब्दादुपघातपरिग्रहः- ग्राह्यवस्तुकृतानुग्रहो-पघातशून्यत्वादित्यर्थः, अयं च हेतुः। मनोवदिति दृष्टान्तः। यदि हि लोचनं ग्राह्यवस्तुना सह संबध्य तत्परिच्छेदं कुर्यात्, तदाऽन्यादिदर्शने स्पर्शनस्येव दाहाद्युपघातः स्यात्; कोमलतुल्याद्यवलोकने त्वनुग्रहो भवेत्, न चैवम्, तस्मादप्राप्यकारि लोचनमिति भावः। मनस्यप्राप्यकारित्वं परस्याऽसिद्धम्, इति कथं तस्य दृष्टान्तत्वेनोपन्यासः? इति चेत्। सत्यम्, किन्तु वक्ष्यमाणयुक्तिभिस्तत्र तत् सिद्धम्, इति निश्चित्य तस्येह दृष्टान्तत्वेन प्रदर्शनम्, इत्यदोषः। अथ परो हेतोरसिद्धतामुद्भावयन्नाह- 'जल-सूरेत्यादि' आदिशब्दः, आलोकशब्दश्च प्रत्येकमभिसंबध्यते। ततश्च जलादीनामालोके लोचनस्याऽनुग्रहो दृश्यते, सूरादीनां त्वालोके उपघात इति। अतो 'अनुग्रहादिशून्यत्वात्' इत्यसिद्धो हेतुरित्यर्थः। इदमुक्तं भवति— जल-घृत-नीलवसन-वनस्पती-न्दुमण्डलाद्यवलोकनेन नयनस्य परमाश्वासलक्षणोऽनुग्रहः समीक्ष्यते; सूर-सितभित्त्यादिदर्शने तु जलविगलनादिरूप उपघातः संदृश्यत इति। अतः किमुच्यते—'जमणुग्गहाइसुण्णं ति'?॥ इति गाथार्थः॥ २०९॥

अत्रोत्तरमाह—

[2]डज्झेज्ज पाविउं रविकराइणा फरिसणं व को दोसो?। मणेज्ज अणुग्गहं पिव उवघायाभावओ सोम्मं॥२१०॥

अयमत्र भावार्थः— अस्मदभिप्रायाऽनभिज्ञोऽप्रस्तुताभिधायी परः, न हि वयमेतद् ब्रूमो यदुत— चक्षुषः कुतोऽपि वस्तुनः सकाशात् कदाचित् सर्वथैवानुग्रहो-पघातौ न भवतः। ततो रविकरादिना दाहाद्यात्मकेनोपघातवस्तुना परिच्छेदानन्तरं पश्चाच्चिरमवलोकयतः प्रतिपत्तुश्चक्षुः प्राप्य समासाद्य स्पर्शनेन्द्रियमिव दह्येत— दाहादिलक्षणस्तस्योपघातः क्रियेतेत्यर्थः। एतावता चाऽप्राप्यकारिचक्षुर्वादिनामस्माकं को दोषः? न कश्चित्, दृष्टस्य बाधितुमशक्यत्वादिति भावः। तथा यत् स्वरूपेणैव सौम्यं शीतलं शीतरश्मिं वा जल-

१ गाथा २०४। २ लोचनमप्राप्तविषयं मन इव यदनुग्रहादिशून्यमिति। जल-सूरालोकादिषु दृश्यते अनुग्रह-विघातौ॥ २०९॥

३ दह्येत प्राप्य रविकरादिना स्पर्शनमिव को दोषः?। मन्येताऽनुग्रहमिवोपघातभावतः सौम्यम्॥ २१०॥ (ज. ३०००)

घृत-चन्द्रादिकं वस्तु, तस्मिंश्चिरमवलोकिते उपघाताभावादनुग्रहमिव मन्येत चक्षुः, 'को दोषः?' इत्यत्राऽपि संबध्यते, न कश्चिदित्यर्थः॥ इति गाथार्थः॥ २१०॥

आह— यद्युक्तन्यायेनोपघातका-ऽनुग्राहकवस्तुन्युपघाता-ऽनुग्रहाभावं चक्षुषो न ब्रूषे, तर्हि यद् ब्रूषे तत् कथय, इत्याशङ्क्याह—

[1]गंतुं न रूवदेसं पासइ पत्तं सयं व नियमोऽयं। पत्तेण उ मुत्तिमया उवघाया-णुग्गहा होज्जा॥ २११॥

अयं नियमः— इदमेवाऽस्माभिर्नियम्यत इत्यर्थः। किं तत्?, इत्याह— रूपस्य देशो रूपदेश आदित्यमण्डलादिसमाक्रान्तप्रदेशरूपस्तं गत्वोत्प्लवनतस्तं समाश्लिष्य चक्षुर्न पश्यति न परिच्छिनत्ति, अन्यस्याऽश्रुतत्वाद् 'रूपम्' इति गम्यते। 'पत्तं सयं व त्ति' स्वयं वाऽन्यत आगत्य चक्षुर्देशं प्राप्तं समागतं रूपं चक्षुर्न पश्यति, किन्त्वप्राप्तमेव योग्यदेशस्थं विषयं तत् पश्यति॥ अत्राह परः— नन्वनेन नियमेनाऽप्राप्यकारित्वं चक्षुषः प्रतिज्ञातं भवति। न च प्रतिज्ञामात्रेणैव हेतूपन्यासमन्तरेण समीहितवस्तुसिद्धिः। अतो हेतुरिह वक्तव्यः। 'जमणुग्गहाइसुण्णं ति' इत्यनेन पूर्वोक्तगाथावयवेन विषयकृतानुग्रहो-पघातशून्यत्वलक्षणोऽयमभिहित एवेति चेत्। अहो! जराविधुरितस्यैव सूरेर्विस्मरणशीलता, यतो 'जमणुग्गहाइसुण्णं ति' इत्यनेन विषयादनुग्रहो-पघातौ चक्षुषो निषेधयति, 'डज्झेज्ज पाविउं रविकराइणा फरिसणं व' इत्यादिना तु पुनरपि ततस्तौ तस्य समनुजानीते, अतो न विद्मः, कोऽप्येष वचनक्रम इति। नैतदेवम्, अभिप्रायाऽपरिज्ञानात्, यतः प्रथमत एव विषयपरिच्छेदमात्रकालेऽनुग्रहो-पघातशून्यता हेतुत्वेनोक्ता, पश्चात्तु चिरमवलोकयतः प्रतिपत्तुः प्राप्तेन रविकरादिना, चन्द्ररश्मि-नीलादिना वा मूर्तिमता निसर्गत एव केनाऽप्युपघातकेन, अनुग्राहकेण च विषयेणोपघाता-ऽनुग्रहौ भवेतामपीति। एतदेवाह— 'पत्तेण उ मुत्तिमयेत्यादि' अनेनाऽभिप्रायेण तौ पुनरपि समनुज्ञायेते, न पुनर्विस्मरणशीलतया। यदि पुनर्विषयपरिच्छित्तिमात्रमपि तमप्राप्य चक्षुर्न करोतीति नियम्यते, तदा वह्नि-विष-जलधि-कण्टक-करवाल-करपत्र-सौवीराञ्जनादिपरिच्छित्तावपि तस्य दाह-स्फोट-क्लेद-पाटन-नीरोगतादिलक्षणोपघाता-ऽनुग्रहप्रसङ्गः। न हि समानायामपि प्राप्तौ रविकरादिना तस्य भवन्ति दाहादयः, न वह्न्यादिभिः। तस्माद् व्यवस्थितमिदम्—विषयमप्राप्यैव चक्षुः परिच्छिनत्ति, अञ्जन-दहनादिकृताऽनुग्रहो-पघातशून्यत्वात्, मनोवत्। परिच्छेदानन्तरं तु पश्चात्प्राप्तेन केनाऽप्युपघातकेन, अनुग्राहकेण वा मूर्तिमता द्रव्येण तस्योपघाता-ऽनुग्रहौ न निषिध्येते, विष-शर्करादिभक्षणे मूर्च्छा-स्वास्थ्यादय इव मनस इति॥

अत्राऽपरः प्राह— नयनाद् नायना रश्मयो निर्गत्य प्राप्य च रविबिम्बरश्मय इव वस्तु प्रकाशयन्तीति नयनस्य प्राप्यकारिता

१ गत्वा न रूपदेशं पश्यति प्राप्तं स्वयं वा नियमोऽयम्। प्राप्तेन तु मूर्तिमतोपघाता-ऽनुग्रहौ भवेताम्॥ २११॥ २ गाथा २०९। ३ घ.छ. 'व पुनर्वि'। ४ गाथा २१०।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रोच्यते । सूक्ष्मत्वेन, तैजसत्वेन च तेषां वह्न्यादिभिर्दाहादयो न भवन्ति, रविरश्मिषु तथादर्शनात् ॥ तदेतदयुक्ततरम्, तेषां प्रत्यक्षादिप्रमाणाग्राह्यत्वेन श्रद्धातुमशक्यत्वात्, तथाविधानामप्यस्तित्वकल्पनेऽतिप्रसङ्गात् । वस्तुपरिच्छेदाऽन्यथानुपपत्तेस्ते सन्तीति विकल्प्यन्त इति चेत् । न, तानन्तरेणाऽपि तत्परिच्छेदोपपत्तेः, न हि मनसो रश्मयः सन्ति; न च तदप्राप्तं वस्तु न परिच्छिनत्ति, वक्ष्यमाणयुक्तितस्तस्य तत्सिद्धेः । न च रविरश्म्युदाहरणमात्रेणाऽचेतनानां नयनरश्मीनां वस्तुपरिच्छेदो युज्यते, नख-दन्त-भाल-तलादिगतशरीररश्मीनामपि स्पर्शविषयवस्तुपरिच्छेदप्रसङ्गात् । इत्यलं विस्तरेण ॥ इति गाथार्थः ॥ २११ ॥

तदेवमञ्जन-ज्वलनादिविषयविहितानुग्रहो-पघातशून्यत्वलक्षणहेतोरप्राप्यकारितां चक्षुषः प्रसाध्य हेत्वन्तरेणापि तस्य तां प्रसाधयितुमाह–

जइ पत्तं गेण्हेज्ज उ, तग्गयमंजण-रओ-मलाईयं । पेच्छेज्ज, जं न पासइ अपत्तकारिं तओ चक्खुं ॥२१२॥

यदि तु प्राप्तं विषयं चक्षुर्गृह्णीयादित्युच्यते, तदा तद्गतमात्मसंबद्धमञ्जन-रजो-मल-शलाकादिकं पश्येदवगच्छेत्, तस्य निर्विवादमेव तत्प्राप्तत्वेनोपलब्धेः; यस्माच्च तद् न पश्यति, ततोऽप्राप्तकारि चक्षुरिति स्थितम् । यद्यप्राप्यकारि चक्षुः, तर्ह्यप्राप्तत्वाविशेषात् सर्वस्याऽप्यर्थस्याऽविशेषेण ग्राहकं स्यात्, न प्रतिनियतस्येति चेत् । न, ज्ञान-दर्शनावरणादेस्तत्प्रतिबन्धकस्य सद्भावात्, मनसा व्यभिचाराच्च, तथाहि–अप्राप्यकारित्वे सत्यपि नाऽविशेषेण सर्वार्थेषु मनः प्रवर्तते, इन्द्रियाद्यप्रकाशितेषु सर्वथाऽदृष्टा-ऽश्रुतार्थेषु तत्प्रवृत्त्यदर्शनात् । इत्यलं प्रसङ्गेन ॥ इति गाथार्थः ॥ २१२ ॥

तदेवं व्यवस्थापिता चक्षुषोऽप्राप्यकारिता । अथ दृष्टान्तीकृतस्य मनसस्तदसिद्धतां परो मन्येत, इत्यतस्तस्यापि तां सिसाधयिषुः पूर्वपक्षमुत्थापयन्नाह–

गंतुं नेएण मणो संबज्झइ जग्गओ व सिमिणे वा । सिद्धमिदं लोयम्मि वि अमुगत्थगओ मणो मे त्ति ॥२१३॥

'गंतुं' देहाद् निर्गत्य ज्ञेयेन मेरुशिखरस्थाजिनप्रतिमादिना संबध्यते संश्लिष्यते मनः । कस्यामवस्थायाम् ?, इत्याह– जाग्रतः, स्वप्ने वा । अनुभवसिद्धं चैतत्, न च ममैव, किन्तु सिद्धमिदं लोकेऽपि, यतस्तत्राऽप्येवं वक्तारो भवंति– अमुत्र मे मनो गतमिति । अतः प्राप्यकारि मनः ॥ इति प्रेरकगाथार्थः ॥ २१३ ॥

१ यदि प्राप्तं गृह्णीयात्, तद्गतमञ्जन-रजो-मलादिकम् । पश्येत्, यद् न पश्यति अप्राप्तकारि ततश्चक्षुः ॥ २१२ ॥ × (भवन्ति)

२ गत्वा ज्ञेयेन मनः संबध्यते जाग्रतो वा स्वप्ने वा । सिद्धमिदं लोकेऽपि अमुकार्थगतं मनो मे इति ॥ २१३ ॥

अत्रोत्तरमाह–

नाणुग्गहो-वघायाभावाओ लोयणं व, सो इहरा । तोय-जलणाइचिन्तणकाले जुज्जेज्ज दोहिं पि ॥ २१४ ॥

न 'ज्ञेयेन सह संपृच्यते मनः' इति गम्यते । कुतः ?, इत्याह–'अणुग्गहो-वघायाभावाउ त्ति' ज्ञेयकृतानुग्रहो-पघाताभावात्, लोचनवत् । यदि तस्य ज्ञेयेन सह संपर्कः स्यात् तदा किं स्यात् ?, इत्याह– 'सो इहर त्ति' तद् मन इतरथा– ज्ञेयसंपर्केऽभ्युपगम्यमाने, तोय-ज्वलनादिविषयचिन्तनकाले द्वाभ्यामप्यनुग्रहो-पघाताभ्यां युज्येत– तोय-चन्दनादिचिन्तनकाले शैत्याद्यनुभवनेन स्पर्शनवदनुगृह्येत, दहन-विष-शस्त्रादिचिन्तनसमये तु तद्देवोपहन्येतेति भावः; न चैवम् । तस्माल्लोचनवदप्राप्यकार्येव मनः ॥ इति गाथार्थः ॥२१४॥

किञ्च, मनसः प्राप्यकारितावादिनः प्रष्टव्याः । किम् ?, इत्याह–

दव्वं भावमणो वा वएज्ज जीवो य होइ भावमणो । देहव्वावित्तणओ न देहबाहिं तओ जुत्तो ॥ २१५ ॥

इह मनस्तावद् द्विधा– द्रव्यमनः, भावमनश्चेति । अतः सूरिः परं पृच्छति– 'दव्वं ति' द्रव्यमनः, भावमनो वा व्रजेद् गच्छेत् 'मेर्वादिविषयसन्निधौ' इति गम्यते । किमनेन पृष्टेन ? इति चेत् । उभयथाऽपि दोषः, तथाहि– भावमनसश्चिन्ताज्ञानपरिणामरूपत्वात्, तस्य च जीवादव्यतिरिक्तत्वाज्जीव एव भावमनो भवति । जीवश्चेति चकारः 'तओ' इत्यस्याऽनन्तरं संबन्धनीयः । ततोऽयमर्थः– सकश्च स च भावमनोरूपो जीवो देहमात्रव्यापित्वाद् न देहाद् बहिर्निःसरन् युक्तः; इह ये देहमात्रवृत्तयः, न तेषां बहिर्निःसरणमुपपद्यते, यथा तद्गतरूपादीनाम्, देहमात्रवृत्तिश्च जीवः ॥ इति गाथार्थः ॥ २१५ ॥

देहमात्रव्यापित्वस्याऽसिद्धिं मन्यमानस्य परस्य मतमाशङ्कमानः सूरिराह–

सव्वगउ त्ति च बुद्धी, कत्ताभावाइदोसओ तण्ण । सव्वा-सव्वग्गहणप्पसंगदोसाइओ वा वि ॥ २१६ ॥

अथ स्याद् बुद्धिः परस्य– सर्वगत आत्मा, न तु देहमात्रव्यापी, अमूर्तत्वात्, आकाशवदिति । अत्र गुरुराह– तदेतन्न । कुतः ?, इत्याह– भावप्रधानत्वान्निर्देशस्य कर्तृत्वाभावाद्यदोषत इति– सर्वगतत्वे सत्यात्मनः कर्तृत्वादयो गोपाङ्गनादिप्रतीता अपि

१ न, अनुग्रहो-पघाताभावाद् लोचनमिव, तदितरथा । तोय-ज्वलनादिचिन्तनकाले युज्येत द्वाभ्यामपि ॥ २१४ ॥

२ द्रव्यं भावमनो वा व्रजेद् जीवश्च भवति भावमनः । देहव्यापित्वाद् न देहबहिस्ततो युक्तः ॥ २१५ ॥

३ सर्वगत इति च बुद्धिः, कर्त्रभावादिदोषतस्तन्न । सर्वा-सर्वग्रहणप्रसङ्गदोषादितो वाऽपि ॥ २१६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्मा न घटेरन्निति भावः; तथाहि– न कर्ताऽऽत्मा, सर्वगतत्वात्, आकाशवत् । आदिशब्दादभोक्ता, असंसारी, अङ्गः, न सुखी, न दुःखी आत्मा; तत एव हेतोः, तद्वदेव, इत्याद्यपि द्रष्टव्यम् ॥ आह परः– नन्वात्मनो निष्क्रियत्वात् कर्तृत्वाद्यभावः सांख्यानां न बाधायै कल्पते; तथा च तैरुक्तम्–"अकर्ता निर्गुणो भोक्ताऽऽत्मा" इत्यादि । एतदप्ययुक्तम्, तस्य निष्क्रियत्वे प्रत्यक्षादिप्रमाणोपलब्धभोक्तृत्वादिक्रियाविरोधप्रसङ्गात्। प्रकृतेरेव भोगादिकरणक्रिया, न पुरुषस्य, आदर्शप्रतिबिम्बोदयन्यायेनैव तत्र क्रियाणामिष्टत्वादिति चेत् । एतदप्यसङ्गतम्, प्रकृतेरचेतनत्वात् "चैतन्यं पुरुषस्य स्वरूपम्" इति वचनात्; अचेतनस्य च भोगादिक्रियाऽयोगात्, अन्यथा घटादीनामपि तत्प्रसङ्गादिति । न केवलं कर्तृत्वाद्यभावतः सर्वगतत्वमात्मनो न युक्तम्, किन्तु सर्वा-ऽसर्वग्रहणप्रसङ्गतोऽपि च तदसङ्गतम् । इदमुक्तं भवति– आत्मनः समग्रत्रिभुवनगतत्वे, प्राप्यकारित्वेनाऽभ्युपगतस्य तदव्यतिरिक्तस्य भावमनसोऽपि सर्वगतत्वात् सर्वार्थप्राप्तेः सर्वग्रहणप्रसङ्गः; तथा च सर्वस्य सर्वज्ञत्वप्रसक्तिः । अथोक्तन्यायेन प्राप्तानपि सर्वार्थानभिहितदोषभयाद् न गृह्णातीत्युच्यते। तर्हि सर्वार्थाग्रहणप्रसङ्गः– अग्राह्यत्वेनेष्टानप्यर्थान् मा ग्रहीद् भावमनः, प्राप्तत्वाविशेषात्, अग्राह्यत्वेनेष्टार्थवदिति भावः । अथ प्राप्तत्वाधिशिष्टत्वेऽपि कांश्चिदर्थानेतद् गृह्णाति, कांश्चिद् नेत्युच्यते । तर्हि व्यक्तमीश्वरचेष्टितम्; न चैतद् युक्तिविचारे क्वचिदप्युपयुज्यत इति । आदिशब्दात् सर्वगतत्व आत्मनोऽन्यदपि दूषणमभ्यूह्यम्, तथाहि– यथाऽङ्गुष्ठादौ दहनदाहादिवेदनायां मस्तकादिष्वप्यसावनुभूयते, तथा सर्वत्रापि तत्प्रसङ्गः, न च भवति, तथाऽनुभवाभावात्, अननुभूयमानाया अपि भावाभ्युपगमेऽतिप्रसङ्गात् । किञ्च, सर्वगतत्वे पुरुषस्य नानादेशगतस्रक्-चन्दना-ऽन्नादिसंस्पर्शेऽनवरतसुखासिकाप्रसङ्गः, वह्नि-शस्त्र-जलादिसंबन्धे तु निरन्तरदाह-पाटन-क्लेदनादिप्रसङ्गश्च । यत्रैव शरीरं तत्रैव सर्वमिदं भवति, नाऽन्यत्रेति चेत् । कुतः ?, इति वक्तव्यम् । आज्ञामात्रादेवेति चेत् । न, तस्येहाविषयत्वात् । सहकारिभावेन तस्य तदपेक्षणीयमिति चेत् । न, नित्यस्य सहकार्यपेक्षाऽयोगात्; तथाहि– अपेक्ष्यमाणेन सहकारिणा तस्य कश्चिद् विशेषः क्रियते, नवा ?। यदि क्रियते, स किमर्थान्तरभूतः, अनर्थान्तरभूतो वा ?। यद्याद्यः पक्षः, तर्हि तस्य न किञ्चित् कृतं स्यात् । अथापरः, तर्हि तत्करणे तदव्यतिरिक्तस्याऽऽत्मनोऽपि करणप्रसङ्गात्, कृतस्य चाऽनित्यत्वात् तस्याऽनित्यत्वप्रसङ्गः । अथ मा भूदेष दोष इति 'न क्रियते' इत्यभ्युपगम्यते। हन्त ! न तर्हि स तस्य सहकारी, विशेषाकरणात् । अथ विशेषमकुर्वन्नपि सहकारीष्यते । तर्हि सकलत्रैलोक्यस्यापि सहकारितापत्तिः, विशेषाकरणस्य तुल्यत्वात्, इति[1] व्यर्था शरीरमात्रापेक्षा, इत्याद्यत्र बहु वक्तव्यम्, तत्तु नोच्यते, ग्रन्थगहनताप्रसङ्गात् । तस्माच्छरीरमात्रवृत्तिरेवाऽऽत्मा, न सर्वगत इति । अतस्तदव्यतिरिक्तस्य भावमनसो न

१ ग. 'ति वृथा श' ।

शरीराद् बहिर्निःसरणमुपपद्यत इति स्थितम् ॥ इति गाथार्थः ॥ २१६ ॥

अथ द्रव्यमनो विषयदेशं व्रजतीति ब्रूयात्, तत्राऽप्याह–

दव्वमणो विण्णाया न होइ गंतुं च किं तओ कुणउ ?। अह करणभावओ तस्स, तेण जीवो वियाणेज्जा॥२१७॥

काययोगसहायजीवगृहीत-चिन्ताप्रवर्तकमनोवर्गणान्तःपातिद्रव्यसमूहात्मकं द्रव्यमनः स्वयं विज्ञातृ न भवत्येव, अचेतनत्वात्, उपलशकलवत्, इत्यतो गत्वाऽपि मेर्वादिविषयदेशं किं तद् वराकं करोतु ?, तत्र गतादपि तस्मादर्थावगमाभावादिति भावः ॥ पराभिप्रायमाशङ्कते– 'अह करणेत्यादि'[2] अथ मन्यसे– यद्यपि द्रव्यमनः स्वयं न किञ्चिज्जानाति, तथापि करणभावः करणत्वं तस्य द्रव्यमनसः प्रदीपादेरिव वस्तुनि प्रकाशयितव्ये समस्ति। ततो जीवः कर्ता तेन द्रव्यमनसा करणभूतेन विजानीयादवबुध्येत मेर्वादिकं वस्त्विति । अत्र प्रयोगः– बहिर्निर्गतेन द्रव्यमनसा प्राप्य विषयं जानाति जीवः, करणत्वात्, प्रदीप-मणि-चन्द्र-सूर्यादिप्रभयेव ॥इति गाथार्थः ॥२१७॥

अत्रोत्तरमाह–

करणत्तणओ तणुसंठिएण जाणिज्ज फरिसणेणं व । एत्तो च्चिय हेऊओ न नीइ बाहिं फरिसणं व ॥२१८॥

को वै न मन्यते, यदुत– अर्थपरिच्छेदे कर्तव्ये आत्मनो द्रव्यमनः करणम् ?। किन्तु करणं द्विधा भवति– शरीरगतमन्तःकरणम्, तद्बहिर्भूतं बाह्यकरणं च । तत्रेदं द्रव्यमनोऽन्तःकरणमेवाऽऽत्मनः । ततश्च 'करणत्तणउ त्ति' सूत्रस्य सूचामात्रत्वात्, एकदेशेन समुदायस्य गम्यमानत्वाच्चान्तःकरणत्वादित्यर्थः; तनुसंस्थितेन शरीराद् बहिरानिर्गतेन जीवस्तेन जानीयाद् मेर्वादिविषयम्, स्पर्शनेन्द्रियेणेव कमलनालादिस्पर्शम् । प्रयोगः– यदन्तःकरणं तेन शरीरस्थेनैव विषयं जीवो गृह्णाति, यथा स्पर्शनेन, अन्तःकरणं च द्रव्यमनः । प्रदीप-मणि-चन्द्र-सूर्यप्रभादिकं तु बाह्यकरणमात्मन इति साधनविकलः परोक्तदृष्टान्तः । आह— ननु शरीरस्थमपि तत् पद्मनालतन्तुन्यायेन बहिर्द्रव्यमनः किं न निःसरति ?, इत्याह– 'एत्तो च्चियेत्यादि' इत एवान्तःकरणत्वलक्षणाद्धेतोर्बहिर्न निर्गच्छति द्रव्यमनः, स्पर्शनवत् । प्रयोगः– यदन्तःकरणं तच्छरीराद् बहिर्न निर्गच्छति, यथा स्पर्शनम् ॥ इति गाथार्थः ॥ २१८ ॥

तदेवं भावमनसो द्रव्यमनसश्च बहिश्चारिताद्यभावादप्राप्यकार्येव मन इत्युक्तम् । सांप्रतं '[3]णाणुग्गहो-वघायाभावाओ लोयणं व'

१ द्रव्यमनो विज्ञातृ न भवति गत्वा च किं ततः करोतु ?। अथ करणभावतस्तस्य, तेन जीवो विजानीयात् ॥ २१७ ॥

२ करणत्वतस्तनुसंस्थितेन जानीयात् स्पर्शनेनेव । इत एव हेतोर्न निर्गच्छति बहिः स्पर्शनमिव ॥ २१८ ॥ ३ गाथा २१४ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादिना मनसोऽप्राप्यकारितायाम् 'अनुग्रहो-पघाताभावात्' इति यः पूर्वं हेतुरुक्तः, तस्य परोऽसिद्धिं समुद्भावयन्नाह—

[1]नज्जइ उवघाओ से दोबल्लो-रक्खयाइलिंगेहिं । जमणुग्गहो य हरिसाइएहिं तो सो उभयधम्मो ॥२१९॥

इह मृत-नष्टादिकं वस्तु चिन्तयतः, अत्यार्त-रौद्रध्यानप्रवृत्तस्य च 'से' तस्य मनस उपघातो ज्ञायतेऽनुमीयते । कैः ?, इत्याह- दौर्बल्यो-रःक्षतादिलिङ्गैः— दौर्बल्यं देहापचयरूपम्, उरःक्षतमुरोविघातः, हृदयबाधेति यावत्; आदिशब्दाद् वातमकोप-वैकल्यादिपरिग्रहः। अनुग्रहश्च— यद्यस्मात् तस्येष्टसंगम-विभवलाभादिकं वस्तु चिन्तयतो हर्षादिभिरनुमीयते । तत्र वदनविकाश-रोमाञ्चोद्गमादिचिह्नगम्यो मानसः प्रीतिविशेषो हर्षः, आदिशब्दाद् देहोपचयो-त्साहादिपरिग्रहः । तत् तस्मात्कारणात् तद् मन उपघाता-नुग्रहलक्षणोभयधर्मकमेव । अयमत्र भावार्थः— यः शोकाद्यतिशयाद् देहोपचयरूपः, आर्तादिध्यानातिशयाद् हृद्रोगादिस्वरूपश्चोपघातः; यश्च पुत्रजन्माद्यभीष्टप्राप्तिचिन्तासमुद्भूतहर्षादिरनुग्रहः, स जीवस्य भवन्नपि चिन्त्यमानविषयाद् मनसः किल परो मन्यते, तस्य जीवात् कथञ्चिद्व्यतिरिक्तत्वात् । ततश्चैवं मनसोऽनुग्रहो-पघातयुक्तत्वात् तच्छून्यत्वलक्षणो हेतुरसिद्धः ॥ इति गाथार्थः ॥ २१९ ॥

तदेतत् सर्वं परस्याऽसंबद्धभाषितमेवेति दर्शयन्नाह—

[2]जइ दव्वमणोऽतिबली पीलिज्जा हिदिनिरुद्धवाउ व्व । तयणुग्गहेण हरिसादउ व्व नेयस्स किं तत्थ?॥२२०॥

यदि नाम द्रव्यमनो मनस्त्वपरिणतानिष्टपुद्गलसमूहरूपमतिशयबलिष्ठमिति कृत्वा शोकादिसमुद्भूतपीडया जीवं कर्मतापन्नं देहदौर्बल्याद्यापादनेन पीडयेत्, हृन्निरुद्धवायुवत्— हृदयदेशाश्रितनिबिडमरुद्ग्रन्थिवदित्यर्थः । यदि च तस्यैव द्रव्यमनसो मनस्त्वपरिणतेष्टपुद्गलसंघातस्वरूपस्याऽनुग्रहेण जीवस्य हर्षादयो भवेयुः, तर्हि ज्ञेयस्य चिन्तनीयमेर्वादेर्मनसोऽनुग्रहो-पघातकरणे किमायातम् ?। इदमत्र हृदयम्— मनस्त्वपरिणतानिष्टपुद्गलनिचयरूपं द्रव्यमनोऽनिष्टचिन्ताप्रवर्तनेन जीवस्य देहदौर्बल्याद्यापत्त्या हृन्निरुद्धवायुवदुपघातं जनयति, तदेव च शुभपुद्गलपिण्डरूपं तस्याऽनुकूलचिन्ताजनकत्वेन हर्षाद्यभिनिर्वृत्त्या भेषजवदनुग्रहं विधत्त इति । अतो जीवस्यैतावनुग्रहो-पघातौ द्रव्यमनः करोति, न तु मन्यमानमेर्वादिकं ज्ञेयं मनसः किमप्युपकल्पयति । अतो द्रव्यमनसः सकाशादात्मन एवानुग्रहो-पघातसद्भावात्, मनसस्तु ज्ञेयात् तद्गन्धस्याऽप्यभावाद् मस्तकाघातविह्वलीभूतेनेवाऽसंबद्धभाषिणा परेण हेतोरसिद्धिरुद्भाविता ॥ इति गाथार्थः ॥ २२० ॥

---

१ ज्ञायते उपघातस्तस्य दौर्बल्यो-रःक्षतादिलिङ्गैः । यदनुग्रहश्च हर्षादिभिस्ततः स उभयधर्मा ॥ २१९ ॥

२ यदि द्रव्यमनोऽतिबलि पीडयेद् हृन्निरुद्धवायुरिव । तदनुग्रहेण हर्षादय इव ज्ञेयस्य किं तत्र ? ॥ २२० ॥

आह— नन्वलौकिकमिदं, यद्— द्रव्यमनसा जीवस्य देहोपचय-दौर्बल्यादिरूपानुग्रहो-पघातौ क्रियेते, तथाप्रतीतेरेवाभावात्, इत्याशङ्क्याह—

[1]इट्ठा-णिट्ठाहारब्भवहारे होन्ति पुट्ठि-हाणीओ । जह, तह मणसो ताओ पोग्गलगुणउ त्ति को दोसो?॥२२१॥

ननु किमिहाऽलौकिकम् ?, यतो भवतो लोकस्य च सबालगोपालस्य तावत्प्रतीतमिदं यदुत— इष्टो मनोऽभिरुचितो य आहारस्तस्याऽभ्यवहारे जन्तूनां शरीरस्य पुष्टिर्भवति, यस्त्वनिष्टोऽनभिमत आहारस्तस्याऽभ्यवहारे हानिर्भवतीति । ततश्च 'जह त्ति' यथा इष्टा-ऽनिष्टाहाराभ्यवहारे तत्पुद्गलानुभावात् पुष्टि-हानी भवतः; 'तह त्ति' तथा यदि द्रव्यमनोलक्षणात् मनसोऽपि सकाशात् 'ताउ त्ति' ते पुष्टि-हानी पुद्गलगुणतः पुद्गलानुभावाद् भवतः, तर्हि को दोषः ? न कश्चिदित्यर्थः । यथाऽऽहार इष्टा-ऽनिष्टपुद्गलमयत्वात् तदनुभावाज्जन्तुशरीराणां पुष्टि-हानी जनयति, तथा द्रव्यमनोऽपि तन्मयत्वाद् यदि तेषां ते[2] निर्वर्तयति, तदा किं क्षूयते, येन पुद्गलमयत्वे समानेऽपि भवतोऽत्रैवाऽक्षमा ? इति भावः । तथा चोक्तम्— "चिन्तया वत्स ! ते जातं शरीरकमिदं कृशम्" इति । चिन्तैव तर्हि कार्श्याद्युपघातादिजनिकेति चेत् । न, तस्या अपि द्रव्यमनःप्रभवत्वात्, अन्यथा चिन्ताया ज्ञानरूपत्वात्, ज्ञानस्य चाऽमूर्तत्वात्, अमूर्तस्य च नभस इवोपघातादिहेतुत्वायोगात्, 'जमणुग्गहो-वघाया जीवाणं पोग्गलेहिंतो' इति वक्ष्यमाणत्वाच्च ॥ इति गाथार्थः॥२२१॥

अथोपसंहारगर्भं प्रस्तुतार्थविषये स्वाभिप्रायपरमार्थं दर्शयन्नाह—

[3]नीउं आगासिउं वा न नेयमालंबइ त्ति नियमोऽयं । तण्णेयकया जेऽणुग्गहो-वघाया य ते नत्थि ॥२२२॥

इह न शरीराद् 'निर्गन्तुं' (निर्गत्य) द्रव्यमनो मेर्वादिकं ज्ञेयमर्थमालम्बते गृह्णाति, नापि तच्छरीरस्थमेव 'आगसिउं ति' 'आकृष्टुं' (आकृष्य) हठात् समाकृष्याऽऽत्मनः समीपमानीय ज्ञेयमालम्बत इति, अयं नियमोऽस्माभिर्भुजमुत्क्षिप्य विधीयते— प्राप्यकारीदं न भवतीति नियम्यत इति तात्पर्यम् । 'तण्णेयकया जेऽणुग्गहो-वघाय त्ति' यौ च तज्ज्ञेयकृतौ— तच्च तज्ज्ञेयं च तज्ज्ञेयं तत्कृतौ, मनसोऽनुग्रहो-पघातौ परैरिष्येते, तौ तस्य न स्त एवेति च नियम्यते ॥ इति गाथार्थः ॥ २२२ ॥

किं पुनर्न नियम्यते ?, इत्याह—

---

१ इष्टा-ऽनिष्टाहाराभ्यवहारे भवतः पुष्टि-हानी । यथा, तथा मनसस्ते पुद्गलगुणत इति को दोषः ? ॥ २२१ ॥ २ पुष्टि-हानी । ३ गाथा २२३ ।

४ निर्गत्याकृष्य वा न ज्ञेयमालम्बत इति नियमोऽयम् । तज्ज्ञेयकृतौ यावनुग्रहो-पघातौ च तौ न स्तः ॥ २२२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

सो पुण सयमुवघायण-मणुग्गहं वा करेज्ज को दोसो ? । जमणुग्गहो-वघाया जीवाणं पोग्गलेहिंतो ॥२२३॥

'से' इति प्राकृतत्वात् पुंलिङ्गनिर्देशः, एवं पूर्वमुत्तरत्राऽपि च यथासंभवं द्रष्टव्यम् । तद् द्रव्यमनः पुनः स्वयमात्मना शुभाऽशुभकर्मवशत इष्टा-ऽनिष्टपुद्गलसंघातघटितत्वादनुग्रहो-पघातौ मन्तुः कुर्यात्, को दोषः ?– न वयं तत्र निषेद्धारः, ज्ञेयकृतयोरेव तस्य नयोरस्माभिर्निषिध्यमानत्वादिति भावः । जीवस्याऽपि तौ द्रव्यमनःकृतौ किमिति न निषिध्येते ?, इत्याह– 'जमणुग्गहो इत्यादि' यद्यस्मात्कारणादनुग्रहो-पघातौ जीवानां पुद्गलेभ्य इति युक्तमेव, इष्टा-ऽनिष्टशब्द-रूप-रस-गन्ध-स्पर्शोपभोगादिषु तथादर्शनेनाऽस्यार्थस्य निषेद्धुमशक्यत्वादित्यर्थः ॥ आह– ननु शब्दादय इष्टा-ऽनिष्टपुद्गलात्मका इति प्रत्यक्षादिप्रमाणसिद्धत्वात् प्रतीमः, द्रव्यमनस्तु यदिदं किमपि भवद्भिरुद्घुष्यते, तदिष्टा-ऽनिष्टपुद्गलमयमस्तीति कथं श्रद्दध्मः? इति । अत्रोच्यते- योगिनस्तावदिदं प्रत्यक्षत एव पश्यन्ति; अवधीदर्शिनस्त्वनुमानात्, तथाहि– यदन्तरेण यद् नोपपद्यते तद्दर्शनात् तदस्तीति प्रतिपत्तव्यम्, यथा स्फोटदर्शनाद् दहनस्य दाहिका शक्तिः, नोपपद्यते चेष्टा-ऽनिष्टपुद्गलसंघातात्मकद्रव्यमनोव्यतिरेकेण जन्तूनामिष्टा-ऽनिष्टवस्तुचिन्तने समुपलब्धौ वदनप्रसन्नता-दैहदौर्बल्यादयनुग्रहो-पघातौ, ततस्तदन्यथानुपपत्तेरस्ति यथोक्तरूपं द्रव्यमनः । चिन्तनीयवस्तुकृतावेतौ भविष्यत इति चेत् । न, जल-ज्वलनौदनादिचिन्तने क्लेद-दाह-बुभुक्षोपशमादिप्रसङ्गादिति । " चिन्तया वत्स ! ते जातं शरीरकमिदं कृशम् " इत्यादिलोकोक्तेश्चिन्ताज्ञानकृतौ तावेति चेत् । तदप्ययुक्तम्, तस्याऽमूर्तत्वात्, अमूर्तस्य च कर्तृत्वायोगात्, आकाशवत्, इत्युक्तत्वात्; " चिन्तया वत्स ! " इत्यादिलोकोक्तेश्च कार्ये कारणशक्त्यध्यारोपेणौपचारिकत्वात् । खेदादेस्तदुद्भूतिरिति चेत् । कोऽयं नाम खेदादिः? । किं तान्येव मनोद्रव्याणि, चिन्तादिज्ञानं वा? । आद्यपक्षे, सिद्धसाध्यता । द्वितीयपक्षस्तु विहितोत्तर एव । न च निर्हेतुकावेतौ, सर्वदा भवना-ऽभवनप्रसङ्गात्,

" नित्यं सत्त्वमसत्त्वं वा हेतोरन्यानपेक्षणात् । अपेक्षातो हि भावानां कादाचित्कत्वसंभवः " ॥१॥ इति ।

न च जीवादिक एवाऽन्यः कोऽपि तयोर्हेतुः, तस्य सदावस्थितत्वेन तत एव सर्वदा भवना-ऽभवनप्रसङ्गात् । एवमन्यदपि सुधिया स्वबुद्ध्या समाधानमिह वाच्यम्, इत्यलमतिविस्तरेण । तस्मादुक्तयुक्तिसिद्धं पुद्गलमयं द्रव्यमनो मन्तुः स्वयं कुर्यादनुग्रहो-पघातौ, तयकृतौ तु तौ मनसो न स्त एव, इति न तत्प्राप्यकारि ॥ इति गाथार्थः ॥ २२३ ॥

आह–ननु जाग्रदवस्थायां मा भूद् मनसो विषयप्राप्तिः, स्वापावस्थायां तु भवत्वसौ, अनुभवसिद्धत्वात्, तथाहि– 'अमुत्र मेरुशिखरादिगतंजिनायतनादौ मदीयं मनो गतम्' इति सुप्तैः स्वप्नेऽनुभूयत एव, तथा च '[3]गंतुं नेएण मणो संवज्झइ जग्गओ व सिमिणे

१ तत्पुनः स्वयमुपघाता-नुग्रहौ वा कुर्यात् को दोषः ? । यदनुग्रहो-पघातौ जीवानां पुद्गलेभ्यः ॥ २२३ ॥ २ चिन्ताज्ञानस्य । ३ गाथा २१३ ।

वा' इति मया प्रागेवोक्तम्, इत्याशङ्क्य स्वप्नेऽपि मनसः प्राप्यकारितामपाकर्तुमाह–

सिमिणो न तहारूवो वभिचाराओ अलायचक्कं व । वभिचारो य सदंसणमुवघाया-णुग्गहाभावा ॥२२४॥

इह 'मदीयं मनोऽमुत्र गतम्' इत्यादिरूपो यः सुप्तैरुपलभ्यते स्वप्नः, स यथोपलभ्यते न तथारूप एव, स्वप्नोपलब्धमोदकस्तथाविधपरमाचार्यैरिव परैर्न सत्य एव मन्तव्य इत्यर्थः । कुतः ?, इत्याह– व्यभिचारात्– अन्यथात्वेदर्शनात् । किंवद्– यथा न सत्यम् ?, इत्याह– अलातचक्रमिव- अलातमुल्मुकं तद्वृत्ताकारतया आशु भ्रम्यमाणं भ्रान्तिवशादचक्रमपि चक्रतया प्रतिभासमानं यथा न सत्यम्, अचक्ररूपताया एव तत्राऽवितथत्वात्, भ्रमणोपरमे स्वभावस्थस्य तथैव दर्शनात्; एवं स्वप्नोऽपि न सत्यः, तदुपलब्धस्य मनोमेरुगमनादिकस्याऽर्थस्याऽसत्यत्वात् । तदसत्यत्वं च प्रबुद्धस्य स्वप्नोपरमे तदभावात् । तदभावश्च तदवस्थायां देहस्थस्यैव मनसोऽनुभूयमानत्वादिति ॥ आह– ननु स्वप्नावस्थायां मेर्वादौ गत्वा जाग्रदवस्थायां निवृत्तं तद् भविष्यति, इति 'व्यभिचारात्' इत्यसिद्धो हेतुः; इत्याशङ्क्याह– 'वभिचारो येत्यादि' यो मया व्यभिचारो हेतुत्वेनोक्तः, स चेत्थं सिद्धः । कथम् ?, इत्याह– 'सदंसणमिति' विभक्तिव्यत्ययात् स्वदर्शनादित्यर्थः, स्वस्याऽऽत्मनो मेर्वादिस्थितजिनगृहादिगतस्य दर्शनं स्वदर्शनं तस्मादिति; एतदुक्तं भवति– यथा कदाचिदात्मीयं मनः स्वप्ने मेर्वादौ गतं कश्चित् पश्यति, तथा कोऽपि[2]शरीरमात्मानमपि नन्दनतरुकुसुमावचयादि कुर्वन्तं तद्गतं पश्यति, न च तत् तथैव, इहस्थितैः सुप्तस्य तस्याऽत्रैव दर्शनात्, द्वयोश्चात्मनोरसंभवात्, कुसुमपरिमलाघ्रध्वजनितपरिश्रमाद्यनुग्रहो-पघाताभावाच्च ॥ इति गाथार्थः ॥ २२४ ॥

एतदेव भावयन्नाह—

[3]इह पासुत्तो पेच्छइ सदेहमन्नत्थ, न य तओ तत्थ । न य तग्गयोवघाया-णुग्गहरूवं विबुद्धस्स ॥२२५॥

इह जगति प्रसुप्तः कश्चित् स्वदेहमन्यत्र नन्दनवनादौ गतं स्वप्ने पश्यति । न च तकोऽसौ देहस्तत्र नन्दनवनादावुपपद्यते, इहस्थितैरन्यैस्तस्याऽत्रैवोपलम्भात्, इत्याद्यनन्तरोक्तयुक्तेः । न च विबुद्धस्य सतस्तद्गतयोरन्यत्र गमनगतयोरन्यत्र गमनविषययोरनुग्रहोपघातयो रूपं कुसुमपरिमल-मार्गपरिश्रमादिकं स्वरूपमुपलभ्यते । तस्मात् स्वापावस्थायामपि नाऽन्यत्र मनसो गमनम्, देहगमनदर्शनेन व्यभिचारात् ॥ इति गाथार्थः ॥ २२५ ॥

१ स्वप्नो न तथारूपो व्यभिचारादलातचक्रमिव । व्यभिचारश्च स्वदर्शनादुपघाता-ऽनुग्रहाभावात् ॥२२४॥ २घ. छ. ज. 'त्वप्रद' ।
३ इह प्रसुप्तः प्रेक्षते स्वदेहमन्यत्र न च सकस्तत्र । न च तद्गतोपघाता-नुग्रहरूपं विबुद्धस्य ॥ २२५ ॥ + भाम्थ-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अत्र विबुद्धस्य सतस्तद्वतानुग्रहो-पघातानुपलम्भादित्यस्य हेतोरसिद्धतोद्भावनार्थं परः प्राह—

[1]दीसंति कासइ फुडं हरिस-विसादादयो विबुद्धस्स । सिमिणाणुभूयसुह-दुक्ख-रागदोसाइलिंगाइं ॥२२६॥

इह कस्यचित् पुरुषस्य स्वप्नोपलम्भानन्तरं विबुद्धस्य सतः स्फुटं व्यक्तं दृश्यन्ते हर्ष-विषादादयः, आदिशब्दादुन्माद-माध्यस्थ्यादि-परिग्रहः । कथंभूता ये हर्ष-विषादादयः ? इत्याह—'सिमिणेत्यादि' स्वप्ने जिनस्नात्रदर्शनादौ यदनुभूतं सुखं, समीहिताऽर्थाऽलाभादौ यदनुभूतं दुःखं, तयोर्विषये यथासंख्यं यौ राग-द्वेषौ तयोर्लिङ्गानि चिह्नानि– हर्षः स्वप्नानुभूतसुखं रागस्य लिङ्गं, विषादस्तु तदनुभूत-दुःखद्वेषस्य लिङ्गमिति भावः । तत्र—

"स्वप्ने दृष्टो मयाद्य त्रिभुवनमहितः पार्श्वनाथः शिशुत्वे द्वात्रिंशद्भिः सुरेन्द्रैरहमहमिकया स्नाप्यमानः सुमेरौ ।
तस्माद् मत्तोऽपि धन्यं नयनयुगमिदं येन साक्षात् स दृष्टो द्रष्टव्यो, यो महीयान् परिहरति भयं देहिनां संस्मृतोऽपि" ॥ १ ॥

इत्यादिस्वप्नानुभूतसुखरागलिङ्गं हर्षः, तथा—

"प्राकारत्रयतुङ्गतोरणमणिप्रेङ्खत्प्रभोद्भाहता नष्टाः क्वापि रवेः करा द्युततरं यस्यां प्रचण्डा अपि ।
तां त्रैलोक्यगुरोः सुरेश्वरवतीमास्थायिकामेदिनीं हा ! यावत् प्रविशामि तावदधमा निद्रा क्षयं मे गता" ॥ १ ॥

इत्यादिकः स्वप्नानुभूतदुःखद्वेषलिङ्गं विषादः, अत्यन्तकामोद्रेकादिलिङ्गमुन्मादः, मुनेस्तु माध्यस्थ्यम्; इति "विबुद्धस्याऽनुग्रहोपघातानुपलम्भात्" इत्यसिद्धो हेतुः ॥ इति गाथार्थः ॥२२६॥

अत्रोत्तरमाह—

[2]नं सिमिणविण्णाणाओ हरिस-विसासादयो विरुज्झंति । किरियाफलं तु तित्ती-मद-वह-बंधादओ नत्थि ॥२२७॥

स्वप्ने सुखानुभवादिविषयं विज्ञानं स्वप्नविज्ञानं तस्मादुत्पद्यमाना हर्ष-विषादादयो न विरुध्यन्ते- न तान् वयं निवारयामः, जाग्रद-वस्थाविज्ञानहर्षादिवत्, तथाहि– दृश्यन्ते जाग्रदवस्थायां केचित् स्वप्नुत्प्रेक्षितसुखानुभवादिज्ञानाद् हृष्यन्तः, द्विषन्तो वा । ततश्च दृष्टस्य निषेद्धुमशक्यत्वात् स्वप्नविज्ञानादपि नैतन्निषेधं ब्रूमः । तर्हि किमुच्यते भवद्भिः ?, इत्याह—'किरियेत्यादि' क्रिया भोजनादिका तस्याः

---

१ दृश्यन्ते कस्यचित् स्फुटं हर्ष-विषादादयो विबुद्धस्य । स्वप्नानुभूतसुख-दुःख-राग-दोषादिलिङ्गानि ॥ २२६ ॥ २ घ.छ.क. 'यानपह' ।
३ ग. ज. 'भाभ्याह' ४ न स्वप्नविज्ञानाद् हर्ष-विषादादयो विरुध्यन्ते । क्रियाफलं तु तृप्ति-मद-वध-बन्धादयो न सन्ति ॥२२७॥

फलं तृप्त्यादिकं तत् पुनः स्वप्नविज्ञानाद् नास्त्येव, इति ब्रूमः । तदेव क्रियाफलं दर्शयति– 'तित्तीत्यादि' तत्र तृप्तिर्बुभुक्षाद्युपरमलक्षणा, मदः सुरापानादिजनितविक्रियारूपः, वधः शिरश्छेदादिसमुद्भूतपीडास्वरूपः, बन्धो निगडादिनियन्त्रणस्वभावः; आदिशब्दाज्जल-ज्वलनादिप्रवेशात् क्लेद-दाहादिपरिग्रहः । यदि ह्येतत् तृप्त्यादिकं भोजनादिक्रियाफलं स्वप्नविज्ञानाद् भवेत्, तदा विषयप्राप्तिरूपा प्राप्यकारिता मनसो युज्येत, न चैतदस्ति, तथोपलम्भस्यैवाभावात् ॥ इति गाथार्थः ॥२२७॥

अथ स्वप्नानुभूतक्रियाफलं जाग्रदवस्थायामपि परो दर्शयन्नाह—

[1]सिमिणे वि सुरयसंगमकिरियासंजणियवंजणविसग्गो । पडिबुद्धस्स वि कस्सइ दीसइ सिमिणाणुभूयफलं॥२२८॥

स्वप्नेऽपि [2]सुरतार्था याऽसौ कामिनः कामिनीजनेन, कामिन्या वा कामिजनेन सह संगमक्रिया तत्संजनितो व्यञ्जनस्य शुक्र-पुद्गलसंघातस्य विसर्गो निसर्गः स्वप्नानुभूतसुरतसंगमक्रियाफलरूपः प्रतिबुद्धस्याऽपि कस्यचित् प्रत्यक्षं एव दृश्यते, तद्दर्शनाच्च स्वप्ने योषित्संगमक्रियाऽनुमीयते, तथाहि– यत्र व्यञ्जनविसर्गस्तत्र योषित्संगमेनापि भवितव्यम्, यथा वासभवनादौ, तथा च स्वप्ने, ततो-ऽत्रापि योषित्प्राप्त्या भवितव्यम्; इति कथं न प्राप्तकारिता मनसः ? इति भावः ॥ इति गाथार्थः ॥ २२८ ॥

अथ योषित्संगमे साध्ये व्यञ्जनविसर्गहेतोरनैकान्तिकतामुपदर्शयन्नाह—

[3]सो अज्झवसाणकओ जागरओ वि जह तिव्वमोहस्स । तिव्वज्झवसाणाओ होइ विसग्गो तहा सुमिणे ॥२२९॥

स्वप्ने योऽसौ व्यञ्जनविसर्गः स तत्प्राप्तिमन्तरेणाऽपि– तां कामिनीमहं परिषजामि' इत्यादिस्वमत्युत्प्रेक्षिततीव्राध्यवसायकृतो वेदितव्यः । कस्येव ?, इत्याह– जाग्रतोऽपि तीव्रमोहस्य प्रबलवेदोदययुक्तस्य कामिनीं स्मरतश्चिन्तयतो दृढं ध्यायतः प्रत्यक्षामिव पश्य-तो बुद्ध्या परिषजतः परिभुक्तामिव मन्यमानस्य यत् तीव्राध्यवसानं तस्माद् यथा व्यञ्जनविसर्गो भवति, तथा स्वप्नेऽपि नितम्बिनी-प्राप्तिमन्तरेणाऽपि स्वयमुत्प्रेक्षिततीव्राध्यवसानादसौ मन्तव्यः; अन्यथा तत्क्षण एव प्रबुद्धः सन्निहितां प्रियतमामुपलभेत, तत्कृतानि च स्वप्नोपलब्धानि नख-दन्त-पदादीनि पश्येत्, न चैवम्; तस्मादनैकान्तिकता हेतोः ॥ इति गाथार्थः ॥ २२९ ॥

किञ्च,

---

१ स्वप्नेऽपि सुरतसंगमक्रियासंजनितव्यञ्जनविसर्गः । प्रतिबुद्धस्यापि कस्यचिद् दृश्यते स्वप्नानुभूतफलम् ॥ २२८ ॥ २ घ.छ.ज. 'क्षत ए' ।
३ सोऽध्यवसानकृतो जाग्रतोऽपि यथा तीव्रमोहस्य । तीव्राध्यवसानाद् भवति विसर्गस्तथा स्वप्ने ॥ २२९ ॥ [2]सुरतार्थ-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

[1]सुरयपडिवत्ति-रइसुह-गब्भाहाणाइ इहरहा होज्जा । सुमिणसमागमजुवईए, न य जओ ताइं तो विफला ॥२३०॥

इतरथा– स्वप्ने सुरतक्रियया योऽसौ व्यञ्जनविसर्गः स यदि योषित्प्राप्त्यव्यभिचारी स्यात्, तदा सुरतोपभुक्तयुवतेरपि 'सुरतक्रियाऽमुकेन सह मयाऽनुभूता' इत्येवंरूपा सुरतप्रतिपत्तिः स्यात्, तथा, रतिसुखं, गर्भाऽऽधानादिकं च भवेत्; आदिशब्दादुदरवृद्धि[3]-दोहद-पुत्रजन्मादिपरिग्रहः । यतश्च नैतानि तस्याः सम्पलभ्यन्ते, अतो विफलैव सा स्वप्नसुरतक्रिया, विशिष्टस्य परिभुक्तकामिनीगर्भाधानादिफलस्याभावात् । इदमुक्तं भवति– न स्वप्ने योषित्प्राप्तिपूर्विका विशिष्टा सुरतक्रिया, नापि विशिष्टं गर्भाऽऽधानादिकं तत्फलं; या तु तीव्रवेदोदयाविर्भूताऽध्यवसायमात्रकृता निधुवनक्रिया सा व्यञ्जनविसर्गमात्ररूपेणैव फलेन फलवती, न विशिष्टेन, इति तदपेक्षया सा 'विफला' इत्युच्यते । अतो यथोक्तविशिष्टफलाभावात् फलमात्राद् योषित्प्राप्त्यसिद्धेश्च न प्राप्यकारिता मनस इति भावः॥ इति गाथार्थः ॥ २३० ॥

पुनरप्याह परः–

[2]नणु सिमिणओ वि कोई सच्चफलो फलइ जो जहा दिट्ठो । ननु सिमिणम्मि निसिद्धं किरिया किरियाफलाइं च ॥२३१॥

ननु स्वप्नोऽपि कश्चित् सत्यं फलं यस्याऽसौ सत्यफलो दृश्यते । कैः ?, इत्याह– यो यथा येन प्रकारेण राज्यलाभादिना दृष्टस्तेनैव फलति– राज्यादिफलदायको भवतीत्यर्थः, तत्[4] किमिति स्वप्नोपलब्धं मनसो मेरुगमनादिकं सत्यतया नेष्यते ? इति भावः । अत्रोत्तरमाह– 'नन्वित्यादि' नन्वयुक्तोपालम्भोऽयम्, सर्वथास्वप्नसत्यत्वस्याऽस्माभिरनिषिध्यमानत्वात् । तर्हि किं निषिध्यते ?, इत्याह– [5]स्वप्ने क्रिया मेरुगमनादिका, अध्वश्रम-कुसुमपरिमलादीनि क्रियाफलानि च, इत्येतद्द्वयमस्माभिः प्रागुक्तयुक्तेः सत्यतया निषिद्धम् ॥ इति गाथार्थः ॥ २३१ ॥

तर्हि किं तत्, यत् स्वप्ने भवद्भिर्न निषिध्यते ?, इत्याह–

जं पुण विण्णाणं तप्फलं च सिमिणे विबुद्धमेत्तस्स । सिमिणयनिमित्तभावं फलं च तं को निवारेइ ? ॥२३२॥

---

१ सुरतप्रतिपत्ति-रतिसुख-गर्भाधानादीतरथा भवेत् । स्वप्नसमागमयुवतेः, न च यतस्तान्यतो विफला ॥ २३० ॥ २ घ. छ. ज. 'द्धिदोहद' ।
३ ननु स्वप्नकोऽपि कश्चित् सत्यफलः फलति यो यथा दृष्टः । ननु स्वप्ने निषिद्धं क्रिया क्रियाफलानि च ॥२३१॥ ४ घ. छ. 'कुतः' । ५ क. ग. 'ततः किं' ।
६ क. 'स्वप्ने या किं' ज. 'स्वप्नेऽपि किं' । ७ यत्पुनर्विज्ञानं तत्फलं च स्वप्ने विबुद्धमात्रस्य । स्वप्ननिमित्तभावं फलं च तत् को निवारयति ? ॥ २३२ ॥

यत्पुनः स्वप्ने जिनस्नात्रदर्शनादिकं विज्ञानं, यच्च स्वप्ने विबुद्धमात्रस्य च हर्षादिकं तत्फलं, तदनुभवादिसिद्धत्वात्को निवारयति ?, तथा, यो भविष्यत्फलापेक्षया स्वप्नस्य निमित्तभावः स्वप्ननिमित्तभावस्तं च को वा निवारयति ?, यच्च तस्मात् स्वप्ननिमित्तादवश्यंभावि भविष्यत्फलं तदपि को निवारयति ? । यदेव हि मेरुगमनक्रियादिकं युक्त्या नोपपद्यते तदेव निषिध्यते, न त्वेतानि विज्ञानादीनि, युक्त्युपपन्नत्वात् । न चैतैरभ्युपगतैरपि मनसः प्राप्यकारिता काचित् सिध्यतीति भावः ॥ इति गाथार्थः ॥ २३२ ॥

किमिति पुनः स्वप्नस्य निमित्तभावो न निवार्यते ?, इत्याशङ्क्याह–

[1]देहप्फुरणं सहसोइयं च सिमिणो य काइयाईणि । सगयाइं निमित्ताइं सुभा-सुभफलं निवेएंति ॥२३३॥

स्वस्मिन्नात्मनि गतानि स्थितानि स्वगतानि निमित्तानि, एतानि शास्त्रे, लोकेऽपि च प्रसिद्धानि भविष्यच्छुभा-शुभफलं निवेदयन्ति । कानि पुनस्तानि ?, इत्याह– कायिकम्, आदिशब्दाद् वाचिकं, मानसं च । एतान्येव क्रमेण दर्शयति– कायिकं बाह्वादौ देहस्फुरणं भविष्यच्छुभा-ऽशुभफलं निवेदयति, वाचिकं तु सहसोदितं– सहसाऽकस्मादेवोदितं सहसोदितं सहसैव तत्[2] किमपि वदत आगच्छति यत्, भविष्यच्छुभा-ऽशुभफलमावेदयति, मानसं तु निमित्तं स्वप्ने, इत्येतानि को निवारयति ?, लोक-शास्त्रप्रसिद्धस्य, युक्त्युपपन्नस्य च निषेद्धुमशक्यत्वात् ॥ इति गाथार्थः ॥ २३३ ॥

आह– ननु स्त्यानर्द्धिनिद्रोदये वर्तमानस्य द्विरददन्तोत्पाटनादिप्रवृत्तस्य स्वप्ने मनसः प्राप्यकारिता, तत्पूर्वको व्यञ्जनावग्रहश्च सिद्ध्यति, तथाहि– स तस्यामवस्थायां 'द्विरददन्तोत्पाटनादिकं सर्वमिदमहं स्वप्ने पश्यामि' इति मन्यते, इत्ययं स्वप्नः, मनोविकल्पपूर्विकां च दशनाद्युत्पाटनक्रियामसौ करोति । इति मनसः प्राप्यकारिता, तत्पूर्वकश्च मनसो व्यञ्जनावग्रहो भवत्येव, इत्याशङ्क्याह–

[4]सिमिणमिव मन्नमाणस्स थीणगिद्धिस्स वंजणोग्गहया । होज्ज व, न उ सा मणसो(सा)खलु सोइंदियाईणं ॥२३४॥

'होज्ज व' इत्यत्र वाशब्दः पुनरर्थे, तस्य च व्यवहितः संबन्धः कार्यः, तद्यथा– अनन्तरोक्तयुक्तिभ्यः स्वप्नावस्थायामपि विषयप्राप्त्यभावाद् मनसो व्यञ्जनावग्रहो नास्ति, स्त्यानगृद्धेः पुनः स्त्यानगृद्धिनिद्रोदये पुनर्वर्तमानस्य जन्तोरित्यर्थः, मांसभक्षण-दशनोत्पाटनादि कुर्वतो गाढनिद्रोदयपरवशीभूतत्वेन स्वप्नमिव मन्यमानस्य भवेद् व्यञ्जनावग्रहता-- स्याद् व्यञ्जनावग्रह इत्यर्थः, न वयं तत्र

---

१ देहस्फुरणं सहसोदितं च स्वप्नश्च कायिकादीनि । स्वगतानि निमित्तानि शुभा-ऽशुभफलं निवेदयन्ति ॥ २३३ ॥ २ क. ग. 'ततः किं' ।
३ घ. छ. ज. 'दशनोत्पा' ४ स्वप्नमिव मन्यमानस्य स्त्यानगृद्धेर्व्यञ्जनावग्रहता । भवेद् वा, न तु सा मनसः सा खलु श्रोत्रेन्द्रियादीनाम् ॥२३४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निषेद्धारः। सिद्धं तर्हि परस्य समीहितम्। सिध्येत्, यदि सा व्यञ्जनावग्रहता मनसो भवेत्; न पुनः सा तस्य। कस्य तर्हि सा?, इत्याह– सा खलु प्राप्यकारिणां श्रोत्रादीन्द्रियाणां श्रवण-रसन-घ्राण-स्पर्शनानामित्यर्थः, इदमुक्तं भवति– स्त्यानर्द्धिनिद्रोदये प्रेक्षणक-रङ्गभूम्यादौ गीतादिकं शृण्वतः श्रोत्रेन्द्रियस्य व्यञ्जनावग्रहो भवति, कर्पूरादिकं जिघ्रतो घ्राणेन्द्रियस्य, आमिष-मोदकादिकं भक्षयतो रस-नेन्द्रियस्य, कामिनीतनुलतादि स्पृशतः स्पर्शनेन्द्रियस्य व्यञ्जनावग्रहः संपद्यते; न तु नयन-मनसोः, वह्नि-क्षुरिकादिविषयकृतदाह-पाटनादिप्रसङ्गेन तयोर्विषयप्राप्त्यभावात्, तामन्तरेण च व्यञ्जनावग्रहासंभवादिति भावः॥ इति गाथार्थः॥ २३४॥

आह– ननु स्त्यानर्द्धिनिद्रोदये स्वप्नमिव मन्यमानः किं कोऽपि चेष्टां काश्चित् करोति, येन तत्करणे व्यञ्जनावग्रहः स्यात्?, इत्याशङ्क्य स्त्यानर्द्धिनिद्रोदयोदाहरणान्याह–

[1]पोग्गल-मोयग-दन्ते फरुसग-वडसालभंजणे चेव। थीणद्धियस्स एए आहारणा होंति नायव्वा॥ २३५॥

स्त्यानर्द्धिनिद्रोदयवर्तिन एतानि पौद्गलादीन्युदाहरणानि ज्ञातव्यानि भवन्ति। तद्यथा– 'पोग्गलेत्यादि' तत्र समयपरिभाषया पौद्गलं मांसमुच्यते, तदुदाहरणं यथा– एकस्मिन् ग्रामे कुटुम्बिकः कोऽप्यासीत्, स च मांसगृद्ध आमानि, पक्वानि, तलितानि, केवलानि, तीमनादिमध्यप्रक्षिप्तानि च मांसानि भक्षयति। अन्यदा च गुणातिशायिभिः स्थविरैः कैश्चित् प्रतिबोधितो दीक्षां कक्षीकृतवान्। तेन च ग्रामा-ऽनुग्रामं विहरता कदाचित् क्वचित् प्रदेशे मांसलुब्धैः कैश्चिद्[3] विकृत्यमानो महिषः समीक्षाञ्चक्रे। तं चैं संवीक्ष्य तदामिषभक्षणे तस्याऽप्यभिलाषः समजायत। स चाऽभिलाषोऽस्य भुञ्जानस्य विचारभूमीं गतस्य चरमां सूत्रपौरुषीं, प्रतिक्रमण-क्रियां, प्रादोषिकपौरुषीं च कुर्वतो न निवृत्तः; किं बहुना?, तदभिलाषवर्त्येव प्रसुप्तोऽसौ। ततः स्त्यानर्द्धिनिद्रोदयो जातः। तदुदये चोत्थाय ग्रामाद् बहिर्महिषमण्डलमध्ये गत्वाऽन्यं महिषमेकं विनिहत्य तदामिषं भक्षितवान्। तदुद्धरितशेषं च समानीयोपाश्रयो-परि क्षिप्त्वा प्रसुप्तः। समुत्थितश्च प्रत्युषसि स 'मयेत्थंभूतः स्वप्नो दृष्टः' इत्येवं गुर्वन्तिक आलोचयामास। साधुभिश्चोपाश्रयोपरि तदामिषमदृश्यत। ततः 'स्त्यानर्द्धिनिद्रोदयोऽस्याऽस्ति' इति ज्ञातम्। तथा च संघेन लिङ्गमपहृत्य विसर्जितोऽसौ॥ इति स्त्यानर्द्धि-निद्रोदये प्रथममुदाहरणमिति॥ १॥

अथ द्वितीयं मोदकोदाहरणमुच्यते, यथा– एकः कोऽपि साधुर्भिक्षां पर्यटन् क्वचिद् गृहे पटलकादिव्यवस्थापितानॅतिप्रचुरान्

१ पौद्गल-मोदक-दन्ताः कुलाल-वटशाकभञ्जने चैव। स्त्यानर्द्धेरेतान्युदाहरणानि भवन्ति ज्ञातव्यानि॥ २३५॥

२ ज. 'वर्त्तिनि ए'। ३ घ. छ. ज. 'श्चित् कृ'। ४ क. ग. 'च समीक्ष्य'। ५ घ. छ. 'नपि प्र'।

सुरभिस्निग्धमधुरमनोज्ञान् मादकानद्राक्षीत्। तेन चोर्ध्वस्थितेन ते सुचिरमुद्वीक्षिताः। न च किमपि तन्मध्याल्लब्धम्। ततः सोऽप्यवि-च्छिन्नतदभिलाष एव सुष्वाप। स्त्यानर्द्धिनिद्रोदये च रजन्यां तद्गृहं गत्वा, स्फोटयित्वा कपाटानि, मोदकान् स्वेच्छया भक्षयित्वा, उद्धरितांस्तु पतद्ग्रहके क्षिप्त्वोपाश्रयमागत्य पतद्ग्रहकं स्थाने मुक्त्वा प्रसुप्तः। उत्थितेन च तथैवाऽऽलोचितं गुरूणाम्। ततः प्रत्युपेक्ष-णासमये भाजनादि प्रत्युपेक्षमाणेनॅ साधुना पतद्ग्रहके दृष्टास्ते मोदकाः। ततो गुर्वादिभिर्ज्ञातोऽस्य स्त्यानर्द्धिनिद्रोदयः। तथैव च संघेन लिङ्गपाराञ्चिकं दत्त्वाऽयमपि विसर्जितः॥ २॥

दन्तोदाहरणं तृतीयमुच्यते, यथा– एकः साधुर्दिवा द्विरदेन खेदितः कथमपि पलाय्योपाश्रयमागतः। तं च दन्तिनं प्रत्यविच्छि-न्नकोप एव निशि प्रसुप्तः। स्त्यानर्द्धिनिद्रोदयश्च जातः। तदुदये च वज्रऋषभनाराचसंहननवतः केशवार्धबलसंपन्नता समये निगद्यते। अतो नगरकपाटानि भङ्क्त्वा मध्ये गत्वा तं हस्तिनं व्यापाद्य दन्तद्वयमुत्पाट्य स्वोपाश्रयद्वारे क्षिप्त्वा सुप्तः। प्रबुद्धेन च 'स्वप्नोऽयम्' इत्यालोचितम्। दन्तदर्शने च ज्ञातः स्त्यानर्द्धिनिद्रोदयः। तथैव च लिङ्गं गृहीत्वा संघेन विसर्जितः॥ ३॥

फरुसगशब्देन समयप्रसिद्धया कुम्भकारोऽभिधीयते, तदुदाहरणं चतुर्थमुच्यते– एकः कुम्भकारो महति गच्छे प्रव्रजितः। अन्यदा चैं सुप्तस्याऽस्य स्त्यानर्द्धिनिद्रोदयो जातः। ततोऽसौ पूर्वं यथा मृत्तिकापिण्डानत्रोटयत्, तथा तदभ्यासादेव साधूनां शिरांसि त्रोटयित्वा कबन्धैः सहैवैकान्ते उज्झाञ्चकार। ततः शेषाः केचन साधवोऽपसृताः। प्रभाते च ज्ञातं सम्यगेव सर्वं तच्चेष्टितम्। संघेन तथैव विसर्जितः॥ ४॥

अथ वटशाखाभञ्जनोदाहरणं पञ्चममुच्यते, यथा– कोऽपि साधुर्ग्रामान्तराद् गोचरचर्यां विधाय प्रतिनिवृत्तः। स चौष्ण्या-ऽभिहतो भृतभाजनस्तृषितो बुभुक्षितश्छायार्थी मार्गस्थैं वटवृक्षस्याऽधस्तादागच्छन्नतिनीचैर्वर्तिन्या तच्छाखया मस्तके घट्टितः, गाढं च परितापितः, अव्यवच्छिन्नकोपश्च प्रसुप्तः। स्त्यानर्द्धिनिद्रोदये रात्रौ गत्वा वटशाखां भङ्क्त्वोपाश्रयद्वारे क्षिप्त्वा पुनः प्रसुप्तः। 'स्वप्नो दृष्टः' इत्यालोचिते, स्त्यानर्द्धुदये च ज्ञाते लिङ्गापनयनतः संघेन विसर्जित इति॥५॥ एतान्युदाहरणानि विशेषतो निशीथाद्वसेयानि॥ इति गाथार्थः॥ २३५॥

तदेवं 'गंतुं नेएण मणो संबज्झइ जग्गओ व सिमिणे वा' इत्यादिपूर्वपक्षगाथायाः प्रथमार्धमपाकृतम्। साम्प्रतं 'सिद्धमियं लोय-म्मि वि अमुग्गत्थगओ मणो मे त्ति' एतदुत्तरार्धमपाकुर्वन्नाह––

१ घ. 'नानि प्र'। २ ग. घ. छ. ज. 'न तेन सा'। ३ ज. 'च प्रसुप्तस्य स्त्या' घ. छ. 'च सुप्तस्य स्त्या'। ४ गाथा २१३ (प्र. खं-१)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जह देहत्थं चक्खुं जं पइ चंदं गयं ति, न य सच्चं । रूढं मणसो वि तहा न य रूढी सच्चिया सव्वा ॥२३६॥

यथा देहस्थं देहादनिर्गतमपि चक्षुः 'चन्द्रं गतम्' इति जल्पति लोकः, न च तत् सत्यम्, चक्षुषो वह्न्यादिदर्शनेन तत्कृतदाहादिप्रसङ्गात्; तथा तेनैव प्रकारेण मनसोऽपि निर्निबन्धनं रूढमिदं यदुत– 'अमुत्र गतं मे मनः' इति । रूढिरपि सत्या भविष्यति, इत्याह– न च रूढिः सर्वाऽपि सत्या,

" वटे वटे वैश्रवणश्चत्वरे चत्वरे शिवः । पर्वते पर्वते रामः सर्वगो मधुसूदनः " ॥ १ ॥

इत्यादिकाया असत्याया अपि दर्शनात् ॥ इति गाथार्थः ॥ २३६ ॥

तदेवं विषयप्राप्तौ निषिद्धायां मनसोऽसद्ग्रहममुञ्चन् परः प्रकारान्तरेणाऽपि तस्य व्यञ्जनावग्रहं प्रतिपादयन्नाह—

[1]विसयमसंपत्तस्स वि संविज्जइ वंजणोग्गहो मणसो । जमसंखेज्जसमइओ उवओगो जं च सव्वेसु ॥२३७॥

समएसु मणोदव्वाइं गिण्हए वंजणं च दव्वाइं । भणियं संबंधो वा तेण तयं जुज्जए मणसो ॥ २३८ ॥

विषयं मेरुशिखरादिकं, जला-ऽनलादिकं वा, असंप्राप्तस्याऽपि– अप्राप्य गृह्णतोऽपीत्यर्थः । किम् ?, इत्याह– संविद्यते युज्यते व्यञ्जनावग्रहो मनसः । कुतः ?, इत्याह– 'जमसंखेज्जसमइओ उवओगो' यद् यस्मात् कारणात् " च्यवमानो न जानाति" इत्यादिवचनात् सर्वोऽपि च्छद्मस्थोपयोगोऽसंख्ययैः समयैर्निर्दिष्टः सिद्धान्ते, न त्वेक-द्व्यादिभिः । 'जं च सव्वेसु समयेसु मणोदव्वाइं गिण्हए त्ति' यस्माच्च तेषूपयोगसंबन्धिष्वसंख्येयेषु समयेषु सर्वेष्वपि प्रत्येकमनन्तानि मनोद्रव्याणि मनोवर्गणाभ्यो गृह्णाति जीवः; द्रव्याणि च, तत्संबन्धो वा प्रागत्रैव भवद्भिर्व्यञ्जनमुक्तम्, तेन कारणेन तत् तादृशं द्रव्यं, तत्संबन्धो वा व्यञ्जनं व्यञ्जनावग्रह इति हृदयम्, युज्यते घटते मनसः । यथा हि श्रोत्रादीन्द्रियेणाऽसंख्येयान् समयान् यावद् गृह्यमाणानि शब्दादिपरिणतद्रव्याणि, तत्संबन्धो वा व्यञ्जनावग्रहः, तथाऽत्राऽप्यसंख्येयसमयान् यावद् गृह्यमाणानां मनोद्रव्याणां, तत्संबन्धस्य वा किमिति पक्षपातं परित्यज्य मध्यस्थीभूत्वाऽसौ नेष्यते ?, इति किल परस्याभिप्रायः ॥ इति गाथाद्वयार्थः ॥ २३७ ॥ २३८ ॥

तदेवं विषयासंप्राप्तावपि भङ्ग्यन्तरेण मनसो व्यञ्जनावग्रहः किल परेण समर्थितः, साम्प्रतं विषयसंप्राप्त्यापि तस्य तं समर्थयन्नाह–

१ यथा देहस्थं चक्षुर्यत् प्रति चन्द्रं गतमिति, न च सत्यम् । रूढं मनसोऽपि तथा न च रूढिः सत्यिका (सत्या) सर्वा ॥ २३६ ॥ २ क, घ. छ. ज. 'म इ' ।

३ विषयमसंप्राप्तस्यापि संविद्यते व्यञ्जनावग्रहो मनसः । यदसंख्येयसमयिक उपयोगो यच्च सर्वेषु ॥ २३७ ॥
समयेषु मनोद्रव्याणि गृह्णाति व्यञ्जनं च द्रव्याणि । भणितं संबन्धो वा तेन तद् युज्यते मनसः ॥ २३८ ॥

[1]देहाऽणिग्गयस्स वि सकायहिययाइयं विचिंतयओ । नेयस्स वि संबंधे वंजणमेवं पि से जुत्तं ॥ २३९ ॥

देहाच्छरीरादनिर्गतस्यापि मेर्वाद्यर्थमगतस्यापि स्वस्थानस्थितस्यापीत्यर्थः, स्वकाये, स्वकायस्य वा हृदयादिकमतीव संनिहितत्वादतिसंबद्धं विचिन्तयतो मनसो योऽसौ ज्ञेयेन स्वकायस्थितहृदयादिना संबन्धस्तत्प्राप्तिलक्षणस्तस्मिन्नपि ज्ञेयसंबन्धे, न केवलं 'विसयमसंपत्तस्स वि संविज्जइ' इत्याद्यनन्तरसमर्थितन्यायेन, इत्यपिशब्दार्थः । किम् ?, इत्याह– व्यञ्जनं व्यञ्जनावग्रहः 'से' तस्य मनसो युक्तं घटमानकं, एवमप्यनयाऽपि प्राप्यकारित्वभङ्ग्या ॥ इति गाथार्थः ॥ २३९ ॥

तदेवं प्रकारद्वयेन मनसः परेण व्यञ्जनावग्रहे समर्थिते, आचार्यः प्रथमपक्षे तावत् प्रतिविधानमाह–

[2]गिज्झस्स वंजणाणं जं गहणं वंजणोग्गहो स मओ । गहणं मणो, न गिज्झं को भागो वंजणे तस्स ? ॥ २४० ॥

इह ' विसयमसंपत्तस्स वि संविज्जइ ' इत्यादि यत्परेणोक्तम्, तद् निजाऽसत्पक्ष-परकीयसत्पक्षविषयप्रसर्पन्महाराग-द्वेषग्रहग्रस्तचेतोविह्वलतासूचकमेवावगन्तव्यम्, असंबद्धत्वात्, तथाहि– श्रोत्र-घ्राण-रसन-स्पर्शनेन्द्रियचतुष्टयग्राह्यस्य शब्द-गन्धादिविषयस्य संबन्धिनां व्यञ्जनानां तद्रूपपरिणतद्रव्याणां यद् ग्रहणमुपादानं स व्यञ्जनावग्रहोऽस्माकं संमत इति परोऽपि जानात्येव, प्रागसकृत्प्रतिपादितत्वादिति । मनोद्रव्याण्यपि तर्हि मनसो ग्राह्याणि भविष्यन्ति, ततस्तस्याऽपि श्रोत्रादेरिव व्यञ्जनावग्रहो भविष्यतिः अतः किमसंबद्धम् ?, इत्याह– ' गहणं मणो न गिज्झं ति ' चिन्ताद्रव्यरूपं मनो न ग्राह्यम्, किन्तु ग्रहणं गृह्यतेऽवगम्यते शब्दादिरर्थोऽनेनेति ग्रहणम्– अर्थपरिच्छेदे करणमित्यर्थः । ग्राह्यं तु मेरुशिखरादिकं मनसः सुप्रतीतमेव । अतः को भागः कोऽवसरस्तस्य करणभूतस्य मनोद्रव्यराशेर्व्यञ्जने व्यञ्जनावग्रहेऽधिकृते ?, न कोऽपीत्यर्थः । ग्राह्यवस्तुग्रहणे हि व्यञ्जनावग्रहो भवति । न च मनोद्रव्याणि ग्राह्यरूपतया गृह्यन्ते, किन्तु करणरूपतया, इत्यसंबद्धमेव परोक्तम् ॥ इति गाथार्थः ॥ २४० ॥

या च ' देहाऽणिग्गयस्स वि सकायहिययाइयं ' इत्यादिना मनसः प्राप्यकारिता प्रोक्ता, साऽपि न युक्ता, स्वकायहृदयादिको हि मनसः स्वदेश एव, यच्च यस्मिन् देशेऽवतिष्ठते, तत् तेन संबद्धमेव भवति, कस्तत्र विवादः ?, किं हि नाम तद् वस्त्वस्ति, यदात्मदेशेनाऽसंबद्धम् ? । एवं हि प्राप्यकारितायामिष्यमाणायां सर्वमपि ज्ञानं प्राप्यकार्येव, सर्वस्याऽपि तस्य जीवेन संबद्धत्वात् । तस्मात

१ देहादनिर्गतस्याऽपि स्वकायहृदयादिकं विचिन्तयतः । ज्ञेयस्याऽपि संबन्धे व्यञ्जनमेवमपि तस्य युक्तम् ॥ २३९ ॥ २ गाथा २३७ ।

३ ग्राह्यस्य व्यञ्जनानां यद् ग्रहणं व्यञ्जनावग्रहः स मतः । ग्रहणं मनः, न ग्राह्यं को भागो व्यञ्जने तस्य ?॥२४०॥ ४ घ.छ.'क्षवि'। ५ क. ग. ज. 'परेणोक्त'। ६गाथा२३

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पारिशेष्याद् बाह्यार्थापेक्षयैव प्राप्यकारित्वा-ऽप्राप्यकारित्वचिन्ता युक्ता। स च मनसाऽप्राप्त एव गृह्यते, इति न तत्र व्यभिचारः। भवतु वा मनसः स्वकीयहृदयादिचिन्तायां प्राप्यकारिता, तथापि न तस्य व्यञ्जनावग्रहसंभव इति दर्शयन्नाह–

तद्देसचिन्तणे होज्ज वंजणं जइ तओ न समयम्मि। पढमे चेव तमत्थं गेण्हेज्ज न वंजणं तम्हा ॥२४१॥

स चासौ स्वकायहृदयादिदेशश्च तस्य चिन्तनं तस्मिन् सति स्याद् मनसो व्यञ्जनं व्यञ्जनावग्रहः। यदि किम्?, इत्याह– 'जइ तओ न समयम्मि पढमे चेव तमत्थं गेण्हेज्ज त्ति' यदि तद् मनः प्रथम एव समये तं स्वकीयहृदयादिकमर्थं न गृह्णीयाद् नावगच्छेदिति। एतच्च नास्ति, यस्माद् मनसः प्रथमसमय एवार्थाऽवग्रहः समुत्पद्यते, न तु श्रोत्रादीन्द्रियस्येव प्रथमं व्यञ्जनावग्रहः, तस्य हि क्षयोपशमापाटवेन प्रथममर्थानुपलब्धिकालसंभवाद् युक्तो व्यञ्जनावग्रहः, मनसस्तु पटुक्षयोपशमत्वाच्चक्षुरिन्द्रियस्येवाऽर्थानुपलम्भकालस्यासंभवेन प्रथममेवाऽर्थावग्रह एवोपजायते। अत्र प्रयोगः– इह यस्य ज्ञेयसंबन्धे सत्यप्यनुपलब्धिकालो नास्ति न तस्य व्यञ्जनावग्रहो दृष्टः, यथा चक्षुषः, नास्ति चार्थसंबन्धे सत्यनुपलब्धिकालो मनसः, तस्माद् न तस्य व्यञ्जनावग्रहः; यत्र त्वयमभ्युपगम्यते न तस्य ज्ञेयसबन्धे सत्यनुपलब्धिकालासंभवः, यथा श्रोत्रस्येति व्यतिरेकः। तदेवं परोक्तपक्षद्वयेऽपि मनसो व्यञ्जनावग्रहं निराकृत्योपसंहरति– 'न वंजणं तम्ह त्ति' तस्मादुक्तप्रकारेण मनसो न व्यञ्जनावग्रहसंभवः॥ इति गाथार्थः॥ २४१॥

कस्माद् न मनसो व्यञ्जनावग्रह इत्याशङ्क्याऽत्रार्थे विशेषवतीमुपपत्तिमाह–

समए[1] समए गिण्हइ दव्वाइं जेण मुणइ य तमत्थं। जं चिंदिओपओगे वि वंजणावग्गहेऽतीते[2] ॥२४२॥

होइ मणोवावारो पढमाओ चेव तेण समयाओ। होइ तदत्थग्गहणं तदण्णहा[3] न प्पवत्तेज्जा[4] ॥ २४३ ॥

'समए समए त्ति' प्रतिसमयमित्यर्थः, इदमुक्तं भवति– मनोद्रव्यग्रहणशक्तिसंपन्नो जीवः कस्यचिदर्थस्य चिन्तावसरे प्रतिसमयं मनोद्रव्याणि गृह्णाति, तं च चिन्तनीयमर्थं प्रतिसमयं 'मुणइ त्ति' जानाति येन कारणेन, तेन प्रथमसमयादेव भवति तस्य चिन्तनीयार्थस्य ग्रहणमिति द्वितीयगाथायां संबन्धः, प्रथमसमयादेवाऽर्थावबोधः प्रवर्तत इत्यर्थः, अर्थानुपलब्धिकालस्त्वेकोऽपि समयो

१ तद्देशचिन्तने भवेद् व्यञ्जनं यदि ततो न समये। प्रथम एव तमर्थं गृह्णीयाद् न व्यञ्जनं तस्मात्॥ २४१॥

२ समये समये गृह्णाति द्रव्याणि येन जानाति च तदर्थम्। यच्चिन्द्रियोपयोगेऽपि व्यञ्जनावग्रहेऽतीते॥ २४२॥
भवति मनोव्यापारः प्रथमादेव तेन समयात्। भवति तदर्थग्रहणं तदन्यथा न प्रवर्तेत॥ २४३॥

नास्ति, अतो न मनसो व्यञ्जनावग्रहसंभव इति भावः॥ आह– नन्वपवरकादिव्यवस्थितो यदेन्द्रियव्यापाररहितः केवलेन मनसाऽर्थान् पर्यालोचयति, तदा मा भूद् मनसो व्यञ्जनावग्रहः, यस्तु श्रोत्रादीन्द्रियव्यापारे मनसोऽपि व्यापारस्तत्र प्रथममनुपलब्धिकालस्य भवद्भिरपीष्यमाणत्वात् किमिति व्यञ्जनाद् मनसो व्यञ्जनावग्रहो नेष्यते?, इत्याशङ्क्याह– 'जं चिंदिओवओगे वि वंजणावग्गहेऽतीते होइ मणोवावारो त्ति' यच्च यस्माच्च कारणादिन्द्रियस्य श्रोत्रादेरुपयोगेऽपि शब्दाद्यर्थग्रहणकालेऽपीत्यर्थः। किम्?, इत्याह– व्यञ्जनावग्रहेऽतीते सति मनसो व्यापारो भवति। इदमुक्तं भवति– न केवलं मनसः केवलावस्थायां प्रथममर्थावग्रह एव व्यापारः, किन्तु श्रोत्रादीन्द्रियोपयोगकालेऽपि तथैव, तथाहि– श्रोत्रादीन्द्रियोपयोगकाले व्याप्रियते मनः, केवलमर्थावग्रहादेवाऽऽरभ्य, न तु व्यञ्जनावग्रहकाले। अर्थाऽनवबोधस्वरूपो हि व्यञ्जनावग्रहः, तदवबोधकारणमात्रत्वात् तस्य, मनस्त्वर्थावबोधरूपमेव, मनुतेऽर्थान्, मन्यन्तेऽर्था अनेनेति वा मन इति सान्वर्थाभिधानाभिधेयत्वात्। किञ्च, यदि व्यञ्जनावग्रहकाले मनसो व्यापारः स्यात् तदा तस्याऽपि व्यञ्जनावग्रहसञ्ज्ञावादष्टाविंशतिभेदभिन्नता मतेर्विंशीर्येत। तस्मात् प्रथमसमयादेव तस्याऽर्थग्रहणमेष्टव्यम्। अन्यथा किमत्र बाधकम्?, इत्याह– 'तदण्णहा न प्पवत्तेज्ज त्ति' यदि हि प्रथमसमयादेव मनसोऽर्थग्रहणं नेष्यते तदा तस्य मनस्त्वेन प्रवृत्तिरेव न स्यादनुत्पत्तिरेव स्यादित्यर्थः। यथा हि स्वाभिधेयानर्थान् भाषमाणैव भाषा भवति, नान्यथा; यथा च स्वविषयभूतानर्थानवबुध्यमानान्येवाऽवध्यादिज्ञानान्यात्मलाभं लभन्ते, अन्यथा तेषामप्रवृत्तिरेव स्यादिति; एवं स्वविषयभूतानर्थान् प्रथमसमयादारभ्य मन्वानमेव मनो भवति, अन्यथाऽवध्यादिवत् तस्य प्रवृत्तिरेव न स्यात्। तस्मात् तस्याऽनुपलब्धिकालो नास्ति, तथा च न व्यञ्जनावग्रह इति स्थितम्। न चैतत् स्वमनीषिकया युक्तिमात्रमुच्यते, आगमेऽपि व्यञ्जनावग्रहेऽतीत एवेन्द्रियोपयोगे मनसो व्यापाराभिधानात्, तथा चोक्तं कल्पभाष्ये–

"अत्थाणंतरचारी चित्तं निययं तिकालविसयं ति। अत्थे उ पडुप्पण्णे विणिओगं इंदियं लहइ"॥ १॥

अत्र व्याख्या– अर्थे शब्दादौ श्रोत्रादीन्द्रियव्यञ्जनावग्रहेण गृहीतेऽनन्तरमर्थावग्रहादारभ्य चरति प्रवर्तते, इत्यर्थानन्तरचारि मनः, न तु व्यञ्जनावग्रहकाले तस्य प्रवृत्तिरिति भावः, त्रिकालविषयं चित्तं, सांप्रतकालविषयं त्विन्द्रियम्। इत्यलं विस्तरेण॥ इति गाथार्थः॥ २४२॥ २४३॥

अमुमेव मनसोऽनुपलब्धिकालासंभवं सयुक्तिकं भावयन्नाह–

१ क. ग. 'ति म'। २ क. ग. 'ऽर्थावग्रहो ने'। ३ क. ग. 'स्माच्च त'। ४ क. ग. 'लोऽस्ति'।

५ अर्थानन्तरचारि चित्तं नियतं त्रिकालविषयमिति। अर्थे तु प्रत्युत्पन्ने विनियोगमिन्द्रियं लभते॥ १॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

नेयाउ च्चिय जं सो लहइ सरूवं पईव-सद्द व्व । तेणाजुत्तं तस्सासंकप्पियव्वंजणग्गहणं ॥२४४॥

प्रतिसमयं मनोद्रव्योपादानं ज्ञेयार्थावगमश्च मनसो भवत्येव, न पुनस्तस्यानुपलब्धिकालः संभवति । कुतः ?, इत्याह– यद् यस्मात् कारणात् 'सो' इति प्राकृतशैल्या नपुंसकमपि मनः संबध्यते, ज्ञायत इति ज्ञेयं चिन्तनीयं वस्तु तस्मादेव, स्वरूपमात्मसत्तास्वभावं लभते, नाऽन्यतः । ततो यदि तदेव ज्ञेयं नावगच्छेत्, तर्हि तस्मादुत्पत्तिरप्यस्य कथं स्यात् ? । इदमुक्तं भवति– सान्वर्थक्रियावाचकशब्दाभिधेया हि मनःप्रभृतयः, तद्यथा–मनुते मन्यते वा मनः, प्रदीपयतीति प्रदीपः, शब्दयति भाषत इति शब्दः, दहतीति दहनः, तपतीति तपनः । एतानि च विशिष्टक्रियाकर्तृत्वप्रधानानि मनःप्रभृतिवस्तूनि यदि तामेवाऽर्थमनन-प्रदीपन-भाषणादिकामर्थक्रियां न कुर्युः, तदा तेषां स्वरूपहानिरेव स्यात् । तस्माद् यथा प्रदीपनीय-शब्दनीयवस्त्वपेक्षया प्रदीप-शब्दाभिधानप्रवृत्तेः प्रदीप-शब्दयोरर्थयोरप्रदीपनमशब्दनं चायुक्तम्; तथा मनसोऽपि मननीयवस्तुमननादेव मनोऽभिधानप्रवृत्तेस्तदमननं न युक्तम् । ततः किम् ?, इत्याह–येनैवम्, तेनाऽसंकल्पितान्यनालोचितानि, अनवगतानीति यावत्, असंकल्पितानि च तानि शब्दादिविषयभावेन परिणतद्रव्यरूपाणि व्यञ्जनानि च तेषां ग्रहणमसंकल्पितव्यञ्जनग्रहणं तस्य मनसोऽयुक्तम्, किन्तु संकल्पितानामेवाऽर्थावग्रहद्वारेणाऽवगतानामेव तेषां शब्दादिद्रव्याणां ग्रहणं युक्तम् । तस्माद् न मनसोऽनुपलब्धिकालोऽस्ति, तथा च न व्यञ्जनावग्रहसंभव इति स्थितम् ॥ इति गाथार्थः ॥ २४४ ॥

तदेवं नयन-मनसोर्विस्तरेणाऽप्राप्यकारितायां साधितायां नयनपक्षेऽद्यापि दूषणशेषमुत्पश्यन् परः प्राह–

जइ नयणिन्दियमपत्तकारि सव्वं न गिण्हए कम्हा ? । गहणा-गहणं किंकयमपत्तविसयत्तसामन्ने? ॥२४५॥

यद्युक्तयुक्तिभ्यो नयनेन्द्रियमप्राप्तकारि, तर्हि सर्वमपि त्रिभुवनान्तर्वर्तिवस्तुनिकुरम्बं कस्माद् न गृह्णाति, अप्राप्तत्वाविशेषात् ? । एतदेव व्यक्तीकरोति– अप्राप्तो विषयो यस्य तदप्राप्तविषयं तद्भावोऽप्राप्तविषयत्वं तस्मिन् सामान्येऽविशिष्टेऽपि सति यदिदं कस्यचिदर्थस्य ग्रहणं, कस्यचिदग्रहणं, तत् किंकृतं किंनिबन्धनम् ?, नेह किञ्चिद् निबन्धनमुत्पश्याम इति भावः ॥ इति गाथार्थः ॥ २४५ ॥

तस्माद् भो आचार्य ! तस्य चक्षुषो विषयपरिमाणाऽनैयत्यमाप्नोति, इत्येतदेवाह–

विसयपरिमाणमनियमपत्तविसयं ति तस्स मणसो व्व । मणसो वि विसयनियमो न क्कमइ जओ स सव्वत्थ ॥२४६॥

(×मप्प) +(यँ)

१ ज्ञेयादेव यत् तल्लभते स्वरूपं प्रदीप-शब्दाविव । तेनाऽयुक्तं तस्याऽसंकल्पितव्यञ्जनग्रहणम् ॥ २४४ ॥ २ ध. छ. ज. 'णं म' ।

३ यदि नयनेन्द्रियमप्राप्तकारि, सर्वं न गृह्णाति कस्मात् ? । ग्रहणा-ऽग्रहणं किंकृतमप्राप्तविषयत्वसामान्ये ?॥ २४५ ॥

४ विषयपरिमाणमनियतमप्राप्तविषयमिति तस्य मनस इव । मनसोऽपि विषयनियमो न क्रामति यतः स सर्वत्र ॥ २४६ ॥

१९

विषयस्य ग्राह्यस्य परिमाणमनियतमपरिमितं प्राप्नोति तस्य चक्षुष इति प्रतिज्ञा । हेतुमाह– अप्राप्तविषयमिति कृत्वा । मनस इवेति दृष्टान्तः । प्रयोगः– यदप्राप्तमपि विषयं परिच्छिनत्ति, न तस्य तत्परिमाणं युक्तं, यथा मनसः, अप्राप्तं च विषयमवगच्छति चक्षुः, तस्माद् न तस्य तत्परिमाणं युक्तमिति । अथेह प्रयोगे दृष्टान्तस्य साध्यवैकल्यं सूरिरुपदर्शयति- मनसो दृष्टान्तीकृतस्याऽप्राप्यकारिणो विषयनियमो 'अस्त्येव' इति शेषः । कुतः ?, इत्याह– यतः 'स त्ति' तदपि मनः सर्वेष्वप्यर्थेषु न क्रामति न प्रसरति ॥ इति गाथार्थः ॥ २४६ ॥

तथाहि—

अत्थग्गहणेसु मुज्झइ सन्तेसु वि केवलाइगम्मेसु । तं किंकयमग्गहणं अपत्तकारित्तसामन्ने ? ॥ २४७ ॥

अर्था एव मतेर्दुष्प्रवेशत्वाद् गहनानि अर्थगहनानि तेष्वनन्तेषु सत्स्वपि विद्यमानेष्वपि । कथंभूतेषु ? इत्याह– केवलं केवलज्ञानमादिर्येषामवधिज्ञाना-ऽऽगमादीनां तानि केवलादीनि तैर्गम्यन्ते ज्ञायन्ते केवलादिगम्यानि तेषु । एवंभूतेष्वर्थगहनेषु सत्स्वपि कस्यचिद् मन्दमतेर्जन्तोर्मनो मुह्यति कुण्ठीभवति तदवगमाय न प्रभवति– तान् गहनभूतान् केवलादिगम्यान् सतोऽप्यर्थान् न गृह्णातीति तात्पर्यम् । तदत्राहमपि भवन्तं पृच्छामि– तदेतद् मनसोऽग्रहणमर्थानां किंकृतं किंनिबन्धनम् ?, अप्राप्तकारित्वसामान्येऽप्राप्तकारित्वे तुल्येऽपीत्यर्थः । तस्माद् मनसोऽपि विषयपरिमाणसद्भावादनन्तरगाथोक्तः साध्यविकलो दृष्टान्त इति स्थितम् ॥ इति गाथार्थः ॥२४७॥

तत् किंकृतमग्रहणमर्थानाम् ?, इत्यत्र पराभिप्रायमाशङ्कमानः प्राह–

कम्मोदयओ व्व सहावओ व्व नणु लोयणे वि तं तुल्लं । तुल्लो व उवालंभो एसो संपत्तविसए वि ॥२४८॥

यत् केषांचिदर्थानां मनसोऽग्रहणं तत् 'तदावरणकर्मोदयाद् वा, स्वभावाद् वा' इति परो ब्रूयात् । नन्वेतल्लोचनेऽपि तुल्यम्, यतस्तदप्यप्राप्यकारित्वे तुल्येऽपि कर्मोदयात्, तत्स्वाभाव्याद् वा कांश्चिदेवाऽर्थान् गृह्णाति न सर्वानिति । तदेवं नयनस्याऽप्राप्यकारित्वेऽतिप्रसङ्गलक्षणं प्राप्तकारिवादिना यद् दूषणमुक्तं तत्परिहृतम् । अथवा यो नयन-मनसोः प्राप्यकारित्वमभ्युपगच्छति, तस्याऽप्येतद् दूषणमापतत्येव, यच्च द्वयोर्दूषणं न तदेकस्य दातुमुचितम्, इत्येतच्चेतसि निधाय प्राह– 'तुल्लो वेत्यादि' वेत्यथवा, एषोऽतिप्रसङ्गलक्षण उपालम्भस्तुल्यः समानः । क्व ?, इत्याह– संप्राप्तविषयत्वेऽपि नयन-मनसोरभ्युपगम्यमाने, तथाहि– अत्रापि शक्यते वक्तुम्– यदि

१ ध. ज. 'सोऽपि द' । २ अर्थगहनेषु मुह्यति सत्स्वपि केवलादिगम्येषु । तत् किंकृतमग्रहणमप्राप्तकारित्वसामान्ये ? ॥ २४७ ॥

३ कर्मोदयतो वा स्वभावतो वा लोचनेऽपि ननु तत् तुल्यम् । तुल्यो वोपालम्भ एष संप्राप्तविषयेऽपि ॥ २४८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राप्तमर्थं गृह्णाति चक्षुः, तर्हि अतिसंप्राप्तानप्यञ्जन-रजो-मल-शलाकादीन् कस्माद् न गृह्णाति ?। मनोऽपि प्राप्तान् सर्वानपि किमिति न गृह्णाति ?। गृह्णात्येवेति चेत्। न, ग्रहणाऽनवस्थानप्रसङ्गात्– यावद्धि घटं गृह्णाति, तावत् पटं, शङ्खं, शुक्तिकादीन् वा किमिति न गृह्णातीति ?। घटप्राप्तिकाले पटादयो न प्राप्ता एवेति चेत्। न, तदप्राप्तौ हेत्वभावात्, तथाहि–न तावत् कैट-कुड्यादयस्तेषामावारकाः, तैरन्तरितानामपि मेर्वादीनां मनसा परिच्छेदानुभवात्। कर्मोदयात्, स्वभावाद् वा प्रतिनियतमेव मनः प्राप्नोतीति चेत्। नन्वेतद्-प्राप्यकारिणो नयनस्यापि समानम् ॥ इति गाथार्थः ॥ २४८ ॥

तस्मात् किमिह स्थितम् ?, इत्याह–

सामत्थाभावाओ मणो व्व विसयपरओ न गिण्हेइ । कम्मक्खओवसमओ साणुग्गहओ य सामत्थं॥२४९॥

चक्षुः सिद्धान्तनिर्दिष्टनियतविषयपरिमाणात् परतो न गृह्णातीति प्रतिज्ञा, चक्षुषश्चेह कर्तृत्वं प्रक्रमाद् गम्यते, सामर्थ्याभावा-दिति हेतुः, मनोवदिति दृष्टान्तः। सामर्थ्याभावोऽपि नयनस्य कुतः ?, इत्याह– 'कम्मक्खओ इत्यादि' तदावरणकर्मक्षयोपशमात्, स्वा-नुग्रहतश्चाऽप्राप्तेष्वपि केषुचिद् योग्यदेशावस्थितेष्वर्थेषु परिच्छेदे कर्तव्ये लोचनस्य सामर्थ्यं भवति। इदमुक्तं भवति– अप्राप्तत्वे समाने-ऽपि येष्वर्थेषु ग्रहणविषये कर्मक्षयोपशमो भवति, तथा, स्वस्याऽऽत्मनो रूपा-ऽऽलोक-मनस्कारादिसामग्र्याः सकाशादनुग्रहो भवति, तेष्व-र्थेषु कर्मक्षयोपशमसद्भावात्, शेषसामग्र्यनुग्रहाच्च चक्षुषो ग्रहणसामर्थ्यं भवति। येषु त्वर्थेषु ग्रहणविषये कर्मक्षयोपशमः, शेषसामग्र्यनु-ग्रहश्च नास्ति, तेषु तस्य सामर्थ्याभाव इत्यर्थापत्तित एव गम्यते। तस्माद् व्यवस्थितमप्राप्यकारित्वं नयन-मनसोः। ततश्च स्पर्शन-रसन-घ्राण-श्रोत्रभेदाच्चतुर्विध एव व्यञ्जनावग्रह इति स्थितम् ॥ इति गाथार्थः ॥ २४९ ॥

तदेवं 'नयण-मणोवज्जिंदियभेयाओ वंजणोग्गहो चउहा ' इत्येतत् समर्थितम्। अथ प्रकृतमुच्यते–

' तेत्थोग्गहो दुरूवो गहणं जं होइ वंजण-त्थाणं। वंजणओ य जमत्थो तेणाईए तयं वोच्छं ' ॥ १ ॥

इत्यादिना ग्रन्थेन प्रतिज्ञातव्यञ्जनावग्रहस्वरूपप्रतिपादनं चेह प्रकृतम्। तस्य च व्यञ्जनावग्रहस्य स्वरूपं नन्द्यध्ययनागमसूत्रे प्रतिबोधक-मल्लकोदाहरणाभ्यां प्रतिपादितम्, तद्यथा–

---

१ क. ग. 'हणेऽन'। २ घ. छ. ज. 'घट'। ३ सामर्थ्याभावाद् मन इव विषयपरतो न गृह्णाति। कर्मक्षयोपशमतः सानुग्रहतश्च सामर्थ्यम् ॥ २४९ ॥
४ गाथा २०४। ५ गाथा १९३। ६ क. ग. घ. छ. ज. 'दुभेओ ग' ७ क. ग. घ. छ. ज. 'होज्ज वं'।

" वंजणोग्गहस्स परूवणं करिस्सामि पडिबोहगदिट्ठंतेणं, मल्लगदिट्ठंतेण य। से किं तं पडिबोहगदिट्ठंतेणं ?। पडिबोहगदिट्ठंतेणं से– जहानामए केइ पुरिसे कंचि पुरिसं सुत्तं पडिबोहेज्जा-अमुग ! अमुग ! त्ति। तत्थ य चोयए पण्णवगं एवं वयासी– किं एगसमयपविट्ठा पोग्गला गहणमागच्छंति, जाव संखेज्ज-असंखेज्जसमयपविट्ठा पोग्गला गहणमागच्छंति ?। एवं वयंतं चोयगं पन्नवए एवं वयासी– नो एगसमयपविट्ठा पोग्गला गहणमागच्छंति, जाव नो संखेज्जसमयपविट्ठा पोग्गणा गहणमागच्छंति, असंखेज्जसमयपविट्ठा पोग्गला गहणमागच्छंति, सेत्तं पडिबोहगदिट्ठंतेणं। से किं तं मल्लगदिट्ठंतेणं ?। मल्लगदिट्ठंतेणं से– जहानामए केइ पुरिसे आवागसीसाओ मल्लगं गहाय तत्थेगं उदगबिंदुं पक्खिवेज्जा, से नट्ठे। अन्ने वि पक्खित्ते, से वि नट्ठे। अन्ने वि पक्खित्ते, से वि नट्ठे। एवं पक्खिप्पमाणेसु पक्खिप्पमाणेसु होही से उदगबिंदू जे णं तं मल्लगं रावेहिति। होही से उदगबिंदू जे णं तंसि मल्लगंसि ठाहिति। होही से उदगबिंदू जे णं तं मल्लगं भरेहिति। होही से उदगबिन्दू जे णं तंसि मल्लगंसि न ठाहिहिति। होही से उदगबिंदू जे णं तं मल्लगं पवाहेहिति। एवामेव पक्खिप्पमाणेहिं अणंतेहिं पोग्गलेहिं जाहे तं वंजणं पूरियं होइ, ताहे हुं ति करेइ, नो चेव णं जाणइ के वेस सद्दाइ " इत्यादि।

इदं सूत्रं नन्दिविवरण एवेत्थं व्याख्यातम्, तद्यथा– ×(नन्दिवृत्ति-पृ. ६७)

" प्रतिबोधक-मल्लकदृष्टान्ताभ्यां व्यञ्जनावग्रहस्य प्ररूपणं करिष्यामि। तत्र प्रतिबोधयतीति प्रतिबोधकः स एव दृष्टान्तस्तेन, तद्यथा नाम कश्चिदनिर्दिष्टस्वरूपः पुरुषः कञ्चिदन्यमनिर्दिष्टस्वरूपमेव पुरुषं सुप्तं सन्तं प्रतिबोधयेत्। कथम् ?, इत्याह– अमुक ! अमुक ! इति। तत्र प्रेरकः प्रज्ञा-पकमेवमवादीत्– किमेकसमयप्रविष्टा इत्यादि। एवं वदन्तं प्रेरकं प्रज्ञापक एवमुक्तवान्– नो एकसमयप्रविष्टा इत्यादि, प्रकटार्थं, यावद् नोसंख्ये-यसमयप्रविष्टाः पुद्गला ग्रहणमागच्छन्ति। नवरमयं प्रतिषेधः शब्दविज्ञानग्राह्यतामधिकृत्य वेदितव्यः, शब्दविज्ञानजनकत्वेनेत्यर्थः, अन्यथा संबन्धमा-त्रमधिकृत्य प्रथमसमयादारभ्य पुद्गला ग्रहणमागच्छन्त्येव। ' असंखेज्ज इत्यादि ' प्रतिसमयप्रवेशेनाऽऽदित आरभ्याऽसंख्येयसमयैः प्रविष्टा असंख्येय-

---

१ व्यञ्जनावग्रहस्य प्ररूपणां करिष्यामि प्रतिबोधकदृष्टान्तेन, मल्लकदृष्टान्तेन च। अथ केयं प्रतिबोधकदृष्टान्तेन ?। प्रतिबोधकदृष्टान्तेन सा– यथानामा कश्चित् पुरुषः कञ्चित् पुरुषं सुप्तं प्रतिबोधयेत्– अमुक ! अमुक ! इति। तत्र च चोदकः प्रज्ञापकमेवमवादीत्– किमेकसमयप्रविष्टाः पुद्गला ग्रहणमागच्छन्ति, यावत्संख्येया-ऽसंख्येयसमयप्रविष्टाः पुद्गला ग्रहणमागच्छन्ति ?। एवं वदन्तं चोदकं प्रज्ञापक एवमवादीत्– नो एकसमयप्रविष्टाः पुद्गला ग्रहणमागच्छन्ति यावद् नो संख्येयसमयप्रविष्टाः पुद्गला ग्रहणमागच्छन्ति, असंख्येयसमयप्रविष्टाः पुद्गला ग्रहणमागच्छन्ति, सेयं प्रतिबोधकदृष्टान्तेन। अथ केयं मल्लकदृष्टान्तेन ?। मल्लकदृष्टान्तेन सा– यथानामा कश्चित् पुरुष आपाकशिरसो मल्लकं गृहीत्वा तत्रैकमुदकबिन्दुं प्रक्षिपेत्, स नष्टः। अन्योऽपि प्रक्षिप्तः, सोऽपि नष्टः। अन्योऽपि प्रक्षिप्तः सोऽपि नष्टः। एवं प्रक्षिप्यमाणेषु प्रक्षिप्यमाणेषु भविष्यति स उदकबिन्दुर्यस्तं मल्लकमार्द्रतां नेष्यति। भविष्यति स उदकबिन्दुर्यस्तस्मिन् मल्लके स्थास्यति। भविष्यति स उदक-बिन्दुर्यस्तं मल्लकं भरिष्यति। भविष्यति स उदकबिन्दुर्यस्तस्मिन् मल्लके न स्थास्यति। भविष्यति स उदकबिन्दुर्यस्तं मल्लकं प्लावयिष्यति। एवमेव प्रक्षिप्यमाणै-रनन्तैः पुद्गलैर्यदा तद् व्यञ्जनं पूरितं भवति तदा 'हुं' इति करोति, नो चेव जानाति क एष शब्दादिः ?॥ २ देश्योऽयं शब्द आर्द्रीकरणार्थे। ३ क. ग. 'वं सम'।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समयप्राविष्टाः पुद्गलाः शब्दद्रव्यविशेषा ग्रहणमागच्छन्ति– अर्थावग्रहज्ञानहेतवो भवन्तीति भावः । इह च चरमसमयप्राविष्टा एव विज्ञानजनकत्वेन ग्रहणमागच्छन्ति, तदन्ये त्विन्द्रियक्षयोपशमोपकारिण इति सर्वेषां सामान्येन ग्रहणमुक्तम् । सेयं प्रतिबोधकदृष्टान्तेन ' व्यञ्जनावग्रहप्ररूपणा ' इति वाक्यशेषः ॥ अथ केयं मल्लकदृष्टान्तेन प्ररूपणा ?। तद्यथा नाम कश्चित् पुरुष आपाकशिरसो मल्लकं शरावं गृहीत्वा, रूक्षमिदं भवतीत्यस्य ग्रहणम् । तत्र मल्लके एकमुदकबिन्दुं प्रक्षिपेत् स नष्टः, तत्रैव तद्भावपरिणतिमापन्न इत्यर्थः । शेषं सुबोधं यावद् ' जेणं तं मल्लगं ' । ' रावेहिति ' आर्द्रतां नेष्यति । शेषं सुबोधम् । नवरं ' पवाहेहिति ' प्लावयिष्यतीति । एवामेवेत्यादि । अतिबहुत्वात् प्रतिसमयमनन्तैः शब्दपुद्गलैर्यदा तद् व्यञ्जनं पूरितं भवति, तदा 'हुं' इति करोति तमर्थं गृह्णातीत्युक्तं भवति । किंविशिष्टं ?, नाम-जात्यादिकल्पनारहितम् । अत एवाऽऽह– 'नो चेव णं जाणइ के वेस सद्दाइ त्ति' न पुनरेवं जानाति क एष शब्दादिः ? इत्यर्थः । एवं च सति सामयिकत्वादर्थावग्रहस्य, अर्थावग्रहात् पूर्वं सर्वो व्यञ्जनावग्रहः " ॥

तदेवमस्य व्यञ्जनावग्रहस्वरूपप्रतिपादकस्य नन्दिसूत्रस्य शेषं प्रायः सुगममिति मन्यमानो भाष्यकारः "जाहे तं वंजणं पूरियं होइ" इत्येतद् व्याचिख्यासुराह—

तोएण मल्लगं पिव वंजणमापूरियं ति जं भणियं । तं दव्वमिंदियं वा तस्संजोगो व न विरुद्धं ॥ २५०॥

'जं भणियं' यदुक्तं नन्दिसूत्रकारेण । किं तत् ?, इत्याह– व्यञ्जनमापूरितमिति । केन किंवत् ?, इत्याह– तोयेन जलेन मल्लकं शरावं तद्वदिति । तस्मिन् सूत्रकारभणिते व्यञ्जनं द्रव्यं गृह्यते, इन्द्रियं वा, तयोर्वा द्रव्ये-न्द्रिययोः संयोगः संबन्धः, इति सर्वथाऽप्यविरोधः । इदमुक्तं भवति– व्यञ्जनशब्देन शब्दादिविषयपरिणतपुद्गलसमूहरूपं द्रव्यं, श्रोत्रादीन्द्रियं वा, द्रव्ये-न्द्रिययोः संबन्धो वा गृह्यते, न कश्चिद् विरोधः, व्यज्यते प्रकटीक्रियते विवक्षितोऽर्थोऽनेनेति व्यञ्जनमित्यस्या व्युत्पत्तेः सर्वत्र घटनात् ॥ इति गाथार्थः ॥ २५० ॥

केवलं द्रव्यादिषु त्रिष्वपि व्यञ्जनशब्दवाच्येषु प्रत्येकमापूरितत्वे विशेषो द्रष्टव्यः । कः पुनरसौ ?, इत्याह–

दव्वं माणं पूरियमिंदियमापूरियं तहा दोण्हं । अवरोप्परसंसग्गो जया तया गिण्हइ तमत्थं ॥ २५१ ॥

'दव्वं ति' यदा द्रव्यं व्यञ्जनमधिक्रियते तदा "जाहे तं वंजणं पूरियं होइ" इति कोऽर्थः ? इत्याह–'माणं पूरियं ति' मानं तस्य शब्दादिद्रव्यस्य प्रमाणं प्रतिसमयप्रवेशेन प्रभूतीकृतत्वात् स्वप्रमाणमानीतं प्रकर्षमुपनीतं स्वग्राहकज्ञानजनने समर्थीकृतमिति यावत् । यदा

१ यदा तद्व्यञ्जनं पूरितं भवति । २ तोयेन मल्लकमिव व्यञ्जनमापूरितमिति यद् भणितम् । तद् द्रव्यमिन्द्रियं वा तत्संयोगो वा न विरुद्धम् ॥२५०॥

३ ज. 'कदाचिद्' । ४ द्रव्यं मानं पूरितमिन्द्रियमापूरितं तथा द्वयोः । परस्परसंसर्गो यदा तदा गृह्णाति तमर्थम् ॥ २५१ ॥

त्विन्द्रियमितीन्द्रियं व्यञ्जनमधिक्रियते तदा " जाहे तं वंजणं पूरियं होइ " इति किमुक्तं भवति ?, इत्याह–'आपूरियं ति' आपूरितं व्याप्तं भृतं वासितमित्यर्थः । तथा, 'दोण्हं ति' द्वयोः श्रोत्रादीन्द्रिय-शब्दादिपरिणतद्रव्ययोः संबन्धो यदि व्यञ्जनमधिक्रियते तदा "जाहे तं वंजणं पूरियं होइ', इति किमुक्तं भवति ?, इत्याह–'अवरोप्परसंसग्गो त्ति' सम्यक् सर्गो योगः संसर्गः सम्यक् संबन्ध इत्यर्थः, इदमत्र हृदयम्–अस्मिन् पक्षे यदा तयोरिन्द्रिय-द्रव्ययोः परस्परमतीव संयुक्तताऽनुषक्तताऽङ्गाङ्गिभावेन परिणामो भवति, तदा प्रस्तुतसंबन्धलक्षणं व्यञ्जनमापूरितं भवतीत्युच्यत इति । 'जया तया गिण्हइ तमत्थं ति' एवं यदा त्रिविधमपि व्यञ्जनं प्रकारत्रयेणाऽऽपूरितं भवति, तदा तं विवक्षितं शब्दादिकमर्थमव्यक्तं नाम-जात्यादिकल्पनारहितं गृह्णाति । एतच्च "ताहे हुं ति करेइ" इत्यस्य व्याख्यानम् । अर्थावग्रहश्चाऽयमेकसामयिको विज्ञेयः, इतरस्तु पूर्वमन्तर्मुहूर्तं द्रव्यप्रवेशादिरूपो व्यञ्जनावग्रहोऽवसेयः ॥ इति गाथार्थः ॥ २५१ ॥

किंविशिष्टं पुनस्तमर्थं गृह्णाति ?, इत्याशङ्क्य स्वत एव भाष्यकारस्तत्स्वरूपमाह–

सामन्नमणिद्देसं सरूव-नामाइकप्पणारहियं । जइ एवं जं तेणं गहिए सद्दे त्ति तं किह णु ? ॥ २५२ ॥

ग्राह्यवस्तुनः सामान्य-विशेषात्मकत्वे सत्यप्यर्थावग्रहेण सामान्यरूपमेवाऽर्थं गृह्णाति, न विशेषरूपम्, अर्थावग्रहस्यैकसामयिकत्वात्, समयेन च विशेषग्रहणायोगादिति । सामान्यार्थश्च कश्चिद् ग्राम-नगर-वन-सेनादिशब्देन निर्देश्योऽपि भवति, तद्व्यवच्छेदार्थमाह– अनिर्देश्यं केनापि शब्देनाऽनभिलप्यम् । कुतः पुनरेतत् ?, इत्याह– यतः स्वरूप-नामादिकल्पनारहितम्, आदिशब्दाज्जाति-क्रिया-गुण-द्रव्यपरिग्रहः । तत्र रूप-रसाद्यर्थानां य आत्मीयचक्षुरादीन्द्रियगम्यः प्रतिनियतः स्वभावस्तत् स्वरूपम् । रूप-रसादिकस्तु तदभिधायको ध्वनिर्नाम, रूपत्व-रसत्वादिका तु जातिः । प्रीतिकरमिदं रूपं, पुष्टिकारोऽयं रस इत्यादिकस्तु शब्दः क्रियाप्रधानत्वात् क्रिया । कृष्ण-नीलादिकस्तु गुणः । पृथिव्यादिकं पुनर्द्रव्यम् । एषां स्वरूप-नाम-जात्यादीनां कल्पना अन्तर्जल्पारूपितज्ञानरूपा तया रहितमेवाऽर्थमर्थावग्रहेण गृह्णाति यतो जीवः, तस्मादनिर्देश्योऽयमर्थः प्रोक्तः, तत्कल्पनारहितत्वेन स्वरूप-नाम-जात्यादिप्रकारेण केनापि निर्देष्टुमशक्यत्वादिति । एवमुक्ते सति परः प्राह– ' जइ एवमित्यादि ' यदि स्वरूप-नामादिकल्पनारहितोऽर्थोऽर्थावग्रहस्य विषय इत्येवं व्याख्यायते भवद्भिः, तर्हि 'जं ति' यन्नन्द्यध्ययनसूत्रे प्रोक्तं । किम् ?, इत्याह– "तेणं गहिए सद्दे त्ति" उपलक्षणत्वादित्थं संपूर्णं द्रष्टव्यम्– " से जहा नामए केइ पुरिसे अव्वत्तं सद्दं सुणेज्जा, तेणं सद्दे त्ति उग्गहिए, न उण जाणइ के वेस सद्दाइ त्ति । ' तं किह णु त्ति '

१ यदा तद्व्यञ्जनं पूरितं भवति । २ तदा 'हुं' इति करोति ।

३ सामान्यमनिर्देश्यं स्वरूप-नामादिकल्पनारहितम् । यद्येवं यत् 'तेन गृहीतः शब्दः' इति तत् कथं नु ? ॥ २५२ ॥ ४ क.ग. 'सद्दे त्ति' ।

५ तद्यथानामा कश्चित् पुरुषोऽव्यक्तं शब्दं शृणुयात् । तेन शब्द इत्यवगृहीतः, न पुनर्जानाति क एष शब्द इति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदेतत् कथमविरोधेन नीयते ?– युष्मद्व्याख्यानेन सह विरुध्यते एवेदमित्यर्थः, तथाहि– अस्मिन्नन्दिसूत्रेऽयमर्थः प्रतीयते– यथा तैः प्रतिपत्त्राऽर्थावग्रहेण शब्दोऽवगृहीत इति । भवन्तस्तु शब्दाद्युल्लेखरहितं सर्वथाऽमुं प्रतिपादयन्ति, ततः कथं न विरोधः ?, इति भावः इति गाथार्थः ॥ २५२ ॥

अत्रोत्तरमाह–

सद्दे त्ति भणइ वत्ता तम्मत्तं वा न सद्दबुद्धीए । जइ होइ सद्दबुद्धी तोऽवाओ चेव सो होज्जा ॥ २५३ ॥

शब्दस्तेनावगृहीत इति यदुक्तं, तत्र 'शब्दः' इति वक्ता प्रज्ञापकः, सूत्रकारो वा भणति प्रतिपादयति, अथवा तन्मात्रं शब्दमात्रं रूप-रसादिविशेषव्यावृत्त्या-ऽनवधारितत्वाच्छब्दतयाऽनिश्चितं गृह्णातीति । एतावतांशेन शब्दस्तेनावगृहीत इत्युच्यते, न पुनः शब्दबुद्ध्या–'शब्दोऽयं' इत्यध्यवसायेन तच्छब्दवस्तु तेनाऽवगृहीतम्, शब्दोल्लेखस्याऽऽन्तर्मुहूर्तिकत्वात्, अर्थावग्रहस्य त्वेकसामयिकत्वादसंभव एवाऽयमिति भावः । यदि पुनस्तत्र शब्दबुद्धिः स्यात्, तर्हि को दोषः स्यात् ?, इत्याशङ्क्य सूत्रकारः स्वयमेवं दूषणान्तरमाह 'जइत्यादि' यदि पुनरर्थावग्रहे शब्दबुद्धिः शब्दनिश्चयः स्यात्, तदाऽपाय एवाऽसौ स्यात्, न त्वर्थावग्रहः, निश्चयस्याऽपायरूपत्वात् । ततश्चार्थावग्रहे-हाभाव एव स्यात्, न चैतद् दृष्टम्, इष्टं च ॥ इति गाथार्थः ॥ २५३ ॥

अत्राह परः– ननु प्रथमसमय एव रूपादिव्यपोहेन 'शब्दोऽयम्' इति प्रत्ययोऽर्थावग्रहत्वेनाऽभ्युपगम्यताम्, शब्दमात्रत्वे सामान्यत्वात्; उत्तरकालं तु प्रायो भाषुर्यादयः शङ्खशब्दधर्मा इह घटन्ते, न तु शार्ङ्गधर्माः खर-कर्कशत्वादय इति विमर्शबुद्धिरीहा तस्माच्छाङ्ग एवाऽयं शब्द इति तद्विशेषस्त्वपायोऽस्तु । तथा च सति "[2]तेणं सद्दे त्ति उग्गहिए" इदं यथाश्रुतमेव व्याख्यायते । "नो[3]चेणं जाणइ केवेस सद्दाइ, तओ ईहं पविसइ" इत्याद्यपि सर्वमविरोधेन गच्छतीति । तदेतत् परोक्तं सूरिः प्रत्यनुभाष्य दूषयति, तद्यथा

जइ सद्दबुद्धिमेत्तयमवग्गहो तव्विसेसणमवाओ । नणु सद्दो नासद्दो न य रूवाइ विसेसोऽयं ॥ २५४ ॥

भोः पर ! यदि शब्दबुद्धिमात्रं 'शब्दोऽयम्' इति निश्चयज्ञानमपि भवताऽर्थावग्रहोऽभ्युपगम्यते, तद्विशेषणं तु तस्य शब्दस्य विशेषणं विशेषः 'शाङ्ग एवाऽयं शब्दः' इत्यादिविशेषज्ञानमित्यर्थः, अपायो मतिज्ञानतृतीयो भेदोऽङ्गीक्रियते । हन्त ! तर्हि अवग्रहस्य

---

१ शब्द इति भणति वक्ता तन्मात्रं वा, न शब्दबुद्ध्या । यदि भवति शब्दबुद्धिस्ततोऽपाय एव स भवेत् ॥ २५३ ॥

२ तेन शब्द इत्यवगृहीतः । ३ नो चेव जानाति क एष शब्दादिः, तत ईहां प्रविशति ।

४ यदि शब्दबुद्धिमात्रमतग्रहस्तद्विशेषणमवायः । ननु शब्दो नाऽशब्दो न च रूपादि विशेषोऽयम् ॥ २५४ ॥

क्षणस्य तदाद्यभेदस्याऽभावप्रसङ्गः, प्रथमत एवाऽवग्रहमतिक्रम्याऽपायाभ्युपगमात् । कथं पुनः शब्दज्ञानमपायः ?, इति चेत् । उच्यते तस्याऽपि विशेषग्राहकत्वात्, विशेषज्ञानस्य च भवताऽप्यपायत्वेनाऽभ्युपगतत्वात् । ननु 'शाङ्ग एवाऽयं शब्दः' इत्यादिकमेव तदुत्तरकालभावि ज्ञानं विशेषग्राहकं, शब्दज्ञाने तु शब्दसामान्यस्यैव प्रतिभासनात् कथं विशेषप्रतिभासः, येनाऽपायप्रसङ्गः स्यात् ?, इत्याह 'नणु इत्यादि' नन्वित्यक्षमायां, परामन्त्रणे वा, ननु 'शब्दोऽयं नाशब्दः' इति विशेषोऽयं विशेषप्रतिभास एवाऽयमित्यर्थः । कथं पुनर्नाऽशब्द इति निश्चीयते ?, इत्याह– न च रूपादिरिति, चशब्दो हिशब्दार्थे, आदिशब्दाद् गन्ध-रसस्पर्शपरिग्रहः । ततश्चेदमुक्तं भवति यस्माद् न रूपादिरयम्, तेभ्यो व्यावृत्तत्वेन गृहीतत्वात्, अतो 'नाऽशब्दोऽयं' इति निश्चीयते ; यदि तु रूपादिभ्योऽपि व्यावृत्तिर्न गृहीता न स्यात्, तदा 'शब्दोऽयम्' इति निश्चयोऽपि न स्यादिति भावः । तस्मात् 'शब्दोऽयं नाशब्दः' इति विशेषप्रतिभास एवाऽयम् तथा च सत्यस्याऽप्यपायप्रसङ्गतोऽवग्रहाभावप्रसङ्ग इति स्थितम् ॥ इति गाथार्थः ॥ २५४ ॥

अथ परोऽवग्रहा-ऽपाययोर्विषयविभागं दर्शयन्नाह–

थोवमियं नाऽवाओ संखाइविसेसणेमवाओ त्ति । तब्भेयावेक्खाए नणु थोवमियं पि नावाओ ॥ २५५ ॥

इदं शब्दबुद्धिमात्रकं शब्दमात्रस्तोकविशेषावसायित्वात् स्तोकं स्तोकविशेषग्राहकम्, अतोऽपायो न भवति, किन्त्ववग्रह एवेऽयमिति भावः । कः पुनस्तस्यापायः ?, इत्याह– ' संखाइत्यादि ' शाङ्गोऽयं शब्द इत्यादिविशेषणविशिष्टं यज्ज्ञानं तदपायः बृहद्विशेषावसायित्वादिति हृदयम् । हन्त ! यदि यद् यत् स्तोकं तत् तद् नाऽपायः, तर्हि निवृत्ता साम्प्रतमपायज्ञानकथा, उत्तरोत्तरार्थविशेषग्रहणापेक्षया पूर्वपूर्वार्थविशेषावसायस्य स्तोकत्वात् । एतदेवाह– ' तब्भेयेत्यादि ' तस्य शाङ्गशब्दस्य ये उत्तरोत्तरभेदा मन्द्र-मधुरत्वादयः तरुण-मध्यम-वृद्ध-स्त्री-पुरुषसमुत्थत्वादयश्च तदपेक्षायां सत्यामिदमपि 'शाङ्गोऽयं शब्दः' इत्यादि ज्ञानं ननु स्तोकं– स्तोकविशेषग्राहकमेव, इति नाऽपायः स्यात् । एवमुत्तरोत्तरविशेषग्राहिणामपि ज्ञानानां तदुत्तरोत्तरभेदापेक्षया स्तोकत्वादपायत्वाभावो भावनीयः इति गाथार्थः ॥ २५५ ॥

तमेवाऽपायाभावं स्फुटीकुर्वन्नाह–

इय सुबहुणा वि कालेण सव्वभेयाऽवहारणमसज्झं । जम्मि हवेज्ज अवाओ सव्वो च्चिय उग्गहो नाम ॥२५६॥

---

१ स्तोकमिदं नाऽपायः शाङ्गादिविशेषणमपाय इति । तद्भेदाऽपेक्षायां ननु स्तोकमिदमपि नाऽपायः ॥ २५५ ॥ २ ध. ज. 'श्च तदपेक्षया त'

३ इति सुबहुनाऽपि कालेन सर्वभेदाऽवधारणमसाध्यम् । यस्मिन् भवेदपायः सर्व एवाऽवग्रहो नाम ॥ २५६ ॥ (२ ण अ-१)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतिशब्द उपप्रदर्शनार्थः, ततश्चेदमुक्तं भवति– यथा 'शाङ्खोऽयं शब्दः' इत्यस्यां बुद्धौ शब्दगतभेदाऽवधारणं सांप्रतमसाध्यम्, मन्द्र-मधुरत्वादितदुत्तरोत्तरभेदबाहुल्यसंभवात्। तथाच सति स्तोकत्वाद् नेयं बुद्धिरपायः, किन्त्वर्थावग्रह इत्येवं सुबहुनाऽपि कालेन सर्वेणाऽपि पुरुषायुषेण शब्दगतमन्द्र-मधुरत्वाद्युत्तरोत्तरभेदावधारणमसाध्यं तद्भेदानामनन्तत्वादशक्यमित्यर्थः, यस्मिन् भेदावधारणे, किम्?, इत्याह– यस्मिन् अपायो भवेदन्यभेदाकाङ्क्षानिवृत्तेर्यस्मिन् भेदावधारणज्ञानेऽपायत्वं व्यवस्थाप्येतेति भावः। तस्मात् सर्वोऽपि भेदप्रत्यय उत्तरोत्तरापेक्षया त्वदभिप्रायेण स्तोकत्वादर्थावग्रह एव प्राप्नोति, नाऽपायः, शब्दज्ञानवत् ॥ इति गाथार्थः ॥ २५६ ॥

किञ्च, 'शब्द एवायम्' इति ज्ञानं स्तोकत्वाद् यदर्थावग्रहत्वेन भवताऽभिमतम्। तत् पूर्वमीहामन्तरेण न संभवति, तत्पूर्वकत्वे च तस्याऽर्थावग्रहत्वासंभव इति दर्शयन्नाह–

[1]किं सद्दो किमसद्दो त्तणीहिए सद्द एव किह जुत्तं?। अह पुव्वमीहिऊणं सद्दो त्ति मयं, तई पुव्वं ॥२५७॥

'किं शब्दोऽयम्' आहोस्वित् 'अशब्दो रूपादिः' इत्येवं पूर्वमनीहिते यत् 'शब्द एव' इति निश्चयज्ञानम्, तदकस्मादेव जायमानं कथं युक्तम्?, विमर्शपूर्वकत्वमन्तरेण नेदं घटत इत्यर्थः। इदमुक्तं भवति– शब्दगतान्वयधर्मेषु, रूपादिभ्यो व्यावृत्तौ च गृहीतायां 'शब्द एव' इति निश्चयज्ञानं युज्यते, तद्ग्रहणं च विमर्शमन्तरेण नोपपद्यते, विमर्शश्चेहा, तस्मादीहामन्तरेणाऽयुक्तमेव 'शब्द एव' इति निश्चयज्ञानम्। अथ निश्चयकालात् पूर्वमीहित्वा भवतोऽपि 'शब्द एवाऽयम्' इति निश्चयज्ञानमभिमतम्। हन्त! तर्हि निश्चयज्ञानात् पूर्वं 'तई' असावीहा भवद्वचनतोऽपि सिद्धा ॥ इति गाथार्थः ॥ २५७ ॥

यदि नाम निश्चयज्ञानात् पूर्वमीहा सिद्धा, ततः किम्?, इत्याह–

[2]किं तं पुव्वं गहियं जमीहओ सद्द एव विण्णाणं। अह पुव्वं सामण्णं जमीहमाणस्स सद्दो त्ति ॥२५८॥

हन्त! यदि निश्चयज्ञानमीहापूर्वकं त्वयाऽभ्युपगम्यते, तर्हि प्रष्टव्योऽसि–नन्वीहायाः पूर्वं किं तद् वस्तु प्रमात्रा गृहीतम्, यदीहमानस्य तस्य 'शब्द एवाऽयम्' इति निश्चयज्ञानमुपजायते?, न हि कश्चिद् वस्तुन्यगृहीतेऽकस्मात् प्रथमत एवेहां कुरुत इति भावः। क्षुभितस्य परस्योत्तरमदानासामर्थ्यमालोक्य स्वयमेव तन्मतमाशङ्कते– अथ ब्रूयात् परः– सामान्यं नाम-जात्यादिकल्पनारहितं वस्तुमात्र-

---

१ ज. 'पद्'। २ क. 'द् यद्यर्थो'। ३ क.ग.'ततः पू'। ४ किं शब्दः किमशब्द इत्यनीहिते शब्द एव कथं युक्तम्?। अथ पूर्वमीहित्वा शब्द इति मतं, सा पूर्वम् ॥२५७॥
५ किं तत् पूर्वं गृहीतं यदीहमानस्य शब्द एव विज्ञानम्। अथ पूर्वं सामान्यं यदीहमानस्य शब्द इति ॥ २५८ ॥

मीहायाः पूर्वं गृहीतं, यदीहमानस्य 'शब्दः' इति निश्चयज्ञानमुत्पद्यते ॥ इति गाथार्थः ॥ २५८ ॥

अथेहायाः पूर्वं सामान्यग्रहणे परेणेष्यमाणे सूरिः स्वसमीहितसिद्धिमुपदर्शयन्नाह–

[3]अत्थोग्गहओ पुव्वं होयव्वं तस्स गहणकालेणं। पुव्वं च तस्स वंजणकालो सो अत्थपरिसुण्णो ॥ २५९ ॥

[4]नन्वीहायाः पूर्वं यत् सामान्यं गृह्यते, तस्य तावद् ग्रहणकालेन भवितव्यम्। स चाऽस्मदभ्युपगतसामयिकार्थावग्रहकालरूपो न भवति, अस्मदभ्युपगताङ्गीकारप्रसङ्गात्, किं तर्हि?, अस्मदभ्युपगतार्थावग्रहात् पूर्वमेव भवदभिप्रायेण तस्य सामान्यस्य ग्रहणकालेन भवितव्यम्, पूर्वं च तस्याऽस्मदभ्युपगतार्थावग्रहस्य व्यञ्जनकाल एव वर्तते, व्यञ्जनानां शब्दादिद्रव्याणामिन्द्रियमात्रेणाऽऽदानकालो मध्यपदलोपाद् व्यञ्जनकालः। भवत्वेवम्, तथापि तत्र सामान्यार्थग्रहणं भविष्यति, इत्याशङ्क्याह– स च व्यञ्जनकालोऽर्थपरिशून्यः, न हि तत्र सामान्यरूपः, विशेषरूपो वा कश्चनाऽप्यर्थः प्रतिभाति, तदा मनोरहितेन्द्रियमात्रव्यापारात्, तत्र चार्थप्रतिभासाऽयोगात्। तस्मात् पारिशेष्यादस्मदभ्युपगतार्थावग्रह एव सामान्यग्रहणमिति गाथायामनुक्तमपि स्वयमेव द्रष्टव्यम्। तदनन्तरं चाऽन्वय-व्यतिरेकधर्मपर्यालोचनरूपा ईहा, तदनन्तरं च 'शब्द एवाऽयम्' इति निश्चयज्ञानमपायः, इति सर्वं सुस्थं भवति ॥ इति गाथार्थः ॥ २५९ ॥

अथ प्रथममेवाऽर्थावग्रहज्ञानेन शब्दाग्रहणे परः पुनरपि दोषमाह–

[5]जइ सद्दो त्ति न गहियं न उ जाणइ जं क एस सद्दो त्ति। तमजुत्तं सामण्णे गहिए मग्गिज्जइ विसेसो ॥२६०॥

यद्यर्थावबोधसमये प्रथममेव 'शब्दोऽयम्' इत्येवं तद् वस्तु न गृहीतं, तर्हि "[6]नेउणं जाणइ के वेस सद्दे त्ति" जं ति' यत् सूत्रे निर्दिष्टम्, तदयुक्तं प्राप्नोति, यस्माच्छब्दसामान्ये रूपादिव्यावृत्ते गृहीते सति पश्चाद् मृग्यतेऽन्विष्यते विशेषः–'किमयं शब्दः शाङ्खः, उत शार्ङ्गः?' इति। इदमुक्तं भवति– "नेउणं जाणइ के वेस सद्दे त्ति" अस्मिन् नन्दिसूत्रे 'न पुनर्जानाति कोऽप्येष शाङ्ख-शार्ङ्गाद्यन्यतरः शब्दः' इति विशेषस्यैवाऽपरिज्ञानमुक्तम्, शब्दसामान्यमात्रग्रहणं त्वनुज्ञातमेव, तदग्रहणे तु 'क एष शब्दः, किं शाङ्खः, शार्ङ्गो वा? इत्येवं विशेषमार्गणमसंगतमेव स्यात्, विशेषजिज्ञासायाः सामान्यज्ञानपूर्वकत्वात्, शब्दसामान्ये गृहीत एव तद्विशेषमार्गणस्य युज्यमानत्वात् ॥ इति गाथार्थः ॥ २६० ॥

---

१ अर्थावग्रहतः पूर्वं भवितव्यं तस्य ग्रहणकालेन। पूर्वं च तस्य व्यञ्जनकालः सोऽर्थपरिशून्यः ॥ २५९ ॥ २ क.ग.'तस्मादस्म'। ३ ग.'ने श'।
४ यदि शब्द इति न गृहीतं न तु जानाति यत् क एष शब्द इति। तदयुक्तं सामान्ये गृहीते मृग्यते विशेषः ॥२६०॥ ५ न पुनर्जानाति क एष शब्द इति।
६ क.ग.घ.छ.ज.'णं जा'।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत्रोत्तरमाह–

सव्वत्थ[1] पसयंतो सद्दो सद्दो त्ति भासओ भणइ। इहरा न समयमेत्ते सद्दो त्ति विसेसणं जुत्तं ॥ २६१ ॥

सर्वत्र पूर्वस्मिन्, अत्र च सूत्रावयवे, अवग्रहस्वरूपं देशयन् प्ररूपयन् 'शब्दः शब्दः' इति भाषकः प्रज्ञापक एव वदति, न तु तत्र ज्ञाने शब्दप्रतिभासोऽस्ति। इत्थं चैतत्, अन्यथा न समयमात्रेऽर्थावग्रहकाले 'शब्दः' इति विशेषणं युक्तम्, आन्तर्मुहूर्तिकत्वाच्छब्द-निश्चयस्येति प्रागेवोक्तम्। सांव्यवहारिकाऽर्थावग्रहापेक्षं वा सूत्रमिदं व्याख्यास्यते, इति मा त्वरिष्ठाः ॥ इति गाथार्थः ॥ २६१ ॥

अथ सूत्रावष्टम्भवादिनं परं दृष्ट्वा सौत्रमेव परिहारमाह–

अहव[2] सुए च्चिय भणियं जह कोइ सुणेज्ज सद्दमव्वत्तं। अव्वत्तमणिद्देसं सामण्णं कप्पणारहियं ॥ २६२ ॥

अथवा यदि तव गाढः श्रुतावष्टम्भः, तदा तत्राप्येतद् भणितं यदुत-प्रथममव्यक्तस्यैव शब्दोल्लेखरहितस्य शब्दमात्रस्य ग्रहणम्। केन पुनः सूत्रावयवेनेदमुक्तम्?, इत्याह–'जह कोइ सुणेज्ज सद्दमव्वत्तं ति' अयं च सूत्रावयवो नन्ध्यध्ययने इत्थं प्रदृष्टव्यः– "से जहा-नामए केइ पुरिसे अव्वत्तं सद्दं सुणेज्ज त्ति"। अत्राऽव्यक्तमिति कोऽर्थः?, इत्याह– अनिर्देश्यं 'शब्दोऽयं' 'रूपादिर्वा' इत्यादिना प्रकारेणा-ऽव्यक्तमित्यर्थः। ननु यदि शब्दादिरूपेणाऽनिर्देश्यम्, तर्हि किं तत्?, इत्याह– सामान्यम्। किमुक्तं भवति?, इत्याह– नाम-जात्यादि-कल्पनारहितम्। न च वक्तव्यं– शाङ्ग-शार्ङ्गभेदापेक्षया शब्दोल्लेखस्याऽप्यव्यक्तत्वे घटमाने कुत इदं व्याख्यानं लभ्यते? इति; अवग्रहस्याऽनाकारोपयोगरूपतया सूत्रेऽधीतत्वात्, अनाकारोपयोगस्य च सामान्यमात्रविषयत्वात्, प्रथममेवाऽपायप्रसक्त्याऽवग्रहे-हाऽभावप्रसङ्ग इत्याद्युक्तत्वाच्च ॥ इति गाथार्थः ॥ २६२ ॥

अथ सूरिरेव पराभिप्रायमाशिशङ्कयिषुराह–

अह[3] व मई, पुव्वं चिय सो गहिओ वंजणोग्गहे तेणं। जं वंजणोग्गहम्मि वि भणियं विण्णाणमव्वत्तं ॥२६३॥

---

१ सर्वत्र देशयन् शब्दः शब्द इति भाषको भणति। इतरथा न समयमात्रे शब्द इति विशेषणं युक्तम् ॥ २६१ ॥

२ अथवा श्रुत एव भणितं यथा कश्चित् शृणुयाच्छब्दमव्यक्तम्। अव्यक्तमनिर्देश्यं सामान्यं कल्पनारहितम् ॥ २६२ ॥

३ तद्यथानामा कश्चित् पुरुषोऽव्यक्तं शब्दं शृणुयादिति। ४ घ. छ. ज. 'तत्रा'।

५ अथ वा मतिः, पूर्वमेव स गृहीतो व्यञ्जनावग्रहे तेन। यद् व्यञ्जनावग्रहेऽपि भणितं विज्ञानमव्यक्तम् ॥ २६३ ॥

अथ परस्य मतिः स्यात्। केयम्?, इत्याह– सोऽव्यक्तोऽनिर्देश्यादिस्वरूपः शब्दोऽर्थावग्रहात् पूर्वमेव व्यञ्जनावग्रहे तेन श्रोत्रा गृहीतः, तत् किमित्यर्थावग्रहेऽपि तद्ग्रहणमुद्घुष्यते?। कथमिदं पुनर्ज्ञायते यदुत-असौ व्यञ्जनावग्रहे गृहीतः?, इत्याह– 'जमित्यादि' यद् यस्माद् व्यञ्जनावग्रहेऽपि भवद्भिरव्यक्तं विज्ञानमुक्तम्, अव्यक्तविषयग्रहण एव चाव्यक्तत्वं तस्योपपद्यत इतिभावः ॥इति गाथार्थः॥२६३॥

अत्रोत्तरमाह—

अत्थि[4] तयं अव्वत्तं न उ तं गिण्हइ सयं पि सो भणियं। न उ[5] अग्गहियम्मि जुज्जइ सद्दो त्ति विसेसणंबुद्धी॥२६४॥

अस्ति तदव्यक्तं श्रोतुर्व्यञ्जनावग्रहे ज्ञानम्, न तस्याऽस्माभिरपलापः क्रियते, न पुनरसौ श्रोताऽतिसौक्ष्म्यात् तत् स्वय-मपि गृह्णाति संवेदयते। एतच्च प्रागपि भणितम्। 'सुत्त-मत्ताइसुहुमबोहो व्व' इति वचनात्, तथा, 'सुत्तादओ सयं वि य विन्नाणं नाव-बुज्झन्ति" इति वचनाच्च। तस्माद् व्यञ्जनमात्रस्यैव तत्र ग्रहणम्, न शब्दस्य, व्यञ्जनावग्रहत्वान्यथानुपपत्तेरेवेति। न च सामा-न्यरूपतयाऽव्यक्ते शब्देऽगृहीतेऽकस्मादेव 'शब्दः' इति विशेषणबुद्धिर्युज्यते, अनुस्वारस्याऽलाक्षणिकत्वाद् विशेषबुद्धिरित्यर्थः। अस्यां च विशेषबुद्धौ प्रथममेवेष्यमाणायामादावेवाऽर्थावग्रहकालेऽप्यपायप्रसङ्गः, इत्यसकृदेवोक्तम्॥ इति गाथार्थः ॥ २६४ ॥

ननु यदि व्यञ्जनावग्रहेऽप्यव्यक्तशब्दग्रहणं भवेत् तदा को दोषः स्यात्?, इत्याह—

अत्थो[6] त्ति विसयग्गहणं जइ तम्मिवि सो न वंजणं नाम। अत्थोग्गहो च्चिय तओ अविसेसो संकरो वावि ॥२६५॥

अर्थावग्रहे 'अर्थः' इत्यनेन तावद् विषयग्रहणमभिप्रेतं– रूपादिभेदेनाऽनिर्धारितस्याऽव्यक्तस्य शब्दादेर्विषयस्य ग्रहणं तत्राऽभिप्रेतमित्यर्थः। यदि च तस्मिन्नपि व्यञ्जनावग्रहेऽसावव्यक्तशब्दः प्रतिभासत इत्यभ्युपगम्यते, तदा न व्यञ्जनं नाम व्यञ्जनावग्रहो न प्राप्नोतीत्यर्थः। ततश्चेदानीं निवृत्ता तत्कथा, व्यञ्जनमात्रसंबन्धस्यैव तत्रोक्तत्वात्, भवता च तदतिक्रान्तस्याऽव्यक्ता-र्थग्रहणस्येहाभिधीयमानत्वादिति। तर्ह्यव्यक्तार्थग्रहणे किमसौ स्यात्?, इत्याह– अर्थावग्रह एवाऽसौ, अव्यक्तार्थावग्रहणात्, ततश्च नास्ति व्यञ्जनं व्यञ्जनावग्रहः। अथाऽस्याऽपि सूत्रे प्रोक्तत्वादस्तित्वं न परिहियते, तर्हि द्वयोरप्यविशेषः– सोऽप्यर्थावग्रहः, सोऽपि व्यञ्जनावग्रहः प्राप्नोतीति भावः; मेचकमणिप्रभावत् संकरो वा स्यादित्थम् ॥ इति गाथार्थः ॥ २६५ ॥

---

१ अस्ति तदव्यक्तं न तु तद् गृह्णाति स्वयमप्यसौ भणितम्। न स्वगृहीते युज्यते शब्द इति विशेषणबुद्धिः ॥ २६४ ॥ २ घ. छ. ज. 'य अ'।

३ गाथा १९७। ४ अर्थ इति विषयग्रहणं यदि तस्मिन्नप्यसौ न व्यञ्जनं नाम। अर्थावग्रह एव ततोऽविशेषः संकरो वाऽपि ॥ २६५ ॥ ५ घ. छ. ज. 'हे सोऽव्य'।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदेवं व्यञ्जनावग्रहे व्यञ्जनसंबन्धपात्रमेव, अर्थावग्रहे त्वव्यक्तशब्दाद्यर्थग्रहणं, न व्यक्तशब्दाद्यर्थसंवेदनम्, इति प्रतिपादितम् । सांप्रतमुपपत्त्यन्तरेणाऽप्यर्थावग्रहे व्यक्तशब्दाद्यर्थसंवेदनं निराचिकीर्षुराह–

[1]जेणत्थोग्गहकाले गहणे-हा-वायसंभवो नत्थि । तो नत्थि सद्दबुद्धी, अहत्थि नावग्गहो नाम ॥ २६६ ॥

पूर्वं तावदर्थस्य ग्रहणमात्रं, ततश्चेहा, तदनन्तरं त्वपायः, इत्येवं मतिज्ञानस्योत्पत्तिक्रमः । न चैतत्त्रितयं प्रथममेव शब्दार्थेऽवगृहीते समस्तीति । एतदेवाह– येनार्थावग्रहकालेऽर्थग्रहणे-हा-ऽपायानां संभवो नास्ति, ततोऽर्थावग्रहे नास्ति 'शब्दः' इतिविशेषबुद्धिः, अर्थग्रहणे-हा-पूर्वकत्वात् तस्याः । अथाऽस्त्यसौ तत्र, तर्हि नाऽयमर्थावग्रहः, किन्त्वपाय एव स्यात्, नैतद् युज्यते, तदभ्युपगमेऽर्थावग्रहे-हयोरभावप्रसङ्गात् ॥ इति गाथार्थः ॥ २६६ ॥

अपि च, अर्थावग्रहे 'शब्दः' इति विशेषबुद्धाविष्यमाणायां दोषान्तरमप्यस्ति । किं तत् ?, इत्याह–

[3]सामण्ण-तयण्णविसेसेहा-वज्जण-परिग्गहणओ से । अत्थोग्गहेगसमओवओगबाहुल्लमावण्णं ॥ २६७ ॥

इह येयमर्थावग्रहैकसमये 'शब्दः' इति विशेषबुद्धिर्भवताऽभ्युपगम्यते, सा तावद् निश्चयरूपा, निश्चयश्चाकस्मादेव न युज्यते, किन्तु क्रमेण, तथाहि– प्रथमं तावद् रूपादिभ्योऽव्याकृतमव्यक्तं शब्दसामान्यं ग्रहीतव्यम्, ततस्तद्विशेषविषया, तदपररूपादिविशेषविषया च । एतैरेतैश्च धर्मैः 'किमयं शब्दः, आहोस्विद् रूपादिः' इत्येवंरूपेहा, तदनन्तरं च गृहीतशब्दसामान्यविशेषाणां ग्रहणम्, अन्येषां तु रूपादिविशेषाणां तत्राऽविद्यमानानां परिवर्जनम्, इत्येवंभूतेन क्रमेण निश्चयोत्पत्तिः । तथाच सति श्रोतुरर्थावग्रहैकसमयेऽपि सामान्यग्रहणादिभिः प्रकारैरुपयोगबहुत्वमापद्यते, एकस्मिंश्च समये बहव उपयोगाः सिद्धान्ते निषिद्धाः, इति नार्थावग्रहे शब्दादिविशेषबुद्धिः ॥ इति गाथाभावार्थः ॥

अक्षरार्थस्तूच्यते– सामान्यमिह श्रूयमाणशब्दसामान्यं गृह्यते, 'तयण्णविसेसेह त्ति' तच्छब्देनाऽनन्तरोक्तं शब्दसामान्यमनुकृष्यते, अन्यशब्देन तु तत्रा-ऽविद्यमाना रूपादयः परिगृह्यन्ते । ततश्च तच्चाऽन्ये च तदन्ये– शब्दसामान्यं, रूपादयश्चेत्यर्थः; तेषां

---

१ येनाऽर्थावग्रहकाले ग्रहणे-हा-ऽपायसंभवो नास्ति । ततो नास्ति शब्दबुद्धिः, अथास्ति नावग्रहो नाम ॥ २६६ ॥ २ ज 'ब्दाद्यर्थे'।

३ सामान्य-तदन्यविशेषेहा-वर्जन-परिग्रहणतस्तस्य । अर्थावग्रहैकसमयोपयोगबाहुल्यमापन्नम् ॥ २६७ ॥

विशेषा धर्माः श्रोत्रग्राह्यत्वादयः, चक्षुरादिवेद्यत्वादयश्च, तद्विषयेहा तदन्यविशेषेहा, किमत्र श्रोत्रग्राह्यत्वादयो धर्मा उपलभ्यन्ते, आहोस्विच्चक्षुरादिवेद्यत्वादयः ? इत्येवंरूपो विमर्श इत्यर्थः, तदनन्तरं तु वर्जनं च तत्राऽविद्यमानरूपादिगतानां हेयधर्माणां चक्षुर्वेद्यत्वादीनां, परिग्रहणं च तत्र गृहीतशब्दसामान्यगतानामुपादेयधर्माणां श्रोत्रग्राह्यत्वादीनाम्, इति वर्जन-परिग्रहणे त्यागा-ऽऽदाने; सामान्यं च तदन्यविशेषेहा च वर्जन-परिग्रहणे च सामान्य-तदन्यविशेषेहा-वर्जन-परिग्रहणानि तेभ्यस्ततः । 'से' तस्य श्रोतुः । अर्थावग्रहैकसमयेऽप्युपयोगबाहुल्यमापन्नं प्राप्तम् । तथाहि– प्रथमः सामान्यग्रहणोपयोगः, यथोक्तेहोपयोगस्तु द्वितीयः, हेयधर्मवर्जनोपयोगस्तृतीयः, उपादेयधर्मपरिग्रहणोपयोगश्चतुर्थः, इत्येवमर्थावग्रहैकसमयमात्रेऽपि बहव उपयोगाः प्राप्नुवन्ति । न चैतद् युक्तम्, समयविरुद्धत्वात् । तस्माद् नार्थावग्रहे शब्दविशेषबुद्धिः, किन्तु 'सद्दे त्ति भणइ वत्ता' इत्यादि स्थितम् ॥ इति गाथार्थः ॥ २६७ ॥

अथाऽस्मिन्नेवाऽर्थावग्रहेऽपरवाद्यभिप्रायं निराचिकीर्षुराह–

[3]अण्णे सामण्णग्गहणमाहु बालस्स जायमेत्तस्स । समयम्मि चेव परिचियविसयस्स विसेसविन्नाणं ॥ २६८ ॥

अन्ये वादिनः केचिदेवमाहुः– यदेतत्सर्वविशेषविमुखस्याऽव्यक्तस्य सामान्यमात्रस्य वस्तुनो ग्रहणमालोचनं, तद् बालस्य शिशोस्तत्क्षणजातमात्रस्य भवति, नाऽत्र विप्रतिपत्तिः, अव्यक्तो ह्यसौ संकेतादिविकलोऽपरिचितविषयः । यस्तर्हि परिचितविषयः, तस्य किम् ?, इत्याह– समय एवाऽऽद्यशब्दश्रवणसमय एव विशेषविज्ञानं जायते, स्पष्टत्वात् तस्य । ततश्चाऽमुमाश्रित्य "[4]तेण सद्दे त्ति उग्गहिए" इत्यादि यथाश्रुतमेव व्याख्यायते, न कश्चिद् दोष इति भावः ॥ इति गाथार्थः ॥ २६८ ॥

अत्रोत्तरमाह–

[5]तंदवत्थमेव तं पुव्वदोसओ तम्मि चेव वा समये । संख-महुराइसुबहुयविसेसगहणं पसज्जेज्जा ॥ २६९ ॥

'[6]जेणत्थोग्गहकाले' इत्यादिना ग्रन्थेन '[7]सामण्ण- तयण्णविसेसेहा' इत्यादिना च ग्रन्थेन यद् दूषितं या तस्याऽवस्था

---

१ गाथा २५३ । २ अन्ये सामान्यग्रहणमाहुर्बालस्य जातमात्रस्य । समये एव परिचितविषयस्य विशेषविज्ञानम् ॥ २६८ ॥ ३ तेन शब्द इत्यवगृहीतः ।

४ तदवस्थमेव तत् पूर्वदोषतस्तस्मिन्नेव वा समये । शाङ्ख-मधुरादिसुबहुकविशेषग्रहणं प्रसज्येत ॥२६९॥ ५ गाथा २६६ । ६ गाथा २६७ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यत् तस्य स्वरूपम्– ' समयम्मि चेव परिचियविसयस्स विसेसविन्नाणं ' इति, तदेतत्परोक्तमपि तदवस्थमेव, न पुनः किञ्चिदूनाधिकावस्थम् । कुतः ?, इत्याह– ' पुव्वदोसउ त्ति ' ' जेणंत्थोग्गहकाले ' इत्यादिना, ' सामण्ण-तयण्ण–' इत्यादिना च यः पूर्वं दोषोऽभिहितस्तस्मात् पूर्वदोषात्– पूर्वदोषाऽनतिवृत्तेः, तदेतत्परोक्तं तदवस्थमेव, इति नान्यदूषणाऽभिधानप्रयासो विधीयत इति भावः । अथवाऽपूर्वमपि दूषणमुच्यते । किं तत् ?, इत्याह– ' तम्मि चेवेत्यादि ' वा इत्यथवा, तस्मिन्नेव स्पष्टविज्ञानस्य व्यक्तस्य जन्तोर्विशेषग्राहिणि समये ' शाङ्खः, शार्ङ्गो वाऽयं शब्दः, स्निग्धः, मधुरः, कर्कशः, स्त्री-पुरुषाद्यन्यतरवाद्यः ' इत्यादि सुबहुकविशेषग्रहणं प्रसज्येत । इदमुक्तं भवति– यदि व्यक्तस्य परिचितविषयस्य जन्तोरव्यक्तशब्दज्ञानमुल्लङ्घ्य तस्मिन्नर्थावग्रहैकसमयमात्रे शब्दनिश्चयज्ञानं भवति, तदाऽन्यस्य कस्यचित् परिचिततरविषयस्य पटुतरावबोधस्य तस्मिन्नेव समये व्यक्तशब्दज्ञानमप्यतिक्रम्य 'शाङ्खोऽयं शब्दः' इत्यादिसंख्यातीतविशेषग्राहकमपि ज्ञानं भवदभिप्रायेण स्यात्, दृश्यन्ते च पुरुषशक्तीनां तारतम्यविशेषाः । भवत्येव कस्यचित् प्रथमसमयेऽपि सुबहुविशेषग्राहकमपि ज्ञानमिति चेत् । न, " न उण जाणइ के वेस सद्दे " इत्यस्य सूत्रावयवस्याऽगमकत्वप्रसङ्गात् । विमध्यमशक्तिपुरुषविषयमेतत् सूत्रमिति चेत् । न, अविशेषेणोक्तत्वात्, सर्वविशेषविषयत्वस्य च युक्त्यनुपपन्नत्वात्; न हि प्रकृष्टमतेरपि शब्दधर्मिणमगृहीत्वोत्तरोत्तरबहुसुधर्मग्रहणसंभवोऽस्ति, निराधारधर्माणामनुपपत्तेः ॥ इति गाथार्थः ॥ २६९ ॥

किञ्च, समयमात्रेऽपि ' शब्दः ' इति विशेषविज्ञानमभ्युपगच्छतोऽन्येऽपि समयविरोधादयो दोषाः । के पुनस्ते ?, इत्याह–

अत्थोग्गहो न समयं अहवा समओवओगबाहुल्लं । सव्वविसेसग्गहणं सव्वमई वोगहो गिज्झो ॥२७०॥
एगो वाऽवाओ च्चिय अहवा सोऽगहिय-णीहिए पत्तो । उक्कम-वइक्कमा वा पत्ता धुवमोग्गहाईणं ॥२७१॥
सामण्णं च विसेसो वा सामण्णमुभयमुभयं वा । न य जुत्तं सव्वमियं(वा)सामण्णालंबनं मोत्तुं ॥ २७२॥

व्याख्या– " उग्गहो एक्कं समयं " इत्यादिवचनादर्थावग्रहः सिद्धान्ते सामयिको निर्दिष्टः, यदि चाऽर्थावग्रहे विशेषविज्ञानमभ्युपगम्यते तदा सामयिकोऽसौ न प्राप्नोति, विशेषज्ञानस्याऽसंख्येयसामयिकत्वात् । अथ समयमात्रेऽप्यस्मिन् विशेषज्ञानमिष्यते, तर्हि

१ गाथा २६८ । २ गाथा २६६ । ३ गाथा २६७ । ४ न पुनर्जानाति क एष शब्दः ।
५ अर्थावग्रहो न समयमथवा समयोपयोगबाहुल्यम् । सर्वविशेषग्रहणं सर्वमतिऽर्थावग्रहो ग्राह्यः ॥ २७० ॥
एको वाऽपाय एवाऽथवा सोऽगृहीता-ऽनीहितः प्राप्तः । उत्क्रम-व्यतिक्रमौ वा प्राप्तौ ध्रुवसंज्ञकग्रहादीनाम् ॥२७१॥
सामान्यं च विशेषो वा सामान्यमुभयमुभयं वा । न च युक्तं सर्वमिदं(वा)सामान्यालम्बनं मुक्त्वा ॥ २७२ ॥ ६ अवग्रह एकं समयम् ।

' सामण्ण-तयण्णविसेसेहा ' इत्यादिना प्रागुक्तं समयोपयोगबाहुल्यं प्राप्नोति । अथवेत्यग्रतोऽप्यनुवर्तते । ततश्चाऽथवा परिचितविषयस्य विशेषज्ञानेऽभ्युपगम्यमाने परिचिततरविषयस्य तस्मिन्नेव समये सर्वविशेषग्रहणमनन्तरोक्तं प्राप्नोति । अथवाऽवग्रहमात्रादपि विशेषपरिच्छेदेऽङ्गीक्रियमाणे ईहादीनामनुत्थानमेव । ततश्च सर्वाऽपि मतिरवग्रहो ग्राह्यः– सर्वस्यापि मतेरवग्रहरूपतैव प्राप्नोतीत्यर्थः । अथ सर्वाऽपि मतिरपाय एवैकः प्राप्नोति, अर्थावग्रहे विशेषज्ञानस्याऽऽश्रयणात्, तस्य च निश्चयरूपत्वात्, निश्चयस्य चाऽपायत्वादिति समयमात्रे चाऽस्मिन्नपाये सिद्धे "[3]ईहा-वाया मुहुत्तमन्तं तु" इति विरुध्यते । अथवाऽर्थेऽवगृहीते, ईहिते च, अपायः सिद्धान्ते निर्दिश्यते " उग्गहो ईहा अवाओ य " इति क्रमनिर्देशात्, यदि चाऽऽद्यसमयेऽपि विशेषज्ञानाऽभ्युपगमादपाय इष्यते, तर्ह्यनवगृहीतेऽनीहिते तस्मिन्नसौ प्राप्तः । ' वा ' इत्यथवा, यदि तृतीयस्थाननिर्दिष्टोऽप्यपायः ' समयम्मि चेव परिचियविसयस्स विण्णाणं ' इति वचनपटुत्ववैचित्र्येण प्रथममभ्युपगम्यते, तर्हि तस्मादेव पाटववैचित्र्यादवग्रहे-हा-ऽपाय-धारणानां ध्रुवं निश्चितमुत्क्रम-व्यतिक्रमौ स्याताम् तत्र पश्चानुपूर्वीभवनमुत्क्रमः, अनानुपूर्वीभावस्तु व्यतिक्रमः, तथाहि– यथा शक्तिवैचित्र्यात् कश्चित् प्रथममेवाऽपायो भवताऽभ्युपगम्यते तथा तत एव कस्याऽपि प्रथमं धारणा स्यात्, ततोऽपायः, ततोऽपीहा, तदनन्तरं त्ववग्रह इत्युत्क्रमः; अन्यस्य कस्यचित्पुनरवग्रहमुल्लङ्घ्य प्रथममेवेहा समुपजायेत, अपरस्य तु तामप्यतिक्रम्याऽपायः, अन्यस्य तु तमप्यतिवृत्त्य धारणा स्यात्, इत्यादिव्यतिक्रमः न चेह वयं युक्तिमात्रच्छलनीयाः, भवदभ्युपगतस्य शक्तिवैचित्र्यस्यैव पुष्टहेतोः सद्भावात् । न चैतावुत्क्रम-व्यतिक्रमौ युक्तौ " उग्गहो ईहा अवायो य धारणा एव होन्ति चत्तारि" इति परममुनिनिर्दिष्टक्रमस्याऽन्यथाकर्तुमशक्यत्वादिति । तथा, यदि यत् प्रथमसमये गृह्यते विशेषः, तर्हि ' सामण्णं च विसेसो त्ति ' यत् सामान्यं तदपि विशेषः प्राप्तः, प्रथमसमये हि सर्वस्याऽपि वस्तुनोऽव्यक्तं सामान्यरूपं गृह्यते, ततोऽस्मिन्नप्यर्थावग्रहसमये सामान्यमेव गृह्यत इति परमार्थः । यदिवाऽत्र विशेषबुद्धिर्भवताऽभ्युपगम्यते, तर्हि या वस्तुस्थित्या सामान्यं स्थितं तदपि भवदभिप्रायेण विशेषः प्राप्तः । चशब्दो दूषणसमुच्चयार्थः । ' सो वा सामण्णं ति ' स वा भवदभिप्रेतो विशेषो वस्तुस्थितिसमायातं सामान्यं प्राप्नोतीति । ' उभयमुभयं व त्ति ' अथवा, सामान्य-विशेषलक्षणमुभयमप्येतत् त्येकमुभयं प्राप्नोति– एकैकमुभयरूपं स्यादित्यर्थः; तथाहि– अव-ईषत् सामान्यं गृह्णातीत्यवग्रह इतिव्युत्पत्त्या वस्तुस्थितिसमायातसामान्यं तत् स्वरूपेण तावत् सामान्यम्, भवदभ्युपगमेन तु विशेषः, इत्येकस्याऽपि सामान्यस्योभयरूपता; तथा योऽपि भवदभ्

१ गाथा २६७ । २ ईहा-ऽपायौ मुहूर्तान्तस्तु । ३ अवग्रहः, ईहा, अपायश्च । ४ गाथा-२६८ । ५ अवग्रह ईहाऽपायश्च धारणा एव भवन्ति चत्वारि ।
६ श्रीभद्रबाहुस्वामिभिः । ※(कस्यचित्)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पगतो विशेषः सोऽपि त्वदभिप्रायेण विशेषः, वस्तुस्थित्या तु सामान्यम्, इति विशेषस्याऽप्येकस्योभयस्वभावता । भवत्वेवमिति चेत्। इत्याह– न च युक्तं सर्वमिदम् । किं कृत्वा ?, इत्याह– सामान्यमालम्बनं ग्राह्यं मुक्त्वा 'अर्थावग्रहस्य' इति शेषः। इदमुक्तं भवति– अर्थावग्रहस्याऽव्यक्तं सामान्यमात्रमालम्बनं परिहृत्य यदन्यद् विशेषरूपमालम्बनमिष्यते, तदभ्युपगमे च ' सामण्णं च विसेसो वा सामण्णं ' इत्यादि यदापतति, तत् सर्वमयुक्तम्, अघटमानकत्वात् । इह च गाथात्रये बहुषु दूषणेषु मध्ये यत् प्रागुक्तमपि किञ्चिद् दूषणमुक्तं, तत् प्रसङ्गायातत्वात्, इति न पौनरुक्त्यमाशङ्कनीयम् ॥ इति गाथात्रयार्थः ॥ २७० ॥ २७१ ॥ २७२ ॥

प्रस्तुत एवार्थेऽपरमपि मतान्तरमुपन्यस्य निराकुर्वन्नाह–

[1]केइदिहालोयणपुव्वमोग्गहं [2]बेंति तत्थ सामण्णं । गहियमहत्थावग्गहकाले सद्दे त्ति निच्छिण्णं ॥ २७३ ॥

केचिद् वादिन इहाऽस्मिन् प्रक्रमेऽवग्रहं ब्रुवतेऽर्थावग्रहं व्याचक्षते । किंविशिष्टम् ?, इत्याह– आलोचनपूर्वं सामान्यवस्तुग्राहि ज्ञानमालोचनं तत् पूर्वं प्रथमं यत्र स तथा तम्, प्रथममालोचनज्ञानं ततोऽर्थावग्रह इत्यर्थः, तथा च तैरुक्तम्–

" अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम् । बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् " ॥ १ ॥ इति ।

किं पुनस्तत्राऽऽलोचनज्ञाने गृह्यते ?, इत्याह– ' तत्थेत्यादि ' तत्रालोचनज्ञाने सामान्यमव्यक्तं वस्तु गृहीतं ' प्रतिपत्त्रा ' इति गम्यते, अथाऽनन्तरमर्थावग्रहकाले ' तदेव गृहीतम् ' इत्यनुवर्तते । कथंभूतं सत् ?, इत्याह– निच्छिन्नं पृथक्कृतं रूपादिभ्यो व्यावृत्तमित्यर्थः । केनोल्लेखेन गृहीतम् ?, इत्याह– ' सद्दे त्ति ' शब्दविशेषणविशिष्टमित्यर्थः । ततश्च " [3]से जहानामए केइ पुरिसे अव्वत्तं सद्दं सुणेज्ज " इत्येतदालोचनज्ञानापेक्षया नीयते, " [4]तेणं सद्दे त्ति उग्गहिए " एतत्त्वार्थावग्रहापेक्षया, इति सर्वं सुस्थतामनुभवति । न चातः परं भवतोऽप्याचार्य ! किञ्चिद् वक्तव्यमस्ति; यदि हि युक्त्यनुभवसिद्धेनाऽर्थेन सूत्रे विषयविभागव्यवस्थापितेऽपि वादी जयं न प्राप्स्यति, तदा तूष्णीमाश्रयन्तु विपश्चितः, विचारचर्यामार्गस्य स्वाग्रहतत्परेण त्वयैव लुप्तत्वात् ॥ इति गाथार्थः ॥ २७३ ॥

तदत्र सूरिः परस्येषद्गर्वानुविद्धामज्ञतामवलोकयन् मार्गावतारणाय विकल्पयन्नाह–

---

१ केचिदिहालोचनपूर्वमवग्रहं ब्रुवन्ति तत्र सामान्यम् । गृहीतमथाऽर्थावग्रहकाले शब्द इति निच्छिन्नम् ॥ २७३ ॥ २ क. ग. 'विंति' । ३ क. ग. 'यतः स' ।
४ तद्यथानामा कश्चित् पुरुषोऽव्यक्तं शब्दं शृणुयादिति । ५ तेन शब्द इत्यवगृहीतः । ६ ज. 'मज्ञातता' । ७ घ. 'वतर' ।

[1]तं वंजणोग्गहाओ पुव्वं पच्छा स एव वा होज्जा । पुव्वं तदत्थवंजणसंबंधाभावओ नत्थि ॥ २७४ ॥

यद्यनुपहतस्मरणवासनासन्तानस्तदर्थावग्रहात् पूर्वं व्यञ्जनावग्रहो भवतीति यदुक्तं प्राक्, तद् भवानपि स्मरति । ततः किम्?, इति चेत् । उच्यते– यदेतद् भवदुत्प्रेक्षितं सामान्यग्राहकमालोचनं तत् तस्माद् व्यञ्जनावग्रहात् पूर्वं वा भवेत्, पश्चाद् वा भवेत्, स एव वा व्यञ्जनावग्रहोऽप्यालोचनं भवेत् ?, इति त्रयी गतिः, अन्यत्र स्थानाभावात् । किञ्चाऽतः ?, इत्याह– पूर्वं तद् नास्तीति सेबन्धः । कुतः?, इत्याह– अर्थव्यञ्जनसंबन्धाभावादिति– अर्थः शब्दादिविषयभावेन परिणतद्रव्यसमूहः, व्यञ्जनं तु श्रोत्रादि, अर्थश्च व्यञ्जनं चाऽर्थव्यञ्जने तयोः संबन्धस्तस्याऽभावात्, सति ह्यर्थ-व्यञ्जनसंबन्धे सामान्यार्थालोचनं स्यात्, अन्यथा सर्वत्र सर्वदा तद्भावप्रसङ्गात् । व्यञ्जनावग्रहाच्च पूर्वमर्थव्यञ्जनसंबन्धो नास्ति, [2]तद्भावे च व्यञ्जनावग्रहस्यैवेष्टत्वात् तत्पूर्वकालता न स्यादिति भावः ॥ इति गाथार्थः ॥२७४॥

द्वितीयविकल्पं शोधयन्नाह–

[3]अत्थोग्गहो वि जं वंजणोग्गहस्सेव चरमसमयम्मि । पच्छा वि तो न जुत्तं परिसेसं वंजणं होज्जा ॥२७५॥

तथा, अर्थावग्रहोऽपि यद् यस्माद् व्यञ्जनावग्रहस्यैव चरमसमये भवति, इति प्रागिहापि निर्णीतम् । तस्मात् पश्चादपि व्यञ्जनावग्रहादालोचनज्ञानं न युक्तम्, निरवकाशत्वात् । न हि व्यञ्जना-ऽर्थावग्रहयोरन्तरे कालः समस्ति, यत्र तत् त्वदीयमालोचनज्ञानं स्यात्, व्यञ्जनावग्रहचरमसमय एवाऽर्थावग्रहसद्भावात् । तस्मात् पूर्वं पश्चात्कालयोर्निषिद्धत्वात् पारिशेष्याद् मध्यकालवर्ती तृतीयविकल्पोपन्यस्तो व्यञ्जनं व्यञ्जनावग्रह एव भवताऽऽलोचनाज्ञानत्वेनाऽभ्युपगतो भवेत्। एवं च न कश्चिद् दोषः, नाममात्र एव विवादात् ॥ इति गाथार्थः ॥ २७५ ॥

क्रियतां तर्हि प्रेरकवर्गेण वर्धापनकम्, त्वदभिप्रायाविसंवादलाभात्, इति चेत्। नैवम्, विकल्पद्वयस्येह सद्भावात्, तथाहि– तद्व्यञ्जनावग्रहकालेऽभ्युपगम्यमानमालोचनं किमर्थस्यालोचनं, व्यञ्जनानां वा ?, इति विकल्पद्वयम् । तत्र प्रथमविकल्पमनूद्य दूषयन्नाह–

[4]तं च समालोयणमत्थदरिसणं जइ, न वंजणं तो तं । अह वंजणस्स तो कहमालोयणमत्थसुण्णस्स ? ॥२७६॥

---

१ तद् व्यञ्जनावग्रहात्तु पूर्वं पश्चात् स एव वा भवेत् । पूर्वं तदर्थव्यञ्जनसंबन्धाभावतो नास्ति ॥ २७४ ॥ २ क. ग. 'तत्सद्भावे तु व्य' ज. 'तद्भावे तु व्य' ।
३ अर्थावग्रहोऽपि यद् व्यञ्जनावग्रहस्यैव चरमसमये । पश्चादप्यतो न युक्तं परिशेषं व्यञ्जनं भवेत् ॥ २७५ ॥
४ तच्च समालोचनमर्थदर्शनं यदि, न व्यञ्जनं ततस्तत्। अथ व्यञ्जनस्य ततः कथमालोचनमर्थशून्यस्य ? ॥ २७६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

तत् समालोचनं यदि सामान्यरूपस्याऽर्थस्य दर्शनमिष्यते, ततस्तर्हि न व्यञ्जनं[1] व्यञ्जनावग्रहात्मकं भवति, व्यञ्जनावग्रहस्य व्यञ्जनसंबन्धमात्ररूपत्वेनाऽर्थशून्यत्वात्, तथाच प्रागपि 'पुव्वं चेव तस्स वंजणकालो सो अत्थपरिसुण्णो' इत्यादिना साधितमेवेदम्। अतोऽर्थदर्शनरूपमालोचनं कथमर्थशून्यव्यञ्जनावग्रहात्मकं भवितुमर्हति ?, विरोधात्। अथ द्वितीयविकल्पमङ्गीकृत्याह–अथ व्यञ्जनस्य शब्दादिविषयपरिणतद्रव्यसंबन्धमात्रस्य तत् समालोचनमिष्यते, तर्हि कथमालोचनं– कथमालोचकत्वं तस्य घटते ?, इत्यर्थः। कथंभूतस्य सतः ?, इत्याह– अर्थशून्यस्य व्यञ्जनसंबन्धमात्रान्वितत्वेन सामान्यार्थालोचकत्वानुपपत्तेरित्यर्थः॥ इति गाथार्थः॥ २७६॥

ननु शास्त्रान्तरप्रसिद्धस्याऽऽलोचनज्ञानस्य वराकस्य तर्हि का गतिः ?, इत्याह–

आलोयणं त्ति नामं हवेज्ज तं वंजणोग्गहस्सेव[2]। होज्ज कहं सामण्णग्गहणं तत्थत्थसुण्णम्मि[3] ?॥ २७७॥

तस्मादालोचनमिति यन्नाम तदन्यत्र निर्गतिकं सत् पारिशेष्याद् व्यञ्जनावग्रहस्यैव द्वितीयं नाम भवेत्। न च विवक्षामात्रप्रवृत्तेषु वस्तूनां बहुष्वपि नामसु क्रियमाणेषु कोऽपि विवादमाविष्करोति ?। अत एतदपि नामान्तरमस्तु, को दोषः ? इति। नैतदेवम्, यस्मादिदं सामान्यग्राहकमालोचनज्ञानं भविष्यति, अर्थावग्रहस्तु विशेषग्राहक इति; एवमप्यस्माकं समीहितसिद्धिर्भविष्यतीति चेत्। इत्याह– 'होज्जेत्यादि' व्यञ्जनावग्रहस्यैव पारिशेष्यादालोचनज्ञानत्वमापन्नम्, तत्र च प्रागुक्तयुक्तिभिरर्थशून्ये कथं सामान्यग्रहणं भवेत्, येन भवतः समीहितसिद्धिप्रमोदः ? इति। तस्मादर्थावग्रह एव सामान्यार्थग्राहकः, न पुनरेतस्मादपरमालोचनाज्ञानम्। अत एव यदुक्तम्– "अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम्" इत्यादि, तदप्यर्थावग्रहाश्रयमेव यदि, घटते, नान्यविषयम्॥ इति गाथार्थः॥ २७७॥

अथ 'दुर्बलं वादिनैव[4] दृष्ट्वाऽभ्युपगमोऽपि कर्तव्यः' इतिन्यायमदर्शनार्थमाह–

गोहियं व होउ तहियं सामण्णं कहमणीहिए[5] तम्मि। अत्थावग्गहकाले विसेसणं एस सद्दो त्ति ?॥२७८॥

अथवा भवतु तस्मिन् व्यञ्जनावग्रहे सामान्यं गृहीतम्, तथापि कथमनीहितेऽविमर्शिते तस्मिन्नकस्मादेवाऽर्थावग्रहकाले 'शब्द एषः' इति विशेषणं विशेषज्ञानं युक्तम्, 'शब्द एवैषः' इत्ययं हि निश्चयः, न चायमीहामन्तरेण झगित्येव युज्यते, इत्यसकृदेवोक्तप्रायम्। अतो नार्थावग्रहे 'शब्दः' इत्यादिविशेषबुद्धिर्युज्यते॥ इति गाथार्थः॥ २७८॥

---

१ गाथा २५९। २ क.ग.घ.छ.ज. 'च वंजणोग्गहका'। ३ आलोचनेति नाम भवेत् तद् व्यञ्जनावग्रहस्यैव। भवेत् कथं सामान्यग्रहणं तत्राऽर्थशून्ये ?॥ २७७॥ ४ क.ग. 'यणं ति ना'। ५ गृहीतं वा भवतु तस्मिन् सामान्यं कथमनीहिते तस्मिन्। अर्थावग्रहकाले विशेषणमेष शब्द इति ?॥ २७८॥

अथाऽर्थावग्रहसमये शब्दाद्यवगमेन सहैवेहा भविष्यतीति मन्यसे, तत्राऽऽह—

अत्थावग्गहसमए वीसुमसंखेज्जसमइया[1] दो वि। तक्का-वगमसहावा ईहा-ऽवाया कहं जुत्ता ?॥ २७९॥

अर्थावग्रहसंबन्धिन्येकस्मिन् समये कथमीहा-ऽपायौ युक्तौ ?, इति संबन्धः। कथंभूतावेतौ ? यतः, इत्याह– तर्का-ऽवगमस्वभावौ, तर्को विमर्शस्तत्स्वभावेहा, अवगमो निश्चयस्तत्स्वभावोऽपायः; द्वावपि चैतौ पृथगसंख्येयसमयनिष्पन्नौ। एतदुक्तं भवति– यदिदमर्थावग्रहे विशेषज्ञानं त्वयेष्यते सोऽपायः, स चाऽवगमस्वभावो निश्चयस्वरूप इत्यर्थः; या च तत्समकालमीहाऽभ्युपेयते सा तर्कस्वभावा, अनिश्चयात्मिकेत्यर्थः। तत एतावीहा-ऽपायावनिश्चयेतरस्वभावौ कथमर्थावग्रहे युगपदेव युक्तौ; निश्चया-ऽनिश्चययोः परस्परपरिहारेण व्यवस्थितत्वात्, एकत्रैकदाऽवस्थानाभावेन सहोदयाऽनुपपत्तेः ?इति। एषा तावद् विशेषावगमे-हयोः सहभावे एकाऽनुपपत्तिः। अपरं च समयमात्रकालोऽर्थावग्रहः, ईहा-ऽपायौ तु "[2]ईहा-वाया मुहुत्तमंतं तु" इति वचनात् प्रत्येकमसंख्येयसमयनिष्पन्नौ कथमेकस्मिन्नर्थावग्रहसमये स्याताम्, अत्यन्तानुपपन्नत्वात् ?। इति द्वितीयाऽनुपपत्तिः। तस्मादत्यन्तासंबद्धत्वाद् यत् किञ्चिदेतत्, इत्युपेक्षणीयम्॥ इति गाथार्थः॥ २७९॥

तदेवं युक्तिशतैर्निराकृतानामपि प्रेरकाणां निःसंख्यात्वात् केषांचित् प्रेर्यशेषमद्यापि सूरिराशङ्कते–

खिप्पे-यराइभेओ जमोग्गहो तो विसेसविण्णाणं[3]। जुज्जइ विग्गप्पवसओ सद्दो त्ति सुयम्मि जं केइ॥ २८०॥

'केइ त्ति' इहाऽर्थावग्रहे विशेषज्ञानसमर्थनाऽऽग्रहमुमुक्षवोऽद्यापि केचिद् वादिनो मन्यन्ते। किम् ?, इत्याह– क्षिप्रे-तरादिभेदो यस्मादवग्रहो ग्रन्थान्तरे भणितः 'अत्रापि च विस्तरेण भणिष्यते' इति गम्यते। ततः 'शब्दः' इति विशेषविज्ञानं युज्यते घटते 'अर्थावग्रहे' इति प्रस्तावादेव लभ्यते। यत् किम् ?, इत्याह– 'सुयम्मि जं ति' "तेणं सद्दे त्ति उग्गहिए" इत्यादिवचनात् यत् 'सूत्रे निर्दिष्टम्' इति शेषः। कुतः पुनरिदं विशेषविज्ञानं युज्यते ?, इत्याह– विकल्पवशतोऽन्यथोक्तनानात्ववशतः, इत्यक्षरघटना॥

एतच्चाऽत्र हृदयम्– "क्षिप्रमवगृह्णाति, चिरेणाऽवगृह्णाति, बहववगृह्णाति, अबहववगृह्णाति, बहुविधमवगृह्णाति, अबहुविधमवगृह्णाति, एवमनिश्रितम्, निश्रितं, असंदिग्धं, संदिग्धम्, ध्रुवम्, अध्रुवमवगृह्णाति" इत्यादिना ग्रन्थेनाऽवग्रहादयः शास्त्रान्तरे द्वादशविधविशेषणैर्विशेषिताः। अत्राऽपि च पुरस्तादयमर्थो वक्ष्यते। ततः 'क्षिप्रं चिरेण वाऽवगृह्णाति' इतिविशेषणान्यथानुपपत्तेर्ज्ञायते

---

१ अर्थावग्रहसमये द्वित्रसंख्येयसामयिकौ द्वावपि। तर्का-ऽवगमस्वभावावीहा-ऽपायौ कथं युक्तौ ?॥ २७९॥ २ ईहा-ऽपायौ मुहूर्तान्तस्तु। ३ क्षिप्रे-तरादिभेदो यदवग्रहस्ततो विशेषविज्ञानम्। युज्यते विकल्पवशतः शब्द इति सूत्रे यत् केचित्॥ २८०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नैकसमयमात्रमान एवाऽर्थावग्रहः, किन्तु चिरकालिकोऽपिः न हि समयमात्रमानतयैकरूपे तस्मिन् क्षिप्र-चिरग्रहणविशेषणमुपपद्यत इति भावः। तस्मादेतद्विशेषणबलादसंख्येयसमयमानोऽप्यर्थावग्रहो युज्यते। तथा, बहूनां श्रोतृणामविशेषेण प्राप्तिविषयस्थे शङ्ख-भेर्यादिबहुतूर्यनिर्घोषे क्षयोपशमवैचित्र्यात् कोऽप्यबहु अवगृह्णाति, सामान्यं समुदिततूर्यशब्दमात्रमवगृह्णातीत्यर्थः। अन्यस्तु बहवगृह्णाति, शङ्ख-भेर्यादितूर्यशब्दान् भिन्नान् बहून् गृह्णातीत्यर्थः। अन्यस्तु स्त्री-पुरुषादिवाद्यत्व-स्निग्ध-मधुरत्वादिबहुविधविशेषविशिष्टत्वेन बहुविधमवगृह्णाति, अपरस्त्वबहुविधविशेषविशिष्टत्वादबहुविधमवगृह्णाति। अत एतस्माद् बहु-बहुविधाद्यनेकविकल्पनानात्ववशादवग्रहस्य कचित् सामान्यग्रहणम्, कचित् तु विशेषग्रहणम्, इत्युभयमप्यविरुद्धम्। अतो यत् सूत्रे "[1]तेणं सद्दे त्ति उग्गहिए" इति वचनात् 'शब्दः' इति विशेषविज्ञानमुपदिष्टम्, तदप्यर्थावग्रहे युज्यत एव, इति केचित्॥ इति गाथार्थः॥ २८०॥

अत्रोत्तरमाह–

[2]से किमोग्गहो त्ति भण्णइ गहणे-हा-ऽवायलक्खणत्ते वि?। अह उवयारो कीरइ तो सुण जह जुज्जए सो वि॥२८१॥

इह पूर्वमनेकधा प्रतिविहितमप्यर्थं पुनः पुनः प्रेरयन्तं प्रेरकमवलोक्याऽन्तर्विस्फुरदसूयावशात् साक्षेपं काक्वा सूरिः पृच्छति–'किमोग्गहो त्ति भण्णइ त्ति' किंशब्दः क्षेपे, यो बहु-बहुविधादिविशेषणवशाद् विशेषावगमः स किमबुधचक्रवर्तिन्! अवग्रहोऽर्थावग्रहो भण्यते?। ऊ सत्यपि?, इत्याह–'गहणे-हित्यादि' ग्रहणं च सामान्यार्थस्य, ईहाऽवगृहीतस्य, अपायश्चेहितार्थस्य ग्रहणे-हा-ऽपायास्तैर्लक्ष्यते प्रकटीक्रियते यः स तथा तद्भावस्तत्त्वं तस्मिन् सत्यपि, बहु-बहुविधादिग्राहको हि विशेषावगमो निश्चयः, स च सामान्याऽर्थग्रहणं, ईहां च विना न भवति, यश्च तदविनाभावी सोऽपाय एव, कथमर्थावग्रह इति भण्यते? इति। एतत्पूर्वमसकृदेवोक्तमपि हन्त! विस्मरणशीलतया, जडतया, बद्धाभिनिवेशतया वा पुनः पुनरस्मान् भाणयसीति किं कुर्मः?, पुनरुक्तमपि ब्रूमः, यद् यस्मादायासेनाऽपि कश्चिद् मार्गमासादयतीति। ननु ग्रहणम्, ईहा च विशेषावगमस्य लक्षणं भवतु, ताभ्यां विना तदभावात्; अपायस्तु कथं तल्लक्षणम्, तत्स्वरूपत्वादेवाऽस्य?। सत्यम्, किन्तु स्वरूपमपि भेदविवक्षया लक्षणं भवत्येव, यदाह—

"विषा-ऽमृते स्वरूपेण लक्ष्येते कलशादिवत्। एवं च स्वस्वभावाभ्यां व्यज्येते खल-सज्जनौ"॥ १॥

आह– यदि बहु-बहुविधादिग्राहकोऽपाय एव भवति, तर्हि कथमन्यत्राऽवग्रहादीनामपि बह्वादिग्रहणमुक्तम्?। सत्यम्, कि-

---

१ तेन शब्द इत्यवगृहीतः। २ स किमवग्रह इति भण्यते ग्रहणे-हा-ऽपायलक्षणत्वेऽपि?। अथोपचारः क्रियते ततः शृणु यथा युज्यते सोऽपि॥२८१॥

न्त्वपायस्य कारणमवग्रहादयः, कारणे च योग्यतया कार्यस्वरूपमस्ति, इत्युपचारतस्तेऽपि बह्वादिग्राहकाः प्रोच्यन्ते, इत्यदोषः। यद्येवम्, तर्हि वयमप्यपायगतं विशेषज्ञानमर्थावग्रहेऽप्युपचरिष्याम इति। एतदेवाह– 'अहेत्यादि' अथोक्तन्यायेनोपचारं कृत्वा विशेषग्राहकोऽर्थावग्रहः प्रोच्यते। नैतदेवम्, यतो मुख्याभावे सति प्रयोजने निमित्ते चोपचारः प्रवर्तते। न चैवमुपचारे किञ्चित् प्रयोजनमस्ति। "[1]तेणं सद्दे त्ति उग्गहिए" इत्यादिसूत्रस्य यथाश्रुतार्थनिगमनं प्रयोजनमिति चेत्। न, 'सद्दे त्ति भणइ वत्ता' इत्यादिप्रकारेणाऽपि तस्य [3]निगमितत्वात्। सामर्थ्यव्याख्यानमिदम्, न यथाश्रुतार्थव्याख्येति चेत्। तर्हि यद्युपचारेणाऽपि श्रौतोऽर्थः सूत्रस्य व्याख्यायत इति तवाभिप्रायः, तर्हि यथा युज्यत उपचारः, तथा कुरु, न चैवं क्रियमाणोऽसौ युज्यते, यतः 'सिंहो माणवकः' 'समुद्रस्तडागः' इत्यादाविव किञ्चित्साम्ये सत्ययं विधीयमानः शोभते। न चैतत्सामायिकेऽर्थावग्रहे-ऽसंख्येयसामयिकं विशेषग्रहणं कथमप्युपपद्यते। तर्हि कथमयमुपचारः क्रियमाणो घटते?, इति चेत्। अहो! सुचिरादुपसन्नोऽसि[4]। ततः शृणु समाकर्णयाऽवहितेन मनसा, सोऽपि यथा युज्यते तथा कथयामि– 'सद्दे त्ति भणइ वत्ता' इत्यादिप्रकारेण तावद् व्याख्यातं सूत्रम्। यदि चौपचारिकेणाऽप्यर्थेन भवतः प्रयोजनम्, तर्हि सोऽपि यथा घटमानकस्तथा कथ्यत इत्यपिशब्दाभिप्रायः॥ इति गाथार्थः॥ २८१॥

यथाप्रतिज्ञातमेव संपादयन्नाह–

[4]सामण्णमेत्तग्गहणं नेच्छइओ समयमोग्गहो पढमो। तत्तोऽणंतरमीहियवत्थुविसेसस्स जोऽवाओ॥ २८२॥
सो पुणरीहा-ऽवायावेक्खाओ वग्गहो त्ति उवयरिओ। एस्सविसेसावेक्खं सामण्णं गेण्हए जेणं॥ २८३॥
तत्तोऽणंतरमीहा तत्तोऽवाओ य तव्विसेसस्स। इय सामण्ण-विसेसावेक्खा जावंतिमो भेओ॥ २८४॥

व्याख्या– इहैकसमयमात्रमानो नैश्चयिको निरुपचरितः प्रथमोऽर्थावग्रहः। कथंभूतः?, इत्याह– सामान्यमात्रस्याऽव्यक्तनिर्देश्यस्य वस्तुनो ग्रहणं सामान्यवस्तुमात्रग्राहक इत्यर्थः, सामयिकानि हि ज्ञानादिवस्तूनि परमयोगिन एव निश्चयवेदिनोऽवगच्छन्तीति

---

१ तेन शब्द इत्यवगृहीतः। २ गाथा २५३। ३ क. ग. 'निर्गमि' घ. 'निमित्तवा'। (× सि) + (ग्रं०- ४०००)

४ सामान्यमात्रग्रहणं नैश्चयिकः समयमवग्रहः प्रथमः। ततोऽनन्तरमीहितवस्तुविशेषस्य योऽपायः॥ २८२॥ पु गिण्हए-।
स पुनरीहा-ऽपायापेक्षानोऽवग्रह इत्युपचरितः। एष्यविशेषापेक्षं सामान्यं गृह्यते येन॥ २८३॥
ततोऽनन्तरमीहा ततोऽपायश्च तद्विशेषस्य। इति सामान्य-विशेषापेक्षा यावदन्तिमो भेदः॥ २८४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नैश्चयिकोऽयमुच्यते । अथ च्छद्मस्थव्यवहारिभिरपि यो व्यवह्रियते, तं व्यावहारिकमुपचारितमर्थावग्रहं दर्शयति– 'तत्तो इत्यादि' ततो नैश्चयिकार्थावग्रहादनन्तरमीहितस्य वस्तुविशेषस्य योऽपायः स पुनर्भाविनीहाम्, अपायं चाऽपेक्ष्योपचारितोऽवग्रहोऽर्थावग्रह इति द्वितीयगाथायां संबन्धः । उपचारस्यैवाऽस्य निमित्तान्तरमाह– 'एस्सेत्यादि' एष्यो भावी योऽन्यो विशेषस्तदपेक्षया येन कारणेनाऽयमपायोऽपि सन् सामान्यं गृह्णाति, यश्च सामान्यं गृह्णाति सोऽर्थावग्रहो यथा प्रथमो नैश्चयिकः । एतदिह तात्पर्यम्– प्रथमं नैश्चयिकेऽर्थावग्रहे रूपादिभ्योऽव्यावृत्तमव्यक्तं शब्दादिवस्तुसामान्यं गृहीतं, ततस्तस्मिन्नीहिते सति 'शब्द एवाऽयम्' इत्यादिनिश्चयरूपोऽपायो भवति। तदनन्तरं तु 'शब्दोऽयं किं शाङ्गः, शार्ङ्गो वा' इत्यादिशब्दविशेषविषया पुनरीहा प्रवर्तिष्यते, 'शाङ्ग एवाऽयं शब्दः'इत्यादिशब्दविशेषविषयोऽपायश्च यो भविष्यति तदपेक्षया 'शब्द एवाऽयम्' इति निश्चयः प्रथमोऽपायोऽपि सन्नुपचारादर्थावग्रहो भण्यते, ईहा-ऽपायापेक्षात इति, अनेन चोपचारस्यैकं निमित्तं सुचितम् । 'शाङ्गोऽयं शब्दः, इत्याद्येष्यविशेषापेक्षया येनाऽसौ सामान्यशब्दरूपं सामान्यं गृह्णातीति, अनेन तूपचारस्यैव द्वितीयं निमित्तमावेदितम्; तथाहि– यदनन्तरमीहा-ऽपायौ प्रवर्तेते, यश्च सामान्यं गृह्णाति, सोऽर्थावग्रहः, यथाऽऽद्यो नैश्चयिकः, प्रवर्तते च 'शब्द एवाऽयम् इत्याद्यपायाऽनन्तरमीहा-ऽपायौ, गृह्णाति च 'शाङ्गोऽयं' इत्यादिभाविविशेषापेक्षयाऽयं सामान्यम् । तस्मादर्थावग्रह एष्यविशेषापेक्षया सामान्यं गृह्णातीत्युक्तम् । ततस्तदनन्तरं किं भवति ?, इत्याह तृतीयगाथायाम्– 'तत्तोऽणन्तरमित्यादि' ततः सामान्येन शब्दनिश्चयरूपात् प्रथमापायादनन्तरं 'किमयं शब्दः शाङ्गः, शार्ङ्गो वा ?' इत्यादिरूपेहा प्रवर्तते । ततस्तद्विशेषस्य शङ्खप्रभवत्वादेः शब्दविशेषस्य 'शाङ्ग एवाऽयम्' इत्यादिरूपेणाऽपायश्च निश्चयरूपो भवति। अयमपि च भूयोऽन्यतद्विशेषाकाङ्क्षावतः प्रमातुर्भाविनीमीहामपायं चाऽपेक्ष्य, एष्यविशेषापेक्षया सामान्यालम्बनत्वाच्चाऽर्थावग्रह इत्युपचर्यते । इयं च सामान्य-विशेषापेक्षा तावत् कर्तव्या, यावदन्त्यो वस्तुनो भेदो विशेषः । यस्माच्च विशेषात् परतो वस्तुनोऽन्ये विशेषा न संभवन्ति सोऽन्त्यः, अथवा संभवत्स्वपि अन्यविशेषेषु यतो विशेषात् परतः प्रमातुस्तज्जिज्ञासा निवर्तते सोऽन्त्यः, तमन्त्यं विशेषं यावद् व्यावहारिकाऽर्थावग्रहे-हा-ऽपायार्थं सामान्य-विशेषाऽपेक्षा कर्तव्या ॥ इति गाथात्रयार्थः ॥ २८२ ॥ २८३ ॥ २८४ ॥

इह च गाथात्रयेऽपि यः पर्यवसितोऽर्थो भवति, तमाह–

सव्वत्थे-हा-वाया निच्छयओ मोत्तुमाइसामण्णं । संववहारत्थं पुण सव्वत्थाऽवग्गहोऽवाओ ॥ २८५ ॥

•(तम) १ सर्वत्रेहा-पायौ निश्चयतो मुक्त्वाऽऽदिसामान्यम् । संव्यवहारार्थं पुनः सर्वत्राऽवग्रहोऽपायः ॥ २८५ ॥×(सू)।+(तमयि)

सर्वत्र विषयपरिच्छेदे कर्तव्ये निश्चयतः परमार्थत ईहा-ऽपायौ भवतः, 'ईहा, पुनरपायः, पुनरीहा, पुनरप्यपायः' इत्येवं क्रमेण यावदन्त्यो विशेषः, तावदीहा-ऽपायावेव भवतः, नाऽर्थावग्रह इत्यर्थः,। किं सर्वत्रैवमेव ?, न, इत्याह– 'मोत्तुमाइसामण्णं ति' आद्यमव्यक्तं सामान्यमात्रालम्बनमेकं सामयिकं ज्ञानं मुक्त्वाऽन्यत्रेहा-ऽपायौ भवतः, इदं पुनर्नेहा, नाऽप्यपायः, किन्त्वर्थावग्रह एवेति भावः । संव्यवहारार्थं व्यावहारिकजनप्रतीत्यपेक्षं पुनः सर्वत्र यो योऽपायः स स उत्तरोत्तरेहा-ऽपायापेक्षया, एष्यविशेषापेक्षया चोपचारतोऽर्थावग्रहः । एवं च तावद् नेयम्, यावत्तारतम्येनोत्तरोत्तरविशेषाकाङ्क्षा प्रवर्तते ॥ इति गाथार्थः ॥ २८५ ॥

तरतमयोगाभावे तु किं भवति ?, इत्याह–

तरतमजोगाभावेऽवाउ च्चिय धारणा तदंतम्मि । सव्वत्थ वासणा पुण भणिया कालंतरे वि सई ॥२८६॥

तरतमयोगाभावे ज्ञातुरग्रेतनविशेषाकाङ्क्षानिवृत्तावपाय एव भवति, न पुनस्तस्याऽवग्रहत्वमिति भावः, तन्निमित्तानां पुनरीहादीनामभावादिति । यद्यग्रत ईहादयो न भवन्ति, तर्हि किं भवति ?, इत्याह– तदन्तेऽपायान्ते धारणा तदर्थोपयोगाऽप्रच्युतिरूपा भवति । शेषस्य वासना-स्मृतिरूपस्य धारणाभेदद्वयस्य क्व संभवः ?, इत्याह– 'सव्वत्थ वासणा पुणेत्यादि' वासना वक्ष्यमाणरूपा, तथा कालान्तरे स्मृतिः, सा च सर्वत्र भणिता । अयमर्थः– अविच्युतिरूपा धारणाऽपायपर्यन्त एव भवति, वासना-स्मृती तु सर्वत्र कालान्तरेऽप्यविरुद्धे ॥ इति गाथार्थः ॥ २८६ ॥

एवं चाऽभिहितस्वरूपव्यावहारिकाऽर्थावग्रहाऽपेक्षया यथाश्रुतार्थव्याख्यानमपि सूत्रस्याविरुद्धमेव, इति दर्शयन्नाह–

सद्दो त्ति व सुयभणियं विगप्पओ जइ विसेसविण्णाणं । घेप्पेज्ज तं पि जुज्जइ संववहारोग्गहे सव्वं ॥ २८७ ॥

वाशब्दोऽथवार्थे, ततश्चायमभिप्रायः– 'सद्दे त्ति भणइ वत्ता' इत्यादिप्रकारेण तावद् व्याख्यातं "तेणं सद्दे त्ति उग्गहिए" इत्यादि सूत्रम् । अथवा 'शब्दः' इति यत्सूत्रभणितम्– "शब्दस्तेनाऽवगृहीतः" इति यत् सूत्रे प्रतिपादितम्, तद् यदि विकल्पतो विवक्षावशतो विशेषविज्ञानं गृह्येत, तदपि सर्वं युज्यते । कस्मिन् ?, इत्याह–यथोक्त औपचारिके सांव्यवहारिकाऽर्थावग्रहे गृह्यमाणे

---

१ तरतमयोगाभावेऽपाय एव धारणा तदन्ते । सर्वत्र वासना पुनर्भणिता कालान्तरेऽपि स्मृतिः ॥ २८६ ॥ २ घ. छ. ज.: 'तरसई य'।

३ घ.छ.ज. 'न्तरे स्मृतिः कालान्तरस्मृ'। ४ शब्द इति वा श्रुतभणितं विकल्पतो यदि विशेषविज्ञानम् । गृह्येत तदपि युज्यते संव्यवहारावग्रहे सर्वम् ॥२८७॥

५ गाथा २५३ । ६ तेन शब्द इत्यवगृहीतः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

सति; अत्र हि 'शब्दः' इति विशेषविज्ञानं युज्यते, सर्वग्रहणात् तदनन्तरमीहादयश्चोपपद्यन्ते, पूर्वोक्तयुक्तेः । ततश्च "से[1] जहानामए केइ पुरिसे अव्वत्तं सद्दं सुणेज्जा, तेणं सद्दे त्ति उग्गहिए, न उण जाणइ के वेस सद्दे, तओ ईहं पविसइ, तओ अवायं गच्छइ" इत्यादि सर्वं सुस्थं भवति । यद्येवम्, अयमेवाऽर्थावग्रहः कस्माद् न गृह्यते, येन सर्वोऽपि विवादः शाम्यति ? इति चेत् । नैवम्, 'शब्द एवाऽयम्' इत्याद्यपायरूपोऽयमर्थावग्रहः, अपायश्च सामान्यग्रहणे-हाभ्यामन्तरेण न संभवति, इत्याद्यसकृत् पूर्वमभिहितमेव । इति प्राक्तनमेव व्याख्यानं मुख्यम् । इत्यलं विस्तरेण ॥ इति गाथार्थः ॥ २८७ ॥

व्यावहारिकाऽर्थावग्रहाभ्युपगमे यो गुणस्तं सविशेषमुपदर्शयन्नाह[2]–

[3]खिप्पे-यराइभेओपुव्वोइयदोसजालपरिहारो । जुज्जइ संताणेण य सामण्ण-विसेसववहारो ॥ २८८ ॥

क्षिप्रे-तरादिभेदं यत् पूर्वोदितदोषजालं तस्य परिहारो युज्यते 'अस्मिन् व्यावहारिकेऽर्थावग्रहे सति' इति प्रक्रमाद् गम्यते । इदमुक्तं भवति– एकसामयिकनैश्चयिकाऽर्थावग्रहव्याख्यातारं प्रति प्राग् यदुक्तम्– यद्यसावेकसामयिकः, तर्हि कथं क्षिप्र-चिरग्रहणविशेषणमस्योपपद्यते; तथा यद्यसौ सामान्यमात्रग्राहकः, तर्हि बहु-बहुविधादिविशेषणोक्तं विशेषग्रहणं कथं घटते ?; तथाऽर्थावग्रहस्य विशेषग्राहकत्वे यत् समयोपयोगबाहुल्यमुक्तम्; इत्यादिकस्य दोषजालस्य परिहारो व्यावहारिकेऽर्थावग्रहे सति युज्यते, तथाहि–नैश्चयिकावग्रहवादिनेदानीं शक्यमिदं वक्तुं यदुत- क्षिप्रे-तरादिविशेषणानि व्यावहारिकावग्रहविषयाण्येतानि, असंख्येयसमयनिष्पन्नत्वेनाऽस्य क्षिप्र-चिरग्रहणस्य युज्यमानत्वात्, विशेषग्राहकत्वेन बहु-बहुविधादिग्रहणस्याऽपि घटमानकत्वादिति । 'सामण्ण-तयण्णविसेसेहा' इत्यादिना प्रागभिहितं समयोपयोगबाहुल्यमप्यस्मिन् निरास्पदमेव, सामान्यग्रहणे-हापूर्वकत्वेन, असंख्येयसामयिकत्वेन चैकसमयोपयोगबाहुल्यस्याऽत्राऽसंभवध्यमानत्वादिति । ननु नैश्चयिकावग्रहे किं क्षिप्रे-तरादिविशेषणकलापो न घटते, येन व्यावहारिकावग्रहापेक्षः प्रोच्यते ?। सत्यम्, मुख्यतया व्यवहारावग्रहे एव घटते, कारणे कार्यधर्मोपचारात् पुनर्निश्चयावग्रहेऽपि युज्यते, इति प्रागप्युक्तम्, वक्ष्यते च; विशिष्टादेव हि कारणात् कार्यस्य वैशिष्ट्यं युज्यते, अन्यथा त्रिभुवनस्याऽप्यैश्वर्यादिप्रसङ्गः, काष्ठखण्डादेरपि रत्नादिनिचयाऽवाप्तेः, इत्यलं प्रसङ्गेन । प्रकृतमुच्यते– संतानेन च योऽसौ सामान्य-विशेषव्यवहारो लोके रूढः, सोऽपि 'व्यवहारावग्रहे सति युज्यते' इतीहापि संबध्यते । लोकेऽपि हि यो

---

१ तद्यथानामा कश्चित् पुरुषोऽव्यक्तं शब्दं शृणुयात्, तेन शब्द इत्यवगृहीतः, न पुनर्जानाति क एष शब्दः, तत ईहां प्रविशति, ततोऽपायं गच्छति ।

२ ज. 'हाऽर्थाभ्यु' । ३ क्षिप्रे-तरादिभेदपूर्वोदितदोषजालपरिहारः । युज्यते संतानेन च सामान्यविशेषव्यवहारः ॥ २८८ ॥ ४ गाथा २६७ ।

२२
विशेषः सोऽप्यपेक्षया सामान्यम्, यत्सामान्यं तदप्यपेक्षया विशेष इति व्यवह्रियते, तथाहि– 'शब्द एवाऽयम्' इत्येवमध्यवसितोऽर्थः पूर्वसामान्यापेक्षया विशेषः, 'शाङ्खोऽयम्' इत्युत्तरविशेषापेक्षया तु सामान्यम्, इत्येवं यावदन्त्यो विशेष इति प्रागप्युक्तम् । अयं चोपर्युपरिज्ञानप्रवृत्तिरूपेण संतानेन लोके रूढः सामान्य-विशेषव्यवहार औपचारिकावग्रहे सत्येव घटते, नान्यथा, तदनभ्युपगमे हि प्रथमापायानन्तरमीहाऽनुत्थानम्, उत्तरविशेषाग्रहणं चाऽभ्युपगतं भवति, उत्तरविशेषाग्रहणे च प्रथमापायेऽवसितार्थस्य विशेषत्वमेव, न सामान्यत्वम्; इति पूर्वोक्तरूपो लोकप्रतीतः सामान्य-विशेषव्यवहारः समुच्छिद्येत । अथ प्रथमापायानन्तरमभ्युपगम्यत ईहोत्थानम्, उत्तराविशेषग्रहणं च; तर्हि सिद्धं तदपेक्षया प्रथमापायव्यवसितार्थस्य सामान्यत्वम्, यश्च सामान्यग्राहकः, यदनन्तरं चेहादिप्रवृत्तिः सोऽर्थावग्रहः, नैश्चयिकाऽऽद्यार्थावग्रहवत्, इत्युक्तमेव । इति सिद्धो व्यावहारिकार्थावग्रहः, तत्सिद्धौ च सन्तानप्रवृत्त्याऽन्त्यविशेषं यावत् सिद्धः सामान्य-विशेषव्यवहारः ॥ इति गाथार्थः ॥ २८८ ॥

॥ इति मतिज्ञानाऽऽद्यभेदलक्षणो द्विभेदोऽप्यवग्रहः समाप्त इति ॥

अथ तद्द्वितीयभेदलक्षणामीहां व्याचिख्यासुराह–

[1]ईय सामण्णग्गहणाणंतरमीहा सदत्थवीमंसा । किमिदं सद्दोऽसद्दो को होज्ज व संख-संगाणं ?॥ २८९ ॥

इतिशब्द उपप्रदर्शने, इत्येवं प्रागुक्तेन प्रकारेण नैश्चयिकाऽर्थावग्रहे यत् सामान्यग्रहणं रूपाद्यव्यावृत्त्याऽव्यक्तवस्तुमात्रग्रहणमुक्तम्, तथा व्यवहारार्थावग्रहेऽपि यदुत्तरविशेषापेक्षया शब्दादिसामान्यग्रहणमभिहितम् । तस्मादनन्तरमीहा प्रवर्तते । कथंभूतेयम् ?, इत्याह– सतस्तत्र विद्यमानस्य गृहीतार्थस्य विशेषविमर्शद्वारेण मीमांसा विचारणा । केनोल्लेखेन ?, इत्याह– किमिदं वस्तु मया गृहीतं– शब्दः, अशब्दो वा रूप-रसादिरूपः ?; इदं च निश्चयार्थावग्रहाऽनन्तरभाविन्या ईहायाः स्वरूपमुक्तम् । अथ व्यवहारार्थावग्रहानन्तरसंभविन्याः स्वरूपमाह–'को होज्ज वेत्यादि' वा इत्यथवा, व्यवहारावग्रहेण शब्दे गृहीत इत्थमीहा प्रवर्तते- शाङ्ख-शार्ङ्गयोर्मध्ये कोऽयं भवेत् शब्दः– शाङ्खः, शार्ङ्गो वा ?· इति । ननु 'किं शब्दः, अशब्दो वा ?' इत्यादिकं संशयज्ञानमेव कथमीहा भवितुमर्हति ?। सत्यम्, किन्तु दिङ्मात्रमेवेदमिह दर्शितम्, परमार्थतस्तु व्यतिरेकधर्मनिराकरणपरः, अन्वयधर्मघटनप्रवृत्तश्चाऽपायाऽभिमुख एव बोध ईहा द्रष्टव्या, तद्यथा–

---

१ इति सामान्यग्रहणानन्तरमीहा सदर्थमीमांसा । किमिदं शब्दोऽशब्दः को भवेद् वा शाङ्ख-शार्ङ्गाणाम् ? ॥ २८९ ॥ ४ (द्वाध्ययः)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"अरण्यमेतत् सविताऽस्तमागतो न चाधुना संभवतीह मानवः । प्रायस्तवेतेन खगादिभाजा भाव्यं स्मरारातिसमाननाम्ना" ॥ १ ॥ इति । एतच्च प्रागुक्तमपि मन्दमतिस्मरणार्थं पुनरप्युक्तम् ॥ इति गाथार्थः ॥ २८९ ॥

अथ मतिज्ञानतृतीयभेदस्याऽपायस्य स्वरूपमाह–

[1]मेहुराइगुणत्तणओ संखस्सेव त्ति जं न संगस्स । विण्णाणं सोऽवाओ अणुगम-वइरेगभावाओ ॥ २९० ॥

'मधुर-स्निग्धादिगुणत्वात् शङ्खस्यैवाऽयं शब्दः, न शृङ्गस्य' इत्यादि यद् विशेषविज्ञानम् , सोऽपायो निश्चयज्ञानरूपः । कुतः ?, इत्याह– पुरोवर्त्यर्थधर्माणामनुगमभावादस्तित्वनिश्चयसद्भावात् , तत्राऽविद्यमानार्थधर्माणां तु व्यतिरेकभावाद् नास्तित्वनिश्चयसद्भावात् । अयं च व्यवहारार्थावग्रहानन्तरभावी अपाय उक्तः, निश्चयावग्रहानन्तरभावी तु स्वयमपि द्रष्टव्यः; तद्यथा– श्रोत्रग्राह्यत्वादिगुणतः 'शब्द एवाऽयं, न रूपादिः' इति । ईहा-ऽपायविषयाश्च विप्रतिपत्तयः प्रागपि निराकृताः, इति नेहोक्ताः ॥ इति गाथार्थः ॥ २९० ॥

अथ चतुर्थो मतिज्ञानभेदो धारणा, इयं चाऽविच्युति-वासना-स्मृतिभेदात् त्रिधा भवति, अतः सभेदामपि तामाह–

[2]तेयणंतरं तयत्थाविच्चवणं जो य वासणाजोगो । कालंतरे य जं पुणरणुसरणं धारणा सा उ ॥ २९१ ॥

तस्मादपायादनन्तरं तदनन्तरं यत् , तदर्थादविच्यवनम्– उपयोगमाश्रित्याऽभ्रंशः, यश्च वासनाया जीवेन सह योगः संबन्धः, यच्च तस्याऽर्थस्य कालान्तरे पुनरिन्द्रियैरुपलब्धस्य, अनुपलब्धस्य वा, एवमेव मनसाऽनुस्मरणं स्मृतिर्भवति, सेयं पुनस्त्रिविधाऽप्यर्थस्याऽवधारणरूपा धारणा विज्ञेया ॥ इति गाथाक्षरघटना ॥

भावार्थस्त्वयम्– अपायेन निश्चितेऽर्थे तदनन्तरं यावदद्यापि तदर्थोपयोगसातत्येन वर्तते, न तु तस्माद् निवर्तते, तावत् तदर्थोपयोगादविच्युतिर्नाम सा धारणायाः प्रथमभेदो भवति । ततस्तस्याऽर्थोपयोगस्य यदावरणं कर्म तस्य क्षयोपशमेन जीवो युज्यते, येन कालान्तरे इन्द्रियव्यापारादिसामग्रीवशात् पुनरपि तदर्थोपयोगः स्मृतिरूपेण समुन्मीलति । सा चेयं तदावरणक्षयोपशमरूपा वासना नाम द्वितीयस्तद्भेदो भवति । कालान्तरे च वासनावशात् तदर्थस्येन्द्रियैरुपलब्धस्य, अथवा तैरनुपलब्धस्याऽपि मनसि या स्मृतिराविर्भवति, सा तृतीयस्तद्भेद इति । एवं त्रिभेदा धारणा विज्ञेया । तुशब्दोऽवग्रहादिभ्यो विशेषद्योतनार्थः । विप्रतिपत्तयस्त्वेतद्विषया

१ क. ग. घ. छ. ज. 'रतिप्रियतमारिसं' । २ मधुरादिगुणत्वतः शङ्खस्यैवेति यद् नैं शृङ्गस्य । विज्ञानं सोऽपायोऽनुगम-व्यतिरेकभावात् ॥ २९० ॥
३ तदनन्तरं तदर्थाऽविच्यवनं च वासनायोगः । कालान्तरे च यत् पुनरनुस्मरणं धारणा सा तु ॥ २९१ ॥ ४ ज. 'तद्वास' । × प्रयोग-।

अपि प्रागेव निराकृताः ॥ इति गाथार्थः ॥ २९१ ॥

तदेवं "[1]से जहानामए केइ पुरिसे अव्वत्तं सद्दं सुणेज्ज" इत्यादिसूत्रानुरोधेन शब्दमाश्रित्याऽवग्रहादयो भाविताः । अथ सूत्रकारेणैव यदुक्तम्– "एवं एएणं अभिलावेणं अव्वत्तं रूवं रसं गंधं फासं" इत्यादि, तच्चेतसि निधाय भाष्यकारोऽप्यतिदेशमाह–

[3]सेसेसु वि रूवाइसु विसएसु होंति [4]रूवलक्खाइं । पायं पच्चासन्नत्तणेणमीहाइवत्थूणि ॥२९२ ॥

यथा शब्दे, एवं शेषेष्वपि रूपादिविषयेषु साक्षादनुक्तान्यपि [+]रूपलक्षाणि कथितानुसारप्रसरत्प्रज्ञानां चतुरचेतसां सुज्ञेयानि भवन्ति । कानि ?, इत्याह–ईहादीन्याभिनिबोधिकज्ञानस्य भेदवस्तूनि । केन रूपलक्षाणि ?, इत्याह– प्रायः प्रत्यासन्नत्वेन चक्षुरादिना गृह्यमाणस्य स्थाण्वादेः, तत्राऽगृह्यमाणेन पुरुषादिना सह प्रायो बहुभिर्धर्मैर्यत् प्रत्यासन्नत्वं या प्रत्यासत्तिः सादृश्यमिति यावत् , तेनेहादीनि ज्ञेयानि, न पुनरत्यन्तविलक्षण्ये स्थाण्वादेरुष्ट्रादिना सहेत्यर्थः, इदमुक्तं भवति– अवग्रहे तावत् सामान्यमात्रग्राहकत्वाद् द्वितीयवस्त्वपेक्षाऽपि न विद्यते, ईहा पुनरुभयवस्त्ववलम्बिनी, तत्र पुरोदृश्यमानस्य वस्तुनो यत् प्रतिपक्षभूतं वस्तु तत्प्रायो बहुभिर्धर्मैः प्रत्यासन्नं ग्राह्यम् , न पुनरत्यन्तविलक्षणम् ; [5]पुरो हि मन्दमन्दप्रकाशे दूराद् दृश्यमाने स्थाण्वादौ 'किमयं स्थाणुः, पुरुषो वा' इत्येवमेवेहा प्रवर्तते, ऊर्ध्वस्थानारोह-परिणाहतुल्यतादिभिः प्रायो बहुभिर्धर्मैः पुरुषस्य स्थाणुप्रत्यासन्नत्वादिति । 'किमयं स्थाणुः, उष्ट्रो वा ?' इत्येवं तु न प्रवर्तते, उष्ट्रस्य स्थाण्वपेक्षया प्रायोऽत्यन्तविलक्षणत्वात् । अत एव सामान्यमात्रग्राह्यवग्रहोऽत्रादौ न कृतः, किन्तु 'ईहादीनि' इत्येवमेवोक्तम् , उभयवस्त्ववलम्बित्वेनेहाया एव 'पायं पच्चासन्नत्तणेण' इतिविशेषणस्य सफलत्वात् । अपायस्याऽपि 'स्थाणुरेवाऽयं, न पुरुषः' इत्यादिरूपेण प्रवृत्तेः किञ्चिद् विशेषणस्य सफलत्वादादिशब्दोऽप्यविरुद्धः ॥ इति गाथार्थः ॥ ॥ २९२ ॥

इह 'किं शब्दः, अशब्दो वा ?' इति श्रोत्रेन्द्रियस्य प्रत्यासन्नवस्तूपदर्शनं कृतमेव । अथाऽशेषचक्षुरादीन्द्रियाणां विषयभूतानि प्रत्यासन्नवस्तूनि क्रमेण प्रदर्शयति–

[6]थाणु-पुरिसाइ-कुट्ठु-प्पलाइ-संभियकरिल्ल-मंसाई । सप्पु-प्पलनालाइव समाणरूवाइविसयाइं ॥ २९३ ॥

'ईहादिवस्तूनि रूपलक्षाणि' इत्युक्तम् । कथंभूतानि सन्ति पुनस्तानि रूपलक्षाणि ?, इत्याह– समानः समानधर्मा रूप-

१ तद्यथानामा कश्चित् पुरुषोऽव्यक्तं शब्दं शृणुयात् । २ एवमेतेनाऽभिलापेनाऽव्यक्तं रूपं रसं गन्धं स्पर्शम् । × सूप-।
३ शेषेष्वपि रूपादिषु विषयेषु भवन्ति रूपलक्षाणि । प्रायः प्रत्यासन्नत्वेनेहादिवस्तूनि ॥ २९२ ॥ ४ ग. 'लक्ष्याणि' । + सूप-।
५ स्थाणु-पुरुषादि-कुष्ठो-त्पलादि-संभृतकरील-मांसादि । सर्प-उत्पलनालादिवत् समानरूपादिविषयाणि ॥ २९३ ॥ 5 पुरतो- / ∆(अर्थशेष)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सादिविषयो येषामीहादीनां तानि समानरूपादिविषयाणीति पूर्वगाथायां संबन्धः । कः पुनरमीषां समानधर्मा रूपादिविषयः ?, इत्याह- स्थाणु-पुरुषादिवदिति पर्यन्ते निर्दिष्टोऽपि विषयोपदर्शनाभिद्योतको यच्छब्दः सर्वत्र योज्यते । ततश्चक्षुरिन्द्रियप्रभवस्येहादेः स्थाणु-पुरुषादिवत् समानधर्मा रूपविषयो द्रष्टव्यः ; आदिशब्दात् 'किमियं शुक्तिका, रजतखण्डं वा ?' 'मृगतृष्णिका, पयःपूरो वा ?' रज्जुः, विषधरो वा ?' इत्यादिपरिग्रहः । घ्राणेन्द्रियप्रभवस्येहादेः कुष्ठो-त्पलादिवत् समानगन्धो विषयः, तत्र कुष्ठं गन्धिकद्रव्यविकेयो वस्तुविशेषः, उत्पलं पद्मम् ; अनयोः किल समानो गन्धो भवति । तत ईदृशेन गन्धेन 'किमिदं कुष्ठम्, उत्पलं वा ?' इत्येवमीहाप्रवृत्तिः, आदिशब्दात् 'किमत्र सप्तच्छदाः, मत्तकरिणो वा ?' 'कस्तूरिका, वनगजमदो वा ?' इत्यादिपरिग्रहः । रसनेन्द्रियप्रभवस्येहादेः संभृतकरील-मांसादिवत् समानरसो विषयः । तत्र संभृतानि संस्कृतानि संधानीकृतान्युद्भूतानि यानि वंशजालिसंबन्धीनि करीलानि, तथा मांसम्, अनयोः किलाऽऽस्वादः समानो भवति । ततोऽन्धकारादावन्यतरस्मिन् जिह्वाग्रमदत्ते भवत्येवम्-'किमिदं संभृतवंश-करीलम्, आमिषं वा ?' इति ; आदिशब्दाद् 'गुडः, खण्डं वा ?' 'मृद्वीका, शुष्कराजादनं वा ?' इत्यादिपरिग्रहः । स्पर्शनेन्द्रिय-प्रभवस्येहादेः सर्पो-त्पलनालादिवत् समानस्पर्शो विषयः, सर्पो-त्पलनालयोश्च तुल्यस्पर्शत्वेनेहाप्रवृत्तिः सुगमैव, आदिशब्दात् स्त्री-पुरुष-श्लेष्टु-एलादिसमानस्पर्शवस्तुपरिग्रहः ॥ इति गाथार्थः ॥ २९३ ॥

अथ यदुक्तं सूत्रे- "[1]से जहानामए केइ पुरिसे अव्वत्तं सुमिणं पासेज्जा" इत्यादि, तदनुसृत्य स्वप्ने मनसोऽप्यवग्रहादीन् दर्शयन्नाह-

[2]एवं चिय सुमिणाइसु मणसो सद्दाइएसु विसएसु । होंतिंदियवावाराभावे वि अवग्गहाईया ॥ २९४ ॥

एवमेवोक्तानुसारेणेन्द्रियव्यापाराभावेऽपि स्वप्नादिषु, आदिशब्दाद् दत्तकपाट-सान्धकाराऽप्रवरकादीनीन्द्रियव्यापाराभाववन्ति स्थानानि गृह्यन्ते, तेषु केवलस्यैव मनसो मन्यमानेषु शब्दादिविषयेष्ववग्रहादयोऽवग्रहे-हा-ऽपाय-धारणा भवन्तीति स्वयमभ्यूह्याः, तथाहि- स्वप्नादौ चित्तोत्प्रेक्षामात्रेण श्रूयमाणे गीतादिशब्दे प्रथमं सामान्यमात्रोत्प्रेक्षायामवग्रहः, 'किमयं शब्दः, अशब्दो वा?' इत्याद्यु-त्प्रेक्षायां त्वीहा, शब्दनिश्चये पुनरपायः, तदनन्तरं तु धारणा । एवं देवतादिरूपे, कर्पूरादिगन्धे, मोदकादिरसे, कामिनीकुचकलशा-दिस्पर्शे चोत्प्रेक्ष्यमाणेऽवग्रहादयो मनसः केवलस्य भावनीयाः ॥ इति गाथार्थः ॥ २९४ ॥

---

१ ज. 'न्युत्थिता' । २ तद्यथानामा कश्चित् पुरुषोऽव्यक्तं स्वप्नं पश्येत् ।

३ एवमेव स्वप्नादिषु मनसः शब्दादिषु विषयेषु । भवन्तीन्द्रियव्यापाराभावेऽप्यवग्रहादयः ॥ २९४ ॥

आह- नन्वेतेऽवग्रहादय उत्क्रमेण, व्यतिक्रमेण वा किमिति न भवन्ति, यद्वा, ईहादयस्त्रयः, द्वौ, एको वा किं नाऽभ्युपगम्यन्ते, यावत् सर्वेऽप्यभ्युपगम्यन्ते ?, इत्याशङ्क्याह—

[1]उक्कमओऽइक्कमओ एगाभावे वि वा न वत्थुस्स । जं सब्भावाहिगमो, तो सव्वे नियमियक्कमा य ॥ २९५ ॥

एषामवग्रहादीनामुत्क्रमेणोत्क्रमतः, अतिक्रमेणाऽतिक्रमतः, अपिशब्दस्य भिन्नक्रमत्वादेकस्याऽप्यभावे वा यस्माद् न वस्तुनः सद्भावाऽधिगमः, तस्मात् सर्वे चत्वारोऽप्येष्टव्याः, तथा नियमितक्रमाश्च- सूत्रनिर्दिष्टपरिपाट्यन्विताश्च 'भवन्त्येतेऽवग्रहादयः' इति प्रक्र-माल्लभ्यते ॥ इत्यक्षरयोजना ॥

भावार्थस्तूच्यते— तत्र पश्चानुपूर्वीभवनमुत्क्रमः, अनानुपूर्वीभवनं त्वतिक्रमः, कदाचिदवग्रहमतिक्रम्येहा, तामप्यतिलङ्घ्या-ऽपायः, तमप्यतिवृत्य धारणेति, एवमनानुपूर्वीरूपोऽतिक्रम इत्यर्थः । एताभ्यामुत्क्रम-व्यतिक्रमाभ्यां तावदवग्रहादिभिर्वस्तुस्वरूपं नावग-म्यते । तथा, एषां मध्ये एकस्याऽप्यन्यतरस्याऽभावे वैकल्येन वस्तुस्वभावावबोध इत्यसकृदुक्तमायमेव । ततः सर्वेऽप्यमी एष्टव्याः, न त्वेकः, द्वौ, त्रयो वेत्यर्थः । तथा ' उग्गहो ईह अवाओ य धारणा एव होंति चत्तारि ' इत्यस्यां गाथायां यथैवकारेण पूर्वमेतेषां नियमितः क्रमः, तथैवैते नियमितक्रमा भवन्ति, नोत्क्रमा-ऽतिक्रमाभ्यामिति भावः ॥ इति गाथार्थः ॥ २९५ ॥

अथोत्क्रमा-ऽतिक्रमयोः, एकादिवैकल्ये चावग्रहादीनां वस्त्वधिगमाभावे युक्तिमाह-

[2]ईहिज्जइ नाऽगहियं नज्जइ नाणीहियं न याऽनायं । धारिज्जइ जं वत्थुं तेण क्कमोऽवग्गहाई उ ॥२९६ ॥

यस्मादवग्रहेणाऽगृहीतं वस्तु नेह्यते- न तत्रेहा प्रवर्तते, ईहाया विचाररूपत्वात्, अगृहीते च वस्तुनि निरास्पदत्वेन विचाराऽयो-गादिति भावः । तदनेन कारणेनाऽऽदाववग्रहं निर्दिश्य पश्चादीहा निर्दिष्टा । न चाऽनीहितमविचारितं ज्ञायते- अपायविषयतां याति, अपायस्य निश्चयरूपत्वात्, निश्चयस्य च विचारपूर्वकत्वादिति हृदयम् । एतदभिप्रायवता चाऽपायस्याऽऽदावीहा निर्दिष्टेति । न चाऽज्ञातम्- अपायेनाऽनिश्चितं, धार्यते धारणाविषयीभवति, वस्तुधारणाया अर्थावधारणरूपत्वात्, अवधारणस्य च निश्चयमन्तरेणा-ऽयोगादित्यभिप्रायः । ततश्च धारणादावपायः । ततः किम् ?, इत्याह- तेनाऽवग्रहादिरेव क्रमो न्याय्यः, नोत्क्रमा-ऽतिक्रमौ, यथोक्तन्या-येन वस्त्ववगमाभावप्रसङ्गात् ॥ इति गाथार्थः ॥ २९६ ॥

---

१ उत्क्रमतोऽतिक्रमतः एकाभावेऽपि वा न वस्तुनः । यतः स्वभावाधिगमः, ततः सर्वे नियमितक्रमाश्च ॥२९५॥ २ अवग्रह ईहाऽपायश्च धारणैव भवन्ति चत्वारि ।

३ ईह्यते नाऽगृहीतं ज्ञायते नाऽनीहितं न चाऽज्ञातम् । धार्यते यद् वस्तु तेन क्रमोऽवग्रहादिस्तु ॥ २९६ ॥ ४ क. ग. 'स्ववधिग' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदेवं निराकृतौ सयुक्तिकमुत्क्रमा-ऽतिक्रमौ । अथ यदुक्तम्– '[1]एगाभावे वि वा न वत्थुस्स जं सब्भावाहिगमो तो सव्वे' त्ति, तत्रापीयमेव युक्तिरिति दर्शयन्नाह–

[2]एतो च्चिय ते सव्वे भवंति भिन्ना य णेव समकालं । न वइक्कमो य तेसिं न अन्नहा नेयसब्भावो ॥२९७॥

यत एव 'नाऽगृहीतमीह्यते' इत्याद्युक्तम्, एतस्मादेव च तेऽवग्रहादयः सर्वे चत्वारोऽप्येष्टव्या भवन्ति, उक्तन्यायाद् नैक-वैकल्येऽपि मतिज्ञानं संपद्यत इत्यर्थः । '[3]पूर्वमवगृहीतमीह्यते' इत्याद्युक्तेरेव च ते भिन्नाः– परस्परमसंकीर्णाः, उत्तरोत्तराऽपूर्वभिन्नवस्तुपर्याय-ग्रहणादिति । 'नाऽगृहीतमीह्यते' इत्याद्युक्तेरेव च न ते समकालं, भिन्नाः सिद्धास्तेऽवग्रहादयः समकालमपि नैव भवन्ति, युगपन्न जायन्त इत्यर्थः, 'पूर्वमवगृहीतमेवोत्तरकालमीह्यते, ईहोत्तरकालमेव च निश्चीयते' इत्याद्युक्तन्यायेनैवाऽवग्रहादीनामुत्पत्तिकालस्य भिन्नत्वाद् न युगपत् संभव इति भावः । उक्तयुक्तेरेव च तेषां न व्यतिक्रमः, उपलक्षणत्वाद् 'नाऽप्युत्क्रमः' इत्यपि द्रष्टव्यम् । एतच्च '[4]तेण कमो-ऽवग्गहाई उ' इत्यनन्तरगाथाचरमपादेन सामर्थ्यादुक्तमपि प्रस्तावात् पुनरपि साक्षादुक्तम्, इत्यदोषः । तदेवं '[4]ईहिज्जइ नागहियं' इत्यादियुक्तेर्यथोक्तधर्मका एवाऽवग्रहादयः, न विपर्ययधर्माण इति साधितम् । अथ ज्ञेयवशेनाऽप्येषां यथोक्तधर्मकत्वं सिसाधयिषुरिद-माह– 'न अन्नहा नेयसब्भावो त्ति' ज्ञेयस्याऽप्यवग्रहादिग्राह्यस्य शब्द-रूपादेर्नान्यथा स्वभावोऽस्ति, येनाऽवग्रहादयस्तद्ग्राहका यथो-क्तरूपतां परित्यज्याऽन्यथा भवेयुरित्यर्थः । इदमुक्तं भवति– ज्ञेयस्याऽपि शब्दादेः स स्वभावो नास्ति, य एतैरवग्रहादिभिरेकादिविकलैर-भिन्नैः, समकालभाविभिः, उत्क्रमाऽतिक्रमवद्भिश्चाऽवगम्येतः किन्तु शब्दादिज्ञेयस्वभावोऽपि तथैव व्यवस्थितो यथाऽमीभिः सर्वैर्भिन्नैः, असमकालैः, उत्क्रमा-ऽतिक्रमरहितैश्च संपूर्णो यथावस्थितश्चाऽवगम्यते, अतो ज्ञेयवशेनाऽप्येते यथोक्तरूपा एव भवन्ति । तदेवं '[1]उक्कमओऽइक्कमओ एगाभावे वि वा' इत्यादिगाथोक्तं प्रसङ्गतोऽन्यदपि भिन्नत्वम्, असमकालत्वं च समर्थितम् ॥ इति गाथार्थः॥२९७॥

अत्र परः प्राह–

[5]अब्भत्थेऽवाओ च्चिय कत्थइ लक्खिज्जई इमो पुरिसो । अन्नत्थ धारण च्चिय पुरोवलद्धे इमं तं ति ॥ २९८ ॥

स्वभ्यस्तेऽनवरतं दृष्टपूर्वे, विकल्पिते, भाषिते च विषये पुनः क्वचित् कदाचिदवलोकितेऽवग्रहे-हाद्वयमतिक्रम्य प्रथमतो-

---

१ गाथा २९५ । २ एतस्मादेव ते सर्वे भवन्ति भिन्नाश्च नैव समकालम् । न व्यतिक्रमश्च तेषां नाऽन्यथा ज्ञेयसद्भावः ॥ २९७ ॥ ३ क. ग. घ. छ. 'नाऽगृ' ।
४ गाथा २९६ । ५ अभ्यस्तेऽपाय एव क्वचिल्लक्ष्यतेऽसौ पुरुषः । अन्यत्र धारणैव पुरोपलब्धे इदं तदिति ॥ २९८ ॥

ऽप्यपाय एव लक्ष्यतेऽनुभूयते निर्विवादमशेषैरपि जन्तुभिः, यथा 'असौ पुरुषः' इति । अन्यत्र पुनः क्वचित् पूर्वोपलब्धे सुनिश्चिते दृढवासने विषयेऽवग्रहे-हा-ऽपायानतिलङ्घ्य स्मृतिरूपा धारणैव लक्ष्यते, यथा 'इदं तद् वस्तु यदस्माभिः पूर्वमुपलब्धम्' इति । तत् कथमुच्यते- उत्क्रमा-ऽतिक्रमाभ्याम्, एकादिवैकल्ये च न वस्तुसद्भावाधिगमः ?– इदं च कथमभिधीयते–'ईहिज्जइ नागहियं' इत्यादि ? इति प्रेरकाऽभिप्रायः ॥ इति गाथार्थः ॥ २९८ ॥

भ्रान्तोऽयमनुभव इति दर्शयन्नाह–

[1]उप्पलदलसयवेहे व्व दुव्विभावत्तणेण पडिहाइ । समयं व सुक्कसक्कुलिदसणे विसयाणमुवलद्धी ॥ २९९॥

'क्वचित् प्रथममेवाऽपायः, क्वचित्तु धारणैव' इति यत् त्वया प्रेर्यते, तत् 'प्रतिभाति' इत्यनन्तरगाथोक्तेन संबन्धः । केनैतत् प्रतिभाति ?, इत्याह– दुःखेन विभाव्यते दुर्विभावो दुर्लक्षस्तद्भावस्तत्त्वं तेन दुर्विभावत्वेन- दुर्लक्षत्वेन 'अवग्रहादिकालस्य' इति गम्यते। कस्मिन्निव ?, इत्याह– उत्पलं पद्मं तस्य दलानि पत्राणि तेषां शतं तस्य सूच्यादिना वेधनं वेधस्तस्मिन्निव । इदमुक्तं भवति– यथा तरुणः समर्थपुरुषः पद्मपत्रशतस्य सूच्यादिना वेधं कुर्वाण एवं मन्यते– मयैतानि युगपद् विद्धानि, अथ च प्रतिपत्रं तानि कालभेदेनैव भिद्यन्ते, न चाऽसौ तं कालमतिसौक्ष्म्याद् भेदेनाऽवबुध्यते, एवमत्राऽप्यवग्रहादिकालस्याऽतिसूक्ष्मतया दुर्विभावनीयत्वेनाऽप्रतिभासः, न पुनरसत्त्वेन, ईहादयो ह्यन्यत्र क्वचित् तावत् स्फुटमेवाऽनुभूयन्ते, यत्राऽपि स्वसंवेदनेन नाऽनुभूयन्ते, तत्राऽपि '[2]ईहिज्जइ नागहियं नज्जइ नाणीहियं' इत्यादि प्रागसकृदभिहितयुक्तिकलापादवसेयाः । तस्मादुत्पलदलशतवेधोदाहरणेन भ्रान्त एवाऽयं प्रथमत एवाऽपायादि-प्रतिभासः । अथोदाहरणान्तरेणाऽप्यस्य भ्रान्ततामुपदर्शयति– 'समयं वेत्यादि' 'वा' इत्यथवा, यथा शुष्कशष्कुलीदशने समयं युगपदेव सर्वेन्द्रियविषयाणां शब्द-रूप-रस-गन्ध-स्पर्शानामुपलब्धिः प्रतिभाति, तथैषोऽपि प्राथम्येनाऽपायादिप्रतिभासः । एतदुक्तं भवति– यथा कस्यचिच्छुष्कां दीर्घां शष्कुलिकां भक्षयतः, तच्छब्दोत्थानाच्छब्दविज्ञानमुपजायते, अत एव शुष्कत्वविशेषणम्, मृद्व्या-मेतस्यां शब्दानुत्थानादिति । शब्दश्रवणसमकालमेव च दीर्घत्वात् तस्या दृष्ट्या तद्रूपदर्शनं चाऽयमनुभवति, अत एव च दीर्घ-त्वविशेषणम्, अतिह्रस्वत्वे मुखप्रविष्टायास्तस्याः शब्दश्रवणसमकालं रूपदर्शनानुभवाभावादिति । रूपदर्शनसमकालं च तद्गन्धज्ञान-मनुभवति, अत एव शष्कुलीग्रहणं, गन्धोत्कटत्वात् तस्याः, इक्षुखण्डादिषु तु दीर्घेष्वपि तथाविधगन्धाभावादिति । गन्धादिज्ञानसम-कालं च तद्रस-स्पर्शज्ञाने अनुभवति । तदेवं पञ्चानामपीन्द्रियविषयाणामुपलब्धिर्युगपदेवाऽस्य प्रतिभाति । न चेयं सत्या, इन्द्रियज्ञा-

---

+लक्ष्य-/ १ गाथा २९६ । २ उत्पलदलशतवेध इव दुर्विभावत्वेन प्रतिभाति । समयं वा शुष्कशष्कुलीदशने विषयाणामुपलब्धिः ॥ २९९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नानां युगपदुत्पादायोगात्, तथाहि- मनसा सह संयुक्तमेवेन्द्रियं स्वविषयज्ञानमुत्पादयति, नान्यथा, अन्यमनस्कस्य रूपादिज्ञानानुपलम्भात्। न च सर्वेन्द्रियैः सह मनो युगपत् संयुज्यते, तस्यैकोपयोगरूपत्वात्, एकत्र ज्ञातरि एककालेऽनेकैः[2] संयुज्यमानत्वाऽयोगात्। तस्माद् मनसोऽत्यन्ताऽऽशुसंचारित्वेन कालभेदस्य दुर्लक्षत्वाद् युगपत् सर्वेन्द्रियविषयोपलब्धिरस्य प्रतिभाति। परमार्थतस्त्वस्यामपि कालभेदोऽस्त्येव। ततो यथाऽसौ भ्रान्तैर्नोपलक्ष्यते, तथाऽवग्रहादिकालेऽपीति प्रकृतम्। दीर्घत्वविशेषणं च शष्कुलिकाया गाथायामनुक्तमप्युपलक्षणत्वाद् विहितमिति परिभावनीयम्। तदेवमवग्रहादीनां नैकादिवैकल्यम्, नाऽप्युत्क्रमातिक्रमौ, इति स्थितम्॥ इति गाथार्थः॥ २९९॥

'उग्गहो ईहअवाओ य' इत्यादिगाथायाम् 'आभिनिबोधिकज्ञानस्य चत्वारि भेदवस्तूनि समासतः' इत्युक्तम्, तत् किं व्यासतो बहुभेदमप्याभिनिबोधिकज्ञानं भवति?, इत्याशङ्क्य तद्भेदबहुविधत्वदर्शनात् 'समासेन' इति विशेषणस्य सफलत्वमाह—

सोइंदियाइभेएण छव्विहा वग्गहादओऽभिहिआ। ते होंति चउव्वीसं चउव्विहं वंजणोग्गहणं॥ ३००॥
अट्ठावीसइभेयं एयं सुयनिस्सियं समासेणं। केइ तु वंजणोग्गहवज्जे च्छोढूणमेयम्मि॥ ३०१॥
अस्सुयनिस्सियमेवं अट्ठावीसइविहं ति भासंति। जमवग्गहो दुभेओऽवग्गहसामण्णओ गहिओ॥३०२॥

श्रोत्रेन्द्रियादीनां पञ्चानामिन्द्रियाणां मनःषष्ठानां यो भेदस्तेनाऽवग्रहादयः प्रत्येकं षड्विधाश्चत्वारोऽप्यभिहिताः। ततस्तैः[4] षड्भिश्चत्वारो गुणिताश्चतुर्विंशतिर्भवन्ति। अन्यच्च स्पर्शन-रसन-घ्राण-श्रोत्रेन्द्रियचतुष्टयभेदाद् व्यञ्जनावग्रहणं व्यञ्जनावग्रहश्चतुर्विधो भवति। एवमेतच्छ्रुतनिश्रितमाभिनिबोधिकज्ञानं सर्वमप्यष्टाविंशतिविधं संपद्यते। एतदपि भेदाभिधानं वक्ष्यमाणबहुतरभेदकलापापेक्षयाऽद्यापि समासेन संक्षेपेण द्रष्टव्यम्॥

---

१ ग. ज. 'स्य खरू'। २ ज. 'कैः सह यु'। ३ गाथा १७८। + ते-।

४ श्रोत्रेन्द्रियादिभेदेन षड्विधा अवग्रहादयोऽभिहिताः। ते भवन्ति चतुर्विंशतिश्चतुर्विधं व्यञ्जनावग्रहणम्॥ ३००॥
अष्टाविंशतिभेदमेतत् श्रुतनिश्रितं समासेन। केचित्तु व्यञ्जनावग्रहवर्जे क्षिप्त्वैतस्मिन्॥ ३०१॥
अश्रुतनिश्रितमेवमष्टाविंशतिविधमिति भाषन्ते। यदवग्रहो द्विभेदोऽवग्रहसामान्यतो गृहीतः॥ ३०२॥ ५ घ.छ.ज. 'श्रवणेन्द्रि'।

अन्ये त्वेतानष्टाविंशतिभेदानन्यथा पूरयन्ति, तन्मतमुपदर्शयति- 'केइ त्तित्यादि' केचित् पुनराचार्या एतस्मिन्नेव श्रुतनिश्रिते मतिज्ञानभेदसमुदाये व्यञ्जनावग्रहभेदचतुष्टयवर्जे "उप्पत्तिया, वेणइया, कम्मिया, पारिणामिया" इत्यादिनाऽन्यत्र[3], प्रागप्यापि च प्रतिपादितस्वरूपमश्रुतनिश्रितमौत्पत्तिक्यादि बुद्धिचतुष्टयं क्षिप्त्वा मीलयित्वा, एवमष्टाविंशतिविधं सर्वमपि मतिज्ञानमिति भाषन्ते। अयं हि तेषामभिप्रायः- मतिज्ञानस्य संपूर्णस्येह भेदाः प्रतिपादयितुं प्रक्रान्ताः, यदि चाऽश्रुतनिश्रितं बुद्धिचतुष्टयं न गण्यते तदा श्रुतनिश्रितरूपस्य मतिज्ञानदेशस्यैवैतेऽष्टाविंशतिभेदाः प्रोक्ता भवन्ति, न तु सर्वस्यापि; यदा तूक्तन्यायेन श्रुतनिश्रितम्, अश्रुतनिश्रितं च मील्यते तदा सर्वस्याऽपि तस्य भेदाः सिद्धा भवन्ति। ननु साधूक्तं तैः, केवलमेवं सति व्यञ्जनावग्रहचतुष्टयं क्व क्रियताम्?, न ह्येतदपि विक्रीयमाणं खलखण्डमात्रेण क्रीतम्, किन्त्विदमपि मतिज्ञानान्तर्गतमेव। ततोऽस्माद् निष्काश्यमानं वराकमिदं काऽवस्थितिं बध्नातु?, इत्याशङ्क्याह- 'जमवग्गहो इत्यादि' यद् यस्माद् व्यञ्जना-ऽर्थावग्रहभेदतो योऽयमवग्रहो द्विभेदः प्रागुक्तः सोऽवग्रहसामान्येन गृहीतोऽवग्रहसामान्येऽन्तर्भावितः, भवति च विशेषाणां सामान्येऽन्तर्भावः, यथा सेनायां गजादीनाम्, वनादौ च धव-खदिरादीनाम्। अतोऽवग्रहस्य सामान्यरूपतयैकत्वादवग्रहे-हा-ऽपाय-धारणानामिन्द्रिय-मनोभेदेन प्रत्येकं षड्विधत्वाच्छ्रुतनिश्रितमतिज्ञानस्य चतुर्विंशतिरेव भेदाः, अश्रुतनिश्रितस्य तु बुद्धिचतुष्टयलक्षणाश्चत्वारः, इत्येवं सर्वे मतिज्ञानस्याष्टाविंशतिभेदं सिध्यति। इति कोषांचिद् मतम्॥ इति गाथात्रयार्थः॥ ३००॥ ३०१॥ ३०२॥

एतच्च तन्मतमयुक्तम्। कुतः?, इत्याह-

चउवइरित्ताभावा जम्हा न तमोग्गहाईओ। भिन्नं तेणोग्गहाइसामण्णओ तयं तग्गयं चेव॥ ३०३॥

चतुर्भ्योऽवग्रहे-हा-ऽपाय-धारणावस्तुभ्यो व्यतिरिक्तं चतुर्व्यतिरिक्तं तस्य चतुर्व्यतिरिक्तस्याश्रुतनिश्रितस्याभावात् कारणाद् यस्माद् यतो न तदश्रुतनिश्रितमवग्रहादिभ्यो भिन्नम्। ततः किम्?, इत्याह- तेन कारणेनावग्रहादिसामान्यादवग्रहादिसामान्यमाश्रित्य 'तयं तग्गयं चेव त्ति' तेष्ववग्रहादिसंबन्धिष्वष्टाविंशतिभेदेष्वन्तर्गतं प्रविष्टमन्तर्भूतं तदन्तर्गतमेवाऽश्रुतनिश्रितं बुद्धिचतुष्टयम्। अतः किमिति व्यञ्जनावग्रहचतुष्टयं पातयित्वाऽश्रुतनिश्रितं बुद्धिचतुष्टयं पुनरपि प्रक्षिप्यते?, इत्यभिप्रायः। इदमुक्तं भवति-'सोइंदियाइभेएण छव्विहा

---

१ घ. छ. ज. 'दये'। २ औत्पत्तिकी, वैनयिकी, कार्मिकी, पारिणामिकी। ३ नन्द्यध्ययनसूत्रे।

४ चतुर्व्यतिरिक्ताभावाद् यस्माद् न तदवग्रहादयः। भिन्नं तेनाऽवग्रहादिसामान्यतस्तद् तद्गतमेव॥३०३॥ ५ क.ग. 'य तं त' घ. 'मयं त'। ६ गाथा ३००।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वग्गहादओ' इत्यादिना प्रतिपादितैरवग्रहादिसंबन्धिभिरष्टाविंशतिभेदैः किलासंगृहीतत्वाद् व्यञ्जनावग्रहचतुष्टयापगमं कृत्वाऽश्रुतनिश्रितं बुद्धिचतुष्टयं मतान्तरवादिभिः प्रक्षिप्यते; एतच्चाऽयुक्तम् , यतः 'सोइंदियाइभेएण' इत्यादिनाऽवग्रहादीनामेवाऽष्टाविंशतिर्भेदाः प्रोक्ताः, अवग्रहादयश्च बुद्धिचतुष्टयेऽपि सन्ति, अतोऽवग्रहादिभणनद्वारेण तदप्यश्रुतनिश्रितं बुद्धिचतुष्टयमेतेष्वष्टाविंशतिभेदेषु संगृहीतमेव, इति किमिति तैः पुनरपि प्रक्षिप्यते ? ॥ इति गाथार्थः ॥ ३०३ ॥

तत्रैतत् स्यात् प्रष्टव्यं परस्य– 'कथमौत्पत्तिक्यादिबुद्धिचतुष्टयेऽवग्रहादयः संभवन्ति ? । तदत्र यथा ते भवन्ति, तथा दर्शयन्नाह–

[2]किह[3] पडिकुक्कुडहीणो जुज्झे बिंबेण वग्गहो, ईहा । किं सुसिलिट्ठमवाओ दप्पणसंकंतबिंबं ति ॥ ३०४ ॥

इह किलाऽऽगमे–

"भरह-सिल-मिंढ[4]-कुक्कुड-तिल-वालुय-हत्थि-अगड-वणसंडे । पायस-अइआ-पत्ते खाडहिला पञ्च पियरो य" ॥ १ ॥

इत्यादिनौत्पत्तिक्यादिबुद्धीनां बहून्युदाहरणान्युक्तानि, तन्मध्याच्छेषोपलक्षणार्थं कुर्कुटोदाहरणमाश्रित्यौत्पत्तिक्यां बुद्धाववग्रहादयो भाव्यन्ते– राज्ञा नटकुमारकस्य भरतस्य किल बुद्धिपरीक्षणार्थमादिष्टं यदुत– अयं मदीयकुर्कुटो द्वितीयकुर्कुटमन्तरेणैकैक एव योधनीयः। ततस्तेन जिज्ञासितं मनसि 'कथमयं प्रतिकुर्कुटहीनः प्रतिपक्षभूतद्वितीयकुर्कुटवर्जितो युध्येत ?। एतच्च जिज्ञासमानस्य तस्य झगित्येव स्फुरितं चेतसि । किम् ?, इत्याह– बिम्बेनेति आत्मीयेन प्रतिबिम्बेन पुरो वीक्षितेन दर्पाध्मातत्वादयं युध्यत इत्यवगृहीतमित्यर्थः। एतच्च किम्[5], इत्याह– अवग्रहसामान्येनैव बिम्बमात्रावग्रहणादवग्रहो मतिप्रथमभेद इत्यर्थः । ईहा तर्हि का ?, इत्याह– 'ईहा किं सुसिलिट्ठमिति' किं पुनस्तत् प्रतिबिम्बमस्य योधनाय सुश्लिष्टं सुष्ठु युज्यमानकं भवेत्– किं तडागपयःपूरादिगतम्, आहोस्विद् दर्पणगतम् ?, इत्यादिबिम्बविशेषान्वेषणमीहेत्यर्थः । अपायमुपदर्शयति– 'अवाओ दप्पणसंकंतबिंबं ति' कल्लोलादिभिः प्रतिक्षणमपनीयमानत्वात्, अस्पष्टत्वाच्च जलादिगतबिम्बमिह न युक्तम् ; ततः स्थिरत्वेन, स्पष्टादित्वेन च चरणाऽऽघातादिविषयत्वाद् दर्पणसंक्रान्तमेव तदत्र युज्यते, इत्येवं बिम्बविशेषनिश्चयोऽपाय इत्यर्थः । एवमन्येष्वपि बुद्ध्युदाहरणेष्ववग्रहादयो भावनीयाः । तस्माद् बुद्धिचतुष्टयेऽप्येषां सद्भावाच्छ्रुत

१ गाथा ३०० । २ कथं प्रतिकुर्कुटहीनो युध्येत बिम्बेनाऽवग्रहः, ईहा । किं सुश्लिष्टमपायो दर्पणसंक्रान्तबिम्बमिति ॥ ३०४ ॥ ३ घ. 'कह' । ४ श्रीनन्दीसूत्रे ।
५ भरत-शिला-मेषु-कुर्कुट-तिल-वालुका-हस्ति-अवट-वनखण्डानि । पायसा-ऽऽगमन-पत्राणि तरुमर्कटिका ('खीसकोली'इति भाषायाम्) पञ्च पितरश्च ॥१॥ ६ घ. 'ढि'

निश्रितमतिज्ञानसंबन्धिष्ववग्रहादिगताऽष्टाविंशतिभेदेष्ववग्रहादिसाम्येन. बुद्धिचतुष्टयस्याऽन्तर्भावो भावनीयः । ततो न युक्तं व्यञ्जनावग्रहचतुष्टयाऽपगमेन पुनर्बुद्धिचतुष्टयप्रक्षेपणम्, इति स्थितम् ॥ इति गाथार्थः ॥ ३०४ ॥

आह– ननु यद्यवग्रहादिसाम्येनाऽश्रुतनिश्रितं श्रुतनिश्रिताऽवग्रहादिष्वन्तर्भवति, तर्हि "[3]आभिणिबोहियनाणं दुविहं पन्नत्तं, जहा– सुयनिस्सियं, अस्सुयनिस्सियं च" इत्येवमागमे यः श्रुतनिश्रितादश्रुतनिश्रितस्य भेद उक्तः, स विशीर्यत एव, इत्याशङ्क्याह–

[5]जह उग्गहाइसामण्णउ वि सोइंदियाइणा भेओ । तह उग्गहाइसामण्णओ वि तमणिस्सिया भिन्नं ॥३०५

यथेहाऽवग्रहादीनामवग्रहादिसामान्ये सत्यपि, अवग्रहादित्वे तुल्येऽपि सतीत्यर्थः। किम् ?, इत्याह– श्रोत्रेन्द्रियादिना भेदः, तथाहि एके श्रोत्रेन्द्रियसंबन्धिनोऽवग्रहादयः, यावदन्ये स्पर्शनेन्द्रियसंबन्धिनः, अपरे तु मनःसंबन्धिनः; तथा तेनैव प्रकारेणावग्रहादिसामान्ये सत्यपि तदश्रुतनिश्रितं भिन्नं, 'श्रुतनिश्रितात्' इति शेषः । कस्माद्धेतोर्भिन्नम् ?, इत्याह– ' अणिस्सिय त्ति ' भावप्रधानोऽयं निर्देशः अनिश्रितत्वात्– श्रुतानिश्रितत्वादित्यर्थः । एतदुक्तं भवति– अष्टाविंशतिभेदविचारप्रक्रमेऽवग्रहादिमत्त्वं सामान्यं धर्ममाश्रित्याऽश्रुतनिश्रितस्य श्रुतनिश्रित एवाऽन्तर्भावो विवक्ष्यते, [6]श्रुता-ऽश्रुतनिश्रितविचारप्रस्तावे त्वश्रुतनिश्रितत्वं विशिष्टं धर्ममुररीकृत्य श्रुतनिश्रिताद्श्रुतनिश्रितं पृथगेवेष्यते, इत्यागमोक्तस्तयोर्भेदोऽपि न किञ्चिद् विशीर्यते । न च वक्तव्यम्– कथमेकस्यैवैकस्मादेव भेदश्चाऽभेदश्च, विरोधात् ? इतिः यतो यदि तेनैव धर्मेण भेदः, अभेदश्चेष्येत, स्यात् तदा विरोधः, धर्मान्तरनिबन्धनौ तु भेदा-ऽभेदौ न विरुध्येते । किं हि नाम तद् वस्त्वस्ति, यस्य वस्त्वन्तराद् भेदा-ऽभेदौ न स्तः ? । घटादयोऽपि हि घटादित्वसामान्येन परस्परमभेदिनोऽपि स्वद्रव्य-क्षेत्र-कालादिमत्त्वेन भिन्ना इति । अत्र बहु वक्तव्यम् , तत्तु नोच्यते, ग्रन्थगहनताप्रसङ्गात् , अनेकान्तजयपताकादिषु विस्तरेणोक्तत्वाच्च ॥ इति गाथार्थः ॥ ३०५ ॥

स्यादेतत् , किमेतावता कष्टेन ?, मदीयव्याख्यापक्ष एव सुखावहः, [6]श्रुता-ऽश्रुतनिश्रितयोरभेदापत्तेरभावात् , समस्तमतिज्ञानभेदभणनाच्चेति । तदेतदयुक्तम् , सिद्धान्ताभिप्रायबहिर्भूतत्वात् । एतदेवोपसंहारपूर्वकमाह—

[7]अट्ठावीसइभेयं सुयनिस्सियमेव केवलं तम्हा । जम्हा तम्मि समत्ते पुणरस्सुयनिस्सियं भणियं ॥ ३०६ ॥

१ घ. 'सामान्येन' २ आभिनिबोधिकज्ञानं द्विविधं प्रज्ञप्तम् , तद्यथा– श्रुतनिश्रितम् , अश्रुतनिश्रितं च । ३ श्रीनन्दीसूत्रे ।
४ यथाऽवग्रहादिसामान्यतोऽपि श्रोत्रेन्द्रियादिना भेदः । तथाऽवग्रहादिसामान्यतोऽपि तदनश्रिता(तत्वा)द् भिन्नम् ॥३०५॥ ५ घ.छ.ज.'तद्यथा' ।
६ क.ग. 'श्रुतनिश्रिता' । ७ अष्टाविंशतिभेदं श्रुतनिश्रितमेव केवलं तस्मात् । यस्मात् तस्मिन् समाप्ते पुनरश्रुतनिश्रितं भणितम् ॥ ३०६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

तस्मादवग्रहादिसाम्यादश्रुतानिश्रितस्य श्रुतनिश्रितेऽन्तर्भावं कृत्वा केवलं श्रुतनिश्रितमेव मतिज्ञानमष्टाविंशतिभेदं व्याख्यातुमुचितम्, न तु परोक्तनीत्या व्यञ्जनावग्रहापगमेन श्रुता-ऽश्रुतनिश्रितमिति । कुतः ?, इत्याह– ' जम्हा इत्यादि ' यतः "[1]से किं तं सुयनिस्सियं?" इत्येवमोगमे तस्मिन् श्रुतनिश्रिते समाप्ते निष्ठां नीते सति पुनः पश्चात् "[2]से किं तं अस्सुयनिस्सियं?" इत्यादिना ग्रन्थेनाऽश्रुतनिश्रितं भणितम् । अयमभिप्रायः– श्रुतनिश्रितं सभेदमप्यभिधाय पश्चादेवाऽश्रुतनिश्रितमुक्तम् । अतः कथं तत्तत्र प्रक्षिप्यते ? । तस्मात् समयाभिप्रायेण श्रुतनिश्रितस्यैवाऽष्टाविंशतिभेदा इति । अतो न भवद्व्याख्यानं श्रेय इति । तदेवं 'चउवइरित्ताभावा' इत्यादिगाथा मूलटीकाभिप्रायेण व्याख्याताः । अन्ये त्वन्यथाऽपि व्याख्यानयन्ति, तदभिप्रायं त्वतिगम्भीरत्वाद् न विद्मः ॥ इति गाथार्थः ॥ ३०६ ॥

तदेवमष्टाविंशतिविधत्वं मतिज्ञानस्योपदर्श्य विवक्षान्तरेण बहुतरभेदमप्येतद् भवतीति दर्शयन्नाह–

"[3]जं बहु-बहुविह-खिप्पा-ऽनिस्सिय-निच्छिय-धुवे-यरविभिन्ना । पुणरुग्गहादओ तो तं छत्तीसत्तिसयभेयं ॥३०७॥

यद् यस्माद् बहु-बहुविध-क्षिप्रा-ऽनिश्रित-निश्रित-ध्रुवैः सेतरैः सप्रतिपक्षैरेकैकशो विभिन्ना भेदभाजः पुनरप्यवग्रहादय इष्यन्ते । ततस्तदेवाऽष्टाविंशतिविधमाभिनिबोधिकज्ञानमेतैर्द्वादशभिर्भेदैः प्रत्येकं भिद्यमानत्वात् षट्त्रिंशदधिकंत्रिशतभेदं भवति । इदमुक्तं भवति– अनन्तरवक्ष्यमाणन्यायेन, संक्षेपतः प्रागभिहितयुक्त्या च श्रोत्रादिभिः कश्चिद् बह्ववग्रह्णाति, कश्चित्त्वबहु, अपरस्तु बहुविधम्, अन्यस्त्वबहुविधम्; एवं यावदन्यो ध्रुवम्, अपरस्त्वध्रुवमवग्रह्णातीति । एवमीहा-ऽपाय-धारणास्वपि सप्तभेदासु प्रत्येकममी द्वादश भेदा योजनीयाः । नवरमीहते, निश्चिनोति, धारयति, इत्याद्यभिलापः कार्यः । ततश्चाऽष्टाविंशतौ द्वादशभिर्गुणितायां षट्त्रिंशदधिकानि त्रीणि शतानि भेदानां भवन्ति ॥ इति गाथार्थः ॥ ३०७ ॥

अथ शब्दलक्षणं विषयमाश्रित्य तावद् बह्वादीनामर्थं व्याख्यातुमाह–

[4]नाणासद्दसमूहं बहुं पिहं [5]मुणइ भिन्नजाईयम् । बहुविहमणेगभेयं एक्केक्कं निद्ध-महुराइं[+] ॥ ३०८ ॥

---

१ अथ किं तत् श्रुतनिश्रितम् ? । २ श्रीनन्दीसूत्ररूपे । ३ अथ किं तदश्रुतनिश्रितम् ? । ४ गाथा ३०३ ।
५ यद् बहु-बहुविध-क्षिप्रा-ऽनिश्रित-निश्रित-ध्रुवे-तरविभिन्नाः । पुनरवग्रहादयस्ततस्तत् षट्त्रिंशत्त्रिशतभेदम् ॥ ३०७ ॥ ६ ज. 'कं त्रि' ।
७ नानाशब्दसमूहं बहुं पृथग् जानाति भिन्नजातीयम् । बहुविधमनेकभेदमेकैकं स्निग्ध-मधुरादिम् ॥ ३०८ ॥ ८ क.ग. 'सुण' । + ईं– ।

खिप्पमचिरेण तं चिय सरूवओ जं अणिस्सियमलिङ्गं । निच्छियमसंसयं जं धुवमच्चंतं न उ कयाई ॥३०९॥

इह श्रवणयोग्यदेशस्थे तूर्यसमुदाये युगपद् वाद्यमाने कोऽपि श्रोता तस्य तूर्यसंघातस्य संबन्धिनं पटह-ढक्का-शङ्ख-भेरि-भाणकादिनानाशब्दसमूहमाकर्णितं सन्तं क्षयोपशमविशेषाद् बहुमवग्रहादिना 'मुणति' जानाति । कोऽर्थः ?, इत्याह– पृथग् भिन्नजातीयम् एतावन्तोऽत्र भेरिशब्दाः, एतावन्तो भाणकशब्दाः, एतावन्तस्तु शङ्ख-पटहादिशब्दाः, इत्येवं पृथगेकैकशो भिन्नजातीयत्वेन तं नानाशब्दसमूहं बुध्यत इत्यर्थः । अन्यस्त्वल्पक्षयोपशमत्वात् तत्समानदेशोऽप्यबहुं 'मुणति'– सामान्येन ' नानातूर्यशब्दोऽयम् ' इत्यादिमात्रकमेव जानातीति प्रतिपक्षः । एवमुत्तरगाथायामतिदेक्ष्यमाणा प्रतिपक्षभावना सर्वत्राऽवबोद्धव्या । अन्यस्तु क्षयोपशमवैचित्र्याद् बहुविधं 'मुणति' । कोऽर्थः ?, इत्याह– अनेकभेदम्, इदमपि व्याचष्टे– एकैकं शङ्ख-भेर्यादिशब्दं स्निग्धत्व-मधुरत्व-तरुण-मध्यम-वृद्धपुरुषवाद्यत्वादिबहुविधधर्मोपेतं जानातीत्यर्थः । अन्यस्त्वबहुविधं स्निग्ध-मधुरत्वादिस्वल्पधर्मान्वितमेव पृथग् भिन्नजातीयं नानाशब्दसमूहं जानाति अन्यस्तु क्षिप्रम् । कोऽर्थः ?, इत्याह– अचिरेण शीघ्रमेव परिच्छिनत्ति, न तु चिरेण विमृश्येत्यर्थः । अन्यस्त्वक्षिप्रं चिरविमर्शितं जानाति तथा 'तं चिय सरूवओ जं अणिस्सियमिति' तमेव नानाशब्दसमूहं कोऽप्यनिश्रितं 'मुणति' इति संबन्धः । यं किम् ?, इत्याह– स्वरूपतो जानाति । कोऽर्थः ?, इत्याह– अलिङ्गं पताकादिलिङ्गाऽनिश्रितमित्यर्थः । इदमुक्तं भवति– तमेव शब्दसमूहं 'देवकुलमग्रे तथाविधपताकादर्शनात्' इत्येवं लिङ्गनिश्रामकृत्वा स्वरूपत एव यमवगच्छति, तमनिश्रितं 'मुणति' इत्युच्यत इति । तमेव लिङ्गनिश्रं जानानो निश्रितं 'मुणति' इच्युच्यते । तथा 'निच्छियमसंसयं जं ति' यमसंशयमवच्छिनत्ति तं निश्चितं 'मुणति' । निश्चितं तावादित्थमेतं मया, परं न जाने, तथा वा स्यात्, अन्यथा वा, इत्येवं संदेहानुविद्धं तु जानन्ननिश्चितं 'मुणति' । 'धुवमित्यादि' ध्रुवम्, कोऽर्थः ? अत्यन्तं, न तु कदाचिदिति । इदमुक्तं भवति– यथैकदा बह्वादिरूपेणाऽवगतं सर्वदैव तथाऽवबुध्यमानो ध्रुवं 'मुणति' इत्युच्यते । यः कदाचिद् बह्वादिरूपेण, कदाचित् त्वबह्वादिरूपेण, सोऽध्रुवं 'मुणति' ॥ इति गाथाद्वयार्थः ॥ ३०८ ॥ ३०९ ॥

इतरशब्दं व्याचिख्यासुराह–

[1]एत्तो च्चिय पडिवक्खं साहिज्जा, निस्सिए विसेसो वा । परधम्मेहि विमिस्सं निस्सियमावेणिस्सियं इयरं॥३१

---

१ क्षिप्रमचिरेण तमेव स्वरूपतो यमनिश्रितमलिङ्गम् । निश्चितमसंशयं यं ध्रुवमत्यन्तं न तु कदाचित् ॥ ३०९ ॥ २ क. घ. 'मुदये' ।
३ क. ग. 'देश्यमाना प्र' । ४ एतस्मादेव प्रतिपक्षं कथयेद् निश्रिते विशेषो वा । परधर्मैर्विमिश्रं निश्रितमविनिश्रितमितरत् ॥ ३१० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एतस्मादेवोक्तस्वरूपाद् बह्वादिपदषट्कसमूहात् प्रतिपक्षमेतद्विपर्ययमबह्व-बहुविधा-ऽक्षिप्र-निश्रिता-ऽनिश्रिता-ऽध्रुवपदषट्कलक्षणं साधयेत् स्वयमेव ब्रूयाद् मेधावी। स च लाघवार्थं बह्वादिविचार एव साधितः। तदेवं व्याख्याता द्वादशापि बह्वादयो भेदाः। अथवा निश्रिते सप्रतिपक्षेऽपि व्याख्यानान्तरलक्षणो विशेषो वक्तव्यः। कः?, इत्याह– परधर्मैरश्वादिवस्तुधर्मैर्विमिश्रं युक्तं गवादिवस्तु गृह्णानस्य निश्रितं भवति– गामश्वादिरूपेण गृह्णतो येयं विपर्ययोपलब्धिः, तन्निश्रितमित्यर्थः। इतरत्तु यत्परधर्मैर्विमिश्रं वस्तु न गृह्णाति, किन्तु यथावस्थितमेव तत्सद्भूतोपलब्धिरूपमनिश्रितं गवादिकं वस्तु गवादिरूपेणैव गृह्णतो येयमविपर्ययोपलब्धिस्तदनिश्रितमित्यर्थः॥

अत्राह– ननु बहु-बहुविधपरिज्ञानादीनि विशेषणानि स्पष्टार्थग्राहकेष्वपायादिषु भवन्तु, व्यञ्जनावग्रह-निश्चयार्थावग्रहयोस्तु कथं तत्संभवः?, तथाहि– 'सामन्नमणिद्देसं सरूव-नामाइकप्पणारहियं' इत्यादिवचनान्निश्चयार्थावग्रहे शब्दादिविशेषमात्रग्रहणमपि नास्ति, कुतो यथोक्तबह्वादिपरिज्ञानसंभवः?। अथ व्याख्यानाद् व्यवहारार्थावग्रहोऽत्र गृह्यते, तस्मिंश्च विशेषग्राहित्वाद् बहुपरिज्ञानादिविशेषणान्युपपद्यन्त एव। भवत्वेवम्, तथाऽप्यष्टाविंशतिभेदमध्यसंगृहीतस्य व्यञ्जनावग्रहस्य कथमेतद्विशेषणसंभवः?। तत्र हि सामान्यार्थग्रहणमात्रमपाकृतम्, बह्वादिपरिज्ञानं तु दूरोत्सारितमेवेति॥

सत्यमेतत्, किन्तु व्यञ्जनावग्रहादयः कारणमपायादीनाम्, तानन्तरेणाऽपायाद्यभावात्। ततश्चाऽपायादिगतं बह्वादिपरिज्ञानं तत्कारणभूतेषु व्यञ्जनावग्रहादिष्वपि योग्यतयाऽभ्युपगन्तव्यम्। न हि सर्वथाऽविशिष्टात् कारणाद् विशिष्टं कार्यमुत्पत्तुमर्हति, कोद्रवबीजादेरपि शालिफलादिप्रसवप्रसङ्गात्, इति प्रागप्युक्तप्रायम्। इत्यलमतिचर्चितेन॥ इति गाथार्थः॥ ३१०॥

ननु कथमेकस्याऽपि मतिज्ञानस्यैतावन्तो भेदाः?, इत्याशङ्क्य निर्दिष्टभेदानां कारणम्, अन्येषामपि बहुतरभेदानां सहेतुकं संभवं चोपसंहारगर्भमाह–

[1]एवं बज्झ-ऽब्भंतरनिमित्तवइचित्तओ मइबहुत्तं। किंचिम्मेत्तविसेसेण भिज्जमाणं पुणोऽणंतं॥ ३११॥

एवं तावद् बाह्या-ऽऽभ्यन्तरनिमित्तवैचित्र्याद् मतिबहुत्वमुक्तम्। तत्र बाह्यं निमित्तं मतिज्ञानस्य कारणमालोक-विषयादिकम्। तस्य च स्पष्टा-ऽव्यक्त-मध्यमा-ऽल्प-महत्त्व-संनिकर्ष-विप्रकर्षभेदाद् वैचित्र्यम्?। आभ्यन्तरनिमित्तं पुनरावरणक्षयोपशमो-पयोगो-पकरणेन्द्रियाणि। अस्याऽपि वैचित्र्यं शुद्धा-ऽशुद्ध-मध्यमभेदात्। ततश्चैतस्माद् बाह्या-ऽऽभ्यन्तरनिमित्तवैचित्र्याद् मतिज्ञानस्य यथोक्तभेदबहुत्वम-

---

१ गाथा २५२। २ एवं बाह्या-ऽऽभ्यन्तरनिमित्तवैचित्र्यतो मतिबहुत्वम्। किञ्चिन्मात्रविशेषेण भिद्यमानं पुनरनन्तम्॥ ३११॥

भिहितमवगन्तव्यम्। एतदेव च मतिज्ञानं यथोक्तनिमित्तद्वयस्य किञ्चिन्मात्रभेदाद् भिद्यमानं पुनरनन्तमपि भवतीति प्रतिपत्तव्यम्, सामान्येन मतिज्ञानमात्रवतां जीवानामनन्तत्वात्, तेषां च क्षयोपशमादिभेदेन मतेर्भिन्नत्वादिति भावः॥ इति गाथार्थः॥ ३११॥

अत्राह कश्चित्– नन्ववग्रहादयो ज्ञानमेव न भवन्ति, स्पष्टार्थनिर्भासाद्यभावात्, संशयादिवत्, इति कथममी मतिज्ञानभेदाः?, इत्याशङ्क्यैतेषां ज्ञानत्वसाधनायाह–

[2]इह संसयादणंतभावाउ वग्गहादयो नाणं। अणुमाणमिवाह न संसयाइसब्भावउ तेसुं[3]॥ ३१२॥

अवग्रहादयो ज्ञानमिति प्रतिज्ञा, संशयादिष्वनन्तर्भावादिति हेतुः, आदिशब्दाद् विपर्यया-ऽनध्यवसायपरिग्रहः; अनुमानवदिति दृष्टान्तः। इह संशयाद्यनन्तर्भूतैर्वर्ण-गन्धादिभिः पुद्गलैद्रव्यैर्व्यभिचारसंभवात्, सूत्रस्य च सूचकत्वात् 'आत्मधर्मत्वे सति संशयाद्यनन्तर्भावात्' इति सविशेषणो हेतुर्द्रष्टव्यः। अत्राह परः– ननु सविशेषणे हेतावनैकान्तिकता मा भूत्, असिद्धता त्वनिवार्यैवेति। एतदेवाह– 'न संसयाईत्यादि' सूरे! न तद् भवदीयं वचः। कुतः?, इत्याह– संशयादिसद्भावतस्तेष्ववग्रहादिषु, तेषां संशयादिरूपत्वात् संशयाद्यनन्तर्भावात्, इत्यसिद्धो हेतुरिति भावः॥ इति गाथार्थः॥ ३१२॥

कथं पुनस्तेषु संशयादिसद्भावः?, इत्याह–

[4]ननु संदिद्धे संसय-विवज्जया संसओ ह चेहा वि। वच्चासो वा निस्सियमवग्गहोऽणज्झवसियं तु॥ ३१३॥

ननु 'खिप्पमचिरेण' इत्यादिगाथायां तु यदुक्तम्- 'निच्छियमसंसयं जं ति' तत्प्रतिपक्षे यदुच्यते– 'कोऽपि संदिग्धं शृणोति' इति, तत्र संदिग्धे ज्ञायमाने संशयस्तावद् व्यक्त एव, यत्र च संशयस्तत्र संदिहानस्य कदाचिद् विपर्ययोऽपि स्यात्; इत्येवं संदिग्धे संशय-विपर्ययौ तावदनिवारितावेव। अथवा, किमनेनोत्तरभेदरूपे संदिग्धे दूषणप्रदानेन?, हन्त! येयं मूलभेदरूपेहा साऽपि संशय एव, निश्चयत्वे तस्या अपायत्वप्रसङ्गादिति। अथवा '[5]परधम्मेहि विमिस्सं निस्सियं' इत्यत्र यद् निश्रितमुक्तं, तदपि गवादिकमश्वादिरूपेण गृह्णद् विपर्यास एव। न हि नृत्यन् विपर्यासो भवति, किन्त्वन्यस्यान्यरूपेण ग्रहणमेवेति भावः। नैश्चयिकार्थावग्रहरूपोऽवग्रहः पुनरनध्यवसितमनध्यवसाय एव, अनिर्देश्यसामान्यमात्रग्राहित्वात्, न ह्यत्र कस्याऽप्यर्थस्य संबन्ध्यध्यवसायोऽस्तीति कृत्वा।

---

१ इह संशयाद्यनन्तर्भावादवग्रहादयो ज्ञानम्। अनुमानमिवाऽऽह–न, संशयादिसद्भावतस्तेषु॥ ३१२॥ २ क. ग. घ. छ. 'लघमैर्व्य'। +इति तनु-।
३ ननु संदिग्धे संशय-विपर्ययौ संशय इह चेहाऽपि। व्यत्यासो वा निश्रितमवग्रहोऽनध्यवसितं तु॥ ३१३॥ ४ गाथा ३०९। ×सु-।
५ घ. ज. 'कस्यचि'। ६ गाथा ३१०। ● (१-अ)।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

[1]संशयादिरूपत्वाद् नाऽवग्रहादयो ज्ञानमिति । अतो न ते मतिज्ञानभेदाः । तद्भेदत्वे वा मतिज्ञानमपि न किञ्चित्, दोषशतजर्जरात्मकत्वात् ॥ इति गाथार्थः ॥ ३१३ ॥

अत्राऽऽचार्यः प्राह–

[2]ईह सज्झमोग्गहाईण संसयाइत्तणं तहवि नाम । अब्भुवगंतुं भण्णइ नाणं चिय संसयाईया ॥ ३१४ ॥

इह यदवग्रहादीनां संशयादित्वं त्वयोद्भावितं तदद्यापि साध्यं साधनीयं वर्तते, त्वदुक्तनिर्युक्तिकवाङ्मात्रेणैव मदुक्तहेतोरसिद्धत्वाभावादिति मन्तव्यम्, न पुनरेतावतैव जाता त्वत्समीहितासिद्धिः, इति प्रमुदितेन न भाव्यमिति भावः । तथाहि– यदुक्तम् 'संदिग्धे संशय-विपर्ययौ' इति । तदयुक्तम्, अभिप्रायापरिज्ञानाद्, न ह्यस्माभिस्तथाविधं वस्त्वप्रापकं संदिग्धत्वं विवक्षितम्, येन वस्त्वप्रापणात्, विपर्ययप्रापणाद् वा तत्र संशय-विपर्ययौ स्याताम्; किन्तु कृतेऽपि वस्तुप्रापकेऽवितथे निश्चये यत्र तथाविधक्षयोपशमवैचित्र्याद् मनसि कश्चिदल्पं शङ्कामात्रं न निवर्तते 'सम्यग् न जाने, तथैव स्यादन्यथा वा' इति, तच्चेह संदिग्धत्वं विवक्षितम् । न चैतावन्मात्रेणैवाज्ञानता युक्ता, व्यवहारोच्छेदप्रसङ्गात् । न खलु धूम-बलाकादेः सकाशात् सम्यग् दहन-जलादौ निश्चितेऽपि मुखेन तन्निश्चयं ब्रुवतः सर्वेषां प्रमातॄणां चेतसि शङ्कामात्रं विनिवर्तते । न च ते सर्वेऽपि निश्चितं वस्तु न प्राप्नुवन्ति । न च [illegible] विपर्ययत्वेनाऽज्ञाना तेषां द्रष्टा । यदप्युच्यते– 'ईहाऽपि संशय एव' । तदप्यसंगतम्, न हि 'किमयं स्थाणुः, पुरुषो वा' इत्यादिरूपः संशय ईहाऽभ्युपगम्यते; किन्तु यदनन्तरमेव निश्चयोऽवश्यं भवति, स एवान्वयधर्मघटन-व्यतिरेकधर्मनिराकरणाभ्यां निश्चयाभिमुखो बोध ईहा, इत्यसकृच्च पूर्वमावेदितम् । न चायं संशयः, निश्चयाभिमुखत्वात् । नापि निश्चयः, तत्प्रत्यासत्तिमात्रप्राप्तत्वात् । न च वक्तव्यम्– निश्चयादन्यच्च सर्वस्य संशयत्वादज्ञानतैवेति; निश्चयोपादानक्षणस्याऽपि सर्वथाऽज्ञानत्वप्रसङ्गात् । तथा च सति निश्चयस्याऽप्यज्ञानताप्राप्तिः । न ह्यविशिष्टात् कारणाद् विशिष्टकार्योत्पत्तिः" इत्युक्तत्वादिति । यदप्युक्तम्– 'निश्चितं विपर्यासः' इति । तदप्ययुक्तम्, 'लिङ्गाश्रितं निश्चितम्' इत्यस्मिन् व्याख्यानेऽस्य दोषस्य सर्वथैवाऽसंबध्यमानत्वात्, 'पैरधम्मेहि विमिस्सं निस्सियं' इत्यस्य च व्याख्यानान्तरमात्रत्वात् । भवतु तदपि व्याख्यानम्, तथापि व्याख्यानात् परधर्मास्तस्मिन्नाशङ्किता एव द्रष्टव्याः, न तु निश्चिताः, यथा 'गौरेवाऽत्र,

---

१ च.छ.ज. 'न म' । २ इह साध्यमवग्रहादीनां संशयादित्वं तथापि नाम । अभ्युपगम्य भण्यते ज्ञानमेव संशयादयः ॥ ३१४ ॥ ३ क.ग. 'त्वादि' ।
४ गाथा ३१० । ५ घ.छ.ज. 'तु च त' । × यसत्वे-।)

१४

केवलमश्व इव प्रतिभाति' इति । एतावन्मात्रेणैव चेयं विपर्ययोपलब्धिरवगन्तव्या; न तु सर्वथा विपर्ययधर्मनिश्चयात्, सर्वथा विपर्यये तत्राऽश्वादिसत्त्वप्रसङ्गात् । न च वक्तव्यम्– एवं सतीदमनिश्चितात् न भिद्येत; तत्र परधर्मनिश्चितत्वाभावात्, विवक्षितवस्त्वभावशङ्कामात्रस्यैव सद्भावादिति । न च विपर्ययधर्मशङ्कामात्रेणाऽप्यज्ञानता, वस्तुप्राप्तिविघाताभावादिति । यदप्युक्तम्– 'अवग्रहोऽनध्यवसायः' इति । तदप्ययुक्तम्, तत्र ह्यध्यवसायः साक्षादेव नास्ति, योग्यतया पुनरस्त्येव, अन्यथा तत्कार्येष्वपायादिष्वपि तदभावप्रसङ्गात्, इत्युक्तमेव । अतिमत्त-मूर्च्छितानामेव हि ज्ञानमनध्यवसाय उच्यते, तत्र योग्यतयाऽप्यध्यवसायस्य वक्तुमशक्यत्वात्, तत्कार्यभूतस्याऽपायाद्यध्यवसायस्याऽप्यलक्षणत्वात् । तदेवमवग्रहादीनामसिद्धं संशयादित्वम् । तथापि 'अभ्युपगन्तुं'अङ्गीकृत्याऽपि तेषां संशयादिरूपतां ब्रूमः– ज्ञानमेव संशयादयः संशय-विपर्यया-ऽनध्यवसायाः । ततश्च संशयादिरूपत्वेऽपि नावग्रहादीनां मतिज्ञानभेदत्वं विरुध्यत इति भावः । इदमुक्तं भवति– नास्माभिः 'समीहितवस्तुप्रापकं ज्ञानम्, इतरदज्ञानम्' इत्येवं व्यवहारिणां प्रमाणा-ऽप्रमाणभूते ज्ञाना-ऽज्ञाने विचारयितुमुपक्रान्ते, किन्तु 'ज्ञायते येन किमपि, तत् सम्यग्दृष्टिसंबन्धि ज्ञानम्' इत्येतावन्मात्रकमेव व्याख्यातुमभिप्रेतम्; वस्तुपरिज्ञानमात्रं तु संशयादिष्वपि विद्यते, इति न तेषामपि सम्यग्दृष्टिसंबन्धिनां ज्ञानत्वहानिः ॥ इति गाथार्थः ॥ ३१४ ॥

कथं पुनः संशयादयो ज्ञानम्?, इत्याह–

[3]वत्थुस्स देसगमगत्तभावओ परमयप्पमाणं व । किह वत्थुदेसविण्णाणहेयवो, सुणसु तं वोच्छं ॥ ३१५ ॥

ज्ञानमेव संशयादयः, इति प्राक्तनी प्रतिज्ञा; वस्तुनो गवादेः स्व-परपर्यायैरनन्तधर्माध्यासितस्य यो देश एकदेशस्तस्य गमकत्वभावात्, इति हेतुः; पराभिमतं प्रमाणं निश्चयज्ञानरूपं तद्वदिति दृष्टान्तः । इह यद् वस्त्वेकदेशस्य गमकं तज् ज्ञानं दृष्टं, यथा परमतं निश्चयरूपं प्रमाणम्, वस्त्वेकदेशगमकाश्च संशयादयः, ततस्ते ज्ञानम्, इति । अत्र हेतोरसिद्धतां मन्यमानः परः पृच्छति– कथं वस्त्वेकदेशविज्ञानहेतवः संशयादयः?, वस्तुनो निरंशत्वेन देशस्यैवाऽभावाद् न त एकदेशग्राहिणो घटन्त इति परस्याऽभिप्रायः। आचार्यः प्राह– यत् त्वया पृष्टं तद् वक्ष्ये भणिष्याम्यहम्, शृणु समवहितः समाकर्णय त्वम् ॥ इति गाथार्थः ॥ ३१५ ॥

यथाप्रतिज्ञातमेवाह–

[4]ईह वत्थुमत्थ-वयणाइपज्जयाणंतसत्तिसंपन्नं । तस्सेगदेसविच्छेयकारिणो संसयाईया ॥ ३१६ ॥

---

१ क.ग. 'नम्' । २ वस्तुनो देशगमकत्वभावतः परमतप्रमाणमिव । कथं वस्तुदेशविज्ञानहेतवः, शृणु तद् वक्ष्ये ॥ ३१५ ॥ ३ घ.छ.ज. 'भा' ।
४ इह वस्त्वर्थ-वचनादिपर्यायाऽनन्तशक्तिसंपन्नम् । तस्यैकदेशविच्छेदकारिणः संशयादयः ॥ ३१६ ॥ + निश्चिता-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

इह वस्तुनो घटादेर्मृन्मयत्व-पृथुबुध्नत्व-वृत्तत्व-कुण्डलायतग्रीवायुक्तत्वादयोऽर्थरूपाः पर्याया अर्थपर्याया अनन्ता भवन्ति । घट कुट-कुम्भ-कलशादयस्तु वचनरूपाः पर्याया वचनपर्यायास्तेऽप्यनन्ता भवन्ति; आदिशब्दात् परव्यावृत्तिरूपा अप्यनन्ता गृह्यन्ते ततश्चेत्थं समासः कर्तव्यः– अर्थश्च, वचनानि च, आदिशब्दात् परव्यावृत्तयश्च तद्रूपाः पर्याया अर्थ-वचनादिपर्यायाः, ते च तेऽनन्ता त एव शक्तयः, ताभिः संपन्नं युक्तं यतो वस्तु भवति, अतस्तस्यैकदेशविच्छेदकारिणः संशयादयो ज्ञेयाः । इदमुक्तं भवति– न खु वयं निरंशवस्तुवादिनः, किन्तु यथोक्तानन्तधर्मलक्षणवस्तुनोऽनन्ता एव देशाः सन्तीति वयं मन्यामहे, तन्मध्याच्चैकैकदेशग्राहिणः संशयादयोऽपि भवन्त्येव, इति कथं न ते ज्ञानम् ? । यदि पुनस्ते किमपि न गृह्णीयुः, तदा तेषामनुत्थानमेव स्यात्, सर्वथा निर्विषय ज्ञानस्य प्रसवायोगात्, गगननलिनज्ञानवत् । ततश्च 'ज्ञायतेऽनेनेति ज्ञानम्' इति व्युत्पत्त्यर्थात् संशयादीनामपि ज्ञानता न विरुध्य ॥ इति गाथार्थः ॥ ३१६ ॥

अथ समस्तवस्तुरूपग्राह्येव ज्ञानं, नैकदेशग्राहकम्, इत्येतदाशङ्क्य निराकुर्वन्नाह–

अहवा[1] न सव्वधम्मावभासया तो न नाणमिट्ठं ते । नणु निन्नओ वि तदेसमेत्तगाहि त्ति अन्नाणं ॥ ३१७

अथवा नैवमेवं ब्रूयात् परः । किम् ?, इत्याह– न सर्वधर्मावभासका न कात्स्न्र्येन गवादिवस्तुसमग्रधर्मग्राहिणः, ततो ज्ञानमिष्टं ते संशयादयः, संपूर्णवस्तुस्वरूपग्राहिण एव ज्ञानत्वात् । अत्रोत्तरमाह– ननु भवता ज्ञानत्वेनाऽङ्गीकृतस्तर्हि निर्णयोऽप्यज्ञान मेव प्राप्नोति । कुतः ?, इत्याह–तस्य गवादिवस्तुन एकदेशमात्रग्राहीति कृत्वाः तथाहि– 'गौरयं, घटोऽयं, पटोऽयम्' इत्यादि भिर्निर्णयैरपि गोत्व-घटत्वादिको वस्त्वेकदेश एव गृह्यते, अतस्तेऽपि कथं ज्ञानरूपतां भजेयुः ? । अथ देशस्य देशिनमन्तरेण कदा चिदप्यभावात् तद्ग्रहणद्वारेण सर्वमपि वस्तु निर्णयेन गृहीतम्, इत्यतो ज्ञानमेवाऽसौ । तदेतत् संशयादिष्वपि समानम्; तथाहि 'किमयं स्थाणुः, पुरुषो वा' इत्यादिरूपः संशयोऽपि स्थाणुत्वादिकं वस्त्वेकदेशं जानाति, विपर्यासोऽपि विपर्ययवस्त्वेकदेशमव ध्यते, अनध्यवसायोऽपि सामान्यमात्ररूपं वस्त्वेकदेशमवगृह्णाति । ततश्च संशयादयोऽप्येकदेशपरिज्ञानद्वारेण समग्रमपि व जानन्त्येव, इति तेषामपि ज्ञानता केन वार्यते ? । अथ गृह्यते संशयादिभिर्वस्त्वेकदेशः, केवलं संशयेन संदिग्धः, विपर्यासे विपर्यस्तः, अनध्यवसायेन त्वविशिष्ट इति चेत् । ननु प्रतिविहितमप्यदः किं विस्मरसि ?, यतो 'ज्ञायतेऽनेनेति ज्ञानम्, मति

१ अथवा न सर्वधर्मावभासकास्ततो न ज्ञानमिष्टं ते । ननु निर्णयोऽपि तदेशमात्रग्राहीत्यज्ञानम् ॥ ३१७ ॥

ज्ञानं मतिज्ञानम्' इत्येवं सामान्येनैव सम्यग्दृष्टिसंबन्धि मतिज्ञानमिह विचार्यते । तस्य च संशयादिरूपस्य, निर्णयरूपस्य वा सम्यग् दृष्टिसंबन्धिनो ज्ञानता न विरुध्यते, 'ज्ञायतेऽनेनेति ज्ञानम्' इत्यस्यार्थस्य सर्वत्रोपपद्यमानत्वादिति । ननु यदि संशयादयोऽ मतिज्ञानम्, तर्हि चतुर्भेदत्वमतिक्रम्य सप्तभेदत्वं तस्य प्रसज्यते, इति चेत् । नैतदेवम्, यतोऽनध्यवसायस्तावत्सामान्यमात्रग्राहित नाऽवग्रहेऽन्तर्भवति, संशयोऽपि पूर्वोक्तस्वरूपेहाप्रकारत्वात्, तत्कारणत्वाच्च तस्यामेवाऽन्तर्विशति, यदपि संशयस्य पूर्वमीहात्वमपाकृ तदपि व्यवहारिजनानुवृत्त्या, न तु सर्वथेतिः विपर्यासस्तु निश्चयरूपत्वात् साक्षादपाय एव, इति कुतश्चतुर्भेदातिक्रमः ? । इत्थं चैतद ङ्गीकर्तव्यम्, अन्यथा सम्यग्दृष्टिसंबन्धिनः संशयादयो मतिज्ञानादतिरिच्यमानाः काऽन्तर्भवेयुः ? । अज्ञान इति चेत् । नैवम् "सम्मद्दिट्ठी णं भंते ! किं नाणी अन्नाणी ? गोयमा ! नाणी, नो अन्नाणी" इत्याद्यागमवचनात् सम्यग्दृष्टेः सदैव ज्ञानित्व दिति । भवत्वेवम्, तथापि सम्यग्दृष्टिसंबन्ध्येव मतिज्ञानमिह विचार्यत इति कुतो लभ्यते ? इति चेत् । उच्यते– ज्ञानपञ्चकमेवेह विच रयितुमुपक्रान्तम्, ज्ञानं च सम्यग्दृष्टेरेव भवति, अतस्तत्संबन्ध्येव मतिज्ञानमिह विचार्यते, सम्यग्दृष्टिसंबन्धिनां च संशयादी ज्ञानता साध्यते । इत्यलं विस्तरेण ॥ इति गाथार्थः ॥ ३१७ ॥

अत्राऽतिप्रसक्तिं मन्यमानः परः प्राह–

जइ[3] एवं तेण तुहं अन्नाणी को वि नत्थि संसारी[4] । मिच्छद्दिट्ठीणं ते अन्नाणं नाणमियरेसिं ॥ ३१८ ॥

यद्येवमुक्तप्रकारेण संशयादयोऽपि ज्ञानम्, तेन तव 'अज्ञानी नास्ति कोऽपि संसारी जीवः' इति प्राप्तम्; प्रेक्षे सर्वस्याऽपि ज्ञ परेणाऽभ्युपगम्यत इति संसारिणामेवाऽयमतिप्रसङ्गलक्षणो दोषः, इत्यभिप्रायवता 'संसारी' इति विशेषणमकारि । एतदुक्तं भवति 'संशयादयोऽज्ञानम्, निर्णयस्त्ववाधितो ज्ञानम्' इति तावल्लोकव्यवहारस्थितिः । यदि च भवता संशयादीनामपि ज्ञानरूपता व्यवस्थ प्यते, तर्हि समुच्छिन्नोऽयमज्ञानव्यवहारः, ततः कथं नाऽतिप्रसङ्गः ?। दृश्यते च लोकेऽज्ञानव्यवहारः; स कथं नीयते ? इति । अत्रोत्तरमा 'मिच्छद्दिट्ठीणमित्यादि' मिथ्यादृष्टीनां संबन्धिनस्ते संशय-विपर्यया-ऽनध्यवसायाः, निर्णयश्चाज्ञानम्, इतरेषां तु सम्यग्दृष्टीनां संबन्धिन ज्ञानम्, इति नाऽज्ञानव्यवहारोच्छेदः । अयमभिप्रायः– लोकव्यवहारूढो ज्ञाना-ऽज्ञानव्यवहारोऽत्र न विवक्षितः, किन्त्वागमाभिप्रायरू

१ सम्यग्दृष्टयो भगवन् ! किं ज्ञानिनः, अज्ञानाः ?; गोयमा ! ज्ञानिनः, नो अज्ञानाः । २ 'भगवती' इतिनाम्ना प्रसिद्धे व्याख्याप्रज्ञप्तिसूत्रे ।

३ यद्येवं तेन तवाऽज्ञानः कोऽपि नास्ति संसारी । मिथ्यादृष्टीनां तेऽज्ञानं ज्ञानमितरेषाम् ॥ ३१८ ॥ ४ क.ग.छ.ज. 'री आमि' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नैश्चयिकः । आगमे च संशयादिरूपं, निश्चयरूपं वा मिथ्यादृष्टेः सर्वमप्यज्ञानम्; सम्यग्दृष्टेस्तु तदेव सर्वं ज्ञानम्; इत्येवं ज्ञाना-ऽज्ञान-व्यवहारो रूढः । ततश्च यदादौ संशयादित्वेनाऽवग्रहादीनामज्ञानत्वं प्रेरितम्, तदयुक्तम्; न हि संशयादित्वमज्ञानभावस्य निमित्तमागम-विचारे, किन्तु मिथ्यादृष्टिसंबन्धित्वम्, तच्चेह नास्ति, सम्यग्दृष्टिसंबन्धिनामेवाऽवग्रहादीनामिह विचारयितुमुपक्रान्तत्वात्, इति भावः ॥ इति गाथार्थः ॥ ३१८ ॥

कः पुनर्मिथ्यादृष्टिनाऽपराधः कृतः, येन तत्संबन्धि सर्वमप्यज्ञानम् ?, इत्याह–

सदसदविसेसणाओ भवहेउजाहिच्छिओवलम्भाओ । नाणफलाभावाओ मिच्छद्दिट्ठिस्स अण्णाणं ॥ ३१९ ॥

एषा पूर्वमिहाऽपि व्याख्यातैवेति ॥ ३१९ ॥

सम्यग्दृष्टेस्तर्हि को विशेषः, येन तस्य सर्वमपि ज्ञानम् ?, इत्याह–

[2]एगं जाणं सव्वं जाणइ सव्वं च जाणमेगं ति । इय सव्वमयं सव्वं सम्मद्दिट्ठिस्स जं वत्थुं ॥ ३२० ॥

इह परमाण्वादिकमेकैकं वस्तु स्व-परपर्यायैः समस्तत्रिभुवनगतवस्तुमयम्, तथाहि– परमाणौ तावदेकगुणकालत्वादयोऽनन्ता वर्ण-गन्ध-रसादिकाः स्वपर्याया भवन्ति । अपरं च, असौ विवक्षितः परमाणुरन्येभ्यः परमाणु-द्व्यणुक-त्र्यणुकादिसमस्तवस्तुभ्यः क्षेत्र-कालादिभिर्व्यावृत्तः, इत्यतस्तद्व्यावृत्तिलक्षणा अनन्ताः परपर्याया भवन्ति । एवं च सति येभ्योऽन्यवस्तुभ्योऽसौ परमाणुर्व्यावृत्तः, तेषां सर्वेषामपि तत्र परमाणौ प्रत्येकमभावो वर्तते, इति सामर्थ्यात् सिद्धम्; अन्यथा तस्य तेभ्यो व्यावृत्त्यसिद्धेः; अभावश्चाऽभाववतो धर्मः, यत्र धर्मः, तत्र धर्मिणा कथञ्चिद् भवितव्यमेव, अन्यथा तस्य तद्धर्मत्वायोगात्; ततश्च सर्वाण्यप्यन्यवस्तूनि तत्र परमाणौ स्वा-भाववृत्तिद्वारेण वर्तन्त इति पर्यवसितम् । ततश्च परमाणुः सर्ववस्तुमयः सिद्धः । एवं द्व्यणुकादिष्वपि भावनीयम्, तेषामपि प्रत्येकं परेभ्यो व्यावृत्तत्वात् । ततश्च सर्वमपि वस्तु सर्वमयमिति स्थितम् । इह च य एकं विवक्षितं वस्तु जानाति, स शेषाण्यपि सर्ववस्तूनि जानाति, समस्तवस्तुपरिज्ञाननान्तरीयकत्वादेकवस्तुपरिज्ञानस्य । येभ्योऽपि हि शेषवस्तुभ्यो व्यावृत्तं तद् विवक्षितं वस्तु, तानि सर्वा-ण्यपि ज्ञातव्यानि, तत्परिज्ञानाभावे तेभ्यो व्यावृत्तत्वस्याऽवगन्तुमशक्यत्वादिति । यश्च सर्ववस्तूनि जानाति स विवक्षितमप्येकं किमपि वस्तु जानाति, तत्परिज्ञानाविनाभावात् समस्तवस्तुज्ञानस्य । तानि हि सर्ववस्तूनि विवक्षितैकवस्तुनो व्यावृत्तान्यवबोद्धव्यानि । न च

---

१ गाथा ११५ । २ एकं जानन् सर्वं जानाति सर्वं च जानन्नेकमिति । इति सर्वमयं सर्वं सम्यग्दृष्टेर्यद् वस्तु ॥ ३२० ॥ ३ क.ख.ग. 'लकत्वा' ।

तदपरिज्ञाने तद्व्यावृत्तत्वमेव बोद्धुं शक्यत इति । नन्वेवंविधपरिज्ञानं तर्हि केवलिन एव भवति, नाऽन्यस्य, तस्य सूक्ष्माऽतीत-व्य-वहिता-ऽमूर्तादिसमस्तवस्तुग्रहणासमर्थत्वात् । सत्यम्, साक्षादित्थं केवल्येव जानाति, तद्वचनश्रद्धानद्वारेण पुनर्भावतोऽन्योऽपि सम्यग्दृष्टिः सर्वं एकैकं वस्तु सर्वमयं जानाति । आगमे हि केवलिनैतत् प्रणीतम्, तद्यथा– "जे एगं जाणइ से सव्वं जाणइ, जे सव्वं जाणइ से एगं जाणइ त्ति" । सम्यग्दृष्टेश्च सर्वस्याऽप्ययमागमः प्रमाणमेव, अन्यथा सम्यग्दृष्टित्वायोगात् । ततश्च यद्यपि सर्वः सम्यग्दृष्टिरित्थं सर्वं सर्वमयं वस्तु न जानाति, तथापि यथोक्तागमश्रद्धानद्वारेण भावतो जानात्येवेति । अतः सर्वदैवाऽयं ज्ञानी भण्यते, केवलिदृष्टयथावस्थितवस्तुस्वरूपस्य प्रमाणताभ्युपगमद्वारेण सर्वदैव तेन ज्ञायमानत्वात् ॥ इति गाथाभावार्थः ॥

अक्षरार्थस्तूच्यते– एकं वस्तु जानन् सर्वं वस्तु जानाति, सर्वं च वस्तु जानन्नेकं जानातीति 'एवंभूतमागमं सम्यग्दृष्टिस्तावत् सर्वदैव प्रमाणतयाऽभ्युपगच्छति' इति शेषः । इत्यतः परमाण्वादिकं यत् किमपि वस्त्वस्ति, तत्सर्वमप्युक्तन्यायेन स्व-परपर्यायैः सर्वमयं सम्यग्द-ष्टिज्ञानगोचरः । अतः सर्वदैवाऽयं ज्ञानी भण्यते, जाग्रतः, स्वपतः, तिष्ठतः, चलतश्चाऽस्य परमगुरुप्रणीतयथोक्तवस्तुस्वरूपाभ्युपगमस्य चेतसि सर्वदैवाऽविचलनात् ॥ इति गाथार्थः ॥ ३२० ॥

ननु यद्येवं, तर्हि निश्चयरूपं सम्यग्दृष्टेर्ज्ञानमस्तु, संशयादयस्तु बालानामप्यज्ञानत्वेन लोके रूढाः, तस्याऽपि कथमिव ज्ञानं स्युः ?, इत्याह–

[2]जे संसयादिगम्मा धम्मा वत्थुस्स ते वि पज्जाया । तदहिगमत्तणओ ते नाणं चिय संसयाईया ॥ ३२१ ॥

इह ये संशयादिगम्या धर्मास्तेऽपि वस्तुनस्तावत् पर्याया एव । ततस्तदधिगमहेतुत्वात् ते सम्यग्दृष्टिसंबन्धिनः संशयादयो ज्ञानमेव । एतदुक्तं भवति– इह लोकव्यवहाररूढं संशयादित्वमज्ञानभावस्य निबन्धनत्वेन तावन्नाधिकृतमेव, किन्तु मिथ्यादृष्टिसंबन्धि त्वमित्युक्तमेव, तच्च सम्यग्दृष्टिसंबन्धिनां संशयादीनां नास्ति, तत्कथं न ते ज्ञानं भवेयुः ? । ज्ञायते येन किञ्चित् तज्ज्ञानं भवति, न च संशयादिभिः किमपि ज्ञायते, इति चेत् । नैवम्, तेषामपि वस्तुपर्यायगमकत्वात्, तथाहि– पुरतः स्थाणौ व्यवस्थिते योऽसौ 'किमयं स्थाणुः, पुरुषो वा ?' इति संशय उदेति, तत्र यत् स्थाणुत्वं, पुरुषत्वं च प्रतिभाति, तदुभयमपि स्थाणौ पर्यायरूपतया

---

१ य एकं जानाति स सर्वं जानाति, यः सर्वं जानाति स एकं जानातीति । ×ष्टे-।

२ ये संशयादिगम्या धर्मा वस्तुनस्तेऽपि पर्यायाः । तदधिगमत्वतस्ते ज्ञानमेव संशयादयः ॥ ३२१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राप्यते, स्थाणुत्वस्याऽनुगतत्वेन सत्त्वात्, पुरुषत्वस्य त्वभावरूपतयाऽसद्भावात् । अथवा, स्थाणुत्वं स्थाणोः पर्यायः, पुरुषत्वं तु पुरुषस्येति । यश्च स्थाणौ 'पुरुष एवाऽयम्' इति विपर्यासः प्रादुरस्ति, तत्रापि पुरुषत्वं व्याद्यात्तिरूपतया स्थाणोरपि पर्यायः, अनुगतत्वेन तु पुरुषस्येति; अनध्यवसायप्रतिभासि तु सामान्यमविवादेन स्थाण्वादिवस्तुपर्याय एव । तदेवं संशयादिभिर्वस्तुपर्यायाणां ज्ञायमानत्वात्, सम्यग्दृष्टिसंबन्धिनां च तेषामिहाऽधिकृतत्वेन मिथ्यादृष्टिसंबन्धित्वस्याऽभावात्, लोकरूढस्य च संशयादित्वस्याऽज्ञाननिबन्धनत्वेनेहाऽनधिकृतत्वाज्ज्ञानमेव ते सम्यग्दृष्टिसंबन्धिनः संशयादयः ॥ इति गाथार्थः ॥ ३२१ ॥

नन्वनन्तपर्यायं सर्वमपि वस्तु, इति भवद्भिरुक्तम् । तस्य च घटादिवस्तुन एकस्मिन् काल एकमेव कञ्चिद् घटत्वादिपर्यायं सम्यग्दृष्टिरपि गृह्णाति । अतोऽनन्तपर्यायमपि वस्त्वेकपर्यायतया गृह्णतस्तस्याऽपि कथं ज्ञानं स्यात्, अन्यथास्थितस्याऽन्यथा ग्रहणात्?, इत्याशङ्क्याह–

पज्जायमासयंतो एक्कं पि तओ पओयणवसाओ । तत्तियपज्जायं चिय तं गिण्हइ भावओ वत्थुं ॥ ३२२ ॥

'तउ त्ति' तकोऽसौ सम्यग्दृष्टिरेकमपि घटादिवस्तुनो घटत्वादिपर्यायं प्रयोजनवशादाश्रयन् गृह्णंस्तावन्तः प्रागुक्तप्रकारेणाऽनन्ताः पर्याया यस्य तत् तावत्पर्यायमेव भावतः परमार्थतो वस्तु घटादिकं गृह्णाति । एतदुक्तं भवति– भावत आगमप्रामाण्याभ्युपगमाभिप्रायतः सम्यग्दृष्टिना यथाऽवस्थितमनन्तपर्यायं वस्तु सदैव गृहीतमेवाऽऽस्ते, केवलं प्रयोजनवशादेकं पर्यायमाश्रयति, तथाहि– सौवर्णे घटे दृष्टे यस्य घटमात्रेण प्रयोजनं भवति स 'घटोऽयम्' इति घटत्वमध्यवस्यति । यस्य तु सुवर्णेन, स 'सुवर्णमिदम्' इति सुवर्णत्वं व्यवस्यति । यस्य तु जलक्षेपादिना, स 'जलादिभाजनमिदम्' इति जलादिभाजनत्वमध्यवस्यति । उपलक्षणं च प्रयोजनम्, अन्येऽप्यभ्यासपाटव-प्रत्यासत्त्यादयो गृह्यन्ते; तथाहि– ब्राह्मणे द्वारि दृष्टे कोऽप्यभ्यासवशाद् 'भिक्षुकोऽयम्' इत्याचष्टे, अन्यस्तु पाटववशाद् 'ब्राह्मणोऽयम्' इति, अपरस्तु यस्तत्समीपेऽधीते स प्रत्यासत्तिवशाद् 'मदीयोपाध्यायोऽसौ' इत्याद्यनया दिशा भावनीयम् । ततश्च प्रयोजनादिवशादेकपर्यायतया वस्तु गृह्णानोऽप्यसौ भावतः परिपूर्णाऽनन्तपर्यायमेव गृह्णाति । अतः सर्वदैव भावतः प्रतिपन्नयथावस्थितवस्तुस्वरूपस्य संशयादिकालेऽपि सम्यग्दृष्टेर्ज्ञानमेव ॥ इति गाथार्थः ॥ ३२२ ॥

---

१ क-ग- 'घटादित्वप' । २ पर्यायमाश्रयन्नेकमपि सकः प्रयोजनवशात् । तावत्पर्यायमेव तद् गृह्णाति भावतो वस्तु ॥ ३२२ ॥+ टीका-।

मिथ्यादृष्टेरप्येवं भविष्यति, इति चेत् । न, इत्याह–

[1]निण्णयकाले वि जओ न तहारूवं विदंति ते वत्थुं । मिच्छदिट्ठी, तम्हा सव्वं चिय तेसिमण्णाणं ॥ ३२३ ॥

आस्तां संशयादिकाले, निर्णयो निश्चयस्तत्कालेऽपि यतस्ते मिथ्यादृष्टयो न यथा परमगुरुभिर्दृष्टं तथारूपमनन्तपर्यायं वस्तु विदन्ति, केवलिदृष्टयथावस्थितवस्त्वभ्युपगमस्य तेषां कदाचिदप्यभावात्; अन्यथा मिथ्यादृष्टित्वायोगात् । अतस्तेषां निश्चयरूपं, संशयादिरूपं च सर्वमज्ञानमेव, ज्ञाननिबन्धनस्य भुवनगुरुनिर्णीतयथावस्थितवस्त्वभ्युपगमस्य कदाचिदप्यसत्त्वात् ॥ इति गाथार्थः ॥३२३॥

अथवा नाज्ञानमात्रमेव तेषाम्, किन्त्वद्याप्याधिक्यं किञ्चित्, इति दर्शयन्नाह–

[2]कट्ठयरं वन्नाणं विवज्जओ चेव मिच्छदिट्ठीणं । मिच्छाभिणिवेसाओ सव्वत्थ घडे व्व पडबुद्धी ॥ ३२४ ॥

संशया-ऽनध्यवसाय-विपर्ययान् किलाऽज्ञानत्वेन सामान्यतो वदति भवान्, मिथ्यादृष्टेस्त्वतिदुःसहमहादुःखहेतुत्वात् कष्टतरं विशेषिततरमज्ञानम् । कुतः?, इत्याह– यस्माद् विपर्ययो विपर्यास एव तस्य सर्वज्ञोक्ते यथावस्थिते वस्तुनि, न तु संशया-ऽनध्यवसायाविति भावः । अतः संशया-ऽनध्यवसायवद्भ्यो विशेषिततरमस्याऽज्ञानम् । कुतः पुनरस्य विपर्यय एव?, इत्याह–मिथ्याभिनिवेशात्, सर्वत्रेति– सर्वत्र मोक्षे, तत्साधने संसारे, तत्साधने च नारकादिवस्तुनि वा, तस्य मिथ्याभिनिवेशात् सर्वज्ञोक्तविपरीताध्यवसायात्, घटे पटबुद्धिवत् ॥ इति गाथार्थः ॥ ३२४ ॥

तदेवं सर्वज्ञोक्तयथावस्थितानन्तपर्यायवस्त्वभ्युपगमस्य सर्वदैव भावात् सम्यग्दृष्टेर्ज्ञानं समर्थितम् । अथ प्रकारान्तरेणाऽपि तत् तस्य समर्थयन्नाह–

[3]अहवा जहिंदनाणोवओगओ तम्मयत्तणं होइ । तह संसयाइभावे नाणं नाणोवओगाओ ॥ ३२५ ॥

अथवा यथेन्द्रज्ञानोपयोगात् तदुपयोगवतो ज्ञातुर्देवदत्तादेः परमैश्वर्याद्यभावेऽपि तन्मयत्वमिन्द्रमयत्वं भवति, भावेन्द्र एवाऽयं व्यपदिश्यत इत्यर्थः; तथा सम्यग्दृष्टेरपि सम्यग्दर्शनलाभकाल एव भत्यादिज्ञानलाभाज्ज्ञानपरिणामरूपस्य ज्ञानोपयोगमात्रस्य सर्वदैव भावात्, अन्यथा मिथ्यादृष्टित्वप्रसङ्गात्, सदैव ज्ञानमभ्युपगन्तव्यम्, तदुपयुक्तस्य तन्मयत्वात्, इन्द्रोपयुक्तदेवदत्तेन्द्रवदिति । इदमुक्तं

---

१ निर्णयकालेऽपि यतो न तथारूपं विदन्ति ते वस्तु । मिथ्यादृष्टयः, तस्मात् सर्वमेव तेषामज्ञानम् ॥ ३२३ ॥

२ कष्टतरं वाऽज्ञानं विपर्यय एव मिथ्यादृष्टीनाम् । मिथ्याभिनिवेशात् सर्वत्र घट इव पटबुद्धिः ॥ ३२४ ॥

३ अथवा यथेन्द्रज्ञानोपयोगतस्तन्मयत्वं भवति । तथा संशयादिभावे ज्ञानं ज्ञानोपयोगात् ॥ ३२५ ॥ ४ ज. 'सर्वदै' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवति– सम्यग्दर्शनसद्भावेऽस्य सर्वदैव ज्ञानोपयोगमाश्रित्य तावदस्ति । ततश्च संशयादिकालेऽपि मौलज्ञानोपयोगतो ज्ञान्येवाऽसौ, यथा दारिद्र्यादिसद्भावेऽपीन्द्रज्ञानोपयोगतो ज्ञाता इन्द्र एव, यथा वा रसकूपिकायां महारसे निपतितं तृणादिकमपि तद्रूपतामेवोपगच्छति ॥ इति गाथार्थः ॥ ३२५ ॥

अथ मिथ्यादृष्टेरप्येवं भविष्यति, इत्याशङ्क्य निराकुर्वन्नाह–

[1]तुल्लमियं मिच्छस्स वि सो सम्मत्ताइभावसुन्नो त्ति । उवओगम्मि वि तो तस्स निच्चमन्नाणपरिणामो ॥ ३२६ ॥

ननु यत्सम्यग्दृष्टेर्ज्ञानोपयोगतो ज्ञानमुक्तम्, तदिदं मिथ्यादृष्टेरपि तुल्यं समानम्, तस्याऽपि ज्ञानोपयोगसद्भावात् । तदयुक्तम् । कुतः?, इत्याह– यतः स मिथ्यादृष्टिः सम्यक्त्वादिभावशून्यः– सम्यक्त्वादयो ये भावाः पदार्थाः, आदिशब्दाद् मति-श्रुतज्ञानादिपरिग्रहः, तैः शून्यो विरहित इत्यर्थः, इति कुतोऽस्य ज्ञानोपयोगः?, सम्यक्त्वादिभावमन्तरेण तस्याऽभावात्, तद्भावे च मिथ्यादृष्टित्वायोगात् । ततस्तस्य मिथ्यादृष्टेरुपयोगेऽपि नित्यमज्ञानपरिणाम एव, महाविषादप्यतिक्रान्तरूपमज्ञानपरिणामं विहाय नान्यः कोऽप्यस्योपयोगोऽस्तीति भावः । अतोऽस्य सदैवाऽज्ञानपरिणामः, सम्यग्दृष्टेस्तु ज्ञानपरिणामः, इति कुत उभयोस्तुल्यता ? ॥ इति गाथार्थः ॥ ३२६ ॥

एतदेव भावयति–

[2]जं निन्नओवओगे वि तस्स विवरीअवत्थुपडिवत्ती । तो संसयाइकाले कत्तो नाणोवओगो से ? ॥ ३२७ ॥

यतो निर्णयोपयोगकालेऽपि तस्य मिथ्यादृष्टेः सर्वज्ञोक्तविपरीतवस्तुमतिपत्तिरेवोपजायते । ततो निर्णयकालेऽप्यनुपजातो ज्ञानपरिणामः संशयादिकाले कुतस्तस्य वराकस्य भविष्यति ? । अतो ध्रुवैव सम्यग्दृष्टेरिव मिथ्यादृष्टेरपि संशयादीनां ज्ञानत्वापादनाय श्रियसे त्वमिति भावः ॥ इति गाथार्थः ॥ ३२७ ॥

तदेवं सम्यग्दृष्टिसंबन्ध्येव मतिज्ञानमिह विचार्यत इति चेतसि निधाय '[3]अब्भुवगंतुं भण्णइ नाणं चिय संसयाईया' इत्यादिना ग्रन्थेन साधितं संशयादीनां ज्ञानत्वम् । ततश्च संशयादिभावेऽपि नाऽवग्रहादीनामज्ञानतेति स्थितम् । यदि वा संशयादिभावेनाऽवग्रहादीनां यदज्ञानत्वं परेण प्रेर्यते, तदभिप्रायापरिज्ञानादाकाशरोमन्थनमेव; न ह्यस्माभिर्ज्ञानमेवेह विचारयितुमारब्धं, येनाऽज्ञानत्वापादनं

---

१ तुल्यमिदं मिथ्या(दृष्टेः)अपि स सम्यक्त्वादिभावशून्य इति । उपयोगेऽपि ततस्तस्य नित्यमज्ञानपरिणामः ॥ ३२६ ॥

२ यस्मिन्नेवोपयोगेऽपि तस्य विपरीतवस्तुप्रतिपत्तिः । ततः संशयादिकाले कुतो ज्ञानोपयोगस्तस्य ? ॥ ३२७ ॥ ३ घ.छ.ज. 'रीयव' । ४ गाथा ३१४ ।

२५

बाधकं भवेत्; किन्तु ज्ञाना-ऽज्ञानादिरूपा सामान्येन मतिरेव विचार्यते, इति दर्शयन्नाह–

[4]अहवा जह सुयनाणावसरे सामण्णदेसणं भणियं । तह मइनाणावसरे सव्वमइनिरूवणं कुणति ॥ ३२८ ॥

अथवा यथा श्रुतज्ञानविचारावसरे ज्ञानरूपस्य, अज्ञानरूपस्य च श्रुतस्य सामान्यदेशनं भणितम्, तथा मतिज्ञानावसरे सर्वस्या अपि निर्णयरूपायाः, संशय-विपर्यासा-ऽनध्यवसायात्मिकायाश्च ज्ञानरूपायाः, अज्ञानरूपायाश्च मतेर्निरूपणं करोत्याचार्यः ॥ इति गाथाक्षरार्थः ॥

भावार्थस्त्वयम्– इहादौ '[5]आभिणिबोहियनाणं सुयनाणं' इत्यादिगाथायां श्रुतज्ञानं तावज्ज्ञाना-ज्ञानोभयरूपमपि भणितम्, न पुनः सम्यक्श्रुतमेव । कथं पुनरिदं ज्ञायते ?, इति चेत् । उच्यते– '[6]अक्खर सन्नी सम्मं' इत्यादिगाथयाऽभिधास्यमानानां चतुर्दशानां श्रुतभेदानामिह संग्रहात्, तेषु च मध्ये मिथ्याश्रुतस्याऽपि पठनात् । ततश्च यथा लाघवार्थमिह ज्ञाना-ऽज्ञानोभयरूपमपि श्रुतज्ञानमुक्तम्, तथेहापि मतिज्ञानमतिपादनावसरे संशय-विपर्यासा-ऽनध्यवसाय-निर्णय-ज्ञाना-ऽज्ञानात्मिकायाः सर्वस्या अपि मतेः सामान्येनैव निरूपणं क्रियते, न तु ज्ञानपञ्चकाधिकारात् सम्यग्दृष्टिसंबन्धिन्या एव, व्यवहारिजनप्रमाणा-ऽप्रमाणचिन्तया निर्णयरूपाया एव वा, इति भावः । ततश्चाऽवग्रहादयः संशयादिरूपा वा भवन्तु, निर्णयरूपा वा, ज्ञानं वा भवन्तु, अज्ञानं वा, न नः किञ्चित् क्षूयते; श्रुतवल्लाघवार्थं 'मननं मतिः' इति मतिमात्रस्यैवेह विचारयितुमिष्टत्वात्, तस्य च संशयादिष्वपि घटनात् । ततश्च 'नणु संदिद्धे संसय-विवज्जया' इत्यादि यदुक्तं तत्सर्वमस्माकमबाधकमेवेति भावः ॥ इति गाथार्थः ॥ ३२८ ॥

ननु भवतु सामान्येन सर्वस्या अपि मतेर्निरूपणमिदम्, किन्तु ज्ञाना-ऽज्ञानचिन्तायां किमिह ज्ञानम् ?, किं चाऽज्ञानम् ?, इति निवेद्यताम्, इत्याशङ्क्याह–

[7]एसा सम्माणुगया सव्वा नाणं विवज्जए इयरं । अविसेसिआ मइ च्चिय जम्हा निद्दिट्ठमाईए ॥ ३२९ ॥

एषा सामान्येन निर्दिष्टा मतिः सम्यक्त्वानुगता सम्यग्दृष्टेः संबन्धिनी सर्वाऽपि संशयादिरूपा, निश्चयरूपा वा ज्ञानमेव । विपर्यये त्वज्ञानम्– मिथ्यादृष्टिसंबन्धिनी सर्वाऽप्यज्ञानमित्यर्थः । कुतः पुनरिदं ज्ञायते ?, इत्याह– 'जम्हा निद्दिट्ठमाईए त्ति' यस्मादादावव-

---

१ अथवा यथा श्रुतज्ञानावसरे सामान्यदेशनं भणितम् । तथा मतिज्ञानावसरे सर्वमतिनिरूपणं करोति ॥३२८॥ २ गाथा ७९ । ३ अक्षरं संज्ञि सम्यक् ।

४ क. ग. 'था अ' । ५ गाथा ३१३ । ६ घ.छ.ज.'णु'। ७ एषा सम्यगनुगता सर्वा ज्ञानं विपर्यय इतरत् । अविशेषिता मतिरेव यस्माद् निर्दिष्टमादौ ॥ ३२९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रहादिभेदानिरूपणात् पूर्वमेव निर्दिष्टं नन्द्यध्ययनसूत्रकारेण । किं निर्दिष्टम् ?, इत्याह– 'अविसेसिया मइ च्चिय त्ति' सूचकत्वात् सूत्रस्य, अनेनाऽऽलापकः सर्वोऽपि सूचितो द्रष्टव्यः, तद्यथा–" अविसेसिआ मई मइनाणं च, मइअन्नाणं च, विसेसिआ मई– सम्मद्दिट्ठिस्स मई मइनाणं, मिच्छद्दिट्ठिस्स मई मइअन्नाणं " इति । ततो यस्मादागम एवमुक्तम्, तस्मात् सम्यग्दृष्टेः सर्वापि मतिर्ज्ञानं, मिथ्यादृष्टेस्त्वज्ञानम् ॥ इति गाथार्थः ॥ ३२९ ॥

अथ 'सदसद्-' इत्यादिना प्रागुक्तामपि सम्यग्दृष्टेर्ज्ञानत्वे, मिथ्यादृष्टेरज्ञानत्वे पुनरपि युक्तिमाह–

[4]विवरीअवत्थुगहणे जं सो साहणविवज्जयं कुणइ । तो तस्स अन्नाणफलं सम्मद्दिट्ठिस्स [5]नाणफलं ॥३३०॥

इह मिथ्यादृष्टिस्तावद् मिथ्यात्वोदयविपर्यस्तत्वात् त्रिभुवनगुरुप्रणीतवस्तु विपरीतं सर्वमेव गृह्णाति । ततोऽसौ विपरीतवस्तुग्रहणे विपरीतवस्तुग्रहणशीलतयेत्यर्थः, यस्मात् साधनविपर्ययं करोति– साध्यन्ते मोक्षादयोऽनेनेति साधनं ज्ञान-दर्शन-चारित्रादि तस्य विपर्ययं व्यत्ययं करोति, अज्ञान-मिथ्यात्वा-ऽविरत्यादीन्यपि मोक्षादिसाधकत्वेनेच्छतीत्यर्थः । ततस्तस्य ज्ञानमज्ञानफलमेव, अज्ञानस्यैव फलं नरकप्राप्त्यादिकं यस्मात् तदज्ञानफलम् , अज्ञानवद् वा फलति नरकादिदुःखं प्रसूत इत्यज्ञानफलम् ; तत्फलत्वाच्चाज्ञानमेवेति भावः । सम्यग्दृष्टेस्तु ज्ञानं ज्ञानफलमेव, ज्ञानस्यैव फलं यस्मात्, ज्ञानवद् वा फलति स्वर्गादिसुखमिति ज्ञानफलं, तत्फलत्वाच्च ज्ञानमेवेति हृदयम् । इदमुक्तं भवति– विपरीतवस्तुग्राही मिथ्यादृष्टिर्मोक्षादेः साधनं सम्यग्ज्ञान-क्रियारूपं विपरीतं मन्यते– "वेदविहिता हिंसा न दोषाय "

" षट् शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि । अश्वमेधस्य वचनाद् न्यूनानि पशुभिस्त्रिभिः " ॥ १ ॥
" हत्वा भूतसहस्राणि कृत्वा पापशतानि च । स्नात्वा गङ्गाजले पूते यान्ति जीवाः शिवालयम् " ॥ १ ॥

इत्यादिभूतघातनिबन्धनत्वेन संसारहेतोर्मिथ्याज्ञानस्य मोक्षादिसाधकत्वेनाऽभ्युपगमात्, जलस्नान-पशुवध-पुत्रसन्ततिनिबन्धनमैथुनादिक्रियायां च तत्साधकत्वेनैं प्रवर्तनात् । अतस्तस्य ज्ञानमप्यज्ञानफलत्वेनाऽज्ञानमेव । सम्यग्दृष्टेस्तु सम्यग्ज्ञान-क्रियासंयोगेन मोक्षादौ प्रवृत्तेर्ज्ञानफलत्वेन ज्ञानमेव ॥ इति गाथार्थः ॥ ३३० ॥

---

१ अविशेषिता मतिर्मतिज्ञानं च, मत्यज्ञानं च; विशेषिता मतिः– सम्यग्दृष्टेर्मतिर्मतिज्ञानम्, मिथ्यादृष्टेर्मतिर्मत्यज्ञानम् । २ घ. छ.ज. 'सिया म' ।
३ गाथा ३१९ । ४ विपरीतवस्तुग्रहणे यत् स साधनविपर्ययं करोति । ततस्तस्याऽज्ञानफलं सम्यग्दृष्टेर्ज्ञानफलम् ॥ ३३० ॥ ५ घ. ज. 'रीयव' । ६ क.ग. 'णाण' ।

अथ पुनरपि मिथ्यादृष्टेः सम्यग्दृष्टितुल्यतामाशङ्क्य निराकुर्वन्नाह–

जेइ सो वि तस्स धम्मो किं विवरीयत्तणं ति, तं न भवे । धम्मो वि जओ सव्वो न साहणं किंतु जो जोग्गो॥३३१

यो मिथ्याज्ञान-विपरीतक्रियालक्षणो धर्मो मिथ्यादृष्टिना मोक्षसाधकत्वेनाऽभ्युपगतः, यदि सोऽपि तस्य सम्यग्ज्ञानादिरूपस्य सम्यग्दृष्ट्यभ्युपगतस्य मोक्षसाधनस्य धर्मः, तर्हि मिथ्यादृष्टेः किं विपरीतत्वम् ? न किञ्चिदित्यर्थः । अयमत्र भावार्थः– 'इय सव्वमयं सव्वं समदिट्ठिस्स जं वत्थुं' इति वचनात् 'सर्वमयं सर्वमेव वस्तु' इति भवतां सिद्धान्तः । ततश्च सम्यग्ज्ञान-दर्शन-चारित्रसमुदायरूपस्य साधनस्य यथा सम्यग्ज्ञानादिको धर्मः, तथा मिथ्याज्ञानादिकोऽपि, अन्यथा सर्वस्य सर्वमयत्वत्यागप्रसङ्गात् । अतः सम्यग्दृष्टिना मोक्षसंसिद्धये यस्य साधनस्य धर्मोऽङ्गीकृतः, मिथ्यादृष्टिनाऽपि तत्सिद्धये तस्यैव धर्मः स्वीकृतः, धर्मग्रहणद्वारेण च कथञ्चित् तस्य धर्मिणो ग्रहणम् । अतः किं नाम मिथ्यादृष्टेर्विपरीतत्वम् ? । इति परेणोक्ते आचार्यः प्राह– 'तं न भवे त्ति' तदेतत् त्वदुक्तं न भवेत् न युज्यते । कुतः ?, इत्याह– 'धम्मो वि जओ इत्यादि' इदमुक्तं भवति– अनन्तधर्माध्यासितस्यापि वस्तुनो न सर्वेऽपि धर्मा एकमर्थं साधयन्ति, किन्तु योग्यतानुरूपेण कोऽपि कश्चिदेवेति । यथा हि कलश-मल्लक-कपाल-भृंभलकादीनां साधारणेऽपि मृद्धर्मत्वे न कलशवद् भृंभलकादयोऽपि मङ्गल-जलधारणादिकार्येषु व्याप्रियन्ते, नापि सुवर्णधर्मत्वे समानेऽपि कुण्डलवद् नूपुरमपि कर्णालङ्करणाय नियुज्यते, न चापि शालि-दालि-घृतादिधर्मत्वे तुल्येऽपि रसवद् गन्धादयोऽपि तृप्ति-देहपुष्ट्यादीनि साधयन्ति । एवं यद्यपि मोक्षादिसाधनस्य मिथ्याज्ञानादिकोऽपि व्यावृत्तिरूपतया धर्मः, तथापि नासौ मोक्षं साधयति, किन्तु तद्विपक्षभूतं संसारादिकमेव । मोक्षादिकं तु यत्साधनयोग्यः सम्यग्ज्ञानादिको धर्मः स एव साधयति । ततः सम्यग्दृष्टिगृहीतेऽप्यनन्तधर्माध्यासिते मोक्षादिसाधने वस्तुनि योग्यमेव सम्यग्ज्ञानादिकं धर्मं तत्साधनाय व्यापारयति, नाऽयोग्यं मिथ्याज्ञानादिकम् । मिथ्यादृष्टिस्तु मिथ्यात्वोदयतिमिरतिरस्कृतभावदृष्टित्वेन तत्र तस्याऽयोग्यतामपश्यंस्तमेव व्यापारयतीति । अतः साधनविपर्ययं करोति, इत्यज्ञानमेव तस्य । इति गाथार्थः ॥ ३३१ ॥

एतदेव भावयन्नाह–

जोग्गा-जोग्गविसेसं अमुणंतो सो विवज्जयं कुणइ । सम्मद्दिट्ठी उण कुणइ तस्स स ट्ठाणविणिओगं ॥ ३३२

---

१ यदि सोऽपि तस्य धर्मः किं विपरीतत्वमिति, तद् न भवेत् । धर्मोऽपि यतः सर्वो न साधनं किन्तु यो योग्यः ॥ ३३१ ॥ २ गाथा ३२० ।
३ घ.ज. 'भुम्भुल' । ४ क.ग. 'धनव' । ५ योग्यायोग्यविशेषमजानन् स (मिथ्यादृष्टिः) विपर्ययं करोति । सम्यग्दृष्टिः पुनः करोति तस्य स स्थानविनियोगम् ॥३३

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ख्यातार्थैव, नवरं सम्यग्दृष्टिर्योग्यमयोग्यं च साधनधर्मं जानाति, ज्ञात्वा च स्थाने व्यापारयति। तथा च सम्यगार धको भूत्वा समीहितफलभाग् भवति। उक्तं च–

"काले सिक्खइ नाणं जिणभणिअं परमभत्तिराएणं। दंसणपभावगाणि अ सिक्खइ सत्थाइं कालम्मि ॥ १ ॥
काले य भत्तपाणं गवेसए सयलदोसपरिसुद्धं। आयरियाईणट्ठा पवयणमायासु उवउत्तो ॥ २ ॥
एवं समायरंतो काले कालं विसुद्धपरिणामो। असवन्तजोगकारी सलाहणिज्जो य भुवणम्मि ॥ ३ ॥
सयलसुरा-सुरपणमिअजिण-गणहरभणियकिरियविहिकुसलो। आराहिऊण सम्मत्त-नाण-चरणाइं परमाइं ॥ ४ ॥
सत्तट्ठभवग्गहणब्भंतरकालम्मि केवलंनाणं। उप्पाडिऊण गच्छइ विहुयमलो सासयं मोक्खं ॥ ५ ॥
तत्थ य जर-जम्मण-मरण-रोग-तण्हा-छुहा-भय-विमुक्को। साइ अपज्जवसाणं कालमणंतं सुहं लहइ" ॥ ६ ॥

इत्येवमादि ॥ इति गाथार्थः ॥ ३३२ ॥

तदेवं चालना-प्रत्यवस्थानादिभिर्व्याख्याता अवग्रहादयः। अथ तेषामेव कालनिरूपणार्थमाह निर्युक्तिकारः–

उग्गहो एक्कं समयं ईहा-वाया मुहुत्तमंतं तु। कालमसंखं संखं च धारणा होइ नायव्वा ॥ ३३३ ॥

अवग्रह इति व्याख्यानाद् नैश्चयिकोऽर्थावग्रहो द्रष्टव्यः। स किम् ?, इत्याह– सर्वजघन्यः कालविशेषः समयः, तमेकं स भवति, न परतः। ईहा-ऽपायौ प्राग्निर्णीतस्वरूपौ 'मुहुत्तमंतं त्विति' अन्तःशब्दो मध्यवचनः, ततश्च जघन्यतः, उत्कृष्टतश्च मुहू न्तर्भिन्नं मुहूर्तं ज्ञातव्यौ भवतः– अन्तर्मुहूर्तमित्यर्थः। तुशब्दकारार्थः। चकारश्चानुक्तसमुच्चये। ततश्च व्यञ्जनावग्रह-व्यावहारिकार्थावग्र

१ काले शिक्षते ज्ञानं जिनभणितं परमभक्तिरागेण। दर्शनप्रभावकानि च शिक्षते शास्त्राणि काले ॥ १ ॥
काले च भक्तपानं गवेषते सकलदोषपरिशुद्धम्। आचार्यादिनामर्थाय प्रवचनमातृषूपयुक्तः ॥ २ ॥
एवं समाचरन् काले काले विशुद्धपरिणामः। आस्रवान्तयोगकारी श्लाघनीयश्च भुवने ॥ ३ ॥
सकलसुरा-ऽसुरप्रणतजिन-गणधरभणितक्रियाविधिकुशलः। आराध्य सम्यक्त्व-ज्ञान-चरणानि परमाणि ॥ ४ ॥
सप्ता-ऽष्टभवग्रहणाभ्यन्तरकाले केवलज्ञानम्। उत्पाद्य गच्छति विधुतमलः शाश्वतं मोक्षम् ॥ ५ ॥
तत्र च जरा-जन्म-मरण-रोग-तृष्णा-क्षुद्-भय-विमुक्तः। साद्यपर्यवसानं कालमनन्तं सुखं लभते ॥ ६ ॥

२ क.ग. 'णं'। ३ घ. 'तरे का'। ४ क. ग. 'लं नाणं'।

५ अवग्रह एकं समयमीहा-ऽपायौ मुहूर्तान्तस्तु। कालमसंख्यं संख्यं च धारणा भवति ज्ञातव्या ॥ ३३३ ॥

च प्रत्येकमन्तर्मुहूर्तं भवत इति द्रष्टव्यम्। क्वचित् 'मुहुत्तमद्धं तु' इति पाठः, तत्राऽपि मुहूर्तार्धशब्देनाऽन्तर्मुहूर्तमेव मन्तव्यम्। तु ब्दोऽपि तथैव। कलनं कालः, न विद्यते संख्या पक्ष-मास-ऋतु-अयन-संवत्सरादिका यस्याऽसावसंख्यः पल्योपमादिलक्षणस्तं का मसंख्यम्, तथा संख्यायत इति संख्यः– पक्ष-मास-ऋतु-अयनादिप्रमित इत्यर्थः, तं संख्यम्, चशब्दादन्तर्मुहूर्तं च धारणा प्रागभिहित रूपा भवति ज्ञातव्या। इदमुक्तं भवति– अविच्युति-स्मृति-वासनाभेदाद् धारणा त्रिविधा। तत्राऽविच्युतिरूपा, स्मृतिरूपा च प्रत्ये मन्तर्मुहूर्तं भवति। या तु तदर्थज्ञानावरणक्षयोपशमरूपा स्मृतिबीजरूपा वासनाख्या धारणा, सा संख्येयवर्षायुषां सत्त्वानां संख्य कालम्, असंख्येयवर्षायुषां तु पल्योपमादिजीविनामसंख्येयं कालं भवति ॥ इति निर्युक्तिगाथार्थः ॥ ३३३ ॥

अथैनां भाष्यकारो व्याख्यानयति–

अत्थोग्गहो जहन्नो समयं सेसोग्गहादओ वीसुं। अंतोमुहुत्तमेगं तु वासनाधारणं मोत्तुं ॥ ३३४ ॥

अवग्रह इत्यस्य व्याख्यानमर्थावग्रह इति, अयमपि निश्चय-व्यवहारभेदतो द्विधा, ततो व्यवहारार्थावग्रहव्यवच्छेदार्थमा 'जहन्न इति' अतिस्तोककालत्वेन जघन्यो नैश्चयिकोऽर्थावग्रहो नेतर इत्यर्थः, अयमेकसमयं भवति। शेषास्त्वेकां वासनारूपां धार मुक्त्वा येऽवग्रहादयो व्यञ्जनावग्रह-व्यावहारिकार्थावग्रहे-हा-ऽपाया-ऽविच्युति-स्मृतिरूपा मतिभेदास्ते सर्वेऽपि विष्वक् पृथगेकमेवाऽ र्मुहूर्तं भवन्ति। वासनाधारणायास्तु निर्युक्तिगाथोक्तमेव कालमानमवगन्तव्यम्, इत्यभिप्रायः ॥ इति गाथार्थः ॥ ३३४ ॥

अथ 'पुट्ठं सुणेइ सद्दं' इत्यादिनिर्युक्तिगाथाया भाष्यकारः संबन्धमुपदर्शयन् परां गाथामाह–

सोत्ताईणं पत्ताइविसयया पुव्वमत्थओ भणिया। इह कंठा सट्ठाणे भण्णइ, विसयप्पमाणं च ॥ ३३५

श्रोत्रादीनां प्राप्ता-ऽप्राप्तविषयता पूर्वमर्थतोऽर्थव्याख्यानद्वारेणाऽऽख्याता मया विस्तरेणाऽभिहिता। इह तु स्वस्थाने स्वस्थानत्वाद् नि क्तिकारेण कण्ठाद् गाथासूत्रेण स्वयमेवासौ भण्यते। एतदुक्तं भवति– 'उग्गहो ईह अवाओ य' इत्यादिनिर्युक्तिगाथाया व्याख्य कुर्वता मया 'नयण-मणोवज्जिंदियभेयाओ वंजणोग्गहो चउहा' इत्यादिना भाष्येण व्यञ्जनावग्रहव्याख्याप्रस्तावे श्रोत्राद प्राप्ता-प्राप्तविषयता प्रोक्ता। इह तु कण्ठाद् निर्युक्तिगाथायाः स्वस्थानत्वाद् निर्युक्तिकारस्तां वक्ति। नन्वत्र कथं तस्याः स्वस्थानत्व

१ घ. ज. 'स्मृतेर्वी'। २ घ. ज. 'जभूता वा'। ३ अर्थावग्रहो जघन्यः समयं शेषाऽवग्रहादयो विष्वक्। अन्तर्मुहूर्तमेकं तु वासनाधारणां मुक्त्वा ॥३३४॥

४ गाथा ३३६। ५ श्रोत्रादीनां प्राप्तादिविषयता पूर्वमर्थतो भणिता। इह कण्ठात् स्वस्थाने भण्यते, विषयप्रमाणं च ॥३३५॥ ६ गाथा १७८। ७ गाथा २०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

इति चेत्। उच्यते– नन्द्यध्ययनागमेऽत्रान्तरे तस्याः प्रतिपादितत्वादिह स्वस्थानत्वमिति। न केवलमसावेवाभिधास्यते, किन्तु प्रसङ्गतः सर्वेन्द्रियाणां विषयप्रमाणं चाहं भणिष्यामि ॥ इति गाथार्थः ॥ ३३५ ॥

कया पुनर्गाथया निर्युक्तिकृताऽसौ भण्यते ?, इत्याह–

पुट्ठं सुणेइ सद्दं रूवं पुण पासइ अपुट्ठं तु। गंधं रसं च फासं च बद्धपुट्ठं वियागरे ॥ ३३६ ॥

श्रोत्रेन्द्रियं कर्तृ, शब्दं कर्मतापन्नं शृणोति। कथंभूतम् ?, इत्याह– स्पृश्यत इति स्पृष्टस्तं स्पृष्टं तनौ रेणुवदालिङ्गितमात्रमेवेत्यर्थः। इदमुक्तं भवति– स्पृष्टमात्राण्येव शब्दद्रव्याणि श्रोत्रमुपलभते, यतो घ्राणेन्द्रियेविषयभूतद्रव्येभ्यस्तानि सूक्ष्माणि, बहूनि, भावुकानि च, पटुतरं च श्रोत्रेन्द्रियं विषयपरिच्छेदे घ्राणेन्द्रियादिगणादिति। श्रोत्रेन्द्रियस्य चेह कर्तृत्वं शब्दश्रवणान्यथानुपपत्तेर्लभ्यते। एवं घ्राणेन्द्रियादिष्वपि वाच्यम्। तानि पुनः कथं गन्धादिकं गृह्णन्ति ?, इत्याह– गन्ध्यत इति गन्धस्तमुपलभते घ्राणेन्द्रियम्, रस्यत इति रसस्तं च गृह्णाति रसनेन्द्रियम्, स्पृश्यत इति स्पर्शस्तं च जानाति स्पर्शनेन्द्रियम्। कथम्भूतं गन्धादिकम् ?, इत्याह– बद्धस्पृष्टम्। तत्र स्पृष्टमिति पूर्ववदेव, बद्धं तु गाढतरमाश्लिष्टमात्मप्रदेशैस्तोयवदात्मीकृतमित्यर्थः। ततश्च गन्धादिद्रव्यसमूहं प्रथमं स्पृष्टमालिङ्गितम्, ततश्च स्पर्शनानन्तरं बद्धमात्मप्रदेशैर्गाढतरमागृहीतमेवोपलभते घ्राणेन्द्रियादिकमिति। एवं व्यागृणीयात् प्ररूपयेत् प्रज्ञापकः, यतो घ्राणेन्द्रियादिविषयभूतानि गन्धादिद्रव्याणि शब्दद्रव्यापेक्षया स्तोकानि, बादराणि, अभावुकानि च, विषयपरिच्छेदे श्रोत्रापेक्षयाऽपटूनि च घ्राणादीनि; अतो बद्धस्पृष्टमेव गन्धादिद्रव्यसमूहं गृह्णन्ति, न पुनः स्पृष्टमात्रमिति भावः। ननु यदि स्पर्शानन्तरं बद्धं गृह्णाति, तर्हि 'पुट्ठबद्धं' इति पाठो युक्तः, इति चेत्। उच्यते– विचित्रत्वात् सूत्रगतेरित्थं निर्देशः, अर्थतस्तु यथा त्वयोक्तं तथैव द्रष्टव्यम्। अपरस्त्वाह– यद् बद्धं तत् स्पृष्टं भवत्येव, विशेषबन्धे सामान्यबन्धस्याऽन्तर्भावात्, ततः किं स्पृष्टग्रहणेन ? इति। तदयुक्तम्, सकलश्रोतृसाधारणत्वाच्छास्त्रारम्भस्य, प्रपञ्चितज्ञाऽनुग्रहार्थमर्थापत्तिगम्यार्थाभिधानेऽप्यदोषादिति ॥

चक्षुरिन्द्रियं त्वप्राप्तमेव विषयं गृह्णाति, इत्याह– 'रूवं पुण पासई अपुट्ठं त्विति' रूपं कर्मतापन्नं चक्षुरस्पृष्टमप्राप्तमेव पश्यति। पुनःशब्दस्य विशेषणार्थत्वादस्पृष्टमपि योग्यदेशस्थमेव पश्यति, नाऽयोग्यदेशस्थं सौधर्मादि, कट-कुट्यादिव्यवहितं वा घटादि ॥ इति निर्युक्तिगाथार्थः ॥ ३३६ ॥

---

१ स्पृष्टं शृणोति शब्दं रूपं पुनः पश्यत्यस्पृष्टं तु। गन्धं रसं च स्पर्शं च बद्धस्पृष्टं व्यागृणीयात् ॥ ३३६ ॥ ×(व्याहरेत्)

अथैतद्व्याख्यानाय भाष्यम्–

पुट्ठं रेणुं व तणुम्मि बद्धमप्पीकयं पएसेहिं। छिक्काइं चिय गिण्हइ सद्दद्दव्वाइं जं ताइं ॥ ३३७ ॥
बहु-सुहुम-भावुगाइं जं पडुयरं च सोत्तविण्णाणं। गंधाईदव्वाइं विवरीयाइं जओ ताइं ॥ ३३८ ॥
फरिसाणंतरमत्तप्पएसमीसीकयाइं घेप्पंति। पडुयरविण्णाणाइं जं च न घाणाइकरणाइं ॥ ३३९ ॥

'स्पृष्टं' इत्यस्य व्याख्यानं 'पुट्ठं रेणुं व तणुम्मि त्ति' यथा रेणोस्तनौ संबन्ध इत्येतावन्मात्रेण यद् वस्तु संबद्धं तदिह स्पृष्टमुच्यत इति भावः। 'बद्धमित्यादि' यदात्मीकृतमात्मना गाढतरमागृहीतम्, आत्मप्रदेशैस्तनुलग्नतोयवद् मिश्रीभूतं तद् बद्धमुच्यत इत्यर्थः। तत्र 'छिक्काइं चिय त्ति' स्पृष्टान्येव शब्दद्रव्याणि गृह्णाति श्रोत्रम्, यतस्तानि बहूनि, सूक्ष्माणि, भावुकानि च वासकानि चेत्यर्थः। पटुतरं च श्रोतृविज्ञानम्। गन्धादिद्रव्याणि तु विपरीतानि स्तोक-बादरा-ऽभावुकानि यतः, अतस्तानि स्पर्शानन्तरमात्मप्रदेशैर्मिश्रीकृतानि स्पृष्ट-बद्धानि गृह्यन्ते घ्राणादिभिः; पटुतरविज्ञानानि च न भवन्ति यतो घ्राणादिकरणानि ॥ इति गाथात्रयार्थः ॥ ३३७ ॥ ३३८ ॥ ३३९ ॥

अथ '[2]रूवं पुण पासइ अपुट्ठं तु' इत्यत्रोपपत्तिमाह–

[3]अप्पत्तकारि नयणं मणो य नयणस्स विसयपरिमाणं। आयंगुलेण लक्खं अइरित्तं जोयणाणं तु ॥ ३४० ॥

प्रागुक्तयुक्त्या अप्राप्तकारि– अप्राप्तस्यैव वस्तुनः परिच्छेदकारि यतो नयनं, मनश्च; ततोऽस्पृष्टमेव रूपं पश्यति नयनेन्द्रियम्। ननु यद्यप्राप्तं रूपमेतत् पश्यति, तर्हि लोकान्तादर्वाग् यदस्ति तत् सर्वं पश्यतु, अप्राप्तत्वाविशेषात्, इत्याशङ्क्य, यदिन्द्रियाणां विषयपरिमाणं भणनीयत्वेन प्राक् प्रतिज्ञातं, तत्र चक्षुषस्तावत् तदाह– 'नयणस्सेत्यादि' नयनेन्द्रियस्याऽऽगमे आत्माङ्गुलेन सातिरेकं योजनलक्षमुत्कृष्टतोऽपि विषयपरिमाणमभिहितम्, तेनाऽप्राप्तकारित्वाविशेषेऽपि परतो न पश्यतीति भावः। इह च 'आत्माङ्गुलेन' इति वदतः कोऽभिप्रायः ?। उच्यते– अङ्गुलमिह तावत् त्रिविधं भवति– आत्माङ्गुलम्, उच्छ्रयाङ्गुलं, प्रमाणाङ्गुलं चेति। तत्राऽऽद्यम्–

---

१ स्पृष्टं रेणुरिव तनौ बद्धमात्मीकृतं प्रदेशैः। स्पृष्टान्येव गृह्णाति शब्दद्रव्याणि यत् तानि ॥ ३३७ ॥
बहु-सूक्ष्म-भावुकानि यत् पटुतरं च श्रोत्रविज्ञानम्। गन्धादिद्रव्याणि विपरीतानि यतस्तानि ॥ ३३८ ॥
स्पर्शानन्तरमात्मप्रदेशमिश्रीकृतानि गृह्यन्ते। पटुतरविज्ञानानि यच्च न घ्राणादिकरणानि ॥ ३३९ ॥ २ गाथा ३३६।
३ अप्राप्तकारि नयनं मनश्च नयनस्य विषयपरिमाणम्। आत्माङ्गुलेन लक्षमतिरिक्तं योजनानां तु ॥ ३४० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"[1]जेणं जया मणूसा तेसिं जं होइ माणरूवं तु । तं भणियमिहायंगुलमणियतमाणं पुण इमं तु" ॥ १ ॥

द्वितीयं तु–

"[2]परमाणू तसरेणू रहरेणू अग्गयं च वालस्स । लिक्खा जूया य जवो अट्ठगुणविवड्ढिया कमसो" ॥ १ ॥

इत्यादिग्रन्थोक्तम् । तृतीयं तु–

"[3]उस्सेहंगुलमेगं हवइ, पमाणंगुलं सहस्सगुणं । तं चेव दुगुणियं खलु वीरस्सायंगुलं भणियं ॥ १ ॥
आयंगुलेण वत्थुं, उस्सेहपमाणओ मिणसु देहं । नग-पुढवि-विमाणाइं मिणसु पमाणंगुलेणं ति" ॥ २ ॥

एवं स्थिते आत्माङ्गुलेनेदं चक्षुषो विषयपरिमाणं, न शेषाङ्गुलाभ्याम् ॥ इति गाथार्थः ॥ ३४० ॥

अत्र प्रेरकः प्राह–

[4]नेणु भणियमुस्सयंगुलपमाणओ जीवदेहमाणाइ । देहपमाणं चिय तं न उ इंदिय-विसयपरिमाणं ॥३४१॥

ननु "उस्सेहपमाणओ मिणे देहं" इतिवचनाद् अन्यत्र भणितमुक्तम् । किं तत् ?, इत्याह– "नारकादिजीवदेहमानादि केन ?" इत्याह–"उच्छ्रयाङ्गुलप्रमाणतः" देहग्रहणस्योपलक्षणार्थत्वादिन्द्रियं, इन्द्रियविषयपरिमाणं च तत्र गृह्यते, इति मन्यमानेन परेणाऽऽदिशब्दः कृतः; इन्द्रियं हि देहस्थत्वाद् देहग्रहेणैव गृह्यते, तद्विषयपरिमाणमप्यासन्नत्वात् तद्ग्रहणेन गृह्यत इति भावः । ततश्च देहस्य, इन्द्रियाणां, तद्विषयपरिमाणस्य चोच्छ्रयाङ्गुलमेयत्वात् किमितीह चक्षुषो विषयपरिमाणमात्माङ्गुलेनोच्यते ? इति ॥

अत्रोत्तरमाह–'देहेत्यादि' यदुच्छ्रयाङ्गुलमेयत्वेनाऽन्यत्रोक्तम्, तदेहप्रमाणमात्रमेव बोद्धव्यं, न त्विन्द्रिय-विषयपरिमाणमपि, तस्यात्माङ्गुलमेयत्वात् ॥ इति गाथार्थः ॥ ३४१ ॥

कथं पुनरेतद् विज्ञायते ?, इत्याह–

---

१ येन यदा मनुष्यास्तेषां यद् भवति मानरूपं तु । तद् भणितमिहाऽऽत्माऽङ्गुलमनियतमानं पुनरिदं तु ॥ १ ॥
२ परमाणुस्त्रसरेणू रथरेणुरग्रकं च वालस्य । लिक्षा यूका च यवोऽष्टगुणविवर्धिताः क्रमशः ॥ १ ॥
३ उत्सेधाङ्गुलमेकं भवति, प्रमाणाङ्गुलं सहस्रगुणम् । तदेव द्विगुणितं खलु वीरस्याऽऽत्माऽङ्गुलं भणितम् ॥ १ ॥
आत्माङ्गुलेन वस्तु, उत्सेधप्रमाणतो मिनुयाद् देहम् । नग-पृथिवी-विमानानि मिनुयाद् प्रमाणाङ्गुलेनेति ॥ २ ॥ ४ क.ग. 'गुलस' ।
५ ननु भणितमुच्छ्रयाङ्गुलप्रमाणतो जीवदेहमानादि । देहप्रमाणमेव तद् न त्विन्द्रिय-विषयपरिमाणम् ॥ ३४१ ॥

२६

[1]जं तेण पंचधणुसयनराइविसयववहारवोच्छेओ । पावइ, सहस्सगुणियं जेण पमाणंगुलं तत्तो ॥३४२॥

यद् यस्मात् तेनोच्छ्रयाङ्गुलेनेन्द्रियविषयपरिमाणेऽभ्युपगम्यमाने, आदिशब्दस्य व्यवहितसंबन्धात् पञ्चा-ऽर्धपञ्चमधनुःशतादि-प्रमाणानां भरत-सगरादिनराणां योऽसौ श्रोत्रादिभिः शब्दादिविषयग्रहणव्यवहारः प्रसिद्धस्तस्य व्यवच्छेदः प्राप्नोति । कुतः ?, इत्याह– येन भरतचक्रवर्त्यङ्गुलरूपं यत् प्रमाणाङ्गुलं तदेतत् ततस्तस्मादुच्छ्रयाङ्गुलात् सहस्रगुणमुक्तं "उस्सेहंगुलमेगं हवइ, पमाणंगुलं सहस्सगुणं" इतिवचनात् । भरतादीनां चाऽवध्यादिनगर्यः, स्कन्धावारश्चात्माङ्गुलेन द्वादशयोजनायामतया सिद्धान्ते निर्णीतः । उत्सेधाङ्गुलेन पुनरनेकानि योजनसहस्राणि भवन्ति । अतस्तत्राऽऽयुधशालादिषु ताडितभेर्यादिशब्दश्रवणं सर्वेषां त्वदभिप्रायेण न प्राप्नोति, श्रोत्रं हि 'वारसहिं जोअणेहिं सोयं अभिगिण्हए सद्दं" इत्यादिवचनाद् द्वादशभ्य एव योजनेभ्यः समागतं शब्दं शृणोति, न परतः । एतानि च द्वादश योजनानि त्वदभिप्रायेण किलोच्छ्रयाङ्गुलेन मीयन्ते, अत उच्छ्रयाङ्गुलनिष्पन्नेभ्योऽनेकयोजनसहस्रेभ्यः समागतं भेर्यादिशब्दं कथं श्रोत्रं गृह्णीयात् ? । इष्यते च भरतादिनगरी-स्कन्धावारेषु तच्छ्रवणम् । अत आत्माङ्गुलेनैवेन्द्रियाणां विषयपरिमाणं, नोत्सेधाङ्गुलेन ॥ इति गाथार्थः ॥ ३४२ ॥

अपि च, यानि देहस्याऽत्मभूतान्येवेन्द्रियाणि, तान्यपि तावत् सर्वाण्युच्छ्रयाङ्गुलेन न मीयन्ते, किं पुनरिन्द्रियविषयपरिमाणम् ?, इति दर्शयति–

[2]इंदियमाणे वि तयं भयणिज्जं जं ति गाउआईणं । जिब्भिंदियाइमाणं संववहारे विरुज्झेज्जा ॥ ३४३ ॥

इन्द्रियाणि श्रोत्रादीनि, तानि चेह "कोयंबपुप्फ-गोलय-मसूर-अइमुत्तयकुसुमं व" इत्यादिना प्रोक्तानि द्रव्येन्द्रियाणि गृह्यन्ते । तेषां मानं प्रमाणमङ्गुलाऽसंख्येयभागादिकं, तत्रापि कर्तव्ये ग्रहीतव्ये बोद्धव्ये वा तदुच्छ्रयाङ्गुलं भजनीयं– क्वापि व्यापार्यते, क्वापि नेत्यर्थः, स्पर्शनेन्द्रियमेकं तेन मीयते, शेषाणि त्वात्माङ्गुलेनैवेति भावः । कुतः ?, इत्याह–'जमित्यादि' यद् यस्मात् त्रिगव्यूतादि-

---

१ यत्तेन पञ्चधनुःशतनरादिविषयव्यवहारव्यवच्छेदः । प्राप्नोति, सहस्रगुणितं येन प्रमाणाङ्गुलं ततः ॥ ३४२ ॥ + अयोध्या-।
२ घ. छ. 'त्रिन्द्रियादि'। ३ द्वादशभिर्योजनैः श्रोत्रमभिगृह्णाति शब्दम् ।
४ इन्द्रियमानेऽपि तद् भजनीयं यदिति क्वोशादीनाम् । जिह्वेन्द्रियादिमानं संव्यवहारे विरुध्येत ॥ ३४३ ॥
५ कादम्बपुष्प-गोलका-ऽतिमुक्तककुसुममिव ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मानानां युगलधर्मिणां जिह्वेन्द्रियादिमानं यद्युच्छ्रयाङ्गुलेन गृह्यते, तदा संव्यवहारे कल्पद्रुमरसादिपरिज्ञानलक्षणे विरुध्येत न घटेतेत्यर्थः । इदमुक्तं भवति–"बाहल्लओ य सव्वाइं अंगुलअसंखभागं, एमेव पुहुत्तओ, नवरं अंगुलपुहुत्त रसणं" इत्यादिवचनादङ्गुलपृथक्त्वविस्तरं जिह्वेन्द्रियं निर्णीतम् । त्रिगव्यूतादिमानानां च जन्तूनां तदनुसारितया विशालानि मुखानि,जिह्वा च । ततो यद्युच्छ्रयाङ्गुलेन तेषां क्षुरमाकारतयोक्तस्य जिह्वेन्द्रियस्याऽङ्गुलपृथक्त्वलक्षणो विस्तरो गृह्येत, तदाऽत्यल्पतया सर्वामपि जिह्वां न व्याप्नुयात्; ततश्च सर्वयाऽपि तया रसवेदनलक्षणो व्यवहारो न घटेत । तस्मादात्माङ्गुलेनैव जिह्वादिमानं घटते । ततश्च देहात्मभूतानीन्द्रियाण्यपि सर्वाण्युच्छ्रयाङ्गुलेन यदा न मीयन्ते, तदेन्द्रियविषयपरिमाणस्य दूरे वार्ता, इति भावः ॥ इति गाथार्थः ॥ ३४३ ॥

तदेवं "उस्सेहपमाणओ मिणे देहं" इत्यत्र पारिशेष्याद् देहशब्देन यल्लभ्यते, तद् दर्शयन्नाह–

तणुमाणं चिय तेणं हेविज्ज भणियं सुए वि तं चेव । एएण देहमाणाइं नारयाईणमिज्जंति ॥ ३४४ ॥

तस्मादिन्द्रियपरिमाणे, इन्द्रियविषयपरिमाणे चैकान्तेनोच्छ्रयाङ्गुलेनेष्यमाणे दोषस्य दर्शितत्वात् पारिशेष्यात् तनुमानमेव तेनोत्सेधाङ्गुलेन भवेत् , न पुनरिन्द्रियपरिमाणं, तद्विषयपरिमाणं चेति भावः। युगलधर्मिणां रसवेदनव्यवहारस्य, चक्रवर्तिभरतनगर्यादिषु भेर्यादिशब्दश्रवणव्यवहारस्य चाभावप्रसङ्गस्य दर्शितत्वादिति । किञ्च, इन्द्रियपरिमाणं, तद्विषयपरिमाणं चोच्छ्रयाङ्गुलेन परः स्वमनीषिकयाऽर्थापत्त्यैव ब्रूते, न पुनः श्रुते साक्षादेतत् काऽप्यभिहितम् । किं पुनस्तर्हि साक्षात् तत्राभिहितम् ?, इत्याह–'भणियं सुए वि तं चेवेत्यादि' श्रुतेऽपि तदेव देहमानमेवोच्छ्रयाङ्गुलेन भणितं, नाऽन्यदिति । केन पुनर्ग्रन्थेनैतच्छ्रुतेऽभिहितम् ?, इत्याह– 'एएणेत्यादि' अर्थनिर्देश एवाऽयं, सूत्रालापकस्त्वेष द्रष्टव्यः, तद्यथा– "इच्चेएणं उस्सेहंगुणप्पमाणेणं नेरइअ-तिरिक्खजोणिय-मणुस्स-देवाणं सरीरोगाहणाउ मिज्जंति"। तदस्मिन् सूत्रे शरीरावगाहनैवोच्छ्रयाङ्गुलमेयत्वेनोक्ता, न त्विन्द्रियविषयपरिमाणात्; ततस्तदात्माङ्गुलेनैव द्रष्टव्यम्, इति स्थितम् ॥ इति गाथार्थः ॥ ३४४ ॥

अथ परः सिद्धान्तस्य पूर्वापरविरोधमुद्भावयन्नाह–

---

१ बाहुल्यतश्च सर्वाण्यङ्गुलासंख्यभागम्, एवमेव पृथक्त्वतः, नवरमङ्गुलपृथक्त्वं रसनम् । २ घ. 'पुहत्त' । ३ उत्सेधप्रमाणतो मिनुयाद् देहम् ।
४ तनुमानमेव तेन भवेद् भणितं सूत्रेऽपि तदेव । एतेन देहमानानि नारकादीनां मीयन्ते ॥ ३४४ ॥ ५ घ.छ. 'हवेज्ज' । ६ घ.छ. 'रगाई' ।
७ क.ग. 'मिच्छंति' । ८ इत्येतेनोत्सेधाङ्गुलप्रमाणेन नैरयिक-तिर्यग्योनिक-मनुष्य-देवानां शरीरावगाहना मीयन्ते ।

लक्खेहिं एक्कवीसाए साइरेगेहिं पुक्खरद्धम्मि । उदये पेच्छंति नरा सूरं उक्कोसए दिवसे ॥ ३४५ ॥
नयणिंदियस्स तम्हा विसयपमाणं जहा सुए भिहियं । आ उस्सेहपमाणंगुलाण एक्केण वि ण जुत्तं ॥३४६॥

ननु पुष्करवरद्वीपस्य मानुषोत्तरपर्वतद्विधाकृतस्याऽर्वाग्भागवर्तिन्यर्धे मानुषोत्तरसंनिधावुत्कृष्टे दिवसे कर्कटकसंक्रान्त्यामुदये, उपलक्षणत्वादस्तमयसमये च नरा मनुष्याः सूरमादित्यं पश्यन्ति– अवलोकयन्ति । कियद्दूरं व्यवस्थितम् ?, इत्याह– सातिरेकैरेकविंशतिलक्षैर्योजनानाम् । एतदुक्तं भवति–

"[1]सीयालीससहस्सा दो य सया जोयणाण ते बेंद्धा । एगवीससट्ठिभागा कक्कडमाइम्मि पेच्छ नरा" ॥ १ ॥

इतिवचनाद् यथाऽत्र कर्कसंक्रान्तावुत्कृष्टे दिवसे एतावति दूरे व्यवस्थितं सूर्यं मनुष्याः पश्यन्ति, तथा पुष्करार्धेऽपि मानुषोत्तरसमीपे प्रमाणाङ्गुलनिष्पन्नैः सातिरेकैरेकविंशतियोजनलक्षैर्व्यवस्थितमादित्यं तत्र दिने तन्निवासिनो लोकाः समवलोकयन्ति तत्र भ्रमितिबाहुल्यात्, सूर्याणां च शीघ्रतरगतित्वात्; उक्तं च–

"[2]एगवीसं खलु लक्खा चउंतीसं चेव तह सहस्साइं । तह पंच सया भणिया सत्तत्तीसाए अइरित्ता ॥ १ ॥
इति नयणविसयमाणं पुक्खरदीवद्धवासिमणुआणं । पुव्वेण य अवरेण य पिहं पिहं होइ नायव्वं" ॥ २ ॥

इत्यादि । तस्माद् नयनेन्द्रियस्य सातिरेकयोजनलक्षस्वरूपं विषयपरिमाणं यथा श्रुते प्रज्ञापनादिकेऽभिहितम्, तथा तेन प्रकारेणाऽऽत्माङ्गुलो-त्सेधाङ्गुल-प्रमाणाङ्गुलानामेकेनापि गृह्यमाणं न युक्तं, प्रमाणाङ्गुलनिष्पन्नस्यापि योजनलक्षस्य तन्निष्पन्नसातिरेकैकविंशतियोजनलक्षेभ्य एकविंशतितमभागवर्तित्वेन बृहदन्तरत्वात् । तस्मादेकत्र सातिरेकं लक्षम्, अन्यत्र तु सातिरेकैकविंशतिलक्षाणि योजनानां नयनस्य विषयप्रमाणं ब्रुवतः श्रुतस्य पूर्वापरविरोधः । इति परस्याऽऽकूतम् ॥ इति गाथाद्वयार्थः ॥ ३४५ ॥ ३४६ ।

---

१ लक्षैरेकविंशत्या सातिरेकैः पुष्करार्धे । उदये पश्यन्ति नराः सूरमुत्कृष्टे दिवसे ॥ ३४५ ॥
नयनेन्द्रियस्य तस्माद् विषयप्रमाणं यथा श्रुतेऽभिहितम् । आ उत्सेधप्रमाणाङ्गुलानामेकेनापि न युक्तम् ॥ ३४६ ॥
२ षट्चत्वारिंशत्सहस्राणि द्वे च शते योजनानां तान् बद्धान् । एकविंशतिषष्टिभागान् कर्कटादौ पश्यन्ति नराः ॥ १ ॥ ३ घ.छ. 'बद्धा' । ४ क.ग. 'भ्रमति' ।
५ एकविंशतिः खलु लक्षाणि चतुस्त्रिंशच्च तथा सहस्राणि । तथा पञ्च शतानि भणितानि सप्तत्रिंशताऽतिरिक्तानि ॥ १ ॥
इति नयनविषयमानं पुष्करद्वीपार्धवासिमनुजानाम् । पूर्वेण चाऽपरेण च पृथक् पृथग् भवति ज्ञातव्यम् ॥ २ ॥ ६ घ. 'उवीसं' । ७ घ.छ.'यप्रमा' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदेतत् परिहरति–

सुत्ताभिप्पाओऽयं[1] पयासणिज्जे तयं न उ पयासे । वक्खाणओ विसेसो न हि संदेहादलक्खणया ॥३४७॥

सातिरेकयोजनलक्षं नयनविषयप्रमाणं ब्रुवतः सूत्रस्याऽयमभिप्राय इयं विवक्षा यदुत– स्वयं तेजोरूपप्रकाशरहितत्वात् परप्रकाशनीयं यद् वस्तु पर्वत-गर्तादिकं तत्रैव तत् सातिरेकयोजनलक्षं नयनविषयप्रमाणतया द्रष्टव्यम्, न तु स्वयमेव तेजोयुक्तत्वेन प्रकाशे चन्द्रा-ऽर्कादिके प्रकाशके वस्तुनि । एतदुक्तं भवति– कश्चिद् निर्मलचक्षुर्जीवः सातिरेकयोजनलक्षे स्थितं पर्वतादिकं वीक्षते, इति प्रकाशनीये पर्वत-गर्तादिके वस्तुनि नयनस्य तद्विषयप्रमाणमुक्तम्, प्रकाशके त्वादित्यादिकेऽनियमः । कुतः पुनरयं सूत्राभिप्रायो गम्यते ?, इत्याह– व्याख्यानतो विशेषप्रतिपत्तिः कर्तव्या, न तु संदेहादुभयपक्षोक्तिलक्षणात् सूत्रस्य सर्वज्ञप्रणीतस्याऽलक्षणता– असमञ्जसाभिधायिता व्यवस्थापनीया- व्याख्यानात् सूत्रं विषयविभागेन धरणीयं, न तूभयपक्षोक्तिमात्रभ्रमितैस्तद्विरोध उद्भावनीय इत्यर्थः ।

उक्तं च–

" [2]जं जह सुत्ते भणियं तहेव जइ तं, वियालणा नत्थि । किं कालियाणुओगो दिट्ठो दिट्ठिप्पहाणेहिं ?" ॥ १ ॥

इति गाथार्थः ॥ ३४७ ॥

तदेवमप्राप्तकारिताविचारप्रक्रमेण नयनस्य विषयप्रमाणमुक्तम्; अथ प्रसङ्गतः शेषेन्द्रियाणामपि तदाह–

[3]बारसहिंतो सोत्तं सेसाइं नवहिं जोयणेहिंतो । गिण्हंति पत्तमत्थं एत्तो परओ न गिण्हंति ॥ ३४८ ॥

मेघगर्जितादिशब्दमुत्कृष्टतो द्वादशयोजनेभ्यः समायातं गृह्णाति श्रोत्रम् । उक्तशेषाणि त्विन्द्रियाणि घ्राण-रसन-स्पर्शनलक्षणानि गन्ध-रस-स्पर्शलक्षणमर्थमुत्कर्षतो नवयोजनेभ्यः प्राप्तं गृह्णन्ति, अतः परतोऽप्यायातं शब्दादिकमेतानि न गृह्णन्ति । ननु मेघगर्जितादिविषयः शब्दः प्रथमप्रावृषि, प्रथममेघवृष्टौ सत्यां मृत्तिकादिगन्धश्च दूरादप्यायातो गृह्यमाणः समनुभूयते; रस-स्पर्शौ तु कथम् ?, इति चेत् । उच्यते– दूरादागतानां गन्धद्रव्याणां रसोऽपि तावत् कश्चिद् भवत्येव । स च तेषां जिह्वासंबन्धे सति यथासंभवं कदाचित

१ सूत्राभिप्रायोऽयं प्रकाशनीये तद् न तु प्रकाशे । व्याख्यानतो विशेषो नहि संदेहादलक्षणता ॥ ३४७ ॥
२ यद् यथा सूत्रे भणितं तथैव यदि तत्, विचारणा नास्ति । किं कालिका(सिद्धान्ता)ऽनुयोग आदिष्टो दृष्टिप्रधानैः ? ॥ १ ॥
३ द्वादशभ्यः श्रोत्रं शेषाणि नवभ्यो योजनेभ्यः । गृह्णन्ति प्राप्तमर्थमेतस्माद् परतो न गृह्णन्ति ॥ ३४८ ॥

केनचिद् गृह्यत एव । तथाच वक्तारो भवन्ति– 'कटुकस्य, तीक्ष्णादेर्वा वस्तुनः संबन्धी अयं गन्धः' इति । यच्चेह कटुकत्वं, तीक्ष्णादित्वं चोच्यते, तद् रसस्यैव धर्मः । ततश्च ज्ञायते– जिह्वासंबन्धे तेषां कटुकादिको रसोऽपि गृहीत इति । स्पर्शोऽपि शीतादिर्दूरादपि शिशिरपद्मसरः-सरित्-समुद्रादेर्मध्येनाऽऽयातस्य वातादेरनुभूयत एवेति ॥ ३४८ ॥

यद्येवम्, द्वादश-नवयोजनेभ्यः परतोऽप्यायाताः शब्द-गन्धादयः किमिति न गृह्यन्ते ?, इत्याह–

[1]दव्वाण मंदपरिणामयाए परओ न इंदियबलं पि । अवरमसंखेज्जंगुलभागाओ नयणवज्जाणं ॥ ३४९ ॥

द्वादश-नवयोजनेभ्यः परतः समायातानां शब्द-गन्धादिद्रव्याणां मन्दपरिणामत्वात् । न खलु परतः समायातानां तेषां तथाविधः परिणामो भवति, येन श्रोत्र-घ्राणादिविज्ञानं जनयेयुः, श्रोत्रादीन्द्रियाणामपि च तथाविधं बलं न भवति, येन परतः समायातान् शब्दादिद्रव्याणि गृहीत्वा स्वविज्ञानं जनयन्ति । तदेवमुक्तमिन्द्रियाणामुत्कृष्टं विषयपरिमाणम् । अथ जघन्यं तद् बिभणिषुराह– 'अवरमित्यादि' अपरं जघन्यं विषयप्रमाणमुच्यते । किम् ?, इत्याह– असंख्याततमादङ्गुलासंख्येयभागादागतं-गन्धादिकं घ्राणादीनि गृह्णन्तीति । किमेतत् सर्वेषामपीन्द्रियाणां जघन्यं विषयप्रमाणम् ?, न, इत्याह– नयनवर्जानाम् ॥ ३४९ ॥

नयनस्य तर्हि का वार्ता ?, इत्याह–

[2]संखेज्जइभागाओ नयणस्स, मणस्स न विसयपमाणं । पोग्गलमित्तनिबंधाभावाओ केवलस्सेव ॥३५०॥

अङ्गुलसंख्येयभागात्– अङ्गुलसंख्येयभागमवधौ कृत्वा नयनस्य जघन्यं विषयपरिमाणम्, अतिसंनिकृष्टस्याऽञ्जनशलाका-रजो-मलादेस्तेनाऽनुपलम्भादिति भावः । मनसस्तु क्षेत्रतो नास्त्येव विषयप्रमाणं, अनियमेन दूरे, आसन्ने च तत् प्रवर्त इत्यर्थः । कुतः ?, इत्याह– पुद्गलमात्रस्य निबन्धो नियमस्तस्याऽभावात्, मूर्ता-ऽमूर्तसमस्तवस्तुविषयत्वेन 'पुद्गलेष्वेवेदं प्रवर्तते' इत्येवंभूतस्य नियमस्याऽभावात्, केवलस्येवेत्यर्थः । इह यत् पुद्गलमात्रनिबन्धनियतं न भवति, न तस्य विषयपरिमाणमस्ति, यथा केवलस्य, पुद्गलमात्रनिबन्धनियतं च मनः, ततो नाऽस्य विषयपरिमाणम्; यस्य तु विषयपरिमाणं तत्पुद्गलमात्रनिबन्धरहितमपि भवति, यथाऽवधि-मनःपर्यायज्ञाने इति ॥ अत्राह– नन्वनैकान्तिकोऽयं हेतुः, मति-श्रुतज्ञानाभ्यां व्यभिचारात्; तथाहि– मूर्ता-ऽमू

१ द्रव्याणां मन्दपरिणामतया परतो नेन्द्रियबलमपि । अपरमसंख्येयाङ्गुलभागाद् नयनवर्जानाम् ॥ ३४९ ॥
२ संख्येयभागाद् नयनस्य, मनसो न विषयप्रमाणम् । पुद्गलमात्रनिबन्धाभावात् केवलस्येव ॥ ३५० ॥ ३ घ. छ. 'परिमा' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

समस्तवस्तुविषयत्वेन तावद् नैते पुद्गलमात्रनिबन्धनियते, अथ च दृश्यते श्रौत्रादीन्द्रियप्रभवयोस्तयोर्द्वादशयोजनादिकं क्षेत्रतो विषयप्रमाणमिति । तदेतदसमीक्षिताभिधानमेव, यत इन्द्रियप्रभवयोरेव तयोरिदं विषयपरिमाणम्, इन्द्रियाणि च पुद्गलमात्रनिबन्धनियतान्येव, इति कुतो व्यभिचारः ?, मनःप्रभवयोस्तु तयोरस्ति पुद्गलमात्रनिबन्धाभावः, केवलं तयोः क्षेत्रतो विषयपरिमाणमपि नास्ति, अतः कुतोऽनैकान्तिकता ? इत्यलं विस्तरेण ॥ इति गाथात्रयार्थः ॥ ३५० ॥

आह– ननु 'पुट्ठं सुणेइ सद्दं' इत्युक्तं भवद्भिः, तत्र च किं शब्दप्रयोगोत्सृष्टान्येव केवलानि शब्दद्रव्याणि शृणोति, उताऽन्यान्येव तद्वासितानि, आहोस्विद् मिश्राणि ? इति । अत्रोच्यते– केवलानि तावद् न शृणोति, वासकस्वभावत्वाच्छब्दद्रव्याणाम्, तद्योग्यद्रव्याकुलत्वाच्च लोकस्य, मिश्राणि तु शृणुयात्, वासितानि वाऽन्यानि, यत आह—

भासासमसेढीओ सद्दं जं सुणइ मीसयं सुणइ । वीसेढी पुण सद्दं सुणेइ नियमा पराघाए ॥ ३५१ ॥

भाष्यत इति भाषा, वक्त्रा शब्दतयोत्सृज्यमाना द्रव्यसंहतिरित्यर्थः, तस्याः समाः माञ्जलाः श्रेणय आकाशप्रदेशपङ्क्तयो भाषासमश्रेणयः, समग्रहणं विश्रेणिव्यवच्छेदार्थं, भाषासमश्रेणीषु इतो गतः स्थित इत्यनर्थान्तरं, भाषासमश्रेणीतः । इदमुक्तं भवति– भाषकस्य, अन्यस्य वा भेर्यादेः समश्रेणिव्यवस्थितः श्रोता यं शब्दं, पुरुषाश्च भेर्यादिसंबन्धिनं ध्वनिं शृणोति, तं मिश्रकं शृणोतीत्यवगन्तव्यम्, भाषकादुत्सृष्टशब्दद्रव्याणि, तद्वासिताऽपान्तरालस्थद्रव्याणि च, इत्येवं मिश्रं शब्दद्रव्यराशिं शृणोति, न तु वासकमेव, वास्यमेव वा केवलमित्यर्थः । 'विसेढी पुणेत्यादि' 'मञ्चाः क्रोशन्ति' इतिन्यायाद् विश्रेणिव्यवस्थितः श्रोताऽपि विश्रेणिरुच्यते, स विश्रेणिः पुनः श्रोता शब्दं नियमाद् नियमेन पराघाते वासनायां सत्यां शृणोति । इदमुक्तं भवति– यानि भाषकोत्सृष्टानि[3], भेर्यादिशब्दद्रव्याणि वा तैः पराघाते वासनाविशेषे सति यानि वासितानि समुत्पन्नशब्दपरिणामानि द्रव्याणि तान्येव विश्रेणिस्थः शृणोति, न तु भाषकाद्युत्सृष्टानि, तेषामनुश्रेणिगामित्वेन विदिग्गमनाऽसंभवात् । न च कुड्यादिप्रतिघातस्तेषां विदिग्गतिनिमित्तं संभवति, लेष्ट्वादिवादरद्रव्याणामेव तत्संभवात्, एषां च सूक्ष्मत्वात् । न च वक्तव्यम्– द्वितीयादिसमयेषु तेषां स्वयमपि विदिक्षु गमनसंभवात् तत्स्थस्याऽपि मिश्रशब्दश्रवणसंभव इति; निसर्गसमयानन्तरं समयान्तरेषु तेषां भाषापरिणामेनाऽनवस्थानात् "भाष्यमाणैव भाषा, भाषासमयानन्तरं भाषाऽभाषैव" इतिवचनात् । यदपि 'चउहिं समयेहिं लोगो भासाए निरंतरं तु होइ फुडो' इति वक्ष्यति, तत्रापि द्वितीयादि-

१ गाथा ३३६ । २ घ. 'अत'। ३ भाषासमश्रेणीतः शब्दं यं शृणोति मिश्रकं शृणोति । विश्रेणिः पुनः शब्दं शृणोति नियमात्पराघाते ॥ ३५१ ॥
४ घ. छ. 'नि श' । ५ गाथा ३७९।

समयेषु भाषाद्रव्यैर्वासितत्वात् तेषां भाषात्वं द्रष्टव्यम् । अत्राह– ननु यदि वक्तृनिसृष्टानि भाषाद्रव्याणि प्रथमसमये दिक्ष्वेव गच्छन्ति, समयानन्तरं च नावतिष्ठन्ते, तर्हि तद्वासितद्रव्याणि द्वितीयसमये विदिक्षु गच्छन्ति, ततश्च दिग्-विदिग्व्यवस्थितयोः समयभेदेन शब्दश्रवणं प्राप्नोति, अविशेषेणैव सर्वोऽपि शब्दं शृण्वन्नुपलभ्यते । नैष दोषः, समयादिकालभेदस्यातिसूक्ष्मत्वेनाऽलक्षणादिति । भवत्वेवं, तथापि "भाष्यमाणैव भाषा" इतिवचनाद् निसर्गसमयवर्तिन्येव भाषा, ततो 'विश्रेणिस्थो द्वितीयसमयेऽभाषां शृणोति' इत्यायातम् । नैतदेवम्, भाषाद्रव्यैर्वासितानामपि द्रव्याणां तदविशेषत्वाद् भाषात्वं न विरुध्यते । अत एव 'वीसेढी पुण सद्दं' इत्यत्र पुनरपि यच्छब्दग्रहणं तत् पराघातवासितद्रव्याणामपि तथाविधशब्दपरिणामख्यापनार्थं कृतम्, इति तावद् वयमवगच्छामः, तत्त्वं बहुश्रुताद्यो विदन्तीति । घ्राणादीन्यपीन्द्रियाणि गन्धादिद्रव्याणि मिश्राण्यादत्ते । तेषां चानुश्रेणिगमननियमो नास्ति, बादरत्वात्, वातायनोपलभ्यमानरेणुवत्, इति वृद्धटीकाकारः ॥ इति निर्युक्तिगाथार्थः ॥ ३५१ ॥

अत्र भाष्यम्—

[1]सेढी पएसपंती वदतो सव्वस्स छद्दिसिं ताओ । जासु विमुक्का धावइ भासा[2] समयम्मि पढमम्मि॥३५२॥

इह श्रेणिराकाशप्रदेशपङ्क्तिरभिधीयते, लोकमध्ये च वदतो भाषमाणस्य सर्वस्य वक्तुस्ताः पूर्वा-ऽपर-दक्षिणो-त्तरो-र्ध्वा-ऽधोरूपासु षट्स्वपि दिक्षु सन्त्येव । भाषकेण विमुक्ता निसृष्टा सती भाषा यासु प्रथमसमयेऽपि लोकान्तमनुधावति ॥ ३५२ ॥

ततः किम् ?, इत्याह–

[3]भासासमसेढिठिओ तब्भासामीसियं सुणइ सद्दं । तद्दव्वभावियाइं [4]अण्णाइं सुणइ विदिसत्थो ॥ ३५३ ॥

'भाषासमश्रेणीतः' इति किमुक्तं भवति ?, इत्याह– भाषासमश्रेणिस्थितः । स किम् ?, इत्याह– तस्य भाषकस्य, शब्दभेर्यादेर्वा भाषा तद्भाषा तद्रूपेणोत्सृष्टः पुद्गलसमूहस्तन्मिश्रितं शब्दं शृणोति । विदिग्व्यवस्थितः पुनः श्रोता तद्द्रव्यभावितान्यपराण्येव द्रव्याणि शृणोति, न पुनस्तानि ॥ ३५३ ॥

कुतः ?, इत्याह–

१ श्रेणिः प्रदेशपङ्क्तिर्वदतः सर्वस्य षड्दिक्षु ताः । यासु विमुक्ता धावति भाषा समये प्रथमे ॥ ३५२ ॥ २ घ. छ. 'सा पढमम्मि समयम्मि' ।
३ भाषासमश्रेणिस्थितस्तद्भाषामिश्रितं शृणोति शब्दम् । तद्द्रव्यभावितान्यान्यानि शृणोति विदिक्स्थः ॥ ३५३ ॥ ४ घ. छ. 'अन्नाइं' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अणुसेढीगमणाओ पडिघायाभावओऽनिमित्ताओ । समयंतराणवत्थाणओ य मुक्काइं न सुणेइ ॥ ३५४ ॥

तेषामनुश्रेणिगमनात् । अनुश्रेणिगमने प्रवृत्तानामपि प्रतिघाताद् विश्रेणिगमनं भविष्यतीति चेत्, इत्याह– प्रतिघातस्य स्खलनस्याऽभावात् । एतदपि कुतः ?, इत्याह– अनिमित्तात् कुड्यादेस्तन्निमित्तस्याऽसंभवात्, बादरद्रव्याणामेव तत्संभवात्, एषां च सूक्ष्मत्वादिति भावः । न च वक्तव्यं– द्वितीयादिसमयेषु तेषां स्वयमपि विदिक्षु गमनात् तत्स्थस्याऽपि मिश्रशब्दश्रवणसंभव इति । कुतः ?, इत्याह– 'समयंतरेत्यादि' निसर्गसमयानन्तरं द्वितीयादौ समयान्तरे श्रवणसंस्कारजनकशक्तिसंपन्नतया तेषां भाषकाद्युत्सृष्टद्रव्याणामनवस्थानात्, इति प्रागुक्तमेव । इति मुक्तानि भाषकाद्युत्सृष्टानि द्रव्याणि विदिग्व्यवस्थितो न शृणोति ॥ इति गाथात्रयार्थः ॥ ३५४ ॥

आह– केन पुनर्योगेनाऽमीषां वाग्द्रव्याणामादानम् ?, उत्सर्गो वा कथम् ?, इत्याह–

[1]गिण्हइ य काइएणं निसिरइ तह वाइएण जोएणं । एगंतरं च गिण्हइ निसिरइ एगंतरं चेव ॥ ३५५ ॥

कायेन निर्वृत्तः कायिकः, योजनं योगो व्यापारः, कर्म, क्रिया, इत्यनर्थान्तरम् । तत्र सर्व एव वक्ता कायिकेन योगेन शब्दद्रव्याणि गृह्णाति । चशब्दस्त्वेवकारार्थः, तस्य च व्यवहितसंबन्धात् कायिकेनैवेति द्रष्टव्यम् । निसृजति, उत्सृजति, मुञ्चति, इति पर्यायाः । तथेति ग्रहणानन्तरमित्यर्थः । उक्तिर्वाक् तया निर्वृत्तो वाचिकस्तेन वाचिकेन योगेन निसृजति । किमनुसमयमेव गृह्णाति, निसृजति वा; उताऽन्यथा ?, इत्याशङ्क्याह– एकान्तरमेव गृह्णाति, निसृजत्येकान्तरं चैव । अयमत्र भावार्थः– प्रतिसमयं गृह्णाति, मुञ्चति च । कथम् ?, यथा ग्रामादन्यो ग्रामो ग्रामान्तरं, पुरुषाद् वाऽन्यः पुरुषो निरन्तरोऽपि सन् पुरुषान्तरम्, एवमेकैकस्मात् समयादेकैक एवैकान्तरोऽनन्तरसमय एवेत्यर्थः ॥ इति निर्युक्तिगाथासंक्षेपार्थः, विस्तरार्थस्तु भाष्यादवसेयः ॥ ३५५ ॥

तच्चेदम्—

[4]गिण्हिज्ज काइएणं किह निसिरइ वाइएण जोएणं ? । को वाऽयं जोगो किं वाया कायसंरंभो ? ॥ ३५६ ॥
वाया न जीवजोगो पोग्गलपरिणामओ रसाइ व्व । न य ताए निसिँरिज्जइ स च्चिय निसिँरिज्जए जम्हा ॥ ३५७ ॥

१ अनुश्रेणिगमनात् प्रतिघाताभावतोऽनिमित्तात् । समयान्तराऽनवस्थानतश्च मुक्तानि न शृणोति ॥ ३५४ ॥ २ क.ग. 'तेषां' ।
३ गृह्णाति च कायिकेन निसृजति तथा वाचिकेन योगेन । एकान्तरं च गृह्णाति निसृजत्येकान्तरमेव ॥ ३५५ ॥
४ गृह्णीयात् कायिकेन कथं निसृजति वाचिकेन योगेन ? । को वाऽयं योगः किं वाक् कायसंरम्भः ? ॥ ३५६ ॥ ५ घ. 'गेण्हेज्ज' ।
वाग् न जीवयोगः पुद्गलपरिणामतो रसादिरिव । न च तया निसृज्यते सैव निसृज्यते यस्मात् ॥ ३५७ ॥ ६ क.ग. 'एण' । ७ क.ग. 'सिरज्ज' ।

[7]अह सो तणुसंरंभो निसिरइ तो काइएण वत्तव्वं । तणुजोगविसेस च्चिय मण-वइजोग त्ति जमदोसो ॥ ३५८ ॥

अत्र परः प्राह– ननु 'गिण्हइ य काइएणं' इति यदुक्तं तद् मन्यामहे, यतो गृह्णीयात् कायिकेन योगेन वाग्द्रव्याणि भाषकः, नेदमयुक्तम्, कायव्यापारमन्तरेण तद्ग्रहणाऽयोगात् । यत् पुनरुक्तम्– '[2]निसिरइ तह वाइएण जोएणं' इति, तदेतद् नावगच्छामः, यतः कथं नाम निसृजति वाचिकेन योगेन ?, गृह्यमाणाया वाचो जीवव्यापाररूपयोगाभावाद् नैतद् घटत इत्यर्थः । इति संक्षेपेणोक्त्वा विस्तराभिधित्सया प्राह– 'को वाऽयमित्यादि' वेत्यथवा, किमनेन संक्षेपेण ?, विस्तरेणाऽपि पृच्छामः– कोऽयं नाम वाग्योगः, येन निसृजतीत्युक्तम् ?। 'किं वाय त्ति' वागेव निसृज्यमानभाषापुद्गलसमूहरूपो वाग्योगः, किंवा कायसंरम्भः कायव्यापारस्तन्निसर्गहेतुर्वाग्योगः ?, इति विकल्पद्वयम् । तत्र प्रथमविकल्पपक्षं निराकुर्वन्नाह– 'वाया न जीवजोगो इत्यादि' योगोऽत्र शरीरजीवव्यापारः प्रस्तुतः, स च वाग् न भवति, पुद्गलपरिणामत्वात् तस्याः, रस-गन्धादिवत्; यस्तु जीवव्यापाररूपो योगः स पुद्गलपरिणामोऽपि न भवति, यथा जीवाधिष्ठितकायव्यापारः । अपि च, 'न य ताए त्ति' न च तया वाचा किञ्चिद् निसृज्यते, तस्या एव निसृज्यमानत्वात्; न च कर्मैव करणं भवति । अतो वागेव वाग्योग इति प्रथमविकल्पो न घटते । अथ द्वितीयमधिकृत्याह– 'अहेत्यादि' अथाऽसौ वाग्योगस्तनुसंरम्भः कायव्यापारः, ततः 'कायिकेन निसृजति' इत्येवमेव वक्तव्यं स्यात्, अतः किमुक्तम्– '[3]निसिरइ तह वाइएण जोएणं' इति ? । अत्रोत्तरमाह– 'तणु इत्यादि' ननु द्वितीयविकल्प एवाऽत्राऽङ्गीक्रियते, केवलमविशिष्टः काययोगो वाग्योगतया नाऽस्माभिरिष्यते, किन्तु तनुयोगविशेषावेव कायव्यापारविशेषावेव मनो-वाग्योगाविष्येते यद् यस्मात्; ततोऽयमदोषः । न हि कायिको योगः कस्यांचिदप्यवस्थायां शरीरिणां जन्तूनां निवर्तते, अशरीरिणां सिद्धानामेव तन्निवृत्तेरिति, अतो वाग्निसर्गादिकालेऽपि सोऽस्त्येवेति भावः ॥ ३५६ ॥ ३५७ ॥ ३५८ ॥

तर्हि समुच्छिद्यतां मनो-वाग्योगकथा । न, इत्याह–

[5]किं पुण तणुसंरंभेण जेण मुंचइ स वाइओ जोगो । मण्णइ य स माणसिओ तणुजोगो चेव य विभत्तो ॥३५९॥

'किं पुण' इति 'तथापि' इत्यस्याऽर्थे । ततश्चेदमुक्तं भवति– यद्यपि काययोगः सर्वत्राऽनुगतोऽस्ति, तथापि येन मनो वाग्द्रव्याणामुपादानं करोति स कायिको योगः, येन तु संरम्भेण तान्येव मुञ्चति स वाचिकः, येन तु मनोद्रव्याणि चिन्तायां व्यापारयति

१ अथ स तनुसंरम्भो निसृजति ततः कायिकेन वक्तव्यम् । तनुयोगविशेष एव मनो-वाग्योगाविति यददोषः ॥३५८॥
२ गाथा ३५५ । ३ किं पुनस्तनुसंरम्भेण येन मुञ्चति स वाचिको योगः । मन्यते च स मानसिकस्तनुयोग एव च विभक्तः ॥ ३५९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स मानसिकः, इत्येवं तनुयोग एवैक उपाधिभेदात् त्रिधा विभक्त इतिः एतावन्मात्रभेदेन त्रयोऽप्यमी योगा व्यवह्रियन्ते । परमार्थतस्तु एक एव सर्वत्र कायिको योग इति ॥ ३५९ ॥

तथाच प्रमाणयन्ति–

तणुजोगो च्चिय मण-वइजोगा काएण दव्वगहणाओ। आणापाणूव्व, न चे, तओ वि जोगंतरं होज्जा ॥ ३६० ॥

तनुयोग एव मनो-वाग्योगौ– तदन्तर्गतावेवैतावित्यर्थः, इयं प्रतिज्ञाः कायेनैव तद्द्रव्यग्रहणादिति हेतुः, प्राणा-ऽपानवदिति दृष्टान्तः; यथा कायेन द्रव्यग्रहणात् प्राणा-ऽपानव्यापारः कायिकयोगाद् न भिद्यते, एवं मनो-वाग्योगावपीति भावः । न चेदेवं– न चेत् त्वया प्राणा-ऽपानव्यापारस्तनुयोगतया-ऽभ्युपगम्यते, तर्हि तकोऽपि सोऽपि प्राणा-ऽपानव्यापारो योगान्तरं स्यात्, ततो योगचतुष्टयमसङ्गः, अनिष्टं चैतत्, तस्मात् कायिकयोग एवाऽयमिति ॥ ३६० ॥

अत्र परः प्राह–

तुल्ले तणुजोगत्ते कीस व जोगंतरं तओ न कओ ?। मण-वइजोगा व कया, भण्णइ ववहारसिद्धत्थं ॥३६१॥

ननु त्वदुक्तयुक्त्यैव सर्वेषां तुल्ये तनुयोगत्वे मनो-वाग्योगवत् किमिति तकोऽसौ प्राणा-ऽपानव्यापारः कायिकयोगाद् योगान्तरं न कृतः, किमिति चतुर्थो योग न कृतः ? इत्यर्थः । अथ नैवं क्रियते, तर्हि तुल्येऽपि तनुयोगत्वे मनो-वाग्योगौ काययोगात् किमिति पृथक् कृतौ ?। तस्मात् तनुयोगत्वस्य सर्वत्र तुल्यत्वादेक एव काययोगः क्रियताम्, उपाधिभेदेन तु चत्वारो वा योगाः क्रियन्ताम्, अन्यथा पक्षपातमात्रमेव स्यात्, न युक्तिः, इति भावः ॥ अत्रोत्तरमाह– 'भण्णई'त्यादि' भण्यतेऽत्रोत्तरम् । किं तत् ?, इत्याह– व्यवहारस्य लोक-लोकोत्तररूढस्य सिद्ध्यर्थं प्रसिद्धिनिमित्तं मनो-वाग्योगावेव पृथक् कृतौ, न प्राणा-ऽपानयोग इति ॥ ३६१ ॥

व्यवहारोऽपि किमितीत्थं प्रवृत्तः ?, इत्याह–

कायकिरियाइरित्तं नाणा-पाणफलं जह वईए । दीसइ मणसो य फुडं तणुजोगब्भंतरो तो सो ॥ ३६२ ॥

---

१ तनुयोग एव मनो-वाग्योगौ कायेन द्रव्यग्रहणात् । आना-ऽपानाविव, न चेत्, सकोऽपि योगान्तरं भवेत् ॥ ३६०॥ २ ज्ञ. 'णुव्व' क.ग. 'णंव'

३ तुल्ये तनुयोगत्वे कस्माद् वा योगान्तरं सकौ न कृतः ? । मनो-वाग्योगौ वा कृतौ, भण्यते व्यवहारसिद्ध्यर्थम् ॥ ३६१ ॥

४ कायक्रियातिरिक्तं नाऽऽना-ऽपानफलं यथा वाचः । दृश्यते मनसश्च स्फुटं तनुयोगाभ्यन्तरस्थतः सः ॥ ३६२ ॥ ५ क. 'णाणा' ।

कायक्रिया कायव्यापारः, तदतिरिक्तं तदभ्यधिकं प्राणा-ऽपानफलं न किमपि दृश्यते, यथा वाचो मनसश्च स्फुटं तद् दृश्यते इदमुक्तं भवति– यथा वाचः स्वाध्यायविधान-परमत्यायनादिकं, मनसश्च धर्मध्यानादिकं विशिष्टं स्फुटं कायक्रियातिरिक्तं फलमुपलभ्यते, नैवं प्राणा-ऽपानयोः, इति तनुयोगाभ्यन्तरवर्त्येवाऽसौ प्राणा-ऽपानव्यापारो व्यवह्रियते, न पृथक् । न च वक्तव्यम्– 'जीवत्यसौ' इति प्रतीतिजननादिकं प्राणा-ऽपानफलमप्युपलभ्यत एवेतिः एवंभूतस्य प्रयोजनमात्रस्य सर्वत्र विद्यमानत्वाद् धावन-वल्गनादिव्यापारस्याऽपि पृथग्योगत्वप्रसङ्गात् । तस्माद् विशिष्टव्यवहाराङ्गभूतपरमत्यायनादिफलत्वाद् वाग्-मनोयोगावेव पृथक् कृतौ, न प्राणा-ऽपानयोग इति ॥ ३६२ ॥

तदेवं तनुयोगो वाग्निसर्गविषये व्याप्रियमाणो वाग्योगः, मनसे तु व्याप्रियमाणो मनोयोगः; वाग्विषयो योगो वाग्योगः मनोविषयो योगो मनोयोग इति कृत्वा । इत्येवं 'तनुयोगविशेषावेव वाग्-मनोयोगौ' इत्येतद् दर्शितम् । अथवा 'स्वतन्त्रावेवैतौ' इति दर्शयन्नाह–

अहवा तणुजोगाहिअवइदव्वसमूहजीववावारो । सो वइजोगो भण्णइ वाया निसिरिज्जए तेणं ॥३६३॥

तह तणुवावाराहिअमणदव्वसमूहजीववावारो । सो मणजोगो भण्णइ मण्णइ नेयं जओ तेणं ॥ ३६४ ॥

अथवा तनुयोगेन कायव्यापारेणाऽऽहृतो गृहीतो योऽसौ वाग्द्रव्यसमूहस्तेन सहकारिकारणभूतेन तन्निसर्गार्थं जीवस्य व्यापारः स वाग्योगो भण्यते, वाचा सहकारिकारणभूतया जीवस्य योगो वाग्योग इति कृत्वा । किं पुनस्तेन क्रियते ?, इत्याह– सैव वाक् तेन जीवव्यापारेण निसृज्यते परमत्यायनार्थमुच्यत इति ॥ तथा, तनुव्यापारेणाऽऽहृतो योऽसौ मनोद्रव्यसमूहस्तेन सहकारिकारणभूतेन वस्तुचिन्तनाय योऽसौ जीवस्य व्यापारः स मनोयोगो भण्यते, मनसा सहकारिकारणभूतेन जीवस्य योगो मनोयोग इति व्युत्पत्तेः । कुतः पुनरयं मनोयोगः ?, इत्याह– यतस्तेन ज्ञेयं जिनमूर्त्यादिकं मन्यते चिन्त्यते, अतस्तस्य मनोयोगत्वमिति ॥

तदेवमत्र पक्षे वाग्द्रव्यनिसर्गादिकाले तनोर्व्यापारः सन्नपि न विवक्षितः, किन्तु वाग्-मनोद्रव्यसचिवस्य जीवस्य, इति स्वतन्त्रावेव वाग्-मनोयोगौ, न तु तनुयोगविशेषभूताविति भावः । आना-ऽपानद्रव्यसाचिव्यात् तन्मोचने जन्तोस्तद्योगोऽपि स्वतन्त्रः पृथक् प्राप्नोति, इति चेत् । न, 'भण्णइ ववहारसिद्धत्थं' इत्यादिना प्रतिविहितत्वात् ॥ इति गाथानवकार्थः ॥ ३६३ ॥ ३६४ ॥

---

१ अथवा तनुयोगाऽऽहृतवाग्द्रव्यसमूहजीवव्यापारः । स वाग्योगो भण्यते वाचा निसृज्यते तेन ॥ ३६३ ॥ + हृतो - दि.द.।

तथा तनुव्यापाराऽऽहृतवाग्द्रव्यसमूहजीवव्यापारः । स मनोयोगो भण्यते मन्यते ज्ञेयं यतस्तेन ॥ ३६४ ॥ २ गाथा ३६१ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ 'एगंतरं च गिण्हइ' इत्यादि व्याचिख्यासुराह–

[1]जह गामाओ गामो गामंतरमेवमेग एगाओ । एगंतरं ति भण्णइ समयाओण्णंतरो समओ ॥ ३६५ ॥

यथैकस्माद् ग्रामादन्यो ग्रामोऽनन्तरितोऽपि लोकरूढ्या ग्रामान्तरमुच्यते, पुरुषाद् वाऽन्यः पुरुषोऽनन्तरोऽपि पुरुषान्तरमभिधीयते; एवमिहापि एकस्मात् समयाद् योऽयमन्यः समयः सोऽयमनन्तरोऽपि सन्नेकान्तरमित्यभिधीयते । ततः किमुक्तं भवति ?, इत्याह– एकस्मात् समयादनन्तरः समय एकान्तरमिति, एवं चाऽनुसमय एव गृह्णाति, मुञ्चति चेति पर्यवसितं भवति ॥ ३६५ ॥

अन्ये तु 'एकान्तरम्' इत्येकैकेन समयेनाऽन्तरितं ग्रहणं, निसर्गं चेच्छन्ति, इति दर्शयति–

[3]केई एगंतरियं मण्णन्ते गंतरं ति, तेसिं च । विच्छिन्नावलिरूवो होइ धणी, सुयविरोहो य ॥ ३६६ ॥

इह केचिद् व्याख्यातारो मन्यन्ते– ग्रहणं, निसर्जनं चैकैकेन समयेनाऽन्तरितमेकान्तरमुच्यते । एतच्चाऽयुक्तम्, यतस्तेषामेवं व्याख्यातॄणामन्तरान्तरविच्छिन्नरत्नावलीरूपो ध्वनिः प्राप्नोति, अन्तरान्तरग्रहणसमयेषु सर्वेष्वप्यश्रवणात् । तथा, श्रुतविरोधश्च, यत उक्तं श्रुते "[4]अणुसमयमविरहिअं निरंतरं गिण्हइ" इति; तथाहि– इदं सूत्रं प्रतिसमयग्रहणप्रतिपादकत्वात् प्रतिसमयनिसर्गप्रतिपादकमपि द्रष्टव्यम्, गृहीतस्य द्वितीयसमयेऽवश्यं निसर्गादिति ॥ ३६६ ॥

अत्र परः प्राह–

[5]आह, सुए च्चिय निसिरइ संतरियं न उ निरंतरं भणियं । एगेण जओ गिण्हइ समयेणेगेण सो मुयइ ॥३६७॥

परः प्राह– ननु यथा स्वपक्षसमर्थकं सूत्रं त्वया दर्शितं, तथा श्रुत एवाऽस्मत्पक्षसमर्थकमपि तद् भणितमेव । किं तत् ?, इत्याह– 'निसिरईत्यादि' इदं प्रज्ञापनोक्तसूत्रं गाथायामुपनिबद्धं, तच्चेदम्– "[6]सांतरं निसिरइ, नो निरंतरं निसिरइ; एगेणं समयेणं गिण्हइ, एगेणं समयेणं निसिरइ" इत्यादि । तदनेन सूत्रेण निसर्गस्य सान्तरस्योक्तत्वाद् मध्यारूयानमुपपन्नमेव । इति परस्याभिप्रायः ॥ ३६७ ॥

---

१ गाथा ३५५ । २ यथा ग्रामाद् ग्रामो ग्रामान्तरमेवमेक एकस्मात् । एकान्तरमिति भण्यते समयादनन्तरः समयः ॥ ३६५ ॥

३ केचिदेकान्तरितं मन्यन्त एकान्तरमिति, तेषां च । विच्छिन्नावलिरूपो भवति ध्वनिः, श्रुतविरोधश्च ॥ ३६६ ॥

४ अनुसमयमविरहितं निरन्तरं गृह्णाति । ५ क. ग. 'अप' ।

६ आह, श्रुत एव निसृजति सान्तरितं न तु निरन्तरं भणितम् । एकेन यतो गृह्णाति समयेनैकेन स मुञ्चति ॥ ३६७ ॥

७ सान्तरं निसृजति, नो निरन्तरं निसृजति; एकेन समयेन गृह्णाति, एकेन समयेन निसृजति ।

अत्रोत्तरमाह–

[1]अणुसमयमणंतरियं गहणं भणियं जओ विमुक्खो वि । जुत्तो निरंतरो च्चिय, भणइ, कह संतरो भणिओ ?॥३६८॥

आचार्यः प्राह– हन्त ! तावद् ग्रहणमनुसमयमनन्तरितमव्यवहितं प्राक्तनसूत्रेण भणितं प्रतिपादितमिति भवतोऽपि प्रतीतम् । यत एवम्, अतो विमोक्षोऽपि निसर्गोऽपि निरन्तर एव युक्तः, गृहीतस्याऽवश्यमेवाऽनन्तरसमये निसर्गादिति । प्रेरकः पुनरपि भणति । किम् ?, इत्याह– 'कह संतरो भणिउ त्ति' इदमुक्तं भवति– अहमपि जानामि यतः सूत्रे ग्रहणं निरन्तरमुक्तं, परं यस्तत्रैव निसर्गः सान्तर उक्तः स कथं नीयते ? इति भवानपि निवेदयतु । सत्यम्, किन्तु विषयविभागोऽत्र द्रष्टव्यः ॥ ३६८ ॥

कः पुनरयम् ?, इति गुरुराह–

[2]गहणावेक्खाए तओ निरन्तरं जम्मि जाइं गहियाइं । न वि तम्मि चेव निसिरइ जह पढमे निसिरणं नत्थि ॥३६९॥

तकोऽसौ निसर्गो ग्रहणापेक्षया भाषाद्रव्योपादानापेक्षया पूर्वं पूर्वं ग्रहणमपेक्ष्येत्यर्थः, 'सान्तर उक्तः' इति शेषः । ननु समयापेक्षया तस्य नैरन्तर्येणैव प्रवृत्तेः कथं पुनर्ग्रहणापेक्षया सान्तरत्वम् ?, इत्याह– 'निरन्तरमित्यादि' यतो यस्मिन् प्रथमादिसमये यानि भाषाद्रव्याणि गृहीतानि, न तानि तस्मिन्नेव ग्रहणसमये नैरन्तर्येण निसृजति, किन्तु ग्रहणसमयादनन्तरसमये निसृजति, यथा प्रथमसमयगृहीतानां न तस्मिन्नेव समये निसर्जनं निसर्गः, किन्तु द्वितीयसमये; एवं द्वितीयसमयगृहीतानां तृतीयसमये, तृतीयसमयगृहीतानां चतुर्थसमये निसर्ग इत्यादि सर्वसमयेष्वपि भावनीयम् । तदेवं ग्रहणापेक्षया निसर्गः सान्तर एव, अगृहीतानां निसर्गायोगात् । समयापेक्षया त्वसौ निरन्तर एव, द्वितीयादिषु सर्वेष्वपि समयेषु निरन्तरं तद्भावादिति ॥ ३६९ ॥

आह– यद्येवम्, ग्रहणमपि निसर्गापेक्षया सान्तरमेवाऽस्तु । नैवम्, ग्रहणस्य स्वतन्त्रत्वात्, निसर्गस्य तु ग्रहणपरतन्त्रत्वात् कुतः ?, इत्याह–

[4]निसिरिज्जइ नागहियं गहणंतरियं ति संतरं तेणं । न निरंतरं ति न समयं न जुगवमिह होंति पज्जाया ॥३७०॥

---

१ अनुसमयमनन्तरितं ग्रहणं भणितं यतो विमोक्षोऽपि । युक्तो निरन्तर एव, भणति, कथं सान्तरो भणितः ? ॥ ३६८ ॥ २ ग्र. 'विमोक्खो' ।

३ ग्रहणापेक्षया सको निरन्तरं यस्मिन् यानि गृहीतानि । नापि तस्मिन्नेव निसृजति यथा प्रथमे निसर्जनं नास्ति ॥ ३६९ ॥

४ विसृज्यते नाऽगृहीतं ग्रहणान्तरितमिति सान्तरं तेन । न निरन्तरमिति न समकं न युगपदिह भवन्ति पर्यायाः ॥ ३७० ॥ ५ घ. 'हुंति' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाऽगृहीतं कदापि निसृज्यत इति नियम एवाऽयम्। 'संतरं तेणं ति' तेन कारणेन निसर्जनं प्रज्ञापनायां सान्तरमुक्तम् कुतः ?, इत्याह– 'गहणंतरियं ति' ग्रहणान्तरितमिति कृत्वा। 'नाऽनिसृष्टं गृह्यते' इत्ययं तु नियमो नास्ति, प्रथमसमये निसर्गमन्तरे णाऽपि ग्रहणसद्भावात्; अतः स्वतन्त्रं ग्रहणं, परतन्त्रस्तु निसर्गः, इत्ययमेव सान्तर उक्त इति भावः। तदेवं "संतरं निसिरइ" इति प्रज्ञापनायाः सूत्रावयवो विषयविभागे व्यवस्थापितः। अथ 'नो निरंतरं निसिरइ' इति तदवयवस्यैव भावार्थमाह– 'न निरंतरं तीत्यादि किमुक्तं भवति ?– न निरन्तरं निसृजति, न समकं, न युगपदिति पर्यायाः। ततश्च किमिह तात्पर्यमिति ?। उच्यते– न ग्रहणसम कालं निसृजति। किं तर्हि ?, पूर्वं पूर्वं गृहीतमुत्तरोत्तरसमयेषु निसृजतीति। ननु "एगेणं समयेणं गिण्हइ, एगेणं समयेणं निसिरइ इत्येतस्य भावार्थो नाद्याप्युक्तः। सत्यम्, किन्तूक्तानुसारेण स्वयमप्ययमवगन्तव्यः– तत्राद्येनैकेन समयेन गृह्णात्येव, न निसृजति, द्वितीयादिसमयादारभ्यैव निसर्गस्य प्रवृत्तेः; पर्यन्तवर्तिना त्वेकेन समयेन निसृजत्येव, न तु गृह्णाति, भाषाभिप्रायोपरमादिति; मध्यमसमयेषु तु ग्रहण-निसर्गाविति। अथवा, एकेन पूर्व-पूर्वसमयेन गृह्णाति, एकेनोत्तरोत्तरसमयेन निसृजति, इत्यादि स्वधिया भावनीयम् तदेवं समस्तमपि सूत्रं व्यवस्थापितं विषये ॥ ३७० ॥

अथ ग्रहणादेर्जघन्यं, उत्कृष्टं च कालमानमाह–

गहणं मोक्खो भासा समयं गह-निसिरणं च दो समया। होंति जहण्णंतरओ तं तस्स च बीयसमयम्मि॥३७१

गहणं मोक्खो भासा गहण-विसग्गा य होंति उक्कोसं। अंतोमुहुत्तमेत्तं पयत्तभेएण भेयो सिं ॥३७२॥

इह वाग्द्रव्याणां ग्रहणं, तथा तेषामेव गृहीतानां मोक्षो निसर्ग एवोच्यते, भाष्यत इति भाषा, एतानि त्रीण्यपि जघन्यत प्रत्येकमेव समयं भवन्ति, ग्रहण-निसर्जनलक्षणं तूभयमनन्तरदर्शितन्यायेन ग्रहणसमयाद् द्वितीयसमये निसर्गं कृत्वा म्रियमाणस्य तिष्ठतो वा वचनव्यापारादुपरतस्य जघन्यतो द्वौ समयौ भवतः। आह– ननु मोक्षो निसर्ग एवोच्यते, भाष्यत इति भाषाऽपि निस एवाऽभिधीयते, ततः किमिति मोक्षात् पृथग् भाषायाः कालमानाभिधानार्थमुपादानम् ?। सत्यम्, किन्त्वनेनैव भाषायाः पृथग्ग्रहणे ज्ञापयति यदुत– भाष्यमाणैव भाषा निसर्गमात्रमेव भाषेत्यर्थः, तस्यैव जघन्यतः समयमानत्वात्; न तूभयं भाषा, तस्य जघन्य

१ सान्तरं निसृजति। २ नो निरन्तरं निसृजति। ३ एकेन समयेन गृह्णाति, एकेन समयेन निसृजति।

४ ग्रहणं मोक्षो भाषा समयं ग्रह-निसर्जनं च द्वौ समयौ। भवन्ति जघन्याऽन्तरगतस्तत् तस्य च द्वितीयसमये ॥ ३७१ ॥
ग्रहणं मोक्षो भाषा ग्रहण-विसर्गौ च भवन्त्युत्कृष्टतः। अन्तर्मुहूर्तमात्रं प्रयत्नभेदेन भेद एषाम् ॥ ३७२ ॥ ५ घ. 'हुंति' क. 'होइ ज'।

द्विसमयमानत्वात्; ग्रहणमात्रं तु केवलं 'भाष्यत इति भाषा' इति व्युत्पत्त्यर्थस्यैवाऽघटनाद् भाषा न भवत्येवेति। यदि चेह भा पृथग् न गृहीता स्यात्, तदोभयस्याऽपि कश्चिद् भाषात्वं प्रतिपद्येत, ग्रहणेऽपि योग्यतया भाषात्वसद्भावात्, ततश्च "भासिज्जमा भासा" इत्यागमविरोधः स्यात्। तर्हि मोक्षग्रहणमपनीय तत्स्थाने भाषैव चोपादीयताम्, भाषा-मोक्षयोरेकार्थत्वादिति चेत्। सत्यम् किन्तु 'निसर्गस्य कालमानं नोक्तम्' इति मन्दधीः प्रतिपद्येत, इति तदनुग्रहार्थमिह मोक्ष-भाषयोः पृथग् ग्रहणम्। इत्यलं विस्तरेण। इ ग्रहणं, मोक्षो, भाषा, इत्येतानि त्रीणि, तथा ग्रहण-निसर्गोभयं च सर्वाण्यप्युत्कृष्टतः प्रत्येकमन्तर्मुहूर्तमात्रं कालं भवन्ति, परतो योगान्त मुपगच्छति, म्रियते वेति भावः। एतेषां च ग्रहणादीनामन्तर्मुहूर्तस्य प्रयत्नभेदेन भेदो भवति, इति महाप्रयत्नस्य तदेवाऽन्तर्मुहू लघु भवति, अल्पप्रयत्नस्य तु तदेव बृहत्प्रमाणं भवतीति ॥ ३७१ ॥ ३७२ ॥

तदत्र प्रथमसमये यत् केवलं ग्रहणमेव, पर्यन्तवर्तिनि तु समये यः केवलो निसर्गः पूर्वमुक्तः, स भवतु; मध्यमसमयेषु तु ग्रहण-निसर्गौ, तयोरयुक्तत्वमुत्पश्यन्नाह परः–

गहण-विसग्गपयत्ता परोप्परविरोहिणो कहं समए ?। समए दो उवओगा न होज्ज, किरियाण को दोसो ?॥३७३

निरन्तरग्रहणे, विसर्गे चेष्यमाणे द्वितीयसमयादारभ्योपान्तसमयं यावद् ग्रहण-विसर्गप्रयत्नौ प्रतिसमयं युगपदापततः। एतौ परस्परविरोधिनौ कथमेकस्मिन् समये युक्तौ ? नैव युक्तावित्यर्थः॥ अत्रोच्यते– ग्रहण-विसर्गयोर्विरोध एवाऽत्र तावदसिद्धः। यदि येषामेव द्रव्याणां ग्रहणं, तेषामेव तस्मिन्नेव ग्रहणसमये निसर्ग इष्येत, तदा स्यादसौ, एतच्च नास्ति, प्राक्समयगृहीतानामेवाऽग्रेतन मये निसर्गात्, तत्र चाऽपूर्वाणामेव ग्रहणात्। अथाऽविरोध्यपि युगपदेकत्र समये उपयोगद्वयवत् क्रियाद्वयं नेष्यते, तदाह– 'समये इत्यादि' एकस्मिन् समये द्वावुपयोगौ न भवेतामिति युक्तम्, "जुगवं दो नत्थि उवओगा" इति वचनात् तयोरागमे निषेधात् क्रियाणां गृहीतामप्येकस्मिन् समये को दोषः ? न कश्चिदित्यर्थः, तथाहि– आगमे "भंगियसुयं गणंतो दट्ठइ तिविहे वि जुज्झाणम्मि इत्यादिवचनाद् वाङ्-मनः-कायक्रियाणामेकत्र समये प्रवृत्तिरभ्युपगतैव। तथा, अङ्गुल्यादिसंयोग-विभागक्रिययोः, संघातपरिसाटक्रि योः, उत्पाद-व्ययक्रिययोश्चैकत्र समयेऽनेकस्थानेषु तत्राऽनुज्ञा विहितैव, इति को दोषः ?। तथा, वामहस्तेन घण्टिकां चलयति, दा

१ भाष्यमाणा भाषा। २ श्रीभगवतीसूत्रम्। ३ तत्राह–।

४ ग्रहण-विसर्गप्रयत्नौ परस्परविरोधिनौ कथं समये ?। समये द्वावुपयोगौ न भवेतां, क्रियाणां को दोषः ? ॥ ३७३ ॥

५ युगपद् द्वौ न स्त उपयोगौ। ६ भङ्गिकश्रुतं गणयन् वर्तते त्रिविधेऽपि ध्याने।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णेन धूपमुद्ग्राहयति, इशा तीर्थंकरप्रतिमादिवदनं वीक्षते, मुखेन वृत्तं पठति, इत्यादिवद्धीनामपि क्रियाणां युगपत्प्रवृत्तिरध्यक्षतोऽपि वीक्ष्यते ॥ इति गाथानवकार्थः ॥ ३७३ ॥

'गृह्णाति कायिकेन' इत्युक्तम्, तत्र यद्यप्यौदारिकादिशरीरपञ्चकभेदात् कायः पञ्चविधः, तथापि त्रिविधेनैव कायेन वाग्द्रव्यग्रहणमवसेयम्, इति दर्शयन्नाह—

[1]तिविहम्मि सरीरम्मि जीवप्पएसा हवंति जीवस्स । जेहि उ गेण्हइ गहणं तो भासइ भासओ भासं ॥३७४॥

औदारिकादिशरीराणां मध्यात् त्रिविधे त्रिप्रकारे शरीरे जीवस्याऽऽत्मनः प्रदेशा जीवप्रदेशा भवन्ति, नान्यत्र। एतावति चोच्यमाने 'भिक्षोः पात्रम्' इत्यादौ षष्ठ्या भेदेऽपि दर्शनाद् मा भूज्जीवात् प्रदेशानां भेदसंप्रत्यय इत्यत आह- जीवस्येति, त्रिविधेऽपि शरीरे जीवप्रदेशा जीवस्याऽऽत्मभूता भवन्ति, न तु भेदिन इत्यर्थः। तदनेन निष्प्रदेशात्मत्ववादनिराकरणमाह, निष्प्रदेशत्वस्य युक्त्यनुपपत्तेः; तथाहि- पादतलसंबद्धानां जीवप्रदेशानां शिरःसंबद्धजीवप्रदेशैः सह भेदः, अभेदो वा ? इति वक्तव्यम्। यदि भेदः, तर्हि कथं न सप्रदेशो जीवः ?। अथाभेदः, तर्हि सर्वेषामपि शरीरावयवानामेकत्वप्रसङ्गः, अभिन्नैर्जीवप्रदेशैः संबन्धेनैकत्र क्रोडीकृतत्वात्, इत्यादि तर्कशास्त्रेभ्योऽनुसरणीयम्। यैर्जीवप्रदेशैः किं करोति ?, इत्याह- यैस्तु गृह्णाति । तुशब्दो विशेषणार्थः । किं विशिनष्टि ?- न सर्वदैव गृह्णाति, किन्तु भाषणाभिप्रायादिसामग्रीपरिणामे सति । किं पुनर्गृह्णाति ?, इत्याह- गृह्यत इति कर्मणि ल्युट्प्रत्यये ग्रहणं वाग्द्रव्यनिकुरम्बमित्यर्थः। ततो भाषको भाषां भाषते, न त्वभाषकोऽपर्याप्तावस्थायां, इच्छाद्यभावतो वेति । 'भाषको भाषते' इत्यनेनैव गतार्थत्वात् 'भाष्यमाणैव भाषा, न पूर्वं, नापि पश्चात्' इति ज्ञापनार्थमेव भाषाग्रहणमिति ॥ ३७४ ॥

आह— ननु कतमत् तत् त्रिविधं शरीरं, यद्गतैर्जीवप्रदेशैर्वाग्द्रव्याणि गृहीत्वा भाषको भाषते ?, इत्याह—

[2]ओरालिय-वेउव्विय-आहारओ गेण्हइ मुयइ भासं । सच्चं सच्चामोसं मोसं च असच्चमोसं च ॥ ३७५ ॥

इहौदारिकशब्देन शरीर-तद्वतोरभेदोपचारात्, मत्वर्थीयलोपाद् वौदारिकशरीरवान् जीव एव गृह्यते; एवं वैक्रियवान् वैक्रियः, आहारकवानाहारकः। तदयमेवौदारिक-वैक्रिया-ऽऽहारकशरीरी जीवो गृह्णाति, मुञ्चति च भाषां पुद्गलसंहतिरूपाम्। भाषां कथंभूताम् ?, इत्याह- सत्यां, सत्यामृषां, मृषां च, असत्यमृषां च ॥ इति निर्युक्तिगाथाद्वयार्थः ॥ ३७५ ॥

---

१ त्रिविधे शरीरे जीवप्रदेशा भवन्ति जीवस्य । यैस्तु गृह्णाति ग्रहणं ततो भाषते भाषको भाषाम् ॥ ३७४ ॥ २ घ. छ. 'पदेसा'। ३ क. ग. 'वदे'।

४ औदारिक-वैक्रिया-ऽऽहारको गृह्णाति मुञ्चति भाषाम्। सत्यां सत्यमृषां मृषां चाऽसत्यमृषां च ॥ ३७५ ॥ + स्यामृषा-।

अथाऽत्र विषमपदव्याख्यानाय भाष्यम्-

[1]सच्चा हिया सयामिह संतो मुणओ गुणा पयत्था वा । तव्विवरीआ मोसा मीसा जा तदुभयसहावा॥३७६॥
अणहिगया जा तीसु वि सद्दो च्चिय केवलो असच्चमुसा । एया सभेयलक्खणसोदाहरणा जहा सुत्ते ॥ ३७७ ॥

इह सद्भ्यो हिताऽऽराधिका यथावस्थितवस्तुप्रत्यायनफला च सत्या भाषा प्रोच्यते । तत्र के सन्त उच्यन्ते येषां सा हिता ?, इत्याह- सन्त इह मुनयः साधव उच्यन्ते, तेभ्यो हिता- इह-परलोकाराधकत्वेन मुक्तिप्रापिकेत्यर्थः, अथवा सन्तो मूलोत्तरगुणरूपा गुणाः, पदार्था वा जीवादयः प्रोच्यन्ते, तेभ्योऽसौ हिता- अविपरीतयथावस्थितस्वरूपप्ररूपणेन सत्या । विपरीतस्वरूपा तु मृषाभाषाऽभिधीयते । मिश्रा तु सत्यामृषा । का ?, इत्याह- या तदुभयस्वभावा सत्या-मृषात्मिकेति । या पुनः सत्या-मृषो-भयात्मकासूक्तलक्षणासु तिसृष्वपि भाषास्वनधिकृता तल्लक्षणानन्तर्भाविनी, आमन्त्रणाज्ञापनादिविषयो व्यवहारपतितः शब्द एव केवलः, साऽसत्यमृषा चतुर्थी भाषा । एताश्चतस्रोऽपि भाषाः सभेदाः सलक्षणाः सोदाहरणाश्च यथा दशवैकालिकसूत्र-निर्युक्त्यादिकसूत्रे आगमे भणितास्तथा तत्रैव बोद्धव्याः; इह तु भाषाद्रव्यग्रहण-निसर्गादिविचारस्यैव प्रस्तुतत्वात् ॥ इति गाथाद्वयार्थः ॥ ३७६ ॥ ३७७ ॥

औदारिकादिशरीरवान् भाषां गृह्णाति, मुञ्चति चेत्युक्तम्। सा पुनर्मुक्ता सती कियत् क्षेत्रं व्याप्नोति ? इति वक्तव्यम्। उच्यते- समस्तमपि लोकम्। आह- यद्येवम्—

[2]कईहिं समएहिं लोगो भासाए निरंतरं तु होइ फुडो । लोगस्स य कइभाए कइभाओ होइ भासाए ॥३७८॥

अथवा द्वादशभ्यो योजनेभ्यः परतो न शृणोति शब्दं स्कन्दपरिणामत्वाद् द्रव्याणामित्युक्तम्। तत्र किं परतोऽपि शब्दद्रव्याणामागतिरस्ति ? यथा च विषयाभ्यन्तरे नैरन्तर्येण तद्वासनासामर्थ्यम्, एवं बहिरप्यस्ति, उत न ? इति । उच्यते- अस्ति केषांचित् कृत्स्नलोकव्याप्तेः । आह- यद्येवम्, 'कईहिं०'। इत्येवं संबन्धद्वयसमायातेयं गाथा व्याख्यायते— लोक्यत इति लोकश्च-

---

१ सत्या हिता सद्भ्यः, इह सन्तो मुनयो गुणाः पदार्थाश्च । तद्विपरीता मृषा, मिश्रा या तदुभयस्वभावा ॥३७६॥ + स्यामृषा-।
अनधिकृता या तिसृष्वपि शब्द एव केवलोऽसत्यमृषा । एषा सभेद-लक्षण-सोदाहरणा यथा सूत्रे ॥ ३७७ ॥

२ कतिभिः समयैर्लोको भाषया निरन्तरं तु भवति स्पृष्टः । लोकस्य च कतिभागे कतिभागो भवति भाषायाः ? ॥ ३७८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तुर्दशरज्ज्वात्मकः क्षेत्रलोकोऽत्र परिगृह्यते । स कतिभिः कियत्संख्यैः समयैर्भाषया भाषाद्रव्यैर्निरन्तरमेव भवति स्पृष्टो व्याप्तः ?, तस्य च लोकस्य कतिभागे कतिभागो भवति भाषाद्रव्याणाम् ? इति ॥ ३७८ ॥

अत्रोच्यते—

[1]चउहिं समयेहिं लोगो भासाए निरंतरं तु होइ फुडो । लोगस्स य चरिमंते चरिमंतो होइ भासाए॥३७९॥

चतुर्भिः समयैर्लोको भाषया कस्यचित् संबन्धिन्या निरन्तरमेव पूर्णो भवति । लोकस्य च चरमान्तः पर्यन्तवर्ती भागोऽसंख्येयभाग इत्यर्थः, तस्मिंश्चरमान्तेऽसंख्येयभागे भाषाया अपि समस्तलोकव्यापिन्याश्चरमान्तोऽसंख्येयभागो भवति ॥ इति निर्युक्तिगाथाद्वयार्थः ॥ ३७९ ॥

आह- किं सर्वस्याऽपि भाषा लोकं व्याप्नोति ?, नैतदेवम्, इति दर्शयन्नाह भाष्यकारः—

[2]कोई मंदपयत्तो निसिरइ सयलाइं सव्वदव्वाइं । अन्नो तिव्वपयत्तो सो मुंचइ भिंदिउं ताइं ॥ ३८० ॥

कोऽप्युरःक्षताद्युपेतत्वेन मन्दप्रयत्नो वक्ता सर्वाण्यपि भाषाद्रव्याणि प्रथमं सकलानि संपूर्णान्यखण्डानि, अभिन्नानीति यावत्, निसृजति मुञ्चति; अन्यस्तु नीरोगतादिगुणयुक्तस्तीव्रप्रयत्नो भवति, स पुनस्तान्यादान-निसर्गप्रयत्नाभ्यां भित्त्वैव खण्डशः कृत्वा सूक्ष्मखण्डीकृत्य मुञ्चति ॥ ३८० ॥

तत्रोभयेषामप्यग्रतो यद् भवति, तद्दर्शयति–

[3]गंतुमसंखेज्जाओ अवगाहणवग्गणा अभिन्नाइं । भिज्जंति[+] धंसंति य संखिज्जे जोअणे गंतुं ॥ ३८१ ॥

भिन्नाइं सुहुमयाए अणंतगुणवड्ढिआइं लोगंतं । पावंति पूरयंति य भासाए निरंतरं लोगं ॥ ३८२ ॥

अवगाहोऽवगाहना एकैकस्य भाषाद्रव्यस्कन्धस्याऽऽधारभूताऽसंख्येयप्रदेशात्मकक्षेत्रविभागरूपा, तासामवगाहनानामनन्तभाषा-

---

१ चतुर्भिः समयैर्लोको भाषया निरन्तरं तु भवति स्पृष्टः । लोकस्य च चरमान्ते चरमान्तो भवति भाषायाः ॥ ३७९ ॥ + धंसमिंति-।

२ कोऽपि मन्दप्रयत्नो निसृजति सकलानि सर्वद्रव्याणि । अन्यस्तीव्रप्रयत्नः स मुञ्चति भित्त्वा तानि ॥३८०॥ ३ ध.छ.'क्ता भा'। ४ क.'यत्नाद्-'।

५ गत्वाऽसंख्येया अवगाहनावर्गणा अभिन्नानि । भिद्यन्ते[*] ध्वंसन्ते च संख्येयानि योजनानि गत्वा ॥ ३८१ ॥× ध्वंसं यन्ति-।
भिन्नानि सूक्ष्मतयाऽनन्तगुणवर्धितानि लोकान्तम् । प्राप्नुवन्ति पूरयन्ति च भाषया निरन्तरं लोकम् ॥ ३८२ ॥

द्रव्यस्कन्धाश्रयभूतक्षेत्रविशेषरूपाणां वर्गणा समुदायस्ता अवगाहनावर्गणाः खल्वसंख्येया गत्वा ततो मन्दप्रयत्नवक्तृनिसृष्टान्यभिन्नानि भाषाद्रव्याणि भिद्यन्ते खण्डीभवन्ति । संख्येयानि च योजनानि गत्वा ध्वंसन्ते शब्दपरिणामं विजहतीत्यर्थः । उक्तं च प्रज्ञापनायां भाषापदे– " जाइं अभिन्नाइं निसिरइ, ताइं असंखेज्जाओ ओगाहणाओ[+] गत्ता भेयमावज्जंति, संखिज्जाइं जोयणाइं गत्ता विद्धंसमागच्छंति " । यानि तु महाप्रयत्नो वक्ता प्रथमत एव भिन्नानि निसृजति तानि सूक्ष्मत्वाद् बहुत्वाच्चाऽनन्तगुणवृद्ध्या वर्धमानानि षट्सु दिक्षु लोकान्तमाप्नुवन्ति; शेषं तु तत्पराघातवासनाविशेषाद् वासितया भाषयोत्पन्नभाषापरिणामद्रव्यसंहतिरूपया सर्वं लोकं निरन्तरमापूरयन्ति "वक्ष्यमाणन्यायेन त्र्यादिभिः समयैः" इति वाक्यशेषः । उक्तं च– "जाइं भिन्नाइं निसिरइ ताइं अणंतगुणपरिवड्ढीए परिवड्ढमाणाइं लोयंतं फुसंति" ॥३८१ ॥ ३८२ ॥

अथ यदुक्तम्– " [4]चउहिं समयेहिं लोगो " इत्यादि । तत्राह–

[5]जइणसमुग्घायगईए केई भासंति चउहिं समएहिं । पूरइ सयलो लोगो अण्णे उण तीहिं समएहिं ॥३८३॥

रागादिजेतृत्वाज्जिनः केवली तस्याऽयं जैनः स चासौ समुद्घातश्च जैनसमुद्घातः केवलिसमुद्घात इत्यर्थः, तस्य गतिः प्रवृत्तिः क्रम इति यावत्, तया जैनसमुद्घातगत्या

" दण्डं प्रथमे समये कपाटमथ चोत्तरे तथा समये । मन्थानमथ तृतीये लोकव्यापी चतुर्थे च " ॥ १ ॥

इत्यादिग्रन्थेनोक्तेन केवलिसमुद्घातक्रमेण चतुर्भिः समयैः सर्वोऽपि लोको भाषाद्रव्यैरापूर्यत इति केचिद् भाषन्ते । अयं चाऽनादेश एव, पुरस्ताद् निराकरिष्यमाणत्वादिति । अन्ये पुनस्त्रिभिः समयैः सर्वोऽपि लोकः पूर्यत इति ब्रुवत इति ॥ ३८३ ॥

किं वाङ्मात्रेण ?, न, इत्याह–

[6]पढमसमए चिय जओ मुक्काइं जंति छद्दिसिं ताइं । बितियसमयम्मि ते चिय छ दंडा होंति छ म्मंथा॥३८४॥

---

१ यान्यभिन्नानि निसृजति, तान्यसंख्येया अवगाहना गत्वा भेदमापद्यन्ते, संख्येयानि योजनानि गत्वा विध्वंसमागच्छन्ति ।

२ यानि भिन्नानि निसृजति तान्यनन्तगुणपरिवृद्ध्या परिवर्धमानानि लोकान्तं स्पृशन्ति । ३ गाथा ३७९ । × वग्गणा-।+गंता-।

४ जैनसमुद्घातगत्या केचिद् भाषन्ते चतुर्भिः समयैः । पूर्यते सकलो लोकोऽन्ये पुनस्त्रिभिः समयैः ॥ ३८३ ॥

५ प्रथमसमय एव यतो मुक्तानि यान्ति षड्दिक्षु तानि । द्वितीयसमये त एव षड् दण्डा भवन्ति षड् मन्थानः ॥ ३८४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]मंथंतरेहिं तईए सभये पुन्नेहिं पूरिओ लोगो । चउहिं समएहिं पूरइ लोगंते भासमाणस्स ॥ ३८५ ॥

यतो लोकमध्यस्थितेन महाप्रयत्नभाषकेण मुक्तानि तानि भाषाद्रव्याणि प्रथमसमय एव षट्सु दिक्षु लोकान्तमाप्नुवन्ति, जीव-सूक्ष्मपुद्गलानामनुश्रेणि गमनात् । ततो द्वितीयसमये त एव षड् दण्डाश्चतुर्दिशमेकैकशोऽनुश्रेण्या वासितद्रव्यैः प्रसरन्तः षड् मन्थानो भवन्ति । तृतीयसमये तु मन्थान्तरैः पूरितैः पूरितो भवति सर्वोऽपि लोकः, स्वयम्भूरमणपरतटवर्तिनि लोकान्तेऽलोकस्यात्यन्तं निकटीभूय भाषमाणस्य भाषकस्य त्रसनाड्या बहिर्वा चतसृणां दिशामन्यतमस्यां दिशि भाषमाणस्य तस्येति स्वयमपि द्रष्टव्यम्, चतुर्भिः समयैर्लोकः सर्वोऽपि पूर्यत इति ॥ ३८४ ॥ ३८५ ॥

कथम् ?, इत्याह—

[2]दिसि विट्ठियस्स पढमोऽतिगमे ते चेव सेसया तिन्नि । विदिसि ट्ठियस्स समया पंचातिगमम्मि जं दोण्णि॥३८६॥

त्रसनाड्या बहिश्चतसृणां दिशामन्यतमस्यां दिशि व्यवस्थितस्य भाषकस्य प्रथमः समयोऽतिगमे नाडीमध्यप्रवेशे भवति । शेषसमयत्रयभावना तु 'होइ असंखेज्जइमे भागे' इत्यादिवक्ष्यमाणगाथावृत्तौ 'कथमिति च' इत्यादिना वक्ष्यते । लोकान्तेऽपि स्वयंभूरमणपरतटवर्तिनि चतसृणां दिशामन्यतरस्यां दिशि व्यवस्थितस्य भाषकस्योर्ध्वा-ऽधोलोकस्खलितत्वाद् भाषाद्रव्याणां प्रथमः समयोऽतिगमे लोकमध्यप्रवेशे, त्रयस्तु समयाः शेषास्तथैव । त्रसनाडीबहिर्विदिग्व्यवस्थितस्य तु भाषकस्य भाषाद्रव्यैः सर्वलोकापूरणे पञ्च समया लगन्तीति विशेषः । कुतः ?, इत्याह- 'अतिगमम्मि जं दोण्णि त्ति' विदिशः सकाशाद् भाषाद्रव्याणि लोकनाडीबहिरेव प्रथमे समये दिशि समागच्छन्ति, द्वितीये तु लोकनाडीमध्ये प्रविशन्ति, इत्येवं यस्मादतिगमे नाडीमध्यप्रवेशे द्वौ समयौ लगतः, शेषास्तु त्रयः समयाश्चतुःसमयव्याप्तिवद् द्रष्टव्याः, इत्येवं पञ्च समयाः, सर्वेऽपि च लोकापूरणे प्राप्यन्त इति ॥ ३८६ ॥

ननु यद्युक्तन्यायेन त्रिभिः, चतुर्भिः, पञ्चभिश्च समयैर्लोको वाद्रव्यैः पूर्यते, तर्हि किमिति निर्धार्य निर्युक्तिकृता चतुःसमयग्रहणमेव कृतम् ?, इत्याशङ्क्याह—

[3]चउसमयमज्झगहणे ति-पंचगहणं तुलाइमज्झस्स । जह गहणे पज्जंतगहणं चित्ता य सुत्तगई ॥ ३८७ ॥

---

१ मन्थान्तरैस्तृतीये समये पूर्णैः पूरितो लोकः । चतुर्भिः समयैः पूर्यते लोकान्ते भाषमाणस्य ॥ ३८५ ॥

२ दिशि व्यवस्थितस्य प्रथमोऽतिगमे ते एव शेषकास्त्रयः । विदिशि स्थितस्य समयाः पञ्चातिगमे यद् द्वौ ॥ ३८६ ॥ ३ गाथा ३९० ।

४ चतुःसमयमध्यग्रहणे त्रि-पञ्चग्रहणं तुलादिमध्यस्य । यथा ग्रहणे पर्यन्तग्रहणं चित्रा च सूत्रगतिः ॥ ३८७ ॥

'ति-पंचगहणमिति' आद्यन्तवर्तिनां त्रयाणां पञ्चानां च समयानां ग्रहणमिह निर्युक्तिकृता विहितमेव द्रष्टव्यम् । क्व सति ?, इत्याह- चतुःसमयरूपस्य मध्यस्य ग्रहणे कृते सति । ननु किमन्यत्रापि मध्यग्रहणे सत्याद्यन्तग्रहणं क्वापि दृष्टम् ?, इत्याह- 'तुलाईत्यादि' यथा तुलादीनाम्, आदिशब्दाद् नाराच-यष्ट्यादीनां मध्यस्य ग्रहणे कृते पर्यन्तयोराद्यन्तलक्षणयोर्ग्रहणं पर्यन्तग्रहणं कृतमेव भवति, एवमिहाऽपीति । नन्वयं न्यायः क्वाऽप्यागमे दृश्यते, येनैवमुच्यते ?, इत्याह- चित्रा च भगवतः सूत्रस्य गतिः प्रवृत्तिर्दृश्यते ॥ ३८७ ॥

तथाहि—

[1]कत्थइ देसग्गहणं कत्थइ घेप्पंति निरवसेसाइं । उक्कम-कमजुत्ताइं कारणवसओ निउत्ताइं ॥ ३८८ ॥

क्वापि सूत्रे देशस्यैकपक्षलक्षणस्य ग्रहणं, यथाऽत्रैव चतुःसमयलक्षणस्य । क्वचित् सूत्रे निरवशेषाण्यपि पक्षान्तराणि गृह्यन्ते । अपरं च, कानिचित् सूत्राणि कुतोऽपि कारणवशादुत्क्रम-युक्तानि नियुक्तानि निबद्धानि दृश्यन्ते, कानिचित्तु क्रमयुक्तानीति । एवं विचित्रा सूत्रगतिः ॥ ३८८ ॥

अथ प्रस्तुतार्थस्यैव शास्त्रान्तरसंवादकारिणं दृष्टान्तमाह—

[2]चउसमयविग्गहे सति महल्लबंधम्मि तिसमओ जह वा । मोत्तुं ति-पंचसमये तह चउसमओ इह निबद्धो ॥३८९॥

यथा वा भगवत्यामष्टमशते महाबन्धोद्देशके सत्यपि चतुःसामयिके विग्रहे त्रिसामयिकोऽयमुपनिबद्धः, तथाऽत्रापि त्रीन्, पञ्च च समयान् मुक्त्वा चतुःसामयिक एव लोकव्याप्तिपक्ष उपनिबद्ध इत्यदोष इति ॥ ३८९ ॥

यदुक्तम्- '[3]लोगस्स य कइभाए कइभाओ होइ भासाए' एतद्व्याचिख्यासुराह—

[4]होइ असंखेज्जइमे भागे लोगस्स पढम-बिईएसु । भासाअसंखभागो भयणा सेसेसु समयेसु ॥ ३९० ॥

चतुर्दशरज्जूच्छ्रितस्य लोकस्याऽसंख्याततमे भागे भाषाया अपि समस्तलोकव्यापिन्या असंख्याततम एव भागो भवति । कदा ?, इत्याह— प्रथम-द्वितीयसमययोः । इदमुक्तं भवति- त्रिसमयव्याप्तौ, चतुःसमयव्याप्तौ, पञ्चसमयव्याप्तौ च प्रथमसमय-

---

१ कुत्रापि देशग्रहणं कुत्रापि गृह्यन्ते निरवशेषाणि । उत्क्रम-क्रमयुक्तानि कारणवशतो नियुक्तानि ॥ ३८८ ॥

२ चतुःसमयविग्रहे सति महाबन्धे त्रिसमयो यथा वा । मोक्तुं त्रि-पञ्चसमयांस्तथा चतुःसमय इह निबद्धो ॥ ३८९ ॥ ३ गाथा ३७८ ।

४ भवत्यसंख्येयतमे भागे लोकस्य प्रथम-द्वितीययोः । भाषाऽसंख्यभागो भजना शेषेषु समयेषु ॥ ३९० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वितीयसमययोस्तावद् नियमेन सर्वत्र लोकासंख्येयभागे भाषाऽसंख्येयभागलक्षण एव विकल्पः संभवति, नाऽन्यः । त्रिसमयव्याप्तौ हि प्रथमसमये दण्डषट्कं भवति, द्वितीयसमये तु षड् मन्थानः संपद्यन्ते । एते च दण्डादयो दैर्घ्येण यद्यपि लोकान्तस्पर्शिनो भवन्ति, तथापि वक्तृमुखविनिर्गतत्वात् तत्प्रमाणानुसारतो बाहल्येन चतुरङ्गुलादिमाना एव भवन्ति, चतुरादीनि चाऽङ्गुलानि लोकासंख्येयभागवर्तिन्येव । इति सिद्धस्त्रिसमयव्याप्तौ प्रथम-द्वितीयसमययोर्लोकासंख्येयभागे भाषाऽसंख्येयभागः । चतुःसमयव्याप्तावप्येतदित्थमवगम्यत एव, प्रथमसमये लोकमध्यमात्र एव प्रवेशात्; द्वितीयसमये तु वक्ष्यमाणगत्या दण्डानामेव सद्भावादिति । पञ्चसमयव्याप्तिपक्षे तु सुबोधमेव, प्रथमसमये भाषाद्रव्याणां विदिशो दिश्येव गमनात्, द्वितीयसमये तु लोकमध्यमात्र एव प्रवेशात् । तस्मात् त्र्यादिसमयव्याप्तौ सर्वत्र प्रथम-द्वितीयसमययोर्लोकासंख्येयभागे भाषाया असंख्येयभाग एव भवति । 'भयणा सेसेसु समएसु त्ति' उक्तशेषेषु तृतीय-चतुर्थ-पञ्चमसमयेषु भजना विकल्परूपा बोद्धव्या– क्वापि लोकासंख्येयभागे स एव भाषाऽसंख्येयभाग (एव भवति,) क्वचित् पुनर्लोकस्य संख्येयभागे भाषासंख्येयभागः, क्वापि समस्तलोकव्याप्तिः; तथाहि– त्रिसमयव्याप्तौ तृतीयसमये भाषायाः समस्तलोकव्याप्तिः चतुःसमयव्याप्तितृतीयसमये तु लोकसंख्येयभागे भाषासंख्येयभागः । कथम् ?, इति चेत् । उच्यते– स्वयम्भूरमणपश्चिमपरतटवर्तिनि लोकान्ते, त्रसनाडीबहिर्वा पश्चिमदिशि स्थित्वा ब्रुवतो भाषकस्य प्रथमसमये चतुरङ्गुलादिबाहल्यो रज्जुदीर्घो दण्डस्तिरश्चीनं गत्वा स्वयम्भूरमणपूर्वपरतटवर्तिनि लोकान्ते लगति । ततो द्वितीयसमये तस्माद् दण्डादूर्ध्वाऽधश्चतुर्दशरज्जूच्छ्रितः पूर्वापरतस्तिरश्चीनैरज्जुविस्तृतः पराघातवासितद्रव्याणां दण्डो निर्गच्छति । लोकमध्ये तु दक्षिणतः, उत्तरतश्च पराघातवासितद्रव्याणामेव चतुरङ्गुलादिबाहल्यं रज्जुविस्तीर्णदण्डद्वयं विनिर्गत्य स्वयम्भूरमणदक्षिणोत्तरवर्तिलोकान्तयोर्लगति । एवं च सति चतुरङ्गुलादिबाहल्यं सर्वतोऽपि रज्जुविस्तीर्णं लोकमध्ये वृत्तच्छत्वरं सिद्धं भवति । तृतीयसमये तूर्ध्वाधोव्यवस्थितदण्डाच्चतुर्दिशं प्रसृतः पराघातवासितद्रव्यसमूहो मन्थानं साधयति, लोकमध्यव्यवस्थितसर्वतोरज्जुविस्तीर्णच्छत्वरादूर्ध्वाधःप्रसृतः पुनः स एवं त्रसनाडीं समस्तामपि पूरयति । एवं च सति सर्वापि त्रसनाडी ऊर्ध्वाधोव्यवस्थितदण्डमन्थिभावेन तदधिकं च लोकस्य पूरितं भवति । एतच्चैतावत् क्षेत्रं तस्य संख्याततमो भागः । तथा च सति चतुःसामयिक्या व्याप्तेस्तृतीयसमये लोकस्य संख्याततमे भागे भाषाया अपि समस्तलोकव्यापिन्याः संख्याततमो भाग इति स्थितम् ॥

पञ्चसामयिक्यास्तु व्याप्तेस्तृतीयसमये लोकाऽसंख्येयभागे भाषाऽसंख्येयभागः । कुतः ?, इति चेत् । उच्यते– तस्यां तस्य दण्डसमयत्वात्, तत्र च संख्येयभागवर्तित्वस्य प्रागेव भावितत्वादिति । चतुर्थसमये चतुःसामयिक्यां व्याप्तौ मन्थान्तरपूरणात् समस्त-

---

+ नुसारिणो-। १ क. 'दिश्येवाग' घ. छ. 'दिशो दिशो वा ग'। २ घ. 'नं र'। ३ घ.छ. 'मध्यन्तरालपू'।

लोकव्याप्तिः । पञ्चसामयिक्यां तु व्याप्तौ चतुर्थसमये लोकसंख्येयभागे भाषासंख्येयभागः, तस्यां तस्य मथितसमयत्वात्, तत्र च संख्येयभागवर्तित्वस्य प्रागेव भावितत्वादिति । पञ्चमसमये तु पञ्चसामयिक्यां व्याप्तौ मन्थान्तरालपूरणात् समस्तलोकव्याप्तिरिति ॥

एवं तृतीय-चतुर्थ-पञ्चमसमयेषु भाविता भजना, तद्भावने च व्याख्यातं 'भयणा सेसेसु समएसु' इति । एतच्च महाप्रयत्नवक्तृनिसृष्टद्रव्यापेक्षयैवोक्तम्, मन्दप्रयत्नवक्तृनिसृष्टानि तु लोकासंख्येयभाग एव वर्तन्ते, दण्डादिक्रमेण तेषां लोकपूरणाऽसंभवादिति॥३९०॥

अथ यदुक्तम्– 'लोगस्स य चरिमंते चरिमंतो होइ भासाए' । तदेतद् भावयन्नाह—

[3]आपूरियम्मि लोगे दोण्ह वि लोगस्स तह य भासाए । चरिमंते चरिमन्तो चरिमे समयम्मि सव्वत्थ ॥३९१॥

त्र्यादिसमयैरापूरिते लोके द्वयोरपि लोक-भाषयोश्चरमान्ते चरमान्तो भवति । क्व ?, इत्याह– चरमे समये । केषु विषये योऽसौ चरमसमयः ?, इत्याह– सर्वत्र सर्वेष्वपि त्र्यादिसमयव्याप्तिपक्षेषु । इदमुक्तं भवति– त्रिभिश्चतुर्भिः पञ्चभिश्च समयैर्भाषया पूरिते लोके तेषामेव त्र्यादीनां लोकापूरकसमयानां यथास्वं योऽसौ चरमः समयस्तत्र लोकस्य चरमः पर्यन्तवर्ती अन्तो भवति– भाषायाश्च चरमः पर्यन्तवर्ती अन्तो भवति, त्र्यादिसमयानां चरमसमये लोके निष्ठां गते भाषाऽपि निष्ठां याति, न पुनः परतोऽप्यलोके गच्छतीति भावः, जीव-पुद्गलानां तत्र गतेरेवाऽभावादिति । इह च विवक्षयाऽऽदिरप्यन्तो भवति, तद्व्यवच्छेदार्थं चरमग्रहणं चरमः पर्यन्तवर्ती अन्तो न पुनरादिभूत इत्यर्थ इति ॥ ३९१ ॥

तदेवं 'कईहिं समएहिं लोगो' इत्यादिनिर्युक्तिगाथाद्वयव्याख्यानेन निराकुलीकृत्य 'जैइणसमुग्घायगईए केई भासंति' इत्यादिना यदादेशान्तरमुक्तं, सोऽनादेश एव, इति ख्यापनार्थम् । तत्र दूषणमाह—

[5]न समुग्घायगईए मीसयसवणं, मयं च दंडम्मि । जइ तो वि तीहिं पूरइ समएहिं जओ पराघाओ॥३९२॥

'न समुग्घायगईए त्ति' जैनसमुद्घातगत्या भाषया लोकपूरणे इष्यमाणे न प्राप्नोति । किम् ?, इत्याह– मिश्रस्य शब्दस्य श्रवणं मिश्रश्रवणं 'सर्वासु दिक्षु' इति शेषः । इदमुक्तं भवति— जैनसमुद्घाते ऊर्ध्वा-ऽधोदिग्द्वयगाम्येव प्रथमसमये दण्डो भवति, तद्यदि भाषाद्रव्येष्वप्येवमिष्यते, तर्हि ऊर्ध्वा-ऽधोदिग्द्वय एव मिश्रशब्दश्रवणं प्राप्नोति, न पूर्व-पश्चिम-दक्षिणो-त्तरदिक्षु, तासु विदिक्ष्विव वक्तृनिसृष्टद्रव्याणामगमनेन पराघातवासिततद्द्रव्याणामेव श्रवणादिति; अविशेषेण तु '[6]भासासमसेढीओ सद्दं जं सुणइ मीसयं सुणइ' इत्यनेन

---

१ 'मध्यन्तरालपू'। २ गाथा ३७९। ३ आपूरिते लोके द्वयोरपि लोकस्य तथा च भाषायाः। चरमान्ते चरमान्तश्चरमे समये सर्वत्र ॥ ३९१ ॥
४ गाथा ३७८। ५ न समुद्घातगत्या मिश्रकश्रवणं, मतं च दण्डे। यदि ततोऽपि त्रिभिः पूर्यते समयैर्यतः पराघातः ॥ ३९२ ॥ ६ गाथा ३५१।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

दिक्षु मिश्रशब्दश्रवणमुक्तम् । अथवा,व्याख्यानतो विशेषप्रतिपत्तेर्यादे तव मतं संमतं– ऊर्ध्वा-ऽधोदिग्द्वयवर्तिदण्ड एव मिश्रशब्दश्रवणं,शेषदिक्षु पराघातवासितद्रव्यश्रवणेऽप्यदोषादिति । भवत्वेवम्, 'तो वि' तथापि त्रिभिः समयैः पूर्यते लोको न चतुर्भिः, यतो भाषाद्रव्येषु पराघातोऽस्ति । यदि नाम तेषु पराघातस्ततः किम् ?, इति चेत् । उच्यते– स खलु दण्ड ऊर्ध्वा-ऽधो गच्छन्नविशेषेण चतुर्दिशमपि शब्दप्रायोग्यद्रव्याणि पराहन्ति, वासयित्वा शब्दपरिणामवन्ति करोति, ततस्तानि द्वितीयसमये मन्थानं साधयन्ति, तृतीयसमये तु तदन्तरालपूरणात् पूर्यते लोक इति । एवं त्रिभिः समयैर्लोकपूरणं प्राप्नोति ॥ ३९२ ॥

ननु यथा जैनसमुद्घातश्चतुर्भिः समयैर्लोकमापूरयति, तथा भाषाऽपि तैस्तमापूरयिष्यति, को दोषः ?, इत्याशङ्क्याह–

[1]जइणे न पराघाओ स जीवजोगो य तेण चउसमओ । हेऊ होज्जाहिं तहिं इच्छा कम्मं सहावो वा ॥३९३॥

इह जैनसमुद्घाते जीवप्रदेशाः स्वरूपेणैव लोकमापूरयन्ति, न पुनस्तत्र कस्याऽपि पराघातोऽस्ति । ततो न द्वितीयसमये मन्थाः किन्तु कपाट एव भवति । किञ्च, स केवलिसमुद्घातो जीवस्य संबन्धी योगो व्यापारस्तेन लोकव्याप्तिमपेक्ष्याऽयं चत्वारः समयाः, यतश्चतुःसमयो भवति । यदि नाम जीवयोगस्तथापि कथं तस्य चतुःसमयता ?, इत्याह— तत्र तस्मिन् जीवव्यापारलक्षणे केवलिसमुद्घाते द्वितीयसमये मध्यभावे हेतुर्भवेत् । कः ?, इत्याह— 'इच्छेत्यादि' तथाहि— तत्रैतच्छक्यते वक्तुम्– केवलज्ञानरूपा येयमिच्छाऽभिप्रायस्तद्वशाद् गुण-दोषौ पर्यालोच्य केवली द्वितीयसमये मन्थानं न करोति । भवोपग्राहिकर्मवशाद् वा, स्वभावाद् वाऽसौ तदा तं न करोति । ततो द्वितीयसमये कपाट एव, तृतीयसमये मन्थाः, चतुर्थे त्वन्तरालपूरणम्, इति युज्यते जैनसमुद्घाते चतुःसमयता । भाषापुद्गलानां त्वनुश्रेणि गमनं, पराघातस्वभावश्च लोकव्याप्तौ हेतुः, तत्र च प्रथमे समये ऊर्ध्वा-ऽधो दण्डे कृते द्वितीयसमये चतसृष्वपि दिक्ष्वनुश्रेणि गमनं संभवत्येव, इति किं ते मन्थानं न साधयन्ति ?, पराघातो हि ऊर्ध्वा-ऽधोगतदण्डादन्यद्रव्याणां सिद्ध एव, स्वभावतस्तु सर्वत्र सुलभ एव, इत्यशक्यप्रतिषेध एव द्वितीयसमये मथिभावः । ततस्तृतीयसमयेऽन्तरालपूरणात् समस्तलोकपरिपूर्तेस्त्रिसमयतैवाऽस्य न चतुःसमयतेति ॥ ३९३ ॥

यद्येवम्, अचित्तमहास्कन्धिजीवयोगत्वाभावेऽपि कथं द्वितीयसमये कपाटमात्रस्यैव भावात् प्रज्ञापनादिषु चतुःसमयता प्रोक्ता इत्याशङ्क्याह–

+-च-। १ जैने न पराघातः स जीवयोगश्च तेन चतुःसमयः । हेतुर्भवेत् तत्रेच्छा कर्म स्वभावो वा ॥ ३९३ ॥ २ घ. छ. 'रापू' । ३ छ. 'परोपघा' । ४ क.ग.'थमस'

२९

[2]खंधो वि वीससाए न पराघाओ य तेण चउसमओ । अह होज्ज पराघाओ हविज्ज तो सो वि तिसमइओ॥३९

स्कन्धोऽचित्तमहास्कन्धः सोऽपि विस्रसया केवलेन विस्रसापरिणामेन भवति, न तु जीवप्रयोगेण । विस्रसापरिणामो विचित्रत्वाद् न पर्यनुयोगमर्हति । किञ्च, न तत्र पराघातोऽस्ति– नान्यद्रव्याणामात्मपरिणाममसौ जनयतीत्यर्थः, किन्तु स निजपुद्गलैर्लोकं पूरयति । ततोऽसौ चतुःसमयो भवति । अथ तत्रापि पराघातो भवेत्, ततः सोऽपि त्रिसामयिको भवेत्– त्रिभिरेव समयैर्लोकं पूरयेदित्यर्थः, न चैवं, सिद्धान्ते चतुःसमयत्वेन तस्योक्तत्वात् । तस्माद् नास्ति तत्र पराघातः, अत्र त्वस्त्यसौ, इति वैषम्यमिति॥३९

अथाऽनादेशप्रस्तावादपरमपि मतमुपन्यस्य दूषयति–

[3]एगादिसमाइसमये दंडं काऊण [4]चउहिं पूरेइ । अन्ने भणंति, तं पि य नागम-जुत्तिक्खमं होइ ॥ ३९५

अन्ये केचिद् भाषन्ते– आदिसमये एकदिक्कं दण्डं कृत्वा चतुर्भिः समयैर्लोकमापूरयति । एतदुक्तं भवति– प्रथमसमये तदूर्ध्वदिशि दण्डं करोति, द्वितीयसमये तत्र मन्थानं, अधोदिशि पुनर्दण्डं; तृतीयसमये ऊर्ध्वदिश्यन्तरालपूरणम्, अधोदिशि तु मन्थानं करोति; चतुर्थसमये तु तत्राऽप्यन्तरालपूरणात् समस्तमपि लोकं भाषाद्रव्यैः पूरयति । तदेतदपि नाऽऽगमक्षमम्, क्वचिदप्यागम एव श्रवणात् । नापि युक्तिक्षमम् । का ह्यत्र युक्तिः, यदनुश्रेणिगमनस्वभावानां पुद्गलानामेकया दिशा गमनं भवति, नाऽन्यैया ?। वक्तुस्तालवादिप्रयत्नप्रेरणमत्र युक्तिरिति चेत् । नैवम्, यतो वक्ता कदाचिद् विश्रेण्यभिमुखस्तदभिमुखानपि भाषापुद्गलान् प्रेरयेत्, तु विदिश्यपि तेषां गमनप्रसङ्गः । किञ्च, एवं सति पटहादिशब्दपुद्गलानां चतुःसमयाऽनियम एव स्यात्, वक्तृप्रयत्नस्य तेष्वभावात् । तस्माद् युक्त्या-ऽऽगमविरुद्धत्वादुपेक्षणीयमेवेदम् ॥ इति गाथाषोडशकार्थः ॥ ३९५ ॥

तत्त्व-भेद-पर्यायैर्व्याख्या, तत्र तत्त्वतो भेदतश्च समसङ्गं निरूपितमाभिनिबोधिकम् । अथ नानादेशजविनेयानुग्रहार्थं तत्पर्यायाभिधित्सुराह–

[5]ईहा अपोह वीमंसा मग्गणा य गवेसणा । सण्णा सई मई पण्णा सव्वं आभिणिबोहियं ॥ ३९६ ॥

१ स्कन्धोऽपि विस्रसया न पराघातश्च तेन चतुःसमयः । अथ भवेत् पराघातो भवेत् ततः सोऽपि त्रिसामयिकः ॥ ३९४ ॥

२ एकदिक्कमादिसमये दण्डं कृत्वा चतुर्भिः पूरयति । अन्ये भणन्ति, तदपि च नाऽऽगम-युक्तिक्षमं भवति ॥३९५॥ ३ घ. 'उहि पू' ।

४ क.ग.'न्यथा' । ५ क.ग.'मुखान्' । ६ ईहाऽपोहो विमर्शो मार्गणा च गवेषणा । संज्ञा स्मृतिर्मतिः प्रज्ञा सर्वमाभिनिबोधिकम् ॥ ३९६ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

ईह चेष्टायाम्, ईहनमीहा– सतामन्वयिनां, व्यतिरेकिणां चाऽर्थानां पर्यालोचना। अपोहनमपोहो निश्चयः। विमर्शनं विमर्शः, अपायात् पूर्वं ईहायाश्चोत्तरः 'प्रायः शिरःकण्डूयनादयः पुरुषधर्मा इह घटन्ते' इति संप्रत्ययः। तथा, मार्गणमन्वयधर्मान्वेषणं मार्गणा। चशब्दः समुच्चयार्थः। गवेषणं व्यतिरेकधर्मालोचनं गवेषणा। तथा, संज्ञानं संज्ञा, अवग्रहोत्तरकालभावी मतिविशेष एव। स्मरणं स्मृतिः पूर्वाऽनुभूतार्थालम्बनः प्रत्ययः। मननं मतिः कथञ्चिदर्थपरिच्छित्तावपि सूक्ष्मधर्मालोचनरूपा बुद्धिः। तथा, प्रज्ञानं प्रज्ञा, विशिष्टक्षयोपशमजन्या प्रभूतवस्तुगतयथाऽवस्थितधर्मालोचनरूपा मतिः। सर्वमिदमाभिनिबोधिकम्– कथञ्चित् किञ्चिद् भेददर्शनेऽपि तत्त्वतः सर्वं मतिज्ञानमेवेदमित्यर्थः॥ इति निर्युक्तिश्लोकार्थः॥ ३९६॥

अत्रैतद्व्याख्यानाय भाष्यम्–

होइ अपोहोऽवाओ सई धिई सव्वमेव मइ-पण्णा। ईहा सेसा, सव्वं इदमाभिणिबोहियं जाण॥ ३९७॥

अपोहस्तावत् किमुच्यते?, इत्याह– अपोहो भवत्यपायः– योऽयमपोहः स मतिज्ञानतृतीयभेदोऽपायो निश्चय उच्यत इत्यर्थः, स्मृतिः पुनर्धृतिर्धारणोच्यते, धारणाभेदत्वेनावयवे समुदायोपचारादिति। मति-प्रज्ञे– मतिप्रज्ञाशब्दाभ्यां सर्वमेऽपि मतिज्ञानमुच्यते। 'ईहा सेस त्ति' शेषाभिधानानि त्वीहा-विमर्श-मार्गणा-गवेषणा-संज्ञालक्षणानि सर्वाण्यपि ईहा– ईहान्तर्भावीनि द्रष्टव्यानीत्यर्थः। एवं विशेषतः कथञ्चिद् भेदसद्भावेऽपि सामान्यतः सर्वमिदमाभिनिबोधिकज्ञानमेव जानीहि, यत ईहा-ऽपोहादयः सर्वेऽप्यमी आभिनिबोधिकज्ञानस्यैव पर्यायाः, केषाञ्चिद् वचनपर्यायत्वात्, केषाञ्चित्त्वर्थपर्यायत्वादिति॥ ३९७॥

एतदेव दर्शयति–

ईह-पन्ना-भिणिबोहिय-बुद्धीओ होंति वयणपज्जाया। जा उग्गहाइसण्णा ते सव्वे अत्थपज्जाया॥ ३९८॥

इह ये शब्दाः किल सर्वं वस्तु संपूर्णं प्रतिपादयन्ति ते वचनरूपा वस्तुनः पर्याया वचनपर्याया उच्यन्ते। ये तु तदेकदेशमभिदधति तेऽर्थैकदेशप्रतिपादकाः पर्याया अर्थपर्याया उच्यन्ते। तत्र मति-प्रज्ञा-ऽऽभिनिबोधिक-बुद्धयो वचनपर्याया भवन्ति– मति-प्रज्ञा-ऽऽभिनिबोधिक-बुद्धिलक्षणाश्चत्वारः शब्दा आभिनिबोधिकज्ञानस्य ज्ञानपञ्चकाद्यभेदलक्षणस्य वचनपर्याया द्रष्टव्या इत्यर्थः, संपूर्णस्याऽपि तस्याऽमीभिः प्रतिपाद्यमानत्वात्। ये त्ववग्रहे-हादिकाः संज्ञाविशेषास्ते सर्वेऽप्यर्थपर्यायाः, तदेकदेशप्रतिपादक-

१ क.ग.'भ्वनप्र'। २ भवत्यपोहोऽपायः स्मृतिर्धृतिः सर्वमेव मति-प्रज्ञे। ईहा शेषाः, सर्वमिदमाभिनिबोधिकं जानीहि॥ ३९७॥ ३ घ.छ. 'यो मे'। ४ घ.छ. 'मेव म'। ५ मति-प्रज्ञा-ऽऽभिनिबोधिक-बुद्धयो भवन्ति वचनपर्यायाः। या अवग्रहादिसंज्ञास्ते सर्वेऽर्थपर्यायाः॥ ३९८॥+ ग्रहान्तर-।

त्वात्। ततश्चात्रेहा-ऽपोहादय आभिनिबोधिकज्ञानस्यैवाऽर्थपर्यायाः, मति-प्रज्ञाशब्दौ तु तस्यैव वचनपर्यायौ। अतः सर्वमेवेदं सामान्येनाऽऽभिनिबोधिकज्ञानमेवेति स्थितम्। अथवा, सर्वेषामपि वस्तूनामभिलापवाचकाः शब्दा वचनरूपापन्ना वचनपर्यायाः, ये तु तेषामेव वाचकशब्दानामभिधेयार्थस्याऽऽत्मभूता भेदाः, यथा कनकस्य कटक-केयूरादयः, ते सर्वेऽप्यर्थपर्याया भण्यन्ते। ततश्च प्रस्तुतस्याऽऽभिनिबोधिकज्ञानस्य मति-प्रज्ञा-ऽवग्रहे-हादयः सर्वेऽपि वाचका ध्वनयो वचनपर्याया एव, तदभिधेयास्त्वाभिनिबोधिकस्याऽऽत्मभूता भेदा अर्थपर्याया इत्यवसेयमिति। इह पूर्वं मति-प्रज्ञादिशब्दानां सर्वमप्याभिनिबोधिकज्ञानं वाच्यम्, अवग्रहे-हादिशब्दानां तु तदेकदेशा एवाऽभिधेया इति दर्शितम्॥ ३९८॥

अथाऽवग्रहे-हादिभिरपि शब्दैरन्वर्थवशात् सर्वमप्याभिनिबोधिकमभिधीयते, इति दर्शयति—

सव्वं वाऽभिणिबोहियमिहो-ग्गहाइवयणेण संगहियं। केवलमत्थविसेसं पइ भिन्ना उग्गहाईया॥ ३९९॥

'वा' इत्यथवा, इह सर्वमाभिनिबोधिकज्ञानमवग्रहे-हादिवचनेन संगृह्यते, न पुनस्तदेकदेश एव। तत्रैवग्रहादिशब्दानां सर्वेषामेकरूपता प्राप्नोति, एकाभिधेयत्वात्, बहुपुरुषोच्चारितघटाद्येकशब्दवत्, इत्याशङ्क्याह– 'केवलमित्यादि' केवलं नवरमर्थविशेषं प्रत्यवग्रहादयः शब्दा भिन्नाः। इदमुक्तं भवति– अवग्रहशब्दोऽवग्रहलक्षणेनाऽर्थेन सर्वमाभिनिबोधिकं संगृह्णाति, ईहाशब्दस्तु चेष्टालक्षणेन, अपायस्त्ववगमनलक्षणेन, धारणा तु धरणलक्षणेनेत्यादि। ततोऽमुमवग्रहणादिलक्षणमर्थविशेषमात्रमपेक्ष्याऽवग्रहादिशब्दा भिन्नाः, तत्त्वतस्त्वभिधेयं सर्वेषामाभिनिबोधिकज्ञानमेव।

अथवा, आह– ननु यदि सर्वमप्याभिनिबोधिकमवग्रहादिवचनेन संगृह्यते, तर्ह्यवग्रहे-हा-ऽपायधारणानां तद्भेदानां सर्वेषामपि संकरः प्राप्नोति, अनन्तरवक्ष्यमाणव्युत्पत्तितः प्रत्येकमेषां सर्वेषामप्यवग्रहादिरूपत्वात्; इत्याशङ्क्याह– 'केवलमत्थविसेसमित्यादि' केवलं नवरमर्थविशेषं प्रत्यवग्रहादयो भिन्नाः। इदमुक्तं भवति– यद्यप्यर्थावग्रहणे-हना-ऽवगमन-धारणमात्रस्य सामान्यस्य प्रत्येकं सर्वेष्वपि विद्यमानत्वादेकैकशोऽप्यवग्रहादिशब्देनोच्यन्तेऽवग्रहादयः, तथाऽप्यर्थविशेषमाश्रित्यैते भिन्ना एव; तथाहि– यथाभूतमवग्रहे सामान्यमात्रार्थस्यावग्रहणं, न तथाभूतमेवेहायां, किन्तु विशिष्टं; विशिष्टतरं विशिष्टतमं चाऽपाय-धारणयोः; यथाभूता चेहायां मतिचेष्टा, न तथाभूताऽन्यत्र, किन्तु विशिष्टा, विशिष्टतरा चाऽपाय-धारणयोः, अविशिष्टतरा चाऽवग्रहे; अर्थावगमनमप्यपायाद् विशिष्टं धारणा

१ सर्वं वाऽऽभिनिबोधिकमिहाऽवग्रहादिवचनेन संगृहीतम्। केवलमर्थविशेषं प्रति भिन्ना अवग्रहादयः॥ ३९९॥ २ घ. छ. 'नु स'। ३ घ. छ. 'शोऽव'।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

याम्; अविशिष्टम्, अविशिष्टतरं चेहा-ऽवग्रहयोः; अर्थधारणमप्यवग्रहे-हा-ऽपायेभ्यः सर्वप्रकृष्टं धारणायाम्, इत्येवमवग्रहणादिमात्रे सर्वेषां सामान्ये सत्यप्यर्थविशेषं ग्राह्यमाश्रित्य भिन्ना एवावग्रहादयः। स चाऽर्थविशेषोऽमीषां ग्राह्यः प्राग् विस्तरेण दर्शित एव, इत्येवं बोत्तरार्धमिदं व्याख्यायते। इदमेव च व्याख्यानं वृद्धसंमतं लक्ष्यते, युक्तया तु प्राक्तनमपि घटते। इत्यलं विस्तरेणेति ॥ ३९९ ॥

कथं पुनरवग्रहादिवचनेन सर्वमप्याभिनिबोधिकं संगृह्यते ?, इत्याह—

[1]उग्गहणमोग्गहो त्ति य अविसिट्ठमवग्गहो तयं सव्वं। ईहा जं मइचेट्ठा मइत्ति वावारो तयं सव्वं ॥४००॥

अवग्रहणं तावदवग्रह उच्यत इति कृत्वाऽविशिष्टं तत् सर्वमपीहादिभेदभिन्नमाभिनिबोधिकज्ञानमवग्रह एव। इदमुक्तं भवति—अवग्रहणमवग्रह इति व्युत्पत्तिमाश्रित्य सर्वमप्याभिनिबोधिकज्ञानमवग्रहो भवति, यथा ह्यवग्रहः कमप्यर्थमवगृह्णाति, एवमीहाऽपि कमप्यर्थमवगृह्णात्येव, एवमपाय-धारणे अपि; इति सर्वमप्याभिनिबोधिकज्ञानं सामान्येनावग्रहः। तथा यद् यस्मात् 'ईह चेष्टायाम्, ईहनमीहा' इति व्युत्पत्तेरीहाऽपि मतेश्चेष्टा मतिर्चेष्टा वर्तते, तस्मात् सर्वमपि तदाभिनिबोधिकमविशिष्टं मतिव्यापार ईहेत्यर्थः, अवग्रहा-ऽपाय-धारणानामपि सामान्येन मतिचेष्टारूपत्वादिति भावः ॥ ४०० ॥

तथा—

[2]अवगमणमवाउ त्ति य अत्थावगमो तयं हवइ सव्वं। धरणं च धारण त्ति य तं सव्वं धरणमत्थस्स ॥ ४०१ ॥

यतश्चावगमनमवायो भण्यते, अतोऽनया व्युत्पत्त्या सर्वमपि तदाभिनिबोधिकमर्थस्याऽवायः, अवग्रहे-हा-धारणास्वपि सामान्येनाऽर्थावगमस्य विद्यमानत्वात्। तथा, धरणं धारणा यतो भण्यते, अतोऽनया व्युत्पत्त्या तत् सर्वमप्याभिनिबोधिकमर्थधरणरूपत्वाद् धारणा, अवग्रहे-हा-ऽपायेष्वप्यविशिष्टस्याऽर्थधरणस्य विद्यमानत्वादिति। संकरप्राप्तिश्चैवमवग्रहादीनां प्राक् 'केवलमत्थविसेसं पइ' इत्यादिना परिहृतैव ॥ इति गाथापञ्चकार्थः ॥ ४०१ ॥

तदेवं तत्त्व-भेद-पर्यायैराभिनिबोधिकज्ञानं व्याख्याय सांप्रतं तद्विषयनिरूपणार्थमाह—

[3]तं पुण चउव्विहं नेयभेयओ तेण जं तदुवउत्तो। आदेसेणं सव्वं दव्वाइचउव्विहं मुणइ ॥ ४०२ ॥

---

१ अवग्रहणमवग्रह इति चाविशिष्टमवग्रहस्तत् सर्वम्। ईहा यद् मतिचेष्टा मतिव्यापारस्तत् सर्वम् ॥ ४०० ॥

२ अवगमनमवाय इति चार्थावगमस्तद् भवति सर्वम्। धरणं च धारणेति च तत् सर्वं धरणमर्थस्य ॥ ४०१ ॥ ३ गाथा ३९९।

४ तत् पुनश्चतुर्विधं ज्ञेयभेदतस्तेन यद् तदुपयुक्तः। आदेशेन सर्वं द्रव्यादिचतुर्विधं जानाति ॥ ४०२ ॥

तत् पुनराभिनिबोधिकज्ञानं चतुर्विधं चतुर्भेदम्। नन्ववग्रहादिभेदेन भेदकथनं प्रागस्य कृतमेव, किमिह पुनरपि भेदोपन्यासः ?। सत्यम्, ज्ञेयमेवेह द्रव्यादिभेदेन चतुर्भेदं, ज्ञानस्य तु तद्भेदादेव भेदोऽत्राभिधीयते, सूत्रे तथैवोक्तत्वात्। तथा च नन्दिसूत्रम्—"[1]तं समासओ चउव्विहं पण्णत्तं, तं जहा– दव्वओ, खेत्तओ, कालओ, भावओ। तत्थ दव्वओ णं आभिणिबोहियनाणी आदेसेणं सव्वदव्वाइं जाणइ, न पासइ" इत्यादि। ज्ञेयभेदादपि तत् कथं चतुर्विधम् ?, इत्याह– 'जं तदुवउत्तो इत्यादि' यद् यस्मात् कारणात् तेनाऽऽभिनिबोधिकज्ञानेन सर्वं द्रव्यादि मुणति इति संबन्धः। कथंभूतम् ?, इत्याह– चतुर्विधं चतुर्भेदं द्रव्य-क्षेत्र-काल-भावभेदभिन्नमित्यर्थः। कथंभूतः सन् मुणति ?, इत्याह– तस्मिन्नाभिनिबोधिकज्ञाने उपयुक्तस्तदुपयुक्तः। केन ?, इत्याह– आदेशेनेति ॥ ४०२ ॥

कोऽयमादेशः ?, इत्याह–

[2]आएसो त्ति पगारो ओहादेसेण सव्वदव्वाइं। धम्मत्थिआइयाइं जाणइ न उ सव्वभेएण ॥ ४०३ ॥

इहाऽऽदेशो नाम ज्ञातव्यवस्तुप्रकारः। स च द्विविधः– सामान्यप्रकारः, विशेषप्रकारश्च। तत्रौघादेशेन सामान्यप्रकारेण द्रव्यसामान्येनेत्यर्थः, सर्वद्रव्याणि धर्मास्तिकायादीनि जानाति– 'असंख्येयप्रदेशात्मको लोकव्यापकोऽमूर्तः प्राणिनां पुद्गलानां च गत्युपष्टम्भहेतुर्धर्मास्तिकायः' इत्यादिरूपेण कियत्पर्यायविशिष्टानि षडपि द्रव्याणि सामान्येन मतिज्ञानी जानातीत्यर्थः। अनभिमतप्रकारप्रतिषेधमाह– न तु सर्वभेदेन, न [3]सर्वैर्विशेषैर्न सर्वैरपि पर्यायैः केवलिदृष्टैर्विशिष्टानि[4] द्रव्याण्यसौ जानातीत्यर्थः, केवलज्ञानगम्यत्वादेव सर्वपर्यायाणामिति भावः ॥ ४०३ ॥

धर्मास्तिकायादिभेदेन कथितं सामान्येन द्रव्यम्। अथ क्षेत्रादिस्वरूपं विशेषतः प्राह—

[5]खेत्तं लोगा-लोगं कालं सव्वद्धमहव तिविहं ति। पंचोदइयाईए भावे जं नेयमेव इयं ॥ ४०४ ॥

क्षेत्रमपि लोकालोकस्वरूपं सामान्यादेशेन कियत्पर्यायविशिष्टं सर्वमपि जानाति, न तु विशेषादेशेन सर्वपर्यायैर्विशिष्टमिति। एवं कालमपि सर्वाऽद्धारूपम्, अतीता-ऽनागत-वर्तमानभेदतस्त्रिविधं वेत्येक एवार्थः। भावतस्तु सर्वभावानामनन्तभागं जानाति, औदयिकौ-पशमिक-क्षायिक-क्षायिकौपशमिक-पारिणामिकान् वा पञ्च भावान् सामान्येन जानाति, न परतः। कुतः ?, इत्याह– यद् यस्मा-

---

१ तत् समासतश्चतुर्विधं प्रज्ञप्तम्, तद्यथा– द्रव्यतः, क्षेत्रतः, कालतः, भावतः। द्रव्यत आभिनिबोधिकज्ञानी आदेशेन सर्वद्रव्याणि जानाति न पश्यति

२ आदेश इति प्रकार ओघादेशेन सर्वद्रव्याणि। धर्मास्तिकायादीनि जानाति न तु सर्वभेदेन ॥ ४०३ ॥ ३ घ.छ. 'सर्वैरपि वि'। ४ क. 'नि तानि द्र'।

५ क्षेत्रं लोका-लोकं कालं सर्वाद्धाऽथवा त्रिविधमिति। पञ्चौदयिकादीन् भावान् यद् ज्ञेयमेवेदम् ॥ ४०४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तावदेव ज्ञेयमस्ति, नान्यदिति । इह क्षेत्र-कालौ सामान्येन द्रव्यान्तर्गतावेव, केवलं भेदेन रूढत्वात् पृथगुपादानमवसेयमिति ॥४०४॥

आदेशस्य व्याख्यानान्तरमाह–

[1]आएसो त्ति व सुत्तं सुउवलद्धेसु तस्स महणाणं । पसरइ तब्भावणया विणा वि सुत्तानुसारेण ॥४०५॥

अथवाऽऽदेशाः सूत्रमुच्यते, तेन सूत्रादेशेन सूत्रोपलब्धेष्वर्थेषु तस्य मतिज्ञानिनः सर्वद्रव्यादिविषयं मतिज्ञानं प्रसरति । ननु श्रुतोपलब्धेष्वर्थेषु यज्ज्ञानं तच्छ्रुतमेव भवति, कथं मतिज्ञानम् ?, इत्याह– 'तब्भावणया इत्यादि' तद्भावनया श्रुतोपयोगमन्तरेण तद्वासनामात्रत एव यद् द्रव्यादिषु प्रवर्तते, तत् सूत्रादेशेन मतिज्ञानमिति भावः । एतच्च पूर्वमपि 'पुव्वं सुयपरिकम्मियमइस्स जं संपयं सुयाईयं' इत्यादिप्रक्रमे प्रोक्तमेव ॥ इति गाथाचतुष्टयार्थः ॥ ४०५ ॥

तदेवं तत्त्व-भेद-पर्यायैर्मतिज्ञानं व्याख्याय, विषयं च द्रव्यादिकमस्य निरूप्य, सांप्रतमिदमेव सत्पदप्ररूपणतादिभिर्नवभिरनुयोगद्वारैर्विचारयितुमाह–

[2]संतपयपरूवणया दव्वपमाणं च खित्त-फुसणा य । कालो य अंतरं भाग-भाव-अप्पा-बहुं चेव ॥ ४०६ ॥

तत्र तत् पदं च सत्पदं तस्य प्ररूपणं सत्पदप्ररूपणं गत्यादिद्वारेषु विचारणं तद्भावः सत्पदप्ररूपणता– 'कस्मिन् गत्यादिके द्वारे इदं सत् ?' इत्येवं सतो विद्यमानस्याऽऽभिनिबोधिकज्ञानस्य गत्यादिद्वारेषु प्ररूपणा कर्तव्येत्यर्थः । तथा, द्रव्यप्रमाणमिति 'मतिज्ञानिजीवद्रव्याणामेकस्मिन् समये कियन्तो मतिज्ञानं प्रतिपद्यन्ते, सर्वे वा कियन्तस्ते ?' इत्येवं प्रमाणं वक्तव्यमित्यर्थः । चशब्दः समुच्चये। तथा, क्षेत्रमिति 'कियति क्षेत्रे तत् संभवति ?' इत्येवं मतिज्ञानस्य क्षेत्रं वक्तव्यम् । तथा 'कियत् क्षेत्रं मतिज्ञानिनः स्पृशन्ति ?' इत्येवं स्पर्शना वक्तव्या । यत्रावगाढस्तत् क्षेत्रं, पार्श्वतोऽपि च स्पर्शना, इत्येवं क्षेत्र-स्पर्शनयोर्विशेषः । चः समुच्चये । तथा, कालः स्थितिलक्षणो मतिज्ञानस्य वाच्यः । चस्तथैव । 'एकदा प्रतिपन्न वियुक्ताः कियता कालेन पुनरपि प्रतिपद्यते' इत्येवमन्तरं च तस्य वक्तव्यम् । तथा 'मतिज्ञानिनः शेषज्ञानिनां कतिभागे वर्तन्ते ?' इत्येवं भागोऽस्य वक्तव्यः । तथा 'कस्मिन् भावे मतिज्ञानिनो वर्तन्ते ?' इत्येवं भावो भणनीयः । तथा, अल्प-बहुत्वं वक्तव्यम् । भागद्वारादपि लब्धमिति चेत् । नैवम्, यतोऽत्र मतिज्ञानिनां स्वस्थान एव पूर्वप्रतिपन्न-प्रतिपद्यमानकापेक्षयाऽल्प-बहुत्वमभिधानीयम्, भागस्तु शेषज्ञानापेक्षया चिन्तनीय इति विशेषः ॥ इति निर्युक्तिगाथाद्वयार्थः । विस्तरार्थं तु भाष्यकार एव वक्ष्यति ॥ ४०६ ॥

अथ सत्पदप्ररूपणता किमुच्यते ?, इत्याह–

[3]संतं ति विज्जमाणं एयस्स पयस्स जा परूवणया । गइयाईएसु वत्थुसु संतपयपरूवणा सा उ ॥ ४०७ ॥

जीवस्स च जं संतं जम्हा तं तेहिं तेसु वा पयति । तो संतस्स पयाइं ताइं तेसुं परूवणया ॥ ४०८ ॥

गत्यादिद्वारेषु सच्चेन चिन्त्यमानत्वात् पदं सदुच्यते । ततश्च सतो विद्यमानस्य पदस्य या वक्ष्यमाणेषु गत्यादिद्वारेषु प्ररूपणता सा सत्पदप्ररूपणतोच्यते । अथवा, जीवस्य यत् सज्ज्ञान-दर्शनादिकं तत् तैः कारणभूतैः, तेषु वाऽधिकरणभूतेषु यस्मात् 'पयति त्ति पद्यतेऽनुगम्यते विचार्यते, ततस्तस्मात् सतः पदानि सत्पदानि तानि गत्यादीनि द्वाराण्युच्यन्ते तैः, तेषु वा प्ररूपणता 'गत्यादेः' इति गम्यते, सत्पदप्ररूपणता ॥ इति गाथाद्वयार्थः ॥ ४०७ ॥ ४०८ ॥

तान्येव सत्पदानि गत्यादिद्वाराणि दर्शयति–

[4]गइ-इंदिए य काए जोए वेए कसाय-लेसासु । सम्मत्त-नाण-दंसण-संजय-उवओग-आहारे ॥ ४०९ ॥

भासग-परित्त-पज्जत्त-सुहुम-सण्णी य भविय-चरिमे य । पुव्वपडिवन्नए वा पडिवज्जंते य मग्गणया॥४१०॥

एतेषु गत्यादिषु द्वारेषु मतिज्ञानस्य पूर्वप्रतिपन्नाः, प्रतिपद्यमानकाः, तदुभयम्, उभयाभावश्च, इत्येतच्चतुष्टयं चिन्त्यते॥४०९॥४१०। तत्र येषु स्थानेषु मतिज्ञानिनो न प्रतिपद्यमानकाः, नापि पूर्वप्रतिपन्नाः, किन्तूभयाभावः, तान्यपोद्धृत्य दर्शयति–

[5]एगिंदियजाईओ सम्मामिच्छो य जो य सव्वन्नू । अपरित्ता अभव्वा अचरिमा य एए सया सुण्णा॥४११॥

इह सर्वेष्वपि गत्यादिद्वारेषु यावान् कोऽप्येकेन्द्रियजातीय एकेन्द्रियप्रकार एकेन्द्रियभेद इत्यर्थः, एष सर्वोऽपि मतिज्ञानेन

---

१ आदेश इति वा सूत्रं श्रुतोपलब्धेषु तस्य मतिज्ञानम् । प्रसरति तद्भावनया विनाऽपि सूत्रानुसारेण ॥ ४०५ ॥ २ गाथा १६५ ।

३ सत्पदप्ररूपणता द्रव्यप्रमाणं च क्षेत्र-स्पर्शने च । कालश्चान्तरं भाग-भावाऽल्प-बहु (त्वं) चैव ॥ ४०६ ॥ ४ गतीन्द्रिय-काय-योग-वेद-कषाय-लेश्या-सम्यक्त्व-ज्ञान-दर्शन-संयत-उपयोग-आहारेषु ॥ ४०९ ॥

भाषक-परीत्त-पर्याप्त-सूक्ष्म-संज्ञिषु च भव्य-चरमयोश्च । पूर्वप्रतिपन्ना वा प्रतिपद्यमानाश्च मार्गणया ॥ ४१० ॥

५ एकेन्द्रियजातीयः सम्यग्मिथ्यः (व्यादृष्टिः) च यश्च सर्वज्ञः । अपरीत्ता अभव्या अचरमाश्चैते सदा शून्याः ॥ ४११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शून्यः, न तत्र मतिज्ञानस्य प्रतिपद्यमानकः, नापि पूर्वं प्रतिपन्नः संभवतीत्यर्थः "उभयाभावो एगिंदिएसु सम्मत्तलद्धीए" इति वचनादिति। कः पुनरेकेन्द्रियजातीयः ?, इति चेत्। उच्यते[2]– इन्द्रियद्वारे तावदेकेन्द्रिय एव, कायद्वारे पृथिवी-अप्-तेजो-वायु-वनस्पतयः, सूक्ष्मद्वारे तु सूक्ष्म इत्यादि। तथा, सम्यग्-मिथ्यादृष्टिरपि सम्यक्त्वद्वारे मतिज्ञानशून्यः। "सम्मा-मिच्छदिट्ठी णं भंते ! किं नाणी, अन्नाणी ?। गोयमा ! नो नाणी, अन्नाणी" इत्यादिवचनादिति। यश्च कापि द्वारे सर्वज्ञः केवली संभवति, सोऽपि तच्छून्य एवः तद्यथा– गतिद्वारे सिद्धिगतौ सिद्धः, इन्द्रियद्वारेऽतीन्द्रियः, कायद्वारेऽकायः, योगद्वारेऽयोगः, लेश्याद्वारेऽलेश्यः, ज्ञानद्वारे केवलज्ञानी, दर्शनद्वारे केवलदर्शनी; तथा, संयम-परीत्त-पर्याप्त-सूक्ष्म-संज्ञि-भव्यद्वारेषु यथासंख्यं नोसंयत-नोपरीत्त-नोपर्याप्त-नोसूक्ष्म-नोसंज्ञि-नोभव्या इति। एते सर्वेऽपि सर्वज्ञत्वाद् मतिज्ञानशून्याः, छद्मस्थस्यैव तत्संभवादिति भावः। तथा, परीत्त-भव्य-चरमद्वारेष्वपरीत्ता-ऽभव्या-ऽचरमा अपि मिथ्यादृष्टित्वाद् मतिज्ञानशून्याः। तदेवमेते सर्वे सर्वदैव मतिज्ञानशून्या मन्तव्याः, उभयाभावात् ॥ इति गाथार्थः ॥ ४११ ॥

अथ गत्यादिद्वारेष्वेव पूर्वप्रतिपन्न-प्रतिपद्यमानकचिन्तां कुर्वन्नाह–

[1]वियला अविसुद्धलेसा मणपज्जवणाणिणो अणाहारा। असण्णी अणगारोवओगिणो पुव्वपडिवन्ना ॥४१२॥
सेसा पुव्वपवण्णा नियमा पडिवज्जमाणया भइया। भयणा पुव्वपवण्णा अकसाया ऽवेयया होंति॥४१३॥

विकला द्वि-त्रि-चतुरिन्द्रियलक्षणा विकलेन्द्रियाः, तथाऽविशुद्धलेश्या भावलेश्यामङ्गीकृत्य कृष्ण-नील-कापोतलेश्यात्रयः, तथा मनःपर्यायज्ञानिनः, अनाहारकाः, असंज्ञिनः, अनाकारोपयुक्ताः; एते सर्वेऽपि मतिज्ञानस्य यदि भवन्ति तदा पूर्वप्रतिपन्ना एव, न तु प्रतिपद्यमानकाः; तथाहि— इन्द्रियद्वारे केचिद् विकलेन्द्रिया ये सास्वादनसम्यक्त्वेन सह पूर्वभवादागच्छन्ति, तेषां पूर्वप्रतिपत्तिमङ्गीकृत्य स्याद् मतिज्ञानम्, प्रतिपद्यमानकास्त्वस्य विकलेन्द्रियाः सर्वेऽपि न भवन्त्येव, तथाविधविशुद्ध्यभावात्। तथा, लेश्याद्वारेऽविशुद्धलेश्या अपि पूर्वप्रतिपन्नाः केचिद् भवन्ति, न तु प्रतिपद्यमानकाः, विशुद्धभावलेश्यानामेव तत्प्रतिपत्तेः। ज्ञानद्वारे मनःपर्यायज्ञानिनः सर्वेऽपि पूर्वप्रतिपन्ना भवन्त्येव, न तु प्रतिपद्यमानकाः, सम्यक्त्वसहचरितप्राप्तमतिज्ञानस्यैव पश्चादप्रमत्तसंयतावस्थायां मनःपर्यायज्ञानोत्पत्तेः;

१ उभयाभाव एकेन्द्रियेषु सम्यक्त्वलब्धौ। २ घ. छ. 'ते– एकेन्द्रि'। ३ घ. छ. 'म्यग्द्वा'।
४ सम्यग्–मिथ्यादृष्टयो भगवन् ! किं ज्ञानिनः, अज्ञानिनः ?। गौतम ! नो ज्ञानिनः, अज्ञानिनः।
५ विकला अविशुद्धलेश्या मनःपर्यायज्ञानिनोऽनाहाराः। असंज्ञिनोऽनाकारोपयोगिनः पूर्वप्रतिपन्नाः ॥ ४१२ ॥
शेषाः पूर्वप्रपन्ना नियमाद् प्रतिपद्यमानका भाज्याः। भजना पूर्वप्रपन्ना अकषाया अवेदका भवन्ति ॥ ४१३ ॥

सम्यक्त्वसहचरितचारित्रलाभे तु मतिसहचरितं मनःपर्यायज्ञानं नोत्पद्यत एव, अत एव वचनात्, अन्यथाऽवधिज्ञानीव मनःपर्यायज्ञान्यपि निश्चयनयमतेन प्रतिपद्यमानकः स्यादिति। आहारकद्वारे, अनाहारकाः केचिद् देवादयः पूर्वभवाद् गृहीतसम्यक्त्वा मनुष्यादिषूत्पद्यमाना मतेः पूर्वप्रतिपन्ना भवन्ति, न तु प्रतिपद्यमानकाः, तथाविधविशुद्ध्यभावात्। संज्ञाद्वारे, असंज्ञिनो विकलेन्द्रियवद् भावनीयाः। उपयोगद्वारे, अनाकारोपयोगिनः केचित् पूर्वप्रतिपन्ना भवन्ति, न तु प्रतिपद्यमानकाः, मतिज्ञानस्य लब्धित्वात्, तदुत्पत्तेश्चाऽनाकारोपयोगे प्रतिषिद्धत्वादिति।

उक्तशेषास्तु– गतिद्वारे नारकादयः, इन्द्रियद्वारे तु पञ्चेन्द्रियाः, कायद्वारे तु त्रसकायिकाः, इत्येवमादयो जातिमपेक्ष्य पूर्वप्रतिपन्ना नियमतः सन्ति, प्रतिपद्यमानकास्तु भजनीयाः– कदाचिद् भवन्ति, कदाचिद् नेति। अतिव्याप्तिनिषेधार्थमाह— 'भयणा पुव्वपवन्ना इत्यादि' कषायद्वारेऽकषायाः, वेदद्वारे त्ववेदका भजनया पूर्वप्रतिपन्नयैव भवन्ति, छद्मस्थाः पूर्वप्रतिपन्ना मतेर्भवन्ति, न तु केवलिनः, प्रतिपद्यमानकास्त्वमी न भवन्त्येव, पूर्वप्रतिपन्नमतिज्ञानानामेव क्षपकोपशमश्रेणिप्रतिपत्तेः ॥ इति गाथाद्वयार्थः ॥ ४१२ ॥ ४१३ ॥

तदेवं संक्षेपतो गत्यादिद्वारेषु भाष्यकृता मतिज्ञानस्य कृता सत्पदप्ररूपणा। अथ विनेयानुग्रहार्थं किञ्चिद् विस्तरतोऽप्यसौ विधीयते— तत्र मतिज्ञानं किमस्ति, न वा ?। यद्यस्ति, कं तत् ?। गत्यादिस्थानेषु। तत्र नारक-तिर्यग्-नरा-ऽमरभेदाद् गतिश्चतुर्धा। तत्र चतुर्विधायामपि गतौ मतिज्ञानस्य पूर्वप्रतिपन्ना नियमात् सन्ति, प्रतिपद्यमानकास्तु भाज्याः— विवक्षितकाले कदाचिद् भवन्ति, कदाचित्तु नेत्यर्थः। आभिनिबोधिकप्रतिपत्तिप्रथमसमये प्रतिपद्यमानका उच्यन्ते, द्वितीयादिसमयेषु तु पूर्वप्रतिपन्ना इत्यनयोर्विशेषः।

इन्द्रियद्वारे— एकेन्द्रियेषूभयाभावः सैद्धान्तिकमतेन। कार्मिकग्रन्थिकास्तु— लब्धिपर्याप्तबादरपृथिवी-अब्-वनस्पतीन् करणापर्याप्तान् पूर्वप्रपन्नानिच्छन्ति, सास्वादनस्य तेषूत्पत्तेः। विकलेन्द्रियास्तूभयमतेनाऽपि करणापर्याप्ताः सास्वादनमेव पूर्वभवायातमङ्गीकृत्य पूर्वप्रतिपन्ना लभ्यन्ते, न तु प्रतिपद्यमानकाः, पञ्चेन्द्रियास्तु सामान्येन पूर्वप्रतिपन्ना नियमतः सन्ति, प्रतिपद्यमानकास्तु भजनीयाः।

कायद्वारे— पृथिवी-अप्-तेजो-वायु-वनस्पति-त्रसकायभेदात् षोढा कायः। तत्राऽऽद्यकायपञ्चके उभयाभावः। त्रसकाये तु पञ्चेन्द्रियवद् वाच्यम्। योगद्वारे– काय-वाङ्-मनोभेदात् त्रिधा योगः, स एष त्रिविधोऽपि समुदितो येषामस्ति तेषां पञ्चेन्द्रियवद् वाच्यम्, मनोरहितवाग्योगिनां विकलेन्द्रियवत्, केवलकाययोगिनां त्वेकेन्द्रियवदिति। वेदद्वारे— स्त्री-पुं-नपुंसकभेदात् त्रिविधेऽपि वेदे पञ्चेन्द्रियवद् भावनीयम्। कषायद्वारे तु चतुर्ष्वनन्तानुबन्धिषु सास्वादनमङ्गीकृत्य पूर्वप्रतिपन्नो लभ्यते, न प्रतिपद्यमानकः; शेषेषु द्वादशसु कषायेषु पञ्चेन्द्रियवदेव। लेश्याद्वारे– भावलेश्यामङ्गीकृत्य कृष्णादिकासु तिसृष्वप्रशस्तलेश्यासु पूर्वप्रतिपन्नाः संभवन्ति, न त्वितरेः

१ क. 'रेत्र'।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रशस्ते तु लेश्यात्रये पञ्चेन्द्रियवदेव ।

सम्यक्त्वद्वारे निश्चय-व्यवहारनयाभ्यां विचारः । तत्र व्यवहारनयो मन्यते— मिथ्यादृष्टिरज्ञानी च सम्यक्त्व-ज्ञानयोः प्रतिपद्यमानको भवति, न तु सम्यक्त्व-ज्ञानसहितः । निश्चयनयस्तु ब्रूते– सम्यग्दृष्टिर्ज्ञानी च सम्यक्त्व-ज्ञाने प्रतिपद्यते, न तु मिथ्यादृष्टिः, अज्ञानी च । तथाचाऽऽह भाष्यकारः—

[1]सम्मत्त-नाणरहियस्स नाणमुप्पज्जइ त्ति ववहारो । नेच्छइयनओ भासइ उप्पज्जइ तेहिं सहिअस्स ॥४१४॥

पौतनयैव व्याख्याता ॥ ४१४ ॥

अत्र तावद् व्यवहारो निश्चयस्य दूषणमाह—

[2]ववहारमयं जायं न जायए भावओ कयघडो व्व । अहवा कयं पि कज्जइ कज्जउ निच्चं न य समत्ती॥४१५॥

यदि हन्त ! 'सम्यग्दृष्टिर्ज्ञानी च सम्यक्त्व-ज्ञाने प्रतिपद्यते' इति त्वयाऽभ्युपगम्यते; तर्हि जातमपि तत् सम्यक्त्वं ज्ञानं चाऽसौ पुनरप्युत्पादयतीति सामर्थ्यादापन्नम् । न च जातं विद्यमानं पुनरपि जायते– न केनाऽपि ततः क्रियत इत्यर्थः । कुतः, इत्याह– भावतो विद्यमानत्वात्, पूर्वनिष्पन्नघटवत् । इत्येतद् व्यवहारनयमतम्, असत्कार्यवादित्वात् तस्य । प्रमाणयति चासौ– यद् विद्यमानं तद् न केनचित् क्रियते, यथा पूर्वनिष्पन्नो घटः, विद्यमाने च सम्यग्दृष्टेः सम्यक्त्व-ज्ञाने, अतो न तत्करणमुपपद्यते । अथ कृतमपि क्रियते, तर्हि क्रियतां नित्यमपि, इति क्रियाऽनुपरमप्रसङ्गः, न चैवं सत्येकस्याऽपि कदापि कार्यस्य परिसमाप्तिः । इति प्रस्तुतस्याऽऽभिनिबोधिकस्याऽपि प्रतिपत्त्यनवस्थेति ॥ ४१५ ॥

अपि च, यदि कृतमपि क्रियते, तदाऽन्येऽपि दोषाः । के ?, इत्याह–

[3]किरियावेफल्लं चिय पुव्वमभूयं च दीसए होंतं । दीसइ दीहो य जओ किरियाकालो घडाईणं ॥४१६॥[4]

यदि 'कृतमपि क्रियते' इत्यभ्युपगम्यते, तर्हि घटादिकार्ये उत्पाद्ये क्रियायाश्चक्रभ्रमणादिकाया वैफल्यं निरर्थकता [5] भवति, कार्यस्य प्रागेव सत्त्वात् । किञ्च, अध्यक्षविरोधः सत्कार्यवादे, यतः पूर्वं मृत्पिण्डावस्थायामभूतमविद्यमानं, पश्चात्तु कुम्भकारादिव्यापारे

१ सम्यक्त्व-ज्ञानरहितस्य ज्ञानमुत्पद्यत इति व्यवहारः । नैश्चयिकनयो भाषते उत्पद्यते ताभ्यां सहितस्य ॥ ४१४ ॥ २ अवतरणिकया ।
३ क. 'यदू' । ४ व्यवहारमतं जातं न जायते भावतः कृतघट इव । अथवा कृतमपि क्रियते क्रियतां नित्यं न च समाप्तिः ॥ ४१५ ॥
५ क्रियावैफल्यमेव पूर्वमभूतं च दृश्यते भवत् । दृश्यते दीर्घश्च यतः क्रियाकालो घटादीनाम् ॥ ४१६ ॥ ६ क. ग. घ. 'याइवे' । ७ पश्चात् ।

घटादिकार्यं भवज्जायमानं दृश्यते । अतः कथमुच्यते– 'सदुत्पद्यते' इति ? । यस्मिन्नेव समये प्रारभ्यते तस्मिन्नेव निष्पद्यते, अतो निष्पन्नमेव तत् क्रियते, क्रियाकाल-निष्ठाकालयोरभेदादिति चेत् । नैवम् । कुतः ?, इत्याह– 'दीसईत्यादि' दीर्घोऽसंख्येयसामयिको घटादीनामुत्पद्यमानानां क्रियाकालो लगन्नालोक्यते यस्मात्, ततो न यस्मिन्नेव समये घटादि प्रारभ्यते तस्मिन्नेव समये निष्पद्यते, मृदानयन-तत्पिण्डविधान-चक्रारोपण-शिवकादिविधानादिचिरकालेनैव तदुत्पत्तेरिति ॥ ४१६ ॥

भवतु दीर्घक्रियाकालः, कार्यं त्वारम्भसमयेऽप्युपलभ्यते, इत्याह–

[1]नारंभे चिय दीसइ न सिवादद्धाए, दीसइ तदंते । इय न सवणाइकाले नाणं जुत्तं तदंतम्मि ॥४१७॥

यदि क्रियाप्रथमसमय एव कार्यं निष्पद्येत तदा तत् तत्रैवोपलभ्येत । न चाऽऽरम्भसमय एव तद् दृश्यते, नापि शिवकाद्यद्धायां शिवक-स्थास-कोश-कुशूलादिकाले । क्व तर्हि दृश्यते ?, इत्याह– दृश्यते घटादि कार्यं तस्य दीर्घक्रियाकालस्याऽन्तः परिसमाप्तिस्तदन्तस्तस्मिन्निति । तस्मात् क्रियाकालपर्यन्त एव तस्य सत्त्वं युज्यते, न तु पूर्वम्, अनुपलभ्यमानत्वात् । यस्मादेवम्, इत्यतो न गुरुसंनिधाने सिद्धान्तश्रवण-चिन्तने-हनादिक्रियाकाले ज्ञानमाभिनिबोधिकं युक्तम्; किन्तु तस्य श्रवणादिक्रियाकालस्याऽन्तस्तदन्तस्तस्मिन्नेव तद् युक्तम्, तत्रैवोपलभ्यमानत्वादिति प्रस्तुतोपयोगः ।

तदेवं न क्रियाकाले कार्यमस्ति, अनुपलभ्यमानत्वात्; किन्तु तन्निष्ठाकाल एव तदस्ति, तत्रैवोपलभ्यमानत्वात् । ततो न प्रतिपद्यमानं प्रतिपन्नं कार्यं, क्रियाकाल एव तस्य प्रतिपद्यमानत्वात्, निष्ठाकाल एव च प्रतिपन्नत्वात्, क्रियाकाल-निष्ठाकालयोश्चाऽत्यन्तं भेदात् । तस्माद् मिथ्यादृष्टिः, अज्ञानी च सम्यक्त्व-ज्ञाने प्रतिपद्यते, न सम्यग्दृष्टिः, ज्ञानी[2] च ॥ इति व्यवहारनयः ॥ ४१७॥

[3]अत्र निश्चयनयः प्रतिविधानमाह–

[4]निच्छइओ नाऽजायं जाय अभावत्तओ खपुप्फं व । अह च अजायं जायइ, जायउ तो खरविसाणं पि॥४१८॥

निश्चये भवो नैश्चयिको नयः प्राह–यथा 'जातं न जायते, कृतघटवत्' इति भवताऽसत्कार्यवादिनाऽभिधीयते, तथा वयमपि सत्कार्यवादिनो ब्रूमः– नाऽजातं जायते, "अचोऽचि" इतीकारलोपः, नाऽविद्यमानमुत्पद्यत इति प्रतिज्ञा, अभावत्वात्– अविद्यमानत्वादिति हेतुः, खपुष्पवदिति दृष्टान्तः । अयमपि विपर्ययबाधामाह– अथाऽजातमपि जायते, जायतां ततः खरविषाणमपि, अभावाविशेषादिति ॥४१८॥

१ नारम्भ एव दृश्यते न शिवाद्यद्धायां, दृश्यते तदन्ते । इति न श्रवणादिकाले ज्ञानं युक्तं तदन्तः ॥४१७॥ २ क. ग. घ. छ. 'नी इ' । ३ घ. छ. 'अथ नि' ।
४ नैश्चयिको नाऽजातं जायतेऽभावत्वात् खपुष्पमिव । अथ चाऽजातं जायते, जायतां ततः खरविषाणमपि ॥ ४१८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपि च,

[1]निच्चकिरियाइदोसा णणु तुल्ला, असइ कट्ठतरगा वा। पुव्वमभूयं च न ते दीसइ किं खरविसाणं पि?॥४१९॥

ननु नित्यकरणादयः सत्कार्यवादे ये दोषाः प्रदत्ताः, तेऽसति कार्येऽसत्कार्यवादेऽपीत्यर्थः, तुल्याः समानाः, तथाहि– अत्रापि शक्यते वक्तुम्–यद्यसत् क्रियते, तर्हि क्रियतां नित्यमेव, असत्त्वाविशेषात्, न चैवमेकस्याऽपि कार्यस्य निष्पत्तिर्युज्यते; खरविषाणकल्पे चाऽसति कार्ये समुत्पाद्ये क्रियावैफल्यमित्यादि। किं तुल्या एवाऽसति कार्येऽमी दोषाः?, न, इत्याह– कष्टतरा वा दुष्परिहार्यतरा वा, सतो हि कार्यस्य केनापि पर्यायविशेषेण करणं संभवत्यपि, लोकेऽपि सतामाकाशादीनां पर्यायविशेषाऽऽधानापेक्षया करणस्य रूढत्वात्। तथाच तत्र वक्तारः समुपलभ्यन्ते– 'आकाशं कुरु, पृष्ठं कुरु, पादौ कुरु' इत्यादि। खरविषाणकल्पे त्वसति कार्ये न केनाऽपि प्रकारेण करणं संभवति। ततः कष्टतरास्तत्राऽमी दोषा इति भावः। यदुक्तम्– '[2]पुव्वमभूयं च दीसए होंतं' इति, तत्राह– 'पुव्वमित्यादि' उत्पत्तेः पूर्वं च यद्यभूतं सर्वथाऽविद्यमानं कार्यमुत्पद्यत इतीष्यते, तर्हि ते तव मतेन किं खरविषाणमपि पूर्वमभूतं पश्चादुत्पद्यमानं न दृश्यते, प्राग-सत्त्वाविशेषात्? इति॥ ४१९॥

यदुक्तम्– '[3]दीसइ दीहो य जओ किरियाकालो' इति। तत्राह–

[4]पइसमउप्पण्णाणं परोप्परविलक्खणाण सुबहूणं। दीहो किरियाकालो जइ दीसइ किं च कुंभस्स?॥४२०॥

समयं समयं प्रत्युत्पन्नानां परस्परविलक्षणानां सुबहूनामसंख्येयानां 'मृत्खनन-संहरण-पिटक-रासभपृष्ठारोपणा-ऽवतारणा-ऽम्भःसेचन-परिमर्दन-पिण्डविधान-भ्रमण-चक्रारोपण-शिवक-स्थास-कोश-कुशूलादिकार्याणाम्' इति शेषः, यदि दीर्घो द्राघीयान् क्रिया-कालो दृश्यते, तर्हि किमत्र हन्त! कुम्भस्य घटस्याऽऽयातम्?। इदमुक्तं भवति– प्रतिसमयं भिन्ना एव क्रियाः, भिन्नान्येव च मृत्पिण्ड-शिवकादीनि कार्याणि, घटस्तु चरमैककक्रियाक्षणमात्रभाव्येव। ततश्च प्रतिसमयभिन्नानामनेककार्याणां यदि दीर्घः क्रियाकालो भवति, तर्हि चरमैककक्रियाक्षणमात्रभाविनि घटे दीर्घक्रियाकालप्रेरणं परस्याऽज्ञतामेव सूचयतीति॥ ४२०॥

यदुक्तम्– 'नारंभे च्चिय दीसइ' इत्यादि। तत्राह–

---

१ नित्यक्रियादिदोषा ननु तुल्याः, असति कष्टतरका (रा) वा। पूर्वमभूतं च न तव दृश्यते किं खरविषाणमपि?॥ ४१९॥

२ असत्कार्यवादे। ३ गाथा ४१६।

४ प्रतिसमयोत्पन्नानां परस्परविलक्षणानां सुबहूनाम्। दीर्घः क्रियाकालो यदि दृश्यते किं च कुम्भस्य?॥ ४२०॥ ५ गाथा ४१७।

[1]अण्णारंभे अण्णं कह दीसइ, जह घडो पडारंभे?। सिवकादओ न घडओ किह दीसइ सो तदद्धाए?॥४२१॥

इह 'नारंभे च्चिय दीसइ' इत्यत्र भवतोऽयमभिप्रायो यदुत–मृच्चक्र-चीवर-कुम्भकारादिसामग्र्याः प्रथमेऽपि[3] प्रवृत्तिसमये घटः किं नोपलभ्यते?, अनुपलम्भाच्चाऽयमसंस्तत्र पश्चादुत्पद्यते। एतच्चाऽयुक्तमेव, यतो न प्रथमे प्रारम्भसमये घटः प्रारब्धः, किन्तु चक्रमस्त-कमृत्पिण्डारोपणादीन्येवाऽऽरब्धानि। अन्यारम्भे चाऽन्यत् कथं दृश्यते? न दृश्यत एवेत्यर्थः, यथा पटारम्भे घटः। यदुक्तम्– 'न[4] सिवादद्धाए' इतिः तत्राह– 'सिवकादओ इत्यादि' शिवकादिकाले घटो न दृश्यत इत्युक्तम्, तदेतद् युक्तमेव, यतो शिवकादयो घटो न भवन्ति। अतो यत एव शिवकादिकालोऽसौ, अत एव तदद्धायां तत्काले कथमसौ घटो दृश्यताम्?, अन्यारम्भकालेऽन्यस्य दर्शनानुपपत्तेरिति॥ ४२१॥

यदुक्तम्– '[2]दीसइ तदंते' तत्राह–

[5]अंन्ति च्चिय आरद्धो जइ दीसइ तम्मि चेव को दोसो?। अकयं व संपइ गए किह कीरइ, किह व एसम्मि॥४२२॥

अन्त्य एव क्रियाक्षण आरब्धो घटो यदि तस्मिन्नेव दृश्यते, तर्हि को दोषः?- न कश्चिदित्यर्थः। अतः किमुच्यते– 'यतोऽन्त्य समय एवोपलभ्यते, नाऽन्यत्र, ततोऽयं पूर्वस्मिन्नेव क्रियत इति'?। स हि पूर्वं प्रथमादिक्रियाक्षणेषु नारब्धः, न च दृश्यते, अन्त्ये तु क्रियाक्षणे प्रारब्धः, दृश्यते च। स च तस्मिन् क्रियासमये क्रियमाणः कृत एव, समयस्य निरंशत्वात्। यच्च कृतं तद् सदेव। ततः सदेव क्रियते नासत्, यच्च सत् तदुपलभ्यत एवेति स्थितम्।

अथ यस्मिन् समये क्रियमाणं तस्मिन्नेव कृतं नेष्यते, तत्राह–– 'अकयं वेत्यादि' अकृतं वा संप्रतिसमये क्रियमाणसमये यदीष्यते, तर्हि तद्गतेऽतीते समये कथं क्रियतां, तस्य विनष्टत्वेनाऽसत्त्वात्?। कथं वा एष्यति भविष्यत्यनन्तरागामिनि समये क्रियताम् तस्याऽप्यनुत्पन्नत्वेनाऽसत्त्वादेव?।

अथ व्यवहारवादी ब्रूयात्– क्रियासमयः सर्वोऽपि क्रियमाणकालः। तत्र च क्रियमाणं वस्तु नास्त्येव। उपरतायां तु क्रियायां योऽनन्तरसमयः स कृतकालः, तत्रैव कार्यनिष्पत्तेः। अतः कृतमेव कृतमुच्यते, न क्रियमाणमिति। साध्वेतत्, किन्त्विदं प्रष्टव्योऽसि– किं भवतः क्रियया कार्यं क्रियते, अक्रियया वा?। यदि क्रियया, तर्हि कथमियमन्यत्र, कार्यं त्वन्यत्रेति?। न हि 'खदिरे च्छेदनक्रिया,

---

१ अन्यारम्भेऽन्यत् कथं दृश्यते यथा घटः पटारम्भे?; शिवकादयो न घटकः कथं दृश्यते स तदद्धायाम्?॥ ४२१॥ २ गाथा ४१७।

३ क. 'पि वृ'। ४ अन्त्य एवाऽऽरब्धो यदि दृश्यते तस्मिन्नेव, को दोषः?। अकृतं वा संप्रति गते कथं क्रियते, कथं वैष्यति?॥४२२॥ ५ घ. छ. 'ततः'।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पलाशे तु तत्कार्यभूतश्छेदः' इत्युच्यमानं शोभां बिभर्ति । किञ्च, क्रियाकाले कार्यं न भवति, पश्चात्तु भवति, इत्यनेनैतदापद्यते यदुत— क्रियैव हतका सर्वाऽनर्थमूलमेषा, कार्यस्योत्पित्सोर्विघ्नहेतुत्वात्, यावद् ह्येषा प्रवर्तते तावद् वराकं कार्यं नोत्पद्यते, अतः प्रत्युताऽसौ तस्य विघ्नभूतैव, ततस्त्वदभिप्रायेण विपर्यस्ततयैव प्रेक्षावन्त एतां प्रारभन्त इति । क्रियैव कार्यं करोति, केवलं तद्विरामे तद् निष्पद्यत इति चेत् । तर्हि हन्त ! कस्तयाऽस्य विरोधः, येन तत्कुर्वत्या अप्यस्यास्तत्कालमतिवाह्य पश्चाद् निष्पद्यते, न पुनस्तत्कालेऽपि ? । क्रियोपरमेऽपि च जायमानं कार्यं तदनारम्भेऽपि कस्माद् न भवति, क्रियाऽनारम्भ-तदुपरमयोरर्थतोऽभिन्नत्वाद् ? इति । अथाऽक्रिययेति द्वितीयः पक्षः, तर्हि हिमवद्-मेरु-समुद्रादिवद् घटादयोऽप्यकृतका एव प्राप्ताः, तद्वत् तेषामपि कारणभूताक्रियामन्तरेणैव प्रवृत्तेः; तपः-स्वाध्यायादिक्रियाविधानं च मोक्षादीन् प्रति साध्यत्वादीनामनर्थकमेव स्यात्, क्रियामन्तरेणैव सर्वकार्योत्पत्तेः । अतस्तूष्णीभावमास्थाय निष्परिस्पन्दनानि निराकुलानि तिष्ठन्तु त्रीण्यपि भुवनानि, क्रियारम्भविरहेणाऽप्यैहिका-ऽऽमुष्मिकसमस्तसमीहितसिद्धेः । न चैवम् । तस्मात् क्रियैव कार्यस्य कर्त्री, तत्काले एवं च तद् भवति, न पुनस्तदुपरमे । अतः क्रियमाणमेव कृतमिति स्थितम् ॥ ४२२ ॥

आह— ननु यदि क्रियासमयेऽपि कार्यं भवति, तर्हि तत् तत्र कस्माद् न दृश्यते ? । दृश्यत एवेति चेत् । नन्वहमपि किमिति तद् न पश्यामि ?, इत्याशङ्क्याह—

[1]पइसमयकज्जकोडीनिरेक्खो[2] घडगयाहिलासो सि । पइसमयकज्जकालं थूलमइ ! घडम्मि लाएसि ॥४२३॥[3]

इह यद् यस्मिन् समये प्रारभ्यते, तत् तत्र निष्पद्यते दृश्यते च, केवलं स्थूला सूक्ष्मेक्षिकाबहिर्भूतत्वाद् बादरदर्शिनी मतिर्यस्य तत्संबोधनं हे स्थूलमते ! त्वं घटे लगयसि । किम् ?, इत्याह— प्रतिसमयोत्पन्नानां कार्यकोटीनां कालः प्रतिसमयकार्यकालस्तं सर्वमपि 'घटस्यैवाऽयं समस्तोऽपि मृत्पिण्डविधान-चक्रभ्रमणादिक उत्पत्तिकालः' इत्येवमेकस्मिन्नेव घटे[x] संबन्धयसीत्यर्थः । कथंभूतः सन् ?, इत्याह— प्रतिसमयोत्पद्यमानासु मृत्पिण्ड-शिवक-स्थास-कोशादिकासु, सिद्ध-केवलिप्रभृतीनां ज्ञानजननादिकासु च कार्यकोटिषु निरपेक्षः । कुतः पुनरेतत् ?, इत्याह— यतो घटगताभिलाषोऽसि त्वं, घटोऽस्यां मृद्-दण्ड-चक्र-चीवरादिसामग्र्यामुत्पत्स्यत उत्पत्स्यत इत्येवं केवलघटाभिलाषयुक्तत्वाद् भवत इत्यर्थः । इदमुक्तं भवति— प्रतिसमयमपरा-ऽपराण्येव शिवकादीनि कार्याण्युत्पद्यन्ते, दृश्यन्ते च, तानि च तथो-

१ घ.छ.'ततः स्या'। २ घ.छ. 'व त'। + क्रियोपरमे- । × संबंध०-।

३ प्रतिसमयकार्यकोटिनिरपेक्षो घटगताभिलाषोऽसि । प्रतिसमयकार्यकालं स्थूलमते ! घटे लगयासि ॥ ४२३ ॥ ४ घ. छ. 'रेक्खो' ।

त्पद्यमानानि त्वं नावबुध्यसे, घटोत्पत्तिनिमित्तभूतैवेयं सर्वाऽपि मृत्-चक्र-चीवरादिसामग्री, इत्येवं केवलघटाभिलाषयुक्तत्वात्, ततस्तन्निरपेक्ष एव स्थूलमतितया सर्वमपि तत्कालं घटे लगयासि । ततश्च प्राक्तनक्रियाक्षणेष्वनुत्पन्नत्वाद् घटमदृष्ट्वैवं ब्रूषे— 'क्रियाकाले घटलक्षणं कार्यमहं न पश्यामि' । इदं तु नावगच्छसि यदुत— चरमक्रियाक्षण एव घटः प्रारभ्यते, प्राक्तनक्रियाकाले तु शिवकादय एवारभ्यन्ते, अन्यारम्भे चाऽन्यद् न दृश्यत एवेति ॥ ४२३ ॥

व्यवहारवादी प्राह—

[2]को चरिमसमयनियमो पढमे च्चिय तो न कीरए कज्जं । नाकारणं ति कज्जं तं चेवं तम्मि से समए ॥४२४॥

प्रथमसमयादारभ्य यद्यपरापराणि कार्याण्यारभ्यन्ते, तर्हि कोऽयं चरमसमयनियमः, येन विवक्षितं कार्यं प्रथमसमय एव न क्रियते, अकरणे च ततस्तत् तत्र न दृश्यते ?— नन्वाद्यकार्यवद् विवक्षितमपि तत्रैव क्रियतां, दृश्यतां चेति भावः । अत्र निश्चयः प्रत्युत्तरमाह— नाऽकारणं क्वचित् कार्यमुत्पद्यते, नित्यं सद-सत्त्वप्रसङ्गात् । न च तत् कारणं 'से' तस्य विवक्षितकार्यस्य तदन्त्यसमये एवाऽस्ति, न प्रथमादिसमयेषु, अतो न तेषूत्पद्यते, नापि दृश्यत इति ॥ ४२४ ॥

तदेवं 'क्रियाकाल एव कार्यं भवति, न पुनस्तदुपरमे' इत्युक्तम् । अथैवं नेष्यते, तर्हि प्रस्तुतमाभिनिबोधिकज्ञानमेवाऽधिकृत्योच्यते—

[3]उप्पाए वि न नाणं जइ तो सो कस्स होइ उप्पाओ ? । तम्मि य जइ अण्णाणं तो नाणं कम्मि कालम्मि ? ॥४२५॥

उत्पादनमुत्पादः कार्यस्योत्पत्तिहेतुभूतः क्रियाविशेषस्तत्रापि यदि मतिज्ञानं नेष्यते भवता— क्रियमाणावस्थायामपि यदि कार्यं त्वया नाभ्युपगम्यत इति भावः, तर्हि उत्पद्यमानस्याऽसत्त्वात् स कस्योत्पादो भवेत् ? इति कथ्यताम् । न ह्यविद्यमानस्य खरविषाणस्येवोत्पादो युक्तः । यदि च तस्मिन्नुत्पादकालेऽप्यज्ञानम्, तर्हि ज्ञानं कस्मिन् काले भविष्यति ? इति निवेद्यताम् । उत्पादोपरम इति चेत् । न, कथमन्यत्रोत्पादः, अन्यत्र तूत्पन्नमिति ? । उत्पादोपरमे च भवत् कार्यमुत्पादात् प्रागपि कस्माद् न भवति, अविशेषात् ? इत्याद्युक्तमेवेति ॥ ४२५ ॥

+ उ-।× पाठ्य-। १ घ.'त्-चीं'। २ कश्चरमसमयनियमः प्रथम एव ततो न क्रियते कार्यम् । नाऽकारणमिति कार्यं तच्चैवं तस्मिंस्तस्य समये ॥ ४२४ ॥

फ भवतु-। ३ उत्पादेऽपि न ज्ञानं यदि ततः स कस्य भवत्युत्पादः ? । तस्मिंश्च यद्यज्ञानं ततो ज्ञानं कस्मिन् काले ? ॥ ४२५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

यदुक्तम्– 'ईय न सवणाइकाले नाणं' इति; तत्राह—

को व सवणाइकालो उप्पाओ जम्मि होज्ज से नाणं। नाणं च तदुप्पाओ य दो वि चरिमम्मि समयम्मि ॥४२६॥[1]

वाशब्दश्चशब्दार्थे। कश्च श्रवणादिकालो व्यवहारवादिन्! भवतोऽभिप्रेतः, यत्र ज्ञानं निषेधयसि?। हन्त! त्वया मतिज्ञानस्योत्पादसमय एव श्रवणादिकालोऽवगन्तव्यः, यत्र 'से' तस्य शिष्यस्य मतिज्ञानं भवेत्, नाऽपरः। अथाऽऽदित आरभ्य गुरुसंनिधाने धर्मश्रवणादय एव मतिज्ञानस्योत्पादकालः, नापरोऽवगम्यत इति चेत्। नैवम्, इत्याह– 'नाणमित्यादि' ज्ञानं च मतिज्ञानलक्षणं, तदुत्पादश्च तस्योत्पत्तिहेतुभूतः क्रियालक्षणः, एतौ द्वावपि धर्मश्रवणादिक्रियासमयराशेश्चरमसमय एव भवतः, न प्रथमादिसमयेषु, तेष्वपरापराणामेव धर्मावबोधादिकार्याणामुत्पत्तेः। न च तद्बोधादिमात्रादपि सम्यग्ज्ञानोत्पत्तिर्युज्यते, अभव्येष्वपि तत्सद्भावात्। तस्माद् विशिष्ट एव कस्मिंश्चिद् धर्मश्रवणादीनां चरमसमये मतिज्ञानं, तदुत्पादश्च; अतो युक्तमुक्तम्– 'जुत्तं तदंतम्मि' इति, अस्माभिरपि क्रियाकालस्याऽन्तसमय एव तस्येष्यमाणत्वात्। तस्माद् न सर्वेषु धर्मश्रवणादिक्रियासमयेषु मतिज्ञानम्, नापि सर्वेषामपि तेषामुपरमे, किन्त्वेकस्मिंस्तच्चरमसमये तदारभ्यते, निष्पद्यते च। अतः क्रियमाणमेव कृतम्।

यदि कृतमपि क्रियते निश्चयवादिन्!, तर्हि पुनः पुनरपि क्रियतां, कृतत्वाविशेषात्, अतः करणानवस्थेति चेत्। नैवम्, क्रियाकाल-निष्ठाकालयोरभेदात्। यदि हि तदुत्पादयित्री क्रिया प्रारब्धा सती उत्तरसमयेष्वपि प्राप्येत, तदा स्यात्पुनरपि तत्करणम्, एतच्च नास्ति, यतोऽसौ तदुत्पादयित्री क्रिया न पूर्वं, नाप्युत्तरत्रास्ति, किन्तु तस्मिन्नेव चरमसमये प्रारभ्यते, निष्ठां च याति, इति कुतः पुनरपि कार्यकरणम्?, अतो न तत्करणानवस्थेति। तस्मात् 'ईय न सवणाइकाले नाणं' इत्यनेन यदि सर्वेष्वपि धर्मश्रवणादिसमयेषु मतिज्ञानं निषिध्यते, तदा सिद्धसाध्यता। अथ चरमक्रियासमयेऽपि तद् निवार्यते, तदयुक्तम्, तत्र तस्य प्रसाधितत्वादिति। तस्मिंश्च धर्मश्रवणादिक्रियाचरमसमये सम्यक्त्वं ज्ञानं च प्रतिपद्यमानं प्रतिपन्नमेवेति। अतः सम्यग्दृष्टिर्ज्ञानी च सम्यक्त्व-ज्ञाने प्रतिपद्यते। इति निश्चयनयमततात्पर्यम्।

व्यवहारनयस्तु ब्रूते– तस्मिंश्चरमसमये सम्यक्त्व-ज्ञानयोरव्याप्यसौ प्रतिपद्यमानकः, प्रतिपद्यमानं चाऽप्रतिपन्नमेव। अतो मिथ्यादृष्टिः, अज्ञानी च सम्यक्त्व-ज्ञाने प्रतिपद्यते। उत्तरत्र क्रियानिष्ठासमये तु सम्यक्त्व-ज्ञाने युगपदेव लभते। अतः प्रस्तुते सम्य-

---

१. गाथा ४१७। २ को वा श्रवणादिकाल उत्पादो यस्मिन् भवेत् तस्य ज्ञानम्। ज्ञानं च तदुत्पादश्च द्वावपि चरमे समये ॥ ४२६ ॥
३ क.ग. 'गन्तव्य इ'। ४ घ.छ. 'याक्ष'। ५ क.ग. 'त्रापि कि'।

क्त्वद्वारे एतन्मतेन सम्यग्दृष्टिराभिनिबोधिकस्य पूर्वप्रतिपन्न एव भवति, न तु प्रतिपद्यमानकः, सम्यक्त्व-ज्ञानयोर्युगपल्लाभात्, तत्काले च क्रियाया अभावात्, तदभावे च प्रतिपद्यमानकत्वायोगादिति। निश्चयनयमतेन तु सम्यग्दृष्टेराभिनिबोधिकस्य पूर्वप्रतिपन्नः, प्रतिपद्यमानकश्च लभ्यते, क्रियायाः कार्यनिष्ठायाश्च युगपद्भावस्य समर्थितत्वात्। इत्यलमतिविस्तरेण ॥ इति गाथात्रयोदशकार्थः ॥

ज्ञानद्वारे– मति-श्रुता-ऽवधि-मनःपर्याय-केवलभेदात् पञ्चधा ज्ञानम्। व्यवहारनयमतेन मति-श्रुता-ऽवधि-मनःपर्यायज्ञानिन आभिनिबोधिकस्य पूर्वप्रतिपन्ना भवन्ति, न तु प्रतिपद्यमानकाः, ज्ञानिनो मतिज्ञानप्रतिपत्त्ययोगस्यैतन्मतेन प्रागुक्तत्वात्। केवलिनां तूभयाभावः, तेषां क्षायोपशमिकज्ञानातीतत्वात्। मत्यज्ञान-श्रुताज्ञान-विभङ्गज्ञानवन्तस्तु प्रतिपद्यमानकाः कदाचिद् भवन्ति, युक्तेर्दर्शितत्वात्, न तु प्रतिपन्नाः। निश्चयनयमतेन[2] तु मति-श्रुता-ऽवधिज्ञानिनः पूर्वप्रतिपन्ना नियमतः सन्ति, प्रतिपद्यमानका अपि भजनीयाः, ज्ञानिनो ज्ञानप्रतिपत्तेः समर्थितत्वात्। मनःपर्यायज्ञानिनस्तु पूर्वप्रतिपन्ना एव भवन्ति, न तु प्रतिपद्यमानकाः, पूर्वसम्यक्त्वलाभकाले प्रतिपन्नमतिज्ञानस्यैव पश्चाद्[3]र्नत्यावस्थायां मनःपर्यायज्ञानसद्भावात्। केवलिनां तूभयाभावः। एवं मत्याद्यज्ञानवतामप्युभयाभाव एव, ज्ञानिन एव ज्ञानप्रतिपत्तेः।

दर्शनद्वारे– चक्षु-रचक्षु-रवधि-केवलदर्शनभेदाद् दर्शनं चतुर्धा। अत्राऽऽद्यदर्शनत्रये लब्धिमङ्गीकृत्य पूर्वप्रतिपन्ना नियमतः प्राप्यन्ते, प्रतिपद्यमानकास्तु भजनीयाः, तदुपयोगं त्वाश्रित्य पूर्वप्रतिपन्ना एव, न तु प्रतिपद्यमानकाः, मतिज्ञानस्य लब्धित्वात्, लब्ध्युत्पत्तेश्च दर्शनोपयोगे निषिद्धत्वात् "सँव्वाओ वि लद्धीओ सागरोवउत्तस्स उववज्जंति" इति वचनादिति। केवलदर्शनिनां तूभयाभावः।

संयतद्वारे— संयतादयः आभिनिबोधिकस्य पूर्वप्रतिपन्ना नियमाल्लभ्यन्ते, प्रतिपद्यमाना अपि भजनया प्राप्यन्ते। ननु सम्यक्त्वलाभावस्थायामेव मतिज्ञानस्य प्रतिपन्नत्वात् संयतः कथं प्रतिपद्यमानकोऽवाप्यते?। सत्यम्, किन्तु योऽतिविशुद्धिवशात् सम्यक्त्वं, चारित्रं च युगपत् प्रतिपद्यते, स तस्यामवस्थायां प्रतिपद्यमानस्य संयमस्य प्रतिपन्नत्वात् संयतो मतेः प्रतिपद्यमानको भवति; उक्तं चाऽऽवश्यकचूर्णौ— "नत्थि चरित्तं सम्मत्तविहूणं दंसणं तु भयणिज्जं"। भजनामेवाह— "सँम्मत्त-चरित्ताइं जुगवं, पुव्वं च सम्मत्तं"।

उपयोगद्वारे– उपयोगो द्विधा– पञ्च ज्ञानानि, त्रीणि चाऽज्ञानानि साकारोपयोगः; चत्वारि दर्शनानि अनाकारोपयोगः। तत्र साकारोपयोगे पूर्वप्रतिपन्ना नियमात् सन्ति, प्रतिपद्यमानकास्तु भजनीयाः। अनाकारोपयोगे तु प्रतिपन्ना एव, न तु प्रतिपद्यमानकाः,

---

१ क.ग. 'न पूर्वप्र'। २ क.ग. 'न म'। ३ घ.छ. 'वः म' क. 'व एव म'। ४ सर्वा अपि लब्धयः साकारोपयुक्तस्योपपद्यन्ते। ×अन्यथा-।
५ क.ग. 'यद्यभि'। ६ नास्ति चारित्रं सम्यक्त्वविहीनं, दर्शनं तु भजनीयम्। ७ सम्यक्त्व-चारित्रे युगपत्, पूर्वं च सम्यक्त्वम्। ×क्वचित्-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनाकारोपयोगे लब्ध्युत्पत्तेः प्रतिषिद्धत्वादिति । आहारकद्वारे– आहारकाः साकारोपयोगवत्। अनाहारकास्त्वपान्तरालगतौ प्रतिपन्नाः संभवन्ति, प्रतिपद्यमानकास्तु न भवन्त्येव ॥ ४२६ ॥

भाषकद्वारे भाष्यकार एवाह–

[1]भासासलद्धिओ लभइ भासमाणो अभासमाणो वा । पुव्वपडिवन्नओ वा उभयं पि अलद्धिए नत्थि ॥४२७॥

भाषालब्ध्या सह वर्तत इति भाषासलब्धिकः– भाषालब्धिमांश्चेद् भवतीत्यर्थः, तदा भाषमाणोऽभाषमाणो वा लभते प्रतिपद्यते लब्धिं मतिज्ञानम्, पूर्वप्रतिपन्नो वा भवति–भाषालब्धियुक्तो मनुष्यादिर्जात्यपेक्षया पूर्वप्रतिपन्नो नियमाल्लभ्यते, प्रतिपद्यमानकोऽपि भजनयेति तात्पर्यम्। अलब्धिके भाषालब्धिशून्ये पुनरुभयमपि नास्ति, स ह्येकेन्द्रिय एव, तस्य च प्रागुक्तयुक्त्युभयाभाव एवेत्यर्थः ॥ इति गाथार्थः ॥

परीत्तद्वारे– परीत्ताः प्रत्येकशरीरिणः, परीत्तीकृतसंसारा वा स्तोकावशेषभवा इत्यर्थः । एत उभयेऽपि पूर्वप्रतिपन्ना नियमाल्लभ्यन्ते, प्रतिपद्यमानकास्तु भजनीयाः । अपरीत्तास्तु साधारणशरीरिणः, अपार्धपुद्गलपरावर्तादप्युपरिवर्तिसंसारा वा; मिथ्यादृष्टित्वादुभयेऽप्युभयविकलाः । पर्याप्तद्वारे– षट्पर्याप्तिभिः पर्याप्ताः परीत्तवद् वाच्याः । तदपर्याप्तास्तु प्रतिपन्ना एव, न त्वितरे । सूक्ष्मद्वारे–सूक्ष्मा उभयविकलाः । बादरास्तु पर्याप्तकवद् वाच्याः । संज्ञिद्वारे– दीर्घकालिकोपदेशेन संज्ञिनो गृह्यन्ते, ते च बादरवद् भावनीयाः । असंज्ञिनस्त्वपर्याप्तवदिति । भवद्वारे– भवसिद्धिकाः संज्ञिवत् । अभवसिद्धिकास्तूभयशून्याः । चरमद्वारे– चरमो भवो भविष्यति येषां तेऽभेदोपचाराच्चरमा भव्यवत् । अचरमास्त्वभव्यवदिति । तदेवं कृता गत्यादिद्वारेषु भाष्ये वृत्तौ च सत्पदप्ररूपणता ॥ ४२७ ॥

अथ द्रव्यप्रमाणमाह–

[2]किमिहाभिणिबोहियनाणिजीवदव्वपमाणमिगसमए । पडिवज्जेज्जं तु नवा पडिवज्जे जहन्नउ एगो ॥४२८॥

खेत्तपलिओवमासंखभाग उक्कोसओ पवज्जेज्जा । पुव्वपवन्ना दोसु वि पलियासंखेज्जईभागो ॥ ४२९ ॥

किमिहाऽस्मिँल्लोके आभिनिबोधिकज्ञानपरिणामापन्नजीवद्रव्याणां प्रमाणमेकस्मिन् विवक्षितसमये ? । एवं शिष्येण पृष्टे स-

---

१ भाषासलब्धिको लभते भाषमाणोऽभाषमाणो वा । पूर्वप्रतिपन्नको वोभयमप्यलब्धिके नास्ति ॥ ४२७ ॥ २ ब. छ. 'भासल' ।

३ क. ग. 'सकट्ठा' । ४ किमिहाऽऽभिनिबोधिकज्ञानिजीवद्रव्यप्रमाणमेकसमये ? । प्रतिपद्येरंस्तु नवा प्रतिपद्यते जघन्यत एकः ॥ ४२८ ॥

× लभते–। क्षेत्रपल्योपमासंख्यभाग उत्कृष्टतः प्रपद्येत । पूर्वप्रतिपन्ना द्वयोरपि पक्षयोरसंख्येयभागः ॥ ४२९ ॥

त्याह– प्रतिपद्येरन्, नवेति । इदमुक्तं भवति– यदि प्रतिपद्यमानकानां प्रमाणं पृच्छसि, तदा प्रतिपद्यमानकास्तस्य विवक्षितसमये प्राप्यन्ते नवा । तत्र प्रतिपद्यमानप्राप्तिपक्षे जघन्यत एकः प्रतिपद्येत, उत्कृष्टतस्तु सर्वलोके क्षेत्रपल्योपमासंख्येयभागः प्रतिपद्येत । अथ पूर्वप्रतिपन्नानां तेषां प्रमाणमिच्छसि ज्ञातुं, तर्हि पूर्वप्रतिपन्ना द्वयोरपि पक्षयोर्जघन्यो-त्कृष्टलक्षणयोः क्षेत्रपल्योपमासंख्येयभागप्रदेशराशिप्रमाणाः प्राप्यन्ते, केवलं जघन्यपदादुत्कृष्टं विशेषाधिकम् ॥ इति गाथाद्वयार्थः ॥ ४२८ ॥ ४२९ ॥

अथ क्षेत्रद्वारमधिकृत्याह—

[3]खेत्तं हवेज्ज चोदसभागा सत्तोवरिं, अहे पंच । इलिआगईए विग्गहगयस्स गमणेऽहवाऽऽगमणे ॥ ४३० ॥

नानाजीवानपेक्ष्य सर्वेऽप्याभिनिबोधिकज्ञानिनः पिण्डिता लोकासंख्येयभागमेव व्याप्नुवन्ति । एकजीवस्य तु क्षेत्रं भवेत् कियत् ?, इत्याह– सप्त चतुर्दशभागाः– चतुर्दशभागीकृतस्य लोकस्य सप्त भागाः सप्त रज्जव इत्यर्थः, उपरि ऊर्ध्वमिलिकागत्या विग्रहगतस्य निरन्तराऽपान्तरालस्पर्शिनोऽनुत्तरविमानेषु गमने, तत आगमने वा । अधस्त्वनयैव गत्या षष्ठनरकपृथ्वीगमने, आगमने वा पञ्च चतुर्दशभागाः पञ्च रज्जवः प्राप्यन्ते । इदमुक्तं भवति– यदाऽऽभिनिबोधिकज्ञानी मृत्वेलिकागत्याऽनुत्तरसुरेषूत्पद्यते, तेभ्यो वाऽत्र मनुष्यो जायते, तदाऽस्य जीवप्रदेशो दण्डसप्तरज्जुप्रमाणे क्षेत्रे भवति, अधस्त्वनयैव गत्या षष्ठनरकपृथिव्यां गच्छतः, तत आगच्छतो वा पञ्चरज्जुप्रमाणक्षेत्रेऽसौ लभ्यत इति । विराधितसम्यक्त्वो हि षष्ठपृथ्वीं यावद् गृहीतेनाऽपि सम्यक्त्वेन सैद्धान्तिकमतेन कश्चिदुत्पद्यते, कार्मग्रन्थिकमतेन तु वैमानिकदेवेभ्योऽन्यत्र तिर्यङ्, मनुष्यो वान्तेनैव क्षायोपशमिकसम्यक्त्वेनोत्पद्यते, न गृहीतेन; सप्तमपृथिव्यां पुनरुभयमतेनाऽपि वान्तेनैव तेनोपजायते ॥ ४३० ॥

आह– भवत्वेवम्, किन्तु यः सप्तमपृथिव्या गृहीतसम्यक्त्वोऽत्राऽऽगच्छति, तस्याऽधः षट् चतुर्दशभागाः किमिति न लभ्यन्ते ?, इत्याह–

[4]आगमणं पि निसिद्धं चरिमाउ एइ जं तिरिक्खेसु । सुर-नारगा य सम्मदिट्ठी जं यंति मणुएसु ॥४३१ ॥

चरमायाः सप्तमपृथिव्या न केवलं गमनं, अपि त्वागमनमपि गृहीतसम्यक्त्वस्याऽऽगमे निषिद्धं, यतस्तस्या उद्वृत्य सर्वोऽप्ये-

---

१ क्षेत्रं भवेच्चतुर्दशभागाः सप्तोपरि, अधः पञ्च । इलिकागत्या विग्रहगतस्य गमनेऽथवाऽऽगमने ॥ ४३० ॥ २ ब.छ. 'वे ओ' ।

३ ब.छ.'प्राप्नु'। ४ आगमनमपि निषिद्धं चरमादेति यद् तिर्यक्षु । सुर-नारकाश्च सम्यग्दृष्टयो यद् यान्ति मनुजेषु ॥ ४३१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

त्यागच्छति तिर्यक्ष्वेव न मनुष्येषु "[1]सत्तममहिनेरइया तेऊ-वाऊ-अणंततरुव्वट्टा, नै य पावे माणुस्सं" इतिवचनादिति । सुर-नारकाश्च सम्यक्त्वसहिता यस्मात् मनुष्येष्वेवाऽऽयान्ति, अतः सामर्थ्यात् तिर्यग्गतिगामिनः सप्तमपृथ्वीनारका मिथ्यात्वसहिता एवाऽऽगच्छन्ति ॥ इति गाथाद्वयार्थः ॥ ४३१ ॥

अथ स्पर्शनाद्वारम्– तत्र क्षेत्र-स्पर्शनयोर्विशेषदिधीर्षया प्राह–

[3]अवगाहणाइरित्तं पि फुसइ बाहिं जहा ऽणुणो ऽभिहियं । एगपएसं खेत्तं सत्तपएसा य से फुसणा ॥४३२॥

इह यत्रावगाढस्तत् क्षेत्रमुच्यते, यत्त्ववगाहनातो बहिरप्यतिरिक्तं क्षेत्रं स्पृशति सा स्पर्शनाऽभिधीयते, इति क्षेत्र-स्पर्शनयोर्विशेषः, यथा परमाणोः, आगमे यत्रैकस्मिन् प्रदेशेऽवगाढः, तदेकप्रदेशं क्षेत्रमभिहितम् , सप्तप्रदेशा तु 'से' तस्य स्पर्शना प्रोक्ता, यत्रैकस्मिन् प्रदेशेऽवगाढस्तं, अन्यांश्च षड्दिक्संबन्धिनः षड् नभःप्रदेशान् परमाणुः स्पृशतीति कृत्वेति ॥ ४३२ ॥

प्रकारान्तरेणाऽपि क्षेत्र-स्पर्शनयोर्भेदमाह–

[4]अहवा जत्थोगाढो तं खेत्तं, विग्गहे मया फुसणा । खेत्तं च देहमेत्तं संचरओ होइ से फुसणा ॥४३३॥

पाठसिद्धैव ॥ ४३३ ॥

अथ नानाजीवानधिकृत्य क्षेत्र-स्पर्शने प्राह–

[5]होंति असंखेज्जगुणा नाणाजीवाण खेत्तफुसणाओ ।

एकस्याऽऽभिनिबोधिकज्ञानिजीवस्य ये क्षेत्र-स्पर्शने, ताभ्यां सकाशाद् नानाभिनिबोधिकजीवानां याः क्षेत्रस्य स्पर्शनास्ता असंख्येयगुणाः, नानाभिनिबोधिकजीवानां सर्वेषामसंख्येयत्वादिति भावः ॥

कालद्वारमधिकृत्याह–

---

१ सप्तममहीनैरयिका तेजो-वायु-अनन्ततरुवर्तिनः, न च प्राप्नुयुर्मानुष्यम् । २ घ. छ. 'न वि पा' ।

३ अवगाहनातिरिक्तमपि स्पृशति बहिर्यथाऽणोरभिहितम् । एकप्रदेशं क्षेत्रं सप्तप्रदेशा च तस्य स्पर्शना ॥ ४३२ ॥

४ अथवा यत्रावगाढस्तत् क्षेत्रं, विग्रहे मता स्पर्शना । क्षेत्रं च देहमात्रं संचरतो भवति तस्य स्पर्शना ॥ ४३३ ॥

५ भवन्त्यसंख्येयगुणा नानाजीवानां क्षेत्रस्पर्शनाः ।

[1]एगस्स अणेगाण व उवओगंतोमुहुत्ताओ [2]॥ ४३४ ॥

द्विधा मतिज्ञानस्य कालश्चिन्तनीयः– उपयोगतः, लब्धितश्च । तत्रैकजीवस्य तदुपयोगो जघन्यत उत्कृष्टतश्चान्तर्मुहूर्तमेव भवति, परत उपयोगान्तरगमनादिति । सर्वलोकवर्तिनामनेकाभिनिबोधिकजीवानामपीदमेवोपयोगकालमानं, केवलमिदमन्तर्मुहूर्तमपि बृहत्तरमवसेयम् ॥ ४३४ ॥

लब्धिमङ्गीकृत्य कालमानमाह—

[3]लद्धी वि जहन्नेणं एगस्सेवं परा इमा होइ । अह सागरोवमाइं छावट्ठिं सातिरेगाइं ॥ ४३५ ॥

आभिनिबोधिकज्ञानलब्धिरपि तदावरणक्षयोपशमरूपाऽवाप्तसम्यक्त्वस्यैकजीवस्य जघन्यत एवमिति–एवमेवाऽन्तर्मुहूर्तमेवेत्यर्थः, परतो मिथ्यात्वगमनात् , केवलावाप्तेर्वा । परा तूत्कृष्टा तल्लब्धिरेकजीवस्येयमनन्तरवक्ष्यमाणा भवति । अथ सैवोच्यते– सातिरेकाणि षट्षष्टिसागरोपमाणि ॥ ४३५ ॥

कथं पुनरेतानि भवन्ति ?, नानाजीवानां च कियाँल्लब्धिकालः ?, इत्याह–

[4]दो वारे विजयाईसु गयस्स तिन्नच्चुए अहव ताइं । अइरेगं नरभवियं, नाणाजीवाण सव्वद्धं ॥ ४३६ ॥

इह कश्चित् साधुर्मत्यादिज्ञानान्वितो देशोनां पूर्वकोटीं यावत् प्रव्रज्यां परिपाल्य विजय-वैजयन्त-जयन्ता-ऽपराजितविमानानामन्यतरविमाने उत्कृष्टं त्रयस्त्रिंशत्सागरोपमलक्षणदेवायुरनुभूय पुनरप्रतिपतितमत्यादिज्ञान एव मनुजेषूत्पन्नो देशोनां पूर्वकोटीं प्रव्रज्यां विधाय तदैव विजयादिषूत्कृष्टमायुः संप्राप्य पुनरप्रतिपतितमत्यादिज्ञान एव मनुष्यो भूत्वा पूर्वकोटीं जीवित्वा सिद्ध्यतीति । एवं विजयादिषु वारद्वयं गतस्यः अथवाऽच्युतदेवलोके द्वाविंशतिसागरोपमास्थितिकेषु देवेषु त्रीन् वारान् गतस्य तानि षट्षष्टिसागरोपमाणि अधिकानि भवन्ति । अधिकं चेह नरभवसंबन्धि देशोनं पूर्वकोटित्रयं चतुष्टयं वा द्रष्टव्यम् । नानाजीवानां तु सर्वाद्धं सर्वकालं मतिज्ञानस्य स्थितिः ॥ इति गाथापञ्चकार्थः ॥४३६ ॥

---

१ एकस्यानेकानां वोपयोगोऽन्तर्मुहूर्तम् ॥ ४३४ ॥ २ क. ग. 'हुत्तमित्तो उ' ।

३ लब्धिरपि जघन्येनैकस्यैवं परेयं भवति । अथ सागरोपमाणि षट्षष्टिः सातिरेकाणि ॥ ४३५ ॥

४ द्वौ वारौ विजयादिषु गतस्य त्रीनच्युतेऽथवा तानि । अतिरिक्तं नरभाविकं, नानाजीवानां सर्वाद्धम् ॥ ४३६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथाऽन्तरद्वारमाश्रित्याह–

[1]एगस्स जहन्नेणं अंतरमन्तोमुहुत्तमुक्कोसं । पोग्गलपरिअट्टं देसूणं दोसबहुलस्स ॥ ४३७ ॥

इह कश्चिज्जीवः सम्यक्त्वसहितं मतिज्ञानमवाप्य प्रतिपत्य चान्तर्मुहूर्तं मिथ्यात्वे स्थित्वा यदि पुनरपि सम्यक्त्वसहितं तदेव प्राप्नोति, तदेतद् मतिज्ञानस्य जघन्यमन्तर्मुहूर्तमन्तरं प्राप्तिविरहकालरूपं भवति। आशातनादिदोषबहुलस्य तु जीवस्य सम्यक्त्वात् प्रतिपतितस्य देशोनपुद्गलपरावर्तार्धरूपमुत्कृष्टमन्तरं भवति, एतावता कालेन पुनरपि सम्यक्त्वा-ऽऽभिनिबोधिकलाभात्। इत्येकजीवस्योक्तमन्तरम् ॥ ४३७ ॥

अथ नानाजीवानां तदभिधित्सुः, भागद्वारं च बिभणिषुराह–

[2]जंमसुत्तं तेहिं तओ नाणाजीवाणमन्तरं नत्थि । मइनाणी सेसाणं जीवाणमणन्तभागम्मि ॥ ४३८ ॥

यद् यस्मात् तैराभिनिबोधिकज्ञानिभिरशून्यं सर्वदैव नारकादिगतिचतुष्टयान्वितं त्रिभुवनमिदम्, ततस्तस्माद् नानाजीवानाश्रित्य नास्ति मतिज्ञानस्याऽन्तरकालः। तथा, मतिज्ञानिनः शेषज्ञानवतां जीवानामनन्ततमे भागे वर्तन्ते, शेषज्ञानिनो हि केवलिसहितत्वादनन्ताः, आभिनिबोधिकज्ञानिनस्तु सर्वलोकेऽप्यसंख्याता एवेति भावः ॥ इति गाथाद्वयार्थः ॥ ४३८ ॥

अथ भावद्वारम्, अल्प-बहुत्वद्वारं चाभिधित्सुराह–

[3]भावे खओवसमिए मइनाणं नत्थि सेसभावेसु । थोवा मइनाणविऊ सेसा जीवा अणंतगुणा ॥ ४३९ ॥

मतिज्ञानावरणे हि कर्मण्युदीर्णे क्षीणे, अनुदीर्णे तूपशान्ते मतिज्ञानमुपजायते, अतः क्षायोपशमिक एव भावे तद् वर्तते, न तु शेषेष्वौदयिक-क्षायिकादिभावेष्विति । मतिज्ञानेन विदन्तीति मतिज्ञानविदः स्तोकाः, शेषज्ञानयुक्तास्तु सिद्ध-केवल्यादयो जीवा अनन्तगुणा इति ॥ ४३९ ॥

एवमपि तावदल्प-बहुत्वं भवति, केवलमिहैवमुच्यमाने भागा-ऽल्पबहुत्वद्वारयोरर्थतः परमार्थतो न कश्चिद् विशेषो भेदो दर्शितो भवति । तेन तस्यैवाभिनिबोधिकस्य पूर्वप्रतिपन्न-प्रतिपद्यमानकानाश्रित्याऽल्प-बहुत्वं वक्तुमुचितम्, पौनरुक्त्याभावादिति । एतदेवाह–

---

१ एकस्य जघन्येनाऽन्तरमन्तर्मुहूर्तमुत्कृष्टम् । पुद्गलपरावर्तार्धं देशोनं दोषबहुलस्य ॥ ४३७ ॥ २ ध.छ. 'रियट्टंते दे' ।
३ च.छ. यदा पु' । ४ यदशून्यं तैस्ततो नानाजीवानामन्तरं नास्ति । मतिज्ञानिनः शेषाणां जीवानामनन्तभागे ॥ ४३८ ॥
५ भावे क्षायोपशमिके मतिज्ञानं नास्ति शेषभावेषु । स्तोका मतिज्ञानविदः शेषा जीवा अनन्तगुणाः ॥ ४३९ ॥

[1]नेहत्थओ विसेसो भाग-प्पबहूण तेण तस्सेव । पडिवज्जमाण-पडिवन्नगाणमप्पा-बहुं जुत्तं ॥ ४४० ॥

गतार्थैव ॥ ४४० ॥

अथ यदेव युक्तं तदेवाह–

[2]थोवा पवज्जमाणा असंखगुणिया पवन्नयजहण्णा । उक्कोसए य पवन्ना होंति विसेसाहिया तत्तो ॥४४१॥

आभिनिबोधिकस्य "[3]जहन्नेणं एक्को वा, दो वा, तिन्नि वा; उक्कोसेणं असंखेज्जा" इत्येवं प्रतिपद्यमानकाः प्रोच्यन्ते ते सर्वस्तोकाः। तेभ्यो जघन्यपदवर्तिनः पूर्वप्रतिपन्नास्तेऽसंख्यातगुणाः, चिरकालसंकलितत्वाद्, प्रतिपद्यमानकानां तु विवक्षितैकसमयमात्रभावादिति। उत्कृष्टपदवर्तिनस्तु पूर्वप्रतिपन्नास्तेभ्योऽपि विशेषाधिका इति ॥ ४४१ ॥

प्रकारान्तरमप्यल्प-बहुत्वे दर्शयति—

[4]अहवा मइनाणीणं सेसयनाणीहिं नाणरहिएहिं । कज्जं सहोभएहि य अहवा गच्चाइभेएण ॥ ४४२ ॥

अथवा मतिज्ञानिनां शेषज्ञानिभिः सहाल्प-बहुत्वं प्रथमं वाच्यम्, यथा– '[5]मइनाणी सेसाणं जीवाणमणंतभागम्मि' इति। ततो द्वितीयस्थाने 'नाणरहिएहिं' इति, ज्ञानानि– व्याख्यानादिह मतिज्ञानादन्यानि गृह्यन्ते, तै रहिता वियुक्ताः पूर्वप्रतिपन्न-प्रतिपद्यमानकमतिज्ञानिन एव केवला इत्यर्थः, तैः सहितं मतिज्ञानिनामल्प-बहुत्वं स्वस्थान एव वक्तव्यम्, यथा 'थोवा पवज्जमाणा असंखगुणिया पवन्नयजहण्णा' इत्यादि। ततस्तृतीयस्थाने उभयैः शेषज्ञानिभिश्च समुदितैः सहाऽल्प-बहुत्वं तेषां कर्तव्यं, तद्यथा– 'सव्वथोवा मणपज्जवनाणी, ओहिनाणी असंखेज्जगुणा, मइनाणी सुयनाणी य दोवि सट्ठाणे तुल्ला मज्झिल्लेहिंतो विसेसाहिया, केवलनाणी अणंतगुणा'। एवं पूर्वप्रतिपन्न-प्रतिपद्यमानकविभागेनाऽप्यल्प-बहुत्वमिह स्वधियाऽभ्यूह्यमिति। अथवा गत्यादिभेदेन तत् कार्यम्, यथा–सर्वस्तोका मतिज्ञानिनो मनुष्याः, नारका असंख्यातगुणाः, ततस्तिर्यञ्चः, ततो देवा इति। एवं संभवतः सर्वत्र वाच्यमिति ॥ ४४२ ॥

---

१ नेहार्थतो विशेषो भागाल्प-बहोस्तेन तस्यैव । प्रतिपद्यमानक-प्रतिपन्नकानामल्पबहु (त्वं) युक्तम् ॥ ४४० ॥
२ स्तोकाः प्रपद्यमाना असंख्यगुणिताः प्रपन्नकजघन्याः । उत्कृष्टतश्च प्रपन्ना भवन्ति विशेषाधिकास्ततः ॥ ४४१ ॥
३ जघन्येनैको वा, द्वौ वा, त्रयो वा; उत्कृष्टतोऽसंख्येयाः ।
४ अथवा मतिज्ञानिनां शेषज्ञानिभिर्ज्ञानरहितैः । कार्यं सहोभयैश्चाथवा गत्यादिभेदेन ॥ ४४२ ॥ ५ ध.छ. 'वक्तव्यम्' ।
६ गाथा ४३८ । ७ गाथा ४४१ । ८ सर्वस्तोका मनःपर्यवज्ञानिनः, अवधिज्ञानिनोऽसंख्येयगुणाः, मतिज्ञानिनः श्रुतज्ञानिनश्च द्वावपि स्वस्थाने तुल्या मध्यमाभ्यो विशेषाधिकाः, केवलज्ञानिनोऽनन्तगुणाः । ९ ध.छ. 'विकल्पेना' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अथोपसंहरन्नाह—

लक्खण-विहाण-विसया-णुओगदारेहिं वण्णिया बुद्धी । तयणंतरमुद्दिट्ठं सुयनाणमओ परूवेस्सं ॥ ४४३ ॥

लक्षणमाभिनिबोधिकशब्दव्युत्पत्तिः, विधानं भेदोऽवग्रहादिः, विषयो द्रव्यक्षेत्रादिः, अनुयोगद्वाराणि सत्पदप्ररूपणतादीनि, तैः सर्वैरपि यथोक्तक्रमेणाभिनिबोधिकज्ञानलक्षणा वर्णिता व्याख्याता बुद्धिः । ततस्तदनन्तरोद्दिष्टं श्रुतज्ञानं प्ररूपयिष्ये ॥ इति गाथापञ्चकार्थः ॥ ४४३ ॥

॥ तदेवमाभिनिबोधिकज्ञानं समाप्तमिति ॥

अथ श्रुतज्ञानमारभ्यते । अत्र चान्तरे 'आभिणिबोहियनाणे अट्ठावीसं'[2] इत्यादिगाथा निर्युक्तौ दृश्यते, तां च सुगमां, उक्तार्थां वा मन्यमानोऽतिक्रम्य विहितसंबन्धामेवाऽग्रेतनगाथामाह—

पत्तेयमक्खराइं अक्खरसंजोग जत्तिया लोए । एवइया सुयनाणे पयडीओ होंति नायव्वा ॥ ४४४ ॥

एकमेकं प्रति प्रत्येकमक्षराण्यकारादीन्यनेकभेदानि, यथा— अकारः सानुनासिकः, निरनुनासिकश्च; पुनरेकैकस्त्रिधा— ह्रस्वः, दीर्घः, प्लुतश्चेतिः पुनरेकैकस्त्रिविधः— उदात्तः, अनुदात्तः, स्वरितश्चेति । एवमकारोऽष्टादशभेदः । एवमिकारादिष्वपि यथासंभवं भेदजालमभिधानीयमिति । तथा, अक्षराणां संयोगा अक्षरसंयोगा द्व्यादयो यावन्तो लोके, यथा— घटः, पट इत्यादि, व्याघ्रः, स्त्रीत्यादि । एवमेतेऽनन्ताः संयोगाः, तत्राप्येकैकः स्वपर्यायापेक्षयाऽनन्तपर्यायः । अत एतावत्यः श्रुतज्ञाने प्रकृतयो भेदा ज्ञातव्याः ॥ इति निर्युक्तिगाथार्थः ॥ ४४४ ॥

अथ भाष्यम्—

संजुत्ता-संजुत्ताण ताणमेकक्खराइसंजोगा । होंति अणंता तत्थ वि एक्केक्कोऽणंतपज्जाओ ॥ ४४५ ॥

एकमक्षरमादिर्येषां द्व्यादीनां तान्येकाक्षरादीनि तेषां संयोगा एकाक्षरादिसंयोगास्तेऽनन्ता भवन्ति । केषां ये एकाक्षरादिसं-

---

१ लक्षण-विधान-विषया-ऽनुयोगद्वारैर्वर्णिता बुद्धिः । तदनन्तरमुद्दिष्टं श्रुतज्ञानमतः प्ररूपयिष्ये ॥ ४४३ ॥ २ आभिनिबोधिकज्ञानेऽष्टाविंशतिः ।
३ निर्युक्तौ गाथा १६ । ४ प्रत्येकमक्षराणि अक्षरसंयोगा यावन्तो लोके । एतावत्यः श्रुतज्ञाने प्रकृतयो भवन्ति ज्ञातव्याः ॥ ४४४ ॥
५ संयुक्ता-ऽसंयुक्तानां तेषामेकाक्षरादिसंयोगाः । भवन्त्यनन्तास्तत्राप्येकैकोऽनन्तपर्यायः ॥ ४४५ ॥

३२

योगाः ?, इत्याह— तेषामकार-ककाराद्यक्षराणाम् । कथंभूतानाम् ?, इत्याह— संयुक्ता-ऽसंयुक्तानाम् । तत्र संयुक्तैकाक्षरसंयोगो यथा- ऽस्थिप्राप्त इत्यादि । असंयुक्तैकाक्षरसंयोगो यथा— घटः, पट इत्यादि । एते चाक्षरसंयोगा अनन्ताः । एकैकश्च संयोगः स्व-परपर्यायैः पूर्वाभिहितन्यायेनाऽनन्तपर्याय इति ॥ ४४५ ॥

अत्र परमतमाशङ्क्योत्तरमाह—

संखिज्जक्खरजोगा होंति अणंता कहं, जमभिधेयं । पंचत्थिकायगोयरमन्नोन्नविलक्खणमणंतं ॥ ४४६ ॥

संख्येयानि च तान्यकाराद्यक्षराणि च संख्येयाक्षराणि तेषां योगाः संयोगाः कथमनन्ता भवन्ति ?— न घटन्त एवेति भावः । अत्रोत्तरमाह— यद् यस्मात् संख्येयानामप्यक्षराणामभिधेयमनन्तम् । कथंभूतम् ?, इत्याह— अन्योन्यविलक्षणं परस्परविसदृशम् । किं- विषयम् ?, इत्याह— पञ्चास्तिकायगोचरं पञ्चास्तिकायगतस्कन्ध-देश-प्रदेश-परमाणु-द्व्यणुकादिकम् । अभिधेयानन्त्याच्चाभिधानस्याऽप्या- नन्त्यमवसेयमिति ॥ ४४६ ॥

एतदेव भावयति—

अणुओ पएसवुड्ढीए भिन्नरूवाइं धुवमणंताइं । जं कमसो दव्वाइं(इह)हवंति भिन्नाभिहाणाइं ॥ ४४७ ॥

इह यस्मादणुतः परमाणुतः प्रारभ्य क्रमशः प्रदेशवृद्ध्या गुरुलास्तिकायेऽपि ध्रुवं सर्वदैवाऽनन्तानि भिन्नरूपाणि द्रव्याणि प्राप्यन्ते, भिन्नाभिधानानि चैतानि, यथा— परमाणुः,द्व्यणुकः, त्र्यणुकः, चतुरणुको यावदनन्तप्रदेशिक इति । प्रत्येकं चानेकाभिधाना- न्येतानि, तद्यथा— अणुः, परमाणुः, निरंशः, निर्भेदः, निरवयवः, निष्प्रदेशः, अप्रदेश इत्यादिः तथा, द्व्यणुकः, द्विप्रदेशिकः, द्विभेदः, द्व्यवयव इत्यादि सर्वद्रव्य-सर्वपर्यायेष्वायोजनीयम् ॥ ४४७ ॥

यस्माच्चैवमभिधेयमनन्तं विसदृशरूपं भिन्नाभिधानं च; तस्मात् किम् ?, इत्याह—

तेणाभिहाणमाणं अभिधेयाणंतपज्जवसमाणं । जं च सुयम्मि वि भणियं अणंतगम-पज्जयं सुत्तं ॥ ४४८ ॥

---

१ संख्येयाक्षरयोगा भवन्त्यनन्ताः कथं, यदभिधेयम् । पञ्चास्तिकायगोचरमन्योन्यविलक्षणमनन्तम् ॥ ४४६ ॥ २ क.ख.ग. णि ते' । ३ च.छ. 'गाः क' ।
४ अणुतः प्रदेशवृद्ध्या भिन्नरूपाणि ध्रुवमनन्तानि । यत् क्रमशो द्रव्याणीह भवन्ति भिन्नाभिधानानि ॥ ४४७ ॥ ५ क. 'तः प्रा' ।
६ तेनाभिधानमानमभिधेयानन्तपर्यवसमानम् । यच्च श्रुतेऽपि भणितमनन्तगम-पर्ययं सूत्रम् ॥ ४४८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यतोऽभिधेयमनन्तं, भिन्नरूपं, भिन्नाभिधानं; तेन कारणेनाऽक्षरसंयोगरूपाणामभिधानानां यत् संख्यारूपं मानं परिमाणं तदपि भवति । कियत् ?, इत्याह— अभिधेयगताऽनन्तपर्यायराशितुल्यं यत्परिमाणमभिधेयं तत्परिमाणमभिधानमपि भवतीत्यर्थः, अभिधेयभेदेनाऽभिधानस्याऽपि भेदात् । न हि येनैव रूपेण घटादिशब्देऽकारादिवर्णाः संयुक्तास्तेनैव रूपेण पटादिशब्देऽपि, अभिधेयैकत्वप्रसङ्गात्, एकरूपशब्दाभिधेयत्वात्, घट-तत्स्वरूपवदिति । अतोऽभिधेयानन्त्यादभिधानानन्त्यमिति । यद् यतः सूत्रेऽप्यभिहितम्— "[1]अणंता गमा अणंतपज्जवा" इति । अतः स्थितमेतत्– "[2]संजुत्ता-संजुत्ताणं' इत्यादि ॥ इति गाथाचतुष्टयार्थः ॥ ४४८ ॥

यत एवमनन्ताः श्रुतज्ञानप्रकृतयो भवन्ति, अतः—

कत्तो मे वण्णेउं सत्ती सुयनाणसव्वपयडीओ ? । चोद्दसविहनिक्खेवं सुयनाणे आवि वोच्छामि ॥४४९॥

कुतो मे शक्तिः सामर्थ्यम् ?, नास्त्येवेत्यर्थः । किं कर्तुं ?, वर्णयितुम् । काः ?, श्रुतज्ञानसर्वप्रकृतीः सर्वोत्तरभेदान् । ततश्चतुर्दशविधश्चासौ निक्षेपश्च चतुर्दशविधनिक्षेपो न्यासस्तं वक्ष्यामि भणिष्यामि, श्रुतज्ञाने श्रुतविषयं, चशब्दात् श्रुताज्ञानविषयं च, आपिशब्दादुभयविषयं च । तत्र श्रुतज्ञाने सम्यक्श्रुते, श्रुताज्ञाने असंज्ञि-मिथ्याश्रुते, उभयश्रुते दर्शनपरिग्रहविशेषादक्षरा-ऽनक्षरादिश्रुते ॥ इति निर्युक्तिगाथार्थः ॥ ४४९ ॥

अथैतद्भाष्यम्–

[3]पयडि त्ति जो तदंसो हेऊ वा तस्स, तस्स भावो वा । ते याणंता सव्वे तओ न तीरंति वोत्तुं जे ॥४५०॥

इह प्रकृतिरिति किमुच्यते ?, इत्याह– यस्तदंशः श्रुतज्ञानांशस्तद्भेदोऽङ्गप्रविष्टादिरित्यर्थः । हेतुर्वा बाह्याऽऽभ्यन्तरभेदभिन्नो यः श्रुतज्ञानस्य स प्रकृतिः । तत्र बाह्यो हेतुः श्रुतज्ञानस्य पत्रँलिखिताक्षरादिः, आन्तरस्तु तद्धेतुः क्षयोपशमवैचित्र्यं, तस्य श्रुतस्य स्वभावो वैकेन्द्रियादीनां चतुर्दशपूर्वधरान्तानां जीवानां तारतम्येन भिन्नरूपः प्रकृतिः प्रोच्यते । एते चांशाः, हेतवः, स्वभावाश्चाऽनन्ताः सर्वेऽपि; अत आयुषः परिमितत्वाद् वाचश्च क्रमवर्तित्वाद् न शक्यन्ते वक्तुम् । 'जे' इति निपातोऽलङ्कारार्थ इति ॥ ४५० ॥

---

१ घ.छ. 'यतश्च सू' क.ख. 'यत् ततः' । २ अनन्ता गमा अनन्तपर्यवाः । ३ गाथा ४४५ ।

४ कुतो मे वर्णयितुं शक्तिः श्रुतज्ञानसर्वप्रकृतीः ?। चतुर्दशविधनिक्षेपं श्रुतज्ञाने चापि वक्ष्यामि ॥४४९॥ ५ क. 'अत्रैत' ।

(स्वभावो) ६ प्रकृतिरिति यस्तदंशो हेतुर्वा तस्य, तस्य भावो वा । ते चानन्ताः सर्वे ततो न शक्यन्ते वक्तुम् ॥ ४५० ॥ ७ ख. 'अलक्षिता' ।

एतदेव भावयति—

जावंतो वयणपहा सुयाणुसारेण केइ लब्भंति । ते सव्वे सुयनाणं ते याणंता महविसेसा ॥ ४५१ ॥

इह यावन्तः केचन श्रुतानुसारेण संकेताः श्रुतग्रन्थानुसारेण लभ्यन्ते प्राप्यन्ते वचनस्य पन्थानो मार्गा मतिज्ञानविशेषा इति तात्पर्यम्, ते सर्वेऽपि श्रुतज्ञानमिति । एवं 'ते[1] वि य मईविसेसे सुयनाणब्भंतरे जाण' इत्यादिमति-श्रुतभेदविचारे पूर्वं प्रतिपादिताः, ते च श्रुतानुसारिणो मतिविशेषा अनन्ता इति । ननु यदि मतिविशेषाः कथं श्रुतज्ञानम् ?, इति तु न मेर्यम्, श्रुतानुसारिणो विशिष्टस्य मतिविशेषस्यैव श्रुतत्वात् । एतच्च पूर्वं विस्तरेण समर्थितमेवेति ॥ ४५१ ॥

यदि नामाऽनन्ताः श्रुतभेदास्तथापि ते वक्तुं शक्यन्त एव, इत्याशङ्क्याह—

[2]उक्कोससुयन्नाणी वि जाणमाणो वि ते भिलप्पे वि । न तरइ सव्वे वोत्तुं न पहुप्पइ जेण कालो से ॥४५२॥

उत्कृष्टश्रुतज्ञानलब्धिसंपन्नोऽपि चतुर्दशपूर्वधरो जानन्नपि, अभिलप्यानपि तान् श्रुतज्ञानविशेषाननन्तान् सर्वानपि वक्तुं न शक्नोति । कुतः ?, इत्याह– येन कारणेन 'से' तस्योत्कृष्टश्रुतज्ञानिनो वदतः कालो न प्रभवति न पूर्यते, आयुषः परिमितत्वात्, वाचश्च क्रमवर्तित्वात् । यदा चोत्कृष्टः श्रुतधरोऽपि सर्वान् श्रुतभेदान् वक्तुं न शक्नोति, तदाऽन्यस्याऽल्पादेः का वार्ता ? इति भावः ॥४५२॥

[3]'चोद्दसविहनिक्खेवं' इत्याद्युत्तरार्धं व्याचिख्यासुराह—

[4]नाणम्मि सुए चोद्दसविहं चसद्देण तह य अन्नाणे । अविसद्देणुभयम्मि वि किंचि जहासंभवं वोच्छं ॥४५३॥

सम्यक्श्रुतादौ श्रुतज्ञाने चतुर्दशविधं निक्षेपं चशब्देन श्रुताज्ञाने च मिथ्याश्रुतादौ, अपिशब्दादुभयरूपे च दर्शन-परिग्रहविशेषादक्षरा[5]-ऽनक्षरादिश्रुते किंचिद् यथासंभवं निक्षेपं वक्ष्ये ॥ इति गाथाचतुष्टयार्थः ॥ ४५३ ॥

तमेव चतुर्दशविधं निक्षेपमाह— [6]

[7]अक्खर सण्णी सम्मं साईयं खलु सपज्जवसियं च । गमियं अंगपविट्ठं सत्त वि एए सपडिवक्खा ॥४५४॥

---

१ यावन्तो वचनपथाः श्रुतानुसारेण केऽपि लभ्यन्ते । ते सर्वे श्रुतज्ञानं ते चाऽनन्ता मतिविशेषाः ॥ ४५१ ॥ २ गाथा १४३ ।

३ उत्कृष्टश्रुतज्ञान्यपि जानन्नपि तानभिलप्यानपि । न शक्नोति सर्वान् वक्तुं न प्रभवति येन कालस्तस्य ॥ ४५२ ॥

४ गाथा ४४९ । ५ ज्ञाने श्रुते चतुर्दशविधं चशब्देन तथाऽज्ञाने । अपिशब्देनोभयस्मिन्नपि किञ्चिद् यथासंभवं वक्ष्ये ॥४५३॥ ६ घ.छ. 'रादि'

७ अक्षरं संज्ञि सम्यक् सादिकं खलु सपर्यवसितं च । गमिकमङ्गप्रविष्टं सप्ताऽप्येते सप्रतिपक्षाः ॥ ४५४ ॥ ८ क.ग. 'दु' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अक्षरादीनि सप्त द्वाराण्यनक्षरादिमतिपक्षसहितानि चतुर्दश भवन्ति ॥ ॥ ४५४ ॥

तत्राद्यद्वारं व्याचिख्यासुराह–

नै क्खरइ अणुवओगे वि अक्खरं सो य चेयणाभावो । अविसुद्धनयाण मयं सुद्धनयाण क्खरं चेव ॥४५५॥

'क्षर संचलने' न क्षरति न चलति– अनुपयोगेऽपि न प्रच्यवत इत्यक्षरं, स च चेतनाभावो जीवस्य ज्ञानपरिणाम इत्यर्थः । एतच्च नैगमादीनामविशुद्धनयानां मतम् । शुद्धानां तु ऋजुसूत्रादीनां ज्ञानं क्षरमेव, न त्वक्षरमिति ॥ ४५५ ॥

कुतः ?, इत्याह–

[2]उवओगे वि य नाणं सुद्धा इच्छंति जं न तव्विरहे । उप्पाय-भंगुरा वा जं तेसिं सव्वपज्जाया ॥४५६॥

यद् यस्माच्छुद्धनया उपयोग एव सति ज्ञानमिच्छन्ति, नानुपयोगे, घटादेरपि ज्ञानवत्त्वप्रसङ्गात् । अथवा, यद् यस्मात् तेषां शुद्धनयानां सर्वेऽपि मृदादिपर्याया घटादयो भावा उत्पाद-भङ्गुरा उत्पत्तिमन्तो विनश्वराश्चेत्यर्थः, न पुनः केचिद् नित्यत्वादक्षरा इति भावः । अतो ज्ञानमप्युत्पाद-भङ्गुरत्वेन क्षरमेवेति प्रकृतम् । अशुद्धनयानां तु सर्वभावानामप्यवस्थितत्वाज्ज्ञानमप्यक्षरमिति ॥ ४५६ ॥

एवं तावदभिलापहेतोर्विज्ञानस्याऽक्षरता, अनक्षरता चोक्ता, इदानीं साभिलापविज्ञानविषयभूतानामाभिलाप्यार्थानामप्यक्षराऽनक्षरते नयविभागेनाह—

[3]अभिलप्पा वि य अत्था सव्वे दव्वट्ठियाए जं निच्चा । पज्जायेणानिच्चा तेण क्खरा अक्खरा चेव ॥ ४५७ ॥

अभिलप्या अप्यर्था घट-व्योमादयः सर्वेऽपि द्रव्यास्तिकनयाभिप्रायेण नित्यत्वादक्षराः, पर्यायास्तिकनयाभिप्रायेण त्वनित्यत्वात् क्षरा एवेति ॥ ४५७ ॥

अथ परोऽतिव्याप्तिमुद्भावयन्नाह—

[4]एवं सव्वं चिय नाणमक्खरं जमविसेसियं सुत्ते । अविसुद्धनयमएणं को सुयनाणे पइविसेसो ? ॥ ४५८ ॥ (गा. ५००)

१ न क्षरत्यनुपयोगेऽप्यक्षरं स च चेतनाभावः । अविशुद्धनयानां मतं, शुद्धनयानां क्षरमेव ॥ ४५५ ॥

२ उपयोगेऽपि च ज्ञानं शुद्धा इच्छन्ति यद् न तद्विरहे । उत्पाद-भङ्गुरा वा यत् तेषां सर्वपर्यायाः ॥ ४५६ ॥

३ अभिलप्या अपि चार्थाः सर्वे द्रव्यास्तिकेन यद् नित्याः । पर्यायेणाऽनित्यास्तेन क्षरा अक्षरा एव ॥ ४५७ ॥

४ एवं सर्वमेव ज्ञानमक्षरं यदविशेषितं सूत्रे । अविशुद्धनयमतेन कः श्रुतज्ञाने प्रतिविशेषः ? ॥ ४५८ ॥

यदि न क्षरतीत्यक्षरमुच्यते, एवं सति सर्वं पञ्चप्रकारमपि ज्ञानमविशुद्धनयमतेनाऽक्षरमेव, सर्वस्याऽपि ज्ञानस्य स्वरूपाविचलनात् । यतश्चाऽविशेषितं सूत्रेऽप्यभिहितमित्युपस्कारः, तद्यथा– "[1]सव्वजीवाणं पि य णं अक्खरस्स अणंतभागो निच्चुग्घाडियओ" इति । तत्र ह्यक्षरशब्देनाऽविशेषितमेव ज्ञानमभिप्रेतम्, न पुनः श्रुतज्ञानमेव । अपरं च, सर्वेऽपि भावा अविशुद्धनयाभिप्रायेणाऽक्षरा एव, ततोऽत्र श्रुतज्ञाने कः प्रतिविशेषः, येनोच्यते– 'अक्षरश्रुतम्, अनक्षरश्रुतम्' इति ? ॥ ४५८ ॥

अत्रोत्तरमाह–

[2]जइ वि हु सव्वं चिय नाणमक्खरं तह वि रूढिओ वन्नो । भण्णइ अक्खरमिहरा न खरइ सव्वं सभावाओ॥४५९॥

यद्यप्यविशुद्धनयाभिप्रायेण सर्वमपि ज्ञानमक्षरं, तथा सर्वेऽपि भावा अक्षरास्तथापि रूढित्वशाद् वर्ण एवेहाऽक्षरं भण्यते, इतरथा तु यथा त्वं भणसि, तथैवाऽशुद्धनयमतेन सर्वमपि वस्तु स्वभावाद् न क्षरत्येवेति । इदमुक्तं भवति– यथा गच्छतीति गौः, पङ्के जातं पङ्कजं, इत्याद्यविशिष्टार्थप्रतिपादका अपि शब्दा रूढिवशाद् विशेष एव वर्तन्ते, तथाऽत्राप्यक्षरशब्दो वर्ण एव वर्तते । वर्णश्च श्रुतमेवेति, अतस्तदेवाक्षरा-ऽनक्षररूपमुच्यत इति ॥ ४५९ ॥

अथास्य श्रुतरूपस्य वर्णस्य निरुक्तमाह—

[3]वण्णिज्जइ जेणत्थो चित्तं वण्णेण वाऽहवा दव्वं । वण्णिज्जइ दाइज्जइ भण्णइ तेणक्खरं वण्णो ॥ ४६० ॥

वर्ण्यते प्रकाश्यतेऽर्थोऽनेनेति वर्णोऽकार-ककारादिः । येन यथा किम् ?, इत्याह— 'चित्तं वण्णेण व त्ति' यथा चित्रं भित्त्याद्यालेख्यं वर्णेन कृष्ण-नीलादिवर्णकेन प्रकाश्यते । 'अहवा दव्वं वण्णिज्जईत्यादि' अथवा यथा द्रव्यं गवादिकं वर्णेन श्वेतादिगुणेन दर्श्यते, एवं येन द्रव्यं वर्ण्यते दर्श्यतेऽभिलप्यतेऽसौ वर्णोऽक्षरमुच्यत इति ॥ ४६० ॥

वर्णश्च स्वर-व्यञ्जनभेदेन द्विधा भवति, अतः स्वर-व्यञ्जनशब्दयोरप्यर्थमाह—

[4]अक्खरसरणेण सरा वंजणमवि वंजणेण अत्थस्स । अत्थे य खरइ न य जेण खिज्जइ अक्खरं तेणं ॥ ४६१ ॥

१ सर्वजीवानामपि चाक्षरस्याऽनन्तभागो नित्योद्घाटितः ।

२ यद्यपि खलु सर्वमेव ज्ञानमक्षरं तथापि रूढितो वर्णः । भण्यतेऽक्षरमितरथा न क्षरति सर्वं स्वभावात् ॥ ४५९ ॥

३ वर्ण्यते येनाऽर्थश्चित्रं वर्णेन वाऽथवा द्रव्यम् । वर्ण्यते, दर्श्यते भण्यते तेनाऽक्षरं वर्णः ॥ ४६० ॥

४ अक्षरस्मरणेन स्वरा व्यञ्जनमपि व्यञ्जनेनाऽर्थस्य । अर्थे च क्षरति न च येन क्षीयतेऽक्षरं तेन ॥ ४६१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

'स्वृ शब्दो-पतापयोः' अक्षराणां व्यञ्जनानां स्वरणेन संशब्दनेन स्वरा अकारादयः प्रोच्यन्ते । अथवा, अक्षरस्य चैतन्यस्य स्वरणात् संशब्दनात् स्वराः, शब्दोच्चारणमन्तरेणाऽन्तर्विज्ञानस्य बोद्धुमशक्यत्वात्, शब्दे च स्वरसद्भावादिति । व्यञ्जनमपि कादिकमुच्यते केन ?, इत्याह— व्यञ्जनेन व्यक्तीकरणेन प्रकटनेनाऽर्थस्य । अक्षरशब्दः पूर्वं ज्ञानवाचकत्वेन व्युत्पादितः, साम्प्रतं वर्णवाचकत्वेन व्युत्पादयति— 'अत्थे य' इत्यादि' अर्थान्— अभिधेयान् क्षरति संशब्दयतीति निरुक्तिविधिना थैकारलोपादक्षरम् । अथवा, क्षीयत इति क्षरं, न क्षरमक्षरम्, अन्यान्यवर्णसंयोगेऽनन्तानर्थान् प्रतिपादयति, न च स्वयं क्षीयते येन, तेनाऽक्षरमिति भावः ॥ ४६१ ॥

संक्षेपेण स्वरव्यञ्जनशब्दार्थौ दर्शितौ; अथ विशेषतस्तमुपदर्शयति—

[1]सुद्धा वि सरंति सयं सारंति य वंजणाइं जं तेणं । होंति सरा न कयाइ वि तेहिं विणा वंजणं सरइ ॥४६२॥

वंजिज्जइ जेणत्थो घडो व्व दीवेण वंजणं तो तं । अत्थं पायेण सरा वंजंति न केवला जेणं ॥४६३॥

शुद्धाः केवला व्यञ्जनरहिता अप्यकारादयः स्वराः स्वयमेवं स्वरन्ति शब्दयन्ति विष्णुप्रमुखं वस्तु, व्यञ्जनानि चैते संयुक्ताः सन्तः स्वरयन्ति उच्चारणयोग्यानि कुर्वन्ति यतः, तेन कारणेन स्वरा भवन्त्येते । न हि कापि तैः स्वरैर्विना व्यञ्जनस्य स्वरणमर्थप्रतिपादनं दृश्यते । नापि परगमने पिण्डीभूतानि व्यञ्जनानि स्वरैर्विनोच्चारयितुं शक्यन्ते, अतो व्यञ्जनस्वरणादप्येते स्वरा उच्यन्त इति भावः । व्यज्यते प्रकटीक्रियते प्रदीपेनेव घटादिरर्थोऽनेनेति कृत्वा व्यञ्जनमभिधीयते, व्यञ्जनसाहाय्यविरहिता यतः केवलाः स्वराः प्रायो न कदाचिद् बाह्यमर्थं व्यञ्जयन्ति, अपनीतव्यञ्जनं हि वाक्यं न विवक्षितार्थप्रतिपादनायाऽलं दृश्यते, यथा 'सम्यग्दर्शन-ज्ञान-चारित्राणि' इत्यत्र वाक्ये व्यञ्जनापगमे एते स्वराः समवतिष्ठन्ते— 'अ-अ-अ-अ-अ-आ-अ-आ-इ-आ-इ'। न चैते विवक्षितमर्थं प्रतिपादयितुं समर्थाः । अकारे-कारादयः केवला अपि विष्णु-मन्मथादिकमर्थं प्रतिपादयन्तीति प्रायोग्रहणम् ।

अत्राह— नन्वकारादयो विष्णुप्रभृतीनां संज्ञा एव । एवं च सति यथा केवलेन स्वरेण संज्ञा, तथा संकेतवशात् केवलेन व्यञ्जनेनाप्यसौ भविष्यति, तत्कथं पूर्वगाथायामुक्तम्— ' न कयावि तेहिं विणा वंजणं सरइ ' इति ? । सत्यम्, तत्राऽयमभिप्रायः— स्वरैः केवलैरपि काचित् काचित् संज्ञा दृश्यते, व्यञ्जनैस्तु सर्वथा तद्रहितैर्न काचित् संज्ञा वीक्ष्यत इति ॥ ४६२ ॥ ४६३ ॥

---

१ क.ख.ग. 'तो वि' । २ शुद्धा अपि स्वरन्ति स्वयं स्वरयन्ति च व्यञ्जनानि यत् तेन । भवन्ति स्वरा न कदाचिदपि तैर्विना व्यञ्जनं स्वरति ॥ ४६२ ॥ व्यज्यते येनार्थो घट इव दीपेन व्यञ्जनं ततस्तत् । अर्थं प्रायेण स्वरा व्यञ्जन्ति न केवला येन ॥ ४६३ ॥ ३ क.ख.ग. 'व सर' ।

तदेवमक्षरं वर्ण इति पर्यायौ सामान्यवर्णवाचकौ, स्वरो व्यञ्जनमित्येतौ तु प्रत्येकं वर्णविशेषवाचकाविति । तत्र रूढिवशादक्षरं वर्ण इत्युक्तम् । तच्च त्रिविधं भवतीति दर्शयति—

तं सण्णा-वंजण-लद्धिसण्णियं तिविहमक्खरं, तत्थ । सुबहुलिविभेयनिययं सण्णक्खरमक्खरागारो ॥४६४॥

तदक्षरं त्रिविधं भवति, तद्यथा— संज्ञाक्षरं, व्यञ्जनाक्षरं, लब्ध्यक्षरं चेति । तत्र सुबहवो या एता अष्टादश लिपयः शास्त्रेषु श्रूयन्ते, तद्यथा—

"[2]हंसलिवी भूयलिवी जक्खी तह रक्खसी य बोधव्वा । उड्डी जवणि तुरुक्की कीरी दविडी य सिंधवीया ॥ १ ॥
मालविणी नडि नागरी लाडलिवी पारसी य बोधव्वा । तह अनिमित्ती य लिवी चाणक्की मूलदेवी य ॥ २ ॥"

तच्चैतदनियतमेतच्चैतदसंबद्धसंज्ञाक्षरमक्षराकाररूपं, तच्च लिपिभेदादेवाऽनेकप्रकारं, यथा कस्मिंश्चिल्लिपिविशेषेऽर्धचन्द्राकृतिष्टकारः, घटाकृतिष्टकार इत्यादि ॥ ४६४ ॥

अथ व्यञ्जनाक्षरमाह—

[3]वंजिज्जइ जेणत्थो घडो व्व दीवेण वंजणं तो तं । भण्णइ भासिज्जंतं सव्वुकाराइ तक्कालं ॥ ४६५ ॥

व्यज्यतेऽनेनाऽर्थः प्रदीपेनेव घट इति, अतस्तद् व्यञ्जनं भण्यते, व्यञ्जनं च तदक्षरं च व्यञ्जनाक्षरं, तच्चेह सर्वमेव भाष्यमाणमकारादि हकारान्तम् । तस्या भाषायाः कालो यत्र तत् तत्कालं वेदितव्यं, भाष्यमाणः शब्दो व्यञ्जनाक्षरमिति हृदयम्, अर्थाभिव्यञ्जकत्वाच्छब्दस्येति ॥ ४६५ ॥

अथ लब्ध्यक्षरमाह—

[4]जो अक्खरोवलंभो सा लद्धी, तं च होइ विण्णाणं । इंदिय-मणोनिमित्तं जो यावरणक्खओवसमो ॥४६६॥

---

१ सत् संज्ञा-व्यञ्जन-लब्धिसंज्ञितं त्रिविधमक्षरं, तत्र । सुबहुलिपिभेदनियतं संज्ञाक्षरमक्षराकारः ॥ ४६४ ॥
२ हंसलिपिर्भूतलिपिर्यक्षी तथा राक्षसी च बोद्धव्या । उड्डी यवनी तुरुष्की कीरी द्राविडी च सिन्धवीया ॥ १ ॥
मालविनी नटी नागरी लाटलिपिः पारसी च बोद्धव्या । तथाऽनिमित्ती च लिपिश्चाणाकी मौलदेवी च ॥२॥ ३ ख.छ. 'र इ' । ४ क. 'धयाक्' ख. 'धयाइ' ष्टकारइ-।
५ व्यज्यते येनाऽर्थो घट इव दीपेन व्यञ्जनं ततस्तत् । भण्यते भाष्यमाणं सर्वमकारादि तत्कालम् ॥ ४६५ ॥
६ योऽक्षरोपलम्भः सा लब्धिः, तच्च भवति विज्ञानम् । इन्द्रिय-मनोनिमित्तं यश्चावरणक्षयोपशमः ॥ ४६६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

योऽक्षरस्योपलम्भो लाभः सा लम्भनं लब्धिः- तल्लब्ध्यक्षरमित्यर्थः । तच्च किम् ?, इत्याह- इन्द्रिय-मनोनिमित्तं श्रुतग्रन्थानुसारि विज्ञानं श्रुतज्ञानोपयोग इत्यर्थः, यश्च तदावरणक्षयोपशम इति- यः श्रुतज्ञानोपयोगः, यश्च तदावरणकर्मक्षयोपशमः, एतौ द्वावपि लब्ध्यक्षरमिति भावार्थः ॥ उक्तं त्रिविधमक्षरम् ॥ ४६६ ॥

अथाऽत्र किं द्रव्यश्रुतं, किंवा भावश्रुतम् ?, इत्याह-

दव्वसुयं सण्णा-वंजणक्खरं, भावसुत्तमियरं तु । मइ-सुयविसेसणम्मि वि मोत्तूणं दव्वसुत्तं ति ॥ ४६७ ॥

संज्ञाक्षरं, व्यञ्जनाक्षरं चैते द्वे अपि भावश्रुतकारणत्वाद् द्रव्यश्रुतं, इतरत्तु लब्ध्यक्षरं भावश्रुतम् । अत्र विनेयः प्राह- ननु पूर्वं मति-श्रुतभेदविचारे येयं गाथा प्रोक्ता—

[1]'सोइंदिओवलद्धी होइ सुयं सेसयं तु मइनाणं । मोत्तूणं दव्वसुयं अक्खरलंभो य सेसेसु' ॥ १ ॥ इति ।

अस्यां किमस्य त्रिविधस्याऽक्षरस्य संग्रहोऽस्ति नवा, श्रुतविचारस्य तत्रापि प्रस्तुतत्वात् ?। यद्यस्ति, तर्हि दर्श्यतां कथमसौ ?। अथ नास्ति, तर्ह्यत्रापि किमनेनाऽप्रस्तुतेन ?। इत्याशङ्क्य सूरिः पूर्वापरग्रन्थसंवादं दिदर्शयिषुस्तत्राऽप्यस्याक्षरत्रयस्य संग्रहमुपदर्शयति-'मइ-सुये-त्यादि' मति-श्रुतविशेषणेऽपि मति-श्रुतभेदविचारेऽपि 'सोइंदिओवलद्धी' इत्यादिगाथायां 'मोत्तूणं दव्वसुयं' इत्यनेन गाथावयवेन ॥४६७॥

किम् ?, इत्याह—

दव्वसुयं सण्णक्खरमक्खरलंभो त्ति भावसुयमुत्तं । सोउवलद्धिवयणेण वंजणं भावसुत्तं च ॥ ४६८ ॥

संज्ञाक्षरमुक्तम् । कथंभूतम् ?, इत्याह— द्रव्यश्रुतं भावकारणत्वाद् द्रव्यश्रुतरूपम् । 'अक्खरलंभो य सेसेसु' इत्यनेन त्ववयवेन लब्ध्यक्षरमुक्तमिति शेषः । कथंभूतम् ?, इत्याह- भावश्रुतं विज्ञानात्मकत्वाद् भावश्रुतरूपम् । 'सोइंदिओवलद्धी होइ सुयं' इत्यनेन त्ववयवेन श्रोत्रेन्द्रियेणोपलब्धिर्यस्य शब्दस्येति बहुव्रीहिसमासाश्रयणाद् व्यञ्जनं व्यञ्जनाक्षरमुक्तम्, श्रोत्रेन्द्रियस्योपलब्धिर्विज्ञानमिति षष्ठीसमास-साङ्गीकरणेन तु पुनरपि लब्ध्यक्षरं भावश्रुतरूपमभिहितम्, इत्येवं न पूर्वा-परविसंवादः ॥ ४६८ ॥

ननु लब्ध्यक्षरं कथं प्रमाता लभते ?, इत्याह-

---

१ घ.छ. 'णक्ष' । २ द्रव्यश्रुतं संज्ञा-व्यञ्जनाक्षरं भावश्रुतमितरत् तु । मति-श्रुतविशेषणेऽपि मुक्त्वा द्रव्यसूत्रमिति ॥ ४६७ ॥ ३ क. 'तिपूर्वश्रु' ।
४ गाथा ११७ । ५ द्रव्यश्रुतं संज्ञाक्षरमक्षरलाभ इति भावश्रुतमुक्तम् । श्रोत्रोपलब्धिवचनेन व्यञ्जनं भावसूत्रं च ॥ ४६८ ॥

११

पंचक्खमिंदिय-मणेहिं लभइ लिंगेण चक्खरं कोइ । लिंगमणुमाणमण्णे सारिक्खाई पभासंति ॥ ४६९ ॥

तच्चाक्षरं लब्ध्यक्षरं कश्चित् प्रत्यक्षं लभते- प्रत्यक्षरूपतयैव कस्यचिदुत्पद्यत इत्यर्थः । काभ्यां कृत्वा ?, इत्याह- इन्द्रिय-मनोभ्याम्- इन्द्रिय-मनोनिमित्तं यद् व्यवहारप्रत्यक्षं तत्र कस्यचिल्लब्ध्यक्षरं श्रुतज्ञानरूपमुपजायत इत्यर्थः । अन्यस्य तु लिङ्गेन धूमादिना तदुत्पद्यते- धूमादिलिङ्गं दृष्ट्वाऽन्यादिरूपं तत् कस्यचिदुपजायत इत्यर्थः । लिङ्गं किमुच्यते ?, इत्याह- अनुमानमिति । ननु लिङ्गग्रहण-संबन्धस्मरणाभ्यामनु पश्चाद् मानमनुमानं लिङ्गजं ज्ञानमुच्यते, कथं लिङ्गमेवाऽनुमानमिति चेत् ?। सत्यम्, किन्तु कारणे कार्योपचारात् तदप्यनुमानं, यथा प्रत्यक्षज्ञानजनको घटोऽपि प्रत्यक्ष इति । तदेतदिह तात्पर्यम्- लब्ध्यक्षरं श्रुतज्ञानमुच्यते, तच्चेन्द्रिय-मनोनिमित्तं प्रत्यक्षं वा स्यात्, अनुमानं वा स्यात्, नान्यत्, शेषस्याऽऽत्मप्रत्यक्षस्यावध्यादिरूपत्वादिति भावः । 'अण्णे सारिक्खाई पभासंति त्ति' सादृश्यादिभ्यो जायमानत्वात् तदनुमानं पञ्चावयवमिति केचित् प्रभाषन्ते ॥ ४६९ ॥

एतदेवाह—

सारिक्ख-विवक्खो-भय-मुवमा-गममेव सव्वमणुमाणं । किंचिम्मत्तविसेसेण वा न तं पंचहा ठाइ ॥ ४७० ॥

सादृश्यादन्यस्मिन् प्रत्यक्षेऽप्यर्थे स्मृतिज्ञानमुपजायते, यथा सदृशे एकस्मिन् भ्रातरि कापि दृष्टेऽन्यस्मिंस्तत्सदृश्येतद् भ्रातरि पूर्वदृष्टे सादृश्यात् 'स पूर्वदृष्टोऽस्य भ्राता' इति स्मृतिज्ञानमुत्पद्यते । विपक्षादप्युरगादेस्तद्विपक्षे नकुलादौ स्मृतिज्ञानमुपजायते । उभयस्मादुभयरूपाद् वेगसरात् खराऽश्वयोः स्मृतिज्ञानमाविर्भवतीत्यादि । उपमानाद् गवादेर्गवयादौ, आगमात् स्वर्गादौ ज्ञानमुत्पद्यते। एवं सादृश्यादिभेदेनाऽनुमानं पञ्चविधम् ।

अत्र सूरिराह- सर्वमेवेदमनुमानम्- अनुमानाद् नातिरिच्यते, संबन्धादन्यतो विवक्षितार्थाप्रतिपत्तेः । अथ किञ्चिद्भेदेन भेदो विवक्ष्यते, तत्राह- 'न तं पंचहा ठाइ त्ति' तदनुमानं पञ्चधा नावतिष्ठते- नाऽनेन भेदपञ्चकमात्रेण सर्वतद्भेदसंग्रहो भवतीत्यर्थः, धूमादग्निज्ञानस्य, बलाकादर्दुरलाद्यनुमानस्य च सकललोकप्रतीतस्याऽनेनाऽसंग्रहादिति। अत्रान्तरे 'भायअहियस्स' इत्यादिगाथा क्वचिद् दृश्यते, सा च प्रक्षेपरूपा मूलटीकयोरगृहीतत्वादुपेक्ष्यते ॥ ४७० ॥

---

१ प्रत्यक्षमिन्द्रिय-मनोभ्यां लभते लिङ्गेन चाक्षरं कोऽपि । लिङ्गमनुमानमन्ये सादृश्यादि प्रभाषन्ते ॥ ४६९ ॥ २ क. ख. ग. 'तदि' ।
३ सादृश्य-विपक्षो-भयमुपमा-ऽऽगममेव सर्वमनुमानम् । किञ्चिन्मात्रविशेषेण वा न तत् पञ्चधा तिष्ठति ॥ ४७० ॥ ४ भायाधिकस्य ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इन्द्रिय-मनोनिमित्तमपि ज्ञानं तत्त्वतोऽनुमानमेवेति दर्शयति–

[1]इंदिय-मणोनिमित्तं पि नाणुमाणाहि भिज्जए, किंतु । नाविक्खइ लिंगंतरमिह पच्चक्खोवयारो त्थ ॥४७१॥

इह यदिन्द्रिय-मनोनिमित्तं साक्षात्पुरोवस्थितं घटाद्यर्थं दृष्ट्वा ज्ञानमुत्पद्यते तदपि तावदनुमानमेव, अपरस्मादुत्पत्तेः, धूमाग्नि-ज्ञानवदिति । इन्द्रिय-मनोद्वारेणोत्पन्नत्वादेतदात्मनः परोक्षम्, अतस्तत्त्वतोऽनुमानाद् नातिरिच्यते । यानि त्विन्द्रियाणामप्यसाक्षाद्भूतार्थानि सादृश्यादेर्लिङ्गाज्ज्ञानान्युपजायन्ते, तेषामनुमानत्वे कः संदेहः ? इति भावः । आह– नन्विन्द्रिय-मनोनिमित्तं यत् साक्षादर्थं दृष्ट्वा ज्ञानमुत्पद्यते तद् यद्यनुमानं भवता प्रोच्यते, तर्हि कथं प्रत्यक्षतया लोके रूढम् ?, इत्याह– किन्त्विन्द्रिय-मनोमात्रादेव निमित्तादिदमुत्पद्यते, न पुनर्धूमादि लिङ्गान्तरमपेक्षते, अतः प्रत्यक्षोपचारोऽत्र क्रियते– प्रत्यक्षमिव प्रत्यक्षं, इन्द्रियसाक्षाद्भूतार्थत्वात् ; परमार्थतस्त्वनुमानमेवेति ॥ ४७१ ॥

अथ तत्रापि किञ्चिद्भेदाद् भेदोऽनुमानस्याभिधीयते, तथाऽप्येतत्पञ्चभेदत्वमयुक्तमिति दर्शयति–

[2]नापुणरुत्ता न समत्तलिङ्गसंगाहिया न य गुणाय । नियमियपरिमाणाए किं च विसेसोवलद्धीए ॥ ४७२ ॥

येयं पञ्चविधाऽनुमानोपलब्धिः परिकल्प्यते केनापि, सा नाऽपुनरुक्ता– न पौनरुक्त्यदोषरहिता, सादृश्यो-पमानादिषु सर्वत्र सादृश्याविशेषात् पुनरुक्तदोषदुष्टैवेयमित्यर्थः, अत्यन्तपरोक्षेण च स्वर्गादिनौपमाने विधीयमाने आगमाविशेषाच्च पौनरुक्त्यम् । न च समस्तलिङ्गसंग्राहिकेयम्, सकललोकप्रतीतानामपि कार्यस्वभावादिरूपाणां धूम-कृतकत्वादिलिङ्गानामनयाऽसंग्रहात् । अथाऽत्रापि केनाऽप्यंशेन सादृश्यमस्ति, तर्ह्येकमेवेदमस्तु, किं बहुभेदोपन्यासेन, सर्वलिङ्गेष्वपि केनाऽप्यंशेन सादृश्यस्यैव गमकत्वात् ? इति । न चेयं पञ्चविधोपलब्धिर्गुणाय– उक्तन्यायेन दूषणमेवाऽस्यां दृश्यते, न पुनः कश्चिद् गुण इत्यर्थः । अतः किमनया नियमितपरिमाणया विशेषोपलब्ध्या, अनुमानतयैव सर्वसंग्रहात् ? इति ॥ ४७१ ॥

भवत्वेवम्, तथाऽप्यनुमानात् पृथगेव या त्रिविधाऽनुपलब्धिरन्यत्र प्रसिद्धा, इत्याशङ्क्याह–

[3]नाहिगयाऽणुवलद्धी न वा विवक्खो त्ति वा तओ सव्वा । सक्खाइग्गहणेण वा न उ जुत्तो तिविहनियमो से॥४७३॥

---

१ इन्द्रिय-मनोनिमित्तमपि नानुमानाद् भिद्यते, किन्तु । नापेक्षते लिङ्गान्तरमिति प्रत्यक्षोपचारोऽत्र ॥ ४७१ ॥

२ नाऽपुनरुक्ता न समस्तलिङ्गसंग्राहिका न च गुणाय । नियमितपरिमाणया किं च विशेषोपलब्ध्या ? ॥ ४७२ ॥

३ नाऽधिकृताऽनुपलब्धिर्न वा विपक्ष इति वा ततः सर्वा । साक्षादादिग्रहणेन वा न तु युक्तस्त्रिविधनियमस्तस्य ॥ ४७३ ॥

या त्रिविधाऽनुपलब्धिः कैश्चित् प्रकल्प्यते, तद्यथा– अत्यन्तानुपलब्धिः खरविषाणादीनाम्, सामान्यानुपलब्धिर्यथा– रूपलक्षितस्यापि माषकणादेर्महति माषकणादिराशौ प्रक्षिप्तस्यानुपलब्धिः, विस्मृत्यनुपलब्धिः– विस्मृत्या 'अयं सः' इत्यनुसंधानमकुर्वतो विज्ञेया । सैषा त्रिविधाऽप्यनुपलब्धिर्नेहाधिकृता, अक्षरोपलब्ध्यधिकारेऽनुपलब्धेरप्रस्तुतत्वात् । अथोपलब्धिविपक्षोऽनुपलब्धिः, अतो विपक्षत्वेन साऽप्यत्राधिकृता । साध्येतत्, केवलं त्रैविध्यनियमोऽयमयुक्तः अतिसंनिकृष्टा-ऽतिविप्रकृष्टानुपलब्ध्यादिकाया अप्यनुपलब्धेः प्रसिद्धत्वात् । ततः सर्वाऽप्यसौ साक्षात्, आदिग्रहणेन वा वक्तव्या, न तु तस्यास्त्रैविध्यनियमो युक्तः । सर्वाऽपि तर्ह्युच्यतामिति चेत् । नैवम्, ग्रन्थविस्तरप्रसङ्गात्, अन्यत्रोक्तत्वात्, प्रत्यक्षा-ऽनुमानान्तर्भावाच्चेति । अत्र यत् प्रक्षेपगाथान्तरं दृश्यते तत् स्वधिया भावनीयम्, उपेक्षणीयं वेति ॥ ४७३ ॥

तदेवं तत्त्व-भेद-पर्यायैर्व्याख्यातमक्षरम् । साम्प्रतमक्षरश्रुताधिकारादेव यदुक्तं सूत्रे– " [2]अक्खरलद्धिअस्स लद्धिअक्खरं समुप्पज्जइ " इति तत्र प्रेर्यमुत्थापयन्नाह–

[3]अक्खरलंभो सण्णीण होज्ज पुरीसाइवण्णविण्णाणं । कत्तो असण्णीणं भणियं च सुयम्मि तेसिं पि ॥४७४॥ (उ)

पुरुष स्त्री-नपुंसक-घट-पटादिवर्णविज्ञानरूपोऽक्षरलाभः संज्ञिनां समनस्कजीवानां भवेत्, श्रद्दध्महे एतत्, असंज्ञिनां त्वमनस्कानां कुत एतद्वर्णविज्ञानं संभवति ?– न कुतश्चिदित्यर्थः, अक्षरलाभस्य परोपदेशजत्वात्; मनोविकलानां तु तदसंभवात्। मा भूत् तेषां तर्हि तदिति चेत्, इत्याह– भणितं च वर्णविज्ञानं श्रुते तेषामप्येकेन्द्रियाद्यसंज्ञिनां– " [4]एगिंदिया [5]जे मइअन्नाणी सुयअन्नाणी य " इत्यादिवचनात्। न हि श्रुताज्ञानमक्षरमन्तरेण संभवति, तदेतत् कथं श्रद्धातव्यम् ? इति ॥ ४७४ ॥

अत्रोत्तरमाह—

[6]जह चेयण्णमकित्तिममसण्णीणं तहोहनाणं पि । थोवं तिं नोवलब्भइ जीवत्तमिविंदियाईणं ॥ ४७५ ॥

---

१ घ.छ. 'त् परिक' । २ अक्षरलब्धिकस्य लब्ध्यक्षरं समुत्पद्यते ।

३ अक्षरलाभः संज्ञिनां भवेत् पुरुषादिवर्णविज्ञानम् । कुतोऽसंज्ञिनां भणितं च श्रुते तेषामपि ॥ ४७४ ॥

४ क. ग. 'नं भ' । ५ क. ख. ग. 'तदभावात्' । ६ एकेन्द्रिया मत्यज्ञानाः, श्रुताज्ञानाश्च ।

७ यथा चैतन्यमकृत्रिममसंज्ञिनां तथौघज्ञानमपि । स्तोकमिति नोपलभ्यते जीवत्वमिवेन्द्रियादीनाम् ॥ ४७५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

यथा चैतन्यं जीवत्वमकृत्रिमस्वभावमाहारादिसंज्ञाद्वारेणाऽसंज्ञिनामवगम्यते, तथा लब्ध्यक्षरात्मकसमूहाज्ञानमपि तेषामवगन्तव्यम्, स्तोकत्वात् स्थूलदर्शिभिस्तद् नोपलक्ष्यते, जीवत्वमिव पृथिव्याद्येकेन्द्रियाणाम्। एकशब्दस्य चेह लोपः 'भामा सत्यभामा' इत्यादिदर्शनादिति। यदपि परोपदेशजत्वमक्षरस्योच्यते, तदपि संज्ञा-व्यञ्जनाक्षरयोरेवाऽवसेयम्। लब्ध्यक्षरं तु क्षयोपशमेन्द्रियादिनिमित्तमसंज्ञिनां न विरुध्यते। तदेव च मुख्यतयेह प्रस्तुतं, न तु संज्ञा-व्यञ्जनाक्षरे, श्रुतज्ञानाधिकारादिति ॥ ४७५ ॥

दृष्टान्तान्तरमाह—

[1]जह वा सण्णीणमणक्खराण असइ नरवण्णविण्णाणे। लद्धक्खरं ति भण्णइ किंपि त्ति तहा असण्णीणं ॥४७६॥

यथा[2] वा संज्ञिनामपि परोपदेशाभावेनाऽनक्षराणां केषांचिदतीव मुग्धधर्मकृतीनां पुलीन्द्रबाल-गोपाल-गवादीनामसत्यपि नरादिवर्णविशेषविषये विज्ञाने लब्ध्यक्षरं किमपीक्ष्यते, नरादिवर्णोच्चारणे तच्छ्रवणात्, अभिमुखनिरीक्षणादिदर्शनाच्च। गौरपि हि शबला-बहुलादिशब्देनाऽऽकारिता सती स्वनाम जानीते, प्रवृत्ति-निवृत्त्यादि च कुर्वती दृश्यते। न चैषां गवादीनां तथाविधः परोपदेशः समस्ति। अथवा, अस्ति लब्ध्यक्षरं, नरादिविज्ञानसद्भावात्, एवमसंज्ञिनामपि[3] किमपि तदेष्टव्यमिति ॥ ४७६ ॥

तदेवं साधितमेकेन्द्रियादीनामपि यच्च यावच्च लब्ध्यक्षरम्। अथैकैकस्याऽकाराद्यक्षरस्य यावन्तः पर्याया भवन्ति, तदेतद् विशेषतो दर्शयति—

[4]एक्केक्कमक्खरं पुण स-परपज्जायभेयओ भिन्नं। तं सव्वदव्व-पज्जायरासिमाणं मुणेयव्वं ॥ ४७७ ॥

इह भिन्नं पृथगेकैकमपि तदकाराद्यक्षरं पुनः स्व-परपर्यायभेदतः सर्वाणि यानि धर्मास्तिकायादीनि द्रव्याणि तत्पर्यायराशिमानं मुणितव्यम्। इदमुक्तं भवति— इह समस्तत्रिभुवनवर्तीनि यानि परमाणु-द्व्यणुकादीनि, एकाकाशप्रदेशादीनि च यानि द्रव्याणि, ये च सर्वेऽपि वर्णाः, तदभिधेयाश्चार्थाः, तेषां सर्वेषामपि पिण्डितो यः पर्यायराशिर्भवति स एकैकस्याऽप्यकाराद्यक्षरस्य भवति, तन्मध्ये ह्यकारस्य केचित् स्तोकाः स्वपर्यायास्ते चाऽनन्ताः, शेषास्त्वनन्तानन्तगुणाः परपर्यायाः, इत्येवं सर्वसंग्रहः। अयं च सर्वोऽपि सर्वद्रव्य-पर्यायराशिः सद्भावतोऽनन्तानन्तस्वरूपोऽप्यसत्कल्पनया किल लक्षं, पदार्थाश्चाऽकारे-कारादयो धर्मास्तिकायादयः सर्वाकाशप्रदेशसहिताः सर्वेऽपि किल

---

१ यथा वा संज्ञिनामनक्षराणामसति नरवर्णविज्ञाने। लब्ध्यक्षरमिति भण्यते किमपीति तथाऽसंज्ञिनाम् ॥ ४७६ ॥

२ क.ग. 'था सं'। ३ घ.छ.'प्रभृती'। ४ घ.छ. 'पीष्यते'। ५ क.घ.छ.'पि त'।

६ एकैकमक्षरं पुनः स्व-परपर्यायभेदतो भिन्नम्। तत् सर्वद्रव्य-पर्यायराशिमानं ज्ञातव्यम् ॥ ४७७ ॥

सहस्रम्। तत्रैकस्याऽकारपदार्थस्य सर्वद्रव्यगतलक्षपर्यायराशिमध्यादस्तित्वेन संबद्धाः किल शतप्रमाणाः स्वपर्यायाः, शेषास्तु नास्तित्वेन संबद्धाः सर्वेऽपि परपर्यायाः। एवमिकारादेः, परमाणु-द्व्यणुकादेश्चैकैकद्रव्यस्य वाच्यमिति ॥ ४७७ ॥

आह— के पुनः स्वपर्यायाः, के च परपर्यायाः ?, इत्याह—

[1]जे लभइ केवलो से सवन्नसहिओ व पज्जवेऽयारो। ते तस्स सपज्जाया सेसा परपज्जया सव्वे ॥४७८॥

यानुदात्ता-ऽनुदात्त-सानुनासिक-निरनुनासिकादीनात्मगतान् पर्यायान् केवलोऽन्यवर्णेनाऽसंयुक्तः, अन्यवर्णसंयुक्तो वाऽकारो लभतेऽनुभवति ते तस्य स्वपर्यायाः प्रोच्यन्ते, अस्तित्वेन संबद्धत्वात्, ते चाऽनन्ताः, तद्वाच्यस्य[2] विष्णु-परमाण्वादिद्रव्यस्याऽनन्तत्वात्, तद्द्रव्यप्रतिपादनशक्तेश्चाऽस्य भिन्नत्वात्, अन्यथा तत्प्रतिपाद्यस्य सर्वस्याऽप्येकत्वप्रसङ्गात्, एकरूपवर्णवाच्यत्वात्। शेषास्त्विकारादिसंबन्धिनः, घटादिगताश्चाऽस्य परपर्यायाः, तेभ्यो व्यावृत्तत्वेन नास्तित्वेन संबन्धात्। एवमिकारादीनामपि भावनीयम्, अक्षरविचारस्यैवेह प्रक्रान्तत्वात् ॥ ४७८ ॥

एकैकमक्षरं सर्वद्रव्य-पर्यायराशिमानमुच्यते, अन्यथाऽन्येषामपि परमाणु-द्व्यणुक-घटादिद्रव्याणामिदमेव पर्यायमानं द्रष्टव्यमिति। एवमुक्ते सति परः प्राह—

[3]जइ ते परपज्जाया न तस्स, अह तस्स, न परपज्जाया। जं तम्मि असंबद्धा तो परपज्जायववएसो ॥४७९॥

इह स्वपर्यायाणामेव तत्पर्यायता युक्ता, ये त्वमी परपर्यायास्ते यदि घटादीनां, तर्हि नाक्षरस्य। अथाऽक्षरस्य ते, तर्हि न घटादीनाम्। ततश्च यदि परस्य पर्यायाः तर्हि तस्य कथम् ?; तस्य चेत्, परस्य कथम् ? इति विरोधः। तदयुक्तम्, अभिप्रायाऽपरिज्ञानात्, यस्मात् कारणात् तस्मिन्नकारे-काराद्यक्षरे घटादिपर्याया अस्तित्वेनाऽसंबद्धाः, ततस्तेषां परपर्यायव्यपदेशः, अन्यथा व्यावृत्तेन रूपेण तेऽपि संबद्धा एव, इत्यतस्तेषामपि व्यावृत्तरूपतया पारमार्थिकं स्वपर्यायत्वं न विरुध्यते। अस्तित्वेन तु घटादिपर्याया घटादिष्वेव संबद्धाः, इत्यक्षरस्य ते परपर्याया व्यपदिश्यन्त इति भावः। द्विविधं हि वस्तुनः स्वरूपम्— अस्तित्वं नास्तित्वं च। ततो ये यत्राऽस्तित्वेन प्रतिबद्धास्ते तस्य स्वपर्याया उच्यन्ते, ये तु यत्र नास्तित्वेन संबद्धास्ते तस्य परपर्यायाः

---

१ यो लभते केवलस्तस्य सवर्णसहितो वा पर्यवाकारः। ते तस्य स्वपर्यायाः शेषाः परपर्यायाः सर्वे ॥ ४७८ ॥ + द्विष्णु-।

२ यदि ते परपर्याया न तस्य, अथ तस्य, न परपर्यायाः। यत् तस्मिन्नसंबद्धास्ततः परपर्यायव्यपदेशः ॥ ४७९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिपाद्यन्ते, इति निमित्तभेदख्यापनपरावेव स्व-परशब्दौ, न त्वेकेषां तत्र सर्वथा संबन्धनिराकरणपरौ । अतोऽक्षरे घटादिपर्याया अस्तित्वेनाऽसंबद्धा इति परपर्याया उच्यन्ते, न पुनः सर्वथा ते तत्र न संबद्धाः, नास्तित्वेन तत्रापि संबन्धात् । न चैकस्योभयत्र संबन्धो न युक्तः, एकस्याऽपि हिमवदादेरंशद्वयेन पूर्वापरसमुद्रादिसंबन्धात् । यदि ह्येकेनैव रूपेणैकस्योभयत्र संबन्ध इष्येत तदा स्याद् विरोधः, एतच्च नास्ति, रूपद्वयेन घटादिपर्यायाणां तत्र, अन्यत्र च संबन्धात्, सत्त्वेन तत्र संबन्धात्, असत्त्वेन त्वक्षरादिषु। असत्त्वमभावत्वाद् वस्तुनो रूपमेव न भवति, खरविषाणवत्, इति चेत् । तदयुक्तम्, खरविषाणकल्पत्वस्य वस्त्वभावेऽसिद्धत्वात् । न हि प्रागभाव-प्रध्वंसाभाव-घटाभाव-पटाभावादिवस्त्वभावविशेषणवत् खरविषाणादिष्वपि विशेषणं संभवति, तेषां सर्वोपाख्याविरहलक्षणे निरभिलप्ये षष्ठभूतवद् नीरूपेऽत्यन्ताभावमात्र एव व्यवहारिभिः संकेतितत्वात् । न च षष्ठभूतवद् वस्त्वभावोऽप्यस्माभिर्नीरूपोऽभ्युपगम्यते, नीरूपस्य निरभिलप्यत्वेन प्रागभावादिविशेषणानुपपत्तेः; किन्तु यथैव मृत्पिण्डादिपर्यायो भाव एव सन् घटाकारादिव्यावृत्तिमात्रात् प्रागभाव इति व्यपदिश्यते, यथा वा कपालादिपर्यायो भाव एव सन् घटाकारोपरममात्रात् प्रध्वंसाभावोऽभिधीयते, तद्वद् पर्यायान्तरापन्नोऽक्षरादिर्भाव एव (सन्) घटादिवस्त्वभावः प्रतिपाद्यते, न तु सर्वथैवाऽभावः, तस्य सर्वथा नकिञ्चिद्रूपस्यानभिलप्यत्वात् । न च वक्तव्यं- खरविषाणादिशब्देन सोऽप्यभिलप्यत एव, इति तस्य सर्वथा निरभिलप्यताख्यापनार्थमेव; संकेतमात्रभाविनां खरविषाणादिशब्दानां व्यवहारिभिस्तत्र निवेशात् ।

किञ्च, यदि घटादिपर्यायाणामक्षरे नास्तित्वेन संबन्धो नेष्यते, तर्ह्यस्तित्व-नास्तित्वयोरन्योन्यव्यवच्छेदरूपत्वादस्तित्वेन तेषां तत्र संबन्धः स्यात्, तथाच सत्यक्षरस्यापि घटादिरूपतैव स्यात्, एवं च सति सर्वं विश्वमेकरूपतामेवाऽऽसादयेत्, ततश्च सहोत्पत्त्यादिप्रसङ्गः । न च वक्तव्यम्- घटादिपर्यायाणां घटादौ व्यवस्थितानां नास्तित्वलक्षणं रूपं कथमक्षरे प्राप्तम्, रूपिणमन्तरेण रूपायोगात् ?, अथ तेऽपि तत्र सन्ति, तर्हि विश्वैकत्वमिति; घटादिपर्यायाणां घटादीन् विहायाऽन्यत्र नास्तित्वेन व्याप्तेरिष्टत्वात्, अन्यथा स्व-परभावायोगात् । अत एव कथञ्चिद् विश्वैकताऽप्यबाधिकैव, द्रव्यादिरूपतया तदेकत्वस्याऽप्यभ्युपगमात् । अतो गम्भीरमिदं स्थिरबुद्धिभिः परिभावनीयम् । तस्माद् घटादिपर्याया नास्तित्वेनाऽक्षरेऽपि संबद्धा इति । तत्पर्याया अप्येतेऽस्तित्वेन घटादावेव संबद्धाः, न त्वक्षरे, इति परपर्यायतान्यपदेश इति स्थितमिति ॥ ४७९ ॥

यदि घटादिपर्यायास्तत्राऽक्षरेऽसंबद्धत्वेन परपर्याया व्यपदिश्यन्ते, तर्हि ते तस्य कथमुच्यन्ते ?, इत्याह—

चाय-सपज्जायविसेसणाइणा[1] तस्स जमुवउज्जंति । सधणमिवासंबद्धं भवंति तो पज्जया तस्स ॥ ४८० ॥

ततस्तस्माद् घटादिपर्याया अपि तस्याऽक्षरस्य पर्याया भवन्ति, यतोऽक्षरस्याऽपि त उपयुज्यन्ते- उपयोगं यान्ति । केन ?, इत्याह- त्याग-स्वपर्यायविशेषणादिना— त्यागेन स्वपर्यायविशेषणेन चोपयोगादित्यर्थः । इदमुक्तं भवति- घटादिपर्यायाः सत्त्वेनाऽक्षरेऽसंबद्धा अपि तत्पर्याया भवन्ति, त्यागेनाऽभावेनोपयुज्यमानत्वात् । यदि हि तत्र तेषामभावो न भवेत् तर्हि तदक्षरं घटादिभ्यो व्यावृत्तं न सिद्ध्येत्, तत्रापि घटादिपर्यायाणां भावात्, इत्यतोऽक्षरस्य त्यागेनाऽभावेनोपयोगाद् घटादिपर्यायास्तस्य भवन्ति । तथा, स्वपर्यायाणां विशेषणेन विशेषव्यवस्थापकत्वेन परपर्याया अपि तस्य भवन्ति । न हि परपर्यायेष्वसत्सु स्वपर्यायाः केचिद् भेदेन सिद्ध्यन्ति, स्व-परशब्दयोरापेक्षिकत्वात् । प्रयोगः- इह यद्यस्योपयुज्यते तद् भेदवत्यपि तस्येति व्यपदिश्यते, यथा देवदत्तादेः स्वधनम्, उपयुज्यन्ते च त्याग-स्वपर्यायविशेषणादिभावेन घटादिपर्याया अप्यक्षरस्य, अतस्ते तस्याऽपि भवन्ति । एवमक्षरपर्याया अपि घटादेर्वाच्या इति॥४८०॥

एतदेव भावयति—

सधणमसंबद्धं पि हु चेयण्णं पिव नरे जहा तस्स[2] । उवउज्जइ त्ति सधणं भण्णइ तह तस्स पज्जाया॥४८१॥

इह देवदत्तादिके नरे चैतन्यं यथाऽऽत्मनि संबद्धं, तथा स्वधनमसंबद्धमपि स्वधनं तस्य लोके भण्यते । कुतः ?, उपयुज्यत इति कृत्वा । तथाऽक्षरेऽसंबद्धा अपि घटादिपर्यायास्तस्याऽक्षरस्य पर्याया भवन्ति ॥ ४८१ ॥

अमुमेवाऽर्थं दृष्टान्तान्तरेण साधयति-

जह दंसण-नाण-चरित्तगोयरा सव्वदव्वपज्जाया । सद्धेय-नेय-किरियाफलोवओगि त्ति भिन्ना वि ॥४८२॥
जइणो सपज्जाया इव सकज्जनिप्फायग त्ति सधणं व[3] । आयाण-च्चायफला तह सव्वेसं पि वण्णाणं॥४८३॥

इह यथा सर्वद्रव्य-पर्याया भिन्ना अपि सन्तो यतेरेते भवन्ति- यतेः संबन्धिनो व्यपदिश्यन्ते । कुतः ?, इत्याह- स्वकार्य-

---

१ त्यक्ता-स्वपर्यायविशेषणादिना तस्य यदुपयुज्यन्ते । स्वधनमिवाऽसंबद्धं, भवन्ति ततः पर्यायास्तस्य ॥ ४८० ॥

२ स्वधनमिवाऽसंबद्धमपि खलु चैतन्यमिव नरे यथा तस्य । उपयुज्यत इति स्वधनं, भण्यते तथा तस्य पर्यायाः ॥ ४८१ ॥

३ यथा दर्शन-ज्ञान-चारित्रगोचराः सर्वद्रव्य-पर्यायाः । श्रद्धेय-ज्ञेय-क्रियाफलोपयोगिन इति भिन्ना अपि ॥ ४८२ ॥
यतेः स्वपर्याया इव स्वकार्यनिष्पादका इति स्वधनमिव । आदान-त्यागफलास्तथा सर्वेषामपि वर्णानाम् ॥ ४८३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निष्पादका इति हेतोः । एतदपि कुतः ?, इत्याह– श्रद्धेय-ज्ञेय-क्रियाफलोपयोगिनो यतेरिति कृत्वा– श्रद्धेयत्वेनोपयोगात्, ज्ञेयत्वेनोपयोगात्, त्यागा-ऽऽदानादिक्रियारूपं यच्छुद्धान-ज्ञानफलं तदुपयोगित्वाच्चेति । कथंभूतास्ते सर्वद्रव्य-पर्यायाः ?, इत्याह– दर्शन-ज्ञान-चारित्रगोचराः सम्यग्दर्शन-ज्ञान-चारित्रविषयभूताः, ते हि सम्यग्दर्शनेन श्रद्धीयन्ते, ज्ञानेन तु ज्ञायन्ते, चारित्रस्याऽप्याहार-वस्त्र-पात्राद्युपकरण-भेषज-शिष्यादिद्वारेणोपष्टम्भहेतवो बहवो भवन्ति "अव्ववहारओ[1] नेरइया" इति वचनात् । अथवा,

" पढमम्मि सव्वजीवा बीए चरिमे य सव्वदव्वाइं । सेसा महव्वया खलु तदेकदेसेण दव्वाणं " ॥ १ ॥

इति वचनात् । एते सर्वेऽपि ज्ञान-दर्शन-चारित्रगोचराः, व्रतानां चारित्रात्मजत्वात्, चारित्रस्य च ज्ञान-दर्शनाभ्यां विनाऽभावात् । अत एवैते श्रद्धेयत्वाद्युपयोगिनः, एतानन्तरेण श्रद्धानाद्ययोगात्, विषयमन्तरेण विषयिणोऽनुपपत्तेः । के यथा स्वकार्यनिष्पादकाः सन्तो यतेर्भवन्ति ?, इत्याह– यथा ज्ञान-दर्शनादिरूपाः स्वपर्यायाः, स्वधनं वा यथा भिन्नमपि देवदत्तादेर्भवति, तथा सर्वेऽपि द्रव्य-पर्यायास्त्यागा-ऽऽदानफलत्वात् प्रत्येकं सर्वेषामप्यकारादिवर्णानाम्, उपलक्षणत्वाद् घटादीनां च भिन्ना अपि भवन्तीति ॥४८२॥४८३॥

न चैतदुत्सूत्रम्, इति दर्शयति–

[2]एगं जाणं सव्वं जाणइ सव्वं च जाणमेगं ति । इय सव्वमजाणंतो नागारं सव्वहा मुणइ ॥ ४८४ ॥

इह सूत्रेऽप्युक्तम्–"[3]जे एगं जाणइ से सव्वं जाणइ, जे सव्वं जाणइ से एगं जाणइ" इति । किमुक्तं भवति– एकं किमपि वस्तु सर्वैः स्व-परपर्यायैर्युक्तं जानन्नवबुध्यमानः सर्वं लोका-ऽलोकगतं वस्तु सर्वैः स्व-परपर्यायैर्युक्तं जानाति, सर्ववस्तुपरिज्ञाननान्तरीयकत्वादेकवस्तुज्ञानस्य । यश्च सर्वं सर्वपर्यायोपेतं वस्तु जानाति स एकमपि सर्वपर्यायोपेतं जानाति, एकपरिज्ञानाऽविनाभावित्वात् सर्वपरिज्ञानस्य । एतच्च प्रागपि भावितमेवेति । अतः सर्वं सर्वपर्यायोपेतं वस्त्वजानानो नाकाररूपमक्षरं सर्वथा सर्वप्रकारैः सर्वपर्यायोपेतं जानाति । तस्माच्छेषसमस्तवस्तुपरिज्ञानैरेवैकमक्षरं ज्ञायते, नाऽन्यथेति भावः ॥ ४८४ ॥

यदि नामैवम्, तथापि प्रस्तुते घटादिपर्यायाणामक्षरपर्यायत्वे किमायातम् ?, इत्याह–

+अव्यवहारीओ- । १ अव्यवहारिणो नैरयिकाः । २ प्रथमे सर्वजीवा द्वितीये चरमे च सर्वद्रव्याणि । शेषा महाव्रताः खलु तदेकदेशेन द्रव्याणाम् ॥ १ ॥
३ घ.छ. 'तदेक' । ४ एकं जानन् सर्वं जानाति सर्वं च जानन्नेकमिति । इति सर्वमजानन् नाऽकारं सर्वथा जानाति ॥ ४८४ ॥
५ य एकं जानाति स सर्वं जानाति, यः सर्वं जानाति स एकं जानाति । ६ घ.छ. 'नाणेव, ए' ।

३४

[1]जेसु अनाएसु तओ न नज्जए, नज्जए य नाएसु । किह तस्स ते न धम्मा घडस्स रूवाइधम्म व्व ? ॥४८५॥

तत् तस्माद् येषु घटादिपर्यायेष्वज्ञातेषु यदेकं प्रस्तुतमक्षरं न ज्ञायते, ज्ञातेषु च ज्ञायते, ते घटादिपरपर्यायाः कथं न तस्य[2] धर्माः ? अपि तु धर्मा एव, यथा घटस्य रूपादयः । प्रयोगः– येषामनुपलब्धौ यद् नोपलभ्यते, उपलब्धौ चोपलभ्यते, तस्य ते धर्मा एव, यथा घटस्य रूपादयः, नोपलभ्यते च प्रस्तुतमेकमक्षरं समस्तघटादिपरपर्यायाणामनुपलब्धौ, उपलभ्यते च तदुपलब्धौ, इति ते तस्य धर्मा इति ॥ ४८५ ॥

इह चाक्षरं विचारयितव्यं 'प्रस्तुतम्' इत्येतावन्मात्रेणैव तत्सर्वद्रव्य-पर्यायराशिप्रमाणं साधितम् । न चैतदेव केवलमित्थंभूतं द्रष्टव्यम्, किन्त्वस्ति यत् किमपि वस्तु; तत् सर्वमित्थंभूतमेव, सर्वस्याऽपि व्यावृत्तिरूपतया परपर्यायसद्भावात्, इत्याह–

[3]न हि नवरमक्खरं सव्वदव्व-पज्जायमाणमण्णं पि । जं वत्थुमत्थि लोए तं सव्वं सव्वपज्जायं ॥४८६॥

गतार्थैव ॥ ४८६ ॥

यद्येवम्, किमक्षरमेवाऽङ्गीकृत्येदं पर्यायमानमुक्तम् ?, इति भाष्यकार एवोत्तरमाह–

[4]इहक्खराहिगारो पण्णवणिज्जा य जेण तव्विसओ । ते चिंतिज्जंतेवं कइभागो सव्वभावाणं ? ॥४८७॥

इहाऽक्षराधिकारो यस्मात् प्रस्तुतः, अतस्तस्यैवेदं पर्यायमानमुक्तं द्रष्टव्यम्, उपलभ्यते च सर्वं वस्त्वित्थमेव । भवत्वेवम्, किन्तु प्रस्तुतस्याक्षरस्य के स्वपर्यायाः, के च परपर्यायाः ?, इत्यादि निवेद्यताम्, इत्याह–'पण्णवणिज्जेत्यादि' तस्य सामान्येनाऽकाराक्षरस्य स्वपर्यायतया विषयस्तद्विषयः । येन यतः के ?, इत्याह– प्रज्ञापनीया अभिलाप्याः पर्यायाः, न पुनरभिलाप्याः । अतस्त एव चिन्त्यन्ते विचार्यन्ते । कथम् ?, इत्याह– कतिथो भागस्ते भवन्ति । केषाम् ?, सर्वभावानां सर्वेषामभिलाप्या-ऽनभिलाप्यपर्यायाणां समुदितानामित्यर्थः । इदमुक्तं भवति– अभिलाप्यं वस्तु सर्वमक्षरेणोच्यते । अतस्तदभिधानशक्तिरूपाः सर्वेऽपि तस्याऽभिलाप्याः प्रज्ञापनीयाः स्वपर्याया उच्यन्ते । शेषास्त्वनभिलाप्याः परपर्यायाः । अतस्तेऽभिलाप्याः स्वपर्यायाः सर्वपर्यायाणां कतिथो भागो भवति, इत्येवं विचिन्त्यत इति ॥ ४८७ ॥

---

१ येष्वज्ञातेषु ततो न ज्ञायते, ज्ञायते च ज्ञातेषु । कथं तस्य ते न धर्मा घटस्य रूपादिधर्मा इव ? ॥ ४८५ ॥ २ ख.घ.छ. 'ते तस्य ध' ।
३ न हि नवरमक्षरं सर्वद्रव्य-पर्यायमानमन्यदपि । यद् वस्त्वस्ति लोके तत् सर्वं सर्वपर्यायम् ॥ ४८६ ॥ ×प्रस्तुताक्षरस्थ-।
४ इहाक्षराधिकारः प्रज्ञापनीयाश्च येन तद्विषयः । ते चिन्त्यन्त एवं कतिभागाः सर्वभावानाम् ? ॥४८७॥ ५ घ.छ. 'तदभि' । ६ घ.छ. 'स्व-परप' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

कथम् ?, इत्याह–

[1]पण्णवणिज्जा भावा वण्णाण सपज्जया तओ थोवा । सेसा परपज्जाया तोऽणंतगुणा निरभिलप्पा ॥४८८॥

यतः प्रज्ञापनीया अभिलाप्या भावाः सामान्येन वर्णानामकारादीनां स्वपर्यायास्ततः स्तोका अनन्तभागवर्तिनः । शेषास्तु तमनिरभिलाप्याः प्रज्ञापयितुमशक्याः सर्वेऽपि परपर्याया इतिः अतः स्वपर्यायेभ्योऽनन्तगुणाः । सर्वस्याऽपि हि वस्तुनो लोका-ऽलोकाकाशं विहाय स्तोकाः स्वपर्यायाः, परपर्यायास्त्वनन्तगुणाः । लोका-ऽलोकाकाशस्य तु केवलस्याऽप्यनन्तगुणत्वात्, शेषपदार्थानां तु समुदितानामपि तदनन्तभागवर्तित्वात् विपरीतं द्रष्टव्यम्– स्तोकाः परपर्यायाः, स्वपर्यायास्त्वनन्तगुणाः ।

अत्र विनेयानुग्रहार्थं स्थापना काचिद् निदर्श्यते, तद्यथा– सर्वाकाशप्रदेशराशेरन्ये सर्वेऽपि धर्मास्तिकाय-प्रदेश-परमाणु-द्वयणुकादयः पदार्थाः सद्भावतोऽनन्ता अपि कल्पनया किल दश, सर्वाकाशप्रदेशपदार्थास्तु केवला अपि किल शतम्, प्रतिपदार्थं च पञ्च पञ्च स्वपर्यायाः । एवं च सति धर्मास्तिकायप्रदेशादीनां सर्वेषामपि पदार्थानां पञ्चाशदेव स्वपर्यायाः, ते च नभसः परपर्यायाः, स्तोकाश्च स्वपर्यायाणां तु पञ्च शतानि, बहवश्चामी परपर्यायेभ्यः । तस्माच्छेषपदार्थानां सर्वेषामपि नभसोऽनन्ततमभागवर्तित्वात्, नभसस्तु केवलस्याऽपि तेभ्योऽनन्तगुणत्वात् स्वपर्यायाऽल्प-बहुत्ववैपरीत्यं द्रष्टव्यमिति । नभसोऽन्यपदार्थानां त्वनेनैव निदर्शनेन स्वपर्यायाणां स्तोकत्वं, परपर्यायाणां तु बहुत्वं परिभावनीयम्, तथाहि– किलैकस्मिन् धर्मास्तिकायप्रदेशे पञ्च स्वपर्यायाः, परपर्यायाणां तु पञ्चचत्वारिंशदधिकानि पञ्च शतानि । एवमक्षर-परमाण्वादावपि वाच्यम् । इत्यलं विस्तरेणेति ॥ ४८८ ॥

अत्र परो भाष्यस्याऽऽगमेन सह विरोधमुद्भावयति–

[2]नणु सव्वागासपएसपज्जाया वण्णमाणमाइट्ठं । इह सव्वदव्व-पज्जायमाणगहणं किमत्थं ति ? ॥ ४८९ ॥

'ननु' इत्यसूयायाम्, सर्वस्य लोका-ऽलोकवर्तिन आकाशस्य प्रदेशास्तेषां मीलिता ये सर्वेऽपि पर्यायास्ते, वर्णस्य पर्यायाणां ज्ञानं परिमाणमादिष्टम्– सर्वाकाशप्रदेशानां यावन्तः सर्वेऽपि पर्यायास्तावन्त एकस्याऽक्षरस्य पर्याया भवन्ति, इत्येतावदेवाऽऽगमे प्रोक्तमि

---

१ प्रज्ञापनीया भावा वर्णानां स्वपर्यायास्ततः स्तोकाः । शेषाः परपर्यायास्ततोऽनन्तगुणा निरभिलाप्याः ॥ ४८८ ॥ २ घ.छ. 'यादिम्'।

३ ननु सर्वाकाशप्रदेशपर्याया वर्णमानमादिष्टम् । इह सर्वद्रव्यपर्यायमानग्रहणं किमर्थमिति ? ॥ ४८९ ॥

त्यर्थः; इह तु "तं सव्वदव्व-पज्जायरासिमाणं मुणेयव्वं' इत्यत्र किमिति सर्वद्रव्य-पर्यायमानग्रहणं कृतम् ? । इदमुक्तं भवति– "सव्वागासपएसग्गं सव्वागासपएसेहिं अणंतगुणियं पज्जवक्खरं निप्फज्जइ" इति नन्दिसूत्रे प्रोक्तम् । एतच्च वृत्तौ तत्र व्याख्यातम्, तद्यथा–

"सर्वे च तदाकाश[1]लोका-लोकाकाशमित्यर्थः, तस्य च प्रदेशा निर्विभागा भागास्तेषामग्रं परिमाणं सर्वाकाशप्रदेशाग्रं, सर्वाकाशप्रदेशैः, किं ? अनन्तगुणितमनन्तशो गुणितमनन्तगुणितम्, एकैकस्मिन्नाकाशप्रदेशेऽनन्तानामगुरुलघुपर्यायाणां सद्भावात्, पर्यायाक्षरं[2] पर्यायपरिमाणाक्षरं निष्पद्यते' इति ।

तदेवमागमे केवलसर्वाकाशप्रदेशपर्यायराशिप्रमाणमक्षरपर्यायमानमुक्तम्, अत्र तु धर्मा-ऽधर्मा-ऽऽकाश-पुद्गल-जीवास्तिकाय-काललक्षणसर्वद्रव्य-पर्यायराशिप्रमाणं तदुच्यते, इति कथं न विरोधः ? इति ॥ ४८९ ॥

अत्रोत्तरमाह–

[3]थोव त्ति न निद्दिट्ठा इहरा धम्मत्थियाइपज्जाया । के स-परपज्जयाणं [4]हवंतु, किं होतु वाऽभावो ? ॥४९०॥

स्तोका आकाशपर्यायेभ्योऽनन्तभागवर्तिन इति कृत्वा नन्दिसूत्रे धर्मास्तिकायादीनां पञ्चद्रव्याणां पर्याया न निर्दिष्टा नाभिहिताः साक्षात्, किन्तु य एव तेभ्योऽतिबहवोऽनन्तगुणास्त एव सर्वाकाशपर्यायाः साक्षादुक्ताः, अर्थतस्तु धर्मास्तिकायादिपर्याया अपि नन्दिसूत्रे प्रोक्ता द्रष्टव्याः, इतरथा– यद्येतद् नाभ्युपगम्यते, तदा ते धर्मास्तिकायादिपर्याया अक्षरस्य स्व-परपर्यायाणां मध्यात् के भवन्तु– किं स्वपर्याया भवन्तु ?, परपर्याया वा ?, किंवाऽभावः खरविषाणरूपो भवतु ?, इति त्रयी गतिः । त्रिभुवने हि ये पर्यायास्ते सर्वैरप्यक्षरादेर्वस्तुनः स्वपर्यायैर्वा भवितव्यम्, परपर्यायैर्वा, अन्यथाऽभावप्रसङ्गात्; तथाहि– ये केचन क्वचित् पर्यायाः सन्ति तेऽक्षरादिवस्तुनः स्व-परपर्यायान्यतररूपा भवन्त्येव, यथा रूपादयः, ये त्वक्षरादेः स्वपर्यायाः परपर्याया वा न भवन्ति, ते न सन्त्येव यथा खरविषाणतैक्ष्ण्यादयः । तस्माद् धर्मास्तिकायादिपर्यायाः सूत्रे स्तोकत्वेनाऽनुक्ता अपि "जे एगं जाणइ से सव्वं जाणइ" इत्यादिसूत्रप्रामाण्यादर्थतोऽक्षरस्य परपर्यायत्वेनोक्ता द्रष्टव्या इति ॥ ४९० ॥

अथान्यत् प्रेरयति–

---

१ गाथा ४७७ । २ सर्वाकाशप्रदेशाग्रं सर्वाकाशप्रदेशैरनन्तगुणितं पर्यवाक्षरं निष्पद्यते । + - च सर्वाकाशं - .

३ स्तोका इति न निर्दिष्टा इतरथा धर्मास्तिकायादिपर्यायाः । के स्व-परपर्ययाणां भवन्तु, किं भवतु वाऽभावः ? ॥ ४९० ॥

४ घ. छ. 'वंति किं' । ५ य एकं जानाति स सर्वं जानाति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]किमणंतगुणा भणिया जमगुरुलहुपज्जया पएसम्मि । एक्कैक्कम्मि अणंता पण्णत्ता वीयरागेहिं ॥ ४९१ ॥

ननु "सव्वागासपएसग्गं सव्वागासपएसेहिं अणंतगुणियं" इत्यत्र किमित्याकाशप्रदेशाः सूत्रेऽनन्तगुणा भणिताः ? । अत्रोत्तरमाह– 'जमित्यादि' यद् यस्मात्कारणात् एकैकस्मिन्नाकाशप्रदेशेऽगुरुलघुपर्याया वीतरागैस्तीर्थकर-गणधरैरनन्ताः प्रज्ञप्ताः प्ररूपिताः । ततश्चाऽयमभिप्रायः– इह निश्चयनयमतेन बादरं वस्तु सर्वमपि गुरुलघु, सूक्ष्मं त्वगुरुलघु । तत्राऽगुरुलघुवस्तुसंबन्धिनः पर्याया अप्यगुरुलघवः [illegible] भिधीयन्ते, आकाशप्रदेशाश्चाऽगुरुलघवः, अतस्तत्पर्याया अप्यगुरुलघवो भण्यन्ते । ते च तेषु प्रत्येकमनन्ताः सन्ति । [2]दशाग्रं सर्वाकाशप्रदेशैरनन्तगुणमुक्तमिति भाव इति ॥ ४९१ ॥

तरेण प्रेरयन्नाह–

थाविसेसियं नाणमक्खरं इह सुयक्खरं पगयं । तं किह केवलपज्जायमाणतुल्लं हविज्जाहि ? ॥४९२॥

– "सव्वागासपएसग्गं सव्वागासपएसेहिं अणंतगुणियं पज्जवक्खरं निप्फज्जइ" इत्यत्र सूत्रे नन्द्यध्ययनेऽविशेषितं [3]नाणमक्खरं ति' ज्ञानमक्षरं प्रतिपादितम्, अविशेषाभिधाने च केवलज्ञानस्य महत्त्वात् तदेव तत्राऽक्षरं गम्यते, इह तु [illegible]चाराधिकारात् श्रुताक्षरमकाराद्येवाऽक्षरशब्दवाच्यत्वेन प्रकृतं प्रस्तुतम् । ततः को दोषः ?, इत्याह– तच्चाऽकारादि श्रुताक्षरं कथं केवलपर्यायमानतुल्यं भवेत् ?– न कथञ्चिदित्यर्थः । अयमभिप्रायः– केवलस्य सर्वद्रव्य-पर्यायवेत्तृत्वाद् भवतु सर्वद्रव्य-पर्यायमानता, श्रुतस्य तु तदनन्तभागविषयत्वात् कथं तत्पर्यायमानतुल्यता ? इति ॥

अत्रोच्यते– ननु तत्रापि '[4]अक्खर सण्णी सम्मं साइयं खलु' इत्यादिप्रक्रमेऽपर्यवसितश्रुते विचार्यमाणे "सव्वागासपएसग्गं" इत्यादि सूत्रं पठ्यते, ततो यथेह, तथा तत्रापि श्रुताधिकारादक्षरमकाराद्येव गम्यते न तु केवलाक्षरम् । अथ ब्रूषे– तत्र द्वितीयमनन्तरं सूत्रं यत् पठ्यते "[5]सव्वजीवाणं पि य णं अक्खरस्स अणंतभागो निच्चुग्घाडियओ" इति, एतस्मात् केवलाक्षरं तत्र गम्यते, न तु

१ किमनन्तगुणा भणिता यदगुरुलघुपर्यायाः प्रदेशे । एकैकस्मिन्ननन्ताः प्रज्ञप्ता वीतरागैः ॥ ४९१ ॥ + तथा–।

२ सर्वाकाशप्रदेशाग्रं सर्वाकाशप्रदेशैरनन्तगुणितम् ।

३ तत्राविशेषितं ज्ञानमक्षरमिह श्रुताक्षरं प्रकृतम् । तत् कथं केवलपर्यायमानतुल्यं भवेत् ? ॥ ४९२ ॥

४ सर्वाकाशप्रदेशाग्रं सर्वाकाशप्रदेशैरनन्तगुणितं पर्यवाक्षरं निष्पद्यते । ५ ध. छ. 'रात् श्रु' ।

६ गाथा ४९४ । ७ सर्वजीवानामपि चाऽक्षरस्याऽनन्तभागो नित्योद्घादितः ।

श्रुताक्षरम्, सकलद्वादशाङ्गविदां संपूर्णस्याऽपि श्रुताक्षरस्य सद्भावात्, 'सर्वजीवानामक्षरस्याऽनन्तभागो नित्योद्घाटः' इत्यस्याऽर्थस्याऽनुपपत्तेः । अहो ! असमीक्षिताभिधानम्, यत एवं सति केवलाक्षरमपि तत्र नोपपद्यते, केवलिनां संपूर्णस्याऽपि केवलाक्षरस्य सद्भावात्, 'सर्वजीवानामक्षरस्याऽनन्तभागो नित्योद्घाटः' इत्यस्याऽर्थस्यानुपपत्तेरेव । अथ मन्यसे– तत्राऽविशेषेण सर्वजीवग्रहणे सत्यपि प्रकरणात्, अपिशब्दाद् वा केवलिनो विहायाऽन्येषामेवाऽक्षरस्याऽनन्तभागो नित्योद्घाट इति केवलाक्षरग्रहणेऽविरोधः । हन्त ! तदेतत् श्रुताक्षरग्रहणेऽपि समानम्, यतस्तत्राऽविशेषेण सर्वजीवग्रहणे सत्यपि प्रकरणात्, अपिशब्दाद् वा समस्तद्वादशाङ्गीविदो विहायाऽन्येषामेवाऽस्मदादीनामक्षरस्याऽनन्तभागो नित्योद्घाट इतीहापि शक्यत एव वक्तुम् । तस्मात् तत्र, इह च श्रुताक्षरमकाराद्येव गम्यते ॥ ४९२ ॥

यदि वाऽत्र श्रुताक्षरं तत्र केवलाक्षरमपि भवतु, न च श्रुताक्षरस्य केवलपर्यायतुल्यमानता विरुध्यते । कथम् ?, इत्याह–

[6]सयपज्जवेहिं तं केवलेण तुल्लं न होज्ज न परेहिं । स-परपज्जाएहि उ तुल्लं तं केवलेणेव ॥४९३॥

स्वकाः स्वकीया अकारे-कारो-कारादयोऽनुगताः श्रुतज्ञानस्य स्वपर्याया इत्यर्थः, तैरनुगतैः स्वपर्यायैस्तत् श्रुताक्षरं केवलेन केवलाक्षरेण तुल्यं न भवेत्, सर्वपर्यायानन्तभागवर्तित्वाच्छ्रुतज्ञानस्वपर्यायाणाम् ; केवलज्ञानं तु सर्वद्रव्य-पर्यायराशिप्रमाणं, सर्वेष्वपि तेषु व्यापारात्, तथाहि—लोके समस्तद्रव्याणां पिण्डितः पर्यायराशिरनन्तानन्तस्वरूपोऽप्यसत्कल्पनया किल लक्षम्, एतन्मध्याच्छ्रुतज्ञानस्य स्वपर्यायाणां किल शतम्, तदूनलक्षं तु परपर्यायाः, केवलज्ञाने त्वेतल्लक्षमपि पर्यायाणामुपलभ्यते, सर्वोपलब्धिस्वभावात् तस्य । ते चोपलब्धिविशेषाः सर्वेऽपि केवलस्य पर्यायाः स्वभावाः, ज्ञेयोपलब्धिस्वभावत्वात् ज्ञानस्य । एवं च सति लक्षपर्यायं केवलं, श्रुतस्य तु शतं स्वपर्यायाणाम् । अतस्तैस्तत्केवलपर्यायराशितुल्यं न भवेदिति स्थितम् । तर्हि परपर्यायैस्तत् तस्य तुल्यं भविष्यतीत्याह– न परैः– नापि परपर्यायैस्तत् केवलेन तुल्यं भवेत् ; तथाहि[7]– घटादिव्यावृत्तिरूपाः परपर्यायास्तस्य विद्यन्तेऽनन्तानन्ताः, कल्पनया तु शतोनलक्षमानाः, तथापि सर्वद्रव्य-पर्यायराशितुल्या न भवन्ति, सर्वपर्यायानन्तभागेन कल्पनया शतरूपेण सद्भावतस्त्वनन्तात्मकेन स्वपर्यायराशिना न्यूनत्वात्, केवलस्य तु संपूर्णसर्वपर्यायराशिमानत्वादिति । स्व-परपर्यायैस्तु तत् केवलपर्यायतुल्यमेव, केवलवत् तस्यापि सर्वद्रव्य-पर्यायप्रमाणत्वादिति ॥ ४९३ ॥

आह—यथेवम्, केवलेन सहाऽस्य को विशेषः ? । उच्यते अस्ति विशेषः, यतः—

१ स्वकपर्यायैस्तत् केवलेन तुल्यं न भवेद् न परैः । स्व-परपर्यायैस्तु तुल्यं तत् केवलेनैव ॥ ४९३ ॥ + ते हि–।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अविसेसकेवलं पुण सयपज्जाएहिं चेव तत्तुल्लं । जं नेयं पइ तं सव्वभावव्वावारविणिउत्तं ॥ ४९४ ॥

उभयत्र सर्वद्रव्य-पर्यायराशिप्रमाणत्वे तुल्येऽपि श्रुत-केवलयोरस्ति विशेष इत्येवं पुनः शब्दोऽत्र विशेषद्योतनार्थः । कः पुनरसौ विशेषः ?, इत्याह– अविशेषेण पर्यायसामान्येन युक्तं केवलमविशेषकेवलं स्व-परविशेषरहितैः सामान्यत एवाऽनन्तपर्यायैर्युक्तं केवलज्ञानमविशेषकेवलमित्यर्थः । तदेवंभूतं केवलं स्वपर्यायैरेव तत्तुल्यं– तेन प्रक्रमानुवर्तमानसर्वद्रव्य-पर्यायराशिना तुल्यं तत्तुल्यं, श्रुतज्ञानं तु समुदितैरेव स्व-परपर्यायैस्तत्तुल्यमिति विशेष इति भावः । कथं पुनः केवलज्ञानस्य तावन्तः पर्यायाः ?, इत्याह– 'जं नेयमित्यादि' यद् यस्मात् केवलज्ञानं सर्वद्रव्य-पर्यायलक्षणं ज्ञेयं प्रति सर्वभावेषु निःशेषज्ञातव्यपदार्थेषु योऽसौ परिच्छेदलक्षणो व्यापारस्तत्र विनियुक्तं प्रतिसमयं प्रवृत्तिमदित्यर्थः । इदमुक्तं भवति– केवलज्ञानं सर्वानपि सर्वद्रव्य-पर्यायान् जानाति, ते च तेन ज्ञायमाना ज्ञानवादिनयमतेन तत्स्वरूपतया परिणताः, ततो ज्ञानमयत्वात् ते केवलस्य स्वपर्याया एव भवन्ति, अतः केवलज्ञानं तैरेव सर्वद्रव्य-पर्यायराशितुल्यं भवति । श्रुतादिज्ञानानि तु सर्वद्रव्य-पर्यायराशेरनन्ततममेव भागं जानन्ति । अतस्तेषां स्वपर्याया एतावन्त एव भवन्ति, अतो न श्रुतज्ञानं स्वपर्यायैस्तत्तुल्यं, तदनन्तभागवर्तिस्वपर्यायमानत्वात्, इति श्रुत-केवलयोर्विशेषः । अत्र पक्षे केवलस्य परपर्यायविवक्षा न कृता । ये हि केवलस्य निःशेषज्ञेयगता विषयभूताः पर्यायास्ते ज्ञानाद्वैतवादिनयमतेन ज्ञानरूपत्वादर्थापत्त्यैव स्वपर्यायाः प्रोक्ताः, न तु परपर्यायापेक्षया, इत्यविशेषकेवलत्वविरोधो नाशङ्कनीय इति ॥ ४९४ ॥

तदेवं ज्ञानवादिनयमतविवक्षयैव केवलस्य परपर्यायाभावः प्रोक्तः, वस्तुस्थित्या पुनरिदमपि स्व-परपर्यायान्वितमेवेति दर्शयति––

वत्थुसहावं पइ तं पि स-परपज्जायभेयओ भिन्नं । तं जेण जीवभावो भिन्ना य तओ घडाईया ॥४९५॥

वस्तुस्वभावं प्रति यथावस्थितंवस्तुस्वरूपमाश्रित्य तदपि केवलज्ञानमकाराद्यक्षरवत् स्व-परपर्यायभेदतो भिन्नमेव, न तु यथोक्तनीत्या स्वपर्यायान्वितमेवेति भावः । कुतः ?, इत्याह– येन कारणेन तत्केवलज्ञानं जीवभावः प्रतिनियतो जीवपर्यायो न घटादिस्वरूपं तत्, नापि घटादयस्तत्स्वभावाः, किंतु ततो भिन्नाः । इति तेन ज्ञायमाना अपि कथं तस्य स्वपर्याया भवेयुः, सर्वसंकरैकत्वादिप्रसङ्गात् ?। तस्मादमूर्तत्वाच्चेतनवत्त्व-सर्ववेत्तृत्वा-ऽप्रतिपातित्व-निरावरणत्वादयः केवलज्ञानस्य स्वपर्यायाः, घटादिपर्यायास्तु व्यावृत्तिमाश्रित्य परपर्यायाः ।

---

१ अविशेषकेवलं पुनः स्वकपर्यायैरेव तत्तुल्यम् । यज्ज्ञेयं प्रति तत् सर्वभावव्यापारविनियुक्तम् ॥ ४९४ ॥

२ वस्तुस्वभावं प्रति तदपि स्व-परपर्यायभेदतो भिन्नम् । तत् येन जीवभावो भिन्नाश्च ततो घटादिकाः ॥ ४९५ ॥ ३ क.ख.ग. 'तं व' ।

अन्ये तु व्याचक्षते– सर्वद्रव्यगतान् सर्वानपि पर्यायान् केवलज्ञानं जानाति, येन च स्वभावेनैकं पर्यायं जानाति न तेनैवाऽपरमपि, किन्तु स्वभावभेदेन, अन्यथा सर्वद्रव्य-पर्यायैकत्वप्रसङ्गात् । तस्मात् सर्वद्रव्य-पर्यायराशितुल्याः स्वभावभेदलक्षणाः केवलज्ञानस्य स्वपर्यायाः, सर्वद्रव्य-पर्यायास्तु परपर्यायाः, इत्येवं स्वपर्यायाः, परपर्यायाश्चोभयेऽपि परस्परं तुल्याः केवलस्येति ॥ ४९५ ॥

एवं च सति किं स्थितम् ?, इत्याह–

अविसेसियं पि सुत्ते अक्खरपज्जायमाणमाइट्ठं । सुय-केवलक्खराणं एवं दोण्हं पि न विरुद्धं ॥ ४९६ ॥

एवं सत्यविरुद्धम्– एवं सत्यविशिष्टमपि नन्दिसूत्रे यत्सर्वाकाशप्रदेशाग्रमनन्तगुणितमक्षरप्रमाणमादिष्टम् । तत् श्रुतस्य, केवलस्य वा न विरुद्धम्, श्रुताक्षरस्य केवलस्य चोक्तन्यायेनाऽर्थतो द्वयोरपि समानपर्यायत्वात्; तथाहि– श्रुतस्य, केवलस्य च परपर्याया निर्विवादं तुल्या एव, स्वपर्यायास्तु यद्यपि 'अन्ये तु व्याचक्षते' इत्यादिनाऽनन्तरमेवं केवलस्य भूयांसः प्रोक्ताः, तथापि तेभ्यो व्यावृत्तत्वात् तावन्तः श्रुतस्य परपर्याया वर्धन्त इति । तदेवं द्वयोरपि सामान्यतः पर्यायसमानत्वम्, इत्युभयोरपि ग्रहणे सूत्रे न किमपि क्षूयत इति॥४९६॥

नन्वेतत् सर्वपरिमाणमक्षरं किं सर्वमपि ज्ञानावरणकर्मणाऽऽव्रियते, न वा ?, इत्याह–

तस्स उ अणंतभागो निच्चुग्घाडो य सव्वजीवाणं । भणियो सुयम्मि केवलिवज्जाणं तिविहभेओ वि॥४९७॥

तस्य च सामान्येनैव सर्वपर्यायपरिमाणाऽक्षरस्याऽनन्तभागो नित्योद्घाटितः सर्वदैवाऽनावृतः केवलिवर्जानां सर्वजीवानां जघन्य-मध्यमो-त्कृष्टत्रिविधभेदोऽपि श्रुते भणितः प्रतिपादित इति ॥ ४९७ ॥

तत्र सर्वजघन्यस्याऽक्षरानन्तभागस्य स्वरूपमाह–

सो पुण सव्वजहन्नो चेयण्णं नावरिज्जइ कयाइ । उक्कोसावरणम्मि वि जलयच्छन्नक्कभासो व्व ॥ ४९८ ॥

स पुनः सर्वजघन्योऽक्षरानन्तभाग आत्मनो जीवत्वनिबन्धनं चैतन्यमात्रं, तच्च तावन्मात्रमुत्कृष्टावरणेऽपि सति जीवस्य कदाचिदपि नाव्रियते न तिरस्क्रियते, अजीवत्वप्रसङ्गात्, यथा सुष्ठ्वपि जलदच्छन्नस्याऽर्कस्याऽऽदित्यस्य भासः प्रकाशो दिन-रात्रिविभागनिबन्धनं किञ्चित्प्रभामात्रं(कदापि)नाऽऽव्रियते, एवं जीवस्याऽपि चैतन्यमात्रं कदाचिद् नाव्रियत इति भाव इति ॥ ४९८ ॥

---

१ घ.छ. 'लस्य' । २ अविशेषितमपि सूत्रेऽक्षरपर्यायमानमादिष्टम् । श्रुत-केवलाक्षरयोरेवं द्वयोरपि न विरुद्धम् ॥ ४९६ ॥ ✕ टि-१

३ तस्य त्वनन्तभागो नित्योद्घाटश्च सर्वजीवानाम् । भणितः श्रुते केवलिवर्जानां त्रिविधभेदोऽपि ॥ ४९७ ॥ ४ घ.छ. 'उण अ' ।

५ स पुनः सर्वजघन्यश्चैतन्यं नाव्रियते कदापि । उत्कृष्टावरणेऽपि जलदच्छन्नार्कभास इव ॥ ४९८ ॥ ६ घ. छ. 'त्रं ना' । ७ घ.छ. 'दापि ना' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

केषां पुनरसौ सर्वजघन्योऽक्षरानन्तभागः प्राप्यते ?, इत्याह–

थीणद्धिसहियनाणावरणोदयओ स पत्थिवाईणं । बेइंदियाइयाणं परिवड्ढए कमविसोहीए ॥ ४९९ ॥

स्त्यानर्धिमहानिद्रोदयसहितोत्कृष्टज्ञानावरणोदयादसौ सर्वजघन्योऽक्षरानन्तभागः पृथिव्याद्येकेन्द्रियाणां प्राप्यते । ततः क्रमविशुद्ध्या द्वीन्द्रियादीनामसौ क्रमेण वर्धत इति ॥ ४९९ ॥

तर्ह्युत्कृष्टः, मध्यमश्चैष केषां मन्तव्यः ?, इत्याह–

उक्कोसो उक्कोसयसुयणाणविओ, तओऽवसेसाणं । होइ विमज्झो मज्झे छट्ठाणगयाण पाएण ॥ ५०० ॥

स एवाऽक्षरानन्तभाग उत्कृष्टो भवत्युत्कृष्टश्रुतज्ञानविदः संपूर्णश्रुतज्ञानस्येत्यर्थः । अत्राह– नन्वस्य कथमक्षरानन्तभागः, यावता श्रुतज्ञानाक्षरं संपूर्णमप्यस्य प्राप्यत एव ?। सत्यम्, किन्तु संलुलितसामान्यश्रुत-केवलाक्षरापेक्षयैवाऽस्याऽक्षरानन्तभागो विवक्षितः "केवलिवज्जाणं तिविहभेओ वि' इत्यनन्तरवचनात्, अन्यथा हि यथा केवलिनः संपूर्णकेवलाक्षरयुक्तत्वेनाऽक्षरानन्तभागस्त्रिविधोऽपि न संभवति, इति तद्वर्जनं कृतम्, एवं संपूर्णश्रुतज्ञानिनोऽपि समस्तश्रुताक्षरयुक्तत्वेनाऽक्षरानन्तभागस्त्रिविधोऽपि न संभवतीति तद्वर्जनमपि कृतं स्यात् । तस्मादेसंमिलितसामान्याक्षरापेक्षयैवाऽस्याऽक्षरानन्तभागः प्रोक्तः । सामान्ये चाऽक्षरे विवक्षिते केवलाक्षरापेक्षया श्रुतज्ञानाक्षरस्य संपूर्णस्याऽप्यनन्तभागवर्तित्वं युक्तमेव, केवलज्ञानस्वपर्यायेभ्यः श्रुतज्ञानस्वपर्यायाणामनन्तभागवर्तित्वात्, तस्य परोक्षविषयत्वेनाऽस्पष्टत्वाच्चेति । यच्च समुदितस्व-परपर्यायापेक्षया श्रुत-केवलाक्षरयोस्तुल्यत्वं तदिह न विवक्षितमेवेति ।

अन्ये तु– 'सो पुण सव्वजहन्नो चेयण्ण' इत्यादिगाथायां " स पुनरक्षरलाभः " इति व्याचक्षते । इदं चानेकदोषान्वितत्वात्, जिनभद्रगणिक्षमाश्रमणपूज्यटीकायां चादर्शनादसंगतमेव लक्षयामः; तथाहि– ' तस्स उ अणंतभागो निच्चुग्घाडो ' इत्याद्यनन्तरगाथायामक्षरानन्तभाग एव प्रकृतः, अक्षरलाभस्त्वनन्तरपरामर्शिना तच्छब्देन कुतो लब्धः ?, किमाकाशात् पतितः ? । किञ्च, यद्यक्षरलाभ इतीह व्याख्यायते, तर्हि 'केवलिवज्जाणं तिविहभेओ वि ' इत्यत्र किमिति केवलिनो वर्जनं कृतम् ? । यथा हि श्रुताक्षरमाश्रित्यो-

१ स्त्यानर्धिसहितज्ञानावरणोदयतः स पृथिव्यादीनाम् । द्वीन्द्रियादिकानां परिवर्धते क्रमविशुद्ध्या ॥ ४९९ ॥ २ घ. छ. 'डूढइ क' ।

३ उत्कृष्ट उत्कृष्टश्रुतज्ञानविदः, ततोऽवशेषाणाम् । भवति विमध्यो मध्ये षट्स्थानगतानां प्रायेण ॥ ५०० ॥ + केवलाक्षि०-।

४ घ. छ. ज्ञ. 'ओ विसे' । ५ गाथा ४९७ । ६ क. 'स्याऽन' । ७ गाथा ४९८ । ×(द्)

१५

त्कृष्टोऽक्षरलाभः संपूर्णश्रुतज्ञानवतो लभ्यते, तथा केवलाक्षरमङ्गीकृत्योत्कृष्टोऽसौ केवलिनोऽपि लभ्यत एव, किं तद्वर्जनस्य फलम् ? । क्षमाश्रमणपूज्यैश्च 'थीणद्धि' इत्यादिगाथायामित्थं व्याख्यातम्– "स च किल जघन्यतोऽनन्तभागः" इत्यादि । अथ सामान्यमक्षरं नेह प्रक्रमे गृह्यते, किन्तु श्रुताक्षरमेवेति । तदयुक्तम्, चिरन्तनटीकाद्वयेऽप्यक्षरस्य सामान्यस्यैव व्याख्यानात् । किञ्च, विशेषतोऽत्र श्रुताक्षरे गृह्यमाणे 'तस्य श्रुताक्षरस्याऽनन्तभागः सर्वजीवानां नित्योद्घाटः' इति व्याख्यानमापद्यते । एतच्चाऽयुक्तम्, संपूर्णश्रुतज्ञानिनां, ततोऽनन्तभागादिहीनश्रुतज्ञानवतां च श्रुताक्षरानन्तभागवत्त्वानुपपत्तेः । किञ्च, (सो उण) 'केवलिवज्जाणं तिविहभेओ वि' इत्येतदसंबद्धमेव स्यात्, केवलिनः सर्वथैव श्रुताक्षरस्याऽसंभवेन तद्वर्जनस्याऽऽनर्थक्यप्रसङ्गादिति । परमार्थं चेह केवलिनः, बहुश्रुता वा विदन्ति, इत्यलं प्रसङ्गेन ।

विमध्यममक्षरानन्तभागमाह– ततस्तस्मादुत्कृष्टश्रुतज्ञानविदोऽवशेषाणामेकेन्द्रिय-संपूर्णश्रुतज्ञानिनोर्मध्ये वर्तमानानां षट्स्थानपतितानामनन्तभागादिगतानां प्रायेण विमध्यो मध्यमोऽक्षरानन्तभागो भवति । एकस्मादुत्कृष्टश्रुतज्ञानिनोऽवशेषाः केचित् श्रुतमाश्रित्य तुल्या अपि भवन्ति, अत उक्तम्– प्रायेणावशेषाणां विमध्यम इति । अयमर्थः– विवक्षितादेकस्मादुत्कृष्टश्रुतज्ञानिनोऽवशेषाणामपि केषाञ्चिदुत्कृष्टश्रुतज्ञानवतां तत्तुल्य एवाऽक्षरानन्तभागो भवति, न तु विमध्यम उत्कृष्ट इत्यर्थः ॥ इति सप्तचत्वारिंशद्गाथार्थः ॥ ५०० ॥

॥ इत्यक्षरश्रुतं समाप्तमिति ॥

अथ तत्प्रतिपक्षभूतमनक्षरश्रुतमाह–

ऊससियं नीससियं निच्छूढं खासिअं च छीयं च । निस्सिंघियमणुसारं अणक्खरं छेलियाईयं ॥५०१॥

उच्छ्वसनमुच्छ्वसितं, भावे निष्ठाप्रत्ययः । तथा, निःश्वसनं निःश्वसितम् । निष्ठीवनं निष्ठूतम्[5]। कासनं कासितम् । क्षवणं क्षुतम् । निःसिङ्घनं निःसिङ्घितम् । अनुस्वारवदनुस्वारम्, अक्षरमपि यदनुस्वारवदुच्चार्यत इत्यर्थः । एतदुच्छ्वसितादिअनक्षरश्रुतम् । न केवलमेतत्, किन्तु सेण्टनं सेण्टितम्, एतदादि चाऽनक्षरश्रुतमिति प्राक्तनसमुच्चयार्थचशब्दयोरेकोऽत्र योज्यते । आदिशब्दात् पूत्कृत-सीत्कारादिपरिग्रहः ॥ इति निर्युक्तिगाथार्थः ॥ ५०१ ॥

१ घ. छ. 'नफ' । २ गाथा ४९९ । ३ गाथा ४९७ । ४ घ.छ. 'मध्यमो म' । + चेति-। × जघन्यो-। 5 निष्ठ्यूतम्-।

५ उच्छ्वसितं निःश्वसितं निष्ठूतं कासितं च क्षुतं च । निःसिङ्घितमनुस्वारमनक्षरं सेण्टितादिकम् ॥५०१॥ ६ घ.छ. 'दिम' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अथ भाष्यम्–

ऊससियाई दव्वसुयमेत्तमहवा सुओवउत्तस्स । सव्वो च्चिय वावारो सुयमिह तो किं न चेट्ठा वि ?॥५०२॥

इहोच्छ्वसिताद्यनक्षरश्रुतं द्रव्यश्रुतमात्रमेवाऽवगन्तव्यम्, शब्दमात्रत्वात्; शब्दश्च भावश्रुतस्य कारणमेव, यच्च कारणं तद् द्रव्यमेव भवतीति भावः। भवति च तथाविधोच्छ्वसित-निःश्वसितादिश्रवणे 'सशोकोऽयं' इत्यादि ज्ञानम्। एवं विशिष्टाभिसन्धिपूर्वकनिष्ठूत-कासित-क्षुतादिश्रवणेऽप्यात्मज्ञानादि ज्ञानं वाच्यमिति। अथवा, श्रुतज्ञानोपयुक्तस्यात्मनः सर्वात्मनैवोपयोगात् सर्वोऽप्युच्छ्वसितादिको व्यापारः श्रुतमेवेह प्रतिपत्तव्यम्, इत्युच्छ्वसितादयः श्रुतं भवन्त्येवेति। आह– यद्येवम्, ततो गमना-ऽऽगमन-चलन-स्पन्दनादिकाऽपि चेष्टा व्यापार एव। ततः श्रुतोपयुक्तस्य संबन्धिन्येषाऽपि किं श्रुतं न भवति ?। उच्यते– कः किमाह ?– प्राप्तोत्थनेन न्यायेन साऽपि श्रुतम्॥ ५०२॥

किन्तु–

रूढी[3]य तं सुयं सुव्वइ त्ति चेट्ठा न सुव्वइ कयाइ। अहिगमया वण्णा इव जमणुस्सारादओ तेणं ॥५०३॥

उक्तन्यायेन श्रुतत्वप्राप्तौ समानायामपि तदेवोच्छ्वसितादि श्रुतम्, न शिरोधूनन-करचलनादिचेष्टा, यतः शास्त्रज्ञलोकप्रसिद्धा रूढिरियम्। तत उच्छ्वसिताद्येव श्रुतं रूढं, न चेष्टेत्यर्थः 'श्रूयते इति श्रुतमिति चान्वर्थवशात् तदेवोच्छ्वसितादि श्रुतम्, न चेष्टा' इत्येवं चशब्दः पक्षान्तरसूचकः, भिन्नक्रमश्च। करादिचेष्टा तु द्रव्यत्वात् कदापि न श्रूयते, इति कथमसौ श्रुतं स्यात् ? इत्यर्थः। अनुस्वारादयस्त्वकारादिवर्णा इवाऽर्थस्याऽधिगमका एवेति। तेन कारणेन ते निर्विवादमेव श्रुतम्॥ इति गाथाद्वयार्थः॥ ५०३॥

॥ इत्यनक्षरश्रुतमिति॥

अथ संज्ञिश्रुतमभिधित्सुराह–

सण्णिस्स सुयं जं तं सण्णिसुयं सो य जस्स सा सण्णा। होइ तिहा कालिय-हेउ-दिट्ठिवाओवएसेण ॥५०४॥

---

७ उच्छ्वसितादि द्रव्यश्रुतमात्रमथवा श्रुतोपयुक्तस्य। सर्व एव व्यापारः श्रुतमिह ततः किं न चेष्टापि ?॥ ५०२॥ २ क. 'न-स्प'।

३ रूढिश्च तत् श्रुतं श्रूयत इति चेष्टा न श्रूयते कदापि। अधिगमका वर्णा इव यदनुस्वारादयस्तेन॥ ५०३॥ ४ घ. छ. 'ढी तं'।

५ संज्ञिनः श्रुतं यत् तत् संज्ञिश्रुतं स च यस्य सा संज्ञा। भवति त्रिधा कालिक-हेतु-दृष्टिवादोपदेशेन॥ ५०४॥

संज्ञिश्रुतं तावत् तदेवाऽभिधीयते यत् संज्ञिनः संबन्धि। सोऽपि संज्ञी स एव यस्याऽसौ संज्ञा समस्ति। सा च संज्ञा त्रिविधा भवति– दीर्घशब्दलोपाद् दीर्घकालिकोपदेशेन, हेतुवादोपदेशेन, दृष्टिवादोपदेशेन चेति॥ ५०४॥

अत्र परः प्राह–

जइ सण्णासंबंधेण सण्णिणो, तेण सण्णिणो सव्वे। एगिंदियाइयाण वि जं सण्णा दसविहा भणिया ॥५०५॥

संज्ञा विद्यते येषां ते संज्ञिनः, इत्येवं संज्ञासंबन्धाद् यदि संज्ञिन इष्यन्ते, तदा तेन संज्ञासंबन्धेन सर्वेऽप्येकेन्द्रियादयो जीवाः संज्ञिनः प्राप्नुवन्ति, न पुनः केऽप्यसंज्ञिनः, इत्येवमतिव्याप्तिप्रसङ्गः, यतः सर्वजीवानामेकेन्द्रियादीनामपि प्रज्ञापनादिषु संज्ञा दशविधा भणिता, तद्यथा– "[1]एगिंदियाणं भंते ! कइविहा सण्णा पन्नत्ता ?। गोयमा ! दसविहा, तं जहा– आहारसण्णा, भयसण्णा, मेहुणसण्णा, परिग्गहसण्णा, कोहसण्णा, माणसण्णा, मायासण्णा, [3]लोहसण्णा, ओहसण्णा, लोगसण्णा" एवं द्वीन्द्रियादीनामपि वाच्यम्। तत् के नामेत्यमसंज्ञिनः ?, प्रोक्ताश्चैतेऽनेकशस्तेषु तेषु प्रदेशेष्वागमे, ततः कथमेतत् ? इति॥ ५०५॥

अत्र परिहारमाह–

थोवा न सोहणा वि य जं सा तो नाहिकीरए इहइं। करिसावणेण धणवं न रूववं मुत्तिमेत्तेण॥ ५०६॥

जह बहुदव्वो धणवं पसत्थरूवो अ रूववं होइ। महईए सोहणाए य तह सण्णी नाणसण्णाए॥ ५०७॥

यद् यस्मात् कारणात् सा दशविधा संज्ञा काचित् तावदोघसंज्ञात्मिका स्तोका इति स्वल्पा, ततोऽत्र नाधिक्रियते– न तया संज्ञी वक्तुं युज्यत इति भावः। न हि कार्षापणमात्रास्तित्वेन लोकेऽपि धनवानुच्यते। आहार-भय-परिग्रह-मैथुनादिसंज्ञात्मिकाऽपि च भूयस्यपीह नाधिक्रियते, तामप्याश्रित्य न 'संज्ञी' इति निर्दिश्यत इत्यर्थः, यतो नाऽसौ शोभना– मोहादिजन्यत्वेन नासौ विशिष्टेत्यर्थः। न चाऽविशि-

---

१ यदि संज्ञासंबन्धेन संज्ञिनः, तेन संज्ञिनः सर्वे। एकेन्द्रियादिकानामपि यत् संज्ञा दशविधा भणिता॥ ५०५॥

२ एकेन्द्रियाणां भगवन् ! कतिविधा संज्ञा प्रज्ञप्ता ?। गौतम ! दशविधा, तद्यथा– आहारसंज्ञा, भयसंज्ञा, मैथुनसंज्ञा, परिग्रहसंज्ञा, क्रोधसंज्ञा, मानसंज्ञा, मायासंज्ञा, लोभसंज्ञा, ओघसंज्ञा, लोकसंज्ञा। ३ घ. छ. 'लोभस'।

४ स्तोका न शोभनाऽपि च यत् सा ततो नाऽधिक्रियत इह। कार्षापणेन धनवान् न रूपवान् मूर्तिमात्रेण॥ ५०६॥
यथा बहुद्रव्यो धनवान् प्रशस्तरूपश्च रूपवान् भवति। महत्या शोभनया च तथा संज्ञी ज्ञानसंज्ञया॥ ५०७॥ ५ घ. छ. 'धो य रू'।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्टया संज्ञया 'संज्ञी' इत्यभिधातुं युज्यते। न हि लोकेऽप्यविशिष्टेन मूर्तिमात्रेण 'रूपवान्' इत्यभिधीयते। तर्हि कीदृश्या संज्ञयाऽत्र संज्ञी प्रोच्यते ?, इत्याह- यथा लोके बहुद्रव्य एव धनवानभिधीयते, प्रशस्तरूपश्च रूपवान् भवति, तथाऽत्रापि महत्या शोभनया च ज्ञानावरणकर्मक्षयोपशमजन्यमनोज्ञानसंज्ञयैव संज्ञा व्यपदिश्यते- संज्ञानं संज्ञा मनोविज्ञानमित्यर्थः, तद्रूपा महती, शोभना च संज्ञेहाऽधिक्रियते, नान्येति भावः। ततश्चैषा मनोज्ञानरूपा संज्ञा येषामस्ति ते संज्ञिनः, नान्य इति ॥ ५०६ ॥ ५०७ ॥

पूर्वं संज्ञायास्त्रैविध्यं यदुक्तं, तत्र दीर्घकालिकीस्वरूपं तावदाह-

[1]इह दीहकालिगी कालिगित्ति सण्णा जया सुदीहं पि। संभरइ भूयमिस्सं चिंतेइ य किह णु कायव्वं ?॥५०८॥

इह दीर्घशब्दस्य लुप्तदर्शनाद् दीर्घकालिकी 'कालिकी' इत्युच्यते, कालिकी चासौ संज्ञा च पुंवद्भावात् 'कालिकसंज्ञा' इति द्रष्टव्यम्। यया सुदीर्घमपि कालं भूतमतीतमर्थं स्मरति, एष्यच्च भविष्यद्वस्तु चिन्तयति- 'कथं नु नाम कर्तव्यम् ?' इत्येषा चिन्तामाश्रित्य दीर्घोऽतीता-ऽऽनागतवस्तुविषयः कालो यस्यां सा दीर्घकालिकी कालिकसंज्ञोच्यत इत्यर्थः ॥ ५०८ ॥

एषा च संज्ञा यस्याऽस्त्यसौ कालिकसंज्ञी, स च यो भवति, एतद् दर्शयति-

[2]कालियसण्णि त्ति तओ जस्स तई सो य जो मणोजोग्गे। खंधेणंते घेत्तुं मन्नइ तल्लद्धिसंपण्णो ॥५०९॥

'तउ त्ति' तकोऽसौ 'कालिकसंज्ञी' इत्यभिधीयते। यस्य किम् ?, इत्याह- 'जस्स तइ त्ति' यस्याऽसौ कालिकसंज्ञा प्राप्यते। स च को विज्ञेयः ?, इत्याह- 'सो य जो मणोजोग्गेत्यादि' स च कालिकसंज्ञी विज्ञेयो यो यः कश्चिद् मनोज्ञानावरणैकर्मक्षयोपशमाद् मनोलब्धिसंपन्नो मनोयोग्याननन्तान् स्कन्धान् मनोवर्गणाभ्यो गृहीत्वा मनस्त्वेन परिणमय्य मन्यते चिन्तनीयं वस्त्विति। स च गर्भजस्तिर्यङ् मनुष्यो वा; देवः, नारकश्चेति ॥ ५०९ ॥

[3]अस्य चैवंभूतस्य संज्ञिनः किं भवति ?, इत्याह-

[4]रूवे जहोवलद्धी चक्खुमओ दंसिए पयासेणं। तह छव्विहोवओगो मणदव्वपयासिए अत्थे ॥ ५१० ॥

---

१ इह दीर्घकालिकी कालिकीति संज्ञा यया सुदीर्घमपि। स्मरति भूतमेष्यच्चिन्तयति च कथं नु कर्तव्यम् ? ॥ ५०८ ॥

२ कालिकसंज्ञीति सको यस्य सा स च यो मनोयोग्यान्। स्कन्धानन्तान् गृहीत्वा मन्यते तल्लब्धिसंपन्नः ॥ ५०९ ॥ ३ घ. छ. 'णक्ष'।

४ घ. छ. 'अस्यैवं'। ५ रूपे यथोपलब्धिश्चक्षुष्मतो दर्शिते प्रकाशेन। तथा षड्विधोपयोगो मनोद्रव्यप्रकाशितेऽर्थे ॥ ५१० ॥

यथा रूपे घट-पटादिसंबन्धिनि चक्षुष्मतो लोचनयुक्तस्य जन्तोरुपलब्धिश्चक्षुर्विज्ञानमुत्पद्यते। कथंभूते रूपे ?, दर्शिते प्रदीपादिप्रकाशेन, तथा तेनैव प्रकारेण मनोविज्ञानावरणकर्मक्षयोपशमवतो जीवस्य चिन्ताप्रवर्तकमनस्त्वपरिणतमनोद्रव्यप्रकाशिते शब्दरूपादिकेऽर्थे मनःषष्ठेन्द्रियपञ्चकभेदात् षड्विधोपयोगस्त्रिकालविषयोऽपि समुपजायत इति ॥ ५१० ॥

अत्र विनेयः पृच्छति-

नन्वसंज्ञिनः किं सर्वथैवेन्द्रियोपलब्धिर्न भवति ?, इत्याह-

[1]अविसुद्धचक्खुणो जह नाइपयासम्मि रूवविण्णाणं। असण्णिणो तहत्थे थोवमणोदव्वलद्धिमओ ॥५११॥

[2]यथाऽविशुद्धचक्षुषो नातिप्रकाशे मन्दमन्दप्रकाशान्वितप्रदेशेऽस्पष्टा रूपोपलब्धिर्भवति, एवमसंज्ञिनः सम्मूर्च्छनजपञ्चेन्द्रियस्य स्वल्पमनोविज्ञानक्षयोपशमवशादतिस्तोकमनोद्रव्यग्रहणशक्तेः शब्दाद्यर्थेऽस्पष्टैवोपलब्धिर्भवतीति ॥ ५११ ॥

यदि सम्मूर्च्छनजपञ्चेन्द्रियस्यैवंभूतमस्पष्टं ज्ञानं भवति, तर्ह्येकेन्द्रियादीनां तत् कथंभूतं भवति ?, इत्याह-

[3]जह मुच्छियाइयाणं अव्वत्तं सव्वविसयविण्णाणं। एगेंदियाण एवं, सुद्धयरं बेइंदियाईणं ॥ ५१२ ॥

[4]यथा मूर्च्छितादीनां सर्वेष्वप्यर्थेष्वव्यक्तमेव ज्ञानं भवति, एवमतिप्रकृष्टावरणोदयादेकेन्द्रियाणामपि, ततः शुद्धतरं शुद्धतमं द्वीन्द्रियादीनामापञ्चेन्द्रियसम्मूर्च्छजेभ्यः, ततः सर्वस्पष्टतमं संज्ञिनामिति। आह- कुतः पुनश्चैतन्ये समानेऽपि जन्तूनामिदमुपलब्धिनानात्वम् ?। उच्यते- सामर्थ्यभेदात्, स च क्षयोपशमवैचित्र्यात् ॥ ५१२ ॥

[5]एतदेवाह-

[6]तुल्ले छेयगभावे जं सामत्थं तु चक्करयणस्स। तं तु जहक्कमहीणं न होइ सरपत्तमाईणं ॥ ५१३ ॥

ईय मणोविसईणं जा पडुया होइ उग्गहाईसु। तुल्ले चेयणभावे असण्णीणं न सा होइ ॥ ५१४ ॥

---

१ अविशुद्धचक्षुषो यथा नातिप्रकाशे रूपविज्ञानम्। असंज्ञिनस्तथाऽर्थे स्तोकमनोद्रव्यलब्धिमतः ॥ ५११ ॥ २ क. ग. 'थं भ'।

३ यथा मूर्च्छितादीनामव्यक्तं सर्वविषयविज्ञानम्। एकेन्द्रियाणामेवं, शुद्धतरं द्वीन्द्रियादीनाम् ॥ ५१२ ॥ ४ घ. छ. 'था सम्मू'।

५ घ. छ. 'त'। ६ तुल्ये छेदकभावे यत् सामर्थ्यं तु चक्ररत्नस्य। तत्तु यथाक्रमहीनं न भवति शरपत्रादीनाम् ॥ ५१३ ॥

इति मनोविषयाणां या पटुता भवत्यवग्रहादिषु। तुल्ये चेतनभावेऽसंज्ञिनां न सा भवति ॥ ५१४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इह यथा तुल्येऽपि च्छेदकभावे चक्रवर्तिसंबन्धिनश्चक्ररत्नस्य यच्छेदनसामर्थ्यं तदन्येषां खड्ग-दात्र-शरपत्रादीनां छेदकवस्तूनां न भवत्येव। कुतः ?, इत्याह– यतो यथाक्रमहीनं क्रमशो हीयमानमेव तत् तेष्विति। प्रकृते योजयन्नाह–'ईय त्ति' दीर्घत्वं प्राकृतत्वात्, इत्येवं चैतन्ये तुल्येऽपि मनोविषयिणां संज्ञिनामवग्रहेहादिषु यावत्स्ववबोधपटुता भवति सा तथाविधक्षयोपशमविकलानां यथोक्तदीर्घकालिकसंज्ञारहितानां सम्मूर्छजपञ्चेन्द्रिय-विकलेन्द्रियै-केन्द्रियाणामसंज्ञिनां न भवत्येव, क्रमशो हीनत्वादिति ॥ ५१३ ॥ ५१४ ॥

तदेवं कालिकसंज्ञाविषय उपदेशो भणनं प्ररूपणं कालिकोपदेशस्तेन प्रोक्तः संज्ञी। सांप्रतं हेतुः, निमित्तं, कारणम्, इत्यनर्थान्तरं, तस्य वदनं वादस्तद्विषय उपदेशः प्ररूपणं हेतुवादोपदेशस्तेन संज्ञिनमसंज्ञिनं चाभिधित्सुराह–

[1]जे पुण संचिंतेउं इट्ठा-णिट्ठेसु विसयवत्थूसु। वट्टंति निवट्टंति य सदेहपरिपालणाहेउं ॥ ५१५ ॥

पाएण संपए च्चिय कालम्मि न याइदीहकालण्णा। ते हेउवायसण्णी निच्चेट्ठा होंति अस्सण्णी ॥५१६॥

ये पुनः संचिन्त्य संचिन्त्य इष्टा-ऽनिष्टेषु च्छाया-ऽऽतपा-ऽऽहारादिविषयवस्तुषु मध्ये स्वदेहपरिपालनाहेतोरिष्टेषु वर्तन्ते, अनिष्टेभ्यस्तु तेभ्य एव निवर्तन्ते, प्रायेण च सांप्रतकाल एव, न त्वतीता-ऽनागतकालावलम्बिनः, प्रायोग्रहणात् केचिदतीता-ऽनागतावलम्बिनोऽपि नातिदीर्घकालानुसारिणः, ते द्वीन्द्रियादयो हेतुवादोपदेशेन संज्ञिनो विज्ञेयाः, तथाहि– संज्ञिनो द्वीन्द्रियादयः, सांचिन्त्य संचिन्त्य हेयो-पादेयेषु निवृत्ति-प्रवृत्तेः, देवदत्तादिवदिति। तदेवं हेतुवादिनोऽभिप्रायेण निश्चेष्टाः पृथिव्यादय एवाऽसंज्ञिन इति॥५१५॥५१६॥

अथ दृष्टिर्दर्शनं सम्यक्त्वादि तस्य वदनं वादस्तद्विषय उपदेशः प्ररूपणं तेन संज्ञिनमसंज्ञिनं च प्ररूपयन्नाह–

[2]सम्मद्दिट्ठी सण्णी संते नाणे खउवसमियम्मि। असण्णी मिच्छत्तम्मि दिट्ठिवाओवएसेण ॥ ५१७ ॥

दृष्टिवादोपदेशेन क्षायोपशमिकज्ञाने वर्तमानः सम्यग्दृष्टिरेव संज्ञी, विशिष्टसंज्ञायुक्तत्वात्; मिथ्यादृष्टिस्त्वसंज्ञी, विपर्यस्तत्वेन वस्तुतः संज्ञारहितत्वादिति ॥ ५१७ ॥

आह– यदि विशिष्टसंज्ञायुक्तत्वात् सम्यग्दृष्टिः संज्ञीष्यते, तर्हि किमिति क्षायोपशमिकज्ञाने वर्तमानोऽसौ गृह्यते ?। क्षायिक-

---

१ ये पुनः संचिन्त्येष्टा-ऽनिष्टेषु विषयवस्तुषु। वर्तन्ते निवर्तन्ते च स्वदेहपरिपालनाहेतोः ॥ ५१५ ॥
प्रायेण सांप्रत एव काले न चातिदीर्घकालज्ञाः। ते हेतुवादसंज्ञिनो निश्चेष्टा भवन्त्यसंज्ञिनः ॥ ५१६ ॥ २ क. ग. 'न्त्य हे'।

३ सम्यग्दृष्टिः संज्ञी सति ज्ञाने क्षायोपशमिके। असंज्ञी मिथ्यात्वे दृष्टिवादोपदेशेन ॥ ५१७ ॥

ज्ञाने हि तस्य विशिष्टतराऽसौ प्राप्यते। ततस्तद्वृत्तिरप्यसौ किं नाङ्गीक्रियते, येनोच्यते– 'संते नाणे खउवसमियम्मि' इति ?। एतदाशङ्क्य पूर्वमुत्तरमाह–

[1]खयनाणी किं सण्णी न होइ होइ व खउवसमनाणी ?। सण्णा सरणमणागयचिंता य न सा जिणे जम्हा ॥५१८॥

आवरणस्य सर्वथैव क्षयेण ज्ञानी क्षयज्ञानी, केवलीत्यर्थः, असौ संज्ञी किमिति न भवति ?, किमर्थं च क्षायोपशमिकज्ञानी संज्ञी भवतीति व्याख्यायते भवता ?। एवं परेणोक्ते सत्याह– 'सण्णेत्यादि' केवली संज्ञी न भवति, यतोऽतीतार्थस्य स्मरणम्, अनागतस्य च चिन्ता संज्ञोच्यते, सा च जिने केवलिनि नास्तीति, सर्वदा सर्वार्थावभासकत्वेन केवलिनां स्मरण-चिन्ताद्यतीतत्वात्। इति क्षायोपशमिकज्ञान्येव सम्यग्दृष्टिः संज्ञीति ॥ ५१८ ॥

पुनरपि प्रकारान्तरेणाऽऽह परः

[2]मिच्छो हिया-हियविभागनाणसण्णासमण्णिओ कोइ। दीसइ, सो किमसण्णी, सण्णा जमसोहणा तस्स ॥५१९॥

ननु मिथ्यादृष्टिरपि कश्चिदैहिकाद्यर्थविषयहिता-ऽहितविभागज्ञानात्मकस्पष्टसंज्ञासमन्वित एव दृश्यते, ततः किमित्यसौ संज्ञी न भवति, येन दृष्टिवादोपदेशेनाऽयमसंज्ञी प्रोच्यते ? इति। गुरुराह– यद् यस्मादशोभना कुत्सिता तस्य मिथ्यादृष्टेः संज्ञा, तेन सत्याऽपि तयाऽयमसंज्ञीति ॥ ५१९ ॥

आह– ननु यद्यप्यशोभनाऽस्य संज्ञा, तथापि कथं तस्या अभावः ?, इत्याह–

[3]जह दुव्वयणमवयणं कुच्छियसीलं असीलमसईए। भण्णइ तह नाणं पि हु मिच्छद्दिट्ठिस्स अण्णाणं ॥५२०॥

यथा दुर्वचनं कुत्सितं वचनं सदप्यवचनं लोके भण्यते, असत्याश्च संबन्धि कुत्सितं शीलं विद्यमानमप्यशीलं यथाऽभिधीयते, तथा मिथ्यादृष्टेर्ज्ञानमपि मिथ्यादर्शनोदयपरिग्रहाद्ज्ञानं बम्भण्यते, संज्ञाऽप्यसंज्ञोच्यत इत्यर्थः ॥ ५२० ॥

कस्मात् पुनस्तस्य ज्ञानमप्यज्ञानं भवति ?, इत्याह–

---

१ क्षयज्ञानी किं संज्ञी न भवति, भवति क्षयोपशमज्ञानी ?। संज्ञा स्मरणमनागतचिन्ता च न सा जिने यस्मात् ॥ ५१८ ॥ २ क. ग. 'न्ता संज्ञानं सं'।

३ मिथ्यो (मिथ्यादृष्टिः) हिता-ऽहितविभागज्ञानसंज्ञासमन्वितः कोऽपि। दृश्यते, स किमसंज्ञी, संज्ञा यदशोभना तस्य ॥ ५१९ ॥

४ यथा दुर्वचनमवचनं कुत्सितशीलमशीलमसत्याः। भण्यते तथा ज्ञानमपि खलु मिथ्यादृष्टेरज्ञानम् ॥ ५२० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]सदसदविसेसणाओ भवहेउजदिच्छिओवलंभाओ । नाणफलाभावाओ मिच्छद्दिट्ठिस्स अण्णाणं ॥ ५२१ ॥

प्राग् व्याख्यातार्थैव ॥ ५२१ ॥

आह– ननु देव-नारक-गर्भजतिर्यङ्-मनुष्यलक्षणो मिथ्यादृष्टिर्दीर्घकालिकीं संज्ञामाश्रित्य दृष्टिवादोपदेशसंज्ञाविचारेऽपि संज्ञी कस्माद् नोच्यते ?, इत्याह—

[2]ऊहो न हेऊए, हेउई न कालम्मि भण्णइ सण्णा । जह कुच्छियत्तणाओ, तह कालो दिट्ठिवायम्मि॥५२२॥

यथा ऊहः पृथिव्यादीनां संबन्धिनी ओघमात्रसंज्ञेत्यर्थः, न 'हेऊए त्ति' हेतुवादसंज्ञायां विचार्यमाणायां कुत्सितत्वात् संज्ञा भण्यते, यथा वा 'कालम्मि त्ति' दीर्घकालिकसंज्ञायां विचार्यमाणायां कुत्सितत्वेन हैतुकी संज्ञा न भण्यते, तथा 'कालो त्ति' दीर्घकालिक्यपि संज्ञा दृष्टिवादोपदेशसंज्ञायां विचार्यमाणायां कुत्सितत्वादेव संज्ञा न भण्यते। अतो नेह देवादिरपि मिथ्यादृष्टिः संज्ञीति भावः ॥५२२॥

तदेवं दीर्घकालिक-हेतुवाद-दृष्टिवादोपदेशेन त्रिविधां संज्ञां निरूप्य, अथैतासां मध्ये कस्य जन्तोः का भवति ?, इति निरूपयितुमाह—

[3]पंचण्हमूहसंण्णा हेउसण्णा बेइंदियाईणं । सुर-नारय-गब्भुब्भवजीवाणं कालिगी सण्णा ॥ ५२३ ॥

छउमत्थाणं सण्णा सम्मद्दिट्ठीण होइ सुयनाणं । मइवावारविमुक्का सण्णाईआ उ केवलिणो ॥ ५२४ ॥

पञ्चानां पृथिव्य-प्-तेजो-वायु-वनस्पतीनामूहसंज्ञा वृक्षारोहणाद्यभिप्रायरूपौघसंज्ञा भवति । आह– ननु त्रिविधसंज्ञामध्येऽत्रैयमूहसंज्ञा नोक्तैव, अत एवैकेन्द्रिया इह सर्वथैवाऽसंज्ञिन एव, तुच्छत्वात् कुत्सितत्वाच्च तत्संज्ञायाः, इति भवतैवोक्तमेव प्राक्, तत्कथमत्र स्वामित्वप्ररूपणायामियमेतेषां संज्ञा प्रोक्ता ? । सत्यम् , किन्त्वेकेन्द्रियाणामेषैवोहसंज्ञा भवति, न तु हेतुवादादिसंज्ञा, इत्येवमेतत्संज्ञात्रयनिषेधप्रधानोऽयं निर्देशो द्रष्टव्यो न तु विधिप्रधानः । एतस्याश्चोहसंज्ञाया यथा संज्ञात्वं तथा प्रागेवोक्तमिति । भवत्वेवम् , तथाऽप्येकेन्द्रियाणामाहार-क्रोधादिका संज्ञा दशविधा समये प्रोक्ता, तत्कथमेकैवोहसंज्ञाऽत्रैषामुक्ता ? । सत्यम् , बल्ल्यादिष्वियं व्यक्तैवोपलभ्यते किञ्चिदिति शेषोपलक्षणार्थमेषैव निर्दिष्टा, इत्यलं प्रसङ्गेनेति । द्वि-त्रि-चतुरिन्द्रिय-सम्मूर्छनजपञ्चेन्द्रियाणां तु हेतुवादसंज्ञा प्राप्यते । देव-नारकाणां गर्भजतिर्यङ्-मनुष्याणां च कालिकी संज्ञेति । दृष्टिवादोपदेशेन च्छद्मस्थजन्तूनां सम्यग्दृष्टीनामेव संज्ञा प्राप्यते । ततश्च 'तेषां यच्छ्रुतज्ञानं तत् संज्ञिश्रुतं भवति' इत्यध्याहारः । एवं च सति स्मरण-चिन्तादिमति-श्रुतव्यापाररहिता भवस्थाः, [4]सिद्धिं गताश्च केवलिन एव संज्ञातीताः संज्ञारहिताः, शेषजन्तूनां केषांचित् कस्याश्चित् संज्ञाया उक्तत्वादिति भाव इति ॥ ५२३ ॥ ५२४ ॥

अत्राह परः—

[5]मोत्तूण हेउ-कालिय-सम्मत्तकमं जहुत्तरविसुद्धं । किं कालिओवएसो कीरइ आईए सुत्तम्मि ? ॥ ५२५ ॥

नन्वविशुद्धत्वात् प्रथमं हेतुवादसंज्ञा, ततो विशुद्धत्वात् कालिकसंज्ञा, ततोऽपि विशुद्धतरत्वाद् दृष्टिवादसंज्ञाः इत्येव यथोत्तरविशुद्धमिमं क्रमं मुक्त्वा किं कालिकसंज्ञोपदेश आदौ प्रथमं सूत्रे नन्दिलक्षणे क्रियते ? । तथा च भवताऽपि तदनुरोधेन पूर्वमुक्तम्– 'सा सण्णा होइ तिहा कालिय-हेउ-दिट्ठिवाओवएसेण' इति ॥ ५२५ ॥

अत्रोत्तरमाह–

[6]सण्णि त्ति असण्णि त्ति य सव्वसुए कालिओवएसेणं । पायं संववहारो कीरइ तेणाईए स कओ ॥५२६॥

इह सर्वस्मिन्नपि श्रुते आगमे योऽयं 'संज्ञा' इति व्यवहारः स सर्वोऽपि प्रायो बाहुल्येन कालिकोपदेशेनैव क्रियते । तेनाऽऽदौ स एव कालिकोपदेशः कृतः । इदमुक्तं भवति– यतः स्मरण-चिन्तादिदीर्घकालिकज्ञानसहितः समनस्कपञ्चेन्द्रियः संज्ञीत्यागमे व्यवह्रियते, असंज्ञी तु प्रसज्यप्रतिषेधमाश्रित्य यद्यप्येकेन्द्रियादिरपि लभ्यते, तथापि समनस्कसंज्ञी तावत् पञ्चेन्द्रिय एव भवति । ततः पर्युदासाश्रयणादसंज्ञ्यप्यमनस्कसम्मूर्च्छनजपञ्चेन्द्रिय एवाऽऽगमे प्रायो व्यवह्रियते । तदेवंभूतः संज्ञा-संज्ञिव्यवहारो दीर्घकालिकोपदेशेनैवोपपद्यते । अतः प्रथमं स एव सूत्रे, तदनुरोधेनाऽत्र च निर्दिष्टः ॥ इति त्रयोविंशतिगाथार्थः ॥ ५२६ ॥

[7]अ संज्ञीति असंज्ञीति वा संज्ञा–

॥ इति संज्ञि-संज्ञिश्रुतं समाप्तमिति ॥

---

१ गाथा ११५ । २ ऊहो न हेतौ, हैतुकी न काले भण्यते संज्ञा । यथा कुत्सितत्वात्, तथा कालो दृष्टिवादे ॥ ५२२ ॥ ३ घ. छ. 'त्वादेव सं' ।
४ घ. 'लिकाऽपि' । ५ पञ्चानामूहसंज्ञा हेतुसंज्ञा द्वीन्द्रियादीनाम् । सुर-नारक-गर्भोद्भवजीवानां कालिकी संज्ञा ॥ ५२३ ॥
छद्मस्थानां संज्ञा सम्यग्दृष्टीनां भवति श्रुतज्ञानम् । मतिव्यापारविमुक्ताः संज्ञातीतास्तु केवलिनः ॥ ५२४ ॥

१ घ. छ. 'सिद्धिग' । २ मुक्त्वा हेतु-कालिक-सम्यक्त्वक्रमं यथोत्तरविशुद्धम् । किं कालिकोपदेशः क्रियत आदौ सूत्रे ? ॥ ५२५ ॥ ३ गाथा ५०४ ।
४ संज्ञीति, असंज्ञीति च सर्वश्रुते कालिकोपदेशेन । प्रायः संव्यवहारः क्रियते तेनादौ स कृतः ॥ ५२६ ॥ ५ घ. छ. 'सेण' । + सम्मू० ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अथ 'अक्खर सण्णी सम्मं' इत्यादिनिर्युक्तिगाथाक्रममाश्रित्य सम्यक्श्रुतं, तत्प्रतिपक्षभूतं मिथ्याश्रुतं चाह–

[1]अंगा-णंगपविट्ठं सम्मसुयं लोइयं तु मिच्छसुयं । आसज्ज उ सामित्तं लोइय-लोउत्तरे भयणा ॥५२७॥

इहाङ्गप्रविष्टमाचारादि श्रुतं, अनङ्गप्रविष्टं त्वावश्यकादि श्रुतम्, एतद्द्वितयमपि स्वामिचिन्तानिरपेक्षं स्वभावेन सम्यक् श्रुतम्, लौकिकं तु भारतादि प्रकृत्या मिथ्याश्रुतम् । स्वामित्वमासाद्य स्वामित्वचिन्तायां पुनर्लौकिके भारतादौ, लोकोत्तरे चाऽऽचारादौ भजना विकल्पनाऽवसेया, सम्यग्दृष्टिपरिगृहीतं भारताद्यपि सम्यक्श्रुतं, सावद्यभाषित्व-भवहेतुत्वादियथावस्थिततत्त्वस्वरूपबोधतो विषयविभागेन योजनात्; मिथ्यादृष्टिपरिगृहीतं त्वाचाराद्यपि मिथ्याश्रुतं, अयथावस्थितबोधतो वैपरीत्येन योजनादिति भावार्थ इति ॥५२७॥

सम्यक्त्वपरिगृहीतं सर्वं भारताद्यपि सम्यक्श्रुतमिति यदुक्तम्, तथा तच्च सम्यक्त्वं पञ्चधा भवति– औपशमिकं, सास्वादनं, क्षयोपशमजं, वेदकं, क्षायिकं च, इत्येतदुभयमपि दर्शयन्नाह—

[2]सम्मत्तपरिगहियं सम्मसुयं, तं च पंचहा सम्मं । ओवसमियं सासाणं खयसमजं वेययं [4]खइयं ॥ ५२८ ॥

गतार्थैव, नवरमुपशमनमुपशमः– मिथ्यात्वमोहनीये कर्मण्युदीर्णे क्षीणे शेषस्याऽनुदयावस्थापादनमित्यर्थः; तस्मादुपशमात्, तेन वा निर्वृत्तमौपशमिकम् । ' सासाणं ति ' निरुक्तविधिना वर्णलोपोऽत्र द्रष्टव्यः । ततश्च सहेषत्तत्त्वश्रद्धानरसास्वादनेन वर्तत इति सास्वादनं सम्यक्त्वं, अद्यापि मिथ्यात्वोदयाभावादनन्तानुबन्ध्युदयकलुषिततत्त्वश्रद्धानरसास्वादमात्रान्वितमित्यर्थः, अथवा, आ समन्तात् शातयति मुक्तिमार्गाद् भ्रंशयति आशातनम्– अनन्तानुबन्धिकषायवेदनम्, सहाऽऽशातनेन वर्तत इति साशातनं सम्यक्त्वमिति। मिथ्यात्वमोहनीयस्योदीर्णस्य क्षयः, अनुदीर्णस्य तूपशमः, ताभ्यां निर्वृत्तं क्षायोपशमिकं सम्यक्त्वम् । विहितप्रायदर्शनसप्तकक्षयेण जन्तुना वेद्यते चरमतत्पुद्गलग्रासमात्रं यत्र तद् वेदकम् । दर्शनसप्तकस्य क्षयेण निर्वृत्तं क्षायिकम् । एष तावत् संक्षेपार्थः ॥ ५२८ ॥

विस्तरार्थं त्वभिधित्सुर्भाष्यकार एवौपशमिकं सम्यक्त्वं तावदाह—

[5]उवसामगसेढीगयस्स होइ उवसामियं तु सम्मत्तं । जो वा अकयतिपुंजो अक्खवियमिच्छो लहइ सम्मं ॥५२९॥

---

१ गाथा ४५४ । २ अङ्गा-ऽनङ्गप्रविष्टं सम्यक्श्रुतं, लौकिकं तु मिथ्याश्रुतम् । आसाद्य तु स्वामित्वं लौकिक-लोकोत्तरयोर्भजना ॥ ५२७ ॥

३ सम्यक्त्वपरिगृहीतं सम्यक्श्रुतं, तच्च पञ्चधा सम्यक् । औपशमिकं सास्वादनं क्षयशमजं वेदकं क्षायिकम् ॥ ५२८ ॥ ४ क. ग. 'खइयं' ।

५ उपशमकश्रेणिगतस्य भवत्यौपशमिकं तु सम्यक्त्वम् । यो वाऽकृतत्रिपुञ्जोऽक्षपितमिथ्यः (थ्यात्वः) लभते सम्यक् (त्वम्) ॥ ५२९ ॥

उपशमश्रेणिगतस्य दर्शनसप्तके उपशमं नीते औपशमिकं सम्यक्त्वं भवति । किमुपशमश्रेणिगतस्यैवैतद् भवति ?, न, इत्याह– 'जो वेत्यादि' यो वा जन्तुरनादिमिथ्यादृष्टिः अकृतत्रिपुञ्जो मिथ्यात्वमोहनीयस्याऽविहितशुद्धा-ऽशुद्ध-मिश्रपुञ्जत्रयविभागोऽक्षपितमिथ्यात्वो लभते सम्यक्त्वं, तस्याऽपान्तरकरणप्रविष्टस्यौपशमिकं सम्यक्त्वमवाप्यते । क्षपितमिथ्यात्वपुञ्जोऽप्यविद्यमानात्रिपुञ्जो भवति अतस्तद्वयवच्छेदार्थमुक्तम्– अक्षपितमिथ्यात्वः सन् योऽत्रिपुञ्जः सम्यक्त्वं लभते, तस्यैवौपशमिकं सम्यक्त्वमवाप्यते, क्षपितमिथ्यात्वः क्षायिकसम्यक्त्वमेव लभत इति भावः । कथं पुनः पुञ्जत्रयं क्रियते ? इति चेत् । उच्यते– इह कश्चिदनादिमिथ्यादृष्टिस्तथाविधगुर्वादिसामग्रीसद्भावेऽपूर्वकरणेन मिथ्यात्वपुञ्जकात् पुद्गलान् शोधयन् अर्धविशुद्धपुद्गललक्षणं मिश्रपुञ्जं करोति, तथा शुद्धपुद्गललक्षणं सम्यक्त्वपुञ्जं विदधाति, तृतीयस्त्वविशुद्ध एवाऽऽस्ते । इत्येवं मदन-कोद्रवशोधनोदाहरणेन पुञ्जत्रयं कृत्वा सम्यक्त्वपुञ्जपुद्गलान् विपाकतो वेदयन् क्षायोपशमिकसम्यग्दृष्टिर्भण्यते । तथा चाऽत्र पूर्वविद्वत्प्रणीतश्लोकाः –

" तद्यथेह प्रदीप्तस्य स्वच्छाम्रपटलैर्गृहम् । न करोत्यावृतिं काश्चिदेवमेतद् [+]रवेरपि ॥ १ ॥"

एतदपि शोधितमिथ्यात्वपुञ्जपुद्गलवेदनमित्यर्थः ।

" एकपुञ्जी द्विपुञ्जीव त्रिपुञ्जीवाऽननुक्रमात् । दर्शन्युभयवांश्चैव मिथ्यादृष्टिश्च कीर्तितः ॥ १ ॥"

अननुक्रमादिति पश्चानुपूर्व्येत्यर्थः । अत्र त्रिपुञ्जी दर्शनी सम्यग्दर्शनीत्यर्थः । सम्यक्त्वपुञ्जे तूद्वलिते द्विपुञ्जी सन्नुभयवान् सम्यग्-मिथ्यादृष्टिर्भवतीत्यर्थः । मिश्रपुञ्जेऽप्युद्वलिते मिथ्यात्वपुञ्जस्यैवैकस्य वेदनादेकपुञ्जी मिथ्यादृष्टिर्भवति । एतदेवाह–

" यस्त्रिपुञ्जी स सम्यक्त्वमेवं भुङ्क्ते विपाकतः । द्विपुञ्ज्यपि च मिश्राख्यमेकपुञ्ज्यपि चेतरत् ॥ १ ॥ " इति ।

इतरद् मिथ्यात्वमित्यर्थः, इत्यलं प्रसङ्गेन ॥ ५२९ ॥

अकृतमुच्यते– अकृतत्रिपुञ्जस्तर्हि कथमौपशमिकं सम्यक्त्वं लभते ?, कियत्कालमानं च तद् भवति ?, इत्याह–

[1]खीणम्मि उइण्णम्मि य अणुदिज्जंते य सेसमिच्छत्ते । अंतोमुहुत्तमेत्तं उवसमसम्मं लहइ जीवो ॥५३०॥

इहाऽनादिमिथ्यादृष्टिः कश्चिदायुर्वर्जसप्तकर्मप्रकृतिषु यथाप्रवृत्तकरणेन क्षपयित्वा प्रत्येकमन्तःसागरोपमकोटीकोटिप्रमाणतां नीतास्वपूर्वकरणेन ग्रन्थिभेदं कृत्वाऽनिवृत्तिकरणं प्रविशति । उक्तं च कल्पभाष्ये—

---

१ क्षीण उदीर्णे चानुदीयमाने च शेषमिथ्यात्वे । अन्तर्मुहूर्तमात्रमुपशमसम्यक्त्वं लभते जीवः ॥ ५३० ॥ + भवेदपि - ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"जो गंठी ता पढमं गंठिं समइच्छओ हवइ बीयं । अनियट्टीकरणं पुण सम्मत्तपुरक्खडे जीवे ॥ १ ॥" इति ।

ततस्तत्राऽनिवृत्तिकरणे यदुदीर्णमुदयमागतं मिथ्यात्वं तस्मिन्ननुभवनेनैव क्षीणे निर्जीर्णे, शेषे तु सत्तावर्तिनि मिथ्यात्वेऽनुदीर्यमाणे परिणामविशुद्धिविशेषादुपशान्ते विष्कम्भितोदयेऽन्तर्मुहूर्तमुदयमनागच्छतीत्यर्थः । किम् ?, इत्याह— अन्तर्मुहूर्तमात्रं कालमौपशमिकसम्यक्त्वं लभते जीवः । अस्माच्चौपशमिकसम्यक्त्वादतिक्रान्तो मिथ्यात्वपुञ्जस्यैवोदयाद् मिथ्यात्वमेव गच्छति, शेषपुञ्जद्वयस्याऽकृतत्वेनाऽविद्यमानत्वादिति । इदमत्र हृदयम्— सैद्धान्तिकानां तावदेतद् मतं यदुत— अनादिमिथ्यादृष्टिः कोऽपि तथाविधसामग्रीसद्भावेऽपूर्वकरणेन पुञ्जत्रयं कृत्वा शुद्धपुञ्जपुद्गलान् वेदयन्नौपशमिकं सम्यक्त्वमलब्ध्वैव प्रथमत एव क्षायोपशमिकसम्यग्दृष्टिर्भवति । अन्यस्तु यथाप्रवृत्त्यादिकरणत्रयक्रमेणान्तरकरणे औपशमिकं सम्यक्त्वं लभते, पुञ्जत्रयं त्वसौ न करोत्येव । ततश्चौपशमिकसम्यक्त्वाच्च्युतोऽवश्यं मिथ्यात्वमेव गच्छति, उक्तं च कल्पभाष्ये—

" आलंबणमलहंती जह सट्ठाणं न मुंचए इलिया । एवं अकयतिपुंजी मिच्छं चिय उवसमी एइ ॥ १ ॥ "

यथा गात्रे सप्तुत्क्षिप्ते सतीलिकाऽपरमग्रेतनस्थानलक्षणमालम्बनमलभमाना प्राक्तनस्थानलक्षणं स्वस्थानं न मुञ्चति— पुनरपि संकुच्य प्राक्तनस्थान एव तिष्ठतीत्यर्थः, एवमुपशमसम्यग्दृष्टिरौपशमिकसम्यक्त्वाच्च्युतोऽकृतत्रिपुञ्जत्वाद् मिश्र-शुद्धपुञ्जलक्षणं स्थानान्तरमलभमानः पुनस्तदेव मिथ्यात्वमागच्छतीत्यर्थः । कार्मग्रन्थिकास्त्विदमेव मन्यन्ते यदुत— सर्वोऽपि मिथ्यादृष्टिः प्रथमसम्यक्त्वलाभकाले यथाप्रवृत्त्यादिकरणत्रयपूर्वकमन्तरकरणं करोति, तत्र चौपशमिकं सम्यक्त्वं लभते, पुञ्जत्रयं चाऽसौ विदधात्येव । अत एवौपशमिकसम्यक्त्वाच्च्युतोऽसौ क्षायोपशमिकसम्यग्दृष्टिः, मिश्रः, मिथ्यादृष्टिर्वा भवति । इत्यलं प्रपञ्चेनेति ॥ ५३० ॥

अथ सास्वादनसम्यक्त्वमाह—

उवसमसम्मत्ताओ चयओ मिच्छं अपावमाणस्स । सासायणसम्मत्तं तयंतरालम्मि छावलियं ॥ ५३१ ॥

इहान्तरकरणे औपशमिकसम्यक्त्वाद्धायां जघन्यतः समयशेषायां, उत्कृष्टतस्तु षडावलिकावशेषायां वर्तमानस्य कस्यचिदनन्तानुबन्धिकषायोदयेनौपशमिकसम्यक्त्वाच्च्यवमानस्य मिथ्यात्वमद्याप्यप्राप्नुवतोऽन्तराले जघन्यतः समयं, उत्कृष्टतस्तु षडावलिका

+नुदीर्ण-। १ यो ग्रन्थिः स प्रथमं (यथाप्रवृत्तकरणं) ग्रन्थिं समतिगच्छतो भवति द्वितीयम् (अपूर्वकरणं)। अनिवृत्तिकरणं पुनः पुरस्कृतसम्यक्त्वे जीवे ॥ १ ॥
२ घ. छ. 'तैमाग' । ३ आलम्बनमलभमाना यथा स्वस्थानं न मुञ्चतीलिका । एवमकृतत्रिपुञ्जी मिथ्यात्वमेवोपशाम्येति ॥ १ ॥
४ उपशमसम्यक्त्वाच्च्यवमानस्य मिथ्यात्वमप्राप्नुवतः । सास्वादनसम्यक्त्वं तदन्तराले षडावलिकम् ॥ ५३१ ॥

सास्वादनसम्यक्त्वं पूर्वोक्तशब्दार्थं भवतीति ॥ ५३१ ॥

अथ क्षायोपशमिकमाह—

[1]मिच्छत्तं जमुइण्णं तं खीणं अणुइयं च उवसंतं । मीसीभावपरिणयं वेइज्जंतं खओवसमं ॥ ५३२ ॥

यदुदीर्णमुदयमागतं मिथ्यात्वं तद् विपाकोदयेन वेदितत्वात् क्षीणं निर्जीर्णं, यच्च शेषं सत्तायामनुदयागतं वर्तते तदुपशान्तम् । उपशान्तं नाम विष्कम्भितोदयमुपनीतमिथ्यास्वभावं च शेषमिथ्यात्वं, मिथ्यात्व-मिश्रपुञ्जावाश्रित्य विष्कम्भितोदयं, शुद्धपुञ्जावाश्रित्य पुनरपनीतमिथ्यास्वभावमित्यर्थः । आह— यद्येवम्, अशुद्ध-मिश्रपुञ्जद्वयरूपस्य विष्कम्भितोदयस्यैवोपशान्तस्याऽनुदीर्णता युज्यते, न तु शुद्धपुञ्जलक्षणस्यापनीतमिथ्यात्वस्वभावस्य, तस्य विपाकेन साक्षादनुभूयमानत्वादिति; भवद्भिस्तु 'अणुइयं च उवसंतं' इति वचनाद् द्विस्वभावमप्युपशान्तमनुदीर्णमुक्तम्, तदेतत् कथम् ? इति । अत्रोच्यते— सत्यमेतत्, किन्त्वपनीतमिथ्यात्वस्वभावत्वात् स्वरूपेणाऽनुदयात् तस्याऽप्यनुदीर्णतोपचारः क्रियते । अथवा, अनुदीर्णत्वमेवंविशुद्धमिश्रपुञ्जद्वयरूपस्य मिथ्यात्वस्यैव योज्यते, न तु सम्यक्त्वस्य, तस्यापनीतमिथ्यात्वस्वभावत्वलक्षणमुपशान्तत्वमेव योज्यत इत्यर्थः । कथम् ?, इति चेत् । उच्यते— मिथ्यात्वं यदुदीर्णमुदयमागतं तत् क्षीणं, शेषं त्वेविशुद्ध-मिश्रपुञ्जद्वयलक्षणं मिथ्यात्वमनुदीर्णं 'अणुइयं च' इति चशब्दस्य व्यवहितप्रयोगात् शुद्धपुञ्जलक्षणं तदुपशान्तं चेति— अपनीतमिथ्यात्वस्वभावमित्यर्थः, इत्येवं सर्वं सुस्थं भवति ।

तदेवमुदीर्णस्य मिथ्यात्वस्य क्षयः, अनुदीर्णस्य च य उपशमः, एतत्स्वभावद्वयस्य योऽसौ मिश्रीभाव एकत्वमिथ्यात्वलक्षणे धर्मिणि भवनरूपस्तमापन्नं मिश्रीभावपरिणतं वेद्यमानमनुभूयमानं त्रुटितरसं शुद्धपुञ्जलक्षणं मिथ्यात्वमपि क्षयोपशमाभ्यां निर्वृत्तत्वात् क्षायोपशमिकं सम्यक्त्वमुच्यते । शोधिता हि मिथ्यात्वपुद्गला अतिस्वच्छवस्त्रमिव दृष्टेर्यथावस्थिततत्त्वरुच्यध्यवसायरूपस्य सम्यक्त्वस्याऽऽवारका न भवन्ति । अतस्तेऽप्युपचारतः सम्यक्त्वमुच्यत इति ।

अत्राह— ननूदीर्णस्य मिथ्यात्वस्य क्षये, अनुदीर्णस्य चोपशमे क्षायोपशमिकं सम्यक्त्वमिहोक्तम्, प्रागुक्तमौपशमिकमपि तदेवंविधमेव, तत् कोऽनयोर्विशेषः ?। तदेतदसमीक्षिताभिधानम्, यतो 'मीसीभावपरिणयं वेइज्जंतं खओवसमं' इति वचनादत्र क्षायोपशमि-

१ मिथ्यात्वं यदुदीर्णं तत् क्षीणमनुदितं चोपशान्तम् । मिश्रीभावपरिणतं वेद्यमानं क्षायोपशामिकम् ॥ ५३२ ॥
२ क. ग. 'शान्तं ना' । ३ घ. छ. 'ल्य विष्कम्भितोदयं पु' । ४ क. ग. 'मद्यु' । ५ क.ग. 'त्वद्यु' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कसम्यक्त्वे शुद्धपुञ्जपुद्गलवेदनमुक्तम्, औपशमिके तु तत् सर्वथैव नास्ति, इति महान् विशेषः। किञ्च, औपशमिकसम्यक्त्वे मिथ्यात्वं प्रदेशोदयेनाऽपि न वेद्यते, अत्र तु प्रदेशोदयेन तदपि वेद्यते। इत्यलं प्रसङ्गेनेति ॥ ५३२ ॥

अथोक्तशेषं वेदकं, क्षायिकं च सम्यक्त्वमेकगाथया प्राह–

[1]वेयगसम्मत्तं पुण सव्वोइयचरमपोग्गलावत्थं। खीणे दंसणमोहे तिविहम्मि वि खाइयं होइ ॥५३३ ॥

वेदयत्यनुभवति सम्यक्त्वपुद्गलानिति वेदकोऽनुभविता, तदनर्थान्तरभूतत्वात् तत्सम्यक्त्वमपि वेदकम्। अथवा, यथा आहियत इत्याहारकम्, तथा वेद्यत इति वेदकम्, जीवादिवस्तुबोधं प्रति समिति सम्यग् अवैपरीत्येन, अञ्चति प्रवर्तत इति सम्यक्, तस्य भावः सम्यक्त्वं, वेदकं च तत् सम्यक्त्वं च वेदकसम्यक्त्वम्। तत् पुनः क्षपकश्रेणिं प्रतिपन्नस्याऽनन्तानुबन्धिकषायचतुष्टयमिथ्यात्वमिश्र-पुञ्जेषु क्षपितेषु, सम्यक्त्वपुञ्जमप्युदीर्योदीर्याऽनुभूय निर्जरयतो निष्ठितोदीरणीयस्य सर्वोदितचरमपुद्गलावस्थं भवति। सर्वे च ते उदिताश्च ते च ते चरमपुद्गलाश्च सर्वोदितचरमपुद्गलास्तेऽवस्था स्वरूपं यस्य तत् तथा। इदमुक्तं भवति– क्षपितप्रायदर्शनसप्तकस्य सम्यक्त्वपुञ्जचरमपुद्गलग्रासमात्रमनुभवतो वेदकसम्यक्त्वे भवति।

अत्राह– नन्वेवं सति क्षायोपशमिकेन सहाऽस्य को विशेषः, सम्यक्त्वपुञ्जपुद्गलानुभवस्योभयत्रापि समानत्वात्?। सत्यम्, किन्त्वेतदशेषोदितपुद्गलानुभूतिमतः प्रोक्तम्, इतरत्तूदिता-ऽनुदिततत्पुद्गलस्य, एतन्मात्रकृतो विशेषः; परमार्थतस्तु क्षायोपशमिकमेवेदम्, चरमग्रासशेषाणां पुद्गलानां क्षयात्; चरमग्रासवर्तिनां तु मिथ्यात्वस्वभावापगमलक्षणस्योपशमस्य सद्भावादिति। अवश्यं चेदमङ्गीकर्तव्यम्, स्थानान्तरेषु बहुशः क्षायिकौ-पशमिक-क्षायोपशमिकलक्षणस्य त्रिविधस्यैव सम्यक्त्वस्याऽभिधानात्। तत्र च वेदकस्य क्षायोपशामिक एवाऽन्तर्भावः, कियन्मात्रभेदेन च भेद एवाऽङ्गीक्रियमाणे औदयिकसम्यक्त्वस्याऽपि प्राप्तेरतिप्रसङ्गः स्यादिति। अनन्तानुबन्धिकषायचतुष्टयक्षयान्तरं मिथ्यात्व-मिश्रसम्यक्त्वपुञ्जलक्षणे त्रिविधेऽपि दर्शनमोहनीये सर्वथा क्षीणे क्षायिकं सम्यक्त्वं भवतीति। तदेवमेतत्सम्यक्त्वपञ्चकपरिग्रहात् सम्यक्श्रुतम्, मिथ्यात्वपरिग्रहात्तु मिथ्याश्रुतं भवतीति प्रतिपत्तव्यमिति ॥ ५३३ ॥

अत्राह– ननु कियत् सम्यक्श्रुतमेव भवति?, कियच्च मिथ्याश्रुतम्?, शेषस्य च मत्यादिज्ञानचतुष्टयस्य मध्ये मिथ्यात्वोदयात् कस्य विपर्यासो भवति?, कस्य च न?, इत्याशङ्क्याह–

+सर्वोदिता:-। १ वेदकसम्यक्त्वं पुनः सर्वोदितचरमपुद्गलावस्थम्। क्षीणे दर्शनमोहे त्रिविधेऽपि क्षायिकं भवति ॥ ५३३ ॥ २ ध.छ. 'मव'।

चोद्दस दस य अभिन्ने नियमा सम्मत्तं सेसए भयणा। मइ-ओहिविवज्जासे वि होइ मिच्छं न उण सेसे ॥५३४॥

चतुर्दशपूर्वेभ्यः समारभ्य यावत् संपूर्णदशपूर्वाणि तावद् नियमात् सम्यक्श्रुतमेव भवति, न मिथ्याश्रुतम्– एतावच्छ्रुतसद्भावे सम्यग्दृष्टिरेव भवति न मिथ्यादृष्टिरिति भावः। 'सेसए भयण त्ति' शेषे भिन्नदशपूर्वादिके सामायिकपर्यन्ते श्रुते भजना विकल्पना– एतच्छ्रुतसद्भावे कोऽपि सम्यग्दृष्टिः, कश्चित्तु मिथ्यात्वोदयाद् विपर्यस्तो मिथ्यादृष्टिरपि भवति। ततश्चैतत् श्रुतं सम्यक्त्वपरिग्रहात् सम्यक्श्रुतं, मिथ्यात्वोदयाद् मिथ्याश्रुतमपि स्यादिति भावः। मत्य-वधिविपर्यासेऽपि मिथ्यात्वं मिथ्यात्वोदयो भवति, न पुनः शेषे– मनःपर्याय-केवलज्ञानद्वये। इदमुक्तं भवति– मिथ्यात्वोदयाद् मतिज्ञानं विपर्यस्तं सद् मत्यज्ञानं भवति, अवधिरपि तदुदयाद् विपर्यासमापन्नो विभङ्गपदव्यपदेशं लभते, मनःपर्याय-केवलज्ञाने तु कदापि मिथ्यात्वोदयाद् विपर्यासं न गच्छतः, तत्सद्भावे तदुदयस्यैवाऽसंभवात्। मनःपर्यायज्ञानं हि चारित्रिण एव भवति, केवलज्ञानं तु क्षीणघातिचतुष्टयस्य, इति कुतस्तद्भावे मिथ्यात्वोदयः? इति। एतच्चेह मिथ्यात्वोदयसंभवा-ऽसंभवप्रस्तावादनुषङ्गत एवोक्तम्, प्रस्तुतं पुनरत्र सम्यग्-मिथ्याश्रुतमेवेति ॥ ५३४ ॥

अत्र किल परः किंचित् प्रेरयति–

[3]तत्तावगमसहावे सइ सम्म-सुयाण को पइविसेसो?। जह नाण-दंसणाणं भेओ तुल्लेऽवबोहम्मि ॥५३५॥
नाणमवाय-धिईओ दंसणमिट्ठं जहोग्गहे-हाओ। तह तत्तरुई सम्मं रोइज्जइ जेण तं नाणं ॥ ५३६ ॥

उभयत्रापि तत्त्वावगमस्वभावत्वे तुल्ये सति कः सम्यक्त्व-श्रुतयोः प्रतिविशेषः, येनोच्यते– 'सम्यक्त्वपरिग्रहात् सम्यक्श्रुतम्' इति?। इदमुक्तं भवति– 'रागादिदोषरहित एव देवता, तदाज्ञापारतन्त्र्यवृत्तय एव गुरवः, जीवादिकमेव तत्त्वम्, जीवोऽपि नित्याऽनित्याद्यनेकस्वभावः, कर्ता, भोक्ता, मिथ्यात्वादिहेतुभिः कर्मणा बध्यते, तपः-संयमादिभिस्तु ततो मुच्यते' इत्यादिबोधात्मकमेव सम्यक्त्वमुच्यते, श्रुतमप्येवमाद्यभिलापात्मकमेव, तदनयोः को विशेषः, येनोच्यते– 'सम्यक्त्वपरिगृहीतं सम्यक्श्रुतम्' इति?। अत्रोत्तरमाह– 'जहेत्यादि' यथा वस्त्ववबोधरूपत्वे तुल्येऽपि कथंचिज्ज्ञान-दर्शनयोर्भेदः, तथा तत्त्वावगमस्वभावे तुल्येऽपि सम्यक्त्व-श्रु-

---

१ चतुर्दश दश चाभिन्नानि (पूर्वाणि) नियमात् सम्यक्त्वं, शेषके भजना। मत्य-वधिविपर्यासेऽपि भवति मिथ्यात्वं न पुनः शेषे ॥५३४॥ २ क.ग 'यावं'।
३ तत्त्वावगमस्वभावे सति सम्यक्त्व-श्रुतयोः कः प्रतिविशेषः?। यथा ज्ञान-दर्शनयोर्भेदस्तुल्येऽवबोधे ॥ ५३५ ॥
ज्ञानमपाय-धृती दर्शनमिष्टं यथावग्रहे-हे। तथा तत्त्वरुचिः सम्यक्त्वं रोच्यते येन तज्ज्ञानम् ॥ ५३६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तयोरिहाऽपि कथञ्चिद्भेदः । कथं पुनर्ज्ञान-दर्शनयोरन्यत्र तावद् भेद उक्तः ?, इति चेत् । इत्याह– 'नाणेत्यादि' यथाऽपायश्च धृतिश्चाऽपाय-धृती, एते वचनपर्यायग्राहकत्वेन विशेषावबोधस्वभावत्वाज्ज्ञानमिष्टं; अवग्रहश्चेहा चाऽर्थपर्यायविषयत्वेन सामान्यावबोधाद् दर्शनम्; तथाऽत्रापि जीवादितत्त्वविषया रुचिः श्रद्धानं सम्यक्त्वं भण्यते, येन पुनस्तज्जीवादितत्त्वं रोच्यते श्रद्धीयते तज्ज्ञानम् । अयमत्राभिप्रायः– दर्शन-मोहनीयकर्मक्षयोपशमादिना[2] या तत्त्वश्रद्धानात्मिका तत्त्वरुचिरुपजायते, तया तत्त्वश्रद्धानात्मकं जीवादितत्त्वरोचकं विशिष्टं श्रुतं जन्यते, ततस्तत् श्रुताज्ञानव्यपदेशं परिहृत्य श्रुतज्ञानसंज्ञां समासादयति । एवं च सति परो मन्यते– विशिष्टतत्त्वावगमस्वरूपं श्रुतमेव सम्यक्त्वं, न पुनस्ततोऽतिरिक्तं किञ्चिदुपलभ्यते, इति कथमुच्यते– 'सम्यक्त्वपरिग्रहात् सम्यक्श्रुतम्' इति ? । सिद्धान्तवादी तु मन्यते– यथा ज्ञानदर्शनयोर्वस्तुस्वबोधरूपतयैकत्वेऽपि विशेष-सामान्यैवस्तुग्राहकत्वेन भेदः, तथाऽत्रापि शुद्धतत्त्वावगमरूपे श्रुते तत्त्वश्रद्धानांशः सम्यक्त्वं, तद्विशिष्टं तु तत्त्वरोचकं श्रुतज्ञानमित्यनयोर्भेदः । एतयोश्च सम्यक्त्व-श्रुतयोर्युगपल्लाभेऽपि कार्य-कारणभावाद् भेदः । उक्तं च–

"[1]कारण-कज्जविभागो दीव-पगासाण जुगवजम्मे वि । जुगवुप्पन्नं पि तहा हेऊ नाणस्स सम्मत्तं ॥ १ ॥
जुगवं पि समुप्पन्नं सम्मत्तं अहिगमं विसोहेइ । जह कयगमंजणाइजलवुट्ठीओ विसोहिंति ॥ २ ॥"[5]

अतो युक्तमुक्तम् 'सम्यक्त्वपरिगृहीतं सम्यक्श्रुतं, विपर्ययात्तु मिथ्याश्रुतम्' ॥ इति गाथादशकार्थः ॥ ५३५ ॥ ५३६ ॥

॥ सप्रतिपक्षं सम्यक्श्रुतं समाप्तमिति ॥

इदानीं सादि सपर्यवसितं च श्रुतं सप्रतिपक्षमुच्यते–

[1]अत्थित्तिनयस्सेयं अणाइपज्जंतमत्थिकाय व्व । इयरस्स साइ सैंतं गइपज्जाएहिं जीवो व्व ॥ ५३७ ॥

अस्तीतिनयो नित्यवादी द्रव्यास्तिकस्तस्याभिप्रायेणेदं द्वादशाङ्गश्रुतमनादि, अपर्यन्तं च; नित्यत्वात्, पञ्चास्तिकायवत्; तथाहि– यैर्जीवद्रव्यैः श्रुतमिदमधीतं, यान्यधीयन्ते, यानि चाध्येष्यन्ते, तानि तावद् न कदापि व्यवच्छिद्यन्ते, इति तेषामनादिता,

---

१ घ. छ. 'नर्जी' । २ घ. छ. 'तत्र रु' । ३ क. ग. 'कं वि' । ४ घ. छ. 'न्यमा' ।
५ कारण-कार्यविभागो दीप-प्रकाशयोर्युगपज्जन्मन्यपि । युगपदुत्पन्नमपि तथा हेतुर्ज्ञानस्य सम्यक्त्वम् ॥ १ ॥
युगपदपि समुत्पन्नं सम्यक्त्वमधिगमं विशोधयति । यथा कनकमञ्जनादिजलवृष्टयो विशोधयन्ति ॥ २ ॥
६ अस्तीतिनयस्येदमनादिपर्यन्तमस्तिकाय इव । इतरस्य सादि सान्तं गतिपर्यायैर्जीव इव ॥ ५३७ ॥

[3]अपर्यन्तता च । ततः श्रुतस्याऽपि तत्पर्यायभूतस्य तदव्यतिरेकात् तद्रूपतैव । न हि सर्वथाऽसत् काप्युत्पद्यते, सिकतास्वपि तैलाद्युत्पत्तिप्रसङ्गात् । नापि सतोऽत्यन्तोच्छेदः, सर्वशून्यतापत्तेः । यदि हि यद् यदेव-नारकादिकं घट-पटादिकं च विनश्यति तत् तद्यदि सर्वथा निरन्वयमपैति, तदा कालस्याऽपर्यवसितत्वात् क्रमेण सर्वस्याऽपि जीवपुद्गलराशेर्व्यवच्छेदात् सर्वमेव विश्वं शून्यं स्यात् । तस्माच्छ्रुताधारद्रव्याणां सर्वदैव सत्त्वात् तदव्यतिरेकिणस्तस्यापि तद्रूपतैवेति स्थितम् । इतरस्य व्यवच्छित्तिनयस्याऽनित्यवादिनः पर्यायास्तिकस्य मतेन सादि, सपर्यन्तं च श्रुतम्, अनित्यत्वाज्जीवस्य, नारकादिगतिपर्यायवत्; तथाहि– श्रुतज्ञानिनां निरन्तरमपरापरे द्रव्याद्युपयोगाः प्रसूयन्ते, प्रलीयन्ते च । न च तेभ्योऽन्यत् किमपि श्रुतमस्ति, तत्कार्यभूतस्य जीवादितत्त्वावबोधस्याऽन्यत्राऽदर्शनात्, तदनुपलम्भेऽपि तत्कल्पनायामतिप्रसङ्गात् । द्रव्यादिषु च श्रुतोपयोगः सादिः सपर्यवसित एवेति ॥ ५३७ ॥

अथवा, नयविचारमुत्सृज्य द्रव्य-क्षेत्र-काल-भावानाश्रित्येदं साद्यादिस्वरूपं चिन्त्यत इति । एतदाह–

[1]दव्वाइणा व साइयमणाइयं संतमंतरहियं वा । दव्वम्मि एगपुरिसं पडुच्च साइं सनिहणं च ॥ ५३८ ॥

द्रव्यादिना वा द्रव्य-क्षेत्र-काल-भावैर्वा श्रुतं सादिकमनादिकं, सान्तमनन्तं च भवति । इह च द्रव्यतः श्रुतमेकं बहूनि च पुरुष-द्रव्याण्याश्रित्य चिन्तनीयम् । तत्रैकपुरुषं द्रव्यमङ्गीकृत्य तावदाह– 'दव्वम्मीत्यादि' द्रव्यत एकपुरुषं प्रतीत्य सादि सनिधनं च श्रुतं भवति ॥ ५३८ ॥

कथम् ?, इति चेत् । इत्याह–

[4]चोद्दसपुव्वी मणुओ देवत्ते तं न संभरइ सव्वं । देसम्मि होइ भयणा सट्ठाणभवे वि भयणा उ ॥ ५३९ ॥

इह कश्चिच्चतुर्दशपूर्वधरः साधुर्मृत्वा देवलोकं गतः । तत्र च देवत्वे तत् पूर्वाधीतं श्रुतं न स्मरति । कियद् न स्मरति ?, इत्याह– सर्वं कृत्स्नं, अशेषमिति यावत् । 'देशे पुनरेकाङ्गलक्षणे' इति कल्पचूर्णिः, कोट्याचार्यव्याख्यानं तु 'देशे सूत्रार्धे सूत्रमात्रादौ चेति । इदं च पूर्वगतसूत्रापेक्षं संभाव्यते, अन्यथा कल्पेन सह विरोधप्राप्तेः, भजना विकल्पना भवति– यथोक्तं देशं स्मरति, न स्मरत्यपीत्यर्थः । किं देवत्वमात्रस्यैवेत्थं श्रुतस्य प्रतिपातः, आहोस्विदिहभवेऽपि ?, इत्याह– स्वस्थाने मनुष्यत्वे योऽसौ भवो जन्म तत्रापि तिष्ठतो भजना

---

१ द्रव्यादिना वा सादिकमनादिकं सान्तमनन्तरहितं वा । द्रव्य एकपुरुषं प्रतीत्य सादि सनिधनं च ॥ ५३८ ॥ २ क. ख. ग. 'आइ' ।
३ चतुर्दशपूर्वी मनुजो देवत्वे तद् न स्मरति सर्वम् । देशे भवति भजना स्वस्थानभवेऽपि भजना तु ॥ ५३९ ॥ + एकादशाङ्ग–।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विकल्पना– मिथ्यात्वगमनादिभिः कारणैः कस्यचित् प्रतिपतति श्रुतम्, कस्यचिद् नेति ॥ ५३९ ॥

तान्येव मिथ्यात्वगमनादीनि श्रुतप्रतिपातकारणानि सामान्येनाह–

[1]मिच्छ-भवंतर-केवल-गेलन्न-पमायमाइणा नासो । आह किमत्थं नासइ किं जीवाओ तयं भिण्णं ?॥५४०॥

इहभवेऽपि तिष्ठतः कस्यचिद् मिथ्यात्वगमनेन श्रुतस्य नाशो भवति, कस्यचिद् भवान्तरगमनेन। एतच्च 'चोद्दसपुव्वी मणुओ' इत्यादिना दर्शितमेव । न चेह पुनर्भणने पौनरुक्त्यमाशङ्कनीयम्, सामान्येन श्रुतप्रतिपातकारणभणनप्रक्रमायातत्वेन पुनरत्र भणनात् । केवलज्ञानोत्पत्तौ च कस्यचिदिहभवेऽपि श्रुतं नश्यति, " नट्ठम्मि उ छाउमत्थिए नाणे " इति वचनात् । अपरस्य तु ग्लानावस्थायां, अन्यस्य पुनः प्रमादादिनेहभवेऽपि तस्य नाशो भवति । ततो लाभकाले तस्य सादित्वम्, प्रतिपाते तु सान्तत्वमिति । अत्र परः प्राह– किमर्थं श्रुतं लब्धं सद् नश्यति, किं जीवाद् भिन्नं व्यतिरिक्तं वर्तते ?— जीवे तिष्ठत्यपि श्रुतस्य भिन्नस्यैव नाशो युज्यते नाऽभिन्नस्येति भावः ॥ ५४० ॥

भिन्नमेव तत् तस्मादिति चेत् । अत्र दूषणमाह–

जइ भिन्नं तब्भावे वि तो तओ तस्सब्भावरहिउ त्ति । अण्णाणि च्चिय निच्चं अंध व्व समं पईवेण ॥५४१॥

यदि जीवाद् भिन्नं श्रुतमभ्युपगम्यते, 'तो त्ति' ततस्तद्भावेऽपि श्रुतसद्भावेऽपि तकोऽसौ जीवोऽज्ञान्येव नित्यं स्यात्। कुतः ?, इत्याह– तत्स्वभावरहित इति कृत्वा । श्रुतं हि जीवाद् भिन्नमिष्टम्, ततो जीवः श्रुतस्वभावरहितत्वादज्ञान्येव स्यात्– श्रुतप्रकाश्यमर्थं न पश्येदित्यर्थः। यथाऽन्धश्चक्षुर्विकल आत्मव्यतिरिक्तेन हस्तगतेनाऽपि प्रदीपेन तत्प्रकाश्यमर्थं न पश्यतीति ॥ ५४१ ॥

अत्र सूरिरुत्तरमाह–

[2]तं ता नियमा जीवो जीवो न तदेव केवलं जम्हा । तं च तदण्णाणं वा केवलनाणं व सो होज्जा ॥५४२॥

---

१ मिथ्या-भवान्तर-केवल-ग्लान-प्रमादादिना नाशः । आह किमर्थं नश्यति किं जीवात् तद् भिन्नम् ? ॥ ५४० ॥

२ गाथा ५३९ । ३ नष्टे तु छाद्मस्थिके ज्ञाने ।

४ यदि भिन्नं तद्भावेऽपि ततः सकस्तत्स्वभावरहित इति । अज्ञान एव नित्यमन्ध इव समं प्रदीपेन ॥ ५४१ ॥

५ तत् तावद् नियमाज्जीवो जीवो न तदेव केवलं यस्मात् । तच्च तदज्ञानं वा केवलज्ञानं वा स भवेत् ॥ ५४२ ॥

तत् तावत् श्रुतज्ञानं नियमाज्जीवो जीवस्वभावमेव भवति, नाऽजीवस्वभावम् । जीवः पुनस्तदेव केवलं न भवति । कुतः ?, इत्याह– यस्मादसौ तद्वा श्रुतज्ञानं स्यात्, तदज्ञानं वा श्रुताज्ञानं, केवलज्ञानं वा स भवेत् । वाशब्दाद् मतिज्ञानम्, अवधिज्ञानं, मनःपर्यायज्ञानं, मत्यज्ञानं, विभङ्गो वाऽसौ भवेज्जीव इति ॥ ५४२ ॥

'तं ता नियमा जीवो' इति यदुक्तं, तदुपजीव्य परः प्राह–

[1]तं जइ जीवो नासे तण्णासो होउ सव्वसो नत्थि । जं सो उप्पाय-व्वय-धुवधम्माणंतपज्जाओ ॥ ५४३ ॥

तच्छ्रुतं यदि जीवो जीवस्वभावभूतं तत्, तदा जीवात् तदव्यतिरिक्तमिति सामार्थ्यादेव भवद्भिरभ्युपगतम्, युक्तं चैतत्, एवं हि सति युज्यते– जीवस्य तत्कृतवस्त्ववबोधो ज्ञानित्वं केवलं नाशे प्रतिपाते तस्य 'श्रुतस्य' इति प्रक्रमाल्लभ्यते, तस्य जीवस्य नाशस्तन्नाशो भवत्वस्तु । यतो हि यदव्यतिरिक्तं तस्य विनाशे तद् विनश्यत्येव, यथा घटस्वरूपविनाशे घटवस्त्विति । अत्र सूरिरुत्तरमाह– 'भवतु' इतीहापि योज्यते, अस्तु श्रुतस्य नाशे जीवस्य तत्पर्यायविशिष्टतामात्रान्वितस्य नाशः, किन्तु सर्वशः सर्वात्मना पर्यायान्तरविशिष्टस्यापि तस्य नाशो नास्ति । यद् यस्मादसौ जीव उत्पाद-व्यय-ध्रौव्यधर्मा, अनन्तपर्यायश्च वर्तते । ततो यदैवाऽसौ श्रुतपर्यायेण विनश्यति, तदैव श्रुताज्ञानानादिपर्यायेणोत्पद्यते । सचेतनत्वा-ऽमूर्तत्व-सत्त्व-प्रमेयत्वादिभिरनुगतैरन्यव्याहृत्तैश्चानन्तैः पर्यायैर्विशिष्टोऽसौ सर्वावस्थास्ववतिष्ठते । अतः कथं श्रुतपर्यायमात्रविनाशे तस्य सर्वथा विनाशः स्यात् ?। यदि हि तस्याऽयमेवैकः पर्यायो भवेत् तदा तद्विनाशे तस्य सर्वनाशः स्यात् । एतच्च नास्ति, श्रुतपर्यायमात्रेण विनष्टस्यापि तस्य श्रुताज्ञानादिपर्यायेणोत्पादात् । यथोक्तैश्चानन्तपर्यायैर्विशिष्टस्य सर्वदैवाऽवस्थानादिति ॥ ५४३ ॥

न चात्मैव केवल उत्पाद-व्यय-ध्रौव्यधर्मा, किन्तु सर्वमपि वस्त्वीदृशमेव, इति दर्शयति–

[2]सव्वं चिय पइसमयं उप्पज्जइ नासए य निच्चं च । एवं चेव य सुह-दुक्ख-बंध-मोक्खाइसब्भावो ॥ ५४४ ॥

सर्वमेव हि स्तम्भ-कुम्भ-भवनादिवस्तु प्रतिसमयं पुराणादिपर्यायेणोत्पद्यते, नवादिपर्यायेण तु विनश्यति, द्रव्यतया पुनर्नित्यं च ध्रुवं सर्वदैवाऽवतिष्ठते । एवमेव च सुख-दुःख-बन्ध-मोक्षादिसद्भावो घटते, नान्यथा; सुखादिसद्भावो हि स्रक्-चन्दना-ऽङ्गना-

---

१ तद् यदि जीवो नाशे तन्नाशो भवतु सर्वशो नास्ति । यत् स उत्पाद-व्यय-ध्रौव्यधर्मा-ऽनन्तपर्यायः ॥ ५४३ ॥

२ सर्वमेव प्रतिसमयमुत्पद्यते नश्यति च नित्यं च । एवमेव च सुख-दुःख-बन्ध-मोक्षादिसद्भावः ॥ ५४४ ॥ +नवादिपर्यायेणोत्पद्यते पुराणादि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऽहि-निषादिसहकारिकारणसद्भावे युज्यते, अन्यथा सर्वदैव तद्भावाऽभावप्रसङ्गात् । न चैकान्तनित्यस्य तावत्सहकार्यपेक्षा युज्यते । तथाहि– अपेक्ष्यमाणेन सहकारिणा तस्य कश्चिदतिशयः क्रियते, नवा ? इति वक्तव्यम् । यदि क्रियते, स किमर्थान्तरभूतः, अनर्थान्तरभूतो वा ? इति वाच्यम् । यद्याद्यः पक्षः, तर्हि तस्य किमायातम् ? । तस्याऽसौ विशेषकारक इति चेत् । न, अनवस्थाप्रसङ्गात्; तथाहि– सोऽपि विशेषस्ततो भिन्नः, अभिन्नो वा ? इत्यादि तदेवाऽऽवर्तत इत्यनवस्था । अथाऽनर्थान्तरभूत इति द्वितीयः पक्षः, स किं विद्यमानः, अविद्यमानो वा ? । यदि विद्यमानः, किमिति क्रियते ?, करणे वाऽनवस्थाप्रसङ्गः । अथाऽविद्यमानः, ननु व्याहतमेतत्– ततोऽनर्थान्तरभूतः, अविद्यमानश्चेति । अविद्यमानस्य च खरविषाणस्येव कथं करणोत्पत्तिः ?, करणे वा वस्तुनोऽनित्यत्वप्रसङ्गः, तदव्यतिरिक्तत्वेन तत्करणे वस्तुनोऽपि करणात् । अथ मा भूदेष दोष इति न क्रियत इत्यभ्युपगम्यते, न तर्हि स तस्य सहकारी, अतिशयाकरणात्; इत्थमपि सहकारित्वेऽतिप्रसङ्गः, तथाहि– यदि कंचन विशेषमकुर्वन्नपि सहकार्याश्रीयते, तर्हि सर्वभावानामपि तत्सहकारित्वप्रसङ्गः, विशेषाकरणस्य समानत्वात्, इति कथं प्रतिनियतसहकारिकल्पना ? । अथैवंभूत एवाऽस्य वस्तुनः स्वभावः, येन विशेषाकारकमपि प्रतिनियतमेव सहकारिणमपेक्ष्य कार्यं जनयति । नन्वेतदपि मनोरथमात्रम्, तद्धि यदाऽभीष्टसहकारिसंनिधौ कार्यं जनयति, तदा तस्य तदपेक्षालक्षणस्वभावो व्यावर्तते नवेति वाच्यम् । यदि व्यावर्तते, तर्ह्यनित्यत्वप्रसङ्गः, स्वभावनिवृत्तौ स्वभाववतोऽपि तदव्यतिरेकेण तद्वदेव निवृत्तेः । अथ न व्यावर्तते, तर्हि कार्याजननप्रसङ्गः, तत्स्वभावानिवृत्तेः, पूर्ववदिति । य एव हि तस्य कार्याजननावस्थायां स्वभावः, स एव जननावस्थायामपि, इति कथं जनयेत् ? । जनने वा सर्वदा जननप्रसङ्गः, तत्स्वभावस्य सर्वदाऽवस्थितत्वादिति । सहकारिकारणान्यपि नित्यत्वात् सर्वदैव संभूयोपकुर्वीरन्, विपर्ययो वा, नित्यस्यैकस्वभावत्वात् । ततश्च कार्यस्य सर्वदैव भावः, अभावो वा स्यादिति ।

अथैकान्तानित्यं क्षणस्थितिधर्मकं वस्त्वभ्युपगम्यते । एतदप्ययुक्तम्, यतः क्षणस्थितिधर्मकं क्षणभावस्वभावमभिधीयते, ततोऽर्थादेवाऽस्य द्वितीयादिक्षणे स्वभाव इत्यकामेनाऽपि प्रतिपत्तव्यम्, तयोश्च भावा-ऽभावयोः परस्परमन्यत्वम्, अनन्यत्वं वेति वक्तव्यम् ? । यद्यन्यत्वम्, तत् किं सर्वथा, उत कथञ्चित् ? । यदि सर्वथा, तर्हि द्वितीयादिक्षणेष्वपि भावप्रसङ्गः, प्रथमक्षणभावस्य द्वितीयादिक्षणाभावभिन्नत्वान्यथानुपपत्तेः; न ह्येकान्तभिन्नादभावाद् भावस्य निवृत्तिर्युज्यते, पटाभावादपि घटभावनिवृत्तिप्रसङ्गात् । अथ कथञ्चित् । तदयुक्तं, अनेकान्तवादाभ्युपगमप्रसङ्गात् । अथाऽनन्यत्वम् । तदपि सर्वथोत कथञ्चित् । यदि सर्वथा, तर्हि प्रथमक्षणभाव एव द्वितीयादि-

---

१ घ. छ. 'थं नि' । २ घ.छ. 'रिकारण' ।

क्षणाभावस्ततो द्वितीयादिक्षणेष्वपि वस्तुनो भावप्रसङ्गः, द्वितीयादिक्षणाभावस्य वा निरूपाख्यत्वात्तस्यैव च प्रथमक्षणभावरूपत्वात्प्रथमक्षणभाव एवाऽभावः स्यात् । कथञ्चित्पक्षे तूक्त एव दोषः । अथ द्वितीयक्षणाभावस्याभावरूपत्वादेव न प्रथमक्षणभावेनाऽन्या-ऽनन्यत्वकल्पना युक्तिमती । स्यादेतत्, यदि भावोऽभावाद् भेदा-भेदौ विहाय वर्तेत (वर्तते), तच्च नास्ति, गत्यन्तराभावात् । अथ द्वितीयक्षणाभावः परिकल्पितत्वादेव न विकल्पकल्पनाविषयः; हन्त ! यद्येवम्, तर्हि तस्य परिकल्पितत्वादसत्त्वाद् द्वितीयादिक्षणेष्वपि भावप्रसङ्गः, इति कुतः क्षणस्थितिधर्मकत्वम् ? । अथ प्रथमक्षणव्यतिरिक्तो द्वितीयादिक्षणाभावः परिकल्पितः, तदव्यतिरिक्तस्त्वसावस्त्येव; तर्हि प्रथमक्षणभाव एव द्वितीयादिक्षणाभावः, तत्र च प्रागुक्त एव दोष इति । अथ तदुत्तरकालभाविपदार्थान्तरभाव एव विवक्षितस्य द्वितीयादिक्षणाभावः; यद्येवम्, अत्र सुतरामन्या-ऽनन्यत्वकल्पना, तत्र चोक्तो दोषः । अथ क्षणस्थितिधर्मकं वस्त्वेव द्वितीयादिक्षणाभावः । तदयुक्तम्, तस्यैवाऽयोगात्; तथाहि— क्षणस्थितिधर्मकं क्षणभावस्वभावमभिधीयत इत्यादि तदेवाऽनुवर्तत इति । अथोच्येत— द्वितीयादिक्षणाभावे प्रथमक्षणभावस्याऽभावात्, भावे वा द्वितीयादिक्षणाभावानुपपत्तेः प्रतियोग्यभावादेव नाऽन्या-ऽनन्यत्वकल्पनायाः संभवः, तथाहि– द्वितीयादिक्षणे तदेव न भवति । नन्वेवम्, तर्हि तस्यैवाऽभावीभूतत्वाद् भाववत् तदभावस्याऽपि तद्धर्मत्वम्, अतस्तद्धर्मत्वे सर्वदैव भावापत्तेः; ततश्च स्वहेतुभ्य एव तद्भावा-ऽभावधर्मकं समुत्पद्यत इति प्रतिपत्तव्यम् । न चाऽक्रमवतः कारणात् क्रमवद्धर्माध्यासितकार्योत्पत्तिर्युज्यते । ततश्च यदैव भावस्तदैवाऽभावः स्यात्, इति कुतः क्षणस्थितिधर्मकत्वम् ? । तद्भावे वा प्रथमक्षणवदुत्तरक्षणेष्वपि भावा-ऽभावयोः सहावस्थानेऽविरोधात् सर्वदैव वस्तुनो भावापत्तिः । न च निरंशतत्स्वभावेभ्यः स्वहेतुभ्य एव तद् वस्तु क्षणस्थितिधर्मकमेवोत्पद्यते, इति तद्धेतुभिरेवाऽत्रोत्तरं वक्तव्यम्, इत्युच्यमानं विद्वज्जनमनांसि रञ्जयतिः एवं हि स्वभावान्तरकल्पनाया अपि कर्तुं शक्यत्वात् । स्यादेतत्, शक्या स्वभावान्तरकल्पना, अक्षणिकेऽर्थक्रियाऽसंभवात् । तदयुक्तम्, क्षणिके एवाऽर्थक्रियाऽयोगात्, तथाहि– क्षणिकः पदार्थोऽनुत्पन्नोऽर्थक्रियां करोति, उत्पद्यमानः, उत्पन्नः, निवर्तमानः, निवृत्तो वा ? इति विकल्पाः । न तावदनुत्पन्नः, तस्यैवाऽसत्त्वात् । नाऽप्युत्पद्यमानः, उत्पद्यमानावस्थायां क्षणभङ्गभाववादिभिरनभ्युपगमात्; अभ्युपगमे वा कोऽप्यंश उत्पन्नः, कोऽप्यनुत्पन्न इति सांशवस्त्वभ्युपगमः स्यात्, तथा चाऽस्मत्पक्षसिद्धिः, द्रव्य-पर्यायोभयरूपवस्तुसिद्धेः । अंशाभ्युपगमे ह्यंशवानवयवी सिद्ध्यति, स च द्रव्यम्, अंशाश्च पर्याया इति द्रव्य-पर्यायोभयरूपवस्तुसिद्धिः । नाऽप्युत्पन्नः, तस्य सर्वात्मनोत्पन्नत्वेन सहकारिभिरनाधेयातिशयत्वात्, अतिशयाधाने वा भिन्नकारणप्रभवातिशयस्य ततो भेदप्रसङ्गात् । इदमेव सहकारिणामतिशयजनकत्वं यदुत– तैः सह संभूय विशिष्टामर्थक्रियामसौ करोतीति चेत् । नन्वेतदप्यात्मचित्तसमाधानमात्रम्, यदि हि विशिष्टाऽर्थक्रियाकरणे सहकारिणां संयोगमात्रमेवाऽयमपेक्षते, न त्वपरमतिशयम्; तर्ह्यसहकारित्वाभिमतैरप्यनेकैः सहाऽस्य संयोगमात्रं विद्यते, किमिति विवक्षितसहकारिसंयोगमपे-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षते ?। तस्मात् तेभ्यस्तस्याऽतिशयाधानं वक्तव्यम्, तच्च क्षणिकत्वे नोत्पद्यते । अथ निवर्तमानः करोति । तदप्ययुक्तम्, निवर्तमानावस्थाऽनभ्युपगमात्, अभ्युपगमे वा वस्तूनां सांशतापसङ्गात् । निवृत्तोऽपि न करोति, अविद्यमानत्वादेव । तस्मात् क्षणस्थितिधर्मकमपि वस्तु न कथमप्युपपद्यते । इति द्रव्य-पर्यायोभयरूपं नित्या-ऽनित्यमेव वस्त्वभ्युपगन्तव्यम्, तस्यैव प्रत्यक्षादिप्रमाणसिद्धत्वात्, तथाहि– मृत्पिण्ड-शिवक-स्थास-घट-कपालादिष्वविशेषेण सर्वत्र मृदन्वयः संवेद्यते, प्रतिभेदं चान्योन्यव्यावृत्तिः, यथाप्रतिभासं हि मृत्पिण्डसंवेदनं, न तथाप्रतिभासमेव शिवकादिषु, सर्वत्राऽऽकारभेदानुभवात्। न च यथाप्रतिभासभेदं तत्संवेदनं विजातीयेष्वुदक-दहन-पवनादिषु, तथाप्रतिभासभेदमेव शिवकादिषु, सर्वत्र मृदन्वयस्य संवेदनात् । न चास्य सर्वजनसंवेद्यस्यापि संवेदनस्याप्रमाणत्वः कर्तुं युज्यते, अतिप्रसङ्गात् । न चेदं संवेदनं भ्रान्तमिति शक्यते वक्तुम्, देश-काल-नरावस्थान्तरेष्वित्थमेव प्रवृत्तेः । न चार्थप्रभवमविसंवादि संवेदनं विहाय जातिविकल्पेभ्यः पदार्थव्यवस्था युज्यते, प्रतीतिबाधितत्वेन तेषामेवाऽनादेयत्वात् । न चैकान्तनित्येषु वस्तुषु यथोक्तसंवेदनभावो युज्यते, व्यावृत्ताकारनिबन्धनस्य धर्मभेदस्य तेष्वभावात्; उक्तं च–

" भावेष्वेकान्तनित्येषु नान्वय-व्यतिरेकवत् । संवेदनं भवेद् धर्मभेदाभावादिह स्फुटम् ॥ १ ॥ "

धर्मभेदाभ्युपगमे चैकान्तनित्यत्वहानिप्रसङ्गात्। एकान्तेविनश्वरेष्वपि भावेषु नाधिकृतसंवेदनसंभवो घटते, अनुवृत्ताकारनिबन्धनद्रव्यान्वयस्याऽभावात् । उक्तं च–

" एकान्ताऽनित्यभावेषु नान्वय-व्यतिरेकवत् । संवेदनं भवेद् द्रव्यस्याऽन्वयाभावतो ध्रुवम् ॥ १ ॥ "

न चाऽस्य संवेदनस्य बाधकप्रत्ययो युज्यते, कदाचिदप्यनुपलब्धेः । तस्मादन्वयाऽविनाभूतो व्यतिरेकः, व्यतिरेकाविनाभूतश्चान्वय इति । उक्तं च–

" नाऽन्वयः स हि भेदत्वाद् न भेदोऽन्वयवृत्तितः । मृद्द्रव्यभेदसंसर्गवृत्तिजात्यन्तरं घटः ॥ १ ॥"

इत्यलं विस्तरेण । अत्र बहु वक्तव्यम्, तत्तु नोच्यते, ग्रन्थगहनताभयात्, अन्यत्रोक्तत्वाच्चेति । अत्र च ग्रन्थे, ग्रन्थान्तरेषु चाऽयं वादो बहुषु स्थानेषु भणिष्यते । एकत्र च स्थाने लिखितः स्थानान्तरे सुखेनैवाऽतिदिश्यते, इत्यालोच्य किञ्चित् सविस्तरमिदं वादस्थानकं लिखितम् । इति न पराभजनीयम्, अरुचिर्वा विधेया, बहूपयोगित्वादस्येति ॥ ५४४ ॥

---

१ ध. छ. 'नप्रभवो' । २ ग. छ. 'स्तन' । ३ क. ग. 'रेषु भा' । ४ ध. छ. 'कः प्र' । ५ घ. छ. 'रे चा' । ६ ध. छ. 'त्र स्था' ।

इह श्रुतस्य साद्यादिप्ररूपणायां चतुर्भङ्गी संभवति, तद्यथा– सादि सपर्यवसितमित्येको भङ्गः, सादि अपर्यवसितमिति द्वितीयः, अनादि सपर्यवसितमिति तृतीयः, अनादि अपर्यवसितमिति चतुर्थः । तत्र द्रव्यत एकं पुरुषद्रव्यमङ्गीकृत्य निरूपितः प्रथमो भङ्गः । द्वितीयस्तु प्ररूपणामात्रं, क्वचिदप्यसंभवात् । अतो भव्या-ऽभव्यौ समाश्रित्य तृतीय-चतुर्थभङ्गावाह–

[3]अहवा सुत्तं निव्वाणभाविणोऽणाइयं सपज्जंतं । जीवत्तं पिव नियतं सेसाणमणाइ-पज्जंतं ॥ ५४५ ॥

इह सम्यग्-मिथ्याभावेनाऽविशेषितं श्रुतसामान्यमात्रं गृह्यते । अथवाशब्दो भङ्गकान्तरसूचकः । निर्वाणे भविष्यतीति निर्वाणभावी भव्यस्तस्यैतच्छ्रुतमात्रं भव्यत्ववदनादिकालादारभ्य भावादनादि, केवलोत्पत्तौ पुनरवश्यं न भविष्यतीति सपर्यन्तम्। शेषाणामनिर्वाणभाविनामभव्यानां जीवत्ववदभव्यत्ववद् वा नियतं निश्चितमनादि-अपर्यन्तम्, अभव्यस्य संसारे कदाचिदपि श्रुतमात्राऽव्यवच्छेदादिति । इह द्रव्यत एकं जीवद्रव्यमाश्रित्य निरूपितः प्राक् सादिसपर्यवसितत्वलक्षणः श्रुतस्य प्रथमभङ्गः, नानाजीवद्रव्याणि त्वाश्रित्य तस्यैव चतुर्थभङ्गः पुरस्ताद् भणिष्यते ॥ ५४५ ॥

अथ क्षेत्र-काल-भावैः प्रथमं भङ्गमेव तस्य दर्शयन्नाह–

[4]खेत्ते भरहे-रवया काले उ समाउ दोण्णि तत्थेव । भावे पुण पण्णवगं पण्णवणिज्जे व आसज्ज ॥ ५४६॥

प्राग् यदुक्तम्– ' दव्वाम्मि एगपुरिसं पडुच्च साइं सनिहणं च ' इति, तदिह प्रकृतं स्मर्यते। ततश्च क्षेत्रे चिन्त्यमाने भरतै-रावतक्षेत्राण्याश्रित्य सम्यक्श्रुतं सादि सनिधनं च भवति । एतेषु हि क्षेत्रेषु प्रथमतीर्थकरकाले तद् भवतीति सादित्वं, चरमतीर्थकृत्तीर्थान्ते त्ववश्यं व्यवच्छिद्यत इति सपर्यवसितत्वमिति। काले त्वधिक्रियमाणे द्वे समे उत्सर्पिण्य-वसर्पिण्यौ समाश्रित्य तत्रैव तेष्वेव भरतै-रावतेष्वेतत् सादि सपर्यवसितं भवति, द्वयोरपि समयोस्तृतीयारके प्रथमं भावात् सादित्वम्; उत्सर्पिण्यां चतुर्थस्यादौ, अवसर्पिण्यां तु पञ्चमस्यान्तेऽवश्यं व्यवच्छेदात् सपर्यवसितत्वम्। भावे पुनर्विचार्यमाणे प्रज्ञापकं गुरुं श्रुतमज्ञापनीयांश्चार्थानाश्रित्येदं सादि सपर्यवसितं स्यादिति॥५४६॥

कथं पुनः प्रज्ञापकं, प्रज्ञापनीयांश्चार्थानाश्रित्येदं साद्यादिरूपम् ?, इत्याह–

---

१ घ. छ. ' को भेदः सा' । २ अथवा सूत्रं निर्वाणभाविनोऽनादिकं सपर्यन्तम् । जीवत्वमिव नियतं शेषाणामनादि-पर्यन्तम् ॥ ५४५ ॥

३ ध. छ. 'धमभ' ४ क्षेत्रे भरतै-रावते काले तु समे द्वे तत्रैव । भावे पुनः प्रज्ञापकं प्रज्ञापनीयान् वाऽऽसाद्य ॥ ५४६ ॥ ५ गाथा ५३८ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उवओग-सर-पयत्ता थाणविसेसा य होंति पण्णवए । गइ-ट्ठाण-भेय-संघाय-वण्ण-सद्दाइभावेसु ॥ ५४७ ॥

उपयोग आन्तरः श्रुतपरिणामः, स्वरो ध्वनिः, प्रयत्नस्तालवादिव्यापारविषयो यत्नः, स्थानविशेषा आसनविशेषाः, प्रज्ञापके गुरौ व्याख्यानादि कुर्वति सत्येते भावा धर्मा भवन्ति । एते चाऽनित्यत्वात् सादि-सपर्यवसिताः । ततश्चैतानाश्रित्य वक्तुरनन्यत्वाच्छ्रुतमपि सादि-सपर्यवसितं भवति । प्रज्ञापनीयार्थगतान् भावानाह– 'गईत्यादि' गतिरण्वादीनां गमनपरिणामः, स्थानं तेषामेव स्थितिपरिणामः, भेदस्तेषामेवाऽन्यसंयुक्तानां विघटनम्, संघातस्त्वन्यैः सह संयोगः, वर्णः कृष्णादिः, शब्दो मेन्द्र-मधुरादिः ,आदिशब्दाद् रस-गन्ध-स्पर्श-संस्थानादिपरिग्रहः । एते गति-स्थित्यादयो भावाः पर्यायधर्मा भावेषु प्रज्ञापनीयेषु परमाण्वादिषु भवन्ति । ततोऽनित्यत्वादमी सादि-सपर्यवसिताः । एते च श्रुतस्य ग्राह्याः, ग्राहकं च ग्राह्यनिबन्धनं भवति, अतः श्रुतमपि सादि-सपर्यवसितमिति भावः । तदेवं द्रव्य-क्षेत्र-काल-भावानाश्रित्य सादि-सपर्यवसितत्वलक्षणो दर्शितः प्रथमभङ्गः ॥ ५४७ ॥

अथैतानेवाऽऽश्रित्य पूर्वमभव्यश्रुतदर्शितमपि पुनरेतेष्वपि क्रमायातेषु संभवदर्शनार्थमनाद्यपर्यवसितत्वलक्षणं चतुर्थभङ्गमुपदर्शयन्नाह—

[1]दव्वे नाणापुरिसे खेत्ते विदेहाई कालो जो तेसु । खय-उवसमभावम्मि य सुयनाणं वट्टए सययं ॥५४८॥

द्रव्ये द्रव्यविषये नानापुरुषान् नारक-तिर्यङ्-मनुष्य-देवगतान् नानासम्यग्दृष्टिजीवानाश्रित्य श्रुतज्ञानं सम्यक्श्रुतं सततं वर्तते— अभूत्, भवति, भविष्यति च, न तु कदाचिद् व्यवच्छिद्यते । ततस्तानाश्रित्येदमनादि, अपर्यवसितं च स्यादिति भावः । क्षेत्रे पुनः पञ्च महाविदेहलक्षणान् विदेहानङ्गीकृत्य, काले तु यस्तेष्वेव विदेहेषु कालोऽनवसर्पिण्युत्सर्पिणीरूपस्तमाश्रित्य । भावे तु क्षायोपशमिके श्रुतज्ञानं सततं सर्वदैव वर्तते; अतोऽनादि अपर्यवसितम् । सामान्येन हि महाविदेहेषूत्सर्पिण्यवसर्पिण्यभावरूपनिजकालविशिष्टेषु द्वादशाङ्गश्रुतं कदापि न व्यवच्छिद्यते, तीर्थकर-गणधरादीनां तेषु सर्वदैव भावात् ॥ इति गाथाद्वादशकार्थः ॥ ५४८ ॥

॥ तदेवं सप्रतिपक्षं सादि-सपर्यवसितं श्रुतं समाप्तम् ॥

---

१ उपयोग-स्वर-प्रयत्नाः स्थानविशेषाश्च भवन्ति प्रज्ञापके । गति-स्थान-भेद-संघात-वर्ण-शब्दादिभावेषु ॥ ५४७ ॥ २ घ. छ. 'मधुर-मन्द्रादिः' ।

३ द्रव्ये नानापुरुषान् क्षेत्रे विदेहान् कालो यस्तेषु । क्षयोपशमभावे च श्रुतज्ञानं वर्तते सततम् ॥ ५४८ ॥

३८

अथ षष्ठं सप्रतिपक्षं गमिकश्रुतद्वारमाह—

[2]भंगगणियाइं गमियं जं सरिसगमं च कारणवसेण । गाहाइ अगमियं खलु कालियसुयं दिट्ठिवाए वा ॥५४९॥

गमा भङ्गका गणितादिविशेषाश्च तद्बहुलं तत्संकुलं गमिकम् । अथवा, गमाः सदृशपाठास्ते च कारणवशेन यत्र बहवो भवन्ति तद् गमिकं, तच्चैवंविधं प्रायः 'दृष्टिवादे' इत्येवं पर्यन्ते[4] दृष्टिवादपदमत्र संबध्यते । यत्र प्रायो गाथा-श्लोक-वेष्टकाद्यसदृशपाठात्मकं तदगमिकं, तच्चैवंविधं प्रायः कालिकश्रुतम् ॥ इति गाथार्थः ॥ ५४९ ॥

॥ इति सप्रतिपक्षं गमिकद्वारम् ॥

अथ सप्तमं सप्रतिपक्षमङ्गप्रविष्टद्वारमाह—

[3]गणहर-थेरकयं वा आएसा मुक्कवागरणओ वा । ध्रुव-चलविसेसओ वा अंगा-णंगेसु नाणत्तं ॥ ५५० ॥

[x]अङ्गा-ऽनङ्गप्रविष्टश्रुतयोरिदं नानात्वमेतद् भेदकारणम् । किम्[1] ?, इत्याह– गणधरा गौतमस्वाम्यादयः, तत्कृतं श्रुतं द्वादशाङ्गरूपमङ्गप्रविष्टमुच्यते । स्थविरास्तु भद्रबाहुस्वाम्यादयस्तत्कृतं श्रुतमावश्यकनिर्युक्त्यादिकमनङ्गप्रविष्टमङ्गबाह्यमुच्यते। अथवा, द्वारत्रयं गणधरपृष्टस्य तीर्थकरस्य संबन्धी य आदेशः प्रतिवचनमुत्पाद-व्यय-ध्रौव्यवाचकं पदत्रयमित्यर्थः, तस्माद् यद् निष्पन्नं तदङ्गप्रविष्टं द्वादशाङ्गमेव, मुत्कं मुत्कलममश्नपूर्वकं च यद् व्याकरणमर्थप्रतिपादनं, तस्माद्[2] निष्पन्नमङ्गबाह्यमभिधीयते, तच्चावश्यकादिकम् । वाशब्दो-ऽङ्गाऽनङ्गप्रविष्टत्वे पूर्वोक्तभेदकारणादन्यत्वसूचकः । तृतीयं भेदकारणमाह– 'ध्रुव-चलविसेसओ व त्ति' ध्रुवं सर्वतीर्थकरतीर्थेषु नियतं निश्चयभावि श्रुतमङ्गप्रविष्टमुच्यते द्वादशाङ्गमिति । यत् पुनश्चलमनियतमनिश्चयभावि तत् तन्दुलवैकालिकमकीर्णादि श्रुतमङ्गबाह्यम् । वाशब्दोऽत्रापि भेदकारणान्तरत्वसूचकः । इदमुक्तं भवति– गणधरकृतं, पदत्रयलक्षणतीर्थकरादेशनिष्पन्नं, ध्रुवं च यच्छ्रुतं तदङ्गप्रविष्टमुच्यते, तच्च द्वादशाङ्गीरूपमेव । यत्पुनः स्थविरकृतं, मुत्कलार्थाभिधानं, चलं च तदावश्यकमकीर्णादि श्रुतमङ्गबाह्यमिति ॥ ५५० ॥

आह— नन्दु 'पूर्वं पूर्वाण्येवोपनिबध्नाति गणधरः' इत्यागमे श्रूयते, [5]पूर्वकरणादेव चैतानि पूर्वाण्यभिधीयन्ते । तेषु च

---

१ भङ्ग-गणितादि गमिकं यत्सदृशागमं च कारणवशेन । गाथाद्यमिकं खलु कालिकश्रुतं दृष्टिवादे वा ॥ ५४९ ॥ +पर्यन्तान्-।

२ गणधर-स्थविरकृतं वाऽऽदेशाद् मुत्कव्याकरणतो वा । ध्रुव-चलविशेषतो वाऽङ्गा-ऽनङ्गयोर्नानात्वम् ॥ ५५० ॥ x गा. ७००० । [5] पूर्व-।

३ घ.छ. 'द् यद् नि' । ४ घ.छ. 'मं तदङ्ग' । ५ क. ख. ग. 'प्रथमं पू' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

निःशेषमपि वाङ्मयमवतरति । अतश्चतुर्दशपूर्वात्मकं द्वादशमेवाऽङ्गमस्तु, किं शेषाङ्गविरचनेन, अङ्गबाह्यश्रुतरचनेन वा ?, इत्याशङ्क्याह–

जइवि य भूयावाए सव्वस्स वओमयस्स ओयारो । निज्जूहणा तहावि हु दुम्मेहे पप्प इत्थी य ॥ ५५१ ॥

अशेषविशेषान्वितस्य समग्रवस्तुस्तोमस्य भूतस्य सद्भूतस्य वादो भणनं यत्रासौ भूतवादः, अथवाऽनुगत-व्यावृत्तापरिशेषधर्म-कलापान्वितानां सभेद-प्रभेदानां भूतानां प्राणिनां वादो यत्राऽसौ भूतवादो दृष्टिवादः, दीर्घत्वं च तकारस्याऽऽर्षत्वात् । तत्र यद्यपि दृष्टिवादे सर्वस्याऽपि वाङ्मयस्याऽवतारोऽस्ति, तथापि दुर्मेधसां तदवधारणाद्ययोग्यानां मन्दमतीनां, तथा श्रावकादीनां स्त्रीणां चानुग्रहार्थं निर्यूहणा विरचना शेषश्रुतस्येति ॥ ५५१ ॥

ननु स्त्रीणां दृष्टिवादः किमिति न दीयते ?, इत्याह–

तुच्छा गारवबहुला चलिंदिया दुब्बला धिईए य । इय अइसेसज्झयणा भूयावाओ य नो त्थीणं ॥५५२॥

यदि हि दृष्टिवादः स्त्रियाः कथमपि दीयेत तदा तुच्छादिस्वभावतया 'अहो ! अहं या दृष्टिवादमपि पठामि' इत्येवं गर्वाऽऽध्मातमानसाऽसौ पुरुषपरिभवादिष्वपि प्रवृत्तिं विधाय दुर्गतिमभिगच्छेत् । अतो निरवधिकृपानीरनीरधिभिः परानुग्रहप्रवृत्तैर्भगवद्भिस्तीर्थकरैरुत्थान-समुत्थानश्रुतादीन्यतिशयवन्त्यध्ययनानि, दृष्टिवादश्च स्त्रीणां नानुज्ञातः । अनुग्रहार्थं पुनस्तासामपि किञ्चिच्छ्रुतं देयमित्येका दशाङ्गादिविरचनं सफलम् ॥ इति गाथात्रयार्थः ॥ ५५२ ॥

॥ इत्यङ्ग-ऽनङ्गप्रविष्टं श्रुतद्वारम् ॥

तदेवं निरूपितं चतुर्दशविधमपि श्रुतमर्थतः । अथ कियांस्तद्विषयः ?, इति निरूपयितुमाह–

उवउत्तो सुयनाणी सव्वं दव्वाइं जाणइ जहत्थं । पासइ य केइ सो पुण तमचक्खुदंसणेणं ति ॥५५३॥

उपयुक्तो दत्तोपयोगः श्रुतज्ञानी सर्वं द्रव्यादि यथार्थं यथावद् यथा सर्वज्ञेनोक्तं तथा जानाति– द्रव्यतः पञ्चास्तिकायद्रव्याणि, क्षेत्रं लोका-ऽलोकाकारं, कालमतीतादिरूपं, भावानौदयिकादीन् जानाति– स्पष्टावभासिना श्रुतज्ञानेनाऽवबुध्यते, न तु सामान्यग्राहिणा

---

१ यद्यपि च भूतवादे सर्वस्य वाङ्मयस्याऽवतारः । निर्यूहणा तथापि खलु दुर्मेधसः प्राप्य स्त्रियश्च ॥ ५५१ ॥

२ तुच्छा गर्वबहुला चलेन्द्रिया दुर्बला धिया च । इत्यतिशेषाध्ययना भूतवादश्च नो स्त्रीणाम् ॥ ५५२ ॥ ३ घ. छ. 'दीयते त' ।

४ उपयुक्तः श्रुतज्ञानी सर्वं द्रव्यादि जानाति यथार्थम् । पश्यति च कैचित् स पुनस्तदचक्षुर्दर्शनेनेति ॥ ५५३ ॥ ५ क. ख. घ. छ. 'काशं क'

दर्शनेन पश्यति, तस्य तदसंभवात्; यथा हि मनःपर्यायज्ञानं स्वभावेनैव स्पष्टार्थग्राहकं, इति न तत्र दर्शनम्, एवं श्रुतज्ञानेऽपि; तदपि ह्यर्थविकल्पनावस्थायामन्तर्जल्पाकारत्वाद् विशेषमेव गृह्णाति न सामान्यमिति भावः । तथा च नन्दिसूत्रम्– "[1]तं समासओ चउव्विहं पण्णत्तं, तं जहा— दव्वओ खेत्तओ, कालओ, भावओ । दव्वओ णं सुयनाणी उवउत्तो सव्वदव्वाइं जाणइ न पासइ, एवं सव्वखेत्तं, सव्वकालं, सव्वभावे जाणइ न पासइ" इति । अन्ये तु नञः पाठं न मन्यन्ते । ततश्च "जाणइ पासइ" इति पठन्ति । अतः 'श्रुतज्ञान्यपि दर्शनेन पश्यति' इति ते मन्यन्ते, यच्चासौ दर्शनेन पश्यति तदचक्षुर्दर्शनेनेति मन्यन्ते । इदमत्र हृदयम्– यस्य श्रुतज्ञानं तस्य मतिज्ञानमवश्यमेव भवति । मति-श्रुतज्ञानस्य च चक्षुरचक्षुर्दर्शनभेदाद् द्विभेदं दर्शनमुक्तम् । तत्र किल चक्षुर्दर्शनेन मतिज्ञानं पश्यति, अचक्षुर्दर्शनेन पुनः श्रुतज्ञानमिति ॥ ५५३ ॥

एतत् तेषां मतमसमीक्षिताभिधानत्वाद् यदृच्छावादमात्रमिति दर्शयन्नाह–

[2]तेसिमचक्खुदंसणसामण्णओ कहं न मइनाणी । पासइ, पासइ व कहं सुयनाणी किंकओ भेओ ? ॥५५४॥

तेषां नञः पाठमनभ्युपगच्छतां मतिज्ञान-श्रुतज्ञानयोरिन्द्रिय-मनोनिमित्ततासाम्यादचक्षुर्दर्शने समानेऽपि कथं हन्त ! तेनाऽचक्षुर्दर्शनेन मतिज्ञानी न पश्यति ?, कथं वा तेन श्रुतज्ञानी पश्यति ? । यदि हि श्रुतज्ञानी तेन पश्यति तर्हि मतिज्ञान्यपि पश्यतु । अथासौ न पश्यति, तर्हीतरोऽपि मा पश्यतु । ननु किंकृतोऽयं भेदो, यदचक्षुर्दर्शने समानेऽपि तेनैकं ज्ञानं पश्यति, अपरं तु न पश्यति ? । स्वेच्छाभाषितत्वमात्रं विहाय नापरमत्र कारणं पश्याम इति भावः । तस्मात् "जाणइ न पासइ" इति स्थितमिति ॥ ५५४ ॥

अथवा प्रज्ञापनोक्तां पश्यत्तामाश्रित्य श्रुतज्ञानेऽपि पश्यत्ता युक्ता । ततश्च "जाणइ पासइ" इत्यपि पाठो युक्त इति दर्शयन्नाह–

[3]मइभेयमचक्खुदंसणं च वज्जित्तु पासणा भणिया । पण्णवणाए उ फुडा तेण सुए पासणा जुत्ता ॥५५५॥

+भाषि-ध-1 १ तत् समासतश्चतुर्विधं प्रज्ञप्तम्, तद्यथा– द्रव्यतः, क्षेत्रतः, कालतः, भावतः । द्रव्यतः श्रुतज्ञान्युपयुक्तः सर्वद्रव्याणि जानाति, न पश्यति । एवं सर्वक्षेत्रं, सर्वकालं, सर्वभावान् जानाति न पश्यति ।

२ तेषामचक्षुर्दर्शनसामान्यतः कथं न मतिज्ञानी । पश्यति, पश्यति वा कथं श्रुतज्ञानी, किंकृतो भेदः ? ॥ ५५४ ॥

३ मतिभेदमचक्षुर्दर्शनं च वर्जयित्वा पश्यत्ता भणिता । प्रज्ञापनायां तु स्फुटा तेन श्रुते पश्यत्ता युक्ता ॥ ५५५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

मतेर्भेदो मतिभेदो मतिज्ञान-मत्यज्ञानलक्षणस्तं, तथाऽचक्षुर्दर्शनं च वर्जयित्वा येन कारणेन प्रज्ञापनायां त्रिंशत्तमपदे पश्यत्ता स्फुटा व्यक्ता भणिता, तेन श्रुते श्रुतज्ञानेऽपि पश्यत्ता युक्ता " जाणइ पासइ " इति पाठो युक्त इत्यर्थः । तथाच प्रज्ञापनात्रिंशत्तमपदसूत्रम्- " कइविहा णं भंते ! पासणया पण्णत्ता ? । गोयमा ! दुविहा, तं जहा- सागारपासणया[1] य, अणागारपासणया य । सागारपासणया णं भन्ते ! कइविहा पण्णत्ता ? । गोयमा ! छव्विहा पण्णत्ता, तं जहा- सुयनाणसागारपासणया, ओहि-मणपज्जव-केवलनाणसागारपासणया, सुयअन्नाण-विभंगनाणसागारपासणया य । अणागारपासणया णं भंते ! कइविहा पण्णत्ता ? । गोयमा ! तिविहा पण्णत्ता, तं जहा- चक्खुदंसण-ओहिदंसण-केवलदंसणअणागारपासणया " इति ।

अथ 'पासणया' इति कः शब्दार्थः ? । उच्यते- पश्यतो भावः पश्यत्तोपयोग इत्यर्थः, यथोपयोगशब्देन साकारानाकारभेदभिन्न उपयोगोऽभिधीयते तथा पश्यत्ताशब्देनापीत्यर्थः । आह- यद्येवम्, पर्यायशब्दावेतौ, तत् किमित्युपयोगात् पश्यत्ता पृथगधीता ? । सत्यम्, किन्तु साकारोपयोगोऽष्टधा प्रोक्तः, साकारपश्यत्ता तु षोढा, मतिज्ञान-मत्यज्ञानयोस्तदभणनात्; अनाकारोपयोगोऽपि चतुर्धा प्रोक्तः, अनाकारपश्यत्ता पुनस्त्रिधा, अचक्षुर्दर्शनस्य तदनभिधानात्; पश्यत्ताशब्दो हि 'दृशिर् प्रेक्षणे' अस्य धातोर्निष्पद्यते, प्रकृष्टं चेक्षणं त्रिकालविषये शीघ्रमेवार्थपरिच्छेदेनपटिष्ठेऽवबोधे भवति । मतिज्ञान-मत्यज्ञाने च प्रायः सांप्रतकालविषये एव, इति न तयोः पश्यत्ता । शीघ्रं चार्थपरिच्छेदो यथा चक्षुषः, न तथा शेषाणां श्रोत्र-घ्राणादीन्द्रियाणां, चक्षुरुपयोगापेक्षया तदुपयोगस्येन्द्रियपदे दीर्घ-दीर्घतरत्वेनाऽभिधानात् । मनसस्तु शीघ्रार्थपरिच्छेदेऽप्यनाकारपश्यत्ता न विवक्षिता, उपयोगमात्रस्यैव तत्र विवक्षणात् । अतोऽचक्षुर्दर्शनेऽपि न पश्यत्ता । तदेवं श्रुताऽवधि-मनःपर्याय-केवलज्ञान-श्रुताज्ञान-विभङ्गज्ञानभेदात् षोढा साकारपश्यत्ता, अष्टधा तु साकारोपयोगः; चक्षु-रवधि-केवलदर्शनभेदात् तु त्रिधाऽनाकारपश्यत्ता, चतुर्धा त्वनाकारोपयोगः; इत्युपयोग-पश्यत्तयोर्भेदः । तदेवं मतिभेदौ, अचक्षुर्दर्शनं च वर्जयित्वा श्रुतज्ञानादिः प्रज्ञापनायां पश्यत्ता प्रोक्ता, तामाश्रित्य श्रुते युक्ता पश्यत्तेति स्थितम् ।

केषुचित्तु पुस्तकेषु 'तेण सुए पासणाऽजुत्ता' इत्येवमकारप्रश्लेषो दृश्यते, तत्राऽयमर्थः- पूर्वगाथायां 'पासइ य केइ सो पुण

---

१ क. ग. 'त्वा यथा ये' ख. 'त्वा तथा ये' । + छेदेन-।

२ कतिविधा भगवन् ! पश्यत्ता प्रज्ञप्ता ? । गौतम ! द्विविधा, तद्यथा- साकारपश्यत्ता च, अनाकारपश्यत्ता च । साकारपश्यत्ता भगवन् ! कतिविधा प्रज्ञप्ता ? गौतम ! षड्विधा प्रज्ञप्ता, तद्यथा- श्रुतज्ञानसाकारपश्यत्ता, अवधि-मनःपर्यव-केवलज्ञानसाकारपश्यत्ता, श्रुताज्ञान-विभङ्गज्ञानसाकारपश्यत्ता च । अनाकारपश्यत्ता भगवन् कतिविधा प्रज्ञप्ता ? । गौतम ! त्रिविधा प्रज्ञप्ता, तद्यथा- चक्षुर्दर्शना-ऽवधिदर्शन-केवलदर्शनाऽनाकारपश्यत्ता । ३ ध. छ.' या अ' । ४ गाथा ५५३ ।

तमचक्खुदंसणेणं' इति वचनादचक्षुर्दर्शनमाश्रित्य श्रुतज्ञाने या पश्यत्ता प्रोक्ता सा, इत्यतोऽप्ययुक्ता । कुतः ?, इत्याह- येन प्रज्ञापनायां मतिभेदौ, अचक्षुर्दर्शनं च वर्जयित्वैव पश्यत्ता प्रोक्ता । अतोऽचक्षुर्दर्शनमाश्रित्याऽयुक्तैव श्रुतज्ञाने पश्यत्ता । ततो "जाणइ न पासइ" इति पाठ इति स्थितम् । इयं च गाथा पूर्वटीकाकारैर्गृहीता, 'कण्ठ्या' इति च निर्दिष्टा, न तु व्याख्याता; अस्माभिस्तु यथावबोधं किञ्चिद् विवृता, सुधिया त्वन्यथाऽप्यविरोधतो व्याख्येयेति । तदेवं भेदतो विषयतश्च निरूपितं श्रुतज्ञानम् ॥ ५५५ ॥

सांप्रतं सत्पदप्ररूपणतादिभिर्नवभिरनुयोगद्वारैर्गत्यादिमार्गणास्थानेषु तद् गमनीयम् । एतच्चाभिन्नस्वामित्वात् पूर्वोक्तमतिज्ञानेन समानम्, इत्यतिदिशन्नाह-

[1]जह नवहा मइनाणं संतपयपरूवणाइणा गमियं । तह नेयं सुयनाणं जं तेण समाणसामित्तं ॥ ५५६ ॥

गतार्थैव ॥ ५५६ ॥

अथोत्तरनिर्युक्तिगाथासंबन्धनायाह-

[3]सव्वाइसयनिहाणं तं पाएणं जओ पराहीणं । तेण विणेयहियत्थं गहणोवाओ इमो तस्स ॥ ५५७ ॥

तच्च श्रुतज्ञानं यतो यस्मादनेकातिशयनिधानं प्रायः पराधीनं च गुर्वायत्तम्, तेन कारणेन तस्य श्रुतज्ञानस्याऽयं वक्ष्यमाणो ग्रहणोपायो ग्रहणविधिः 'तीर्थकर-गणधरैरुक्तः' इति शेषः ॥ इति गाथापञ्चकार्थः ॥ ५५७ ॥

कः पुनर्ग्रहणोपायः ?, इत्याह-

[4]आगमसत्थग्गहणं जं बुद्धिगुणेहिं अट्ठहिं दिट्ठं । बेंति सुयनाणलंभं तं पुव्वविसारया धीरा ॥ ५५८ ॥

पूर्वेषु विशारदा विपश्चितो धीरा व्रतानुपालनस्थिराः श्रुतज्ञानस्य लाभं ब्रुवते प्रतिपादयन्ति । किं तत् ?, इत्याह- 'तं ति' तदेवागमशास्त्रग्रहणं । यत् किम् ?, इत्याह- यद्बुद्धिगुणैर्वक्ष्यमाणस्वरूपैरष्टभिर्दिष्टं शास्त्रे, इत्यक्षरयोजना । अयमर्थः- शिष्यते शिक्ष्यते बोध्यतेऽनेनेति शास्त्रं तच्चाविशेषितं सामान्येन सर्वमपि मत्यादिज्ञानमुच्यते, सर्वेणापि ज्ञानेन जन्तूनां बोधनात् । अतो विशेषे स्थापयि-

---

१ यथा नवधा मतिज्ञानं सत्पदप्ररूपणादिना गमितम् । तथा ज्ञेयं श्रुतज्ञानं यत् तेन समानस्वामित्वम् ॥ ५५६ ॥ २ ख.घ.छ.'थां संबन्धयन्नाह' ।

३ सर्वातिशयनिधानं तत् प्रायेण यतः पराधिनम् । तेन विनेयहितार्थं ग्रहणोपायोऽयं तस्य ॥ ५५७ ॥ × दृष्टं-।

४ आगमशास्त्रग्रहणं यद् बुद्धिगुणैरष्टभिर्दिष्टम् । ब्रुवते श्रुतज्ञानलाभं तत् पूर्वविशारदा धीराः ॥ ५५८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तुमाह– आगमरूपं शास्त्रमागमशास्त्रं श्रुतज्ञानमित्यर्थः, तस्य ग्रहणं गुरुसकाशादादानं तदेव श्रुतलाभं ब्रुवते, यद् बुद्धिगुणैरष्टाभिः शास्त्रं दिष्टं, नान्यदिति– वक्ष्यमाणशुश्रूषादिगुणाष्टकक्रमेणैव श्रुतज्ञानं ग्राह्यं, नान्यथेति तात्पर्यम् ॥ इति निर्युक्तिगाथार्थः ॥ ५५८ ॥

अत्र भाष्यम्—

[1]सासिज्जइ जेण तयं सत्थं तं चाऽविसेसियं नाणं । आगम एव य सत्थं आगमसत्थं तु सुयनाणं ॥५५९॥

तस्सायाणं गहणं दिट्ठं जं मइगुणेहिं सत्थम्मि । बेंति तयं सुयलाभं गुणा य सुस्सूसणाईया ॥ ५६० ॥

गतार्थे एव ॥ ५५९ ॥ ५६० ॥

ते चाऽमी अष्टौ बुद्धिगुणाः–

[2]सुस्सूसइ पडिपुच्छइ सुणेइ गिण्हइ य ईहए चावि । ततो अपोहए वा धारेइ करेइ वा सम्मं ॥ ५६१ ॥

विनययुक्तो गुरुमुखात् श्रोतुमिच्छति शुश्रूषते, पुनः पृच्छति प्रतिपृच्छति– तदधीतं श्रुतं निःशङ्कितं करोतीत्यर्थः । तच्चाधीतं श्रुतमर्थतः शृणोति, श्रुत्वाऽवग्रहेण गृह्णाति, गृहीत्वा चेहयेहते पर्यालोचयति– किमिदमित्थं, उतान्यथा ? इति । चशब्दः समुच्चयार्थः । अपिशब्दात् पर्यालोचयन् किञ्चित् स्वबुद्ध्याऽप्युत्प्रेक्षते । ततस्तदनन्तरमपोहते च– एवमेतद् यदादिष्टं गुरुभिरेवं निश्चिनोति । निश्चिते चार्थे सदैव चेतसि धारयति, करोति च सम्यक् तदुक्तानुष्ठानम् , श्रुताज्ञानुष्ठानस्यापि तदावरणक्षयोपशम-गुरुचित्ताऽऽवर्जनादिहेतुत्वेन श्रुतप्राप्त्युपायत्वादिति ।

अथवा, यद् यदाज्ञापयति कार्यजातं गुरुः, तत्तत् सम्यगनुग्रहं मन्यमानः श्रोतुमिच्छति शुश्रूषते । पूर्वनिरूपितश्च कार्यकरणकाले पुनः पृच्छति प्रतिपृच्छति । इत्थं चाराधितस्य गुरोरन्तिके सूत्रं, तदर्थं वा सम्यक् शृणोति । श्रुतं चावग्रहेण गृह्णाति, इत्यादि पूर्ववत् । अन्ये तु व्याचक्षते– प्रतिपृष्टेन गुरुणा पुनरादिष्टश्च संस्तद्वचः सम्यक् शृणोति, श्रुतं चावग्रहेण सम्यग् गृह्णातीत्यादि तथैव, यावत् करोति च गुरुभणितं सम्यगिति । एवं गुर्वाराधनविषयत्वेनाऽष्टावपि गुणा व्याख्यायन्ते, श्रुतावाप्तौ मूलोपायत्वाद् गुर्वाराधनायाः ॥ इति निर्युक्तिगाथार्थः ॥ ५६१ ॥

✕ दृष्टं–।

[1] शिष्यते येन तत् शास्त्रं तच्चाऽविशेषितं ज्ञानम् । आगम एव च शास्त्रमागमशास्त्रं तु श्रुतज्ञानम् ॥ ५५९ ॥
तस्याऽऽदानं ग्रहणं दिष्टं यद् मतिगुणैः शास्त्रे । ब्रुवते तत् श्रुतलाभं गुणाश्च शुश्रूषादिकाः ॥ ५६० ॥

[2] शुश्रूषते प्रतिपृच्छति शृणोति गृह्णाति चेहते चापि । ततोऽपोहते वा धारयति करोति वा सम्यक् ॥ ५६१ ॥

अथ भाष्यम्–

[1]सुस्सूसइ उ सोउं सुयमिच्छइ सविणओ गुरुमुहाओ । पडिपुच्छइ तं गहियं पुणो वि नीसंकियं कुणइ ॥५६२॥

सुणइ तदत्थमहीउं गहणे-हा-ऽवाय-धारणा तस्स । सम्मं कुणइ सुयाणं अन्नं पि तओ सुयं लहइ ॥५६३॥

द्वितीयं व्याख्यानमाह–

[2]सुस्सूसइ वा जं जं गुरवो जंपंति पुव्वभणिओ य । कुणइ पडिपुच्छऊणं सुणेइ सुत्तं तदत्थं वा ॥ ५६४ ॥

तिस्रोऽपि व्याख्यातार्था एव । नवरं द्वितीयगाथायां शृणोति तदर्थं श्रुतार्थम्, एवं च सूत्रतोऽर्थतश्च 'अहीउं ति' अधीत्य श्रुतं, ततस्तस्य श्रुतस्य ग्रहणेहा-ऽपाय-धारणाः सम्यक् 'करोति' इत्यत्र संबध्यते । तथा, 'सुयाणं ति' श्रुताज्ञां श्रुतोक्तानुष्ठानं 'सम्यक् करोति' इत्यादृत्याऽऽपि संबध्यते । एवं च कुर्वाणोऽन्यदपि श्रुतं लभत इति । तृतीयगाथायां 'सुस्सूसइ पडिपुच्छइ सुणेइ' इत्येतावान् निर्युक्तिगाथावयवो व्याख्यातः । गृह्णातीत्यादेस्त्वर्थः प्राक् कथितः स्वयमेव द्रष्टव्य इति ॥ ५६४ ॥

'शुश्रूषते' इत्युक्तम्, अतः श्रवणविधिमाह–

[3]मूयं हुंकारं वा बाढक्कार-पडिपुच्छ-वीमंसा । तत्तो पसंगपारायणं च परिणिट्ठ सत्तमए ॥ ५६५ ॥

मूकमिति मूकं शृणुयात् । इदमुक्तं भवति– प्रथमवारा श्रवणे संयतगात्रः संस्तूष्णीमाश्रितः सर्वमवधारयेत् । द्वितीयवारायां तु हुङ्कारं दद्याद् वदनं कुर्यादित्यर्थः । तृतीये श्रवणे बाढक्कारं कुर्यात्– एवमेतद् नाऽन्यथेति ब्रूयादित्यर्थः । चतुर्थे तु गृहीतपूर्वापरसूत्राभिप्रायो मनाक् प्रतिपृच्छां कुर्यात्– 'कथमेतत् ?' इति । पञ्चमे तु मीमांसां विदध्यात्, तत्र मातुमिच्छा मीमांसा, प्रमाणजिज्ञासेति यावत् । ततः षष्ठे तदुत्तरोत्तरगुणप्रसङ्गः, पारगमनं चाऽस्य भवति । सप्तमे श्रवणे परिनिष्ठा भवति । एतदुक्तं भवति– गुरुवदनुभाषत एव सप्तमवारायामिति । तदेवं शिष्यगतः श्रवणविधिरुक्तः ॥ ५६५ ॥

---

[1] शुश्रूषते तु श्रोतुं श्रुतमिच्छति सविनयो गुरुमुखात् । प्रतिपृच्छति तद् गृहीतं पुनरपि निःशङ्कितं करोति ॥ ५६२ ॥
शृणोति तदर्थमधीत्य ग्रहणे-हा-ऽपाय–धारणास्तस्य । सम्यक् करोति श्रुताज्ञामन्यदपि ततः श्रुतं लभते ॥ ५६३ ॥

[2] शुश्रूषते वा यद् यद् गुरवः कथयन्ति पूर्वभणितश्च । करोति प्रतिपृच्छय शृणोति सूत्रं तदर्थं वा ॥ ५६४ ॥

[3] मूकं हुङ्कारं वा बाढक्कार-प्रतिपृच्छा-मीमांसाः । ततः प्रसङ्गपारायणं च परिनिष्ठा सप्तमके ॥ ५६५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ गुरुगतं व्याख्यानविधिमाह–

[1]सुत्तत्थो खलु पढमो बीओ निज्जुत्तिमीसओ भणिओ। तईओ य निरवसेसो एस विही होइ अणुओगे॥५६६॥

सूत्रस्याऽर्थो यत्रासौ सूत्रार्थः। खलुरवधारणे। ततश्च सूत्रार्थ एव सूत्रार्थमात्रप्रतिपादनपर एव प्रथमः प्रथमवारायामनुयोगो गुरुणा कर्तव्यः। द्वितीयस्तु द्वितीयवारायां सूत्रस्पर्शकनिर्युक्तिमिश्रकः कर्तव्यतया भणितस्तीर्थकर-गणधरैः। तृतीयस्तु तृतीयवारायां प्रसक्तानुप्रसक्तमप्युच्यते यस्मिन्, स एवंलक्षणो निरवशेषो भणितः। एष उक्तलक्षणो विधानं विधिर्भवति। क ?, इत्याह– सूत्रस्य निजेनाभिधेयेन सार्धमनुकूलो योगोऽनुयोगः सूत्रस्यार्थान्व्याख्यानमित्यर्थः, तस्मिन्ननुयोगेऽनुयोगविषये॥ इति निर्युक्तिगाथाद्वयार्थः॥५६६॥

॥ तदेवं श्रुतज्ञानस्य ग्रहण-श्रवणव्याख्यानविधिः प्रतिपादितः। तत्प्रतिपादिते च श्रुतज्ञानं समाप्तमिति॥

अथ पूर्वोदितसंबन्धायातमवधिज्ञानमभिधित्सुः प्रस्तावनामाह– ॥ अवधिज्ञानम् ॥

[2]भणियं परोक्खमहुणा पच्चक्खं तं च तिविहमोहाइं। पुव्वोइयसंबंधं तत्थावहिमाइओ वोच्छं॥ ५६७॥

मति-श्रुतलक्षणं परोक्षज्ञानं तावद् भणितं प्रतिपादितम्। इदानीं प्रत्यक्षमभिधानीयम्, तच्चाऽवधि-मनःपर्याय-केवलभेदात् त्रिविधम्। तत्रादितः प्रथमं पूर्वोदितसंबन्धमवधिज्ञानं वक्ष्येऽभिधास्य इति॥ ५६७॥

तत्रावधिभेदास्तावत् संख्यातीता भवन्तीति दर्शयति–

[3]संखाईयाओ खलु ओहीनाणस्स सव्वपयडीओ। काई भवपच्चइया खओवसमियाओ काओ वि॥५६८॥

संख्यानं संख्या तामतीता अतिक्रान्ताः संख्यातीता असंख्येया इत्यर्थः, प्रकृतयो भेदा अंशाः, सर्वाश्च ताः प्रकृतयश्च सर्वप्रकृतयः। ततश्च पूर्वोक्तशब्दार्थस्याऽवधिज्ञानस्य क्षेत्रकालौ विषयभूतावाश्रित्य सर्वा अप्यसंख्येयाः प्रकृतयो भेदा भवन्ति, तथाहि– अवधेर्जघन्यतोऽङ्गुलासंख्येयभागादारभ्य प्रदेशोत्तरया वृद्ध्योत्कृष्टतोऽलोकेऽपि लोकप्रमाणान्यसंख्येयखण्डानि क्षेत्रविषय इति वक्ष्यते। कालोऽपि जघ-

---

१ सूत्रार्थः खलु प्रथमो द्वितीयो निर्युक्तिमिश्रको भणितः। तृतीयश्च निरवशेष एष विधिर्भवत्यनुयोगे॥ ५६६॥ २ क.ख.ग. 'मीसिओ'।

३ भणितं परोक्षमधुना प्रत्यक्षं तच्च त्रिविधमवध्यादि। पूर्वोदितसंबन्धं तत्रावधिमादितो वक्ष्ये॥ ५६७॥

४ संख्यातीताः खल्ववधिज्ञानस्य सर्वप्रकृतयः। काश्चिद् भवप्रत्ययिताः क्षायोपशमिक्यः का अपि॥ ५६८॥ ५ क.ग.'तयोंशा भेदाः स'।

[19]

न्यत आवलिकाऽसंख्येयभागादारभ्य समयोत्तरया वृद्ध्योत्कृष्टतोऽसंख्येयोत्सर्पिण्यवसर्पिणीलक्षणो विषय इत्यभिधास्यते। एवं च 'विषय-भेदाद् विषयिणोऽपि भेदः' इति न्यायात् क्षेत्र-काललक्षणविषयस्याऽसंख्येयभेदत्वादवधेरप्यसंख्येया भेदा भवन्ति। खलुशब्दश्चेह विशेषणार्थः। किं विशिनष्टि ?, इति चेत्। उच्यते– क्षेत्र-कालावेवाऽङ्गीकृत्यावधेरसंख्येयाः प्रकृतयो भवन्ति। द्रव्य-भावौ त्वाश्रित्याऽनन्ता अपि तास्तस्य प्राप्यन्ते; तथाहि– " तेया-भासादव्वाणमंतरा एत्थ लभइ पट्ठवओ " इत्यादिवचनात् तैजस-भाषाद्रव्यापान्तरालवर्त्यनन्तप्रदेशिकाद् द्रव्यादारभ्य विचित्रवृद्ध्या सर्वमूर्तद्रव्याण्युत्कृष्टविषयपरिमाणमवधेर्वक्ष्यते। प्रतिवस्तुगताऽसंख्येयपर्यायरूपं च भावतो विषयमानमभिधास्यते। अतः सर्वमपि पुद्गलास्तिकायं, अवधिग्राह्यांश्च तत्पर्यायानाश्रित्यानन्तोऽवधिविषयः सिद्धो भवति, ज्ञेयभेदाच्च ज्ञानभेदः, इति द्रव्य-भावलक्षणविषयापेक्षयाऽवधेरनन्ता अपि प्रकृतयो भवन्ति। तर्हि 'संखाईयाओ खलु' इति विरुध्यते, इति चेत्। नैवम्, अनन्तस्यापि संख्यातीतत्वाऽव्यभिचारात्। अतः संख्यातीतशब्देनाऽसंख्याता अनन्ताश्च प्रकृतयो गृह्यन्त इत्यविरोधः। एतासु च प्रकृतिषु मध्ये काश्चनाऽन्यतमा भवप्रत्ययाः– भवो नारकादिजन्म स पक्षिणां गगनोत्पतनलब्धिरिवोत्पत्तौ प्रत्ययः कारणं यासां ता भवप्रत्ययाः, ताश्च नारका-ऽमराणामेव। काश्चन पुनरन्यतमाः क्षयोपशमेन निर्वृत्ताः क्षायोपशमिक्यः, तपःप्रभृतिगुणपरिणामाविर्भूतक्षयोपशमप्रत्यया इत्यर्थः; एताश्च तिर्यङ्-मनुष्याणामिति। आह– क्षायोपशमिकभावेऽवधिज्ञानं पठ्यते, नारकादिभावश्चौदयिकः, स कथं तत्प्रकृतीनां प्रत्ययः स्यादिति ?। अत्रोच्यते– मुख्यतस्ता अपि क्षयोपशमनिबन्धना एव, केवलं सोऽपि क्षयोपशमस्तस्मिन् नारका-ऽमरभवे सत्यवश्यं भवति, इति कृत्वा भवप्रत्ययास्ता उक्ता इति॥ ५६८॥

अथ सामान्यरूपतयोद्दिष्टानां संख्यातीतानामवधिप्रकृतीनां, वाचः क्रमवर्तित्वात्, आयुषश्चाल्पत्वाद् यथावद्भेदेन प्रतिपादनसामर्थ्यमात्मनोऽपश्यन्नाह–

[2]केत्तो मे वण्णेउं सत्ती ओहिस्स सव्वपयडीओ ?। चउदसविहनिक्खेवं इड्ढीपत्ते य वोच्छामि॥५६९॥

कुतो मम वर्णयितुं शक्तिरवधेः सर्वप्रकृतीः, आयुषः परिमितत्वात्, वाचः क्रमवर्तित्वाच्च ?, तथापि विनेयगणानुग्रहार्थं चतुर्दशविधश्चासौ निक्षेपश्च चतुर्दशविधनिक्षेपस्तमवध्यादिकं चतुर्दशविधनिक्षेपं वक्ष्यामि; आमर्षौषध्यादिका ऋद्धिः प्राप्ता यैस्ते प्राप्तर्द्धयस्तांश्च वक्ष्यामि। इह गाथाभङ्गभयाद् व्यत्ययः, अन्यथा निष्ठान्तस्य बहुव्रीहौ पूर्वनिपात एव भवति॥ इति निर्युक्तिगाथाद्वयार्थः॥ ५६९॥

---

१ गाथा ६२६। २ कुतो मे वर्णयितुं शक्तिरवधेः सर्वप्रकृतीः ?। चतुर्दशविधनिक्षेपमृद्धिप्राप्तांश्च वक्ष्यामि॥ ५६९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ प्रथमगाथापूर्वार्धव्याख्यानार्थं भाष्यम्–

तस्स जमुक्कोसयखेत्त-कालसमयप्पएसपरिमाणं । तण्णेय परिच्छिन्नं तं चिय से पयडिपरिमाणं ॥ ५७ ०॥
संखाईयमणंतं च तेणमणंतपयडिपरिमाणं । पेच्छइ पोग्गलकायं जमणंतपएस-पज्जायं ॥ ५७१ ॥

तस्याऽवधेरसंख्येयाः प्रकृतयः । कुतः ?, इत्याह– यतः 'तं चिय से पयडिपरिमाणं ति' 'से' तस्याऽवधेस्तदेव प्रकृतीनां भेदानां परिमाणम् । यत् किम् ?, इत्याह– यदुत्कृष्टं क्षेत्रप्रदेशपरिमाणं, यच्चोत्कृष्टं कालसमयपरिमाणं, इत्येवं यथासंभवं संबन्धः, क्षेत्रस्यैव प्रदेशानां युज्यमानत्वात् । गाथाभङ्गभयाच्च समयनिर्देशादनन्तरं प्रदेशनिर्देशः । आह– ननूत्कृष्टं क्षेत्रप्रदेश-कालसमयपरिमाणमनन्तमपि भवति । न, इत्याह– 'तण्णेयपरिच्छिन्नं' भावप्रधानोऽयं निर्देशः, ततश्च तस्यावधेर्ज्ञेयं तज्ज्ञावस्तज्ज्ञेयत्वं तेन परिच्छिन्नं नैयत्येव्यवस्थापितम्, तच्च वक्ष्यमाणप्रकारेणाऽङ्गुलासंख्येयभागादारभ्य यावदसंख्येयलोकाकाशप्रदेशान्, तथाऽऽवलिकाऽसंख्येयभागादारभ्य यावदसंख्येयोत्सर्पिण्यवसर्पिणीसमयानिति । एतच्च क्षेत्रप्रदेश-कालसमयानामसंख्येयपरिमाणम्, अतः क्षेत्र-काललक्षणज्ञेयापेक्षयाऽवधेरसंख्येयाः प्रकृतय इति । अथ खलुशब्देन विशेषणार्थेन सूचितास्तस्याऽनन्ताः प्रकृतीर्दर्शयति– 'संखाईत्यादि' संख्यातीतं न केवलमसंख्येयमुच्यते, किं तर्हि ?, अनन्तं च, तस्याऽपि संख्यातीतत्वाऽव्यभिचारात् । तेन तदवधिज्ञानमनन्तप्रकृतिपरिमाणमपि भवति, यद् यस्मात् तत् प्रेक्षते पश्यति समस्तमपि पुद्गलास्तिकायम् । कथंभूतम् ?, इत्याह– अनन्तप्रदेशम्, अनन्तपर्यायं च । एवं च सत्यनन्तद्रव्य-पर्यायलक्षणज्ञेयापेक्षयाऽवधेरनन्ताः प्रकृतय इति ॥ ५७० ॥ ५७१ ॥

अथ प्रथमनिर्युक्तिगाथाया उत्तरार्धं व्याचिख्यासुराह–

भवपच्चइया नारय-सुराण पक्खीण वा नभोगमणं । गुणपरिणामनिमित्ता सेसाण खओवसमियाओ॥५७२।

गतार्थैव, नवरं ' पक्खीण वा ' इति वाशब्द इवार्थे, नभोगमनमिव, इत्यत्र संबध्यते ॥ ५७२ ॥

---

१ तस्य यदुत्कृष्टक्षेत्र-कालसमय-प्रदेशपरिमाणम् । तज्ज्ञेय(त्व)परिच्छिन्नं तदेव तस्य प्रकृतिपरिमाणम् ॥ ५७० ॥
संख्यातीतमनन्तं च तेनाऽनन्तप्रकृतिपरिमाणम् । प्रेक्षते पुद्गलकायं यदनन्तप्रदेश-पर्यायम् ॥ ५७१ ॥

२ भवप्रत्ययिता नारक-सुराणां पक्षिणां वा नभोगमनम् । गुणपरिणामनिमित्ताः शेषाणां क्षायोपशमिक्यः ॥ ५७२ ॥

अथाऽऽक्षेप-परिहारावाह–

ओही खओवसमिए भावे भणिओ भवो तहोदईए। तो किह भवपच्चइओ वोत्तुं जुत्तोऽवही दोण्हं ? ॥५७३॥
सो वि हु खओवसमओ किंतु स एव खओवसमलाभो। तम्मि सइ हो अवस्सं भण्णइ भवपच्चओ तो सो॥५७४॥

व्याख्यातार्थे एव । नवरम् ' दोण्हं ति ' सुर-नारकाणां सोऽपि सुर-नारकाणामवधिः । ' खओवसमउ त्ति ' क्षयोपशमादेव । स च तस्मिन् सुर-नारकभवे सत्यवश्यं भवति, अतोऽसौ सुर-नारकावधिर्भवप्रत्ययो भण्यते ॥५७३॥५७४॥

ननु कर्मणः क्षयोपशमादयः किं भवादिनिमित्ता भवन्ति ?, इत्याह—

उदय-खय-खओवसमो-वसमा जं च कम्मुणो भणिया । दव्वं खित्तं कालं भवं च भावं च संपप्प॥५७५॥

यतः स्रक्-चन्दना-ऽहि-विषादिद्रव्यादीनि प्राप्य प्राणिनां सुख-दुःखोदयादयस्तीर्थकर-गणधरैरागमे भणिताः, प्रत्यक्षतो दृश्यन्ते च । अतः सुर-नारकाणां तद्भवमपेक्ष्याऽवधिः क्षायोपशमिकोऽप्यवश्यं भवतीति ॥ ५७५ ॥

अथ द्वितीयनिर्युक्तिगाथाव्याख्यानभाष्यम्—

इय सव्वपयडिमाणं कह कमवसवण्णवत्तिणी वाया। वोच्छि त्ति सव्वं सव्वाउणा वि संखिज्जकालेणं ?॥५७६॥

गतार्थैव ॥ इति गाथासमुदायार्थः ॥ ५७६ ॥

अथ यदुक्तम्– 'चतुर्दशविधनिक्षेपं वक्ष्यामि' इति । तदाह–

ओही खेत्तपरिमाणे संठाणे आणुगामिए । अवट्ठिए चले तिव्व-मंदपडिवाउप्पयाई य ॥ ५७७ ॥
नाण-दंसणविब्भंगे देसे खित्ते गई इय । इड्ढीपत्ताणुओगे य एमेया पडिवत्तीओ ॥ ५७८ ॥

---

१ अवधिः क्षायोपशमिके भावे भणितो भवस्तथौदयिके । ततः कथं भवप्रत्ययितोः वक्तुं युक्तोऽवधिर्द्वयोः ?॥ ५७३ ॥
सोऽपि खलु क्षयोपशमतः किन्तु स एव क्षयोपशमलाभः । तस्मिन् सति भवत्यवश्यं भण्यते भवप्रत्ययस्ततः सः ॥ ५७४ ॥

२ उदय-क्षय-क्षयोपशमो-पशमा ये च कर्मणो भणिताः । द्रव्यं क्षेत्रं कालं भवं च भावं च संप्राप्य ॥ ५७५ ॥ + अवधिक्षयोपशमो–।

३ इति सर्वप्रकृतिमानं कथं क्रमवशवर्णवर्तिनी वाचा । वक्ष्यतीति सर्वं सर्वायुषाऽपि संख्येयकालेन ? ॥ ५७६ ॥

४ अवधिः क्षेत्रपरिमाणं संस्थानमानुगामिकः । अवस्थितश्चल-स्तीव्र-मन्द-प्रतिपातो-त्पादादिश्च ॥ ५७७ ॥
ज्ञान-दर्शन-विभङ्गा देशः क्षेत्रं गतिरिति । ऋद्धिप्राप्तानुयोगश्चैवमेताः प्रतिपत्तयः ॥ ५७८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

इहावध्यादीनि गतिपर्यन्तानि चतुर्दश द्वाराणि, ऋद्धिस्तु चशब्दसमुच्चितत्वात् पञ्चदशी चतुर्दशविधनिक्षेपस्योपरिष्टात् पश्चाद् वक्ष्यते। तत्रावधिर्नाम-स्थापनाभेदभिन्नो वक्तव्यः। तथा 'अर्थवशाद् विभक्तिपरिणामः' इत्यवधेर्जघन्य-मध्यमो-त्कृष्टभेदभिन्नं क्षेत्रपरिमाणं वक्तव्यम्। तथा, अवधेः संस्थानं वाच्यम्। तथा, अनुगमनशील आनुगामिकोऽवधिः सप्रतिपक्षो वाच्यः। तथा, द्रव्यादिषु कियन्तं कालमप्रतिपतितः सन्नुपयोगतो लब्धितश्चाऽऽस्ते?, इत्येवमवस्थितोऽवधिर्वक्तव्यः। तथा, वर्धमानतया हीयमानतया च चलोऽनवस्थितोऽवधिर्वक्तव्यः। तथा, तीव्रो मन्दो मध्यमश्चावधिर्वक्तव्यः। तत्र तीव्रो विशुद्धो, मन्दोऽविशुद्धः, इतरस्तूभयप्रकृतिः। तथा, द्रव्याद्यपेक्षयैककाले प्रतिपातोत्पादाववधेर्वक्तव्यौ। तथा, ज्ञान-दर्शन-विभङ्गा वाच्याः— किमत्र ज्ञानं, किं वा दर्शनं?, को वा विभङ्गः; परस्परतश्चामीषामल्प-बहुत्वं चिन्तनीयम्, ततश्च ज्ञान-दर्शन-विभङ्गैर्द्वारत्रयम्। तथा 'देसे त्ति' कस्य देशविषयः सर्वविषयो वाऽवधिर्भवतीति निरूपणीयम्। तथा, संबद्धा-ऽसंबद्ध-संख्येया-ऽसंख्येया-ऽपान्तरालक्षेत्रद्वारेण क्षेत्रविषयोऽवधिर्वक्तव्यः। गतिरिति च। तत्र इतिशब्द आद्यर्थः। ततश्च 'गइ-इंदिए काये' इत्यादिद्वारकलापोऽवधिर्वक्तव्यः। तथा, प्राप्तद्वयनुयोगश्च व्याख्यानरूपः कार्यः। एवमनेन प्रकारेणैता अनन्तरोक्ताः प्रतिपत्तयः प्रतिपादनानि परिच्छित्तय इत्यर्थः। ततश्चावधिप्रकृतय एव प्रतिपत्तिहेतुत्वात् प्रतिपत्तय उच्यन्ते॥ इति निर्युक्तिरूपकद्वयपिण्डार्थः॥ ५७७॥ ५७८॥

कथं पुनरस्यायं निक्षेपश्चतुर्दशविधः?, इत्याह भाष्यकारः—

[1]गइपज्जंता चोद्दस रिद्धी चसमुच्चिय त्ति पंचदसी। ओहिपयं पि व मोत्तुं सेयरमणुगामियं काउं॥ ५७९॥
केई चोद्दसभेयं भणंति ओहि त्ति न पयडी जम्हा। पयडी न य निक्खेवो जं भणिओ चोद्दसविहो त्ति॥५८०॥

अवध्याद्या गतिपर्यन्ताश्चतुर्दश निक्षेपाः। ऋद्धिस्तु चतुर्दशविधनिक्षेपमध्ये न भवति। किं तर्हि?, 'इड्ढीपत्ते य वोच्छामि' इत्यत्र चसमुच्चितत्वात् पृथग्भूता पञ्चदशी। अथवा 'ओही खेत्त-परिमाणे' इत्यत्राद्यमवधिपदं मुक्त्वाऽनुगमनशीलमनुगामुकं सेतरं सप्रतिपक्षं कृत्वा— अनुगामुकमननुगामुकसहितमर्थतो गमयित्वेत्यर्थः, केचनाप्याचार्याश्चतुर्दशविधनिक्षेपं पूरयन्ति। किमिति त एवं व्याख्यानयन्ति?, इत्याह— 'ओहीत्यादि' अवधिर्यस्माद् न प्रकृतिः, किन्त्ववधेरेवेह प्रकृतयो विचारयितुं प्रक्रान्ताः। कुतः?, इत्याह— यतः

१ गाथा ४०९। २ गतिपर्यन्ताश्चतुर्दश ऋद्धिश्चसमुच्चितेति पञ्चदशी। अवधिपदमपि वा मोक्तुं सेतरमनुगामुकं कृत्वा॥ ५७९॥
केचिच्चतुर्दशभेदं भणन्ति अवधिरिति न प्रकृतिर्यस्मात्। प्रकृतिर्न च निक्षेपो यद् भणितश्चतुर्दशविध इति॥ ५८०॥
३ गाथा ५६९। ४ गाथा ५७७।

प्रकृतीनामेव चतुर्दशविधो निक्षेप उक्तः। अविरुद्धं चैतदपि व्याख्यानम्। अत्र च पक्षेऽवधिशब्दः सर्वत्र विशेषणतयैव योजनीयः— अवधेः क्षेत्रपरिमाणम्, अवधेः संस्थानमित्यादि॥ इति गाथाद्वयार्थः॥ ५७९॥ ५८०॥

अथ प्रथमव्याख्याभिमताऽऽद्यद्वारव्याचिख्यासया प्राह—

[2]नामं ठवणा दविए खेत्ते काले भवे य भावे य। एसो खलु ओहिस्सा निक्खेवो होइ सत्तविहो॥ ५८१॥

नाम-स्थापना-द्रव्य-क्षेत्र-काल-भव-भावभेदादेष खल्ववधिनिक्षेपः सप्तविधो भवति॥ इति निर्युक्तिगाथासंक्षेपार्थः॥ ५८१॥

अथ विस्तरार्थं विभणिषुर्भाष्यकारः प्राह—

[3]अवहि त्ति जस्स नामं जह मज्जायाऽवहि त्ति लोयम्मि। ठवणावहिनिक्खेवो होइ जह क्खाइविन्नासो॥५८२॥

यस्य जीवादिपदार्थस्याऽवधिरिति नाम क्रियते, असौ नाम्ना नाममात्रेणावधिर्नामावधिरुच्यते, यथा लोके मर्यादाऽवधिरभिधीयते। स्थापनया स्थापनमात्रेणावधिः स्थापनावधिर्भवति। कोऽयम्?, इत्याह— निक्षेपो विन्यासोऽवधेरेव 'वस्त्वन्तरे' इति गम्यते। क्व यथा?, इत्याह— यथाऽक्षादौ विन्यासो निक्षेपोऽवधिरक्षादिविन्यास इति॥ ५८२॥

प्रकारान्तरेण नाम-स्थापनावधी प्राह—

[4]अहवा नामं तस्सेव जमभिहाणं सपज्जओ तस्स। ठवणागारविसेसो तद्दव्व-खेत्त-सामीणं॥ ५८३॥

अथवा 'नामं ति' नामावधिरुच्यते। यत् किम्?, इत्याह— तस्यैव प्रकृतस्यावधिज्ञानस्य यत् 'अवधिः' इतिवर्णावलीमात्ररूपमभिधानं संज्ञेति, नामैवावधिर्नामावधिरिति कृत्वा। तच्चावधिरित्यभिधानं तस्याऽवधिज्ञानस्य वचनरूपः स्वपर्याय इति मन्तव्यम्। स्थापनावधिस्त्वाकारविशेषो भण्यते। केषाम्?, इत्याह— तस्यावधिज्ञानस्य यद् द्रव्यं विषयभूतं भू-भूधरादि, क्षेत्रं तु भरतादि, स्वामी त्वाधारभूतसाध्वादिः, एतेषामाकारविशेषः स्थापनाऽवधिः, विषय-विषयिभावादिसंबन्धित्वेनैतेषामाकारेऽवधिः स्थाप्यत इति भावः।

१ घ. छ. 'याह'। २ नाम स्थापना द्रव्यं क्षेत्रं कालो भवश्च भावश्च। एष खल्ववधेर्निक्षेपो भवति सप्तविधः॥ ५८१॥
३ अवधिरिति यस्य नाम यथा मर्यादाऽवधिरिति लोके। स्थापनावधिनिक्षेपो भवति यथाऽक्षादिविन्यासः॥ ५८२॥
४ अथवा नाम तस्यैव यदभिधानं स्वपर्यायस्तस्य। स्थापनाकारविशेषस्तद्द्रव्य-क्षेत्र-स्वामिनाम्॥ ५८३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वं मर्यादा-ऽक्षादाववधिज्ञानासंबद्धे अपि नाम-स्थापने प्रोक्ते, अत्र त्वभिधान-द्रव्याद्याकारयोरवधिज्ञानसंबद्धयोस्ते अभिहिते इति विशेष इति ॥ ५८३ ॥

अथ द्रव्यावधिरुच्यते, स च द्विविधः– आगमतः, नोआगमतश्च । तत्रागमतोऽवधिपदार्थज्ञस्तत्र चानुपयुक्तः "अनुपयोगो द्रव्यम्" इतिवचनाद् द्रव्यावधिः । नोआगमतो ज्ञशरीरद्रव्यावधिः, भव्यशरीरद्रव्यावधिश्च । ज्ञशरीर-भव्यशरीरव्यतिरिक्तं तु द्रव्यावधिं भाष्यकारः स्वयमेवाह—

[1]दव्वोही उप्पज्जइ जत्थ तओ जं च पासए तेणं । जं वोवगारि दव्वं देहाइ तदुब्भवे होइ ॥ ५८४ ॥

तद् द्रव्यं द्रव्यावधिर्भण्यते । यत्र किम् ?, इत्याह–'उप्पज्जइ जत्थ तओ त्ति' यत्र विपुलाचलशिलादौ कायोत्सर्गादिस्थितस्य साध्वादेस्तकोऽसौ अवधिरुत्पद्यते । यद् वा भू-भूधरादि रूपि द्रव्यं तेनाऽवधिना साध्वादिः पश्यति तद् द्रव्यावधिरुच्यते । यद् वा तस्याऽवधेरुद्भव उत्पत्तौ सहकारित्वेनोपकारकं देहादिद्रव्यं तत् सर्वं द्रव्यावधिरभिधीयते । इदमुक्तं भवति– इहाधारभूतशिलादिद्रव्याण्युत्पद्यमानस्यावधेः सहकारिकारणानि भवन्ति । कारणं च

" भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके । तद् द्रव्यं तत्त्वज्ञैः सचेतना-ऽचेतनं गदितम् ॥ १ ॥"

इति वचनाद् द्रव्यमुच्यते । अतोऽन्यान्यपि तपः-संयमादीन्यवध्युत्पत्तिकारणानि द्रव्यावधित्वेनाऽवसेयानीति ॥ ५८४ ॥

अथ क्षेत्र-कालावधी प्राह–

[2]खेत्ते जत्थुप्पज्जइ कहिज्जए पेच्छए व दव्वाइं । एवंचेव य काले न उ पेच्छइ खित्त-काले सो ॥ ५८५ ॥

यत्र नगरोद्यानादिक्षेत्रे स्थितस्यावधिरुत्पद्यते स क्षेत्रेऽधिकरणभूतेऽवधिः क्षेत्रावधिरुच्यते. क्षेत्रस्याधारत्वेन प्राधान्यविवक्षया क्षेत्रेण व्यपदेश इति भावः । यत्र वा क्षेत्रेऽवधिः कथ्यते प्रज्ञापकेन स्वरूपतः प्ररूप्यते, यत्र वा क्षेत्रे व्यवस्थितानि द्रव्याण्यवधिज्ञानी प्रेक्षते तत्प्राधान्यविवक्षया तेन व्यपदेशात् क्षेत्रावधिरभिधीयते । एवं यत्र प्रथमपौरुष्यादौ कालेऽवधिरुत्पद्यते, यत्र वा प्रज्ञापकेन प्ररूप्यते, यत्कालविशिष्टानि वा द्रव्याण्यवधिज्ञानी पश्यति, तत्प्राधान्यविवक्षया तेन व्यपदेशात् स कालावधिरुच्यते । ननु किमिति 'क्षेत्र-

---

१ द्रव्यावधिरुत्पद्यते यत्र सकश्च यच्च पश्यति तेन । यद्वोपकारि द्रव्यं देहादि तदुद्भवे भवति ॥ ५८४ ॥

२ क्षेत्रे यत्रोत्पद्यते कथ्यते प्रेक्षते वा द्रव्याणि । एवमेव च काले न तु प्रेक्षते क्षेत्र-कालौ सः ॥ ५८५ ॥

कालावस्थितानि द्रव्याणि पश्यत्यसौ, इत्युच्यते ?, किं क्षेत्र-कालावेव साक्षादेव न पश्यति, इत्याशङ्क्याह– न तु पश्यति क्षेत्र-कालावसौ, तयोरमूर्तत्वात् । अवधेश्च मूर्तविषयत्वात् । वर्तनारूपं तु कालं पश्येत्, द्रव्यपर्यायत्वात् तस्येति ॥ ५८५ ॥

अथ भव-भावावधी निरूपयितुमाह–

[1]जम्मि भवे उप्पज्जइ वट्टइ पेच्छइ व जं भवोही सो । एमेव य भावोही वट्टइ य तओ खओवसमे ॥५८६॥

यस्मिन् नारकादिभवेऽवधिरवश्यमुत्पद्यते, यत्र वा भव उत्पन्नोऽसाववधिर्वर्तते नारकादिभव एव, यं वा स्वकीयं परकीयं वाऽतीतमनागतं वा, एकादिकमसंख्याततमान्तं भवं पश्यति स भवावधिः, भवे आधारभूते विषयभूते वाऽवधिर्भवावधिरिति कृत्वा। एवमेव भावावधिरपि वक्तव्यः– यस्मिन् क्षायोपशमिके भावेऽवधिरुत्पद्यते, यत्र वा क्षायोपशमिक एव भावे उत्पन्नोऽसौ वर्तते, यं वौदयिकादिभावपञ्चकान्यतरभावं, सर्वान् वा तान् पश्यति स भावावधिरित्यर्थः, भावेऽवधिर्भावावधिरिति कृत्वा। स त्ववधिः क भावे वर्तते ? इति कथ्यताम्, इत्याह– वर्तते च तकोऽसौ अवधिः क्षायोपशमिके भाव इति । तदेवं प्रथमव्याख्याने द्वारतया समायातस्याऽवधेर्नामादिनिक्षेपोऽयमुक्तः, द्वितीयव्याख्याने तु विशेषणतया समायातस्याऽस्यैषोऽभिहित इति ॥ ५८६ ॥

अथाऽवधेः क्षेत्रपरिमाणमभिधित्सुर्भाष्यकार एव प्रस्तावनामाह–

[4]ओहिस्स खेत्तमाणं जहण्णमुक्कोस्स-मज्झिमं तत्थ । पाएण तदाईए जं तेण जहन्नयं वोच्छं ॥५८७॥

अवधेर्यद् विषयभूतं क्षेत्रं तस्य मानं प्रमाणं जघन्यम्, उत्कृष्टं मध्यमं च भवति । तत्र प्रायो यद् यस्मादादौ प्रथमतस्तज्जघन्यं क्षेत्रं भवति, जघन्यक्षेत्रविषयोऽवधिः प्रायेणाऽऽदौ समुत्पद्यते, तेन कारणेन जघन्यमेव क्षेत्रप्रमाणमादौ वक्ष्ये ॥ इति गाथापट्कार्थः ॥ ५८७ ॥

यथाप्रतिज्ञातमेवाह–

[5]जावइया तिसमयाहारगस्स सुहुमस्स पणगजीवस्स । ओगाहणा जहण्णा ओहीखेत्तं जहण्णं तु ॥५८८॥

---

x स-।

१ यस्मिन् भव उत्पद्यते वर्तते प्रेक्षते वा यद् भवावधिः सः । एवमेव च भावावधिर्वर्तते च सकः क्षयोपशमे ॥ ५८६ ॥ २ घ. छ. ' नन्वव' ।

३ क. ग. 'वधिक्षेत्रप्रमा' । ४ अवधेः क्षेत्रमानं जघन्यमुत्कृष्टं मध्यमं तत्र । प्रायेण तदादौ यत् तेन जघन्यकं वक्ष्ये ॥ ५८७ ॥

५ यावती त्रिसमयाहारकस्य सूक्ष्मस्य पनकजीवस्य । अवगाहना जघन्या अवधिक्षेत्रं जघन्यं तु ॥ ५८८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

यावती यावत्प्रमाणा त्रीन् समयानाहारयतीति त्रिसमयाहारकस्तस्य, सूक्ष्मनामकर्मोदयात् सूक्ष्मस्तस्य; पनकश्चासौ जीवश्च पनकजीवो वनस्पतिविशेषस्तस्य , अवगाहन्ते यस्यां प्राणिनः साऽवगाहना तनुरित्यर्थः, जघन्या सर्वस्तोका, अवधेः क्षेत्रमवधिक्षेत्रं जघन्यं सर्वस्तोकम् । तुशब्दोऽवधारणे । तस्य चैवं प्रयोगः– अवधेर्विषयभूतं क्षेत्रं जघन्यमेतावदेव ॥ इति निर्युक्तिगाथासंक्षेपार्थः॥५८८।

अथ सांप्रदायिकार्थव्याख्यानपरं भाष्यम्–

[1]जो जोयणसाहस्सो मच्छो नियए सरीरदेसम्मि । उव्वज्जंतो पढमे समए संखिवइ आयामं ॥ ५८९ ॥
पयरमसंखिज्जंगुलभागतणुं मच्छदेहविच्छिण्णं । बीए, तईए सूइं संखिविउं होइ तो पणओ ॥ ५९० ॥
उववायाओ तईए समए जं देहमाणमेयस्स । तण्णेयदव्वभायणमोहिक्खित्तं जहन्नं तं ॥ ५९१ ॥

यो मत्स्यो योजनसहस्रो योजनसहस्रायामः स्वदेहस्यैव बाह्यदेश उत्पद्यमानः प्रथमे समये आयामं संक्षिपति 'तं च संक्षिपन् प्रतरं करोति' इति शेषः । कथंभूतम् ?, इत्याह– ' असंखेज्जंगुलभागतणुं ति ' बाहल्येनाङ्गुलासंख्येयभागसूक्ष्ममित्यर्थः । पुनरपि[3] तत् कथंभूतम् ?, इत्याह– मत्स्यदेहविस्तीर्णं शरीरान्तःसंबद्धत्वाद्ध्वाधस्तिर्यक् च यावान् मत्स्यदेहविस्तरस्तावांस्तज्जीवप्रदेशप्रतरस्यापीत्यर्थः; एवं चायामतो विष्कम्भतश्च मत्स्यशरीरपृथुत्वतुल्योऽङ्गुलासंख्येयभागबाहल्यश्चायं प्रतरो भवतीति प्रथमसमयव्यापारः । ननु च प्रथमे समये आयामं संक्षिपति, इत्येतदेवोक्तं, यथोक्तप्रतरकरणं तु कुतो लभ्यते ?, इति चेत् । उच्यते– अनन्तरं द्वितीयसमये तत्संक्षेपस्य भणनात् , तस्य च करणपूर्वकत्वादिति । 'बीए' इति 'संखिविउं' इत्यत्रापि संबध्यते । ततो द्वितीयसमये तं प्रतरमुभयतः संक्षिप्याऽङ्गुलासंख्येयभागबाहल्यां मत्स्यशरीरपृथुत्वायामां सूचिं 'करोति' इत्यध्याहारः । अत्राप्यनन्तरतृतीयसमये सूचिसंक्षेपाभिधानात् तस्य च तत्करणपूर्वकत्वात् सूचिकरणमध्याहियते । 'तईए त्ति' ततस्तृतीयसमयें एतामपि सूचिं संक्षिप्याङ्गुलासंख्येयभागमात्रावगाहनो भूत्वा निर्जीर्णमत्स्यभवायुरुदीर्णपरभवायुश्चाऽविग्रहगत्या मत्स्यशरीरस्यैवैकदेशे पनकः सूक्ष्मवनस्पतिजीवविशेषो

---

१ यो योजनसहस्रो मत्स्यो निजके शरीरदेशे । उत्पद्यमानः प्रथमे समये संक्षिपत्यायामम् ॥ ५८९ ॥
प्रतरमसंख्येयाङ्गुलभागतनुं मत्स्यदेहविस्तीर्णम् । द्वितीये, तृतीये सूचिं संक्षिप्य भवति ततः पनकः ॥ ५९० ॥
उपपादात् तृतीये समये यद् देहमानमेतस्य । तज्ज्ञेयद्रव्यभाजनमवधिक्षेत्रं जघन्यं तत् ॥ ५९१ ॥
२ ध.छ. 'बाहुल्ये'। ३ ध.छ. 'पि क'। ४ क.ख.ग. 'ये ता'।

४०
भवति । अस्मादुत्पादसमयात् तृतीयसमये यद् देहमानमेतस्य पनकस्य । तत् किम् ?, इत्याह– ' ओहिक्खित्तं जहन्नं तं ति ' तज्जघन्यमवधेर्विषयभूतं क्षेत्रम् । किंस्वरूपम् ?, तज्ज्ञेयद्रव्यभाजनं तस्यावधेर्ज्ञेयानि ग्राह्याणि यानि द्रव्याणि तेषां भाजनमाधारभूतम् । एतेन तज्ज्ञेयद्रव्याधारत्वेनैव क्षेत्रमवधेर्विषय उच्यते, न तु साक्षात् , तस्याऽमूर्तत्वात् , अवधेस्तु मूर्तविषयत्वादिति । एतद्गाथात्रयव्याख्यातार्थसंवादि चोक्तं वृद्धैः—

" योजनसहस्रमानो मत्स्यो मृत्वा स्वकायदेशे यः । उत्पद्यते हि सूक्ष्मः पनकत्वेनेह स ग्राह्यः ॥ १ ॥
संहृत्य चाद्यसमये स ह्यायामं करोति च प्रतरम् । संख्यातीताख्याङ्गुलविभागबाहल्यमानं तु ॥ २ ॥
स्वकतनुपृथक्त्वमात्रं दीर्घत्वेनापि जीवसामर्थ्यात् । तमपि द्वितीयसमये संहृत्य करोत्यसौ सूचिम् ॥ ३ ॥
संख्यातीताख्याङ्गुलविभागविष्कम्भमाननिर्दिष्टाम् । निजतनुपृथक्त्वदैर्घ्यां तृतीयसमये तु संहृत्य ॥ ४ ॥
उत्पद्यते च पनकः स्वदेहदेशे स सूक्ष्मपरिणामः । समयत्रयेण तस्यावगाहना यावती भवति ॥ ५ ॥
तावज्जघन्यमवधेरालम्बनवस्तुभाजनं क्षेत्रम् । इदमित्थमेव मुनिगणसुसंप्रदायात् समवसेयम् ॥ ६ ॥"

अत्र परः पृच्छति—

[1]किं मच्छो अतिमहल्लो किं तिसमयओ व कीस वा सुहुमो । गहिओ कीस व पणओ किंव जहण्णावगाहणओ ?॥५९२॥

किमिति मत्स्योऽतिमहान् गृह्यते ?, किंवा त्रिसमयाहारकः– तृतीये समये निजशरीरदेशोत्पत्तिमान् वा गृह्यते ?, किंवा सूक्ष्मः ?, किमिति वा पनको, जघन्यावगाहनको वा गृहीतः ? इति ॥ ५९२ ॥

अत्रोत्तरमाह—

[2]मच्छो महल्लकाओ संखित्तो जो य तीहिं समयेहिं । सो किर पयत्तविसेसेण सण्हमोगाहणं कुणइ ॥५९३॥
सण्हयरा सण्हयरो सुहुमो पणओ जहण्णदेहो य । सुबहुविसेससविसिट्ठो सण्हयरो सव्वदेहेसु ॥ ५९४ ॥

X देसो-। १ किं मत्स्योऽतिमहान् किं त्रिसमयको वा कस्माद् वा सूक्ष्मः । गृहीतः कस्माद् वा पनकः किंवा जघन्यावगाहनकः ? ॥ ५९२ ॥
२ मत्स्यो महाकायः संक्षेप्तो यश्च त्रिभिः समयैः । स किल प्रयत्नविशेषेण सूक्ष्मामवगाहनां कुरुते ॥ ५९३ ॥
श्लक्ष्णतरात् श्लक्ष्णतरः सूक्ष्मः पनको जघन्यदेहश्च । सुबहुविशेषविशिष्टः सूक्ष्मतरः सर्वदेहेषु ॥ ५९४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

यो हि योजनसहस्रायामो महाकायो मत्स्यः, त्रिभिश्च समयैरात्मानं संक्षिपति, स किल प्रयत्नविशेषादतिसूक्ष्मामवगाहनां कुरुते, नान्यः। अनेन 'किमिति मत्स्योऽतिमहान् गृह्यते, तृतीयसमयसंक्षिप्तश्च ?' इत्येतस्योत्तरमदायि। दूरे च गत्वाऽन्यत्र यदुत्पद्यते, विग्रहेण च गच्छति, तदा जीवप्रदेशाः किञ्चिद्विस्तरं यान्तीत्यवगाहना स्थूलतरा स्यात्, इत्यविग्रहगत्या स्वशरीरदेश एवोत्पादित इत्येतत् स्वयमेव द्रष्टव्यमिति। 'केरिस वा सुहुमो' इत्यादेरुत्तरमाह– 'सण्हयरा इत्यादि' श्लक्ष्णादपि श्लक्ष्णतरस्तावद् भवति। कः ?, पनकः। कथंभूतः ?, सूक्ष्मः, जघन्यदेहश्च जघन्यावगाहश्चेत्यर्थः। वस्तुतोऽर्थतात्पर्यमाह– 'सुबहु इत्यादि' 'जो जोयणसाहस्सो' इत्यादुक्तप्रकारेण सुबहुविशेषणविशिष्टो गृह्यमाणः पनकजीवः सूक्ष्मतरः सूक्ष्मतमश्च सर्वदेहेभ्यो भवतीति ॥ ५९३ ॥ ५९४ ॥

अथ 'किं त्रिसमयाहारकः ?' इत्यस्योत्तरमाह–

[4]पढम-बिईए अतिसण्हो जमहत्थूलो चउत्थयाईसु। तईयसमयम्मि जोग्गो गहिओ तो तिसमयाहारो ॥५९५॥

यस्मात् प्रथम-द्वितीययोः समययोरतिसूक्ष्मो भवति, चतुर्थादिषु चातिस्थूलः संपद्यते, तृतीयसमये तु योग्यः; अतस्त्रिसमयाहारग्रहणमिति ॥ ५९५ ॥

अत्र केषांचिन्मतमुद्भावयन्नाह–

[5]केई दो झससमया तईओ पणगत्तणोववायम्मि। अह तिसमओ आहारओ य सुहुमो य पणओ य ॥५९६॥

उववाए चेव तओ जओ जहण्णो न सेससमयेसु। तो किर तद्देहसमाणमोहिखित्तं जहण्णं तु ॥ ५९७ ॥

त्रिसमयाहारकत्वविषये केचनाऽप्याचार्या व्याचक्षते यदुत– द्वौ तावज्झषस्य मत्स्यस्य संबन्धिनावाद्यसमयौ गृह्येते– आयामसंहारप्रतरकरणलक्षणः प्रथमः, सूचिं तु यत्र करोति स द्वितीयः, तृतीयसमयस्तु तां संक्षिप्य पनकत्वेनोत्पादे भवति। ततश्च त्रयः समया यस्यासौ त्रिसमयः, अविग्रहेणोत्पत्तेराहारकश्च। एवं च सति प्रत्युताऽतिसूक्ष्मश्च पनकश्चार्यं सिद्धो भवति। तथा च सति [6]'ति-

१ क.ख.ग. 'स्यो म'। २ गाथा ५९२। ३ गाथा ५८९।

४ प्रथम-द्वितीययोरतिसूक्ष्मो यदतिस्थूलश्चतुर्थकादिषु। तृतीयसमये योग्यो गृहीतस्ततस्त्रिसमयाहारः ॥ ५९५ ॥

५ केचिद् द्वौ झषसमयौ तृतीयः पनकत्वोपपाते। अथ त्रिसमय आहारकश्च सूक्ष्मश्च पनकश्च ॥ ५९६ ॥
उपपाद एव सको यतो जघन्यो न शेषसमयेषु। ततः किल तद्देहसमानमवधिक्षेत्रं जघन्यं तु ॥ ५९७ ॥ ६ क. ग. 'एवं च'। ७ गाथा ५८८।

समयाहारगस्स सुहुमस्स पणगजीवस्स' इति निर्युक्तिकारवचनमाराधितं भवति। किञ्च, इह यथा सूक्ष्मः सूक्ष्मतरोऽसौ भवति तथा कर्तव्यम्, एतच्चास्मिन् व्याख्यानेऽतिसविशेषं सिध्यतीति दर्शयति– 'उववाए चेवेत्यादि' उत्पादसमय एव यतो यस्मात् तकोऽसौ पनकजीवो 'जघन्यः' इति जघन्यावगाहनो भवति, न शेषेषु समयेषु, द्वितीयादिष्वीषन्महत्त्वात्, जघन्यावगाहनश्च निर्युक्तौ प्रोक्तः। ततोऽतिसूक्ष्मत्वसिद्धेस्तस्यानन्तरोक्तस्वरूपस्य पनकस्य देहस्तद्देहस्तत्समानमेव किलावधिविषयभूतं जघन्यं क्षेत्रं भवतीति।

अत्र भाष्यगाथामन्तरेणापि पूर्वटीकाकारलिखितं प्रतिविधानमुच्यते, तच्चैवम्– न युक्तमिदं केषांचिद् व्याख्यानम्, त्रिसमयाहारकत्वस्य पनकविशेषणत्वेनोक्तत्वात्, मत्स्यसमयद्वयस्य च पनकसमयत्वायोगात्। योऽपीत्थमतिजघन्यावगाहनालाभलक्षणो गुण उद्भाव्यते, सोऽपि न युक्तः, यस्माद् नेहाऽतिसूक्ष्मेणाऽतिमहता वा किञ्चित् प्रयोजनम्। किं तर्हि ?, योग्येन, योग्यश्च स एव तैर्द्वेत्तृभिर्दृष्टः, यः प्रथमं जघन्यावगाहनः संस्तस्मिन्नेव भवे समयत्रयमाहारं गृह्णाति, इत्यलमतिविस्तरेण। इति गाथानवकार्थः। तदेवमवधिविषयभूतस्य जघन्यक्षेत्रस्य परिमाणमुक्तम् ॥ ५९६ ॥ ५९७ ॥

अथोत्कृष्टस्य तस्य तदाह–

[3]सव्वबहुअगणिजीवा निरंतरं जत्तियं भरिज्जंसु। खेत्तं सव्वदिसागं परमोही खेत्तनिद्दिट्ठो ॥ ५९८ ॥

सर्वेभ्यो विवक्षितकालावस्थायिभ्योऽनलजीवेभ्य एव बहवः सर्वबहवः, न तु भूत-भाविभ्यः, नापि च शेषजीवेभ्यः; कुतः ?, असंभवादेवेतिः अग्रयश्च ते जीवाश्चाग्रिजीवाः, सर्वबहवश्च तेऽग्रिजीवाश्च सर्वबहग्रिजीवाः, निरन्तरं संततं नैरन्तर्येणेत्यर्थः, यावदिति यत्प्रमाणं क्षेत्रमाकाशं वक्ष्यमाणविशिष्टसूचीरचनया रचिताः सन्तो भूतवन्तो व्याप्तवन्तः भूतकालनिर्देशश्च 'अजितस्वामिकाल एव वक्ष्यमाणयुक्त्या प्रायः सर्वबहवोऽनलजीवा भवन्त्यस्यामवसर्पिण्याम्' इत्यस्यार्थस्य ख्यापनार्थः। इदं चानन्तरोक्तविशेषणं क्षेत्रमेकदिक्कमपि भवति, अत आह– 'सव्वदिसागं ति' सर्वा दिशो यत्र तत् सर्वदिक्कम्। अनेन वक्ष्यमाणन्यायेन सर्वतः सूचीभ्रमणप्रमितं तदाह। परमश्चासाववधिश्च परमावधिः, क्षेत्रमनन्तरव्यावर्णितं प्रभूतानलजीवप्रमितमङ्गीकृत्य निर्दिष्टः प्रतिपादितो महामुनिभिः। ततश्चावधेः पर्यायेणैतावत् क्षेत्रमुत्कृष्टतो विषय इत्युक्तं भवति ॥ इति निर्युक्तिगाथाक्षरार्थः ॥ ५९८ ॥

भावार्थं तु सांप्रदायिकार्थप्रतिपादकभाष्यमुखेन भाष्यकार एवाह–

१ क. ख. ग. 'ख दे'। २ क. ग. 'तद्देत्तुभि'। ३ सर्वबहुअग्निजीवा निरन्तरं यावदभार्युः। क्षेत्रं सर्वदिक्कं परमावधिः क्षेत्रनिर्दिष्टः ॥ ५९८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अव्वाघाए सव्वासु कम्मभूमीसु जं तदारंभा । सव्वबहवो मणुस्सा होंतजियजिणिंदकालम्मि ॥५९९॥

अव्याघाते– अनलजीवोत्पत्तेर्महाहृदपूरादिव्याघाताभावे, सर्वासु समस्तभरतै-रावत-विदेहलक्षणासु पञ्चदशसु कर्मभूमिषु सर्वबहवो 'बादराग्निजीवा भवन्ति' इति प्रक्रमाल्लभ्यते । किमविशेषेण सर्वदैवैतावत्ते भवन्ति ?, न, इत्याह– अजितजिनेन्द्रकाले, अजितजिनेन्द्रस्योपलक्षणत्वादवसर्पिण्यां द्वितीयतीर्थकरकाल इत्यर्थः । किमिति तत्रैव बहवो भवन्ति ?, इत्याह– 'जमित्यादि' यद् यस्मात् तदारम्भास्तेषां बादराग्निजीवानां संधुक्षण-ज्वालनाद्यारम्भपराः सर्वबहवः सर्वेभ्योऽप्यतीता-ऽनागतेभ्यो बहवः प्रभूता गर्भ-जमनुष्या भवन्ति स्वभावादेवेति ॥ ५९९ ॥

आह– किमेतैरेव बादराग्निजीवैः सर्वबहग्निजीवपरिमाणं पूर्यते, आहोस्वित् सूक्ष्माग्निभिः सह ?। यदि तैः सह, तदा तेऽविशिष्टा अपि पूर्यन्ते, आहोस्वित् कश्चिदेव विशिष्टाः ?, इत्याह–

उक्कोसया य सुहुमा जया तया सव्वबहुगमगणीणं । परिमाणं संभवओ तं छद्धा पूरणं कुणइ ॥ ६०० ॥

उत्कृष्टाश्च सूक्ष्माग्निजीवाः स्वभावत एव कथमपि यदा संभवन्ति, तदैवैतैर्बादराग्निजीवैः सह सर्वबहग्निजीवानां परिमाणं भवति । इदमत्र हृदयम्– अनन्तानन्तास्ववसर्पिणीषु मध्ये स एव कश्चिद् द्वितीयतीर्थकरकालो भूयते, यत्र सूक्ष्माग्निजीवा उत्कृष्टपदिनः प्राप्यन्ते । ततश्च तैर्बादरैः सूक्ष्मैश्चाग्निजीवैरुत्कृष्टपदिभिर्मीलितैः सर्वबहग्निजीवानां परिमाणं भवति । तच्च संभवतः संभवमात्रमाश्रित्य बुद्ध्या षोढा षट्प्रकारया रचनया व्यवस्थाप्यते । ततश्च बहुतरक्षेत्रपूरणं करोति । तत्र पञ्चाऽनादेशाः, षष्ठस्तु श्रुतादेश इति ॥६००॥

एतदेवाह–

एक्केक्कागासपएसजीवरयणाए सावगाहे य । चउरंसघणं पयरं सेढी छट्ठो सुयाएसो ॥ ६०१ ॥

---

१ अव्याघाते सर्वासु कर्मभूमिषु यत् तदारम्भाः । सर्वबहवो मनुष्या भवन्त्यजितजिनेन्द्रकाले ॥ ५९९ ॥ * पदेन–।

२ उत्कृष्टाश्च सूक्ष्मा यदा तदा सर्वबहुकमग्नीनाम् । परिमाणं संभवतस्तत् षोढा पूरणं करोति ॥ ६०० ॥

३ एकैकाकाशप्रदेशजीवरचनया स्वावगाहे च । चतुरस्रघनं प्रतरं श्रेणिः षष्ठः श्रुतादेशः ॥ ६०१ ॥

तैः सर्वैरप्यग्निजीवैः समचतुरस्रो घनो यतो द्विभेदः स्थाप्यते । कथम् ?, इत्याह– एकैकाकाशप्रदेश एकैकाग्निजीवरचनया स्वावगाहे यं देशासंख्येयाकाशप्रदेशलक्षण एकैकाग्निजीवरचनयेति । अत्र स्थापना–



एतेषां नवानामग्निजीवानां प्रत्येकमेकैकाकाशप्रदेशैर्व्यवस्थापितानामधस्तादुपरिष्टाच्चाऽन्येऽपि नव नव जीवा इत्थमेव स्थाप्यन्ते । एष कल्पनया सप्तविंशत्या, सद्भावतस्त्वसंख्येयैरग्निजीवैरेकैकाकाशप्रदेशव्यवस्थापितैर्घनो मन्तव्यः । द्वितीयोऽपि घन इत्थमेव द्रष्टव्यः, केवलमिहासंख्येयाकाशप्रदेशेष्वेकैकजीवो व्यवस्थाप्यते । एवमेकैकाकाशप्रदेशे एकैकजीवस्थापनयाऽसंख्येयप्रदेशात्मकस्वावगाहस्थापनया च प्रतरोऽपि द्विभेदः । सूचिरपि द्विभेदा । तत्र घन-प्रतरपक्षश्चतुर्भेदः; पञ्चमश्चैकैकाकाशप्रदेशस्थापितैकैकजीवलक्षणसूचिपक्षोऽपि न ग्राह्यः, दोषदुष्टानुषङ्गात् , तथाहि– पञ्चविधयाऽप्यनया स्थापनया स्थापिता अग्निजीवाः षट्स्वपि दिक्ष्ववधिज्ञानिनोऽसत्कल्पनया भ्रम्यमाणाः स्तोकमेव क्षेत्रं स्पृशन्तीत्येको दोषः, एकैकाकाशप्रदेशे एकैकजीवस्थापनायामागमविरोधश्च द्वितीयदोषः, असंख्येयाकाशप्रदेशानन्तरेणाऽऽगमे जीवावगाहनिषेधात् । असत्कल्पनया प्रदेशावगाहोऽप्यस्त्विति चेत् । नैवम् , कल्पनाऽपि सति संभवेऽविरोधिन्येव कर्तव्या, किं विरोधेन ?, इत्यालोच्याह– 'छट्ठो सुयाएसो त्ति' असंख्येयाकाशप्रदेशलक्षणे स्वावगाहे षष्ठस्या एकैकजीवस्थापनेन यः सूचिलक्षणः षष्ठपक्षः, अयं श्रुते आदिष्टत्वाद् ग्राह्यः; शेषास्तु पञ्चाऽनादेशाः संभवोपदर्शनमात्रेणोक्तत्वात् परिहार्याः । इयं हि यथोक्ता सूचिरेकैकजीवस्यासंख्येयाकाशप्रदेशावगाहे व्यवस्थापितत्वाद् बहुतरं क्षेत्रं स्पृशति, इत्येको गुणः; अवगाहविरोधाभावस्तु द्वितीयः । ततश्चैवाग्निजीवसूचिरवधिज्ञानिनः षट्स्वपि दिक्ष्वसत्कल्पनया भ्रमिता सती अलोके लोकप्रमाणान्यसंख्येयखण्डानि स्पृशति । अत एतावदुत्कृष्टक्षेत्रमवधेर्विषय इत्युक्तं भवति; इत्यादि स्वयमेव वक्ष्यतीति ॥ ६०१ ॥

अत्र कश्चिदाह–

घण-पयरसेढिगणियं नणु तुल्लं चिय, विगप्पणा कीस । छद्धा कीरइ, भण्णइ पुरिसपरिक्खेवओ भेओ ॥६०२॥

---

१ ध.ह. 'चासं' । २ घन-प्रतरश्रेणिगणितं ननु तुल्यमेव, विकल्पना कस्मात् । षोढा क्रियते, भण्यते पुरुषपरिक्षेपतो भेदः ॥ ६०२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

नन्वेकैकाकाशप्रदेशावगाढजीवघन-प्रतर-श्रेण्याक्रान्ताकाशप्रदेशानां संख्यारूपं गणितं तुल्यमेव । तथा, असंख्येयाकाशप्रदेशावगाढजीवघन-प्रतर-श्रेण्याक्रान्ताकाशदेशानामपि गणितं स्वस्थाने परस्परं तुल्यमेव; तथाहि- यावत एकैकाकाशप्रदेशावगाहिनां जीवानां घन आकाशप्रदेशानाक्रामति, प्रतरोऽपि तेषां तावत एव तानाक्रामति, सूचिरपि तेषां तावत एव तान् स्पृशति, संवृतप्रसारितनेत्रपट्टाक्रान्ताकाशप्रदेशवदिति । एवमसंख्येयाकाशप्रदेशावगाढजीवघन-प्रतर-श्रेण्याक्रान्ताकाशप्रदेशानामपि स्वस्थाने गणिततुल्यता भावनीयेति । अतोऽवगाहभेदद्वयभिन्नो घन एवाऽस्तु, प्रतरो वा, सूचिर्वेति; षोढा तु विकल्पना षड्भेदानां कल्पनं किमिति क्रियते ? न युक्तेयमित्यभिप्रायः ।

अत्र सूरिराह- भण्यत उत्तरम् । किम् ?, इत्याह- 'पुरिसपरिक्खेवओ भेउ त्ति' अस्त्यस्याः षड्विधकल्पनाया भेदः । कथम् ?, इत्याह- पुरुषपरिक्षेपतः । इदमुक्तं भवति- नेह घनाद्याक्रान्ताकाशप्रदेशानां संख्यासमत्व-विषयत्वे चिन्त्येते । किं तर्हि ?, घनादीनां मध्याद् यः कश्चिद् रचनाविशेषोऽवधिज्ञानिनः सर्वासु दिक्षु भ्रम्यमाणो बहुतरं क्षेत्रं स्पृशति, स एवेह ग्राह्यः । एवं सत्यस्त्यमीषां भेदः, तथाहि- एकैकप्रदेशावगाढजीवघनो भ्रम्यमाणो यावत् क्षेत्रं स्पृशति, तस्मादसंख्येयप्रदेशावगाढजीवघनोऽसंख्येयगुणं स्पृशति, ततोऽप्येकैकप्रदेशावगाढजीवप्रतरोऽसंख्येयगुणं, तस्मादप्यसंख्येयप्रदेशावगाढजन्तुप्रतरोऽसंख्येयगुणम्, ततोऽप्येकैकप्रदेशावगाढजीवसूचिरसंख्येयगुणं, तस्मादप्यसंख्येयाकाशप्रदेशावगाढैकैकाग्निजीवसूचिरवधिज्ञानिनः सर्वासु दिक्षु भ्रम्यमाणोऽसंख्येयगुणं क्षेत्रं स्पृशति, तच्चाऽलोके लोकप्रमाणान्यसंख्येयाकाशखण्डानि; अत एतावदेवाऽवधेरुत्कृष्टं क्षेत्रं विषय इति ॥ ६०२ ॥

उक्तमेवार्थं भाष्यकारः स्वयमेवाह-

[2]नियया[1]वगाहणागणिजीवसरीरावली समंतेणं । भामिज्जइ ओहिन्नाणिदेहपज्जंतओ सा य ॥ ६०३ ॥

अइगंतूण अलोगं लोगागासप्पमाणमेत्ताइं । ठाइ असंखेज्जाइं इदमोहिखेत्तमुक्कोसं ॥ ६०४ ॥

निजका आत्मीया एकैकस्याऽसंख्येयप्रदेशात्मिकाऽवगाहना येषां तानि तथा, तानि च तानि अग्निजीवशरीराणि च, तेषामावली पङ्क्तिः सूचिरवधिज्ञानिनो देहपर्यन्तात् समन्तात् सर्वासु दिक्षु बुद्ध्या भ्राम्यते । सा चाऽलोके 'लोकप्रमाणमात्राण्यसंख्येया-

---

१ क. ख. ग. 'रु आह' । २ निजकावगाहनाग्निजीवशरीरावली समन्तात् । भ्राम्यतेऽवधिज्ञानिदेहपर्यन्ततः सा च ॥ ६०३ ॥
अतिगत्याऽलोकं लोकाकाशप्रमाणमात्राणि । तिष्ठत्यसंख्येयानि इदमवधिक्षेत्रमुत्कृष्टम् ॥ ६०४ ॥

न्याकाशखण्डानि' इति गम्यते, अतीत्य गत्वा स्पृष्ट्वा वेति, तिष्ठत्युपरमते । इदमवधेरुत्कृष्टं क्षेत्रं विषय इति ॥ ६०३ ॥ ६०४ ॥

आह- ननु 'रूपिद्रव्याण्येवावधिः पश्यति' इति गीयते, क्षेत्रं त्वमूर्तत्वात् कथं तद्विषयः ?, इत्याशङ्क्याह-

[1]सामत्थमेत्तमेयं जइ दट्ठव्वं हवेज्ज, पेच्छेज्जा । न य तं तत्थत्थि जओ सो रूविनिबंधणो भणिओ ॥६०५॥

यदवधेरेतावत् क्षेत्रं विषय उच्यते, तदेतत् तस्य सामर्थ्यमात्रमेव कीर्त्यते । कोऽर्थः ?, इत्याह- यद्येतावत्क्षेत्रं द्रष्टव्यं किमपि भवेत् तदा पश्येदवधिज्ञानी । न च तद् द्रष्टव्यं तत्राऽलोके समस्ति, यतोऽयमवधिस्तीर्थकर-गणधरै रूपिद्रव्यनिबन्धनो भणितः, तच्च रूपिद्रव्यमलोके नास्त्येवेति ॥ ६०५ ॥

आह- यद्येवम्, लोकप्रमाणोऽवधिर्भूत्वा यस्य पुरतो विशुद्धिवशतो लोकाद् बहिरप्यसौ वर्धते तस्य तद्वृद्धेः किं फलं, लोकाद् बहिर्द्रष्टव्याभावात् ?, इत्याशङ्क्याह-

[2]वड्ढंतो उण बाहिं लोयत्थं चेव पासइ दव्वं । सुहुमयरं सुहुमयरं परमोही जाव परमाणुं ॥ ६०६ ॥

लोकाद् बहिष्पुनर्विशुद्धिवशाद् वर्धमानोऽवधिर्लोकस्थमेवाऽधिकमधिकतरं च द्रव्यं पश्यति । कथंभूतम् ?, (सूक्ष्मं,) सूक्ष्मतरं, सूक्ष्मतमं यावत् परमावधिः सर्वसूक्ष्मं परमाणुमपि पश्यति, इति तद्वृद्धेस्तात्त्विकं फलमिति । अलोके तु लोकप्रमाणासंख्येयखण्डेषु द्रव्यदर्शनसामर्थ्यमेव तस्येति । अन्यकर्तृकेयं प्रक्षेपगाथा, सोपयोगेति च व्याख्यातेति ॥ ६०६ ॥

तदेवं जघन्यमुत्कृष्टं चाभिहितमवधेर्विषयभूतं क्षेत्रम् । एतस्माच्चान्यत् सर्वं विमध्यममिति सामर्थ्याद् गम्यत एव, केवलं यद् यत्र विमध्यमे क्षेत्रविशेषे कालमानं भवति, यावति च काले यद् विमध्यमं क्षेत्रं भवति, इत्यभिधित्सुः प्रस्तावनामाह-

[3]भणियं जहण्णमुक्कोसयं च खेत्तं विमज्झिमं सेसं । एयस्स कालमाणं वोच्छं जं जम्मि खेत्तम्मि ॥६०७॥

गतार्थैव, नवरमुपलक्षणत्वादिह यावति काले यद्विमध्यमं क्षेत्रं भवति, इत्यप्यभिधास्यत इति द्रष्टव्यम् ॥ इति गाथानवकार्थः ॥६०७॥

यथाप्रतिज्ञातमेवाह-

---

१ सामर्थ्यमात्रमेतद् यदि द्रष्टव्यं भवेत्, प्रेक्षेत । न च तत् तत्रास्ति यतः स रूपिनिबन्धनो भणितः ॥ ६०५ ॥ + ठाइ इति-।
२ वर्धमानः पुनर्बहिर्लोकस्थमेव पश्यति द्रव्यम् । सूक्ष्मतरं सूक्ष्मतरं परमावधिर्यावत् परमाणुम् ॥ ६०६ ॥
३ भणितं जघन्यमुत्कृष्टं च क्षेत्रं विमध्यमं शेषम् । एतस्य कालमानं वक्ष्ये यद् यस्मिन् क्षेत्रे ॥ ६०७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]अंगुलमावलियाणं भागमसंखेज्ज दोसु संखिज्जा । अंगुलमावलियंतो आवलिया अंगुलपुहुत्तं [2] ॥ ६०८ ॥
हत्थम्मि मुहुत्तंतो दिवसंतो गाउयम्मि बोधव्वो । जोयण दिवसपुहुत्तं पक्खंतो पण्णवीसाओ ॥ ६०९ ॥
भरहम्मि अद्धमासो जंबुद्दीवम्मि साहिओ मासो । वासं च मणुयलोए वासपुहुत्तं च रुयगम्मि ॥ ६१० ॥

अङ्गुलं क्षेत्राधिकारात् प्रमाणाङ्गुलं गृह्यते । 'अवध्यधिकारादुच्छ्रयाङ्गुलं' इति च केचिदिति । असंख्येयसमयसंघातात्मकः कालविशेष आवलिका । अङ्गुलं चावलिका चाङ्गुला-ऽऽवलिके, तयोरङ्गुला-ऽऽवलिकयोर्भागमसंख्येयं पश्यत्यवधिज्ञानी । एतदुक्तं भवति– क्षेत्रमङ्गुलासंख्येयभागमात्रं पश्यन् कालत आवलिकाया असंख्येयमेव भागं पश्यति, अतीतमनागतं चेति । क्षेत्र-कालदर्शनं चोपचारेणोच्यते; अन्यथा हि क्षेत्रव्यवस्थितानि दर्शनयोग्यानि द्रव्याणि, तत्पर्यायाश्च विवक्षितकालान्तर्वर्तिनः पश्यत्यवधिः, न तु क्षेत्र-कालौ, मूर्तद्रव्यालम्बनत्वात् तस्येति । एवमुत्तरत्रापि सर्वत्र द्रष्टव्यम् । क्रिया चेह गाथात्रयेऽप्यध्याहाराद् दृश्येति । 'दोसु संखिज्ज त्ति' द्वयोरङ्गुला-ऽऽवलिकयोः संख्येयौ भागौ पश्यति– अङ्गुलसंख्येयभागमात्रं क्षेत्रं पश्यन्नावलिकायाः संख्येयमेव भागं पश्यतीत्यर्थः । 'अंगुलमावलियंतो त्ति' अङ्गुलं पश्यन् क्षेत्रतः, कालत आवलिकान्तः– भिन्नामावलिकां पश्यतीत्यर्थः । 'आवलिया अंगुलपुहुत्तं ति' कालत आवलिकां वीक्षमाणः क्षेत्रतोऽङ्गुलपृथक्त्वं पश्यति । पृथक्त्वं च समयपरिभाषया द्विप्रभृत्यानवभ्यः सर्वत्र द्रष्टव्यमिति । 'हत्थम्मि मुहुत्तंतो' क्षेत्रतो हस्तप्रमाणक्षेत्रविषयोऽवधिः कालतो मुहूर्तान्तः– भिन्नं मुहूर्तं पश्यतीत्यर्थः । 'दिवसंतो इत्यादि' कालतो दिवसान्तः– भिन्नं दिवसं वीक्षमाणः क्षेत्रतो गव्यूतविषयो बोद्धव्यः । 'जोयण दिवसपुहुत्तं ति' योजनक्षेत्रविषयोऽवधिः कालतो दिवसपृथक्त्वं पश्यति[3] । 'पक्खंतो इत्यादि' कालतः पक्षान्तः– भिन्नं पक्षं पश्यन् क्षेत्रतः पञ्चविंशतियोजनानि पश्यति । 'भरहम्मीत्यादि' भरतक्षेत्रविषयेऽवधौ कालतोऽर्धमासस्तद्विषयत्वेन बोद्धव्यः । जम्बूद्वीपविषये तु साधिको मासः । अर्धतृतीयद्वीपसमुद्रलक्षणे मनुष्यलोके तु वर्षं संवत्सरः । रुचकाख्यबाह्यद्वीपविषयेऽवधौ वर्षपृथक्त्वं तद्विषयत्वेनाऽवगन्तव्यम् । 'वर्षसहस्रं' इत्यन्ये ॥ इति निर्युक्तिगाथात्रयार्थः ॥ ६०८ ॥ ६०९ ॥ ६१० ॥

---

१ अङ्गुला-ऽऽवलिकयोर्भागमसंख्येयं द्वयोः संख्येयौ । अङ्गुलमावलिकान्तरावलिकाऽङ्गुलपृथक्त्वम् ॥ ६०८ ॥
हस्ते मुहूर्तान्तर्दिवसान्तर्गव्यूते बोद्धव्यः । योजने दिवसपृथक्त्वं पक्षान्तः पञ्चविंशतिम् ॥ ६०९ ॥
भरतेऽर्धमासो जम्बूद्वीपे साधिको मासः । वर्षं च मनुजलोके वर्षपृथक्त्वं च रुचके ॥६१०॥ २ घ.छ.'संखेज्ज' । ३ घ.छ.'पुहत्तं' । ४ घ.छ.'ति का' ।

४१

अथ भाष्यम्–

[1]खेत्तमसंखेज्जंगुलभागं पासंतमेव कालेणं । आवलियाए भागं भूयमणागयं च जाणाइ ॥ ६११ ॥
तत्थेव य जे दव्वा तेसिं चिय जे हवंति पज्जाया । इय खेत्ते कालम्मि य जोएज्जा दव्व-पज्जाए ॥ ६१२ ॥
संखेज्जंगुलभाए आवलियाए वि मुणइ तइभागं । अंगुलमिह पेच्छंतो आवलियंतो मुणइ कालं ॥ ६१३ ॥
आवलियं मुणमाणो संपुण्णं खेत्तमंगुलपुहुत्तं[3] । एवं खेत्ते कालं काले खेत्तं च जोएज्जा[4] ॥ ६१४ ॥

गतार्था एव, नवरं 'अणागयं च' इत्यनागतम् । नन्वमूर्तौ क्षेत्र-कालौ कथमवधिः पश्यति, मूर्तालम्बनत्वात् तस्य ?, इत्याह– 'तत्थेव येत्यादि' इदमत्र हृदयम्– अङ्गुलासंख्येयभागादिकं क्षेत्रं पश्यतीति कोऽर्थः ?, तत्रैवैतावति क्षेत्रे यानि प्रस्तुतावधिदर्शनयोग्यानि पुद्गलद्रव्याणि तान्येवासौ पश्यति । आवलिकासंख्येयभागादिकं कालं पश्यतीत्यत्रापि कोऽर्थः ?, तेषामेव पुद्गलद्रव्याणां ये प्रस्तुतावधेर्दर्शनयोग्याः पर्यायास्तान् भूतेऽनागते चैतावति कालेऽसौ वीक्षत इति । एवं सर्वत्र क्षेत्रे काले चावधेर्विषयत्वेनोक्ते यथासंख्यं क्षेत्रगतानि योग्यरूपिद्रव्याणि, कालगतांस्तद्योग्यांस्तत्पर्यायानायोजयेत् । क्षेत्र-कालौ तु 'मञ्चाः क्रोशन्ति' इत्यादिन्यायेनोपचारत एवोच्येते इति भावः ॥ इति भाष्यगाथाचतुष्टयार्थः ॥ ६११ ॥ ६१२ ॥ ६१३ ॥ ६१४ ॥

[5]संखिज्जम्मि उ काले दीव-समुद्दा वि होंति संखिज्जा । कालम्मि असंखिज्जे दीव-समुद्दा य भइअव्वा[6] ॥६१५॥

संख्यायत इति संख्येयः, स च संवत्सर-मासादिरूपोऽपि भवति । अतस्तुशब्दो विशेषणार्थः कृतः । किं विशिनष्टि ?, संख्येयोऽत्र वर्षसहस्रात् परतो गृह्यते । अत एव पूर्वगाथायां 'वाससहस्सं च रुयगम्मि' इति पाठान्तरम् । तस्मिन् वर्षसहस्रात् परतो वर्तिनि संख्येये कालेऽवधिविषये प्राप्ते सति क्षेत्रतस्तस्यैवावधेर्विषयतया द्वीप-समुद्रास्तेऽपि भवन्ति संख्येयाः, अपिशब्दाद् महानेकोऽपि

---

१ क्षेत्रमसंख्येयाङ्गुलभागं पश्यन्नेव कालेन । आवलिकाया भागं भूतमनागतं च जानाति ॥ ६११ ॥
तत्रैव च यानि द्रव्याणि तेषामेव ये भवन्ति पर्यायाः । इति क्षेत्रे काले च योजयेद् द्रव्य-पर्यायान् ॥ ६१२ ॥
संख्येयाङ्गुलभागे आवलिकाया अपि जानाति तावद्गाम् । अङ्गुलमिह प्रेक्षमाण आवलिकान्तर्जानाति कालम् ॥ ६१३ ॥
आवलिकां जानन् संपूर्णं क्षेत्रमङ्गुलपृथक्त्वम् । एवं क्षेत्रे कालं काले क्षेत्रं च योजयेत् ॥६१४॥ २ घ.छ.'णायं' । ३ घ.छ. 'पुहत्तं' । ४ घ.छ.'जोइज्जा'
५ संख्येये तु काले द्वीप-समुद्रा अपि भवन्ति संख्येयाः । कालेऽसंख्येये द्वीप-समुद्राश्च भक्तव्याः ॥ ६१५ ॥ ६ ह. 'भयणिज्जा' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदेकदेशोऽपीति । तथा, कालेऽसंख्येये पल्योपमादिलक्षणेऽवधिविषये सति तस्यैवासंख्येयकालपरिच्छेदकस्यावधेः क्षेत्रतः परिच्छेदतया द्वीप-समुद्राश्च भक्तव्या विकल्पयितव्याः– कदाचिदसंख्येयाः– यदिह कस्यचिद् मनुष्यस्यासंख्येयद्वीप-समुद्रविषयोऽवधिरुत्पद्यते, कदाचिद् महान्तः संख्येयाः, कदाचित्त्वतिमहानेकः, कदाचित्तु तदेकदेशोऽपि स्वयंभूरमणतिरश्चोऽवधिर्वेदितव्यः, स्वयंभूरमणविषयमनुष्यबाह्यावधिर्वा; योजनापेक्षया तु सर्वपक्षेष्वसंख्येयमेव क्षेत्रं द्रव्यम् ॥ इति निर्युक्तिगाथार्थः ॥ ६१५ ॥

अथ भाष्यम्—

[1]कालेऽसंखए दीव-सागरा खुड्डया असंखेज्जा । भयणिज्जा य महल्ला खेत्तं पुण तं असंखेज्जं ॥ ६१६ ॥

गतार्थैव । एवं तावत् परिस्थिरन्यायमङ्गीकृत्य क्षेत्रवृद्धौ कालवृद्धिरनियता, कालवृद्धौ तु क्षेत्रवृद्धिर्भवत्येवेति प्रतिपादितम् ॥६१६॥

साम्प्रतं द्रव्य-क्षेत्र-काल-भावापेक्षया यद्वृद्धौ यस्य वृद्धिर्भवति, यस्य वा न भवति, अमुमर्थं प्रतिपादयन्नाह–

[2]कालेऽ चउण्ह वुड्ढी कालो भइयव्वो खेत्तवुड्ढीए । वुड्ढीए दव्व-पज्जव भइयव्वा खित्त-कालाओ ॥६१७॥

कालेऽवधिगोचरे वर्धमाने सतीति गम्यते, 'चउण्ह वुड्ढि त्ति' नियमात् क्षेत्रादीनां चतुर्णामपि वृद्धिर्भवति । कालात् सूक्ष्म-सूक्ष्मतर-सूक्ष्मतमत्वात् क्षेत्र-द्रव्य-पर्यायाणां, तथाहि– कालस्य समयेऽपि वर्धमाने क्षेत्रस्य प्रभूतप्रदेशा वर्धन्ते, तद्वृद्धौ चावश्यंभाविनी द्रव्यवृद्धिः, प्रत्याकाशप्रदेशं द्रव्यप्राचुर्यात्; द्रव्यवृद्धौ च पर्यायवृद्धिर्भवत्येव, प्रतिद्रव्यं पर्यायबाहुल्यादिति । यद्येवम्, 'काले वर्धमाने शेषस्य क्षेत्रादित्रयस्य वृद्धिर्भवति' इत्येवमेव वक्तुमुचितम्, कथं 'चतुर्णाम्' इत्युक्तम् ? । सत्यम्, किन्तु सामान्यवचनमेतत्, तथाहि– यथा देवदत्ते भुञ्जाने सर्वमपि कुटुम्बं भुङ्क्त इत्यादि । अन्यथा ह्यत्रापि 'देवदत्तोच्छेषमपि कुटुम्बं भुङ्क्ते' इति वक्तव्यं स्यात्, इत्यदोषः । 'कालो भइयव्वो खेत्तवुड्ढीए त्ति' क्षेत्रस्यावधिगोचरस्य वृद्धावाधिक्ये सति कालो भक्तव्यो विकल्पनीयो– वर्धते वा नवा, प्रभूते क्षेत्रे वृद्धिं गते वर्धते कालः, न स्वल्पे इति भावः; अन्यथा हि यदि क्षेत्रस्य प्रदेशादिवृद्धौ कालस्य नियमेन समयादिवृद्धिः स्यात्, तदाऽङ्गुलमात्रादिकेऽपि वर्धिते क्षेत्रे कालस्याऽसंख्येया उत्सर्पण्यवसर्पिण्यो वर्धेरन्, तथाच वक्ष्यति– 'अंगुलसेढीमित्ते ओसप्पिणीओ असंखेज्जा' इति । ततश्च 'आवलिया अंगुलपुहुत्तं' इत्यादि सर्वं विरुध्येत । तस्मात् क्षेत्रवृद्धौ कालवृद्धिर्भजनीयैव,

---

१ कालेऽसंख्ये द्वीप-सागराः क्षुद्रका असंख्येयाः । भजनीयाश्च महान्तः क्षेत्रं पुनरतदसंख्येयम् ॥ ६१६ ॥ + पुहुत्तं-।

२ काले चतुर्णां वृद्धिः कालो भक्तव्यः क्षेत्रवृद्धौ । वृद्धौ द्रव्य-पर्याययोर्भक्तव्यौ क्षेत्र-कालौ ॥ ६१७ ॥ ३ गाथा ६२१ । ४ गाथा ६०८ ।

द्रव्य-पर्यायास्तु तद्वृद्धौ नियमाद् वर्धन्त एवेति स्वयमेव द्रष्टव्यमिति । 'वुड्ढीए दव्व-पज्जवेत्यादि' द्रव्यपर्याययोर्वृद्धौ सत्यां क्षेत्र-कालौ भक्तव्यौ विकल्पनीयौ वर्धेते वा नवा; तथाहि– अवस्थितयोरपि क्षेत्र-कालयोस्तथाविधशुभाध्यवसायतः क्षयोपशमवृद्धौ द्रव्यं वर्धत एव; तद्वृद्धौ च पर्यायवृद्धिरवश्यंभाविन्येव, प्रतिद्रव्यं पर्यायानन्त्यात्, जघन्यतोऽपि चैकैकद्रव्यादप्यवधेः पर्यायचतुष्टयलाभादिति, पर्यायवृद्धौ च द्रव्यवृद्धिर्भाज्या– भवति वा नवेति स्वयमेव द्रष्टव्यम् । अवस्थितेऽपि हि द्रव्ये तथाविधक्षयोपशमवृद्धौ पर्याया वर्धन्त एव ॥ इति निर्युक्तिगाथार्थः ॥ ६१७ ॥

अथ भाष्यम्—

[1]काले पवड्ढमाणे सव्वे दव्वादओ पवड्ढंति । खेत्ते कालो भइओ वड्ढंति उ दव्व-पज्जाया ॥ ६१८ ॥

भयणाए खेत्त-काला परिवड्ढंतेसु दव्व-भावेसु । दव्वे वड्ढइ भावो भावे दव्वं तु भयणिज्जं ॥ ६१९ ॥

द्वे अपि व्याख्यातार्थे ॥ ६१८ ॥ ६१९ ॥

अथोत्तरगाथासंबन्धनार्थं विनेयमुखेन प्रश्नं कारयति–

[3]अण्णोण्णनिबद्धाणं जहण्णयाईण खित्त-कालाणं । समय-प्पएसमाणं किं तुल्लं होज्ज हीणहियं ?॥ ६२० ॥

अन्योन्यनिबद्धयोर्जघन्यादिरूपयोः क्षेत्र-कालयोः समय-प्रदेशमानं किं तुल्यं भवेत्, हीनम्, अधिकं वेति । इदमुक्तं भवति– '[3]अंगुलमावलियाणं भागमसंखिज्ज' इत्यादिना ग्रन्थेन परस्परसंबद्धत्वेनाऽवधिविषयतया प्रोक्तयोर्जघन्ययोः, मध्यमयोः, उत्कृष्टयोश्च क्षेत्र-कालयोः संबन्धिनां प्रदेशानां समयानां च संख्यामाश्रित्य यद् मानं तत् परस्परं किं तुल्यं, हीनम्, अधिकं वा भवेत् ?, इति प्रश्नः ॥ ६२० ॥

अत्रोच्यते– सर्वत्र प्रतियोगिनः खल्वावलिकासंख्येयभागादेः कालादसंख्येयगुणमेव क्षेत्रम्; यतः प्राह–

---

१ काले प्रवर्धमाने सर्वे द्रव्यादयः प्रवर्धन्ते । क्षेत्रे कालो भाज्यो वर्धेते तु द्रव्य-पर्यायौ ॥ ६१८ ॥
भजनया क्षेत्र-कालौ परिवर्धमानयोर्द्रव्य-भावयोः । द्रव्ये वर्धते भावो भावे द्रव्यं तु भजनीयम् ॥ ६१९ ॥

२ अन्योन्यनिबद्धयोर्जघन्याद्योः क्षेत्र-कालयोः । समय-प्रदेशमानं किं तुल्यं भवेद् हीनमधिकम् ? ॥ ६२० ॥ ३ गाथा ६०८ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

सुहुमो य होइ कालो तत्तो सुहुमयरं हवइ खेत्तं । अंगुलसेढीमित्ते ओसप्पिणीओ असंखेज्जा ॥ ६२१ ॥

सूक्ष्मस्तावत्कालो भवति, यस्मादुत्पलपत्रशतभेदे प्रतिपत्रभेदमसंख्येयाः समया लगन्तीत्यागमे प्रतिपाद्यते । न चातिसूक्ष्मत्वेन ते पृथग् विभाव्यन्ते; तथापि ततः कालात् सूक्ष्मतरं भवति क्षेत्रं, यस्मादङ्गुलश्रेणिमात्रे क्षेत्रे प्रतिप्रदेशं समयगणनया प्रदेशपरिमाणमवसर्पिण्योऽसंख्येयास्तीर्थकृद्भिरुक्ताः । इदमुक्तं भवति– अङ्गुलश्रेणिमात्रे क्षेत्रे यः प्रदेशराशिः स प्रतिसमयं प्रदेशापहारेणापह्रियमाणोऽसंख्येयावसर्पिणीभिरपह्रियते ॥ इति निर्युक्तिगाथार्थः ॥ ६२१ ॥

अथ भाष्यम्–

[1]खेत्तं बहुयरमंगुलसेढीमित्ते पएसपरिमाणं । जमसंखेज्जोसप्पिणिसमयसमं थोवओ कालो ॥ ६२२ ॥

गतार्थैव ॥ ६२२ ॥

आह– ननु 'कालात् क्षेत्रं सूक्ष्मं' इत्यवगतम्, क्षेत्रात् तु द्रव्य-भावौ कथंभूतौ ?, इति कथ्यताम्, इत्याशङ्क्य कालात् क्षेत्र-द्रव्य-भावानां यथोत्तरं सूक्ष्मत्वोपदर्शनार्थमाह—

[2]कालो खित्तं दव्वं भावो य जहुत्तरं सुहुमभेया । थोवा-संखा-णंता-संखा य जमोहिविसयम्मि ॥ ६२३ ॥

कालादयो यथोत्तरं सूक्ष्मभेदाः समनुमीयन्ते । कुतः?, यतः सर्वत्रावधिविषये स्वमतियोगिक्षेत्राद्यपेक्षया स्तोकः कालो भणितः, ततः क्षेत्रमसंख्येयगुणं, ततोऽपि द्रव्यमनन्तगुणम्, पर्यायास्तु "देव्वाउ असंखेज्जे संखेज्जे यावि पज्जवे लहइ" इतिवचनाद् द्रव्यादसंख्येयगुणाः, संख्येयगुणा वेति ॥ ६२३ ॥

एतदेव व्यक्तीकृत्य भावयति—

---

१ सूक्ष्मश्च भवति कालस्ततः सूक्ष्मतरं भवति क्षेत्रम् । अङ्गुलश्रेणिमात्रेऽवसर्पिण्योऽसंख्येयाः ॥ ६२१ ॥ २ क.ख.ग, 'था प्रतिप्र' ।

३ क्षेत्रं बहुतरमङ्गुलश्रेणीमात्रे प्रदेशपरिमाणम् । यदसंख्येयावसर्पिणीसमयसमं स्तोककः कालः ॥ ६२२ ॥

४ कालः क्षेत्रं द्रव्यं भावश्च यथोत्तरं सूक्ष्मभेदाः । स्तोका-ऽसंख्या-ऽनन्ता-ऽसंख्याश्च यदवधिविषये ॥ ६२३ ॥

५ द्रव्यादसंख्येयान्, संख्येयांश्चापि पर्यवान् लभते । ६ क.ख.ग. 'उ संखेज्जे असं' ।

[1]सव्वमसंखेज्जगुणं कालाओ खेत्तमोहिविसयम्मि । अवरोप्परसंबद्धं समय-प्पएसप्पमाणेणं ॥ ६२४ ॥

खेत्तपएसेहिंतो दव्वमणंतगुणियं पएसेहिं । दव्वेहिंतो भावो संखगुणो असंखगुणिओ वा ॥ ६२५ ॥

गाथाद्वयमपि गतार्थम्, नवरं यस्मात् सर्वमप्यङ्गुलासंख्येयभागादिकं क्षेत्रं स्वप्रदेशैरावलिकाऽसंख्येयभागादेः कालादेतत्समयानाश्रित्याऽसंख्येयगुणमवधिविषये भोक्तुम्; क्षेत्रप्रदेशेभ्यस्तद् द्रव्यं प्रदेशैरनन्तगुणमित्यादि, तस्मात् कालादयः स्तोकादितयाऽनुमेया इति ॥ ६२४ ॥ ६२५ ॥

अथ पूर्वोक्तस्य निगमनार्थम्, उत्तरस्य च प्रस्तावनार्थमाह—

[2]भणियं खेत्तपमाणं तम्माणमियं भणामि दव्वमओ । तं केरिसमारंभे परिणिट्ठाणे विमज्झे वा ॥ ६२६ ॥

भणितं जघन्यादिभेदं त्रिविधमपि क्षेत्रप्रमाणम् । साम्प्रतं तस्य जघन्यादिभेदस्य क्षेत्रस्य यदङ्गुलासंख्येयभागादिकं मानं तेन मितं परिच्छिन्नं द्रव्यमत ऊर्ध्वं भणामि, द्रव्यावस्थानापेक्षमेव क्षेत्रस्य भणनात्, अन्यथा हि मूर्तविषयेऽवधौ प्रक्रान्ते किममूर्तक्षेत्रभणनेन ? इति भावः । तच्च द्रव्यमारम्भे प्रस्तावने कीदृशमवधेर्विषयो भवति परिनिष्ठानेऽवसाने, विमध्ये वा कीदृशम् ? इत्येवं भणामि ॥ इति गाथापञ्चकार्थः ॥ ६२६ ॥

स्वप्रतिज्ञातमेवाह—

[3]तेया-भासादव्वाण अंतरा एत्थ लभइ पढवओ । गुरुलहु अगुरुयलहुयं तं पि य तेणेव निट्ठाइ॥६२७॥

तैजसं च भाषा च तैजस-भाषे तयोर्द्रव्याणि तेषां तैजस-भाषाद्रव्याणामन्तरादपान्तराले 'एत्थ त्ति' अत्रान्यदेव तदयोग्यं द्रव्यं लभते पश्यति प्रस्थापकोऽवधिज्ञानप्रारम्भकः, अवधिप्रतिपत्तेति यावत् । किंविशिष्टं तत् ?, इत्याह– गुरुलघु, अगुरुलघु चेति– गुरुलघुपर्यायोपेतं गुरुलघु, अगुरुलघुपर्यायोपेतं त्वगुरुलघ्विति । तत्र तैजसद्रव्यासन्नं गुरुलघु, भाषाद्रव्यासन्नं त्वगुरुलघ्विति । तदपि

---

१ सर्वमसंख्येयगुणं कालात् क्षेत्रमवधिविषये । परस्परसंबद्धं समय-प्रदेशप्रमाणेन ॥ ६२४ ॥ + भेयस्तु-।
क्षेत्रप्रदेशेभ्यो द्रव्यमनन्तगुणितं प्रदेशैः । द्रव्येभ्यो भावः संख्यगुणोऽसंख्यगुणितो वा ॥ ६२५ ॥

२ भणितं क्षेत्रप्रमाणं तन्मानमितं भणामि द्रव्यमतः । तत् कीदृशमारम्भे परिनिष्ठाने विमध्ये वा ॥ ६२६ ॥

३ तैजस-भाषाद्रव्याणामन्तराऽत्र लभते प्रस्थापकः । गुरुलघ्वगुरुकलघुकं तदपि च तेनैव निष्ठिप्रति ॥ ६२७ ॥ ४ ध.ल. 'पेतमगु' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चावधिज्ञानं तदावरणोदयात् प्रतिपतत् तेनैवोक्तस्वरूपद्रव्येणोपलब्धेन सता निष्ठां याति प्रतिपततीत्यर्थः। अपिशब्देन चैतज्ज्ञापयति-प्रतिपातिन्यवधिज्ञानेऽयं न्यायः, न चैतदवश्यं प्रतिपतत्येव ॥ इति निर्युक्तिगाथार्थः ॥ ६२७ ॥

अथ भाष्यम्–

[1]पट्ठवओ नामावहिनाणस्सारंभओ तयाईए । उभयाजोग्गं पेच्छइ तेयाभासंतरे दव्वं ॥ ६२८ ॥
गुरुलहु तेयासन्नं भासासन्नमगुरुं च पासेज्जा । आरंभे जं दिट्ठं दट्ठूणं पडइ तं चेव ॥ ६२९ ॥

गाथाद्वयमपि गतार्थम्, नवरं 'नाम' इति शिष्यामन्त्रणे, तैजसद्रव्यासन्नं गुरुलघु, भाषाद्रव्यासन्नं त्वगुरुलघु पश्येदिति॥६२८॥६२९

तैजस-भाषाद्रव्याणामन्तरे तदयोग्यं द्रव्यं पश्यतीत्युक्तम्, अतो विनेयः पृच्छति–

[2]तेया-भासाजोग्गं किमजोग्गं वा तयंतराले जं । ओरालियाइतणुवग्गणाकमेणं तयं सज्झं ॥ ६३० ॥

यत् तैजसशरीर-भाषयोर्योग्यमुचितं द्रव्यं, अयोग्यं वा तदन्तराले यदुक्तं तत् किं– कतमस्वरूपं, कियत्प्रदेशं वा ? इति कथ्यताम्। अत्रोच्यते– हन्त ! परमाणु-द्व्यणुक-त्र्यणुकादिस्कन्धोपचयादौदारिकादिशरीरवर्गणाप्ररूपणक्रमेणैव तत् साध्यं प्ररूपयितुं शक्यं, नान्यथेत्यर्थः ॥ ६३० ॥

अत उच्यते–

[3]ओराल-विउव्वा-हार-तेय-भासा-णपाण-मण-कम्मे । अह दव्ववग्गणाणं कमो विवज्जासओ खेत्ते ॥६३१॥

एतां निर्युक्तिगाथां भाष्यकारः 'कुविकर्णगोप-' इत्युदाहरणपूर्वकं विस्तरतः स्वयमेव व्याख्यास्यतीति ॥ ६३१ ॥

तथा च भाष्यम्–

---

१ घ. छ. 'क्षद्रव्यस्वरूपेणो'। २ प्रस्थापको नानावधिज्ञानस्यारम्भकस्तदादौ । उभयायोग्यं प्रेक्षते तैजस-भाषान्तरे द्रव्यम् ॥ ६२८ ॥
गुरुलघु तैजसासन्नं भाषासन्नमगुरु च पश्येत् । आरम्भे यद् दिष्टं दृष्ट्वा पतति तदेव ॥ ६२९ ॥
३ तैजस-भाषायोग्यं किमयोग्यं वा तदन्तराले यत् । औदारिकादितनुवर्गणाक्रमेण तत् साध्यम् ॥ ६३० ॥
४ औदारिक-वैक्रिया-ऽऽहार-तैजस-भाषा-ऽऽनपान-मनः-कर्मसु । अथ द्रव्यवर्गणानां क्रमो विपर्यासतः क्षेत्रे ॥ ६३१ ॥

[4]कुइयण्णगोविसेसोवलक्खणोवम्मओ विणेयाणं । दव्वाइवग्गणाहिं पोग्गलकायं [5]पयंसेंति ॥ ६३२ ॥

आह– किमर्थं पुनरेता वर्गणाः प्ररूप्यन्ते ?। उच्यते– कुविकर्णस्य गोमण्डलाधिपतेर्गोवस्तासां परस्परं विशेषस्य यदुपलक्षणं परिज्ञानं तदौपम्यात् तद्दृष्टान्ताद् विनेयानामसंमोहार्थं द्रव्यादिवर्गणाभिः, आदिशब्दात् क्षेत्रवर्गणाभिः, कालवर्गणाभिः, भाववर्गणाभिश्च समस्तमपि पुद्गलास्तिकायं विभज्य तीर्थंकर-गणधराः प्रदर्शयन्ति ॥ इति गाथाक्षरार्थः ॥

अथ भावार्थ उच्यते– इह भरतक्षेत्रे मगधजनपदे प्रभूतगोमण्डलस्वामी कुविकर्णो नाम गृहपतिरासीत्। स च तासां गवामतिबहुत्वात् सहस्रादिसंख्यापरिमितानां पृथक् पृथगनुपालनार्थं प्रभूतान् गोपालांश्चक्रे। ते च तासु परस्परं मीलितासु गोष्वात्मीया आत्मीयाः सम्यगजानन्तः सन्तो नित्यं कलहमकार्षुः। तांश्च तथाऽन्योन्यं विवदमानानुपलभ्याऽसौ तेषामव्यामोहार्थं कलहव्यवच्छित्तये शुक्ल-कृष्ण-रक्त-कर्बुरादिभेदभिन्नानां गवां प्रतिगोपालं सजातीयगोसमुदायरूपा भिन्ना वर्गणा व्यवस्थापितवानिति। एष दृष्टान्तः। अथोपनय उच्यते– इह गोमण्डलप्रभुकल्पस्तीर्थंकरो गोपतुल्येभ्यः स्वशिष्येभ्यो गोसमूहमानं पुद्गलास्तिकायं तदसंमोहार्थं परमाण्वादिवर्गणादिविभागेन निरूपितवानिति ॥ ६३२ ॥

एता एव वर्गणाः '[3]ओराल-विउव्व-' इत्यादिगाथां व्याचिख्यासुर्निरूपयितुमाह–

[6]एगा परमाणूणं एगुत्तरवड्ढिया तओ कमसो । संखेज्जपएसाणं संखेज्जा वग्गणा होंति ॥ ६३३ ॥
तत्तो संखाईआ-संखाइयप्पएसमाणाणं । तत्तो पुणो अणंताणंतपएसाण गंतूणं ॥ ६३४ ॥
ओरालियस्स गहणप्पाओग्गा वग्गणा अणंताओ । अग्गहणप्पाओग्गा तस्सेव तओ अणंताओ ॥६३५॥

इह सजातीयवस्तुसमुदायो वर्गणा, समूहो, वर्गः, राशिः, इति पर्यायाः। ततश्च समस्तलोकाकाशप्रदेशवर्तिनामेकैकपरमाणूनां समुदाय एका वर्गणा। ततः समस्तलोकवर्तिनां द्विप्रदेशिकस्कन्धानां द्वितीया वर्गणा। ततः समस्तानामपि त्रिप्रदेशिकस्कन्धानां तृतीया,

---

१ कुविकर्णगोविशेषोपलक्षणौपम्यतो विनेयानाम्। द्रव्यादिवर्गणाभिः पुद्गलकायं प्रदर्शयन्ति ॥ ६३२ ॥ २ घ. छ. 'पयासंति' ज्ञ. 'पर्यसंति'।
३ गाथा ६३१। ४ एका परमाणूनामेकोत्तरवर्धितास्ततः क्रमशः। संख्येयप्रदेशानां संख्येया वर्गणा भवन्ति ॥ ६३३ ॥ + मेकाकि–।
संख्यातीता संख्यातीतप्र०। ततः संख्येया-ऽसंख्येयप्रदेशमानानाम्। ततः पुनरनन्तानन्तप्रदेशानां गत्वा ॥ ६३४ ॥ अनन्ता अनन्त-।
औदारिकस्य ग्रहणप्रायोग्या वर्गणा अनन्ताः। अग्रहणप्रायोग्यास्तस्यैव ततोऽनन्ताः ॥ ६३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चतुष्प्रदेशिकस्कन्धानां चतुर्थी, पञ्चप्रदेशिकस्कन्धानां पञ्चमी, षट्प्रदेशिकस्कन्धानां षष्ठी; एवमेकैकोत्तरवृद्ध्याऽनन्ता वर्गणा औदारिकशरीरस्याऽग्रहणयोग्या विलङ्घ्याऽन्तरे तथाविधविशिष्टपरिणामपरिणतानन्तप्रदेशिकस्कन्धानामेकोत्तरवृद्ध्यौदारिकशरीरग्रहणप्रायोग्या अनन्ता वर्गणा भवन्ति– औदारिकशरीरनिर्वर्तनयोग्या इत्यर्थः। ततः प्रदेशवृद्ध्या वर्धमाना औदारिकस्यैवाऽग्रहणयोग्या अनन्ता वर्गणा भवन्ति। एताश्च प्रभूतद्रव्यनिष्पन्नत्वात् सूक्ष्मपरिणामोपेतत्वाच्चौदारिकस्याऽग्रहणयोग्या मन्तव्याः। इह च स्वल्पपरमाणुनिष्पन्नत्वाद् बादरपरिणामयुक्तत्वाच्च वैक्रियस्याऽप्यग्रहणयोग्या एवैताः, केवलमौदारिकवर्गणानामासन्नत्वेन तदाभासत्वात् तदग्रहणयोग्या उच्यन्त इति[1]॥ ६३३ ॥ ६३४ ॥ ६३५ ॥

अथ कार्मणपर्यन्तानां शेषवर्गणानामतिदेशमाह–

[1]एवमजोग्गा जोग्गा पुणो अजोग्गा य वग्गणाणंता। वेउव्वियाइयाणं नेयं तिविगप्पमिक्केक्कं ॥ ६३६ ॥

एवमुक्तानुसारेणाऽयोग्याः, ततो योग्याः, पुनरयोग्याः प्रत्येकमनन्ता वर्गणा इति। एवं वैक्रिया-ऽऽहारक-तैजस-भाषा-ऽऽनपान-मनः-कर्मणामेकैकं त्रिविकल्पं त्रिभेदं ज्ञेयम्। इति गाथाऽक्षरार्थः।

भावार्थस्तूच्यते– पुनरौदारिकाग्रहणप्रायोग्यवर्गणानामनुपर्येकोत्तरवृद्ध्या वर्धमानाः स्वल्पद्रव्यनिष्पन्नत्वाद् बादरपरिणामयुक्तत्वाच्च वैक्रियशरीरस्याऽग्रहणयोग्या अनन्ता वर्गणा भवन्ति। एताश्च प्रचुरद्रव्यनिर्वृत्तत्वात् सूक्ष्मपरिणामत्वाच्चौदारिकस्याऽप्यग्रहणप्रायोग्या एव, केवलं वैक्रियवर्गणासन्नत्वेन तदाभासत्वात् तदग्रहणयोग्यवर्गणाः प्रोच्यन्त इति। एवमुत्तरत्रापि सर्वत्र भावनीयम्। ततश्चैकोत्तरवृद्ध्या वर्धमानाः प्रचुरद्रव्यनिर्वृत्तत्वात्तथाविधसूक्ष्मपरिणामत्वाच्च वैक्रियशरीरस्य ग्रहणयोग्या अनन्ता वर्गणा भवन्ति। ततश्चैकोत्तरवृद्ध्या वर्धमानाः प्रचुरद्रव्यत्वात् सूक्ष्मतरपरिणामत्वाच्च वैक्रियस्याऽग्रहणयोग्या अनन्ता वर्गणा भवन्ति[2]। ततो वैक्रियाग्रहणयोग्यवर्गणानामनन्तरमेकोत्तरवृद्ध्या वर्धमानाः स्वल्पद्रव्यनिष्पन्नत्वाद् बादरपरिणामत्वाच्चाऽऽहारकशरीरस्याग्रहणयोग्या अनन्ता वर्गणा भवन्ति। ततश्चैकोत्तरवृद्ध्या वर्धमानाः प्रचुरद्रव्यनिष्पन्नत्वात् तथाविधसूक्ष्मतरपरिणामत्वाच्चाऽऽहारकशरीरस्य ग्रहणयोग्या अनन्ता वर्गणा भवन्ति। ततोऽप्येकोत्तरवृद्ध्या वर्धमाना बहुतमद्रव्यनिर्वृत्तत्वादतिसूक्ष्मपरिणामत्वाच्चाऽऽहारकशरीरस्याऽग्रहणयोग्या अनन्ता वर्गणा भवन्ति[3]। एवं तैजसस्य[4], भाषायाः[5], आना-ऽपानयोः[6], मनसः[7], कर्मणश्च[8] यथोत्तरमेकोत्तरप्रदेशवृद्ध्युपेतानां प्रत्येकमनन्तानामयोग्यानां योग्यानां पुनरयोग्यानां वर्गणानां पृथक् पृथक् त्रयमायोजनीयमिति ॥ ६३६ ॥

---

१ एवमयोग्या योग्याः पुनरयोग्याश्च वर्गणा अनन्ताः। वैक्रियादिकानां ज्ञेयं त्रिविकल्पमेकैकम् ॥ ६३६ ॥

४२

आह– कथं पुनरेकैकस्यौदारिकादेः पृथक् त्रयं त्रयमिदं लभ्यते ?, इत्याह–

[1]एक्केक्करसाईए पज्जंतम्मि य हवंति-जोग्गाइं। उभयाजोग्गाइं जओ तेया-भासंतरे पढइ ॥ ६३७ ॥

एकैकस्यौदारिक-वैक्रियादेरादौ पर्यन्ते चाऽयोग्यानि द्रव्याणि भवन्तीति लभ्यत एव। कुतः ?। उच्यते–[2]'तेया-भासादव्वाण अंतरा' इत्यादिवचनाद् यतस्तैजस-भाषयोरन्तरे उभयायोग्यानि द्रव्याणि पठति। इदमुक्तं भवति– यतस्तैजसस्यान्तेऽयोग्यद्रव्याणि पठति, अतः सर्वस्याऽप्यौदारिकादेरन्ते तानि लभ्यन्ते; यतश्च भाषाया आदौ तदयोग्यान्यधीते, अतः सर्वस्याऽप्यौदारिकादेरादौ तानि गम्यन्ते; उभयान्तरालवर्तिनां च सर्वेषामुभयायोग्यत्वे तुल्येऽपि यथासन्नं तत्तदाभासत्वेन तत्तदयोग्यव्यपदेश इत्युक्तमेव ॥ इति गाथाषट्कार्थः ॥६३७॥

अथ कर्माग्रहणवर्गणानामनुपर्यन्या वर्गणाः सन्ति, नवा ?, इत्याह–

[3]कम्मोवरिं धुवेयर-सुण्णेयरवग्गणा अणंताओ। चउधुवणंतरतणुवग्गणा य मीसो तहाऽचित्तो ॥ ६३८ ॥

इयं निर्युक्तिगाथा, एतां च भाष्यकारः स्वयमेव विस्तरतो व्याख्यास्यतीति ॥ ६३८ ॥

तथा च भाष्यम्–

[4]निच्चं होंति धुवाओ इयरा लोए न होंति वि कयाई। एकोत्तरवुड्ढीए कयाइ सुण्णंतराओ वि ॥ ६३९ ॥

जाओ हवंति ताओ सुण्णंतरवग्गण त्ति भण्णंति। नियमं निरंतराओ होंति असुण्णंतरा उ त्ति ॥ ६४० ॥

कर्मणोऽग्रहणप्रायोग्यवर्गणानामनुपर्यधिकैकपरमाणूपचितातिसूक्ष्मपरिणामानन्तस्कन्धात्मिकाः प्रथमा ध्रुववर्गणा भवन्ति। ततश्चैकोत्तरवृद्ध्या वर्धमानैः प्रत्येकमनन्तैः स्कन्धैर्निष्पन्ना एता अपि ध्रुववर्गणा अनन्ता भवन्ति। ध्रुवा नित्या लोकव्यापितया सर्वकालावस्थायिन्य इति भावः; अन्तदीपकं चेदम्। ततश्चैतासां ध्रुवत्वभणनेन प्रागुक्ता अपि कर्मवर्गणान्ताः सर्वा एव वर्गणा ध्रुवा इत्यवगन्तव्यम्, तासामपि सर्वत्र लोके सदैवाऽव्यवच्छेदात्। अन्यच्च, एताश्च ध्रुववर्गणा वक्ष्यमाणाश्चाऽध्रुवाद्या सर्वा अप्यग्रहणवर्गणाः, अति

---

१ एकैकस्यादौ पर्यन्ते च भवन्ति योग्यानि। उभयायोग्यानि यतस्तैजस-भाषान्तरे पठति ॥ ६३७ ॥ २ गाथा ६२७।

३ कर्मोपरि ध्रुवेतर-शून्येतरवर्गणा अनन्ताः। चतुर्ध्रुवानन्तरतनुवर्गणा च मिश्रस्तथाऽचित्तः ॥ ६३८ ॥

४ नित्यं भवन्ति ध्रुवा इतरा लोके न भवन्त्यपि कदाचित्। एकोत्तरवृद्ध्या कदाचिच्छून्यान्तरा अपि ॥ ६३९ ॥
यां भवन्ति ता: शून्येतरवर्गणा इति भण्यन्ते। नियतं निरन्तरास्तु भवन्त्यशून्यान्तरास्त्विति ॥ ६४० ॥ ५ ध.छ. 'ता ध्रु'।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बहुद्रव्योपचितत्वेन, अतिसूक्ष्मपरिणामत्वेन च सर्वजीवैरौदारिकादिभावेन कदाचिदप्यग्रहणादिति । इतश्चोर्ध्वमित्थमेवैकोत्तरवृद्धिक्रमेण वर्धमाना ध्रुववर्गणाभ्य इतरा अध्रुववर्गणा अनन्ता भवन्ति । एताश्च तथाविधपुद्गलपरिणामवैचित्र्यात् कदाचिल्लोके न भवन्त्यपि । अत एवाध्रुवा एता उच्यन्ते । ततश्च शून्याः, इतराश्चाऽशून्या वर्गणा भवन्ति । इह च सूचकत्वात् सूत्रस्याह– 'एकोत्तरेत्यादि' एकोत्तरवृद्धया कदाचिच्छून्यानि व्यवहितान्यन्तराणि यासां ताः शून्यान्तरा अपि भवन्ति यास्ताः शून्यान्तरवर्गणा भण्यन्ते । एता ह्येकोत्तरवृद्धया निरन्तरमनन्ताः सदैव प्राप्यन्ते, परं कदाचिदेकोत्तरवृद्धिरेतास्वन्तराऽन्तरा व्युच्यति– न नैरन्तर्येण प्राप्यन्त इति भावः । एकोत्तरवृद्धया सर्वदैवाऽशून्यान्यव्यवहितान्यन्तराणि यासां ता अशून्यान्तराः । एता ह्यशून्यान्तरवर्गणा एकोत्तरवृद्धया निरन्तरमेव लोके सदैव प्राप्यन्ते, न पुनरेकोत्तरवृद्धिरेतास्वन्तराले कदापि व्युच्यतीति भावः ॥ ६३९ ॥ ६४० ॥

[1]'चउधुवणंतर-' इत्यादि व्याचिख्यासुराह–

[2]धुवणंतराइं चत्तारि जं धुवाइं अणंतराइं च । भेयपरिणामओ जा सरीरजोग्गत्तणाभिमुहा ॥ ६४१ ॥
खंधदुगदेहजोग्गत्तणेण वा देहवग्गणाउ त्ति । सुहुमो दरगयबायरपरिणामो मीसयक्खंधो ॥ ६४२ ॥

ततोऽशून्यान्तरवर्गणानामुपरि ध्रुवानन्तराणि चत्वारि वर्गणाद्रव्याणि भवन्ति, यद् यस्मात् तानि ध्रुवाणि सर्वकालभावीनि, अनन्तराणि च निरन्तरैकोत्तरवृद्धिभाञ्जीति । इदमुक्तं भवति– आद्या ध्रुवानन्तरवर्गणा अनन्ता भवन्ति, एवमेतावत्यो द्वितीयाः, तृतीयाः, चतुर्थाश्च वाच्याः । ध्रुववर्गणाः प्रागप्युक्ताः, परं ताभ्य एता भिन्ना एव, न पुनस्तास्वन्तर्भवन्ति, अतिसूक्ष्मपरिणामत्वाद् बहुद्रव्योपचितत्वाच्चेति पृथगुक्ताः । आह– ननु भवत्वेवम्, केवलं यद्येता निरन्तरमेकोत्तरवृद्धिभाजः, तर्हि चातुर्विध्ये किं कारणम् ? । सत्यम्, किन्तु चतसृणामपि वर्गणानां मध्येष्वेव नैरन्तर्येणैकोत्तरवृद्धिः प्राप्यते, अन्तरालेषु पुनस्तस्यास्त्रुटिसंभवे सत्येव भिन्नवर्गणारम्भः, अन्यद् वा किञ्चिद्वर्णादिपरिणामवैचित्र्यं तद्भेदारम्भे कारणम्, इति बहुश्रुता विदन्तीति । एवं वक्ष्यमाणतनुवर्गणास्वपि वाच्यमिति । एतासां चतसृणां ध्रुवानन्तरवर्गणानामुपरि प्रत्येकमेकोत्तरवृद्धियुक्तानन्तवर्गणात्मिकाश्चतस्र एव तनुवर्गणा भवन्ति । एताश्च तनूनामौदारिकादिशरीराणां भेदा-ऽभेदपरिणामाभ्यां योग्यत्वाभिमुखा इति तनुवर्गणा देहवर्गणा उच्यन्ते । अथवा, वक्ष्यमाणमिश्रस्क-

---

१ गाथा ६३८ । २ ध्रुवानन्तराणि चत्वारि यद् ध्रुवाण्यनन्तराणि वा । भेदपरिणामतो याः शरीरयोग्यत्वाभिमुखाः ॥ ६४१ ॥
स्कन्धद्विकदेहयोग्यत्वेन वा देहवर्गणा इति । सूक्ष्मो दरगतबादरपरिणामो मिश्रकस्कन्धः ॥ ६४२ ॥

न्धाऽचित्तस्कन्धद्वयस्य तनुर्देहः शरीरं, मूर्तिरिति यावत्, तद्योग्यत्वाभिमुखा वर्गणाः । अथ मिश्रस्कन्धस्वरूपं विवरीषुराह– 'सुहुमो इत्यादि' । 'दरगय त्ति' दरगत ईषत्प्राप्तस्तद्योग्यत्वाभिमुख्येन बादरः परिणामो येनाऽसौ दरगतबादरपरिणामोऽनन्तानन्तपरमाणुमचितः सूक्ष्मपरिणाम एवेषद्बादरपरिणामाभिमुखः स्कन्धो मिश्र इत्यर्थः ॥ ६४१ ॥ ६४२ ॥

अचित्तस्कन्धव्याख्यानार्थमाह–

[1]जइणसमुग्घायगईए चउहिं समयेहिं पूरणं कुणइ । लोगस्स तेहिं चेव य संहरणं तस्स पडिलोमं ॥६४३॥

इह निर्युक्तिगाथायां 'तेहाऽचित्तो' इति न केवलं मिश्रः, तथैकदेशेन समुदायस्य गम्यमानत्वादचित्तमहास्कन्धश्च भवतीति गम्यते । स चाऽस्यां प्रस्तुतगाथायां योज्यते । कथम् ?, इति चेत् । उच्यते– अचित्तमहास्कन्धः स भवति, यः किम् ? इत्याह– जैनसमुद्घातगत्या "दण्डं प्रथमे समये कपाटमथ चोत्तरे" इत्यादिकेवलिसमुद्घातन्यायेन विस्रसापरिणामवशाद् यश्चतुर्भिः समयैर्लोकस्य पूरणं करोति । संहरणमपि प्रतिलोमं पश्चान्मुखं तस्याचित्तमहास्कन्धस्य तैरेव चतुर्भिः समयैर्द्रष्टव्यम् । एवं च सत्यष्टौ समयान कालमानेनाऽसौ भवतीति ॥६४३॥

आह– ननु पुद्गला इह विचारयितुमुपक्रान्ताः, ततश्च पुद्गलमहास्कन्धोऽचेतन एव भवति, किं तस्याऽचित्तत्वविशेषणेन, व्यवच्छेद्याभावात् ?, इत्याशङ्क्याह—

[2]जइणसमुग्घायसचित्तकम्मपोग्गलमयं महाखंधं । पइ तस्समाणुभावो होइ अचित्तो महाखंधो ॥६४४॥

जैनसमुद्घाते यः सचेतनजीवाधिष्ठितत्वात् साचित्तः कर्मपुद्गलमयो महास्कन्धस्तं प्रति तमाश्रित्य तद्व्यवच्छेदायेत्यर्थः । किम् ?, इत्याह– प्रस्तुतः पुद्गलमहास्कन्धोऽचित्तमहास्कन्ध इति व्यपदेश्यो भवति– अचित्तविशेषणेन विशेष्यो भवतीत्यर्थः । कुतः ?, इत्याह– यतस्तत्समानुभावः, उपलक्षणत्वात् तत्समक्षेत्र-काला-ऽनुभावः– तेन केवलिसमुद्घातवर्तिना कर्मपुद्गलमयमहास्कन्धेन समास्तुल्याः क्षेत्र-काला-ऽनुभावा यस्याऽसौ तत्समक्षेत्र-काला-ऽनुभावः । तत्र क्षेत्रं सर्वलोकलक्षणं, कालोऽष्टसमयमानः, अनुभावो वर्ण-गन्धादिगुणः ।

अयमत्र भावार्थः– अनन्तानन्तपरमाणुपुद्गलोपचितस्कन्धे वक्तुं प्रस्तुते यदि 'महास्कन्धः, इत्येतावन्मात्रमेवोच्येत, तदा केवलिसमुद्घातगतोऽनन्तानन्तकर्मपुद्गलमयस्कन्धोऽपि लभ्येत, प्रस्तुतमहास्कन्धस्य केवलिसमुद्घातगतकर्मपुद्गलमयमहास्कन्धस्य च समानक्षेत्र-काला-ऽनुभावत्वात्; तथाहि– चतुर्थे समये द्वावपि लोकक्षेत्रं व्याप्नुतः, अष्टसामयिकं च कालं द्वावपि तिष्ठतः, वर्णपञ्चक-गन्धद्वय-रस-

---

१ जैनसमुद्घातगत्या चतुर्भिः समयैः पूरणं करोति । लोकस्य तैरेव च संहरणं तस्य प्रतिलोमम् ॥ ६४३ ॥ २ गाथा ६३८ ।
२ जैनसमुद्घातसचित्तकर्मपुद्गलमयं महास्कन्धम् । प्रति तत्समानुभावो भवत्यचित्तो महास्कन्धः ॥ ६४४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पञ्चक-स्पर्शचतुष्टयलक्षणगुणयुक्तौ च द्वावपि भवतः। तदेवं 'महास्कन्धः' इत्युक्तेऽनन्तानन्तकर्मपुद्गलमयमहास्कन्धः केवलिसमुद्घातगतोऽपि लभ्येत, तस्यापि प्रस्तुतमहास्कन्धसमानक्षेत्र-काला-ऽनुभावत्वात्। न च तेनेह प्रयोजनम्। अतोऽचित्तविशेषणेन तद्द्रव्यव्यवच्छेदः क्रियते, जीवाधिष्ठितत्वेन किल तस्य सचेतनत्वादिति ॥ ६४४ ॥

अथाऽत्र केषांचिद् मतमुपदर्श्य निराकुर्वन्नाह–

सव्वुक्कोसपएसो एसो केई, न चायमेगंतो। उक्कोसपएसो जमवगाहट्ठिइओ चउट्ठाणो ॥ ६४५ ॥
अट्ठप्फासो य जओ भणिओ, एसो य जं चउप्फासो। अण्णे वि तओ पोग्गलभेया संति त्ति सद्धेयं ॥६४६॥

एष प्रस्तुतोऽचित्तमहास्कन्धः सर्वोत्कृष्टप्रदेशनिर्वृत्तो, नान्यः। अयं ह्यौदारिकादिवर्गणाः सर्वा अप्यभिधाय पर्यन्ते प्रोक्तः; अतो ज्ञायते– अयमेव सर्वोत्कृष्टपरमाणुसंख्याप्रचितो, न स्कन्धान्तराणि; निवर्तते ह्यत ऊर्ध्वं सर्वापि पुद्गलविशेषाणां कथेति भावः। इत्येवं केचिद् व्याचक्षते। न चाऽयमेकान्तो नैतद् व्याख्यानं संगतमित्यर्थः, यद् यस्मादुत्कृष्टप्रदेशः स्कन्धः प्रतियोग्युत्कृष्टप्रदेशस्कन्धान्तरापेक्षया प्रज्ञापनायामवगाहना-स्थितिभ्यां चतुःस्थानपतित उक्तः। तथाच तत्सूत्रम्–

"उक्कोसपएसियाणं भंते ! खंधाणं केवइया पज्जवा पण्णत्ता ?। गोयमा ! अणंता। से केणट्ठेण भंते ! एवं वुच्चइ ?। गोयमा ! उक्कोसपएसिए खंधे उक्कोसपएसियस्स खंधस्स दव्वट्ठियाए तुल्ले (एकैकद्रव्यत्वात्), पएसट्ठियाए तुल्ले (उत्कृष्टप्रदेशिकस्यैव प्रस्तुतत्वात्), ओगाहणट्ठियाए चउट्ठाणवडिए, तं जहा– असंखेज्जभागहीणे वा, संखेज्जभागहीणे वा; संखेज्जगुणहीणे वा, असंखेज्जगुणहीणे वा; असंखेज्जभागब्भहिए वा, संखेज्जभागब्भहिए वा, संखेज्जगुणब्भहिए वा, असंखेज्जगुणब्भहिए वा। एवं ठिईए वि चउट्ठाणवडिए, वण्ण-गंध-रस०। अट्ठहिं फासेहिं छट्ठाणवडिए"।

---

१ सर्वोत्कृष्टप्रदेश एष केचित्, न चायमेकान्तः। उत्कृष्टप्रदेशो यदवगाह-स्थितितश्चतुःस्थानः ॥ ६४५ ॥
अष्टस्पर्शश्च यतो भणितः, एष च यच्चतुःस्पर्शः। अन्येऽपि ततः पुद्गलभेदाः सन्तीति श्रद्धेयम् ॥ ६४६ ॥

२ उत्कृष्टप्रदेशिकानां भगवन्! स्कन्धानां कतिपये पर्यवाः प्रज्ञप्ताः?। गौतम! अनन्ताः। केनार्थेन भगवन्! एवमुच्यते?। गौतम! उत्कृष्टप्रदेशिकः स्कन्ध उत्कृष्टप्रदेशिकस्य स्कन्धस्य द्रव्यार्थतया तुल्यः, प्रदेशार्थतया तुल्यः, अवगाहनार्थतया चतुःस्थानपतितः, तद्यथा- असंख्येयभागहीनो वा, संख्येयभागहीनो वा, संख्येयगुणहीनो वा, असंख्येयगुणहीनो वा; असंख्येयभागाभ्यधिको वा, संख्येयभागाभ्यधिको वा; संख्येयगुणाभ्यधिको वा, असंख्येयगुणाभ्यधिको वा। एवं स्थित्याऽपि चतुःस्थानपतितः; वर्ण-गन्ध-रस०। अष्टाभिः स्पर्शैः षट्स्थानपतितः।

अयं पुनरचित्तमहास्कन्धोऽचित्तमहास्कन्धान्तरेण सहाऽवगाहना-स्थितिभ्यां तुल्य एव। अतो ज्ञायते– एतस्मादपर एव केचित् ते प्रज्ञापनोक्ता उत्कृष्टप्रदेशिकाः स्कन्धा इति। किञ्च, 'अट्ठप्फासो य जओ भणिओ त्ति' 'उक्कोसपएसो' इत्यनन्तरगाथागं संबध्यते। ततश्चाष्टस्पर्शस्य यतः प्रज्ञापनायां भणित उत्कृष्टप्रदेशिकः स्कन्धः। एष पुनरचित्तमहास्कन्धो यस्माच्चतुःस्पर्श इष्यते। तस्मादनयैवोत्कृष्टप्रदेशिकस्कन्धानां भेदसिद्ध्या पूर्वोक्तवर्गणाभिश्चाचित्तमहास्कन्धेभ्योऽन्येऽपि केचिद्संगृहीताः पुद्गलविशेषा अद्यापि सन्तीति श्रद्धेयम्, न पुनरेतावता सर्वोऽपि पुद्गलास्तिकायः संगृहीत इति भावः। तदेवमुक्ता द्रव्यवर्गणाः, 'अह दव्ववग्गणाणं कमो' एतत्पर्यन्ता च व्याख्याता निर्युक्तिगाथा ॥ ६४५ ॥ ६४६ ॥

अथ "विवज्जासओ खेत्ते' एतद्व्याचिख्यासुः क्षेत्रादिवर्गणास्वरूपमाह–

[2]एगपएसोगाढाण वग्गणेगा पएसवुड्ढीए। संखेज्जोगाढाणं संखेज्जा वग्गणा तत्तो ॥ ६४७ ॥
तत्तो संखाईया संखाइयप्पएसमाणाणं। गंतुमसंखेज्जाओ जोग्गाओ कम्मुणो भणिया ॥ ६४८ ॥
तत्तो संखाईया तस्सेव पुणो हवंति जोग्गाओ। माणसदव्वाईण वि एवं तिविगप्पमेक्केक्कं ॥ ६४९ ॥

विपर्यासतो विपर्यासेन पश्चान्मुखः क्षेत्रविषयो वर्गणाक्रमो वेदितव्यः, न तु द्रव्यवर्गणावदिति भावः। इदमुक्तं भवति– परमाणूनां द्व्यणुकाद्यनन्ताणुकपर्यन्तस्कन्धानां चैकाकाशप्रदेशावगाहिनां सर्वेषामप्येका वर्गणा, द्व्यणुकाद्यनन्ताणुकपर्यन्तस्कन्धानामेव द्विप्रदेशावगाहिनां द्वितीया वर्गणा, त्र्यणुकाद्यनन्ताणुकपर्यन्तस्कन्धानामेव त्रिप्रदेशावगाहिनां तृतीया वर्गणा; एवमेकैकप्रदेशवृद्ध्या संख्येयप्रदेशावगाहिनां स्कन्धानां संख्येया वर्गणाः; ततोऽसंख्येयप्रदेशावगाहिनामपि स्कन्धानां प्रदेशवृद्ध्या असंख्या वर्गणा गत्वाऽतिलङ्घ्य संख्यप्रदेशावगाहस्कन्धानामेकैकाकाशप्रदेशवृद्ध्या वर्धमानाः कर्मणो ग्रहणयोग्या असंख्येया वर्गणास्तीर्थकरैर्भणिताः। ततोऽनन्ताल्पपरमाणुनिष्पन्नत्वाद् बादरपरिणामत्वेन बह्वाकाशप्रदेशावगाहित्वाच्च तस्यैव कर्मणोऽग्रहणयोग्या एकैकाशप्रदेशवृद्ध्या वर्धमाना असंख्येया वर्गणा भवन्ति। ततश्चैवमेकैकाकाशप्रदेशावगाहवृद्ध्या वर्धमाना मनसोऽप्यसंख्येया अग्रहणवर्गणाः, पुनरेतावत्य एव

---

१ गाथा ६३९। २ एकप्रदेशावगाढानां वर्गणैका प्रदेशवृद्ध्या। संख्येयावगाढानां संख्येया वर्गणास्ततः ॥ ६४७ ॥
ततः संख्यातीता-ऽसंख्येयप्रदेशमानानाम्। गत्वाऽसंख्येया योग्याः कर्मणो भणिताः ॥ ६४८ ॥
ततः संख्यातीतास्तस्यैव पुनर्भवन्ति योग्याः। मानसद्रव्यादीनामप्येवं त्रिविकल्पमेकैकम् ॥ ६४९ ॥

संख्यातीत-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्यैव ग्रहणवर्गणाः, पुनरेतावत्प्रमाणा एव तस्यैवाग्रहणवर्गणा वाच्याः । एवमाना-ऽऽनयोः, भाषायाः, तैजसस्य, आहारकस्य, वैक्रियस्य, औदारिकस्य चाऽयोग्य-योग्या-ऽयोग्यवर्गणानां क्षेत्रतोऽपि प्रतिलोमं त्रयं त्रयं प्रत्येकमायोजनीयमिति ।

ध्रुवादिवर्गणास्कन्धा अपि प्रत्येकमङ्गुलासंख्येयभागप्रदेशावगाहिनोऽवगन्तव्याः, परं तच्चिन्तेह न कृता, जीवैः शरीरादौ क्वचिद: प्यनुपयुज्यमानत्वेन ध्रुवादिवर्गणानामग्रहणात् । अथवा, कर्मणोऽग्रहणवर्गणानां मध्ये तासामप्यन्तर्भावो द्रष्टव्यः । द्रव्यवर्गणाधिकारे तु पृथगेतत्स्वरूपमात्रज्ञापनार्थं विस्तरेण कृता तच्चिन्तेति मन्तव्यमिति । काल-भाववर्गणास्तु समया-ऽसमयादिस्थितिमात्रं वर्णादिमात्रं चाङ्गीकृत्य सामान्येन वक्ष्यन्ते । अतस्ताभिः सर्वोऽपि पुद्गलास्तिकायः संगृह्यत इति भावनीयमिति । तदेवमभिहिताः क्षेत्रवर्गणाः ॥६४७–६४९॥

अथ कालवर्गणाः प्राह—

[1]एगा समयट्ठिईणं संखेज्जा संखसमयट्ठिइयाणं । होंति असंखेज्जाओ तओ असंखेज्जसमयाणं ॥ ६५० ॥

विवक्षितपरिणामेन य एकैकसमयमात्रस्थितयस्तेषां सर्वेषामप्येका वर्गणा, ते पुनरविशेषेण परमाणवः स्कन्धाश्च मन्तव्याः । एवमेकैकसमयवृद्ध्या संख्येयसमयस्थितीनां परमाण्वादीनां संख्येया वर्गणाः, असंख्येयसमयस्थितीनां त्वसंख्येया वर्गणा भवन्ति । एवमेताभिः सर्वोऽपि पुद्गलास्तिकायः संगृह्यते, एकसमयाद्यसंख्येयसमयान्तायाः स्थितेर्बहिः पुद्गलानां स्थितेरेवाभावादिति ॥ ६५० ॥

अथ भाववर्गणाः प्राह—

[2]एगा एगगुणाणं एगुत्तरवुड्ढिया तओ कमसो । संखेज्जगुणाण तओ संखेज्जा वग्गणा होंति ॥ ६५१ ॥

संखाईयगुणाणं संखाईया य वग्गणा तत्तो । होंति अणंतगुणाणं दव्वाणं वग्गणाऽणंता ॥ ६५२ ॥

वण्ण-रस-गंध-फासाण होंति वीसं समासभेएणं । गुरुलहु-अगुरुलहूणं बायर-सुहुमाण दो वग्गा ॥६५३॥

एकगुणानामेकगुणकृष्णानामित्यर्थः, परमाणूनां स्कन्धानां च सर्वेषामप्येका वर्गणा, कृष्णवर्णगुणद्वययुक्तानां तु परमाण्वादीनां

---

१ एका समयस्थितीनां संख्येया संख्यसमयस्थितिकानाम् । भवन्त्यसंख्येयास्ततोऽसंख्येयसमयानाम् ॥ ६५० ॥

२ एकैकगुणानामेकोत्तरवर्धितास्ततः क्रमशः । संख्येयगुणानां ततः संख्येया वर्गणा भवन्ति ॥ ६५१ ॥
संख्यातीतगुणानां संख्यातीताश्च वर्गणास्ततः । भवन्त्यनन्तगुणानां द्रव्याणां वर्गणा अनन्ताः ॥ ६५२ ॥
वर्ण-रस-गन्ध स्पर्शानां भवन्ति विंशतिः समासभेदेन । गुरुलघ्व-गुरुलघूनां बादर-सूक्ष्माणां द्वौ वर्गौ ॥ ६५३ ॥

द्वितीया वर्गणा, कृष्णवर्णगुणत्रययुक्तानां तु तेषां तृतीया वर्गणा । एवमेकैकगुणवृद्ध्या संख्येयकृष्णवर्णगुणानां संख्येया वर्गणाः, असंख्येयकृष्णवर्णगुणानामसंख्येया वर्गणाः, अनन्तकृष्णवर्णगुणानामनन्ता वर्गणा भवन्ति । एवमेकगुणनीलानां, संख्येयगुणनीलानाम्, असंख्येयगुणनीलानां, अनन्तगुणनीलानामपि वाच्यम् । एवं कृष्ण-नील-लोहित-हारिद्र-शुक्ललक्षणाः पञ्च वर्णाः, सुरभी-तरौ द्वौ गन्धौ, तिक्त-कटु-कषाया-ऽऽम्ल-मधुराः पञ्च रसाः, कर्कश-मृदु-गुरु-लघु-शीतो-ष्ण-स्निग्ध-रूक्षास्त्वष्टौ स्पर्शाः । एवमेतेषु वर्ण-गन्धादिगतविंशतिभेदेषु प्रत्येकं सर्वत्रैकगुणानामेका, संख्येयगुणानां संख्येयाः, असंख्येयगुणानामसंख्येयाः, अनन्तगुणानामनन्तवर्गणा वाच्याः । नवरं यो यत्र वर्ण-गन्धादिभेदस्तत्र तदभिलापः कार्य इति । तथा, गुरुलघुपर्यायाणां बादरपरिणामान्वितवस्तूनामेका वर्गणा, अगुरुलघुपर्यायाणां तु सूक्ष्मपरिणामपरिणतवस्तूनामेका वर्गणा, एवमेतौ द्वावेव वर्गौ भवतः । तदेवमेताभिर्भाववर्गणाभिः सर्वोऽपि पुद्गलास्तिकायः संगृह्यते, यथोक्तवर्णादिभावेभ्योऽन्यत्र पुद्गलानामभावादिति ॥ ६५१ ॥ ६५२ ॥ ६५३ ॥

तदेवं द्रव्य-क्षेत्र-काल-भाववर्गणाः प्रतिपाद्य प्रकृतं स्मरयन्नुपसंहरन्नाह—

[3]भणियं तेया-भासाविमज्झदव्वावगाहपरिमाणं । ओहिन्नाणारंभो परिणिट्ठाणं च तं जेसु ॥६५४॥

तदेवं भणितं प्रतिपादितम् । किम् ?, इत्याह— तैजस-भाषयोर्विमध्येऽन्तराले यानि तदयोग्यद्रव्याणि तेषामवगाहपरिमाणं, उपलक्षणत्वादनन्तपरमाणुप्रचितस्कन्धात्मकत्वादिकं तत्स्वरूपं चोक्तम् । येषु द्रव्येषु किम् ?, इत्याह—[4]येष्ववधिज्ञानस्यारम्भः प्रथमोत्पत्तिर्लक्षणः, परिनिष्ठानं च प्रतिपतनं तत्— समयप्रसिद्धं येषु । इदमुक्तं भवति— '[5]तेया-भासादव्वाण अंतरा एत्थ लभइ पट्ठवओ' इत्युपजीव्य कश्चिद् विनेयेन पृष्टम्— तैजस-भाषान्तराले यदयोग्यं द्रव्यं तत् कतमत्स्वरूपं, कतिप्रदेशावगाढं च ? इति । अस्य च शिष्यमश्नस्य गुरुणौदारिकवर्गणाः प्ररूपयता दत्तमुत्तरमिति ॥ ६५४ ॥

इह च गुरुलघु, अगुरुलघु च द्रव्यमवधिः प्रथमं पश्यतीति पूर्वमुक्तम्, तत्र गुरुलघुद्रव्यारब्धस्य, अगुरुलघुद्रव्यारब्धस्य चावधेर्यत् स्वरूपं भवति, तद् दर्शयन्नाह—

[6]गुरुलहुदव्वारद्धो गुरुलहुदव्वाइं पिच्छिउं पच्छा । इयराइं कोइ पेच्छइ विसुज्झमाणो कमेणेव ॥ ६५५ ॥

---

१ भणितं तैजस-भाषाविमध्यद्रव्यावगाहपरिमाणम् । अवधिज्ञानारम्भः परिनिष्ठानं च तद् येषु ॥ ६५४ ॥ २ गाथा ६२७ ।

३ गुरुलघुद्रव्यारब्धो गुरुलघुद्रव्याणि प्रेक्ष्य पश्चात् । इतराणि कश्चित् प्रेक्षते विशुध्यमानः क्रमेणैव ॥ ६५५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अगुरुलहुसमारब्धो उड्ढं वड्ढइ कमेण सो नाहो । वड्ढंतो च्चिय कोई[2] पेच्छइ इयराइं सयराहं ॥६५६॥

गुरुलघुद्रव्यारब्धोऽवधिस्तैजसभाषात्मकद्रव्यारब्ध इत्यर्थः । किमिति ? । अत्रोच्यते– वर्धमानोऽधस्तात् तान्येव गुरु लघून्यौदारिकादिद्रव्याणि दृष्ट्वा कश्चित् पश्चाद् विशुध्यमानः क्रमेणैवाऽगुरुलघूनि भाषादिद्रव्याणि पश्यति, यस्तु न विशुद्धिमासा दयति स तेष्वेव गुरुलघुद्रव्येषु कियन्तमपि कालं स्थित्वा ततः प्रतिपतति । यस्त्वगुरुलघुद्रव्यसमारब्धोऽवधिर्भाषासमद्रव्यारब्ध इत्यर्थ स ऊर्ध्वमेव क्रमेण वर्धते, नाधस्तात्, उपरिवर्तिन्येवाऽगुरुलघूनि भाषाद्रव्याणि पश्यति; कश्चित्तु तथाविधविशुद्धिमान् वर्धमान ए 'सयराहं' युगपदितराण्यपि गुरुलघून्यौदारिकादीनि पश्यति ॥ ६५५ ॥ ६५६ ॥

अथोत्तरगाथासंबन्धनार्थं परमुखेन प्रश्नं कारयति—

गुरुलहुमगुरुलहुं वा तेया-भासंतरे ति निद्दिट्ठं । ओरालाईयाणं किं गुरुलहुमगुरुलहुयं वा ?॥ ६५७ ॥

'गुरुलहु अगुरुयलहुयं तं पि य तेणेव निद्दाइ' इति वचनात् तैजस-भाषयोरन्तरे गुरुलघु, अगुरुलघु च द्रव्यमस्तीति भवद्भि निर्दिष्टम्, औदारिकादिद्रव्याणां तु मध्ये 'किं गुरुलघु, किं चाऽगुरुलघु ?' इति न ज्ञायते, तत्र तत्स्वरूपस्याऽनिर्दिष्टत्वात्, तदेतत् कथ्यतामिति प्रश्नः ॥ इत्येकोनविंशतिगाथार्थः ॥ ६५७ ॥

सूरिरुत्तरमाह—

ओरालिय-वेउव्विय-आहारग-तेय गुरुलहू दव्वा । कम्मग-मण-भासाई एयाइं अगुरुलहुयाइं ॥६५८॥

औदारिक-वैक्रिया-ऽऽहारक-तैजसद्रव्याणि, अपराणि च तदाभासानि सद्रव्याण्यपि बादरद्रव्याणि, गुरुलघूनि गुरुलघुस्वभा वानि; कार्मण-मनो-भाषादिद्रव्याणि तु, आदिशब्दादाना-ऽपानद्रव्याणि, अपराण्यपि च परमाणु-द्व्यणुकादीनि, व्योमादीनि चाऽगुरुल घूनि । एतच्च वक्ष्यमाणनीत्या निश्चयनयमतमित्यवगन्तव्यम् ॥ इति निर्युक्तिगाथार्थः ॥ ६५८ ॥

अथ व्यवहार-निश्चयनयविचारणया विस्तरार्थं भाष्यकारः प्राह–

---

१ अगुरुलघुसमारब्ध ऊर्ध्वं वर्धते क्रमेण स नाऽधः । वर्धमान एव कश्चित् प्रेक्षत इतराणि युगपत् ॥ ६५६ ॥ २ क.ख.ग. 'ई पिच्छ' ।
३ क.ख.ग. 'न्तं का' । ४ गुरुलघ्वगुरुलघु वा तैजस-भाषान्तरे इति निर्दिष्टम् । औदारिकादिकानां किं गुरुलघ्वगुरुलघुकं वा ?॥ ६५७ ॥
५ गाथा ६२७ । ६ औदारिक- वैक्रिया-ऽऽहारक-तैजसानि गुरुलघूनि द्रव्याणि । कार्मण-मनो-भाषादीनि एतान्यगुरुलघुकानि ॥ ६५८ ॥

गुरुयं लहुयं उभयं नोभयमिति वावहारियनयस्स । दव्वं, लेट्ठुं दीवो वाऊ वोमं जहासंखं ॥ ६५९ ॥
निच्छयओ सव्वगुरुं सव्वलहुं वा न विज्जए दव्वं । बायरमिह गुरुलहुयं अगुरुलहुं सेसयं सव्वं ॥६६०॥

इह यद्ऊर्ध्वं तिर्यग् वा प्रक्षिप्तमपि पुनर्निसर्गादधो निपतति तद् गुरु द्रव्यम्, यथा लेष्ट्वादि । यत्तु निसर्गत एवोर्ध्वगतिस्वभाव द्रव्यं तल्लघु, यथा दीपकलिकादि । यत्तु नोर्ध्वगतिस्वभावं नाप्यधोगतिस्वभावं, किं तर्हि ?, स्वभावेनैव तिर्यग्गतिधर्मकं तद् द्रव्यं गुरु लघु, यथा वाय्वादि । यत्पुनरूर्ध्वा-ऽध-स्तिर्यग्गतिस्वभावानामेकतरस्वभावमपि न भवति, सर्वत्र वा गच्छति तद् गुरुलघु, यथा व्योम परमाण्वादि । इति व्यावहारिकनयमतम् ।

निश्चयतस्तु– निश्चयनयमतेन, सर्वगुरु– एकान्तेन गुरुस्वभावं किमपि वस्तु नास्ति, गुरोरपि लेष्ट्वादेः परप्रयोगादूर्ध्वादिगमन दर्शनात् । एकान्तेन लघ्वपि नास्ति, अतिलघोरपि वाष्पादेः करताडनादिनाऽधोगमनादिदर्शनात् । तस्माद् नैकान्तेनं गुरु लघु व किमपि वस्त्वस्ति । अतो निश्चयनयस्येयं परिभाषा– यत् किमप्यत्र लोके औदारिकवर्गणादिकं भू-भूधरादिकं वा बादरं वस्तु तत् सर्व गुरुलघु, शेषं तु भाषा-ऽऽना-ऽपान-मनोवर्गणादिकं परमाणु-द्व्यणुक-व्योमादिकं च सर्वं वस्त्वगुरुलघ्विति ॥ ६५९ ॥ ६६० ॥

अत्र परः प्राह–

जइ गुरुयं लहुयं वा न सव्वहा दव्वमत्थि तो कीस । उड्ढमहो वि य गमणं जीवाणं पोग्गलाणं च ?॥६६१॥
उड्ढं लहुकम्माणं भणियं गुरुकम्मणामहोगमणं । जीवा य पोग्गला वि य उड्ढा-होगामिणो पायं ॥६६२॥

यदि भो निश्चयनयमतवादिन् ! एकान्तगुरु एकान्तलघु वा सर्वथा द्रव्यं नास्ति, तर्हि किमित्यूर्ध्वम्, अधोऽपि च जीवानां पुद्गलान च गमनं भवति ?। पर एव स्वपक्षं भावयति– यत ऊर्ध्वं सौधर्मदेवलोकादौ लघुकर्मणां जीवानां गमनं भणितमागमे, गुरुकर्मणां त्वध सप्तमपृथिव्यादौ गमनमभिहितम् । अथवा, किमित्थमभिहितेन ?, सर्वेषामपि समयवेदिनां प्रसिद्धमेवेदं यदुत– जीवाश्च पुद्गला अ

---

१ गुरुकं लघुकमुभयं नोभयमिति व्यावहारिकनयस्य । द्रव्यं, लेष्टु दीपो वायुर्व्योम यथासंख्यम् ॥ ६५९ ॥ × (तदगु-)
निश्चयतः सर्वगुरु सर्वलघु वा न विद्यते द्रव्यम् । बादरमिह गुरुलघुकमगुरुलघु शेषकं सर्वम् ॥ ६६० ॥ २ घ.छ. 'दव्वं' ।
३ यदि गुरुकं लघुकं वा न सर्वथा द्रव्यमास्ति ततः कस्मात् । ऊर्ध्वमधोऽपि च गमनं जीवानां पुद्गलानां च ? ॥ ६६१ ॥
ऊर्ध्वं लघुकर्मणां भणितं गुरुकर्मणामधोगमनम् । जीवाश्च पुद्गला अपि च ऊर्ध्वा-ऽधोगामिनः प्रायः ॥ ६६२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

चोर्ध्वा-ऽधोगामिनः-- माय ऊर्ध्वलोकान्तादधोलोकान्तं गच्छन्ति, अधोलोकान्तात् तूर्ध्वलोकान्तम्। प्रायोग्रहणादनुश्रेणि तिर्यग् गच्छन्ति। तस्माद् गुरुताऽभावे कथं तेऽधोऽभिव्रजन्ति, लघुताऽभावे च कथमूर्ध्वमनुधावन्तीति ?।

इह मेरकस्याऽयमभिप्रायः- गुरुतानिबन्धनमधोगमनमयोगोलकादीनामिव; लघुताप्रत्ययं चोर्ध्वगमनं, दीपकलिकादीनामिव; गुरुलघुत्वसाध्यं च तिर्यग्गमनं, वाय्वादीनामिव; अगुरुलघुताकारणं चावस्थानं, यथा व्योमादीनाम्, आकाशप्रतिष्ठिताऽऽनतदेवलोकविमानादीनां च। ततो व्यवहारवत् त्वयाऽपि गुर्वादिचतुर्विधवस्त्वभ्युपगमः कार्य इति ॥ ६६१ ॥ ६६२ ॥

अथ निश्चयनयवादी प्रत्युत्तरयति-

[1]अन्न च्चिय गुरुलहुया अन्नो दव्वाण वीरियपरिणामो। अन्नो गइपरिणामो नावस्सं गुरुलहुनिमित्तो॥६६३॥

इहाऽन्यैव काचिद् द्रव्याणां गुरुता लघुता च, अन्यश्च वीर्यपरिणामः, अन्य एव च तेषां गतिपरिणामः, नावश्यं गुरुत्वलघुत्वनिमित्त इति ॥ ६६३ ॥

कुतः ?, इत्याह-

[2]परमलहूणमणूणं जं गमणमहो वि तत्थ को हेऊ ?। उड्ढं धूमाईणं थूलयराणं पि किं कज्जं ? ॥६६४॥

किं व विमाणाईणं नाहोगमणं महागुरूणं पि। तणुयरदेहो देवो हक्खुवइ व किं महासेलं ? ॥ ६६५ ॥

यद् यस्मात् परमलघूनामप्यणूनां गमनमधोऽपि भवति, तत्र हन्त ! अधोगतिपरिणामोत्कटतां विहाय कोऽन्यो हेतुः ?- न कोऽपीत्यर्थः। तथा, स्थूलतराणामपि बादराणामपि, बादरत्वेन गुरूणामपीति तात्पर्यम्, धूमादीनां यदूर्ध्वं गमनं भवति, तत्राप्यूर्ध्वगतिपरिणामोत्कटत्वं परित्यज्य किं कार्यं किमन्यत्प्रयोजनम् ?- न किञ्चिदित्यर्थः। तदेवमुत्कटेनाधोगतिपरिणामेन लङ्घिता परमाणुगता लघुता, ऊर्ध्वगतिपरिणामेनाऽपि प्रबलेनाऽतिक्रान्ता धूमादिगता गुरुता, इत्यस्यां गाथायां दर्शितम्। तदर्शने च '[3]अन्नो गइपरिणामो नावस्सं गुरुलहुनिमित्तो' इत्येतत् समर्थितम्। गतिपरिणामेन च गुरुलघुतयोरतिक्रमणमुपलक्षणम्, अतः स्थितिपरिणामेनाप्यु-

१ अन्यैव गुरुलघुताऽन्यो द्रव्याणां वीर्यपरिणामः। अन्यो गतिपरिणामो नावश्यं गुरुलघुनिमित्तः ॥ ६६३ ॥ २ क. ख. ग. 'ता च ल'।

३ परमलघूनामणूनां यद् गमनमधोऽपि तत्र को हेतुः ?। ऊर्ध्वं धूमादीनां स्थूलतराणामपि किं कार्यम् ? ॥ ६६४ ॥
किं वा विमानादीनां नाधोगमनं महागुरूणामपि ?। तनुतरदेहो देव उत्क्षिपति वा किं महाशैलम् ? ॥ ६६५ ॥ ४ गाथा ६६३।

त्कटेन गुरुताऽतिक्रमं दर्शयति- 'किं व विमाणेत्यादि' यदि गुरुताऽधोगतिनिबन्धनमिष्यते, तर्हि हन्त ! किमित्यानतदेवलोकविमानादीनाम्, आदिशब्दादीषत्प्राग्भारापृथिव्यादीनां महागुरूणामप्यधोगमनं न भवति ?। तस्मात् तत्राप्युत्कटः स्थितिपरिणाम एव गुरुतामतिक्रम्य तेषामवस्थितिं करोतीति। अथ यदुक्तम्- '[1]अन्नो दव्वाण वीरियपरिणामो' इति, एतत्समर्थनार्थमाह- 'तणुयरदेहो इत्यादि' तनुतरशरीरो महादीर्यो देवो वा किमिति महाशैलं कमप्युत्क्षिपति, उत्क्षिप्य चोर्ध्वं प्रक्षिपति ?। इदमुक्तं भवति- यदि गुरुतादयोऽधोगत्यादिकारणं भवेयुस्तदाऽसौ महाशैलो निजगुरुतया महावीर्यवन्तं देवमाक्रम्याधस्तादेव यायादिति ॥६६४॥६६५॥

अत्र पराभिप्रायमाशङ्क्योत्तरमाह-

[2]अह तस्स वीरियं तं तो नाहो गमणकारणं गुरुया। उड्ढगइकारणं वा लहुया एगंतओ जुत्ता ॥६६६॥

अथ मन्यसे- देवस्य संबन्धि तद् महावीर्यं येन गुरुरपि पर्वत ऊर्ध्वमुत्क्षिप्यते। हन्त ! ततस्तर्ह्येकान्ततो नाऽधोगतिकारणं गुरुतैव, नाप्येकान्तेनोर्ध्वगतिकारणं लघुतैव युक्ता। किं तर्हि ?, देवादिगतं वीर्यमपि, इत्यायातम् ॥ ६६६ ॥

ततश्च-

[3]विरियं गुरु-लहुयाणं जहाहियं गइविवज्जयं कुणइ। तह गइ-ठिइपरिणामो गुरु-लहुयाओ विलंघेइ॥६६७॥

यथोक्तन्यायेन देवादिगतं वीर्यमधिकं सद् वस्तूनां गुरु-लघूनां गतिविपर्ययं करोति, तथा गति-स्थितिपरिणामोऽप्यधिकः प्रागुक्तन्यायेन वस्तूनां गुरु-लघुते विलङ्घ्यत्येव- गतिविपर्ययं करोत्येवेत्यर्थः। यथा गुरौ पर्वते देववीर्याद् गतिविपर्ययो दर्शितः, एवं लघावपि बाष्पादौ करताडिते देवदत्तादिवीर्याद् गतिविपर्ययो द्रष्टव्यः। तस्माद् नैकान्तेनाऽधोगत्यादिकारणं गुरुतादयः। किं तर्हि ?, देवादिगतं वीर्यमपि, महीध्र-बाष्पादिषु तथादर्शनात्। तथोत्कटो गति-स्थितिपरिणामोऽपि तत्कारणम्, परमाणु-धूम-विमानादिषु तथादर्शितत्वात्; अतः किमधोगत्यादिसिद्धये गुर्वादिवस्तुचतुष्टयाभ्युपगमेन ?। तत इयमेव परिभाषा युक्तिमती- बादरं गुरुलघु, शेषं तु सूक्ष्मं, अमूर्तं च सर्वं वस्त्वगुरुलघु। इति निश्चयनयः ॥ ६६७ ॥

अथोत्तरनिर्युक्तिगाथासंबन्धनार्थमाह-

१ गाथा ६६३। २ अथ तस्य वीर्यं तत् ततो नाधोगमनकारणं गुरुता। ऊर्ध्वगतिकारणं वा लघुतैकान्ततो युक्ता ॥ ६६६ ॥
३ वीर्यं गुरु-लघुकानां यथाऽधिकं गतिविपर्ययं करोति। तथा गति-स्थितिपरिणामो गुरुलघुते विलङ्घयति ॥ ६६७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]भणिओ खित्त-द्धाणं सुद्धाणं चिय परोप्परनिबंधो । इह ताणं चिय भण्णइ दव्वेण समं निबंधोऽयं॥६६८

इह 'अंगुलमावलियाणं भागमसंखिज्ज' इत्यादिना भणितः पूर्वं क्षेत्र-कालयोः शुद्धयोरेव द्रव्यरहितयोः परस्परनिबन्धः । अथ तयोरेव द्रव्येण सहाऽसौ प्रोच्यते ॥ इति गाथादशकार्थः ॥ ६६८ ॥

स्वमतिज्ञातार्थमेवाह—

[2]संखेज्ज मणोदव्वे भागो लोग-पलियस्स बोधव्वो । [3]संखिज्ज कम्मदव्वे लोए थोऊणयं पलियं ॥ ६६९ ॥

मनोवर्गणागतं मनःपरिणामयोग्यं द्रव्यं मनोद्रव्यं तस्मिन् मनोद्रव्ये मनोद्रव्यविषयेऽवधौ 'संखेज्ज त्ति' संख्येयतमो भागो लोक-पल्योपमयोर्विषयत्वेन बोद्धव्यः । इदमुक्तं भवति– मनोवर्गणाद्रव्यं पश्यन्नवधिः क्षेत्रतो लोकस्य संख्यातितमं भागं, कालतस्तु पल्योपमस्य संख्येयतमं भागं पश्यतीति । 'संखिज्ज कम्मदव्वे त्ति' कर्मवर्गणागतं कर्मणो योग्यं द्रव्यं तद्विषयेऽवधौ संख्येया लोकपल्योपमभागास्तद्विषयतयाऽवगन्तव्याः । इदमुक्तं भवति– कर्मवर्गणाद्रव्यं पश्यन्नवधिः क्षेत्रतो लोकस्य संख्येयान् भागान् पश्यति, कालतस्तु पल्योपमस्य संख्येयान् भागानवलोकयति । 'लोए थोऊणयं पलियं ति' चतुर्दशरज्ज्वात्मकलोकाविषयेऽवधौ कालतः स्तोकोनं पल्योपमं विषयतया बोद्धव्यम् । इदमत्र हृदयम्– क्षेत्रतः समस्तलोकं पश्यन्नवधिः कालतः स्तोकोनं पल्योपमं पश्यति । द्रव्येण सह क्षेत्र-कालयोरुपनिबन्धे प्रस्तुते केवलयोरुपनिबन्धप्ररूपणं विस्मरणशीलतासूचकमिति चेत् । नैवम्, साक्षादिह द्रव्योपनिबन्धो नोक्तः, सामर्थ्यात् त्वसौ प्रोक्त एव, तथाहि– पूर्वं 'कालं चउण्ह वुड्ढी' इत्युक्तमेव । कालवृद्धिश्चानन्तरोक्तकर्मद्रव्यदर्शकापेक्षयाऽत्रोक्तैव । ततश्चास्य समस्तलोकस्तोकोनपल्योपमदर्शिनः सामर्थ्यात् कर्मद्रव्योपर्येव किमपि द्रव्यं विषयत्वेन द्रष्टव्यम्, अत एव च तदुपर्यपि ध्रुववर्गणादिद्रव्यं पश्यतः क्षेत्र-कालवृद्धिक्रमेण परमावधिसंभवोऽप्यनुमीयते ॥ इति निर्युक्तिगाथार्थः ॥६६९॥

अथ भाष्यम्–

[4]लोगपलियाण भागं संखइमं मुणइ जो मणोदव्वं । संखेज्जे पुण भाए पासइ जो कम्मुणो जोग्गं ॥६७०॥

---

१ भणितः क्षेत्रा-ऽद्धयोः शुद्धयोरेव परस्परनिबन्धः । इह तयोरेव भण्यते द्रव्येण समं निबन्धोऽयम् ॥ ६६८ ॥ २ गाथा ६०८ । ३ क. ख. ग. 'ज्ञातमे' ।

४ संख्येयो मनोद्रव्ये भागो लोक-पल्ययोर्बोद्धव्यः । संख्येयाः कर्मद्रव्ये लोके स्तोकोनकं पल्यम् ॥६६९॥ ५ घ. छ. 'संखेज्ज' । ६ गाथा ६१७ ।

७ घ. छ. 'मुमेय इ' । ८ लोक-पल्यबोर्भागं संख्येयं जानाति यो मनोद्रव्यम् । संख्येयान् पुनर्भागान् पश्यति यः कर्मणो योग्यम् ॥ ६७० ॥

[5]सयलं लोयं पासं पासइ पल्लोवमं स देसूणं । सुद्धाण किमत्थाणे गहणमिहं खेत्त-कालाणं ? ॥ ६७१ ॥

कम्मदव्वमइओ पेच्छइ दुगमित्तियं ति जं भणियं । उवरिं पि तओ कमसो साहिज्जा तयणुमाणेणं॥६७२॥

यो मनोद्रव्यं मुणति स लोक-पल्योपमयोः प्रत्येकं संख्येयतमं भागं 'मुणति' इत्यत्रापि संबध्यते । यः पुनः कर्मणो योग्यं द्रव्यं पश्यति स लोक-पल्योपमयोः प्रत्येकं संख्येयान् भागान् 'पश्यति' इत्यत्रापि योज्यते । सकलं लोकं पश्यन् स प्रस्तुतोऽवधिर्देशोनं पल्योपमं पश्यति । परः प्राह– द्रव्येण सहोपनिबन्धे प्रस्तुते किमितीहाऽस्थाने शुद्धयोरेव द्रव्यरहितयोः क्षेत्र-कालयोर्ग्रहणम् ? । अत्राऽऽचार्यः सामर्थ्याद् द्रव्यं प्राप्यत इति दर्शयति– 'कम्मदव्वेत्यादि' कर्मद्रव्यमतीतोऽतिक्रान्तस्तदुपर्यन्यदपि किञ्चिद् द्रव्यं पश्यन्नेवैतावत्प्रमाणं लोकं देशोनपल्योपममानं क्षेत्र-काललक्षणं द्वयमवधिः पश्यति, नान्यथेति । इदमुक्तं भवति– 'कालं चउण्ह वुड्ढी' इति वचनादयमत्र सामर्थ्यप्रापितोऽर्थो लभ्यत इत्यर्थः । ततः सामर्थ्यादेव तदुपर्यपि ध्रुववर्गणादिद्रव्यं पश्यतस्तदनुमानेन क्रमशः परमावधिं यावत् साधयेत् ॥ इति गाथात्रयार्थः ॥ ६७० ॥ ६७१ ॥ ६७२ ॥

अथापरमपि द्रव्य-क्षेत्र-कालोपनिबन्धमाह–

[6]तेया-कम्मसरीरे तेयादव्वे य भासदव्वे य । बोधव्वमसंखेज्जा दीव-समुद्दा य कालो य ॥ ६७३ ॥

शरीरशब्दः प्रत्येकमभिसंबध्यते । तैजसशरीरे कार्मणशरीरे चैतद्विषयेऽवधाविति शेषः; तथा, तैजसवर्गणाद्रव्यविषयेऽवधौ, भाषावर्गणाद्रव्यगोचरे चावधौ क्षेत्रतः प्रत्येकमसंख्येया द्वीप-समुद्राः, कालश्चासंख्येयः पल्योपमासंख्येयभागरूपो विषयत्वेन बोद्धव्यः । इह चाविशेषोक्तावपि तैजसशरीरात् कार्मणशरीरस्य सूक्ष्मत्वात् तद्दर्शिन इदमेव द्वीप-समुद्र-कालासंख्येयकं बृहद् द्रष्टव्यम् । कार्मणशरीरादप्यबद्धानां तैजसवर्गणाद्रव्याणां सूक्ष्मत्वात् तद् बृहत्तरं, तेभ्योऽपि भाषाद्रव्याणां सूक्ष्मत्वात् तद् बृहत्तमं द्रष्टव्यम् । आह– ननु पूर्वं कर्मद्रव्यदर्शिनः प्रत्येकं लोक-पल्योपमभागाः संख्येया विषयत्वेनोक्ताः, अत्र तु कार्मणशरीरदर्शिनः किमिति स्तोकौ क्षेत्र-कालौ विषयत्वेनोक्तौ ? । अत्रोच्यते– पूर्वं कर्मद्रव्याणि कर्मवर्गणागतानि जीवेन शरीरतयाऽबद्धान्युक्तानि, अत्र तु तद्रूपतया बद्धानि गृही-

---

१ सकलं लोकं पश्यन् पश्यति पल्योपमं स देशोनम् । शुद्धयोः किमस्थाने ग्रहणमिह क्षेत्र-कालयोः ? ॥ ६७१ ॥
कर्मद्रव्यमयः प्रेक्षते द्विकमात्रमिति यद् भणितम् । उपर्यपि ततः क्रमशः साधयेत् तदनुमानेन ॥ ६७२ ॥ २ गाथा ६१७ ।

३ तैजस-कर्मशरीरे तैजसद्रव्ये च भाषाद्रव्ये च । बोद्धव्या असंख्येया द्वीप-समुद्राश्च कालश्च ॥ ६७३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तानि, अबद्धेभ्यश्च बद्धानि बादराणि भवन्ति, अच्युततन्तुभ्यश्च्युततन्तुषु तथादर्शनात्। अतोऽत्र कार्मणशरीरदर्शिनः स्तोकौ क्षेत्र-कालौ विषयत्वेनोक्ताविति ॥ ६७३ ॥

अत्र भाष्यम्—

[1]एयाइं जओ कम्मयदव्वेहिंतोऽतिथूलयरयाइं। तेयाइयाइं तम्हा थोवयरा खेत्त-काल त्थ ॥ ६७४ ॥

एतानि यतस्तैजसादीनि तैजसशरीर-कार्मणशरीर-तैजसवर्गणाद्रव्य-भाषावर्गणाद्रव्याणीत्यर्थः, कार्मणशरीरयोग्यवर्गणाद्रव्येभ्योऽतिस्थूलतराणि बादराणि, तस्मात् स्तोकतरौ क्षेत्र-कालावत्र प्रोक्तौ, इति प्रागेव भावितम् ॥ इति सभाष्यनिर्युक्तिगाथार्थः ॥ ६७४ ॥

आह–ननु यथा जघन्य-मध्यमावधी निर्दिष्टन्यायेनाऽसर्वरूपिद्रव्यविषयावुक्तौ, तथोत्कृष्टावधिरपि, आहोस्वित् सर्वमपि रूपिद्रव्यमसौ पश्यति ?, इत्याशङ्क्याह–

[2]एगपएसोगाढं परमोही लहइ कम्मगसरीरं। लहइ य अगुरुयलहुयं तेयसरीरे भवपुहुत्तं ॥ ६७५ ॥

एकस्मिन्नाकाशप्रदेशेऽवगाढं स्थितमेकप्रदेशावगाढं परमाणु-द्व्यणुकाद्यनन्ताणुकस्कन्धपर्यन्तं सर्वमपि द्रव्यं, परमश्चासाववधिश्च परमावधिरुत्कृष्टावधिरित्यर्थः, लभते पश्यति, तथा कार्मणशरीरं च लभते। आह– 'एकप्रदेशावगाढं' इति सामान्योक्तौ कथं परमाणु-द्व्यणुकादिकं द्रव्यं गम्यते, यावता 'एकप्रदेशावगाढं कार्मणशरीरं' इत्युपात्तमेव कस्माद् न योज्यते ?। नैवम्, कार्मणशरीरस्याऽसंख्येयप्रदेशावगाहित्वेनैकप्रदेशावगाढत्वासंभवादिति। अगुरुलघु च द्रव्यं सर्वमपि परमावधिः पश्यति। जात्यपेक्षं चैकवचनम्, अन्यथा ह्येकप्रदेशावगाढानि कार्मणशरीराण्यगुरुलघूनि, गुरुलघूनि च सर्वाण्यपि द्रव्याण्यसौ पश्यतीत्यवगन्तव्यमिति। तथा, तैजसशरीरविषयेऽवधौ कालतो भवपृथक्त्वं परिच्छेद्यतयाऽवगन्तव्यम्। एतदुक्तं भवति– यस्तैजसशरीरं पश्यति स कालतो भवपृथक्त्वमपि पश्यति। पृथक्त्वं च द्वाभ्यामारभ्याऽऽ नवभ्यः सर्वत्र द्रष्टव्यम्। इह च य एव हि प्राक् तैजसं पश्यतः पल्योपमासंख्येयभागरूपोऽसंख्येयकालोऽभिहितः, स एवानेन भवपृथक्त्वेन विशेष्यते, इदमपि च भवपृथक्त्वं तेनासंख्येयकालेन विशेष्यते– भवपृथक्त्वमध्य एव स पल्योपमासंख्येयभागः कालो नाधिकः, एतन्मध्य एव च भवपृथक्त्वं न बहिस्तादिति। आह– नन्वेकप्रदेशावगाढस्य परमाण्वादेरति-

---

१ एतानि यतः कार्मणद्रव्येभ्योऽतिस्थूलतरकाणि। तैजसादिकानि तस्मात् स्तोकतरौ क्षेत्र-कालावत्र ॥ ६७४ ॥

२ एकप्रदेशावगाढं परमावधिर्लभते कार्मणशरीरम्। लभते चागुरुकलघुकं तैजसशरीरे भवपृथक्त्वम् ॥ ६७५ ॥ ३ घ.छ. 'पुहत्तं'। ४ क.ग. 'गाहित्वा'।

सूक्ष्मत्वात् तदुपलम्भे बादराणां कार्मणशरीरादीनामुपलम्भो गम्यत एव, इति व्यर्थस्तेषां पृथगुपन्यासः; अथवा 'एकप्रदेशावगाढं' इत्यपि न वक्तव्यम्, 'रूपगतं लभते सर्वम्' इत्यस्य वक्ष्यमाणत्वात्। अत्रोच्यते– यः सूक्ष्मं परमाण्वादि पश्यति तेन बादरं कार्मणशरीराद्यवश्यमेव द्रष्टव्यम्, यो वा बादरं पश्यति तेन सूक्ष्ममवश्यं ज्ञातव्यमित्ययं न कोऽपि नियमः, यस्मात् ''तेयाभासादव्वाण अंतरा' इत्यादिवचनादुत्पत्तावगुरुलघु द्रव्यं पश्यन्नप्यवधिर्न गुरुलघूपलभते, अन्यद्वाऽतिस्थूरमपि घटादिकं च; मनःपर्यायज्ञानी मनोद्रव्याणि सूक्ष्माण्यपि पश्यति, चिन्तनीयं तु घटादि स्थूरमपि न पश्यति; एवं विज्ञानविषयवैचित्र्यसंभवे सति संशयव्यवच्छेदार्थमेकप्रदेशावगाढग्रहणे सत्यपि शेषविशेषोपादानमदोषायैवेति। अथवैकप्रदेशावगाढग्रहणेन परमाण्वादि द्रव्यं गृहीतं, शेषं तु कर्मवर्गणापर्यन्तं कार्मणशरीरग्रहणेनोपलक्षितम्, कर्मवर्गणोपरितनद्रव्यं तु सर्वमप्यगुरुलघुग्रहणेन संगृहीतम्; चशब्दसूचितगुरुलघुग्रहणेन तु घट-पट-भू-भूधरादिकं गृहीतम्, इत्येवं समस्तपुद्गलास्तिकायविषयत्वं परमावधेराविष्कृतं भवति। एवं च सति 'रूपगतं लभते सर्वम्' इत्येतद् वक्ष्यमाणमस्यैव नियमार्थं द्रष्टव्यमेव– इत्येतदेव हि रूपगतं नान्यत्। इत्यलं प्रपञ्चेन ॥ इति निर्युक्तिगाथार्थः ॥ ६७५ ॥

अथ भाष्यम्–

[2]एगपएसोगाढं पेच्छइ, पेच्छइ य कम्मयतणुं पि। अगुरुलहुदव्वाणि य चसद्दओ गुरुलहूइं ति ॥६७६॥

तेयसरीरं पासं पासइ सो भवपुहुत्तमेगभवे। णेगेसुं बहुतरए सरिज्ज न उ पासए सव्वे ॥ ६७७ ॥

गतार्थे एव, नवरं 'एगभवे त्ति' एकस्मिन् विवक्षितभवे समुत्पन्नेऽवधावतीतमनागतं च पृथग्भवपृथक्त्वं पश्यति। 'णेगेसु-मित्यादि' यदि पुनस्तस्याऽप्यतीतभवपृथक्त्वस्य मध्येऽनेकेषु भवेष्ववधिज्ञानमुत्पन्नं स्यात् तदा तेन पूर्वावधिना दृष्टाद् भवपृथक्त्वादपि बहुतरानतीता-ऽनागतभवान् स्मरेत्– स्मृतिज्ञानेन जानीयात्, न तु पृथक्त्वान्तर्वर्तिन इव तान् सर्वान् साक्षादवधिज्ञानेन पश्यति, भवपृथक्त्वमात्रमेव साक्षात् पश्यतीति भावः ॥ ६७६ ॥ ६७७ ॥

अत्र प्रेरकः प्राह–

---

१ गाथा ६२७। २ एकप्रदेशावगाढं प्रेक्षते, प्रेक्षते च कार्मणतनुमपि। अगुरुलघुद्रव्याणि च चशब्दतो गुरुलघूनीति ॥ ६७६ ॥
तैजसशरीरं पश्यन् पश्यति स भवपृथक्त्वमेकभवे। अनेकेषु बहुतरान् स्मरेद् न तु पश्यति सर्वान् ॥ ६७७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]एगपएसोगाढे भणिए किं कम्मयं पुणो भणियं । एगपएसोगाढे दिट्ठे का कम्मए चिंता ? ॥ ६७८ ॥
अगुरुलहुगेहणं पि य एगपएसावगाहओ सिद्धं । सव्वं वा सिद्धमिओ रूवगयं लहइ सव्वं ति ॥६७९॥

गतार्थे, नवरमेकप्रदेशावगाढे भणिते किमिति कार्मणशरीरं पुनरप्यवधिविषयत्वेन भणितम् ? । कुतः कारणात् पुनर्न भणनीयम् ?, इत्याह– 'एगपएसोगाढे दिट्ठे' इत्यादि । शेषमनिगूढार्थमेवेति ॥ ६७८ ॥ ६७९ ॥

अत्र गुरुराह—

[2]एगोगाढे भणिए वि संसओ सेसए जहारंभे । सण्हयरं पिच्छंतो थूलयरं न मुणइ घडाइं ॥ ६८० ॥
जह वा मणोविउ नत्थि दंसणं सेसएऽतिथूले वि । एगोगाढे गहिए तह सेसे संसओ होज्जा ॥ ६८१ ॥

उपसंहरन्नाह–

[3]ईय नाणविसयवइचित्तसंभवे संसयावणोयत्थं । भणिए वेगोगाढे केइ विसेसे पयंसंति ॥ ६८२ ॥

कांश्चित् कार्मणशरीरा-ऽगुरुलघ्वादीन् विशेषान् प्रदर्शयन्ति भद्रबाहुस्वामिन इति ॥ ६८२ ॥

प्रकारान्तरेण समाधानमाह–

[4]एगोगाढग्गहणेऽणुगादओ कम्मयं ति जा सव्वं । तदुवरि अगुरुलहूइं चसद्दओ गुरुलहूइं पि ॥ ६८३ ॥
एवं वा सव्वाइं गहियाइं तेसिमेव नियमत्थं । सव्वं रूवगयं ति य एवं चिय नावरमओ त्थि ॥ ६८४ ॥[5]

---

१ एकप्रदेशावगाढे भणिते किं कार्मणं पुनर्भणितम् ? । एकप्रदेशावगाढे दिष्टे का कार्मणे चिन्ता ? ॥ ६७८ ॥
अगुरुलघुग्रहणमपि चैकप्रदेशावगाहतः सिद्धम् । सर्वं वा सिद्धमितो रूपगतं लभते सर्वमिति ॥ ६७९ ॥ २ प. छ. 'गत्तणं' ।
३ एकावगाढे भणितेऽपि संशयः शेषके यथाऽऽरम्भे । सूक्ष्मतरं प्रेक्षमाणः स्थूलतरं न जानाति घटादिम् ॥ ६८० ॥
यथा वा मनोविदो नास्ति दर्शनं शेषकेऽतिस्थूलेऽपि । एकावगाढे गृहीते तथा शेषे संशयो भवेत् ॥ ६८१ ॥
४ इति ज्ञानविषयवैचित्र्यसंभवे संशयापनोदार्थम् । भणिते चैकावगाढे कांश्चिद् विशेषान् प्रदर्शयन्ति ॥ ६८२ ॥
५ एकावगाढग्रहणेऽणुकादयः कार्मणमिति यावत् सर्वम् । तदुपर्यगुरुलघूनि चशब्दतो गुरुलघून्यपि ॥ ६८३ ॥
एवं वा सर्वाणि गृहीतानि तेषामेव नियमार्थम् । सर्वं रूपगतमिति चैवमेव नापरमतोऽस्ति ॥ ६८४ ॥

४४

नियममेव दर्शयति– 'एवं चियेत्यादि' एतदेव परमाण्वादिकं रूपगतं, नातः परं किमपि रूपगतमस्ति ॥ इति गाथानकार्थः ॥ ६८३ ॥ ६८४ ॥

तदेवं परमावधेर्द्रव्यतो विषय उक्तः, अथ क्षेत्र-कालौ तद्विषयभूतौ प्राह–

[1]परमोहि असंखेज्जा लोगंमित्ता समा असंखिज्जा । रूवगयं लहइ सव्वं खेत्तोवमियं अगणिजीवा ॥६८५॥

परमश्चासाववधिश्च परमावधिः क्षेत्रतोऽसंख्येयानि लोकमात्राणि 'खण्डानि' इति गम्यते, 'लभते' इति संबन्धः; कालतः समा उत्सर्पिण्य-वसर्पिणीरसंख्येया एव लभते; द्रव्यतस्तु रूपगतं मूर्तद्रव्यजातं सर्वं परमाण्वादिभेदभिन्नं पुद्गलास्तिकायमित्यर्थः, लभते पश्यति । भावतस्त्वसंख्येयांस्तत्पर्यायानिति । यदुक्तम्– असंख्येयानि लोकमात्राणि खण्डानि परमावधिः पश्यतीति, तदसंख्येयं न्यूनमधिकं च संभवेत्, अतो नियमार्थमाह– उपमानमुपमितं, भावे निष्ठाप्रत्ययः, क्षेत्रस्योपमितं क्षेत्रोपमितं प्रागभिहिता एवाग्निजीवा इदमुक्तं भवति– उत्कृष्टावधेर्विषयत्वेन क्षेत्रतो येऽसंख्येया लोकाः प्रोक्तास्ते प्रागभिहितस्वावगाहनाव्यवस्थापितोत्कृष्टसंख्येयसूक्ष्म-बादराग्निजीवसूच्या परमावधिमतो जीवस्य सर्वतो भ्रम्यमाणया यत्प्रमाणं क्षेत्रं व्याप्यते तत्प्रमाणाः समवसेया इति ।

आह– ननु 'रूपगतं लभते सर्वं' इत्येतदनन्तरगाथायामर्थतोऽभिहितमेव, इति किमर्थं पुनरत्राऽभिहितम् ? । अत्रोच्यते विस्मरणशीलस्य प्रेर्यमिदं, प्रतिविहितत्वात् । अथवा, अत्र 'रूपगतं' इत्येतत् प्रस्तुतक्षेत्र-कालद्वयविशेषणतया व्याख्यायते, तद्यथा लोकमात्राऽसंख्येयखण्डा-ऽसंख्यातोत्सर्पिण्य-ऽवसर्पिणीलक्षणं प्रस्तुतक्षेत्र-कालद्वयं रूपगतं रूपिद्रव्यानुगतमेव लभते, न तु केवलं, क्षेत्र-कालयोरमूर्तत्वात्, अवधेस्तु रूपिद्रव्यविषयत्वात् ॥ इति निर्युक्तिगाथार्थः ॥ ६८५ ॥

अथ भाष्यम्–

[2]खित्तमसंखेज्जाइं लोगसमाइं समाउ कालं च । दव्वं सव्वं रूवं पासइ तेसिं च पज्जाए ॥ ६८६ ॥

क्षेत्रमवधिः पश्यति । कियत् ?, इत्याह– असंख्येयानि लोकसमानि लोकतुल्यानि 'खण्डानि' इति गम्यते । कालं चा

---

१ परमावधिरसंख्येयानि लोकमात्राणि समा असंख्येयाः । रूपगतं लभते सर्वं क्षेत्रोपमितमग्निजीवाः ॥ ६८५ ॥
२ क्षेत्रमसंख्येयानि लोकसमानि समाः कालं च । द्रव्यं सर्वं रूपं पश्यति तेषां च पर्यायान् ॥ ६८६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पश्यति । कियन्तम् ?, इत्याह- समा उत्सर्पिण्य-वसर्पिणीः 'असंख्येयाः' इति लिङ्गव्यत्ययेनाऽत्रापि संबध्यते । द्रव्यं तु सर्वं रूपं पश्यति । भावं तु तेषामेव रूपिद्रव्याणां पर्यायान् वक्ष्यमाणसंख्यान् जानाति ॥ ६८६ ॥

अथ प्रेरकः प्राह-

[2]खेत्तोवमाणमुत्तं जमगणिजीवेहिं किं पुणो भणियं ? । तं चिय संखाइयाइं लोगमित्ताइं निद्दिट्ठं ॥६८७॥

आह- ननु यदग्निजीवैः क्षेत्रोपमानं क्षेत्रोपमितं तद् निर्युक्तिकृता 'सव्वबहुअगणिजीवा निरंतरं जत्तियं भरिज्जंसु' इत्यादि-गाथायां प्रागेवोक्तं प्रतिपादितम्, किमर्थं पुनरप्यत्र "खेत्तोवमियं अगणिजीवा' इत्यनेन गाथावयवेन भणितम् ? । अत्रोत्तरमाह- 'तं चियेत्यादि' तदेव प्रागुक्तमग्निजीवैः क्षेत्रोपमानं क्षेत्रोपमितमिह 'परमोहि असंखेज्जा' इत्यादिवचनादलोके लोकमात्राणि संख्यातीतानि खण्डानि भवन्ति, इति नियतमानतया निर्दिष्टं, न पुनरपूर्वतयेति भावः । इह 'रूवगयं लहइ सव्वं' इत्येतद् भाष्यकृता 'दव्वं सव्वं रूवं पासइ' इति वचनादवधेर्द्रव्यतो विषयप्रतिपादनपरं व्याख्यातम् ॥ ६८७ ॥

अथ 'एगपएसोगाढं' इत्यादिनैव द्रव्यतोऽवधिविषयस्योक्तत्वात् क्षेत्र-कालयोरेव विशेषणत्वलक्षणेन प्रकारान्तरेण व्याख्यातुमाह-

[3]अहवा दव्वं भणियं इह रूवगयं ति खेत्त-कालदुगं । रूवाणुगयं पेच्छइ न य तं चिय तं जओऽमुत्तं ॥६८८॥

अथवा 'एगपएसोगाढं परमोही लहइ कम्मगसरीरं' इत्यादिनैवाऽवधिविषयभूतं द्रव्यं भणितम्, अतो 'रूपगतं लभते सर्वं' इत्येतदवधेर्द्रव्यतो विषयाभिधायकतया न व्याख्यायते । तर्हि कथमिदं नीयते ? इत्याह- 'इहेत्यादि' इह यदसंख्येयलोकखण्डासंख्यातोत्सर्पिण्य-ऽवसर्पिणीलक्षणं क्षेत्र-कालद्वयमवधिविषयत्वेनोक्तम्, तद् 'रूपगतं' इति रूपगतं लभते सर्वम् । कोऽर्थः ?, इत्याह- रूपानुगतं तत्स्थरूपिद्रव्याणां दर्शनाद् रूपिद्रव्यसंबद्धमेव प्रेक्षते, न पुनस्तदेव क्षेत्र-कालद्वयं केवलं पश्यति, यतस्तदमूर्तम्, मूर्तविषयश्चावधिरिति ॥ ६८८ ॥

अथ विनेयानुग्रहार्थं प्रासङ्गिकं किञ्चिदभिधित्सुर्वक्ष्यमाणं च संबन्धयितुमाह-

---

१ क. ग. 'संख्येया' । २ क्षेत्रोपमानमुक्तं यदग्निजीवैः किं पुनर्भणितम् ? । तदेव संख्यातीतानि लोकमात्राणि निर्दिष्टम् ॥ ६८७ ॥ ३ गाथा ५९८ ।
४ गाथा ६८५ । ५ गाथा ६८६ । ६ गाथा ६७५ । ७ अथवा द्रव्यं भणितमिह रूपगतमिति क्षेत्र-कालद्विकम् । रूपानुगतं प्रेक्षते न च तदेव तद् यतोऽमूर्तम् ॥६८८॥

[1]परमोहिन्नाणविओ केवलमंतोमुहुत्तमित्तेण । मणुयक्खओवसमिओ भणिओ, तिरियाण वोच्छामि॥६८९॥

परमावधिज्ञानेन वेत्तीति परमावधिज्ञानवित् तस्य परमावधिज्ञानविदः परमावधौ समुत्पन्ने सति किलान्तर्मुहूर्तेनावश्यमेव केवलज्ञानमुत्पद्यते । केवलज्ञानसूर्यस्य ह्युदयपदवीमासादयतः प्रथमप्रभास्फोटकल्पं परमावधिज्ञानम्, अतस्तदनन्तरमवश्यं भवत्येव केवलज्ञानभास्करोदय इति । तदेवं भणितो मनुष्यसंबन्धी क्षायोपशमिकोऽवधिः । इदानीं तिरश्चामसुं वक्ष्यामि ॥ इति गाथाचतुष्टयार्थः ॥ ६८९ ॥

यथाप्रतिज्ञातमेवाह-

[2]आहार-तेयलंभो उक्कोसेणं तिरिक्खजोणीसु । गाउय जहण्णमोही नरएसु य जोयणुक्कोसो ॥ ६९० ॥

आहारक-तैजसयोरुपलक्षणत्वाद् यान्यौदारिक-वैक्रिया-ऽऽहारक-तैजसद्रव्याणि, यानि च तदन्तरालेषु तदयोग्यानि द्रव्याणि तेषां लाभः परिच्छेद उत्कृष्टतस्तिर्यग्योनिषु मत्स्यादिषु भवति । एतद्द्रव्यानुसारेण क्षेत्र-काल-भावाः स्वयमभ्यूह्या इति । तदेवं यदुक्तम्- 'काई भवपच्चइया खओवसमियाओ काओ वि' तत्र क्षायोपशमिकप्रकृतयोऽभिहिताः । अथ भवप्रत्ययास्ताः प्रतिपाद्याः, ताश्च सुर-नारकाणां भवन्ति, तत्रालपवक्तव्यत्वात् प्रथमं नारकाणामाह— 'गाउएत्यादि' नरकेषु पुनर्नारकाणामुत्कृष्टोऽवधिः क्षेत्रतो योजनं पश्यति, जघन्यस्तु गव्यूतम् । तत्र योजनप्रमाणो रत्नप्रभायां, गव्यूतमानस्तु सप्तमपृथिव्यां द्रष्टव्यः ॥ इति निर्युक्तिगाथार्थः ॥ ६९० ॥

अत्र भाष्यम्—

[4]ओरालिय-वेउव्विय-आहारग-तेयगाइं तिरिएसु । उक्कोसेणं पेच्छइ जाइं च तदंतरालेसु ॥ ६९१ ॥
भणिओ खओवसमिओ भवपच्चइओ स चरिमपुढवीए । गाउयमुक्कोसेणं पढमाए जोयणं होइ ॥ ६९२ ॥

---

१ परमावधिज्ञानविदः केवलमन्तर्मुहूर्तमात्रेण । मनुजक्षायोपशमिको भणितः, तिरश्चां वक्ष्यामि ॥ ६८९ ॥
२ आहार-तैजसलम्भ उत्कर्षेण तिर्यग्योनिषु । गव्यूतं जघन्यमवधिर्नरकेषु च योजनमुत्कृष्टम् ॥ ६९० ॥ ३ गाथा ५६८ ।
४ औदारिक-वैक्रिया-ऽऽहारक-तैजसानि तिर्यक्षु । उत्कर्षेण प्रेक्षते यानि च तदन्तरालेषु ॥ ६९१ ॥
भणितः क्षायोपशमिको भवप्रत्ययितः स चरमपृथिव्याम् । गव्यूतमुत्कर्षेण प्रथमायां योजनं भवति ॥ ६९२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

गतार्थे एव, नवरं भणितः क्षायोपशमिकोऽवधिः । अथ भवप्रत्ययो भण्यते । 'स चरिमपुढवीए त्ति' स चरमायां सप्तमपृथिव्या उत्कृष्टतो गव्यूतं, प्रथमायां तु योजनं भवतीति ॥ ६९१ ॥ ६९२ ॥

तदेवं सामान्येन नारकजातिमधिकृत्याभिहितमुत्कृष्टमवधिक्षेत्रप्रमाणम् । अथ तदेव रत्नप्रभादिपृथिवीविभागेनाह–

[1]चत्तारि गाउयाइं, अद्धुट्ठाइं, तिगाउयं चेव । अड्ढाइज्जा, दोण्णि य, दिवड्ढमेगं च नरएसु ॥६९३॥

इह रत्नप्रभायां नरकेषु नरकावासेषु नारकाणां चत्वारि गव्यूतान्युत्कृष्टमवधिक्षेत्रप्रमाणं भवति । शर्कराप्रभायां त्वर्धं चतुर्थस्य येषु तान्यर्धचतुर्थानि गव्यूतानि । वालुकाप्रभायां गव्यूतत्रयम् । पङ्कप्रभायामर्धं तृतीयस्य येषु तान्यर्धतृतीयानि गव्यूतानि । धूमप्रभायां द्वे गव्यूते । तमायां द्वितीयस्यार्धं यत्र तद् व्यर्धं गव्यूतम् । सप्तमपृथिव्यां पुनर्नरकेषु नारकाणामेकं गव्यूतमुत्कृष्टमवधिक्षेत्रप्रमाणं भवति ॥ इति निर्युक्तिगाथार्थः ॥ ६९३ ॥

सप्तस्वपि पृथिवीषु प्रत्येकमुत्कृष्टादवधिक्षेत्रप्रमाणादर्धगव्यूतेऽपनीते जघन्यमवधिक्षेत्रप्रमाणं भवति । तच्च निर्युक्तिकृता नोक्तम् अतो भाष्यकारः प्राह–

[2]अद्धुट्ठगाइयाइं जहण्णयं अद्धगाउयंताइं । जं गाउयं ति भणियं तं पइ उक्कोसयजहण्णं ॥ ६९४ ॥

अध्युष्टानि सार्धानि त्रीणि गव्यूतानि रत्नप्रभायां जघन्यमवधिक्षेत्रप्रमाणम् । शर्कराप्रभायां त्रीणि गव्यूतानि । वालुकाप्रभायामर्धतृतीयानि । पङ्कप्रभायां द्वे । धूमप्रभायां सार्धम् । तमायां गव्यूतम् । सप्तमपृथिव्यामर्धगव्यूतं जघन्यमवधिक्षेत्रप्रमाणम् । उक्तं च– "[3]रयणप्पभापुढवीनेरइया णं भंते ! केवइयं खेत्तं ओहिणा जाणंति, पासंति ? । गोयमा ! जहण्णेणं अद्धट्ठाइं गाउयाइं, उक्कोसेणं चत्तारि । एवं जाव महातमपुढवीनेरइयाणं पुच्छा । गोयमा ! जहन्नेणं अद्धगाउयं, उक्कोसेणं गाउयं ति ।"

आह– यद्येवम् , अर्धगव्यूतं जघन्यमवधिक्षेत्रम् , तर्हि 'गाउय जहण्णमोही नरएसु य' इत्येतद् व्याहन्यते, इत्याह– 'जं गाउय

---

१ चत्वारि गव्यूतानि, सार्धत्रीणि, त्रिगव्यूतं चैव । अर्धतृतीयानि, द्वे च, सार्धैकमेकं च नरकेषु ॥ ६९३ ॥

२ सार्धत्र्यादिकानि जघन्यमर्धगव्यूतान्तानि । यद् गव्यूतमिति भणितं तत् प्रत्युत्कृष्टजघन्यम् ॥ ६९४ ॥

३ रत्नप्रभापृथिवीनैरयिका भगवन् ! कियत् क्षेत्रमवधिना जानन्ति, पश्यन्ति ? । गौतम ! जघन्येन सार्धत्रीणि गव्यूतानि, उत्कर्षेण चत्वारि । एवं यावन्महातमापृथिवीनैरयिकाणां पृच्छा । गौतम ! जघन्येनार्धगव्यूतम्, उत्कर्षेण गव्यूतमिति । ४ गाथा ६९० ।

मित्यादि' यद् गव्यूतं जघन्यमुक्तं तदुत्कृष्टमध्ये यज्जघन्यं तत्प्रति तदाश्रित्योक्तमित्यदोषः । इदमुक्तं भवति– सप्तस्वपि पृथिवीषु स गव्यूतचतुष्टयादिकमुत्कृष्टमवधिक्षेत्रं, तन्मध्ये सप्तमपृथिवीनारकाणां गव्यूतलक्षणमवधिक्षेत्रं स्वस्थान उत्कृष्टमपि शेषपृथिव्युत्कृष्टापेक्षया सर्वस्तोकत्वाज्जघन्यमुक्तम् ॥ इति गाथार्थः ॥ ६९४ ॥

अथ देवानां भवप्रत्ययावधिमाह—

[1]सक्की-साणा पढमं, दोच्चं च सणंकुमार-माहिंदा । तच्चं च बंभ-लंतग सुक्क-सहस्सार य चउत्थिं ॥६९५॥

आणय-पाणयकप्पे देवा पासंति पंचमिं पुढविं । तं चेव आरण-च्चुय ओहिण्णाणेण [2]पासंति ॥ ६९६ ॥

छट्ठिं हेट्ठिम-मज्झिमगेविज्जा सत्तमिं च उवरिल्ला । संभिण्णलोगनालिं पासंति अणुत्तरा देवा ॥ ६९७ ॥

तत्र शक्रश्चेशानश्च शक्रे-शानौ सौधर्मे-शानकल्पदेवेन्द्रौ, तदुपलक्षिताश्चेह सौधर्मे-शानकल्पनिवासिनः सामानिकादयो देवा अपि गृह्यन्ते ते ह्यवधिना प्रथमां रत्नप्रभाभिधानां पृथिवीं 'पश्यन्ति' इति क्रियां द्वितीयगाथायां वक्ष्यति। तथा, द्वितीयां च 'पृथिवीम्' इत्यग्रतः संबध्यते, सनत्कुमार-माहेन्द्रावपि तृतीय-चतुर्थकल्पदेवाधिपौ, अत्रापि च तदुपलक्षितास्तत्कल्पनिवासिनः सामानिकादयो देवाः परिगृह्यन्ते हि द्वितीयां पृथिवीमवधिना पश्यन्ति । तथा, तृतीयां च पृथिवीं ब्रह्मलोक-लान्तकदेवेन्द्रोपलक्षितास्तत्कल्पनिवासिनो देवाः सामानिकादयः पश्यन्ति । तथा, शुक्र-सहस्रारसुरेन्द्रोपलक्षितास्तत्कल्पवासिनोऽन्येऽपि सामानिकादयो देवाश्चतुर्थीं पृथिवीं पश्यन्तीति तथा, आनत-प्राणतयोः संबन्धिनो देवाः पश्यन्ति पञ्चमीं पृथिवीम्, तामेव चाऽऽरणा-ऽच्युतदेवलोकयोः संबन्धिनो देवा विशुद्धतरां वा पर्यायां चावधिज्ञानेन पश्यन्ति; स्वरूपकथनमेवेदं न तु व्यवच्छेदकम् , अवधिज्ञानस्यैवेह विचारयितुं प्रस्तुतत्वाद् व्यवच्छेद्याभावादिति । लोकपुरुषग्रीवास्थाने भवानि विमानानि ग्रैवेयकाणि; तत्राऽधस्त्य-मध्यमग्रैवेयकविमानवासिनो देवा अधस्त्य-मध्यमग्रैवेयका उच्यन्ते; ते तमःप्रभाभिधानां षष्ठीं पृथिवीं पश्यन्ति । तथा, सप्तमीं च पृथिवीमुपरितनग्रैवेयका देवाः पश्यन्ति । तथा, संभिन्नचतसृष्वपि दिक्षु स्वज्ञानेन व्याप्तां कन्याचोलकसंस्थानां लोकनाडीमवधिना पश्यन्त्यनुत्तरविमानवासिनो देवाः । एष क्षेत्रतो नारकाणां देवानां च भवप्रत्ययावधेर्विषय उक्तः । एतदनुसारतो द्रव्यादयोऽप्यवसेयाः ॥६९५॥६९६॥६९७॥

---

१ शक्रे-शानौ प्रथमां, द्वितीयां च सनत्कुमार-माहेन्द्रौ । तृतीयां च ब्रह्म-लान्तकौ शुक्र-सहस्रारौ च चतुर्थीम् ॥ ६९५ ॥
आनत-प्राणतकल्पे देवाः पश्यन्ति पञ्चमीं पृथिवीम् । तामेवाऽऽरणा-ऽच्युतावधिज्ञानेन पश्यतः ॥ ६९६ ॥
षष्ठीमधस्त्य-मध्यमग्रैवेयकाः, सप्तमीं चोपरितनाः । संभिन्नलोकनाडीं पश्यन्त्यनुत्तरा देवाः ॥ ६९७ ॥ २ ह्र. 'पिच्छंति' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदेवमधो वैमानिकावधेः क्षेत्रप्रमाणं प्रतिपाद्य तिर्यगूर्ध्वं च तत्प्रतिपादयन्नाह–

[1]एएसिमसंखिज्जा तिरियं दीवा य सागरा चेव । बहुययरं उवरिमगा उड्ढं च सकप्पथूभाई ॥ ६९८ ॥

एतेषां शक्रादीनामसंख्येयास्तिर्यग् द्वीपाश्च जम्बूद्वीपादयः, समुद्राश्च लवणसागरादयः 'क्षेत्रतोऽवधिपरिच्छेद्यतयाऽवसेयाः' इति वाक्यशेषः । तदेव द्वीप-समुद्रासंख्येयकं बहुतरकं पश्यन्ति, उपरिमा एवोपरिमका उपर्युपरिवर्तिदेवलोकनिवासिनो देवा इत्यर्थः । तथा, ऊर्ध्वं स्वकल्पस्तूपादेव यावत् क्षेत्रं ते पश्यन्ति, न परतः; आदिशब्दाद् ध्वजादिपरिग्रह इति ॥ ६९८ ॥

तदेवं वैमानिकानामवधिक्षेत्रमानमभिधायेदानीं सामान्यतस्तद्वर्जदेवानां प्रतिपादयन्नाह–

[2]संखेज्जजोयणा खलु देवाणं अद्धसागरे ऊणे । तेण परमसंखेज्जा जहण्णयं पण्णवीसं तु ॥ ६९९ ॥

देवानामर्धसागरोपमे न्यूने आयुषि सति संख्येयानि योजनान्यवधिपरिच्छेद्यं क्षेत्रमवसेयम् । ततः परं संपूर्णार्धसागरोपमादिके आयुषि सति पुनरसंख्येयानि योजनान्यवधिक्षेत्रमवगन्तव्यम् । उक्तमुत्कृष्टमवधिक्षेत्रम् । अथ जघन्यमाह– 'जहण्णमित्यादि' दशवर्षसहस्रस्थितीनां भवनपति-व्यन्तराणां जघन्यमवधिक्षेत्रं पञ्चविंशतियोजनानि, ज्योतिष्क-वैमानिकानां तु जघन्यं भाष्यकार एव वक्ष्यति ॥ इति निर्युक्तिगाथापञ्चकार्थः ॥ ६९९ ॥

अथानन्तरगाथाभाष्यम्–

[3]वेमाणियवज्जाणं सामण्णमिणं तहावि उ विसेसो । उड्ढमहे तिरियम्मि य संठाणवसेण विण्णेओ॥७००॥

इदं च 'संखेज्जजोयणा खलु' इत्यादिकमवधिक्षेत्रप्रमाणं वैमानिकवर्जानां भवनपत्यादिदेवानां सामान्यमविशेषेण द्रष्टव्यम्; तथापि तूर्ध्वम्, अधः, तिर्यक् च तेषां देवानां कयाचिद् दिशा हीना-ऽधिकावधिलक्षणो यो विशेषः स इहैव 'तप्पागारे पल्लग-पडहग-' इत्यादिवक्ष्यमाणावधिक्षेत्रसंस्थानवशेन विज्ञेय इति ॥ ७०० ॥

अथ यदुक्तम्– '[4]जहण्णयं पण्णवीसं तु' तद् विवृण्वन्, अनुक्तं च ज्योतिष्क-वैमानिकानां जघन्यमवधिक्षेत्रमभिधित्सुराह–

---

१ एतेषामसंख्येयास्तिर्यग् द्वीपाश्च सागराश्चैव । बहुकतरमुपरिमका ऊर्ध्वं च स्वकल्पस्तूपादीन् ॥ ६९८ ॥ + क्षेत्रम्० ।

२ संख्येययोजनानि खलु देवानामर्धसागरे ऊने । तेन परमसंख्येयानि जघन्यकं पञ्चविंशतिस्तु ॥ ६९९ ॥

३ वैमानिकवर्जानां सामान्यमिदं तथापि तु विशेषः । ऊर्ध्वमधस्तिर्यक् च संस्थानवशेन विज्ञेयः ॥ ७०० ॥ ४ गाथा ६९९ । ५ गाथा ७०६ ।

[1]पण्णवीसजोयणाइं दसवाससहस्सिया ठिई जेसिं । दुविहो वि जोइसाणं संखेज्ज ठिईविसेसेणं ॥ ७०१ ॥

वेमाणियाणमंगुलभागमसंखं जहण्णओ होइ । उववाए परभविओ तब्भवजो होइ तो पच्छा ॥ ७०२ ॥

पञ्चविंशतिर्योजनानि यज्जघन्यमवधिक्षेत्रमुक्तं तद् येषां देवानां दशवर्षसहस्रप्रमाणा स्थितिस्तेषामेव विज्ञेयम् । ते च भवनपति-व्यन्तरविशेषा एव । ज्योतिष्काणां पुनर्जघन्य उत्कृष्टश्च द्विविधोऽप्यवधिः स्थितिविशेषेण क्षेत्रतः संख्येयान्येव योजनानि विज्ञेयः । इदमुक्तं भवति– ज्योतिष्काणां जघन्यतोऽपि पल्योपमाष्टभागस्थितिर्न तु दश वर्षसहस्राणि, उत्कृष्टतस्तु वर्षलक्षाधिकं पल्योपमम्; अतो बह्वायुष्कत्वेन महर्द्धिकत्वादुत्कृष्टवज्जघन्योऽप्यवधिस्तेषां संख्येयान्येव योजनानि भवति, केवलं जघन्यक्षेत्रादुत्कृष्टं बृहत्प्रमाणं द्रष्टव्यम् । '[2]संखेज्जजोयणा खलु देवाणं' इत्यादिनैवाऽमीषामुत्कृष्टमवधिक्षेत्रमुक्तम्, केवलं जघन्यभणनप्रस्तावात् पुनरपि तदुक्तमित्यदोषः । वैमानिकानां तु जघन्योऽवधिः क्षेत्रतोऽङ्गुलासंख्येयभागो भवति, अयं चोत्पादाद्यसमय एव पारभविको विज्ञेयः, ततः पश्चात् तद्भविकः ॥ इति गाथात्रयार्थः ॥ ७०१ ॥ ७०२ ॥

अथाऽयमेवावधिर्येषामुत्कृष्टादिभेदभिन्नो भवति, तानुपदर्शयन्नाह—

[3]उक्कोसो मणुएसुं मणुस्स-तेरिच्छिएसु य जहण्णो । उक्कोस लोगमेत्तो पडिवाइ परं अपडिवाई ॥७०३॥

इह द्रव्यतः, क्षेत्रतः, कालतो भावतश्चोत्कृष्टोऽवधिर्मनुष्येष्वेव, न देवादिषु । तथा, मनुष्याश्च तिर्यञ्चश्च तेष्वेव जघन्यः, न तु सुर-नारकेषु । तत्र चोत्कृष्टोऽवधिर्द्विविधः– लोकगतः, अलोकगतश्च । तत्र योऽसौ समस्तलोकमात्रदर्शी उत्कृष्टः, मात्रशब्दोऽलोकव्यवच्छेदार्थः, स प्रतिपतनशीलः प्रतिपाती, अप्रतिपाती च भवति । ततः परं येनैकोऽप्याकाशप्रदेशो दृष्टः सोऽप्रतिपात्येव भवति । क्षेत्रपरिणामद्वारेऽपि प्रस्तुते प्रसङ्गतो विनेयानुग्रहार्थं प्रतिपात्य-प्रतिपातिस्वरूपाभिधानमित्यदोषः ॥ इति निर्युक्तिगाथार्थः ॥ ७०३ ॥

॥ उक्तं क्षेत्रपरिमाणद्वारम् ॥

×भागमात्रो- १ पञ्चविंशतिर्योजनानि दशवर्षसहस्रिका स्थितिर्येषाम् । द्विविधोऽपि ज्योतिष्काणां संख्येयानि स्थितिविशेषेण ॥ ७०१ ॥

वैमानिकानामङ्गुलभागमसंख्यं जघन्यतो भवति । उपपाते पारभविकस्तद्भवजो भवति ततः पश्चात् ॥ ७०२ ॥ २ गाथा ६९९ ।

३ उत्कृष्टो मनुजेषु मनुष्य-तिरश्सु च जघन्यः । उत्कृष्टो लोकमात्रः प्रतिपाती परमप्रतिपाती ॥ ७०३ ॥ ४ येनालोकस्यैको-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ संस्थानद्वारमभिधित्सुराह—

[1]थिबुगागार जहन्नो वट्टो, उक्कोसमायओ किंचि । अजहण्णमणुक्कोसो य खेत्तओ अणेगसंठाणो ॥७०४॥

स्तिबुको बिन्दुरुच्यते, तदाकारो जघन्यावधिर्भवति । एतदेवाह— 'वट्टो त्ति' सर्वतो वृत्त इत्यर्थः, 'जावइया तिसमयाहारगस्स' इत्यादिना प्रतिपादितस्य पनकावगाहनाक्षेत्रस्यैतदाकारत्वादिति । उत्कृष्टावधिस्तु परमावधिः किञ्चिदायतः किमपि प्रदीर्घः, न तु सर्वथा वृत्त इत्यर्थः, अग्निजीवसूचेरवधिमच्छरीरस्याऽऽपाद-मस्तकान्तं भ्रम्यमाणाया एतदाकारभावादिति । अजघन्योत्कृष्टो— न जघन्यो नाप्युत्कृष्टो मध्यम इत्यर्थः । अयं पुनः क्षेत्रतोऽनेकानि संस्थानानि यस्येत्यनेकसंस्थानो भवति ॥ इति निर्युक्तिगाथार्थः ॥ ७०४ ॥

अथ भाष्यम्—

[2]पणओ थिबुयागारो तेण जहन्नावही तयागारो । इयरो सेढिपरिक्खेवओ सदेहाणुवत्तीए ॥ ७०५ ॥

इतर उत्कृष्टः, अवधिमत्स्वदेहानुवृत्त्याऽग्निजीवश्रेणिपरिक्षेपात् 'किञ्चिदायतः' इति शेषः । शेषं सुगमम् ॥ ७०५ ॥

अथ मध्यमावधेर्यदनेकसंस्थानत्वमुक्तम्, तद्विशेषतो दर्शयन्नाह—

[3]तप्पागारे पल्लग-पडहग-झल्लरि-मुइंग-पुप्फ-जवे । तिरिय-मणुएसु ओही नाणाविहसंठिओ भणिओ ॥७०६॥

तप्र उद्गुकस्तस्येवाऽऽकारो यस्याऽसौ तप्राकारोऽवधिर्नारकाणां मन्तव्यः, तप्रश्च किलाऽऽयतस्र्यस्रो भवति । पल्लको धान्याधारभूतोऽत्रैव प्रतीतः, स चोर्ध्वायतः, उपरि च किञ्चित्संक्षिप्तः, तदाकारोऽवधिर्भवनपतीनाम् । पटहक आतोद्यविशेषः प्रतीत एव, स च नाऽत्यायतोऽध उपरि च समः, तदाकारोऽवधिर्व्यन्तराणाम् । उभयतो विस्तीर्णचर्मावनद्धमुखो मध्ये संकीर्णो ढक्कालक्षणाऽऽतोद्यविशेषो झल्लरी, तदाकारोऽवधिर्ज्योतिष्काणाम् । मृदङ्गोऽप्यातोद्यमेव, स चोर्ध्वायतोऽधोविस्तीर्ण उपरि च तनुकस्तदाकारोऽवधिः सौधर्मैशानपुतान्तकल्पनिवासिदेवानाम् । 'पुप्फेति' सूचनात् सूत्रमिति कृत्वा सप्रक्षिप्ता पुष्पभृता चङ्गेरी[5] पुष्पचङ्गेरी परिगृह्यते, तदाकारोऽवधिर्ग्रैवेयकविमानवासिदेवानाम् । 'जवे त्ति' यवो यवनालकः, स च कन्याचोलकोऽवगन्तव्यः । अयं च मरुमण्डलादिप्रसिद्धश्चरणकरूपेण

१ स्तिबुकाकारो जघन्यो वृत्तः, उत्कृष्ट आयतः किञ्चित् । अजघन्या-ऽनुत्कृष्टश्च क्षेत्रतोऽनेकसंस्थानः ॥ ७०४ ॥ २ गाथा ५८८ ।
३ पनकः स्तिबुकाकारस्तेन जघन्यावधिस्तदाकारः । इतरः श्रेणिपरिक्षेपतः स्वदेहानुवृत्त्या ॥ ७०५ ॥
४ तप्राकारः पल्लक-पटहक-झल्लरी-मृदङ्ग-पुष्प-यवः । तिर्यग्-मनुजेष्ववधिर्नानाविधसंस्थितो भणितः ॥ ७०६ ॥ ५ ध.क्ष. 'री प' ।

कन्यापरिधानेन सह सीवितो भवति, येन परिधानं न खसति; कन्यानां च मस्तकसत्कपक्षेणाऽयं प्रक्षिप्यते । अयं चोर्ध्वः 'सरकञ्चुक' इति व्यपदिश्यते; एतदाकारोऽवधिरनुत्तरसुराणां भवति । तिर्यग्-मनुष्येषु पुनरवधिर्नानाविधसंस्थानो भणितः । यथा हि स्वयम्भूरमणसमुद्रमत्स्याः सर्वैरप्याकारैः समये भणिताः, तथा तिर्यग्-मनुष्येष्ववधिरपि । किञ्च, स्वयम्भूरमणमत्स्यानां वलयाकारता निषिद्धा, तिर्यग्-मनुष्याणां पुनरवधिस्तदाकारोऽपि भवति ॥ इति निर्युक्तिगाथार्थः ॥ ७०६ ॥

भाष्यम्—

[1]नेरइय-भवण-वणयर-जोइस-कप्पालयाणमोहिस्स । गेविज्जणुत्तराण य होंतागिईओ जहासंखं ॥७०७॥

एतास्तप्रादिसमानाकृतयो नारकाद्यवधेर्यथासंख्यं द्रष्टव्याः । तच्च यथासंख्यं दर्शितमेवेति ॥ ७०७ ॥

अथ तप्रादिस्वरूपं व्याचिख्यासुराह—

[2]तप्पेण समागारो तप्पागारो स चाययत्तंसो । उड्ढायओ य पल्लो उवरिं च स किंचि संखित्तो ॥७०८॥
नचायओ समो विय पडहो हिट्ठोवरिं पईओ सो । चम्मावणद्धविच्छिण्णवलयरूवा य झल्लरिया ॥७०९॥
उड्ढायओ मुइंगो हेट्ठारुंदो तहोवरिं तणुओ । पुप्फसिहावलिरइया चंगेरी पुप्फचंगेरी ॥ ७१० ॥
जवनालउ त्ति भणिओ उब्भो सरकंचुओ कुमारीए । अह सव्वकालनियओ कायाइक्को वि सेसाणं ॥७११॥

गतार्था एव, नवरं 'अह सव्वकालेत्यादि' अथ नारक-भवनपत्यादीनां, तिर्यग्-मनुष्याणां चावधिसंस्थाने विशेष उच्यते । कः पुनरसौ ?, इत्याह— सर्वकालनियतोऽवधिसंस्थानमाश्रित्याऽमीषां नारक-भवनपत्यादिदेवानाम्; शेषाणां तिर्यग्-मनुष्याणां कादाचित्कोऽपि भवति । इदमुक्तं भवति— तप्राद्याकारसमानतया यद् नारक-भवनपत्यादीनामवधेः संस्थानमुक्तम्, तदङ्गीकृत्य तेषा-

(तथा)
१ नैरयिक-भवन-व्यन्तर-ज्योतिः-कल्पा-ऽऽनतानामवधेः । ग्रैवेयका-ऽनुत्तराणां च भवन्त्याकृतयो यथासंख्यम् ॥ ७०७ ॥
२ तप्रेण समाकारस्तप्राकारः स चाऽऽयतस्र्यस्रः । ऊर्ध्वायतश्च पल्लक उपरि च स किंचित् संक्षिप्तः ॥ ७०८ ॥
नाऽत्यायतः समोऽपि च पटहोऽधस्तादुपरि प्रतीतः सः । चर्मावनद्धविस्तीर्णवलयरूपा च झल्लरिका ॥ ७०९ ॥
ऊर्ध्वायतो मृदङ्गोऽधस्ताद् विस्तीर्णस्तथोपरि तनुकः । पुष्पशिखावलिरचिता चङ्गेरी पुष्पचङ्गेरी ॥ ७१० ॥
यवनालक इति भणित ऊर्ध्वः सरकञ्चुकः कुमार्याः । अथ सर्वकालनियतः कादाचित्कोऽपि शेषाणाम् ॥ ७११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

भवधिः सर्वकालं नियतोऽवस्थित एव भवति, न त्वन्याकारतया परिणमति । तिर्यग्-मनुष्याणां तु येनाकारेण प्रथममुत्पन्नोऽवधिः, केषांचित् तेनैवाकारेण सर्वकालं भवतिः केषांचित् त्वन्याकारेण परिणमतीति ॥ ७०८ ॥ ७०९ ॥ ७१० ॥ ७११ ॥

अथ यदुक्तम्- "तिरिय-मणुएसु ओही' इत्यादि, तद् व्याचिख्यासुराह-

[1]नाणागारो तिरिय-मणुएसु मच्छा सयंभूरमणे व्व । तत्थ वलयं निसिद्धं तस्सिह पुण तं पि होज्जाहि ॥७१२॥

तत्र स्वयंभूरमणे तस्य मत्स्यस्याऽऽकारविषये वलयं निषिद्धम्, इह पुनस्तिर्यग्-मनुष्येषु,'तस्यावधेः' इत्येतदप्याद्दृत्या योज्यते, तदपि वलयाकारमाश्रित्य भवेत् । शेषं सुगममिति ॥ ७१२ ॥

[2]तदेवं संस्थाने प्रोक्तेऽपि 'कयापि दिशा बहुरवधिः, कयापि तु स्तोकः?' इति न ज्ञायते । अत एतद् भवनपत्यादीनां दर्शयन्नाह-

[3]भवणवइ-वंतराणं उड्ढं बहुगो अहो य सेसाणं । नारग-जोइसियाणं तिरियं ओरालिओ चित्तो ॥ ७१३ ॥

नारक-ज्योतिष्काणामवधिस्तिर्यग् बहुः, तिर्यग्-मनुष्याणां तु संबन्धी अवधिरौदारिकावधिरुच्यते । अयं पुनश्चित्रो नानाप्रकारः- केषांचिदूर्ध्वं बहुः, अन्येषां त्वधः, अपरेषां तिर्यक्; केषांचित् स्वल्पः इति भावः । शेषं सुगमम् । इति गाथासप्तकार्थः॥७१३॥

॥ इत्यवसितं संस्थानद्वारमिति ॥

अथ सप्रतिपक्षमानुगामुकद्वारमाह-

[4]अणुगामिओ [ऊ]य ओही नेरइयाणं तहेव देवाणं । अणुगामी अणणुगामी मीसो य मणुस्स-तेरिच्छे॥७१४॥

अनुगमनशील आनुगामुकः, यः समुत्पन्नोऽवधिः स्वस्वामिनं देशान्तरमभिव्रजन्तमनुगच्छति, लोचनवत्, असावानुगामुक इत्यर्थः । ईदृश एवावधिर्भवति, केषाम्,? इत्याह- नारकाणां तथा देवानां चेति । तथा, आनुगामुक उक्तस्वरूपः, अनानुगामुकस्त्ववस्थितशृङ्खलादिनियन्त्रितप्रदीपवद् विपरीतः । यस्य तूत्पन्नस्यावधेर्देशो व्रजति स्वामिना सहाऽन्यत्र, देशस्तु प्रदेशान्तरचलितपुरुषस्योपहतैकलोचनवदन्यत्र न व्रजति, असौ मिश्र उच्यते । एष त्रिविधोऽप्यवधिर्मनुष्येषु तिर्यक्षु च भवति ॥ इति निर्युक्तिगाथार्थः ॥ ७१४ ॥

---

१ गाथा ७०६ । २ नानाकारस्तिर्यग्-मनुजेषु मत्स्याः स्वयंभूरमण इव । तत्र वलयं निषिद्धं तस्येह पुनस्तदपि भवेत् ॥ ७१२ ॥ + अवतिष्ठति- ।
[ऊ] उ-। ३ भवनपति-व्यन्तराणामूर्ध्वं बहुकोऽधश्च शेषाणाम् । नारक-ज्योतिष्काणां तिर्यगौदारिकक्षित्रः ॥ ७१३ ॥ ✕ तुल्यः- ।
४ अनुगामुकश्चावधिर्नैरयिकाणां तथैव देवानाम् । अनुगामी, अननुगामी मिश्रश्च मनुष्य-तिर्यक्षु ॥ ७१४ ॥ ० मीऽऽणु- ।

अथ भाष्यम्-

[1]अणुगामिओ अणुगच्छइ गच्छंतं, लोयणं जहा पुरिसं । इयरो य नाणुगच्छइ ठियपईवो व्व गच्छंतं ॥७१५॥
उभयसहावो मीसो देसो जस्साणुजाइ नो अन्नो । कासइ गयस्स गच्छइ एगं उवहयम्मि जहच्छि ॥७१६॥

गतार्थे एव ॥ ७१५ ॥ ७१६ ॥

॥ उक्तमानुगामुकद्वारम् ॥

अथावस्थितद्वारमुच्यते— अवस्थितं चावधेराधारभूतक्षेत्रतः, उपयोगतो लब्धितश्च चिन्तनीयम् । तत्र क्षेत्रत उपयोगतश्चाह—

[2]खित्तस्स अवट्ठाणं तेत्तीसं सागरा उ कालेणं । दव्वे भिन्नमुहुत्तो पज्जवलंभे य सत्तट्ठ ॥ ७१७ ॥

अवधेराधारपर्यायेण क्षेत्रस्यावस्थानं त्रयस्त्रिंशदेव सागरोपमाणि कालेन कालमाश्रित्य भवति । इदमुक्तं भवति- अनुत्तरसुरा यत्र क्षेत्रे जन्मसमयेऽवगाढास्तत्रैवाऽऽभवक्षयमवतिष्ठन्ते, अतस्तत्संबन्धिनोऽवधेरेकत्र क्षेत्रे त्रयस्त्रिंशत्सागरोपमलक्षणकालमवस्थानं संपद्यते । उपयोगतस्त्ववधेः सुर-नारक-पुद्गलादिके द्रव्ये द्रव्यविषयमुपयोगमाश्रित्य तत्राऽन्यत्र वा क्षेत्रे भिन्नमुहूर्तोऽन्तर्मुहूर्तमेवाऽवस्थानं, न परतः, सामर्थ्याभावादिति । तत्रैव द्रव्ये ये पर्यवाः पर्याया धर्मास्तल्लाभे पर्यायात् पर्यायान्तरं च संचरतोऽवधेस्तदुपयोगे सप्ताऽष्टौ वा समयानऽवस्थानं, न परतः । अन्ये तु व्याचक्षते- पर्यवा द्विविधाः- गुणाः, पर्यायाश्च । तत्र सहवर्तिनो गुणाः शुक्लादयः, क्रमवर्तिनस्तु पर्याया नव-पुराणादयः । तत्र गुणेष्वष्टौ समयानवध्युपयोगावस्थानं, पर्यायेषु सप्त समयानिति, स्थूलं हि द्रव्यं, तेन तत्रान्तर्मुहूर्तं तदुपयोगस्थितिः, गुणास्तु ततः सूक्ष्मास्तेनैतेष्वष्टौ समयान् ; गुणेभ्योऽपि पर्यायाः सूक्ष्मा इति तेषु सप्त समयानिति भावः ॥७१७॥

अथ लब्धितोऽवध्यवस्थानमाह-

[3]अद्धाए अवट्ठाणं छावट्ठि सागरा उ कालेणं । उक्कोसगं तु एयं एक्को समओ जहन्नेणं ॥ ७१८ ॥

---

१ अनुगामुकोऽनुगच्छति गच्छन्तं, लोचनं यथा पुरुषम् । इतरश्च नानुगच्छति स्थितप्रदीप इव गच्छन्तम् ॥ ७१५ ॥
उभयस्वभावो मिश्रो देशो यस्याऽनुयाति नो अन्यः । कस्यचिद् गतस्य गच्छति एकमुपहते यथाऽक्षि ॥ ७१६ ॥
२ क्षेत्रस्यावस्थानं त्रयस्त्रिंशत् सागरास्तु कालेन । द्रव्ये भिन्नमुहूर्तः पर्यवलाभे च सप्ताऽष्ट ॥ ७१७ ॥
३ अद्धायामवस्थानं द्वाषष्टिः सागरास्तु कालेन । उत्कृष्टकं त्वेतदेकः समयो जघन्येन ॥ ७१८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

इहाऽद्धाशब्देनाऽवधिज्ञानावरणक्षयोपशमलाभरूपा लब्धिरभिप्रेता। सा च तत्राऽन्यत्र वा क्षेत्रे तेष्वन्येषु वा द्रव्यादिषूपयुक्त अनुपयुक्तस्य वा भवति। अत एतस्या अवधिज्ञानावरणक्षयोपशमलाभरूपाया लब्धेर्निरन्तरमवस्थानं वक्ष्यमाणभाष्ययुक्तया षट् सागरोपमाणि कालेन कालमाश्रित्य भवति। तुशब्दस्य विशेषणार्थत्वाद् नरभवसंबन्धिना कालेनैतान्यधिकानि द्रष्टव्यानि। यावधेर्द्रव्यादिषूपयोगस्य लब्धेश्चान्तर्मुहूर्तादिकमवस्थानमुत्कृष्टं द्रष्टव्यम्, जघन्यतस्त्वेक एव समयो मन्तव्यः; तत्र नर-तिरश्चां स ऊर्ध्वमवधेः प्रतिपातादनुयोगाद् वाऽसौ विज्ञेयः, देव-नारकाणां तु येषां भवस्य चरमसमये सम्यक्त्वलाभाद् विभङ्गज्ञानमवधिरूप परिणमति, ततः परं च मृतानां तदवधिज्ञानं प्रच्यवते, तेषामेष द्रष्टव्यः॥ इति निर्युक्तिगाथाद्वयार्थः॥ ७१८॥

अथ भाष्यम्-

[1]आहारे उवओगे लद्धीए वा [2]हविज्ज अवत्थाणं। आहारो से खित्तं तेत्तीसं सागरा तत्थ॥ ७१९॥

विजयाईसूववाए जत्थोगाढो भवक्खओ जाव। [3]खेत्तेऽवतिट्ठइ तहिं दव्वेसु य देहसयणेसु॥ ७२०॥

आधारो-पयोग-लब्धिविषयमवधेरवस्थानं भवेत्। तत्राधारः 'से' तस्याऽधेः क्षेत्रं मन्तव्यम्। 'तत्थ त्ति' तत्राधारभूते त्रयस्त्रिंशत् सागरोपमाण्यवधेः 'अवस्थानम्' इति शेषः। क्व पुनः क्षेत्रे एतावन्तं कालमवधिरवतिष्ठते?, इत्याह- विजयादिष्वनुत्तरवि मूपपातात् भवक्षयं यावत्; यत्र क्वापि 'खेत्ते त्ति' शयनीयाक्रान्तक्षेत्रे देवोऽवगाढोऽवतिष्ठते, 'तहिं ति' तत्र क्षेत्रेऽस्यावधेस्त्रयस्त्रि सागरोपमाण्यवस्थानं द्रष्टव्यम्। क्षेत्रस्योपलक्षणत्वाद् द्रव्येषु च देहशयनीयेष्ववधेरेतावन्तं कालमवस्थानमवसेयमिति॥७१९॥७२

अथोपयोगतो द्रव्य-गुण-पर्यायेष्ववधेरवस्थानमाह—

[4]दव्वे भिन्नमुहुत्तं तत्थण्णत्थ व हविज्ज खेत्तम्मि। उवओगो न उ परओ सामत्थाभावओ तस्स॥ ७२१

दव्वे तत्थेव गुणे[x] संचरओ सत्त वट्ठ वा समया। अण्णे पुण अट्ठ गुणे भणंति तप्पज्जवे सत्त॥७

---

x गुणे-। १ आहार उपयोगे लब्धौ वा भवेदवस्थानम्। आहारस्तस्य क्षेत्रं त्रयस्त्रिंशत् सागरास्तत्र॥ ७१९॥ २ ध. छ. 'हवेज्ज'। ३ क.ख.ग. 'खि विजयादिपूपपाते यत्रावगाढो भवक्षयो यावत्। क्षेत्रेऽवतिष्ठते तत्र द्रव्येषु च देहशयनेषु॥ ७२०॥

४ द्रव्ये भिन्नमुहूर्तं तत्राऽन्यत्र वा भवेत् क्षेत्रे। उपयोगो न तु परतः सामर्थ्याभावतस्तस्य॥ ७२१॥

द्रव्ये तत्रैव गुणाः संचरतः सप्ताऽष्ट वा समयाः। अन्ये पुनरष्ट गुणान् भणन्ति तत्पर्यवान् सप्त॥ ७२२॥

गतार्थे एव, नवरं तत्र विवक्षितक्षेत्रे, अन्यत्र वा गतस्यावधिमतो द्रव्यविषयेऽन्तर्मुहूर्तमेवोपयोगो भवति। 'दव्वेत्यादि' विवक्षिते द्रव्ये 'गुणे त्ति' गुणेष्वपरापरेषु संचरतः सप्ताऽष्टौ वा समयानवधेरुपयोगो भवति। अन्ये त्वाहुः- गुणेष्वष्टौ, पर्यायेषु समयानिति॥ ७२१॥ ७२२॥

किमित्येवम्?, आह—

[1]जह जह सुहुमं वत्थुं तह तह थोवोवओगया होइ। दव्व-गुण-पज्जवेसुं तह पत्तेयं पि नायव्वं॥ ७२

गतार्थैव॥ ७२३॥

अथ लब्धितोऽवस्थानमाह-

[2]तेत्थण्णत्थ य खित्ते दव्वे गुण-पज्जवो-वओगे य। चिट्ठइ लद्धी सा पुण नाणावरणक्खवोवसमो॥७२

सा सागरोवमाइं छावट्ठिं होज्ज साइरेगाइं। विजयाईसु दो वारे गयस्स नरजम्मणा समयं॥ ७२५

गतार्थे॥ ७२४॥ ७२५॥

अथोपलब्धिविषयं जघन्यमवस्थानमाह—

[3]सव्वजहण्णो समओ दव्वाईसु होइ सव्वजीवाणं।

अत्र नर-तिरश्चां समयादूर्ध्वमवधेः प्रतिपातादनुयोगाद् वोपयोग-लब्ध्योः समयमवस्थानं परोऽवगच्छत्येव; अतः सुर-ना विषयमेतत् पृच्छन् गाथार्धमाह-

[4]स पुण सुर-नारगाणं हविज्ज किह खेत्त-कालेसु?॥ ७२६॥

स पुनः सुर-नारकाणां द्रव्यादिष्ववधिलब्ध्यु-पयोगयोर्जघन्यतः कथं समयोऽवस्थानम्?- क्व तिष्ठतां सुर-नारकाणा

---

१ यथा यथा सूक्ष्मं वस्तु तथा तथा स्तोकोपयोगता भवति। द्रव्य-गुण-पर्यवेषु तथा प्रत्येकमपि ज्ञातव्यम्॥ ७२३॥

२ तत्राऽन्यत्र च क्षेत्रे द्रव्ये गुण-पर्यवो-पयोगेषु च। तिष्ठति लब्धिः सा पुनर्ज्ञानावरणक्षयोपशमः॥ ७२४॥

सा सागरोपमाणि द्वाषष्टिर्भवति सातिरेकाणि। विजयादिषु द्वौ वारौ गतस्य नरजन्मना समकम्॥ ७२५॥

३ सर्वजघन्यः समयो द्रव्यादिषु भवति सर्वजीवानाम्। ४ स पुनः सुर-नारकाणां भवेत् कथं क्षेत्र-कालयोः?॥ ७२६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्याह– 'खेत्त-कालेसु त्ति' तयोरेव निजक्षेत्र-कालयोस्तिष्ठताम्। इदमुक्तं भवति– अन्यत्र नर-तिर्यक्संबन्धिन्याधारभूते क्षेत्रे स्वायुष्करूपे च काले गतानाममीषामपि भवति द्रव्यादिष्ववधेः समयोऽवस्थानं, केवलं ते तत्र गताः सुरनारका न भवन्त्येव, किन्तु नर-तिर्यञ्च एवेति; अत उक्तम्– तस्मिन्नेव स्वाधारभूते क्षेत्रे स्वायुष्कलक्षणे च काले तिष्ठतामिति। तत्र हि तिष्ठतां सुर-नारकाणामवधेः प्रतिपाताभावात् समयमात्रावस्थानासंभव एवेति भावः ॥ ७२६ ॥

अत्र सूरिराह—

[1]चरिमसमयम्मि सम्मं पडिवज्जंतस्स जं चिय विभंगं। तं होइ ओहिनाणं गयस्स बीयम्मि[2] तं पडइ॥७२७॥

व्याख्यातार्थैव ॥ इति गाथानवकार्थः ॥ ७२७ ॥

॥ उक्तमवस्थितद्वारम् ॥

अथ चलद्वारमभिधित्सुराह–

[3]वुड्ढी वा हाणी वा चउव्विहा होइ खेत्त-कालाणं। दव्वेसु होइ दुविहा छव्विह पुण पज्जवे होइ ॥७२८॥

चलद्वारमिदमुच्यते। चलश्चावधिद्रव्यादिविषयमङ्गीकृत्य वर्धमानको हीयमानको वा भवति। वृद्धि-हानी च प्रत्येकं षड्विधे सामान्येन आगमे प्रोक्ते, तद्यथा– अनन्तभागवृद्धिः, असंख्यातभागवृद्धिः, संख्यातभागवृद्धिः, संख्यातगुणवृद्धिः, असंख्यातगुणवृद्धिः, अनन्तगुणवृद्धिः; अनन्तभागहानिः, असंख्यातभागहानिः, संख्यातभागहानिः, संख्यातगुणहानिः, असंख्यातगुणहानिः, अनन्तगुणहानिः। एतयोश्च षड्विधवृद्धि-हान्योर्मध्यादवधिविषयभूतक्षेत्र-कालयोराद्यन्तभेददयवर्जिता चतुर्विधा वृद्धिर्हानिर्वा भवति। अनन्तभागवृद्धिः, अनन्तगुणवृद्धिर्वा, तथाऽनन्तभागहानिः, अनन्तगुणहानिर्वा क्षेत्र-कालयोर्न संभवति, अवधिविषयभूतक्षेत्रस्याऽऽनन्त्याभावात्, कालस्याऽप्यवधिविषयभूतस्याऽनन्तत्वाप्रतिपादनात्। तदिदमत्र हृदयम्– यावत् क्षेत्रं प्रथममवधिज्ञानिना दृष्टम्, ततः प्रतिसमयमसंख्यातभागवृद्धं कश्चित् पश्यति, कोऽपि संख्यातभागवृद्धम्, अन्यस्तु संख्यातगुणवृद्धम्, अपरस्त्वसंख्यातगुणवृद्धं क्षेत्रं पश्यति। एवं हीयमानमपि वाच्यम्। एवं क्षेत्रे वृद्धिर्हानिर्वा चतुर्धा भवति। एवं कालेऽपि वृद्धि-हान्योश्चातुर्विध्यं भावनीयमिति।

द्रव्येषु पुनरवधिविषयभूतेषु द्विविधा वृद्धिर्हानिर्वा भवति। इदमुक्तं भवति– अवधिज्ञानिना यावन्ति द्रव्याण्युपलब्धानि प्रथमं,

---

१ चरमसमये सम्यक् (एवं) प्रतिपद्यमानस्य तदेव विभङ्गम्। तद् भवत्यवधिज्ञानं गतस्य द्वितीये तत् पतति ॥ ७२७ ॥ २ घ.छ. 'म्मि से प'।

३ वृद्धिर्वा हानिर्वा चतुर्विधा भवति क्षेत्र-कालयोः। द्रव्येषु भवति द्विविधा षड्विधा पुनः पर्यवे भवति ॥ ७२८ ॥ +भवपद–।

ततः परं तेभ्योऽनन्तभागाधिकानि कश्चित् पश्यति, अपरस्तु तेभ्योऽनन्तगुणवृद्धान्येव तानि पश्यति; न त्वसंख्यातभागाधिक्यादिना वृद्धानि, वस्तुस्वाभाव्यात्; अपरस्ततः परं पूर्वोपलब्धेभ्योऽनन्तभागहीनानि द्रव्याणि पश्यति, अन्यस्त्वनन्तगुणहीनान्येव तानि तेभ्यः पश्यति, न त्वसंख्यातभागहीनत्वादिना हीनानि पश्यति, तथास्वाभाव्यादिति। पर्यायेषु पुनः पूर्वोक्ता षड्विधाऽपि वृद्धिर्हानिर्वा भवति ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥ ७२८ ॥

अथ विस्तरार्थं भाष्येणाह–

[1]वुड्ढी वा हाणी वाऽणंता-[2]संखिज्ज-संखभागाणं। [3]संखिज्जा-[4]संखिज्जा-णंतगुणा चेति छब्भेया ॥ ७२९ ॥

अनन्तश्चाऽसंख्येयश्च संख्येयश्च ते तथा, ते च ते भागाश्च, तेषां वृद्धिर्हानिर्वेति। एवं त्रिविधे प्रत्येकं वृद्धि-हानी भवतः। अपरमप्यनयोः प्रत्येकं त्रैविध्यमाह– 'संखेज्जेत्यादि' गुणशब्दः प्रत्येकमभिसंबध्यते। ततश्च संख्यातगुणा, असंख्यातगुणा, अनन्तगुणा चेत्येवं त्रिविधा प्रत्येकं वृद्धिर्हानिश्चेति। इत्थं वृद्धि-हान्योः प्रत्येकं पूर्वदर्शितं षड्विधत्वं भावनीयमिति ॥ ७२९ ॥

तदेवं वृद्धि-हान्योः प्रत्येकं षड्विधत्वं सामान्येनोपदर्श्येदानीं क्षेत्र-कालयोर्वृद्धि-हानिचातुर्विध्यस्य भावार्थं दर्शयन्नाह–

[1]पेइसमयमसंखिज्जइभागहियं कोइ संखभागहियं। अन्नो संखेज्जगुणं [2]खित्तमसंखिज्जगुणमण्णो ॥ ७३० ॥

पेच्छइ विवड्ढमाणं हायंतं वा, तहेव कालं पि। नाणंतवुड्ढि-हाणी पेच्छइ जं दो वि नाणंते ॥७३१॥

गतार्थे एव, नवरं क्षेत्र-कालयोर्नाऽनन्ते वृद्धि-हानी। कुतः?, इत्याह– 'पेच्छईत्यादि' यद् यस्मादू द्वावपि क्षेत्र-कालौ नाऽनन्ताववधिज्ञानी पश्यति, पूर्वोक्तयुक्तेरिति ॥ ७३० ॥ ७३१ ॥

अथ द्रव्यविषये प्रत्येकं द्विविधे वृद्धि-हानी, पर्यायविषयां तु वृद्धिं हानिं च प्रत्येकं षड्विधामाह–

[1]दव्वमणंतंसहियं अनंतगुणवड्ढियं च पेच्छेज्जा। हायंतं व, भावम्मि छव्विहा वुड्ढि-हाणीओ ॥७३२॥

---

१ वृद्धिर्वा हानिर्वाऽनन्ता-ऽसंख्येय-संख्यभागानाम्। संख्येया-ऽसंख्येया-ऽनन्तगुणा चेति षड्भेदा ॥ ७२९ ॥ २ घ.छ. 'संखेज्ज'।

३ प्रतिसमयमसंख्येयभागाधिकं कश्चित् संख्यभागाधिकम्। अन्यः संख्येयगुणं क्षेत्रमसंख्येयगुणमन्यः ॥ ७३० ॥
प्रेक्षते विवर्धमानं हीयमानं वा तथैव कालमपि। नानन्तवृद्धि-हानी, प्रेक्षते यद् द्वे अपि नाऽनन्ते ॥ ७३१ ॥ ४ घ.छ. 'खेत्त'।

५ द्रव्यमनन्तांशाऽधिकमनन्तगुणवर्धितं च प्रेक्षेत। हीयमानं वा, भावे षड्विधे वृद्धि-हानी ॥ ७३२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

गतार्थैव, नवरं 'अणंतंसहियं ति' अनन्ततमौंशो भागोऽनन्तांशस्तेनाधिकं द्रव्यं कश्चित् पश्यतीति ॥ ७३२ ॥

एतेषां च द्रव्य-क्षेत्र-काल-भावानां परस्परसंयोगे चिन्त्यमाने एकस्य वृद्धावेवाऽपरस्य वृद्धिः, न त्वेकस्य हानावन्यस्य वृद्धिः एकस्य हानावेवाऽपरस्य हानिः, न त्वेकस्य वृद्धावपरस्य हानिर्भवति । अपरं च, एकस्य द्रव्यादेर्भागेन वृद्धौ हानौ वा जायमानायाम परस्यापि भागेनैव वृद्धि-हानी प्रायः, न तु गुणकारेण; गुणकारेणाप्येकस्य वृद्धि-हान्योः प्रवर्तमानयोरपरस्यापि प्रायस्तेनैव ते प्रवर्तेते इति दर्शयन्नाह—

[2]वुड्ढीए चिय वुड्ढी हाणी हाणीए न उ विवज्जासो । भागे भागो गुणणे गुणो य दव्वाइसंजोए ॥ ७३३ ॥

इह वृद्धि-हानी समाश्रित्य द्रव्य-क्षेत्र-काल-भावानां परस्परं संयोगे चिन्त्यमाने एकस्य द्रव्यादेर्वृद्धावेव तदपरस्य वृद्धिर्जायते, एकस्य हानावेव च तदन्यस्य हानिः प्रवर्तते । 'न उ विवज्जासो त्ति' न तूक्तस्य विपर्यासो विपर्ययो मन्तव्यः— एकस्य द्रव्यादेर्हानाव परस्य वृद्धिः, तथा, एकस्य द्रव्यादेर्वृद्धावन्यस्य हानिरित्येवंलक्षणो विपर्ययः कदाचिदपि न भवतीत्यर्थः ।

अथवा गाथार्थमिदमन्यथा व्याख्यायते, एवकारस्य भिन्नक्रमेण योजनात्, तथथा— एकस्य द्रव्यादेर्वृद्धौ तदपरस्य वृद्धिरेव, न तु हानिलक्षणो विपर्यासो भवति 'कालं चउण्ह वुड्ढी' इति वचनात्; एकस्मिन् वर्धमानेऽपरस्यावस्थानं तु स्यादपि 'कालो भइयव्वो खेत्तवुड्ढीए' इति वचनात् । तथा, एकस्य द्रव्यादेर्हानौ तदपरस्य हानिरेव, न तु वृद्धिलक्षणो विपर्यासः, अवस्थानं तु स्यादपीति । 'भागे भागो त्ति' एकस्य क्षेत्रादेरसंख्यातमादिके भागे वर्धमाने तदपरस्याऽपि भाग एव वर्धते, अवस्थानं वा भवति, न तु गुणकारेण वृद्धिः । तथा, गुणकारेणाप्येकस्य वृद्धौ जायमानायामपरस्याऽपि तेनैवाऽसौ भवति, अवस्थानं वा जायते, न तु भागेन वृद्धिः । प्रायेण चैतद् द्रष्टव्यम्, क्षेत्रादेर्भागेन वृद्धावपि द्रव्यादेर्गुणकारेण वृद्धिसंभवादिति ॥ ७३३ ॥

अथ परः प्रेरयति—

कंह[6] खेत्तअसंखभागाइसंभवे संभवो न दव्वे वि ?। किह वा दव्वाणंते पज्जवसंखिज्जभागाइं ? ॥ ७३४ ।

---

१ घ. छ. 'गुणका' । २ वृद्धावेव वृद्धिर्हानिर्हानौ न तु विपर्यासः । भागे भागो गुणने गुणश्च द्रव्यादिसंयोगे ॥ ७३३ ॥

३ घ. छ. ' ना त ' । ४ गाथा ६१७ । ५ घ. छ. 'स्य हा' । ६ घ. छ. 'हानावप' ।

७ कथं क्षेत्रासंख्यभागादिसंभवे संभवो न द्रव्येऽपि ?। कथं वा द्रव्यानन्त्ये पर्यवासंख्ययेभागादि ? ॥ ७३४ ॥ ८ घ. छ. 'संखेज्ज' ।

४६

ननु कथं क्षेत्रस्याऽसंख्येयभागादिवृद्धौ सत्यां तदाधेयद्रव्याणामप्यसंख्येयभागादिवृद्धेर्न संभवः ?, कथं वा द्रव्यानन्त्ये द्रव्यस्याऽनन्तभागवृद्धौ जायमानायां पर्यायाणामसंख्येयभागादिवृद्धिः, द्रव्यानन्तगुणवृद्धौ वा पर्यायाणामसंख्यातगुणादिवृद्धिः प्रतिपाद्यते ? । इदमुक्तं भवति— क्षेत्राधाराणि हि द्रव्याणि, द्रव्याधाराश्च पर्यायाः, ततो यादृश्याधारस्य वृद्धिर्हानिर्वा, तादृश्येवाऽऽधेयस्यापि युक्ता, तत्कथमिह वैचित्र्यम्— क्षेत्रस्य चतुर्विधे वृद्धि-हानी, द्रव्यस्य द्विविधे, पर्यायाणां तु षड्विधे इति ? ॥ ७३४ ॥

अत्र सूरिराह—

[2]खेत्ताणुवत्तिणो पोग्गला गुणा पोग्गलाणुवत्ती य । सामण्णा विण्णेया [3]न उ ओहिन्नाणविसयम्मि ॥७३५

क्षेत्रानुवर्तिनः पुद्गलाः परमाणु-स्कन्धादयः, गुणास्तु पर्यायाः पुद्गलानुवर्तिनः, इत्येवमेते सामान्याः सामान्येन विज्ञेयाः ; कस्य किल हन्त ! नैतदभिमतम् ? । अनभिमतप्रतिषेधं त्वाह— न त्ववधिज्ञानविषयत्वेनैवमेतेऽभिप्रेताः । इदमत्र हृदयम्— अस्त्येवैतत् सामान्येन, को वै न मन्यते यदुत— सामान्यतः समस्तलोकाकाशस्याऽसंख्येयतमादिके भागे समस्तपुद्गलास्तिकायस्याप्यसंख्येयतमादिक एव भागः स्वरूपेण वर्तते, समग्रपुद्गलास्तिकायस्यानन्ततमादिके भागे समस्ततत्पर्यायराशिरप्यनन्ततमादिभागो वर्तते; अतः क्षेत्रस्याऽसंख्येयादिभागवृद्धि-हान्योर्द्रव्यस्यापि तदनुवृत्त्या तथैव वृद्धि-हानी स्याताम्, द्रव्यस्यानन्ततमभागादिवृद्धि-हान्योस्तत्पर्यायाणामपि तदनुवृत्त्या तथैव वृद्धि-हानी भवेताम् ?; परं किन्त्वत्रावधिज्ञानविषयभूतस्य क्षेत्रादेर्वृद्धि-हानी चिन्तयितुमभिप्रेते, न तु सामान्येन स्वरूपस्थस्य एवं च विशेषिते ये वृद्धि-हानी ते अवधिज्ञानावरणक्षयोपशमाधीनत्वाद् विचित्रे । अतो यथोक्तप्रकारेणैव ते अत्र युक्ते, नान्यथेति ॥ ७३५ ॥

एतद्गाथोक्तमेवार्थं प्रपञ्चयन्नाह—

दव्वाइं सखेत्ताओऽणंतगुणा पज्जवा सदव्वाओ । नियया[4]हाराहीणा तेसिं वुड्ढी य हाणी य ॥ ७३६ ॥

न उ नियया[5]हारवसां अवहिनिबंधो जओ परित्तो सो । चित्तो तह[6]ण्णहा वि य आणागब्भो य पाएण ॥७३७

---

१ क. ख. ग. 'दृश्येवाधा' । २ क्षेत्रानुवर्तिनः पुद्गला गुणाः पुद्गलानुवर्तिनश्च । सामान्या विज्ञेया न त्ववधिज्ञानविषये ॥७३५॥

३ क. 'न ओ' घ. छ. 'न य ओ' । ४ क. 'हिविन्ना' । ५ क. ग. 'णास्तत्प' । ६ घ. छ. 'मस्तपु' । ७ घ. छ. 'दिभागैः स' ।

८ द्रव्याणि स्वक्षेत्रादनन्तगुणाः पर्यवाः स्वद्रव्यात् । निजकाधाराधीना तेषां वृद्धिश्च हानिश्च ॥ ७३६ ॥
न तु निजकाधारवशादवधिनिबन्धो यतः परीतः सः । चित्रस्तथाऽन्यथापि चाज्ञागर्भश्च प्रायेण ॥ ७३७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

इह स्वरूपेण तावत् समस्तपुद्गलास्तिकायलक्षणानि द्रव्याण्याधारभूतात् स्वक्षेत्रात् 'अनन्तगुणानि' वर्तन्त इति लिङ्गव्यत्ययेनाऽत्रापि योज्यते, एकैकाकाशप्रदेशेऽनन्तस्य परमाणु-द्व्यणुकादिद्रव्यस्यावगाहनात् । पर्यवाः पर्यायाः पुनः स्वाश्रयभूताद् द्रव्यादनन्तगुणाः, एकैकस्य परमाण्वादेरनन्तपर्यायत्वादिति । एवंभूतं क्षेत्रादीनां स्वरूपं वर्तत इति स्वरूपकथनमात्रं तावत् कृतम् । प्रकृतोपयोग्याह– 'नियया-हारेत्यादि' द्रव्यस्य निजकाधारः क्षेत्रम्, पर्यायाणां तु निजकाधारो द्रव्याणि, तदधीना च तेषां द्रव्य-पर्यायाणां सामान्येन वृद्धिः, हानिश्च भवति । क्षेत्रस्य चतुर्विधायां वृद्धौ हानौ वा द्रव्यस्यापि तथैव ते प्राप्नुतः, द्रव्यस्य द्विविधायां वृद्धौ हानौ वा पर्यायाणामपि तथैव ते युज्येते, इत्येवं यथा परः प्रतिपादयति, तथा वयमपि स्वरूपस्थितिसामान्यचिन्तायां मन्यामहे, नात्र विवाद इति भावः । परं किन्तु 'न उ नियये'त्यादि' न तु निजकाधारवशाद्वधिनिबन्धोऽवधिविषयो वर्धते हीयते वा, यतः परीतः प्रतिनियतोऽसौ यथोक्तस्वरूपेण क्षयोपशमनियमितोऽसौ चित्रक्षयोपशमत्वाच्चित्रोऽनेकरूपो यथा युक्त्या घटते तथैवाऽयं प्रवर्तते, तामुल्लङ्घ्याऽन्यथापि च प्रवर्तत इति नाऽत्रैकान्तः । आज्ञाग्राह्यश्च प्रायेणाऽयम्, इत्याज्ञैवाऽत्र प्रमाणं, किं स्वेच्छाप्रवृत्तशुष्कतर्कयुक्त्युपन्यासेन ?। प्रायोग्रहणाद् यथासंभवं युक्तिरपि वाच्या ॥ इति गाथानवकार्थः ॥ ७३६ ॥ ७३७ ॥

॥ गतं चलद्वारम् ॥

अथ तीव्र-मन्दद्वारमभिधित्सुराह—

फड्डा य असंखेज्जा संखेज्जे यावि एगजीवस्स । एगप्फड्डुवओगे नियमा सव्वत्थ उवउत्तो ॥ ७३८ ॥

फड्डा य आणुगामी अणाणुगामी य मीसया चेव । पडिवाई अपडिवाई मीसा य मणुस्स-तेरिच्छे ॥ ७३९ ॥

अपवरकादिजालकान्तरस्थप्रदीपप्रभानिर्गमस्थानानीवाऽवधिज्ञानावरणक्षयोपशमजन्यान्यवधिज्ञाननिर्गमस्थानानीह फड्डकान्युच्यन्ते । तानि चैकजीवस्य संख्येयानि, असंख्येयान्यपि च भवन्ति । तत्र चैकफड्डकोपयोगे जन्तुर्नियमात् सर्वत्र सर्वैः फड्डकैरुपयुक्तो भवति, एकोपयोगत्वाज्जीवस्य, एकलोचनोपयोगे द्वितीयलोचनोपयुक्तवदिति । एतानि च फड्डकानि त्रिधा भवन्ति, तद्यथा– अनुगमनशीलान्यानुगामुकानि– यत्र देशे तिष्ठतोऽवधिमतो जीवस्योत्पन्नानि, ततोऽन्यत्रापि व्रजतस्तस्यानुयायीनीत्यर्थः, एतद्विपरीतानि त्वनानुगामुकानि, आनुगामुका-ऽनानुगामुकोभयस्वरूपाणि तु मिश्राणि– कानिचिद् देशान्तरानुयायीनि, कानिचिद् नेत्यर्थः । एतानि च

१ फड्डकान्यसंख्येयानि संख्येयानि चाप्येकजीवस्य । एकफड्डकोपयोगे नियमात् सर्वत्रोपयुक्तः ॥ ७३८ ॥
फड्डकानि चानुगामीन्यननुगामीनि मिश्राणि चैव । प्रतिपातीन्यप्रतिपातीनि मिश्राणि च मनुष्य-तिर्यक्षु ॥ ७३९ ॥

प्रत्येकं पुनस्त्रिधा भवन्ति, तद्यथा– प्रतिपतनशीलानि प्रतिपातीनि– कियन्तं कालं स्थित्वा ततो ध्वंसनस्वभावानीत्यर्थः, तद्विपरीतानि त्वप्रतिपातीनि– आमरणान्तभावीनीत्यर्थः, प्रतिपात्य-ऽप्रतिपात्युभयरूपाणि तु मिश्राणि– कानिचित् प्रतिपातीनि, कानिचिद् नेत्यर्थः । एतानि च मनुष्य-तिर्यक्षु योऽवधिस्तस्मिन्नेव भवन्ति, न देव-नारकावधाविति ।

आह– ननु तीव्र-मन्दद्वारे प्रस्तुते फड्डकावधिस्वरूपं प्रतिपादयतः प्रक्रमविरोध इति । अत्रोच्यते– प्रायोऽनुगामुका-ऽप्रतिपातीनि फड्डकानि तीव्रविशुद्धियुक्तत्वात् तीव्राणि भण्यन्ते, अननुगामि-प्रतिपातीनि त्वविशुद्धत्वाद् मन्दान्युच्यन्ते, मिश्राणि तु मध्यमानि, इत्यर्थतस्तीव्र-मन्दद्वारम्, इत्यदोषः । अपरस्त्वाह– अनुगामुका-ऽप्रतिपातिफड्डकानां कः परस्परं विशेषः ?, अनानुगामुक-प्रतिपातिफड्डकानां चान्योन्यं को भेदः ? इति । अत्राभिधीयते– अप्रतिपाति फड्डकमनुगाम्येव भवति, अनुगामुकं त्वप्रतिपाति प्रतिपाति च भवतीति विशेषः । तथा, प्रतिपाति पतत्येव, पतितमपि च देशान्तरगतस्य कदाचिज्जायते; न चेत्थमनानुगामुकम् । इति निर्युक्तिगाथाद्वयसंक्षेपार्थः ॥ ७३८ ॥ ७३९ ॥

विस्तरार्थं तु भाष्यकार एवाह–

[1]जालंतरत्थदीवप्पहोवमो फड्डगावही होइ । तिव्वो विमलो मंदो मलीमसो मीसरूवो य ॥ ७४० ॥

अपवरकजालकान्तरस्थप्रदीपप्रभोपमः फड्डकावधिर्भवति । तत्र च विशुद्धक्षयोपशमजन्यफड्डकप्रभवोऽवधिर्विमलः, स च तीव्र उच्यते, अविशुद्धक्षयोपशमप्रवर्तितश्च मलीमसः, स च मन्दोऽभिधीयते । मध्यमक्षयोपशमाविष्कृतफड्डकसमुत्थस्तु मिश्ररूपस्तीव्र-मन्दस्वरूप इत्यर्थः । अत एव तीव्र-मन्दद्वारमिदमुच्यते ॥ ७४० ॥

'[2]एगफड्डुवओगे' इत्युत्तरार्धं व्याचिख्यासुराह–

[3]उवओगं एगेण वि दिंतो सो फड्डिएहिं सव्वेहिं । उवउज्जइ जुगवं चिय जह समयं दोहिं नयणेहिं ॥ ७४१ ॥

गतार्था ॥ ७४१ ॥

अथ प्रेर्यमुत्थाप्य परिहरन्नाह–

१ जालान्तरस्थदीपप्रभोपमः फड्डकावधिर्भवति । तीव्रो विमलो मन्दो मलीमसो मिश्ररूपश्च ॥ ७४० ॥ २ गाथा ७३८ ।
३ उपयोगमेकेनापि ददत् स फड्डकैः सर्वैः । उपयुज्यते युगपदेव यथा समकं द्वाभ्यां नयनाभ्याम् ॥ ७४१ ॥ x तस्तु-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]किह नोवओगबहुया, भण्णइ न विसेसओ स सामण्णो । तग्गयविसेसविमुहो खंधावारोवओगो व्व ॥७४

नन्वेवं सत्यवधिमतः कथं नोपयोगबहुता, अनेकैः फड्डकैरुपयुज्यमानत्वात् ?। अत्रोक्तमेवोत्तरम्– एकस्मिन् समये जीवस्
एवोपयोगो भवति, तत्स्वाभाव्यात्, नयनद्वयोपयोगवत् । तस्मादनेकफड्डकैरुपयुज्यमा ऽपि न तस्योपयोगबहुता । अथवा, भण्
ऽत्रोत्तरम्— अनेकवस्तुविशेषोपयोगे ह्येतत् स्यात्, यथा– एते हस्तिनः, दक्षिणतस्त्वमी वाजिनः, वामतस्तु रथाः, पुरतः पदा
इत्यादि । न चेहानेकवस्तुविशेषोपयोगोऽस्ति । किं तर्हि ?, सामान्योपयोग एव, ग्राह्यवस्तुगतविशेषवैमुख्यात्, नयनद्वयेन स्कन्धा
रोपयोगवत्, अयं चैक एवोपयोगः, इति न तद्बहुतेति ॥ ७४२ ॥

'[2]फड्डा य आणुगामी' इत्यादि विवृण्वन्नाह—

[3]अणुगामि-नियय-सुद्धाइं सेयराइं च मीसयाइं च । एक्केक्कसो विभिन्नाइं फड्डयाइं विचित्ताइं ॥ ७४३ ॥

इह तावत् फड्डकानि त्रिधा भवन्ति, तद्यथा– अनुगामीनि, नियतानि– अप्रतिपातीन्यर्थः, शुद्धानि– तीव्राणीत्यर्थः । 'सेय
च त्ति' सेतराणि चैतानि भवन्ति, तद्यथा– अनुगामिभ्य इतराण्यननुगामीनि, अप्रतिपातिभ्य इतराणि प्रतिपातीनि, तीव्रेभ्य इतर
मन्दानि । 'मीसयाइं च त्ति' मिश्राणि चैतानि अनुगाम्यादीनि भवन्ति, तद्यथा– अनुगाम्यननुगामीनि, प्रतिपात्यप्रतिपातीनि, तीव्रम
नीति । 'एक्केक्कसो विभिन्नाइं ति' एतानि चानुगाम्यादीन्येकैकशो विभिन्नानि भवन्ति, तद्यथा– अनुगामीनि प्रतिपात्य-ऽप्रतिपाति
श्रभेदात् त्रिधा, एवमननुगामीन्यपि त्रिधा, अनुगाम्यननुगामीन्यप्येवं त्रिधा । एवं पुनरप्यनुगाम्यादीनि फड्डकानि तीव्र-मन्द-मध्यभे
प्रत्येकं त्रिधा वक्तव्यानि, तद्यथा– अनुगामीनि तीव्र-मन्द-मध्यमानि, एवमननुगामीन्यपि, एवमनुगाम्यननुगामीन्यपीति । 'विचि
ति' एतानि च जघन्य-मध्यमादिभेदाद् विचित्राणि नानाप्रकाराणीति ॥ ७४३ ॥

अत्र प्रेरकः प्राह—

[4]नियया णुगामियाणं को भेओ को व तव्विवक्खाणं ?। नियओऽणुजाइ नियमा नियओऽनियओ व अणुगामी॥

---

१ कथं नोपयोगबहुता, भण्यते न विशेषतः स सामान्यः । तद्गतविशेषविमुखः स्कन्धावारोपयोग इव ॥ ७४२ ॥ २ क.ग. 'विषयोप' । ३ गाथा ७
४ अनुगामि-नियत-शुद्धानि सेतराणि च मिश्रकाणि च । एकैकशो विभिन्नानि फड्डकानि विचित्राणि ॥ ७४३ ॥
५ नियतानुगामिकयोः को भेदः को वा तद्विपक्षयोः ? । नियतोऽनुयाति नियमाद् नियतोऽनियतोवाऽनुगामी ॥ ७४४ ॥

[5]चयइ च्चिय पडिवाई अणाणुगामी चुओ पुणो होइ । नर-तिरिग्गहणं पाओ जं तेसु विसोहिसंकेसा ॥ ७४५ ॥

नियतानुगामिनोरप्रतिपात्यनुगामिनोः फड्डकयोरित्यर्थः, को भेदः ?– न कश्चिदिति पराभिप्रायः । को वाऽनुगाम्य-प्रतिप
विपक्षयोः– अननुगामि-प्रतिपातिनोर्भेदः ?। अत्रोत्तरमाह– यो नियतोऽप्रतिपाती स चलदीपिकेव नियमादन्यत्र गच्छन्तमवधिमन्तमनुया
अनुगच्छत्येव, यस्त्वनुगामी स नियतो वा स्यादनियतो वा– अप्रतिहतलोचनवदप्रतिपाती स्यात्, उपहतलोचनवत् प्रतिपाती वा
दित्यर्थः । प्रतिपक्षभेदमाह–'चयइ च्चियेत्यादि' च्यवत एव प्रतिपतत्येवाप्रतिपाती, च्युतोऽपि च कदाचिदेशान्तरे जायत इत्यत्रापि संब
अनानुगामुकस्तु नैवंस्वरूपः, यतोऽसौ यत्र देशे तिष्ठतः समुत्पन्नस्तत्रैव तिष्ठतश्च्यवते, नवा; च्युतोऽपि च देशान्तरे पुनरप्युत्पत्ति
समायातस्य भवति, इति प्रतिपात्य-ऽननुगामुकयोर्भेदः । 'नरेत्यादि' इह तीव्र-मन्दद्वारमिदम्, तीव्र-मन्दता च फड्डकानां विशुद्धि
शवशाज्जायते, विशुद्धिसंक्लेशाश्च तथाविधाः प्रायस्तिर्यग्-मनुष्येषु, इतीह 'फड्डा य आणुगामी' इत्यादिगाथायाः पर्यन्ते 'मणुस्स-तेरि
इति नर-तिर्यग्ग्रहणं कृतमिति ॥ ७४४ ॥ ७४५ ॥

अथ प्रेर्यान्तरमुत्थाप्य परिहरन्नाह–

[6]गहणमणुगामियाईण किं कयं तिव्व-मंदचिंताए । पायमणुगामिनियया तिव्वा मंदा य जं इयरे ॥७४६॥

ननु चास्य तीव्र-मन्दद्वारत्वात् तीव्र-मन्दचिन्तायां प्रस्तुतायां किमित्यनुगामुकादिफड्डकग्रहणं कृतम् ?– अप्रस्तुतैव फड्डकप्ररू
भावः । प्रतिविधानमाह– 'पायमित्यादि' अनुगामीनि, अप्रतिपातीनि च फड्डकानि यस्मात् प्रायस्तीव्राणि भवन्ति, इतराणि त्वन
मीनि, प्रतिपातीनि च प्रायो मन्दानि, मिश्राणि तूभयस्वभावानि; अतः फड्डकप्ररूपणायामियं तीव्र-मन्दद्वारता गम्यत एवेति ॥७

अथ मतान्तरमुपदर्श्य तस्याप्यविरुद्धतामाह–

[7]अण्णे पडिवायु-प्पायदार एवाणुगामियाईणि । नर-तिरियग्गहणेणं अहवा दोसुं पि न विरुद्धं ॥७४७॥

---

१ च्यवत एव प्रतिपाती अननुगामी च्युतः पुनर्भवति । नर-तिर्यग्ग्रहणं प्रायो यत् तेषु विशुद्धिसंक्लेशात् ॥ ७४५ ॥ २ गाथा ७३९ ।
३ ग्रहणमनुगामिकादीनां किं कृतं तीव्र-मन्दचिन्तायाम् । प्रायोऽनुगामिनियतानि तीव्राणि मन्दानि च यदितराणि ॥ ७४६ ॥ ४ घ.छ.'यामि
५ अन्ये प्रतिपातो-त्पादद्वार एवाऽनुगामिकादीनि । नर-तिर्यग्ग्रहणेनाऽथवा द्वयोरपि न विरुद्धम् ॥ ७४७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अन्ये त्वाचार्याः 'फड्डा य असंखेज्जा' इत्यादिगाथया तीव्र-मन्दद्वारमभिधायानन्तरमेव वक्ष्यमाणे प्रतिपातो-त्पादद्वार एव '[1]फड्डा य आणुगामी' इत्यादिगाथोक्तानुगामुकादीन् भेदानाचक्षते । केन कारणेन त एवमाचक्षते ?, इत्याह– 'नरतिरियग्गहणेण ति' । इदमुक्तं भवति– प्रतिपातो-त्पादयोस्तिर्यङ्-मनुष्यावधेरेव घटनात् तद्विषयमेव प्रतिपातो-त्पादद्वारम् । अतो नर-तिर्यग्ग्रहणादेतेऽप्यानुगामिकादयो भेदाः प्रतिपातो-त्पादद्वारान्तर्भाविन एवः इत्यन्याचार्याभिप्रायः । अथवा द्वयोरपि तीव्रमन्द-प्रतिपातोत्पादद्वारयोरिदमानुगामुकादिभेदकथनमर्थतो न किञ्चिद् विरुद्धम्, तीव्र-मन्दस्वरूपे, प्रतिपातो-त्पादवति चावधावनुगामुकादिभेदानां घटनात् ॥ इति गाथाष्टकार्थः ॥ ७४७ ॥

॥ गतं तीव्र-मन्दद्वारम् ॥

अथ प्रतिपातो-त्पादद्वारमाह—

[2]बाहिरलंभे भज्जो दव्वे खेत्ते य काल-भावे य । उप्पाय-पडिवाओ वि य तदुभयं चेगसमयेणं ॥ ७४८ ॥

अवधिमतो बहिर्वाह्यो योऽवधिस्तस्य लाभः प्राप्तिरुत्पत्तिस्तस्मिन् बाह्यावधिलाभे भाज्यो भजनीयः । कोऽसौ ?, इत्याह– उत्पादः, प्रतिपातः, तदुभयं चैकसमयेन । क विषये य उत्पादादयः ?, इत्याह– द्रव्य-क्षेत्र-काल-भावेषु ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥ ७४८ ॥

अथ भाष्यम्–

[3]बाहिरओ एगदिसो फड्डोही वाहवा असंबद्धो । दव्वाईसु भयणिज्जा तत्थुप्पायादओ समये ॥ ७४९ ॥

इह बाह्यावधिरुच्यते । कः ?, इत्याह– योऽवधिमत एकस्यां दिशि भवति । अथवाऽनेकास्वपि दिक्षु यः फड्डकावधेरन्योऽन्यं विच्छिन्नः सान्तरो भवति, सोऽपि बाह्यावधिः, तद्यथा– । अथवा, सर्वतः परिमण्डलाकारोऽप्यवधिर्योऽवधिमतो जीवस्याङ्गुलमानादिना क्षेत्रव्यवधानेन सर्वतोऽसंबद्धः सोऽपि बाह्यावधिस्तद्यथा– इति तावद् भाष्यकार-चिरन्तनटीकाकृतामभिप्रायः । आवश्यकचूर्णिकार-

---

१ गाथा ७३८ । २ गाथा ७३९ ।३ बाह्यलाभे भाज्यो द्रव्ये क्षेत्रे च काल-भावयोश्च । उत्पाद-प्रतिपातावपि च तदुभयं चैकसमयेन ॥ ७४८ ॥

४ बाह्यत एकदिक्कः फड्डकावधिर्वाऽथवाऽसंबद्धो । द्रव्यादिषु भजनीयास्तत्रोत्पादादयः समये ॥ ७४९ ॥

त्वाह– "बाहिरलंभो नाम जत्थ से ठियस्स ओहिण्णाणं समुप्पण्णं, तम्मि ठाणे सो ओहिनाणं न किंचि पासइ, तं पुण ठाणं जाहे अन्तरियं होइ, तं जहा– अङ्गुलेण वा, अङ्गुलपुहत्तेण वा, विहत्थीए वा, विहत्थिपुहत्तेण वा, एवं जाव संखिज्जेहिं वा, असंखिज्जेहिं वा जोयणेहिं ताहे पासइ; एस बाहिरलंभो भण्णइ" अनेन भाष्योक्तस्तृतीयः पक्ष एवं लिखितः, आद्यपक्षद्वयं तु किमुपलक्षणव्याख्यानाच्चूर्णौ द्रष्टव्यम्, आहोस्विदन्यत् किञ्चित् कारणम् ? इति केवलिनो विदन्तीति । तत्र चैवंविधे बाह्यावधावेकस्मिन् समये द्रव्य-क्षेत्र-काल-भावेषु विषये उत्पादादयो भजनीया इति ॥ ७४९ ॥

कथं भजनीयाः ?, इत्याह–

[3]उप्पाओ पडिवाओ उभयं वा होज्ज एगसमएणं । कहमुभयमेगसमये विभागओ तं न सव्वस्स ॥७५०॥

इह कदाचिदेकस्मिन् समये उत्पादो भवति– पूर्वं स्वल्पद्रव्यादिविषयो बाह्यावधिरुत्पन्नः सन् वर्धत इत्यर्थः– अधिकान् द्रव्य-क्षेत्र-काल-भावान् पश्यतीति भावः । कदाचित् त्वेकस्मिन् समये हीयतेऽसौ– पूर्वदृष्टेभ्यो द्रव्यादिभ्यो हीनांस्तान् पश्यतीत्यर्थः । कदाचित् तूत्पाद-प्रतिपातलक्षणमुभयमप्येकस्मिन् समये भवेत्, यतो बाह्यावधिर्देशावधिरयम्, ततश्च यदैवैकदिके बाह्यावधौ तिरश्चीनं संकोचलक्षणः प्रतिपातस्तदैवाग्रतो वृद्धिरूप उत्पादो भवति; यदा चाग्रतः संकोचस्तदैव तिरश्चीनं विस्तरः । एवं सान्तरानेकदिक्केऽपि बाह्यावधौ यदैवैकस्यां दिश्यधिकस्यैवोत्पादस्तदैवाऽन्यस्यां प्रतिपातः । एवं च वलयाकारे सर्वतोदिक्केऽपि बाह्यावधौ यत्रैव समये एकस्मिन् देशे वलयस्य विस्ताराधिक्यलक्षण उत्पादस्तत्रैव समयेऽन्यस्यां दिशि वलयस्य संकोचलक्षणः प्रतिपातः; इत्यादिप्रकारेणोत्पादद्वयोऽप्येकसमये भजनीयाः ।

अत्र परः प्राह– 'कहमुभयमित्यादि' कथमुत्पात-प्रतिपातविरुद्धधर्मद्वयलक्षणमुभयमेकस्यैकस्मिन् समये युक्तम् ?– न घटत एवैतदिति परस्याभिप्रायः । अत्रोत्तरमाह– 'विभागओ तं न सव्वस्स त्ति' । इदमुक्तं भवति– यदि हि सर्वस्याऽप्यवधेर्युगपदेवोत्पाद-प्रतिपातावभ्युपगम्येयाताम्, तर्हि स्याद् विरोधः, एतच्च नास्ति, विभागतो देशतस्तदभ्युपगमात् ॥ ७५० ॥

---

१ बाह्यलाभो नाम यत्र तस्य स्थितस्यावधिज्ञानं समुत्पन्नं, तस्मिन् स्थाने तस्यावधिज्ञानं न किञ्चित् पश्यति तत्पुनः स्थानं यावदन्तरितं भवति, तद्यथा– अङ्गुलेन वा, अङ्गुलपृथक्त्वेन वा, वितस्त्या वा, वितस्तिपृथक्त्वेन वा, एवं यावत् संख्येयैर्वा, असंख्येयैर्वा योजनैस्तावत् पश्यति, एष बाह्यलाभो भण्यते।

२ क. 'य लक्षितः'। ३ उत्पादः प्रतिपात उभयं वा भवेदेकसमयेन । कथमुभयमेकसमये विभागतस्तद् न सर्वस्य ॥ ७५० ॥ ४ ध.छ. 'कतो दि' । ५ ध.छ. 'णमे' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कथम् ?, इत्याह–

[1]दावानलो व्व कत्थइ लग्गइ विज्झाइ समयमन्नंतो । तह कोइ ओहिदेसो से जायइ, नासए [2]विहओ॥७५१॥

यथा हि दावानलो यदैवैकतः शुष्ककुश-स्तम्बादौ लगति दीप्यते, तदैवाऽन्यतो दग्धशुष्कतृणादिके देशे विध्यायति निर्वाति; तथाऽस्यापि बाह्यावधेः सदेशत्वात् कोऽपि देशो जायते– वृद्धिमासादयति, अन्यस्तु कोऽपि देशस्तस्मिन्नेव समये नश्यति हीयते । इति नेहोत्पाद-प्रतिपातौ युगपद् विरुध्येते ॥ इति गाथात्रयार्थः ॥ ७५१ ॥

अथैतावेवोत्पाद-प्रतिपातावभ्यन्तरावधौ निरूपयितुमाह–

[3]अब्भिंतरलद्धीए तदुभयं नत्थि एगसमयेणं । उप्पा पडिवाओ वि एगयरो एगसमयेणं ॥ ७५२ ॥

यस्य नैरन्तर्येण सर्वतोभाविनोऽवधेस्तद्वान् जीवोऽभ्यन्तरे वर्तते, असावभ्यन्तरावधिरुक्तः, तल्लब्धौ तत्प्राप्तौ पुनस्तदुभयं प्रतिपातो-त्पादद्वयं युगपदेकसमयेन नास्ति । अयं ह्यभ्यन्तरावधिः प्रदीपप्रभापटलवदवधिमता जीवेन सह सर्वतो नैरन्तर्येण संबद्धोऽखण्डो देशरहित एकस्वरूपः, अत एवाऽयं संबद्धावधिर्देशावधिश्चोच्यते, तथा चोक्तं चूर्णौ– " [4]तत्थ अब्भिंतरलद्धी नाम जत्थ से ठियस्स ओहिन्नाणं समुप्पण्णं, ततो ठाणाओ आरब्भ सो ओहिन्नाणी निरंतरसंबद्धं संखेज्जं वा असंखेज्जं वा खित्तओ ओहिणा जाणइ पासइ, एस अब्भिंतरलद्धी " इति । अस्मिंश्चैवंविधे एकस्मिन्नखण्डेऽभ्यन्तरावधावेकस्मिन् समये प्रतिपातो-त्पादयोरेकतर एव भवति, न तु युगपदेवोभयं, सदेशत्वप्रसङ्गात्, एकस्यैवैकदा विरुद्धधर्माऽयोगाच्च; तथाहि— निरावरणे सर्वतः प्रसृते प्रदीपप्रभापटले एकस्मिन् समये संकोच-विस्तारयोरेकतर एव भवति, न त्वेकस्यां दिशि संकोचः, अन्यस्यां तु विस्तरः, इत्येवं युगपदेकसमये संकोच-विस्तरौ भवतः, एवमत्रापीति भावः । एतदेवाह– 'उप्पा पडिवाओ वि य' इत्यादि ॥ इति निर्युक्तिगाथार्थः ॥ ७५२ ॥

अथ भाष्यम्—

---

१ दावानल इव कुत्रचिल्लगति विध्यायति समकमन्यतः । तथा कश्चिदवधिदेशस्तस्य जायते, नश्यति द्वितीयः ॥ ७५१ ॥ २ घ. छ. 'बिइओ' ।

३ अभ्यन्तरलब्धौ तदुभयं नास्त्येकसमयेन । उत्पादः प्रतिपातोऽप्येकतर एकसमयेन ॥ ७५२ ॥

४ तत्राऽभ्यन्तरलब्धिर्नाम यत्र तस्य स्थितस्यावधिज्ञानं समुत्पन्नम्, ततः स्थानादारभ्य सोऽवधिज्ञानी निरन्तरसंबद्धं संख्येयं वाऽसंख्येयं वा क्षेत्रतोऽवधिना जानाति पश्यति, एषाऽभ्यन्तरलब्धिः ।

१७

[1]अब्भिंतरलद्धी सा जत्थ पईवप्पभ व्व सव्वत्तो । संबद्धमोहिनाणं अब्भंतरओऽवहीनाणी ॥ ७५३ ॥

गतार्थैव, नवरं 'संबद्धमित्यादि' अवधिज्ञानं जीवे संबद्धं सर्वतो भवति, अवधिज्ञानी त्ववधिज्ञानस्याऽभ्यन्तरतो भवतीति॥७५३॥

अथात्रोत्पाद-प्रतिपातविधिमाह–

[2]उप्पाओ विगमो वा दीवस्स व तस्स नोभयं समयं । न भवण-नासा समयं वत्थुस्स जमेगधम्मेणं ॥७५४॥

अभिहितार्थैव, नवरं यस्माद् वस्तुनो द्रव्यस्यैकेन धर्मेण स्वभावेन समकं युगपद् न नैव भवन-नाशौ उत्पाद-व्ययौ कदाचनापि भवतः । न ह्यङ्गुलिद्रव्यं येनैवर्जुत्वधर्मेण ऋजु प्राञ्जलं भवति, तेनैव व्येतीति युज्यते, विरुद्धत्वात् ; धर्मान्तरेण त्वेकस्यैककालमपि युज्येते उत्पाद-व्ययौ ; यथा तदेवाऽङ्गुलिद्रव्यं यस्मिन्नेव समये ऋजुतयोत्पद्यते, तस्मिन्नेव समये वक्रतया विनश्यति, द्रव्यतया त्ववस्थितमेवाऽऽस्त इति ॥ ७५४ ॥

एतदेवाह–

[3]उप्पाय-व्वय-धुवया समयं धम्मंतरेण न विरुद्धा । जह रिउ-वक्कंगुलिता सुर-नर-जीवत्तणाइं वा ॥ ७५५॥

उप्पज्जइ रिउयाए नासइ वक्कत्तणेण तस्समयं । न [4]उ तम्मि चेव रिउयानासो वक्कत्तभवणं च ॥ ७५६ ॥

गतार्थे एव, नवरं तत्प्रत्ययः प्रत्येकमभिसंबध्यते, यथा ऋजुता, वक्रता, अङ्गुलिता चेति; एतत्त्रितयमपि युगपद् धर्मान्तरेण न विरुद्धम् । यदि वा यथा कोऽपि मृतः साधुर्यस्मिन्नेव समये देवत्वेनोत्पद्यते तस्मिन्नेव नरत्वेन विनश्यति, जीवत्वेन पुनरवतिष्ठते । एवमिहाऽपि युगपद् धर्मान्तरेणोत्पादादयो न विरुध्यन्ते । न त्वेकेनैव धर्मेण युगपत् ते युज्यन्ते, तदेवाह– 'न उ तम्मीत्यादि' न पुनरेतद् युज्यते । किम् ?, इत्याह– 'रिउयेत्यादि' यस्मिन्नेव समयेऽङ्गुल्या ऋजुता जायते, तस्मिन्नेव समये तस्या ऋजुताया नाशो भवति, भाविवक्रत्वस्य भवनं चेति । एवं हि 'ऋजुता ऋजुत्वधर्मेणोत्पद्यते, तेनैव धर्मेण तस्मिन्नेवोत्पत्तिसमये सा विनश्यति' इत्यभ्युपगतं भवति, दूरविरुद्धं चैतत् ॥ ७५५ ॥ ७५६ ॥

---

१ अभ्यन्तरलब्धिः सा यत्र प्रदीपप्रभेव सर्वतः । संबद्धमवधिज्ञानमभ्यन्तरतोऽवधिज्ञानी ॥ ७५३ ॥

२ उत्पादो विगमो वा दीपस्येव तस्य नोभयं समकम् । न भवन-नाशौ समकं वस्तुनो यदेकधर्मेण ॥ ७५४ ॥

३ उत्पाद-व्यय-ध्रुवता समकं धर्मान्तरेण न विरुद्धा । यथा ऋजु-वक्रा-ऽङ्गुलिता सुर-नर-जीवत्वानि वा ॥ ७५५ ॥
उत्पद्यते ऋजुतया नश्यति वक्रत्वेन तत् समकम् । न तु तस्मिन्नेवर्जुतानाशो वक्रत्वभवनं च ॥ ७५६ ॥ ४ क. ख. ग. 'उ चेव तम्मि रि' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

कथम् ?, इत्याह—

लद्धत्तलाभनासो जुज्जइ लाभो य तस्स समएणं । जइ तम्मि चेव नासो निच्चविणट्ठे कुओ भवणं ? ॥७५७॥
सव्वुप्पायाभावा तदभावे य विगमो भवे कस्स ? । उप्पाय-व्वयाभावे काऽवट्ठिई सव्वहा सुण्णं ॥७५८॥

लब्ध आत्मनो लाभः सत्ता येन तल्लब्धात्मलाभं प्राप्तस्वसत्ताकं, तस्यैवंस्थंभूतस्य वस्तुनो नाशो युज्यते । न त्वनासादितसत्ताकस्य खरविषाणस्य विनाश इति वक्तुं युज्यते । आत्मलाभश्च तस्य वस्तुनः समयेन भवति । यदि च यस्मिन्नेव समये ऋजुत्वधर्मेण ऋजुता समुत्पद्यते, तस्मिन्नेव समये तेनैव धर्मेण सा विनश्यतीत्यभ्युपगम्यते, तर्ह्येवं सर्वदैवोत्पद्यभावाद् नित्यविनष्टे कदाचिदप्यनवाप्तात्मलाभे वस्तुनि कुतो भवनं सत्तारूपम् ?– न कुतश्चिदित्यर्थः । ततः किम् ?, इत्याह– 'सव्वुप्पायेत्यादि' तत इत्थं सर्वदैव विनाशाप्राप्तत्वाद् नित्यमेव च वस्तूनामुत्पादाभावः प्रसजति, तथाच सति कस्य विगमो विनाशो भवेत् ?; यदि हि किञ्चिदुत्पन्नं स्यात् तदा तस्य कदाचिदपि विनाशो युज्येत, इतरथा तु कस्य विनाशः ? इति भावः । उत्पाद-व्ययाभावे च 'काऽवट्ठिइ त्ति' काऽवस्थितिः ?, तथाहि– यदुत्पाद-व्ययशून्यं तस्याऽवस्थितिरपि नास्ति, यथा खरविषाणस्य, तच्छून्यं च वस्तूक्तयुक्तेर्भवतः समापतति, इति कुतस्तस्याऽवस्थितिः ? । एवं च सति सर्वथा शून्यं जगत्त्रयमिदं प्राप्नोति; तथाहि– उत्पाद-व्यय-ध्रौव्यरहितं वस्तु नास्त्येव, सत्त्वाद्ययोगात्, खरविषाणवदिति ॥ ७५७ ॥ ७५८ ॥

अथाऽग्रेतननिर्युक्तिगाथासंबन्धं भाष्यकारः स्वत एव कुर्वन्नाह–

दव्वाईणं तिण्हं पुव्वं भणिओ परोप्परनिबंधो । इह दव्वस्स गुणेणं भण्णइ दव्वासिओ जं सो ॥७५९॥

अत्रैव पूर्वं 'संखेज्ज मणोदव्वे भागो लोगपलियस्स बोधव्वो' इत्यादिना द्रव्य-क्षेत्र-काललक्षणत्रयस्य परस्परनिबन्धोऽभिहितः । इह तूत्पाद-प्रतिपातद्वार एव प्रसङ्गतो द्रव्यस्यैव गुणेन सहाऽयमुच्यते, न तु क्षेत्र-कालयोः, यतो द्रव्याश्रितोऽसौ, न तु क्षेत्र-कालाश्रितः ॥ इति गाथासमुदायार्थः ॥ ७५९ ॥

---

१ लब्धात्मलाभनाशो युज्यते लाभश्च तस्य समयेन । यदि तस्मिन्नेव नाशो नित्यविनष्टे कुतो भवनम् ? ॥ ७५७ ॥
सर्वोत्पादाभावात् तदभावे च विगमो भवेत् कस्य ? । उत्पाद-व्ययाभावे काऽवस्थितिः सर्वथा शून्यम् ॥ ७५८ ॥ २ क. ग. 'युज्यते ह' ।
३ द्रव्यादीनां त्रयाणां पूर्वं भणितः परस्परनिबन्धः । इह द्रव्यस्य गुणेन भण्यते द्रव्याश्रितो यत् सः ॥ ७५९ ॥ ४ गाथा ६६९ ।

तदेवाह–

दव्वाओ असंखेज्जे संखेज्जे यावि पज्जवे लहइ । दो पज्जवे दुगुणिए लहइ य एगाओ दव्वाओ ॥७६०॥

इदं परमाण्वादि द्रव्यमेकं पश्यन्नवधिज्ञानी तत्पर्यायानेकगुणकालकादीन् उत्कृष्टतोऽसंख्येयान्, विमध्यमतः संख्येयाँल्लभते प्राप्नोति, पश्यतीति तात्पर्यम् । जघन्यतस्तु द्वौ पर्यायौ द्विगुणितावेकस्माद् द्रव्याल्लभते– सामान्यतो वर्ण-गन्ध-रस-स्पर्शलक्षणांश्चतुरः पर्यायान् जघन्यत एकस्मिन् द्रव्ये पश्यति, न त्वेकगुणकालकादीन् बहूनित्यर्थः । एकद्रव्यगतानुत्कृष्टतोऽप्यनन्तपर्यायान् न पश्यति, किन्त्वसंख्येयानेव; अनन्तेषु द्रव्येषु समुदितेष्वनन्तांस्तान् पश्यत्येव ॥ इति निर्युक्तिगाथार्थः ॥ ७६० ॥

अथ भाष्यम्–

एगं दव्वं पेच्छं खंधमणुं वा स पज्जवे तस्स । उक्कोसमसंखिज्जे संखिज्जे पेच्छए कोइ ॥ ७६१ ॥
दो पज्जवे दुगुणिए सव्वजहण्णेण पेच्छए ते य । वण्णाई य चउरो नाणंते पेच्छइ कयाइ ॥ ७६२ ॥

गतार्थे एव ॥ ७६१ ॥ ७६२ ॥

॥ अवसितमुत्पाद-प्रतिपातद्वारम् ॥

अथ ज्ञान-दर्शन-विभङ्गलक्षणद्वारत्रयं युगपदभिधित्सुराह–

सागारमणागारा ओहि-विभंगा जहण्णया तुल्ला । उवरिमगेवेज्जेसु परेण ओही असंखेज्जो ॥ ७६३ ॥

इहाऽवधिविचारे प्रस्तुत एतच्चिन्त्यते यदुत– किमिह ज्ञानम् ?, किंवा दर्शनम् ?, को वा विभङ्गः ? ; किं वा परस्परतस्तुल्यम्, अधिकं च ? इति । तत्र यो वस्तुनो विशेषरूपग्राहकः स साकारः, स च ज्ञानमिष्टं सम्यग्दृष्टेः; मिथ्यादृष्टेस्तु स एव विभङ्गज्ञानम् । यस्तु सामान्यरूपग्राहकः, अयमनाकारः, विशिष्टाकाराग्रहणात्; स च दर्शनम् । तदिहगाथायां साकारग्रहणेनाऽवधिज्ञानं गृहीतम्, अनाकारग्रहणेन

---

१ द्रव्यादसंख्येयान् संख्येयांश्चापि पर्यवाँल्लभते । द्वौ पर्यायौ द्विगुणितौ लभते चैकस्माद् द्रव्यात् ॥ ७६० ॥
२ एकं द्रव्यं प्रेक्षमाणः स्कन्धमणुं वा स पर्यवांस्तस्य । उत्कृष्टतोऽसंख्येयान् संख्येयान् प्रेक्षते कश्चित् ॥ ७६१ ॥
द्वौ पर्यवौ द्विगुणितौ सर्वजघन्येन प्रेक्षते तांश्च । वर्णादींश्च चतुरो नाऽनन्तान् प्रेक्षते कदाचित् ॥ ७६२ ॥ ३ घ. छ. 'संखेज्जे' ।
४ साकारा-ऽनाकारावधि-विभङ्गौ जघन्यकौ तुल्यौ । उपरिमग्रैवेयकेषु परेणाऽवधिरसंख्येयः ॥ ७६३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वधिदर्शनम् , विभङ्गग्रहणेन तु विभङ्गज्ञानम् । अत एव ज्ञान-दर्शन-विभङ्गलक्षणं द्वारत्रयमिदं भवति । तत्र चावधिज्ञान-दर्शने, तथ विभङ्गज्ञानं, तस्य च संबन्धि यत् केषाञ्चिन्मतेनाऽवधिदर्शनम् ; ते च पृथक् स्वस्थाने ; परस्परापेक्षया परस्थाने चाऽवधि-विभङ्गयो र्ज्ञान-दर्शने भवनपतिदेवेभ्य आरभ्य यावदुपरितनग्रैवेयकविमानानि तावत् , जघन्याभ्यामारभ्य यावदुपरिमग्रैवेयकविमानोचितावधि-वि भङ्गोत्कृष्टतामाप्तिः, तावत् क्षेत्रादिलक्षणं विषयमाश्रित्य तुल्ये भवतः। इदमुक्तं भवति– भवनपतिदेवेभ्य आरभ्य यावदुपरितनग्रैवेयकवि मानवासिनो देवास्तावद् ये ये जघन्यतुल्यस्थितयो देवास्तेतत्संबन्धिनी जघन्ये अवधिविभङ्गज्ञान-दर्शने क्षेत्रादिरूपं विषयमाश्रित्य प स्परतस्तुल्ये भवतः ; मध्यमतुल्यस्थितीनां च मध्यमे ते तथैव तुल्ये भवतः ; उत्कृष्टतुल्यस्थितीनां तूत्कृष्टे ते तथैव तुल्ये भवतः ।

'परेण ओही असंखेज्जो त्ति' ग्रैवेयकविमानेभ्यस्तु परतोऽनुत्तरविमानेष्ववधिदर्शनरूपोऽवधिरेव भवति, न तु विभङ्गज्ञानम् मिथ्यादृष्टेरेव तत्सद्भावात्, अनुत्तरसुरेषु च मिथ्यादृष्टेरभावात् । स चाऽनुत्तरसुरावधिः क्षेत्रतः कालतश्चाऽसंख्येयोऽसंख्यातविषय भवति, द्रव्यभावैस्त्वनन्तविषय इति । इह च तिर्यग्-मनुष्याणां तुल्यस्थितीनामपि क्षयोपशमतीव्र-मन्दतादिकारणवैचित्र्यात् क्षेत्र-काल विषयेऽप्यवधिविभङ्गज्ञान-दर्शनयोर्विचित्रता, न पुनस्तुल्यतैव, इतीह देवेष्वेव तयोरियं प्रतिपादितेति विभावनीयम् ॥ इति निर्युक्ति गाथार्थः ॥ ७६३ ॥

अथ भाष्यम्—

[1]सविसेसं सागारं तं नाणं, निव्विसेसमणगारं । तं दंसणं ति ताइं ओहि-विभंगाण तुल्लाइं ॥ ७६४ ॥

आरब्भ जहण्णाओ उवरिमगेवेज्जगावसाणाणं । परओऽवहिनाणं चिय न विभंगमसंखयं तं च ॥७६५॥

गतार्थे एव ॥ ७६४ ॥ ७६५ ॥

॥ गतं ज्ञान-दर्शन-विभङ्गद्वारत्रयम् ॥

अथ देशद्वाराभिधानायाह—

[4]नेरइय-देव-तित्थंकरा य ओहिस्सबाहिरा होंति । पासंति सव्वओ खलु सेसा देसेण पासंति ॥७६६॥

---

१ क.ग. 'ये ज' । २ क.ग. 'स्तत्सं' । ३ सविशेषं साकारं तज्ज्ञानं, निर्विशेषमनाकारम् । तद् दर्शनमिति ते अवधि-विभङ्गयोस्तुल्ये ॥ ७६४ ॥
आरभ्य जघन्यादुपरिमग्रैवेयकावसानानाम् । परतोऽवधिज्ञानमेव न विभङ्गोऽसंख्येयं तच्च ॥ ७६५ ॥
४ नैरयिक-देव-तीर्थङ्कराश्चावधेरबाह्या भवन्ति । पश्यन्ति सर्वतः खलु शेषा देशेन पश्यन्ति ॥ ७६६ ॥

नारकाः, देवाः, तीर्थङ्कराश्चावधिज्ञानस्याऽबाह्या भवन्ति, अवध्युपलभ्यस्य क्षेत्रस्यान्तर्वर्तन्ते, अभ्यन्तरवर्तिन एव भवन्तीत्यर्थः अत एवाऽबाह्यावधय एवैते प्रतिपाद्यन्ते, अवधिप्रकाशितक्षेत्रस्य प्रदीपा इव निजनिजप्रभापटलस्य नैते बहिर्भवन्तीत्यर्थः । तथाऽवधिः पश्यन्त्यवलोकयन्ति, खलुशब्दस्याऽवधारणार्थत्वात् सर्वत एव सर्वास्वेव दिक्षु विदिक्षु च, न तु देशत इत्यर्थः । शेषास्तिर्यग्-मनुष्य देशेनेत्येकदेशेन पश्यन्ति । तत्र वाक्यावधारणविधेरिष्टतः प्रवृत्तेः शेषा एव देशतः पश्यन्ति, न तु शेषा देशत एवेति द्रष्टव्यम् , शेषास्ति र्यग्-मनुष्याः सर्वतो देशतश्च पश्यन्तीति भावः । अथवा पूर्वार्धमन्यथा व्याख्यायते– नारक-देव-तीर्थङ्करा अवधेरबाह्या भवन्ती कोऽर्थः ?– अवधिज्ञानवन्त एवाऽमी भवन्ति, अवधिज्ञानं नियमेन तेषां भवतीत्यर्थः । तत्र किममी तेनाऽवधिना सर्वतः पश्यन्ति देशतो वा ?, इति संशये सत्याह– 'पासंति' इत्याद्युत्तरार्धम् । अस्य व्याख्या तथैव ॥ इति निर्युक्तिगाथार्थः ॥ ७६६ ॥

अथ प्रथमं व्याख्यानं तावद् भाष्यकारोऽप्याह–

[2]ओहिणाणक्खेत्तेब्भंतरगा होंति नारयाईया । सव्वदिसोऽवहिविसओ तेसिं दीवप्पभोवम्मो ॥ ७६७ ॥

उक्तार्थैव ॥ ७६७ ॥

चालना-प्रत्यवस्थाने प्राह–

[3]अब्भिंतर त्ति भणिए भण्णइ पासंति सव्वओ कीस ? । ओयइ जमसंतयदिसो अंतो वि ठिओ न सव्वत्तो ॥७६

नन्ववधेरबाह्या भवन्ति, इत्यवध्युपलब्धक्षेत्रस्याभ्यन्तरे नारकादयो वर्तन्त इति प्रथमपक्षे व्याख्यातम् । एवं चोक्ते सा 'पश्यन्ति सर्वतः' इति किमर्थं भण्यते ?; ये ह्यवधिप्रकाशितक्षेत्रस्य मध्ये वर्तन्ते, ते सर्वतः पश्यन्त्येव, इति गतार्थत्वादतिरिच्यत एवं दमिति पराभिप्रायः । अत्र सूरिराह– 'ओयईत्यादि' संतता निरन्तरालाः सर्वा दिग्-विदिग्लक्षणा दिशः प्रकाशविषयभूता यस्य ऽवधेरसौ संततदिक्कोऽवधिरबाह्यावधिरित्यर्थः, न विद्यते संततदिक्कोऽवधिर्यस्याऽसावसंततदिक्कोऽवधिमान् बाह्यावधियुक्तः साध्वादिः त्यर्थः । अयं यस्माद् 'न ओयइ त्ति' न पश्यति, कथम् ?, सर्वतः । कथंभूतः सन् ?, इत्याह– अवधिद्योतितक्षेत्रस्याऽन्तर्मध्येऽ स्थितः, तस्मात् कर्तव्यं 'पासंति सव्वओ खलु' इति । इदमुक्तं भवति– 'फड्डोही वाऽहवाऽसंबद्धो' इत्यनेन ग्रन्थेन यः प्राक् प्रतिपादि

---

१ अवधिज्ञानक्षेत्राभ्यन्तरका भवन्ति नारकादिकाः । सर्वदिक्कोऽवधिविषयस्तेषां दीपप्रभौपम्यः ॥ ७६७ ॥ २ क.ग. 'त्तब्भिंत' ।
३ अभ्यन्तर इति भणिते भण्यते पश्यन्ति सर्वतः कस्मात् ?। पश्यति यदसंततदिक्कोऽन्तरपि स्थितो न सर्वतः ॥७६८॥ ४ क.ग. 'किंभू'। ५ गाथा ७६६। ६ गाथा ७

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

द्विविधो बाह्यावधिः फड्डुकावधिः, असंबद्धवलयाकारक्षेत्रप्रकाशकावधिश्चेत्यर्थः, तद्वान् साध्वादिरवध्युपलब्धक्षेत्रस्यान्तःस्थितोऽपि न सर्वतः पश्यति, अन्तरालाऽदर्शनात्। अतस्तद्व्यवच्छेदार्थं कर्तव्यं 'पश्यन्ति सर्वतः' इति। आह- नन्वयमसंततादिकावधिरबाह्यावधिरेव न भवति, बाह्यावधित्वेनैव प्राक् प्रतिपादितत्वात्, तत् किमेतद्व्यवच्छेदपरेण 'पासंति' इत्याद्युपादानेन?। सत्यम्, समयपरिभाषितबाह्यावधित्वमत्र नास्ति, लोकरूढं त्ववधिप्रकाशितक्षेत्रमध्यवर्तित्वमात्रमत्रापि विद्यते, इत्येतद्व्यवच्छेदार्थं 'पासंति' इत्यादि स्थितम्। इत्यलं विस्तरेणेति ॥७६८॥

अथ द्वितीयव्याख्यानं, तत्र प्रेर्यं चाह-

[1]नियया वहिणो अब्भिंतर त्ति वा संसयावणोयत्थं। तो सव्वओऽभिहाणं होउ किमब्भिंतरग्गहणं?॥७६९॥

'वा' इत्यथवार्थः, स च व्याख्यानान्तरसूचकः। तत्र नारकादयोऽवधेरबाह्या अभ्यन्तरा भवन्तीति कोऽर्थः?, इत्याह- नियतावधयो नियमेनैषामवधिर्भवत्येवेति। तर्हि 'पासंति' इत्यादि किमर्थम्?, इत्याह- 'संसयावणोयत्थं ति' 'किमेते देशतः पश्यन्ति, आहोस्वित् सर्वतः' इत्येवंभूतसंशयापनोदार्थं 'पश्यन्ति सर्वतः खलु' इति वाक्यशेषः। यद्येवम्, ततः संशयापनोदार्थं सर्वतोऽभिधानमेवाऽस्तु, किमभ्यन्तरग्रहणेन? इति ॥ ७६९ ॥

अत्रोत्तरमाह-

[2]अब्भिंतर त्ति तेणं नियया वहिणोऽवसेसया भइया। भवपच्चयाइवयसा सिद्धे कालस्स नियमोऽयं ॥७७०॥

यदि सर्वतोग्रहणेन नारकादीनां देशदर्शनं निराकृत्य संशयो निरस्त इति ब्रूषे, तेन तर्हि भोः प्रेरक! 'अभ्यन्तरा अबाह्याः' इत्यनेन नियतावधयो नियमेनाऽवधिमन्तो नारक-देव-तीर्थकराः, अवशेषास्तु तिर्यग्-मनुष्या भजनीयाः- अवधियुक्तास्तद्रहिता वा भवन्तीति प्रतिपादितं द्रष्टव्यम्। सर्वग्रहणेन हि सर्वदेशदर्शनविषय एव संदेहो निवर्त्यते, नियतावधित्वं पुनरमीषां न लभ्यते; अतस्तत्प्रतिपादनार्थम्, 'अवधेरबाह्या भवन्ति' इत्येतद् वचनमिति भावः। तत्रैतत् स्यात् "[3]भवप्रत्ययो नारक देवानाम्" इत्यादिवचनात्, यथा "[4]तीहिं नाणेहिं समग्गा तित्थयरा जाव होंति गिहवासे" इत्यादिवचनाच्च सिद्धमेव नारक-देव-तीर्थकराणां नियतावधित्वम्; तत्किमनेन?, इत्याशङ्क्याह- भवप्रत्ययादिवचसा सिद्धेऽमीषां नियतावधित्वे 'ओहिस्सबाहिरा होंति' इति कालस्य नियमोऽयं विधीयते। इदमुक्तं भवति- भवप्रत्ययादिवचनात् सिध्यति नियमेन नारकादीनामवधिमत्त्वम्, परं न ज्ञायते- 'किमाभवक्षयममीषामवधिर्भवति, आहोस्वित् कियन्तमपि कालं भूत्वाऽसौ प्रतिपततीति?'। ततश्च 'ओहिस्स बाहिरा होंति' इत्यनेन कालनियमः क्रियते- सर्वदा सर्वकालममीषामवधिर्भवति, न त्वन्तरालेऽपि प्रतिपततीति। आह- यद्येवम्, तीर्थकृतां सर्वकालावस्थायित्वमवधेर्विरुध्यते, केवलोत्पत्तौ तदभावात्। न, तेषां केवलोत्पत्तावपि वस्तुतस्तत्परिच्छेदस्याऽप्यनष्टत्वात्, सुतरां केवलज्ञानेन संपूर्णानन्तधर्मात्मकवस्तुपरिच्छित्तेः, छद्मस्थकालस्य वा विवक्षितत्वाददोषः। इत्यलं विस्तरेणेति ॥ ७७० ॥

"[5]सेसा देसेण पासंति' इत्येतद् व्याचिख्यासुराह-

[6]सेस च्चिय देसेणं न उ देसेणेव सेसया किंतु। देसेण सव्वओ वि य पेच्छंति नरा तिरिक्खा य ॥७७१॥

गतार्थैव ॥ इति गाथापञ्चकार्थः ॥ ७७१ ॥

॥ गतं देशद्वारम् ॥

अथ क्षेत्रद्वारमभिधित्सुराह-

[7]संखेज्जमसंखेज्जो पुरिसमबाहाए खेत्ततो ओही। संबद्धमसंबद्धो लोगमलोगे य संबद्धो ॥ ७७२ ॥

'खेत्तओ ओही संबद्धमसंबद्धो त्ति' इह क्षेत्रतोऽवधिरवधिमति जीवे प्रदीपे प्रभापटलमिव संबद्धो लग्नो भवति- जीवावष्टब्धक्षेत्रादारभ्य निरन्तरं द्रष्टव्यं वस्तु प्रकाशयतीत्यर्थः। कश्चित् पुनरतिप्रकृष्टतमोव्याकुलान्तरालवर्तिप्रदेशमुल्लङ्घ्य दूरस्थितभित्त्यादिप्रतिफलितप्रदीपप्रभेव जीवेऽसंबद्धो भवति। कया हेतुभूतयाऽसंबद्धः?, इत्याह- मकारस्याऽलाक्षणिकत्वात् 'पुरुषाबाधया' इति- पूर्णः सुख-दुःखानामिति पुरुषः, पुरि शरीरे शयनाद् वा पुरुषो जीवः, अबाधनमबाधान्तरालमित्यर्थः, पुरुषादबाधा पुरुषाबाधा तया हेतुभूतयाऽसंबद्ध इति हेत्वर्थे तृतीया।

स च संबद्धोऽसंबद्धश्चाऽवधिः क्षेत्रतः कियान् भवति?, इत्याह- संख्येयोऽसंख्येयश्च- योजनापेक्षया संख्येयानि, असंख्ये-

१ नियतावधयोऽभ्यन्तरा इति वा संशयापनोदार्थम्। ततः सर्वतोऽभिधानं भवतु किमभ्यन्तरग्रहणम्? ॥ ७६९ ॥
२ अभ्यन्तरा इति सेन नियतावधयोऽवशेषका भाज्याः। भवप्रत्ययादिवचसा सिद्धे कालस्य नियमोऽयम् ॥ ७७० ॥
३ तत्त्वार्थसूत्रे १,२२। ४ श्रीभिर्ज्ञानैः समग्रास्तीर्थंकरा यावद् भवन्ति गृहवासे।
५ गाथा ७६६। ६ शेषा एव देशेन न तु देशेनैव शेषकाः किन्तु। देशेन सर्वतोऽपि च प्रेक्षन्ते नरास्तिर्यञ्चश्च ॥ ७७१ ॥ + (या सं०)
७ संख्येयोऽसंख्येयः पुरुषाऽबाधया क्षेत्रतोऽवधिः। संबद्धा-ऽसंबद्धो लोकेऽलोके च संबद्धः ॥ ७७२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

यानि वा योजनानि प्रत्येकं भवतीत्यर्थः । कया सह ?, इत्याह- 'पुरुषाबाधया' इत्येवं सहार्थतृतीयया पुरुषाबाधापदमत्रापि योज्यते; न केवलमवधिः संख्येयानि, असंख्येयानि वा योजनानि भवति, किं तर्हि ?, पुरुषाद्यन्तरालरूपा बाधा साऽप्येतावन्माना भवतीत्यर्थः । इदं चान्तरमसंबद्ध एवाऽवधौ भवति, न तु संबद्धे, तत्र संबद्धत्वेनैव तदसंभवात् । इह चासंबद्धेऽवधावन्तरे च चतुर्भङ्गिका- [1]संख्येयमन्तरं संख्येयोऽवधिः, [2]संख्येयमन्तरमसंख्येयोऽवधिः, [3]असंख्येयमन्तरं संख्येयोऽवधिः, [4]असंख्येयमन्तरमसंख्येयोऽवधिः; इत्येवं चत्वारोऽपि भङ्गकाः संभवन्ति । संबद्धे त्ववधौ विकल्पाभावः, तदुत्थानहेतोरन्तरलक्षणस्य द्वितीयपदस्य तत्राभावादिति ।

अयं चावधिर्लोकेऽलोके च संबद्धोऽपि भवति, इत्याह- 'लोगमलोगे य संबद्धो त्ति' इह लोकशब्देन लोकान्तो गृह्यते । अत्रापि च भङ्गचतुष्टयम्- [1] तत्र यो लोकप्रमाणावधिः स पुरुषे संबद्धो भवति, लोकान्ते च; [2] यस्तु लोकदेशवर्ती अभ्यन्तरावधिः स पुरुषे संबद्धो न लोकान्ते; [3] लोकान्तेऽसंबद्धो न पुरुष इति शून्योऽयं भङ्गः, यो हि लोकान्ते संबद्धः स पुरुषे नियमात् संबद्ध एव भवति, न त्वसंबद्ध इत्येतद्भङ्गकासंभवः; [4] न लोकान्ते नापि पुरुषे संबद्धो बाह्यावधिः; यस्त्वलोके संबद्धः स पुरुषे संबद्ध एव भवतीति तत्र भङ्गकाभावः ॥ इति निर्युक्तिगाथार्थः ॥ ७७२ ॥

अथ भाष्यम्-

[1]ओही पुरिसे कोई संबद्धो जह पभा व दीवम्मि । दूरंधयारदीवयदरिसणमिव कोइ विच्छिण्णो ॥७७३॥
[4]संखिज्जमसंखिज्जं देहाओ खित्तमंतरं काउं । संखेज्जा-ऽसंखेज्जं पेच्छइ तदंतरमबाहा ॥ ७७४ ॥
संबद्धा-ऽसंबद्धो नर-लोयंतेसु होइ चउभंगो । संबद्धो उ अलोए नियमा पुरिसे वि संबद्धो ॥ ७७५ ॥

तिस्रोऽपि गतार्थाः, नवरं दूरान्धकारे भित्त्यादिप्रतिफलितदीपकस्य दर्शनं तदिव विच्छिन्नः । 'तदंतरमबाह त्ति' तयोर्देहा-ऽवधिग्रकाश्यक्षेत्रयोरन्तरं तदबाधोच्यत इति ॥ ७७३ ॥ ७७४ ॥ ७७५ ॥

॥ अवसितं क्षेत्रद्वारम् ॥

---

१ क.ग.'वधेः सं'। २ क.ग.'वन्ति किं'। ३ अवधिः पुरुषे कश्चित् संबद्धो यथा प्रभैव दीपे । दूरान्धकारदीपकदर्शनमिव कश्चिद् विच्छिन्नः ॥ ७७३ ॥
संख्येयमसंख्येयं देहात् क्षेत्रमन्तरं कृत्वा । संख्येया-ऽसंख्येयं प्रेक्षते तदन्तरमबाधा ॥ ७७४ ॥
संबद्धाऽसंबद्धो नर-लोकान्तयोर्भवति चतुर्भङ्गः । संबद्धस्त्वलोके नियमात् पुरुषेऽपि संबद्धः ॥७७५॥ ४ ध.ह. 'संखेज्ज'।

गतिद्वारं बिभणिषुराह-

गइ-नेरइयाईया हेट्ठा जह वण्णिया तहेव इहं । इड्ढी एसा वण्णिज्जइ त्ति तो सेसियाओ वि ॥७७६॥

गतिर्नैरकगत्यादिका, आदिशब्दादपरोऽपीन्द्रियादिद्वारकलापः प्राक्प्रतिपादितस्वरूपोऽत्र परिगृह्यते । ततश्च नारकादिगत्यादिद्वाराणि यथाऽधस्तात् पूर्वं मतिज्ञानप्ररूपणाप्रस्तावे 'गइ-इंदिए य काए जोए वेए कसाय-लेसासु, सम्मत्त-नाण-' इत्यादिना, तथा '[3]संतपयपरूवणया दव्वपमाणं च' इत्यादिना च प्रतिपादितानि तथेहाप्यवधिप्ररूपणायां वक्तव्यानि, यस्तु विशेषस्तं भाष्यकारः स्वयमेव वक्ष्यति । सा चावधिज्ञानलक्षणा ऋद्धिः सिद्धान्ते वर्ण्यते, इत्यतोऽनेन संबन्धेन शेषा अप्यामर्षौषध्यादिका ऋद्धयोऽत्र वर्ण्यन्ते ॥ इति निर्युक्तिगाथार्थः ॥ ७७६ ॥

अथ गत्यादिद्वारेषु चिन्त्यमानस्याऽवधिज्ञानस्य मतिज्ञानाद् यो विशेषस्तं भाष्यकारः प्राह—

[4]जे पडिवज्जंति मइं तेऽवहिनाणं पि समहिआ अण्णे । वेय-कसायाईया मणपज्जवनाणिणो चेव ॥७७७॥
सम्मा सुर-नेरइयाऽणाहारा जे य होंतिपज्जत्ता । ते च्चिय पुव्वपवण्णा वियलाऽसण्णी य मोत्तूणं ॥७७८॥

ये मतिज्ञानस्य प्रतिपत्तारः प्रागुक्ताः, इहाऽवधिज्ञानस्याऽपि प्रतिपत्तारस्त एव द्रष्टव्याः, केवलमत्राधिका अन्येऽपि केचित् तेऽवगन्तव्याः; तद्यथा- 'वेय-कसायाईय त्ति' वेदातीताः कषायातीताश्च- अवेदका अकषायिणश्चेत्यर्थः, तथा, मनःपर्यायज्ञानिनश्च, इत्येते मतिज्ञानस्य पूर्वप्रतिपन्ना एवोक्ताः, इह त्ववधेरमी प्रतिपत्तारोऽपि भवन्ति; यतः श्रेणिद्वये वर्तमानानामवेदकानामकषायाणां च केषांचिदवधिज्ञानमुत्पद्यते, येषां चानुत्पन्नावधिज्ञानानां मति-श्रुतचारित्रवतां प्रथममेव मनःपर्यायज्ञानमुत्पद्यते, ते मनःपर्यायज्ञानिनोऽपि केचित् पश्चादवधिज्ञानस्य प्रतिपत्तारो भवन्ति । अपरं च, अनाहारका अपर्याप्तकाश्च मतिज्ञानस्य पूर्वप्रतिपन्ना एवोक्ता न तु प्रतिपद्यमानकाः, इह तु येऽप्रतिपतितसम्यक्त्वास्तिर्यङ्-मनुष्येभ्यो देव-नारका जायन्ते तेऽवधिज्ञानस्य प्रतिपद्यमानका अपि प्राप्यन्त इत्याह— सम्मा सुर-नेरइयाऽणाहारा जे य होंतिपज्जत्त त्ति' । ननूक्तः प्रतिपद्यमानकेषु विशेषः, पूर्वप्रतिपन्नेषु तु का वार्ता ?,

---

१ गति-नैरयिकादिका अधस्ताद् यथा वर्णितास्तथैवेह । ऋद्धिरेषा वर्ण्यत इति ततः शेषिका अपि ॥ ७७६ ॥ २ गाथा ४०९ । ३ गाथा ४०६ ।
४ ये प्रतिपद्यन्ते मतिं तेऽवधिज्ञानमपि समधिका अन्ये । वेद-कषायातीता मनःपर्यवज्ञानिनश्चैव ॥ ७७७ ॥
सम्यक्त्विनः सुर-नैरयिका अनाहारा ये च भवन्त्यपर्याप्ताः । त एव पूर्वप्रपन्ना विकला-ऽसंज्ञिनश्च मुक्त्वा ॥ ७७८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्याह– 'ते चिय पुव्वपवण्णेत्यादि' य एव मतिज्ञानस्य पूर्वप्रतिपन्ना उक्ता अवधिज्ञानस्याऽपि त एव द्रष्टव्याः। किं सर्वथा ?, न, इत्याह– 'वियलेत्यादि' विकलेन्द्रियान् असंज्ञिपञ्चेन्द्रियांश्च मुक्त्वेत्यर्थः। एते हि साक्षादनसम्यग्दृष्टयो मतिज्ञानस्य पूर्वप्रतिपन्ना उक्ताः, अवधेस्तु न प्रतिपद्यमानका नापि पूर्वप्रतिपन्ना भवन्तीति भावः ॥ इति गाथाद्वयार्थः ॥ ७७७ ॥ ७७८ ॥

॥ अवसितं गत्यादिद्वारम् ॥

अथ शेषद्वीर्वर्णयितुमाह–

आमोसहि विप्पोसहि खेलोसहि जल्लमोसहि चेव। संभिन्नसोय उजुमइ सव्वोसहि चेव बोधव्वो ॥७७९॥
चारण आसीविसा केवली य मणनाणिणो य पुव्वधरा। अरहंत-चक्कवट्टी बलदेवा वासुदेवा य ॥७८०॥

तत्राऽऽमर्षणमामर्षः संस्पर्शनमित्यर्थः, स एवौषधिर्यस्याऽसावामर्षौषधिः, करादिसंस्पर्शमात्रादेव व्याध्यपनयनसमर्थो लब्धिलब्धिमतोरभेदोपचारात् साधुरेवाऽऽमर्षौषधिरित्यर्थः। 'विप्पोसहि त्ति' मूत्र-पुरीषयोरवयवो विप्रुडुच्यते। अन्ये त्वाहुः– विड् उच्चारः, प्रेति प्रस्रवणम्। खेलः श्लेष्मा, जल्लो मलः, औषधिशब्देन समासकरणादिकं तथैव, सुगन्धाश्चैते विडादयस्तल्लब्धिमतां द्रष्टव्याः। इह चात्मानं परं वा रोगापनयनबुद्ध्या विडादिभिः स्पृशतः साधोस्तद्रोगापगमो द्रष्टव्यः, प्रागुक्ताऽऽमर्षलब्धिरपि शरीरैकदेशे सर्वस्मिन् वा शरीरे समुत्पद्यते, तेन चात्मानं परं वा व्याध्यपगमबुद्ध्या परामृशतस्तदपगमो द्रष्टव्यः। 'संभिन्नसोय त्ति' यः सर्वतः सर्वैरपि शरीरदेशैः शृणोति स संभिन्नश्रोताः। अथवा, श्रोतांसीन्द्रियाणि संभिन्नान्येकैकशः सर्वविषयैर्यस्य स तथा, एकतरेणापीन्द्रियेण समस्तापरेन्द्रियगम्यान् विषयान् यो युगपदवगच्छति स संभिन्नश्रोता इत्यर्थः। अथवा, श्रोतांसीन्द्रियाणि संभिन्नानि परस्परत एकरूपतामापन्नानि यस्य स तथा, श्रोत्रं चक्षुःकार्यकारित्वाच्चक्षूरूपतामापन्नम्, चक्षुरपि श्रोत्रकार्यकारित्वात् तत्त्वद्रूपतामापन्नम्, इत्येवं संभिन्नानि श्रोतांसि सर्वाण्यपि परस्परेणेन्द्रियाणि यस्यासौ संभिन्नश्रोता इति भावः, इत्यत्रापि स एवाऽर्थः। अथवा, द्वादशयोजनस्य चक्रवर्तिकटकस्य युगपद् ध्रुवाणस्य, तत्तूर्यसंघातस्य वा युगपदास्फाल्यमानस्य संभिन्नाँल्लक्षणतो विधानतश्च परस्परतो विभिन्नान् जननिवहसमुत्थान् शङ्ख-भेरी-भाणक-ढक्कादितूर्यसमुत्थान् वा युगपदेव सुबहून् शब्दान् यः शृणोति स संभिन्नश्रोताः। एवं च संभिन्नश्रोतृत्वलब्धिरपि

---

१ आमर्शौषधिर्विप्रुडौषधिः श्लेष्मौषधिर्मलौषधिश्चैव। संभिन्नश्रोता ऋजुमतिः सर्वौषधिश्चैव बोद्धव्यः ॥ ७७९ ॥

२ चारणा आशीविषा केवलिनश्च मनोज्ञानिनश्च पूर्वधराः। अर्ह-चक्रवर्तिनो बलदेवा वासुदेवाश्च ॥ ७८० ॥

ऋद्धिरेवेति। 'उजुमइ त्ति' ऋज्वी प्रायो घटादिसामान्यमात्रग्राहिणी मतिः ऋजुमतिः, विपुलमत्यपेक्षया किञ्चिदविशुद्धतरं मनःपर्यायज्ञानमेव। 'सव्वोसहि त्ति' सर्व एव विड्-मूत्र-केश-नखादयोऽवयवाः सुरभयो व्याध्यपनयनसमर्थत्वादौषधयो यस्य स सर्वौषधिः, अथवा, सर्वा आमर्शौषध्यादिका औषधयो यस्यैकस्यापि साधोः स तथा। एवमेते ऋद्धिविशेषा बोद्धव्याः।

तथा 'चारण त्ति' अतिशयवद्गमना-ऽऽगमनरूपाश्चारणाश्चारणाः सातिशयगमना-ऽऽगमनलब्धिसंपन्नाः साधुविशेषा एव। ते च द्विविधाः– विद्याचारणाः, जङ्घाचारणाश्च। तत्र विद्या विवक्षितः कोऽप्यागमस्तत्प्रधानश्चारणो विद्याचारणः। अस्य च यथाविधि सातिशयषष्ठलक्षणेन तपसा सर्वदैव तपस्यतो विद्याचरणलब्धिरुत्पद्यते, तया चासावित एकेनोत्पातेन मानुषोत्तरपर्वतं गच्छति, चैत्यानि च तत्र वन्दते। ततो द्वितीयेनोत्पातेन नन्दीश्वरनामानमष्टमद्वीपं गत्वा चैत्यानि वन्दते। तत एकेनोत्पातेन प्रतिनिवृत्य यतः स्थानाद् गतः पुनस्तत्रागच्छतीति। एष तावत् तस्य तिर्यग्गतिविषयः। ऊर्ध्वं त्वित एकेनोत्पातेन नन्दनवनं गत्वा तत्र चैत्यानि वन्दते, ततो द्वितीयेनोत्पातेन मेरुशिखरस्थं पण्डकवनं गत्वा चैत्यानि वन्दते। ततश्चैकेनोत्पातेन प्रतिनिवृत्य यतः स्थानाद् गतः पुनस्तत्राऽऽगच्छतीति।

लूतातन्तुनिर्वर्तितपुटकतन्तून् रविकरान् वा निश्रां कृत्वा जङ्घाभ्यामाकाशेन चरतीति जङ्घाचारणः। अस्य च यथाविधि सातिशयाऽष्टमलक्षणेन विकृष्टतपसा सर्वदैव तपस्यतो जङ्घाचारणलब्धिरुत्पद्यते। तया चासावित एकेनोत्पातेन त्रयोदशं रुचकवरद्वीपं गत्वा तत्र चैत्यानि वन्दते। ततो निवर्तमानो द्वितीयेनोत्पातेन नन्दीश्वरमागत्य तत्र चैत्यानि वन्दते। ततस्तृतीयेनोत्पातेन यतः स्थानाद् गतस्तत्रागच्छतीति। एषोऽस्य तिर्यग्गतिविषयः। ऊर्ध्वं त्वित एकेनोत्पातेन पण्डकवनं गत्वा चैत्यानि वन्दते। ततो निवर्तमानो द्वितीयेनोत्पातेन नन्दनवने चैत्यानि वन्दित्वा तृतीयोत्पातेन यतः स्थानाद् गतस्तत्राऽऽगच्छतीति।

'आसीविस त्ति' आश्यो दंष्ट्रास्तासु विषं येषां ते आशीविषाः, ते च द्विविधाः– जातितः, कर्मतश्च। तत्र जातितो वृश्चिक-मण्डूक-सर्प-मनुष्यजातयः, क्रमेण बहु-बहुतर-बहुतमविषाः– वृश्चिकविषं श्रुत्कृष्टतोऽर्धभरतक्षेत्रप्रमाणं शरीरं व्याप्नोतीति, मण्डूकविषं तु भरतक्षेत्रप्रमाणम्, भुजङ्गमविषं तु जम्बूद्वीपप्रमाणम्, मनुष्यविषं तु समयक्षेत्रप्रमाणं वपुर्व्याप्नोति। कर्मतस्तु पञ्चेन्द्रियतिर्यञ्चः, मनुष्याः, देवाश्चाऽऽसहस्रारादिति। एते हि तपश्चरणानुष्ठानतोऽन्यतो वा गुणत आशीविषवृश्चिक-भुजङ्गादिसाध्यकर्मक्रियां कुर्वन्ति– शापादिना परं व्यापादयन्तीत्यर्थः। देवाश्चाऽपर्याप्तावस्थायां तच्छक्तिमन्तो द्रष्टव्याः; ते हि पूर्वं मनुष्यभवे समुपार्जिताशीविषलब्धयः सहस्रारान्तदेवेष्वभिनवोत्पन्ना आपर्याप्तावस्थायां प्राग्भविकाऽऽशीविषलब्धिमन्तो मन्तव्याः; ततः परं तल्लब्धिनिवृत्तेः। पर्याप्ता अपि देवाः शापादिना परं विनाशयन्ति, किन्तु लब्धिव्यपदेशस्तदा न प्रवर्तत इति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

'केवलीत्यादि' केवलिनश्च प्रसिद्धाः । मनःपर्यायज्ञानिग्रहणेन चेह विपुलमतिरूपं मनःपर्यायज्ञानं गृह्यते; ऋजुमतिरूपस्य तस्य प्रागपि गृहीतत्वात् । तत्र विपुलं बहुविशेषसंख्योपेतं वस्तु मन्यते गृह्णातीति विपुलमतिः, पर्यायशतोपेतं चिन्तनीयघटादिवस्तु-विशेषग्राहिणी मतिर्विपुलमतिरित्यर्थः । आह– ननु सामान्येनैव मनःपर्यायज्ञानमेकमेव किं न गृहीतम्, तेनैकेनापि गृहीतेन तदन्तर्गतर्जुमतिविपुलमतिविशेषद्वयसंग्रहसिद्धेः ? । अथ विशेषद्वयमिदं पृथग् गृहीतं तथापि व्यस्तं किमित्युपात्तम्, एकस्मिन्नेव स्थाने एतदुपादानस्य युज्यमानत्वात् ? । सत्यम्, किन्तु कुतश्चिदतिशयज्ञानिदृष्टविचित्रकारणाद् विचित्रा भगवतः सूत्रस्य विरचनप्रवृत्तिरित्यमेर्यमिदमिति । पूर्वाणि धारयन्तीति पूर्वधरा दश-चतुर्दशपूर्वविदः, केवलित्व-मनःपर्यायज्ञानित्व-पूर्वधरत्वानां च ऋद्धित्वं प्रतीतमेव, देवेन्द्राणामपि पूज्यत्वादिति । अर्हत्-चक्रवर्ति-बलदेव-वासुदेवानामपि ऋद्धिमत्त्वं विख्यातमेव ॥ इति निर्युक्तिगाथाद्वयार्थः ॥ ७७९ ॥ ७८० ॥

अथैतद्व्याख्यानार्थं भाष्यकारः प्राह–

[1]संफुरिसणमामोसो मुत्त-पुरीसाण विप्पुसो विप्पो । अन्ने विडि त्ति विट्ठा भासंति य प[+]त्ति पासवणं॥७८१॥
एए अन्ने य बहू जेसिं सव्वे य सुरभओऽवयवा । रोगोवसमसमत्था ते होंति तओसहिपत्ता ॥७८२॥
जो सुणइ सव्वओ सुणइ सव्वविसए व सव्वसोएहिं । सुणइ बहुए व सद्दे भिन्ने संभिन्नसोओ सो ॥७८३॥
रिजु सामण्णं तमत्तगाहिणी रिजुमई मणोनाणं । पायं विसेसविमुहं घडमेत्तं चिंतियं मुणए ॥७८४॥
विउलं वत्थुविसेसणमाणं तग्गाहिणी मई विउला । चिंतियमणुसरइ घडं पसंगओ पज्जवसएहिं ॥७८५॥
अइसयचरणसमत्था जंघा-विज्जाहिं चारणा मुणओ । जंघाहिं जाइ पढमो नीसं काउं रविकरे वि ॥७८६॥

---

१ क.ग. 'ख्यानं भा' । २ संस्पर्शनमामर्षो मूत्र-पुरीषयोर्विप्रुड् विप्रुड् । अन्ये विड्डिति विष्ठा भाषन्ते च प्रेति प्रस्रवणम् ॥ ७८१ ॥ + हिपत्ता–।
एवमन्ये च बहवो येषां सर्वे च सुरभयोऽवयवाः । रोगोपशमसमर्थास्ते भवन्ति तदौषधिप्राप्ताः ॥ ७८२ ॥
यः शृणोति सर्वतो जानाति सर्वविषयान् वा सर्वश्रोतोभिः । शृणोति बहुकान् वा शब्दान् भिन्नान् संभिन्नश्रोताः सः ॥ ७८३ ॥
ऋजु सामान्यं तन्मात्रग्राहिणी ऋजुमतिर्मनोज्ञानम् । प्रायो विशेषविमुखं घटमात्रं चिन्तितं जानाति ॥ ७८४ ॥
विपुलं वस्तुविशेषमानं तद्ग्राहिणी मतिर्विपुला । चिन्तितमनुसरति घटं प्रसंगतः पर्यवशतैः ॥ ७८५ ॥
अतिशयचरणसमर्था जङ्घा-विद्याभ्यां चारणा मुनयः । जङ्घाभ्यां याति प्रथमो निश्रां कृत्वा हविकरेऽपि ॥ ७८६ ॥

[1]एगुप्पाएण गओ रुयगवरमिओ तओ पडिनियत्तो । बीएणं नंदिस्सरमिहं तओ एइ तइएणं ॥ ७८७ ॥
पढमेण पंडगवणं बीओप्पाएण नंदणं एइ । तइओप्पाएण तओ इह, जंघाचारणो होइ ॥ ७८८ ॥
पढमेण माणुसोत्तरनगं स नंदिस्सरं तु बिइएण । एइ तओ तइएणं कयचेइयवंदणो इहइं ॥ ७८९ ॥
पढमेण नंदणवणे बीओप्पाएण पंडगवणम्मि । एइ इहं तइएणं जो विज्जाचारणो होइ ॥ ७९० ॥
आसी दाढा तग्गयमहाविसासीविसा दुविहभेया । ते कम्म-जाइभेएणणेगहा-चउविहविगप्पा ॥ ७९१ ॥
मणनाणिग्गहणेणं विउलमई केवली चउब्भेओ । सम्मत्त-नाण-दंसण-चरणेहिं खयप्पसूएहिं ॥ ७९२ ॥
ओहिन्नाणावसरे मणपज्जव-केवलाण किं गहणं ? । लद्धिपसंगेण कयं गहणं जह सेसलद्धीणं ॥ ७९३ ॥

एतास्त्रयोदशापि गाथा प्रायो व्याख्याताऽर्थाः, सुबोधार्थाश्च । नवरं प्रथमगाथायामामर्षौषधि-विप्रुडौषधिस्वरूपं व्याख्यातम् द्वितीयगाथायां तु खेल-जल्ल-सर्वौषधिस्वरूपं विवृतम्, तत्र 'एए त्ति' एतौ विड्-मूत्रावयवौ, 'अन्ने य त्ति' अन्ये च खेल-जल्ल-केश-नखादयो बहवः सर्वे च समुदिता अवयवा येषां साधूनां सुरभयो रोगोपशमसमर्थाश्च ते साधवो भवन्ति ? । कथंभूताः, इत्याह– 'तओ सहिपत्त त्ति' ते च ते औषधयश्च तदौषधयो विड्-मूत्र-खेल-जल्ल-केश-नखाद्यौषधयः सर्वौषधयश्च ताः प्राप्तास्तदौषधिप्राप्ताः साधवो भवन्तीत्यर्थः । तृतीयगाथायां तु संभिन्नश्रोतोऽभिधानार्थस्वरूपं निर्णीतम् । चतुर्थ-पञ्चमगाथाभ्यां तु ऋजुमति-विपुलमतिमनःपर्यायज्ञानस्वरूपम् । निर्युक्तौ विपुलमतेरग्रेतनगाथायां व्यस्तोपादानेऽपि भाष्यकृता द्वयोरपि मनःपर्यायज्ञानावयवतया प्रत्यासन्नत्वाद्ऋजुमते

---

१ एकोत्पादेन गतो रुचकवरमितस्ततः प्रतिनिवृत्तः । द्वितीयेन नन्दीश्वरमिह तत एति तृतीयेन ॥ ७८७ ॥
प्रथमेन पण्डकवनं द्वितीयोत्पातेन नन्दनमेति । तृतीयोत्पातेन तत इह, जङ्घाचारणो भवति ॥ ७८८ ॥
प्रथमेन मानुषोत्तरनगं स नन्दीश्वरं तु द्वितीयेन । एति ततस्तृतीयेन कृतचैत्यवन्दन इह ॥ ७८९ ॥
प्रथमेन नन्दनवने द्वितीयोत्पातेन पण्डकवने । एतीह तृतीयेन यो विद्याचारणो भवति ॥ ७९० ॥
आशी दाढा तद्वत्तमहाविषा आशीविषा द्विविधभेदाः । ते कर्म-जातिभेदेनाऽनेकधा-चतुर्विधविकल्पाः ॥ ७९१ ॥
मनोज्ञानिग्रहणेन विपुलमतिः केवली चतुर्भेदः । सम्यक्त्व-ज्ञान-दर्शन-चारित्रैः क्षयप्रसूतैः ॥ ७९२ ॥
अवधिज्ञानावसरे मनःपर्यव-केवलयोः किं ग्रहणम् ? । लब्धिप्रसङ्गेन कृतं ग्रहणं यथा शेषलब्धीनाम् ॥ ७९३ ॥ २ क.ग.'श गाथाः प्राग् व्या

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

रनन्तरं विपुलमतेरपि व्याख्यानं कृतमित्यदोषः । ' विउलं वत्थुविसेसण त्ति ' विपुलं वस्तुनो घटादेर्विशेषणानां देश-क्षेत्र-कालादीनां मानं संख्यास्वरूपं तद्ग्राहिणी विपुलमतिः । षष्ठ-सप्तमाऽष्टमगाथाभिर्जङ्घाचारणर्द्धिस्वरूपम् । नवम-दशमगाथाभ्यां तु विद्याचारणर्द्धिस्वरूपम् । एकादशगाथयाऽऽशीविषर्द्धिस्वरूपं व्याख्यातम् । 'ते कम्म-जाईत्यादि' ते आशीविषाः कर्मभेदेन तिर्यगाद्यनेकविधाः, जातिभेदेन तु वृश्चिक-मण्डूकादिचतुर्विधविकल्पाः । द्वादशगाथायां केवली चतुर्भेदः, कथम् ?, इत्याह- क्षायिकसम्यक्त्व-ज्ञान-दर्शन-चारित्रभेदादिति । त्रयोदशगाथायां पूर्वार्धेन चालना, उत्तरार्धेन तु प्रत्यवस्थानम् । तत्र मनःपर्यायज्ञानं केवलज्ञानं चोत्तरत्र स्वस्थान एव वक्ष्यते, किमिहावधिज्ञानावसरे तद्ग्रहणम् ? इति चालनाकर्तुरभिप्रायः । आचार्यस्तु मन्यते- यथाऽवधिज्ञानावसरे ऋद्धिसाम्याच्छेषर्द्धिग्रहणम् । तथैवर्द्धिप्रस्तावाद् मनःपर्याय-केवलयोरपीह ग्रहणं कृतमित्यदोष इति ॥ ७८१-७९३ ॥

अथ वासुदेवादीनां बलवर्णनाद्यतिशयं निर्युक्तिकार एव प्रकटयति-

सोलस रायसहस्सा सव्वबलेणं तु संकलनिबद्धं । अंछंति वासुदेवं अगडतडम्मि ठियं संतं ॥ ७९४ ॥
घेत्तूण संकलं सो वामगहत्थेण अंछमाणाणं । भुंजिज्ज विलिंपिज्ज व महुमहणं ते न चाएंति ॥ ७९५ ॥
दो सोला बत्तीसा सव्वबलेणं तु संकलनिबद्धं । अंछंति चक्कवट्टिं अगडतडम्मि ठियं संतं ॥ ७९६ ॥
घेत्तूण संकलं सो वामगहत्थेण अंछमाणाणं । भुंजिज्ज विलिंपिज्ज व चक्कहरं ते न चाएंति ॥ ७९७ ॥
जं केसवस्स बलं तं दुगुणं होइ चक्कवट्टिस्स । तत्तो बला बलवगा अपरिमियबला जिणवरिंदा ॥७९८॥

इह वीर्यान्तरायकर्मक्षयोपशमविशेषाद् बलातिशयो वासुदेवस्य प्रदर्श्यते- षोडश राजसहस्राणि हस्त्य-श्व-रथ-पदाति-समन्वितानि शृङ्खलानिबद्धं 'अंछंति' देशीवचनादाकर्षन्ति वासुदेवं, अगडतटे कूपतटे स्थितं सन्तम् । ततश्च गृहीत्वा शृङ्खलामसौ वामहस्तेन 'अंछमा-

---

१ षोडश राजसहस्राणि सर्वबलेन तु शृङ्खलानिबद्धम् । आकर्षन्ति वासुदेवमवटतटे स्थितं सन्तम् ॥ ७९४ ॥
गृहीत्वा शृङ्खलां स वामहस्तेनाऽऽकर्षताम् । भुञ्जीत विलिम्पेत वा मधुमथनं ते न शक्नुवन्ति ॥ ७९५ ॥
द्वौ षोडशकौ द्वात्रिंशत् सर्वबलेन तु शृङ्खलानिबद्धम् । आकर्षन्ति चक्रवर्तिनमवटतटे स्थितं सन्तम् ॥ ७९६ ॥
गृहीत्वा शृङ्खलां स वामहस्तेनाऽऽकर्षताम् । भुञ्जीत विलिम्पेत वा चक्रधरं ते न शक्नुवन्ति ॥ ७९७ ॥
यत् केशवस्य बलं तद्द्विगुणं भवति चक्रवर्तिनः । ततो बला बलवन्तोऽपरिमितबला जिनवरेन्द्राः ॥ ७९८ ॥

णाणं ति' आकर्षतां भुञ्जीत विलिम्पेत वा हृष्टः सन्नवश्येति । मधुमथनं ते राजानः सबला अपि न शक्नुवन्ति 'आक्रष्टुम्' इति वाक्यशेषः । चक्रवर्तिनस्त्विदं बलं, तद्यथा- द्वौ षोडशकौ द्वात्रिंशत् । तत्र 'द्वात्रिंशत्' इत्येतावत्येव वाच्ये 'द्वौ षोडशकौ' इत्यभिधानं चक्रवर्तिनो वासुदेवाद् द्विगुणर्द्धिख्यापनार्थम् । 'राजसहस्राणि' इति गम्यते । समस्तबलेन सह शृङ्खलानिबद्धमाकर्षन्ति चक्रवर्तिनमगडतटे स्थितं सन्तम् । ततश्च गृहीत्वा शृङ्खलामसौ वामहस्तेनाऽऽकर्षतां भुञ्जीत विलिम्पेत वा; चक्रधरं ते न शक्नुवन्ति 'आक्रष्टुं' इति वाक्यशेषः । यच्च केशवस्य बलं तद्द्विगुणं भवति चक्रवर्तिनः । ततः शेषलोकबलाद् बलदेवा बलवन्तः, तथा निरवशेषवीर्यान्तरायक्षयादपरिमितमनन्तं बलं येषां तेऽपरिमितबला जिनवरेन्द्राः ॥ इति निर्युक्तिगाथापञ्चकार्थः ॥ ७९४ ॥ ७९५ ॥ ७९६ ॥ ७९७ ॥ ७९८ ॥

तदेवमभिहिताः शेषर्द्धयः । एताश्चाऽऽस्यासामपि क्षीर-मधु-सर्पिराश्रवादिकानामृद्धीनामुपलक्षणमिति । अत एवाह भाष्यकारः-

[1]खीर-महु-सप्पिसाओवमाउवयणा तयासवा होंति । कोट्ठयधन्नसुनिग्गलसुत्तत्था कोट्ठबुद्धीया ॥ ७९९ ॥
जो सुत्तपएण बहुं सुयमणुधावइ पयाणुसारी सो । जो अत्थपएणत्थं अणुसरइ स बीयबुद्धी उ ॥८००॥

चीर्णग्रन्थिपर्णकादिवनस्पतिविशेषस्य चक्रवर्तिसंबन्धिनो गोलक्षस्याऽर्धार्धक्रमेण पीतगोक्षीरस्य पर्यन्ते यावदेकस्या गोः संबन्धि यत् क्षीरं तदिह गृह्यते । मध्वपि किमप्यतिशायिशर्करादिमधुरद्रव्यम् । एवं सर्पिरपि किमप्यतिशायि द्रष्टव्यम् । एवंभूतक्षीर-मधु-सर्पिषां य आस्वादस्तदुपमाप्यायकवचना ये तीर्थकर-गणधरादयस्ते तदाश्रवा मन्तव्याः, क्षीर-मधु-सर्पिराश्रवा इत्यर्थः, वचनेन यथोक्तक्षीरादीनिव ते स्रवन्तः सकलजनं सुखयन्ति । मकारस्य दीर्घत्वम् , उकारश्चाऽलाक्षणिकः । तथा, कोष्ठकधान्यवत् सुनिर्गलौ- अविस्मृतत्वाच्चिरस्थायिनौ सूत्रार्थौ येषां ते कोष्ठकधान्यसुनिर्गलसूत्रार्थाः कोष्ठबुद्धयः । यस्त्वध्यापकादेकेनापि सूत्रपदेनाऽधीतेन बहूपि सूत्रं स्वप्रज्ञयाऽभ्यूह्य गृह्णाति स पदानुसारिलब्धिः । "उत्पाद-व्यय-ध्रौव्ययुक्तं सत् " इत्यादिवदर्थप्रधानं पदमर्थपदं तेनैकेनापि बीजभूतेनाऽधिगतेन योऽन्यं प्रभूतमप्यर्थमनुसरति स बीजबुद्धिरिति ॥७९९॥८००॥

किमेता एव लब्धयः ?, इत्याह-

[3]उदय-क्खय-क्खओवसमो-वसमसमुत्था बहुप्पगाराओ । एवं परिणामवसा लद्धीओ होंति जीवाणं ॥८०१॥

---

१ क्षीर-मधु-सर्पिःस्वादोपमवचनास्तदाश्रवा भवन्ति । कोष्ठकधान्यसुनिर्गलसूत्रार्थाः कोष्ठबुद्धयः ॥ ७९९ ॥ × (अन्या-)
यः सूत्रपदेन बहु श्रुतमनुधावति पदानुसारी सः । योऽर्थपदेनाऽर्थमनुसरति स बीजबुद्धिस्तु ॥ ८०० ॥ २ क.ग. 'पर्णिका' ।
३ उदय-क्षय-क्षयोपशमो-पशमसमुत्थाः बहुप्रकाराः । एवं परिणामवशाल्लब्धयो भवन्ति जीवानाम् ॥ ८०१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवमेता अन्याश्च जीवानां शुभ-शुभतर-शुभतमपरिणामवशाद् बहुप्रकारा अपरिमितसंख्या लब्धयो भवन्ति । कथंभूताः ?, इत्याह– 'उदय त्ति' वैक्रिया-ऽऽहारकनामादिकर्मोदयसमुत्थास्तावद् वैक्रिया-ऽऽहारकशरीरकरणादिका लब्धयो भवन्ति । 'खय त्ति' दर्शनमोहादिक्षयसमुत्थास्तु क्षायिकसम्यक्त्व-क्षीणमोहत्व-सिद्धत्वादयः । 'खओवसमु त्ति' दान-लाभान्तरायादिकर्मक्षयोपशमसमुत्था अक्षीणमहानस्यादयः । तत्र येनाऽऽनीतं भैक्षं बहुभिरप्यन्यैर्भुक्तं न क्षीयते, किन्तु स्वयमेव भुक्तं निष्ठां याति तस्याऽक्षीणमहानसीलब्धिः 'उवसम त्ति' दर्शनमोहाद्युपशमसमुत्था औपशमिकसम्यक्त्वो-पशान्तमोहत्वादिका लब्धयो भवन्ति ॥ ८०१ ॥

अथ मतान्तरं तन्निरासं च दर्शयितुमाह–

[3]केई भणंति वीसं लद्धीओ तं न जुज्जए जम्हा । लद्धि त्ति जो विसेसो अपरिमिया ते य जीवाणं ॥ ८०२ ॥
गणहर-तेया-हारय-पुलाय-वोमाइ[4]गमणलद्धीओ । एवं बहुगाओ वि य सुव्वंति न संगिहीयाओ ॥ ८०३ ॥

केचिदाचार्यदेश्यीया विंशतिसंख्यानियमिता एव लब्धीः प्राहुः, यतस्ते पठन्ति–

" [5]आमोसही य खेले जल्ल-विप्पे य होइ सव्वे य । कोट्ठे य बीयबुद्धी पयाणुसारी य संभिन्ने ॥ १ ॥
रिजुमइ-विउल-क्खीरमहु-अक्खीणे विउव्वि-चरणे य । विज्जाहर-अरहंता चक्की बल-वासु वीस इमा ॥ २ ॥ "

'खीरमहु त्ति' एकैवेयं क्षीरमध्वाश्रवलब्धिः । 'चरणे य त्ति' चारणलब्धिः ।

" [6]भवसिद्धियाणमेया वीसं पि हवंति एत्थ लद्धीओ । भवसिद्धियाण महिलाण जत्तिया जा तयं वोच्छं ॥ ३ ॥
जिण-बल-चक्की-केसव-संभिन्न-जंघचरण-पुव्वे य [7]भणिया वि इत्थीए एयाओ न सत्त लद्धीओ ॥ ४ ॥"

---

१ क.ग. 'नश्याद्' । २ क.ग. 'नशील' । ३ केचिद् भणंति विंशतिं लब्धीस्तद् न युज्यते यस्मात् । लब्धिरिति यो विशेषोऽपरिमितास्ते च जीवानाम् ॥ ८०२ ॥
गणधर-तैजसा-ऽऽहारक-पुलाक-व्योमादिगमनलब्धयः । एवं बहुका अपि च श्रूयन्ते न संगृहीताः ॥ ८०३ ॥
४ क.ग. 'इया ग' । ५ क.ग. 'या उ' । ६ आमर्षौषधिश्च श्लेष्मा मल-विप्रुषौ च भवति सर्वश्च । कोष्ठश्च बीजबुद्धिः पदानुसारी च संभिन्नः ॥ १ ॥
ऋजुमति-विपुल-क्षीरमधु-अक्षीणा वैक्रिय-चारणौ च । विद्याधरा-ऽर्हन्तौ चक्री बल-वासू (सुदेवौ)विंशतिरिमाः ॥ २ ॥
७ क.ग. 'रणा ल' । ८ भवसिद्धिकानामेता विंशतिरपि भवन्त्यत्र लब्धयः । भवसिद्धिकानां महिलानां यावत्यो यास्तद् वक्ष्ये ॥ ३ ॥
× ध-। + भणिया इ-। जिन-बल-चक्रि-केशव-संभिन्न-जङ्घाचरण-पूर्वाश्च । भणिता अपि स्त्रिया एता न सप्त लब्धयः ॥ ४ ॥

४९

शेषास्तु त्रयोदश लब्धयः स्त्रीणां भवन्तीति सामर्थ्याद् गम्यते । अथैतास्तावत् सप्त, अन्यच्च ऋजुमति-विपुलमतिलक्षणं लब्धिद्वयं पुरुषाणामप्यभव्यानां न संभवतीति दर्शयितुमाह–

" [1]रिजुमइ-विउलमईओ सत्त य एयाओ पुव्वभणियाओ । लद्धीओ अभव्वाणं होंति नराणं पि न कयाइ ॥ ५ ॥
अभवियमहिलाणं पि हु एयाओ न होंति भणियलद्धीओ । महुखीरासवलद्धी वि नेय सेसा उ अविरुज्झा ॥ ६ ॥"

इत्यलं प्रसङ्गेन । प्रकृतमुच्यते– यदिह विंशतिसंख्यया केचिल्लब्धीर्नियमयन्ति, तद् भवतां प्रमाणं नवा ? । इत्याह— 'तं न जुज्जए इत्यादि' । कुतो न युज्यते ?, इत्याह—लब्धिरिति यः 'अतिशयः' इति वाक्यशेषः, स तावल्लब्धिरहितसामान्यजीवेभ्यो विशेष उच्यते । ते च विशेषाः कर्मक्षय-क्षयोपशमादिवैचित्र्याज्जीवानामपरिमिताः संख्यातुमशक्याः, इति कथं विंशतिसंख्यानियमस्तेषां युज्यते?। किञ्च, गणधरत्व-पुलाकत्व-तेजःसमुद्घाता-ऽऽहारकशरीरकरणादिकास्तावत् प्रसिद्धा अपि बहवो लब्धयः श्रूयन्ते, तासामपीत्थमसंग्रहः स्यादिति । एतदेवाह— 'गणहरेत्यादि' ॥ ८०२ ॥ ८०३ ॥

अत्रैव प्रक्रमे परमतमाशङ्क्य निराकर्तुमाह—

[2]भव्वा-भव्वाइविसेसणत्थमहवा तयं पि सवियारं । भव्वा वि अभव्व व्विय जं चक्कहरादओ भणिया ॥८०४॥

'अहव त्ति' अथवेत्थं ब्रूयात् परः– भव्या-ऽभव्यादिविशेषणार्थं विंशतिसंख्यानियमनम्– एता विंशतिलब्धयो भव्यानामेव, शेषास्तु भव्या-ऽभव्यसाधारणा इति । तदपि सविचारं– सव्यभिचारम्, यतो विंशतेरन्यत्रापि गणधर-पुलाका-ऽऽहारकादिलब्धयो भव्यानामेव भवन्ति, विंशतिमध्यपठिता अपि च वैक्रिय-विद्याधरादिलब्धय आमर्षौषध्यादिलब्धयश्चाऽभव्यानामपि भवन्तीति सर्वत्र व्यभिचारः । किञ्च, भव्यत्वेन प्रसिद्धा अपि चक्रवर्त्यादयो यद् यस्मात् तैर्विंशतिलब्धिवादिभिरेतास्वेव विंशतिलब्ध्यन्तर्वर्तिनीष्वामर्षौषधि-वैक्रियकरण-विद्याधरत्वादिकास्वभव्यसाधारणत्वेनाऽभव्यलब्धिषु मध्ये भणिताः पठिताः, इतीत्थमपि व्यभिचारः, आमर्षौषध्यादिलब्धिवच्चक्रवर्त्यादिलब्धीनामप्यभव्यस्य प्राप्तिप्रसङ्गात् । न च चक्रवर्त्यादिलब्धयः कदाचिदप्यभव्यस्य संभवन्ति ॥ ८०४ ॥

---

१ ऋजुमति-विपुलमती सप्त चैताः पूर्वभणिताः । लब्धयोऽभव्यानां भवन्ति नराणामपि न कदाचित् ॥ ५ ॥
अभव्य-महिलानामपि खलु एता न भवन्ति भणितलब्धयः । मधुक्षीराऽऽश्रवलब्धिरपि ज्ञेयाः शेषास्त्वविरुद्धाः ॥ ६ ॥
२ भव्या-ऽभव्यादिविशेषणार्थमथवा तदपि सविचारम् । भव्या अप्यभव्या इव यच्चक्रधरादयो भणिताः ॥ ८०४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कथं पुनर्ज्ञायते चक्रवर्तिलब्धिर्भव्यानामेव भवति ?, इत्याह—

[1]पोग्गलपरियट्टद्धं जं नरदेवंतरं सुए भणियं । तो सो भव्वो, कालो जमयं निव्वाणभावीणं ॥८०५॥

यद् यस्माद् नरदेवाश्चक्रवर्तिनस्तेषामन्तरमपार्धपुद्गलपरावर्तलक्षणं भगवत्यामुक्तम्, यदाह– "[2]नेरदेवाणं भंते ! अंतरं कालओ केचिरं होइ ? । गोयमा ! जहण्णेणं साइरेगं सागरोवमं, उक्कोसेणं अवड्ढं पोग्गलपरियट्टं देसूणं" इति । तस्मादसौ चक्रवर्ती भव्य एव भवति नाभव्यः, यदस्मादयमपार्धपुद्गलपरावर्तलक्षणोऽन्तरकालो भाविनिर्वाणपदानामेव घटते । अभव्यानां तु भवनपत्यादिभाविदेवानामुत्कृष्टतो वनस्पतिकालस्यैवाऽन्तराऽभिधानात् । किञ्च, अन्यत्रापि देवेन्द्र-चक्रवर्तित्वादिपदयोग्यकर्मणां बन्धो भव्यानामेवोक्त इति भव्य एव चक्रवर्तीति ॥ ८०५ ॥

तदेवं प्रसङ्गाऽऽयाताः शेषर्द्धीः प्रतिपाद्याऽवधिज्ञानं च सप्रसङ्गं विस्तरतः प्ररूप्योपसंहरन् वक्ष्यमाणसंक्षेपप्ररूपणस्य प्रस्तावनां च कर्तुमाह—

[3]भणिओऽवहिणो विसओ तहावि तस्संगहं पुणो भणइ । संखेवरुईण हियं अव्वामोहत्थमिट्ठं च ॥८०६॥

भणितः प्ररूपितः 'ओही खेत्तपरिमाणे संठाणे' इत्यादिना सर्वेणापि पूर्वोक्तग्रन्थेनाऽवधेः स्वरूपाद्यन्वितो विषयो द्रव्य-क्षेत्रादिकः, तथा तत्संग्रहं विषयस्य संक्षेपप्ररूपणं पुनरपि भणत्यन्तरे देववाचको नन्द्यध्ययनसूत्रकारः । अनेन चेदं सूचितम्– नन्द्यध्ययनसूत्रकारेण प्रथमं विस्तरतोऽवधिज्ञानं प्ररूप्य पर्यन्ते पुनरपि संक्षेपतस्तद्विषयः प्ररूपितः, तद्यथा– "[4]तं समासओ चउव्विहं पन्नत्तं, तं जहा– दव्वओ, खेत्तओ, कालओ, भावओ" इत्यादि । ननु नन्दिसूत्रकारेणापि किमिति विषयः पुनरपि प्ररूपितः, पौनरुक्त्यप्रसङ्गात् ?, इत्याशङ्क्याह– 'संखेवेत्यादि' यस्मादतिसंक्षेपरुचीनां हितमिदं संक्षेपभणनम्, अतस्तेषां हितार्थं मन्दमतीनामव्यामोहार्थं चेष्टमेतदिति ॥ ८०६ ॥

---

१ पुद्गलपरिवर्तार्धं यद् नरदेवाऽन्तरं श्रुते भणितम् । ततः स भव्यः, कालो यदयं निर्वाणभाविनाम् ॥ ८०५ ॥

२ नरदेवानां भगवन् ! अन्तरं कालतः कियच्चिरं भवति ?। गौतम ! जघन्येन सातिरेकं सागरोपमम्, उत्कर्षेणाऽपार्धं पुद्गलपरिवर्तं देशोनम् ।

३ भणितोऽवधेर्विषयस्तथापि तत्संग्रहं पुनर्भणति । संक्षेपरुचीनां हितमव्यामोहार्थमिष्टं च ॥ ८०६ ॥ ४ गाथा ५७७ ।

५ तत् समासतश्चतुर्विधं प्रज्ञप्तम्, तद्यथा– द्रव्यतः, क्षेत्रतः, कालतः, भावतः ।

तमेव विषयसंग्रहमाह–

[1]दव्वाइं अंगुला-वलिसंखेज्जाईयभागविसयाइं । पेच्छइ चउग्गुणाइं जहण्णओ मुत्तिमंताइं ॥ ८०७ ॥
उक्कोसं संखाईयलोगपोग्गलसमानिबद्धाइं । पइदव्वं संखाईयपज्जयाइं च सव्वाइं ॥ ८०८ ॥

जघन्यतो मूर्तिमन्ति द्रव्याण्यवधिज्ञानी पश्यतीति संटङ्कः । कथंभूतानि ?, इत्याह– 'अंगुलेत्यादि' अङ्गुलसंख्यातीतभागविषयाणि, आवलिकासंख्यातीतभागविषयाणि चेत्यर्थः । भावतस्तु प्रतिद्रव्यं चत्वारो गुणा धर्माः पर्याया येषां तानि चतुर्गुणानि पश्यति । इदमुक्तं भवति– जघन्यतोऽवधिज्ञानी द्रव्यतः, क्षेत्रतश्चाङ्गुलासंख्येयभागवर्तीनि मूर्तद्रव्याणि पश्यति, कालतस्त्वेतावद्द्रव्याणामावलिकाऽसंख्येयभागाभ्यन्तरवर्तिनोऽतीतान्, अनागतांश्च पर्यायान् पश्यति, भावतस्तु प्रतिद्रव्यं चतुरः पर्यायान् पश्यतीति ।

उत्कृष्टतस्तु द्रव्यतः क्षेत्रतश्चाऽसंख्येयलोकाकाशखण्डावगाढानि सर्वाण्यपि मूर्तद्रव्याणि पश्यति । एतानि चैकस्मिन्नेव लोकाकाशेऽवगाढानि प्राप्यन्ते, शेषलोकावगाढानां तु दर्शनं शक्तिमात्रापेक्षयैवोच्यते । कालतस्त्वेषां द्रव्याणामसंख्यातोत्सर्पिण्य-वसर्पिणीसमान्तर्गतानतीता-ऽनागतांश्च पर्यायान् पश्यति । भावतस्त्वेकैकद्रव्यमाश्रित्याऽसंख्येयपर्यायाण्येतानि पश्यति । इह च दर्शनक्रियासामान्यमात्रमाश्रित्य 'पश्यति' इत्युक्तम्, विशेषतस्तु जानाति पश्यतीति च सर्वत्र द्रष्टव्यम् ॥ ८०८ ॥

तदेवं जघन्यत उत्कृष्टतश्च प्राग् विस्तरतः प्रोक्तोऽवधिविषयः, इदानीं तु स एव संक्षेपत उक्तः ॥

॥ तद्गणने च सप्रसङ्गमवधिज्ञानं समाप्तमिति ॥

---

१ द्रव्याण्यङ्गुला-ऽऽवलिसंख्यातीतभागविषयाणि । प्रेक्षते चतुर्गुणानि जघन्यतो मूर्तिमन्ति ॥ ८०७ ॥ +पिग्गल-।
उत्कृष्टतः संख्यातीतलोकपुद्गलसमानिबद्धानि । प्रतिद्रव्यं संख्यातीतपर्ययाणि च सर्वाणि ॥ ८०८ ॥ २ घ. छ. 'ताना' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ ज्ञानपञ्चकभणनक्रमाऽऽयातस्य मनःपर्यायज्ञानस्य प्रस्तावनां कर्तुमाह- ॥ मनःपर्यायज्ञानम् ॥

ओहिविभागे भणियं पि लद्धिसामण्णओ मणोनाणं । विसयाइविभागत्थं भणइ नाणक्कमायातं ॥८०९॥

प्रकटार्थैव ॥ इत्येकादशगाथार्थः ॥ ८०९ ॥

तदे[1] प्रतिज्ञातं मनःपर्यायज्ञानमाह-

मणपज्जवनाणं पुण जणमणपरिचिंतियत्थपागडणं । माणुसखेत्तनिबद्धं गुणपच्चइयं चरित्तवओ ॥८१०॥

मनःपर्यायज्ञानं प्राग् निरूपितशब्दार्थम् । पुनःशब्दोऽवधिज्ञानादस्य विशेषद्योतनार्थः । इदं हि रूपिद्रव्यनिबन्धनत्व-क्षायोपशमिकत्व-प्रत्यक्षत्वादिसाम्येऽपि सत्यवधिज्ञानात् स्वाम्यादिभेदेन विशिष्टमिति । तत्र विषयमाश्रित्य स्वरूपत इदं प्रतिपादयति- जायन्त इति जनास्तेषां मनांसि जनमनांसि तैः परिचिन्तितो जनमनःपरिचिन्तितः स चासावर्थश्च तं प्रकटयति प्रकाशयति जनमनःपरिचिन्तितार्थप्रकटनम् । मानुषक्षेत्रमर्धतृतीयद्वीप-समुद्रपरिमाणं तन्निबद्धम्, न खलु तद्बहिर्भूतप्राणिमनांस्यवगच्छतीति भावः । गुणा विशिष्टर्द्धिप्राप्ति-क्षान्त्यादयस्त एव प्रत्ययाः कारणानि यस्य तद् गुणप्रत्ययम् । चारित्रमस्याऽस्तीति चारित्रवांस्तस्य चारित्रवत एवेदं भवति, तस्याऽप्यप्रमत्तर्द्धिप्राप्तत्वादिसमयोक्तविशेषविशिष्टस्यैव ॥ इति निर्युक्तिगाथार्थः ॥ ८१० ॥

अथ भाष्यं तत्र पुनःशब्दार्थं तावदाह-

पुणसद्दो उ विसेसे रूविनिबंधाइतुल्लभावे वि । इदमोहिन्नाणाओ सामिविसेसाइणा भिन्नं ॥ ८११ ॥

गतार्थैव ॥ ८११ ॥

अथ कस्य तद् भवति, कियत्क्षेत्रविषयं च ?, इत्याह—

तं संजयस्स सव्वप्पमायरहियस्स विविहरिद्धिमओ । समयक्खेत्तब्भितरसण्णिमणोगयपरिण्णाणं ॥८१२॥

---

१ घ. छ. 'नभणनस्य' । २ क. ग. 'नां कुर्वन्नाह' । ३ अवधिविभागे भणितमपि लब्धिसामान्यतो मनोज्ञानम् । विषयादिविभागार्थं भणति ज्ञानक्रमायातम् ॥ ८०९ ॥

४ मनःपर्यवज्ञानं पुनर्जनमनःपरिचिन्तितार्थप्रकटनम् । मनुष्यक्षेत्रनिबद्धं गुणप्रत्ययितं चारित्रवतः ॥ ८१० ॥ ५ क. ग. 'सामान्येऽपि' ।

६ पुनःशब्दस्तु विशेषे रूपिनिबन्धादितुल्यभावेऽपि । इदमवधिज्ञानात् स्वामिविशेषादिना भिन्नम् ॥ ८११ ॥

७ तत् संयतस्य सर्वप्रमादरहितस्य विविधर्द्धिमतः । समयक्षेत्राभ्यन्तरसंज्ञिमनोगतपरिज्ञानम् ॥ ८१२ ॥ ८ क. ख. ग, 'सब्भंत' ।

प्रकटार्था ॥ ८१२ ॥

तदेवं क्षेत्रतस्तद्विषय उक्तः; अथ द्रव्यतः, कालतः, भावतश्च तद्विषयमाह—

मुणइ मणोदव्वाइं नरलोए सो मणिज्जमाणाइं । काले भूय-भविस्से पलियाऽसंखिज्जभागम्मि ॥ ८१३ ॥

दव्वमणोपज्जाए जाणइ पासइ य तग्गएणंते । तेणावभासिए उण जाणइ बज्झेऽणुमाणेणं ॥ ८१४ ॥

स मनःपर्यायज्ञानी मुणत्यवगच्छति । कानि ?, इत्याह— मनश्चिन्ताप्रवर्तकानि द्रव्याणि मनोद्रव्याणि । तानि किं मनोयोग्यान्यप्याकाशस्थानि जानाति ?। न, इत्याह– नरलोके तिर्यग्लोके मन्यमानानि संज्ञिभिर्जीवैः कार्य-मनोयोगेन गृहीत्वा मनोयोगेन मनस्त्वेन परिणमितानीत्यर्थः । तदयं द्रव्यतो विषय उक्तः । अथ कालतो भावतश्च तमाह– 'काले इत्यादि ' भावतस्तावज्जानाति पश्यति च । कान् ?, इत्याह– चिन्तानुगुणान् सर्वपर्यायराश्यनन्तभागरूपानन्तान् रूपादीन् पर्यायान् । कस्य संबन्धिनः ?, इत्याह– मनस्त्वपरिणतानन्तस्कन्धसमूहमयस्य द्रव्यमनसः, न तु भावमनसः, तस्य ज्ञानरूपत्वात्, ज्ञानस्य चामूर्तत्वात्, छद्मस्थस्य चामूर्तविषयाऽयोगादिति । तांश्च तद्गतानेव मनोद्रव्यस्थितानेव जानाति, न पुनश्चिन्तनीयबाह्यघटादिवस्तुगतानिति भावः । न च वक्तव्यमेते मनोद्रव्यसंबन्धिन एव न भवन्ति, किमेतद्व्यवच्छेदपरेण तद्गतग्रहणेन ? इतिः मनोद्रव्याणि दृष्ट्वा पश्चादनुमानेन ते ज्ञायन्ते, इत्येतावता मनोद्रव्यैरपि सह संबन्धमात्रस्य विद्यमानत्वात् । एतदेवाह– तेन द्रव्यमनसाऽवभासितान् प्रकाशितान् बाह्यांश्चिन्तनीयघटादीननुमानेन जानाति, यत एव तत्परिणतान्येतानि मनोद्रव्याणि, तस्मादेवंविधेनेह चिन्तनीयवस्तुना भाव्यम्, इत्येवं चिन्तनीयवस्तूनि जानाति न साक्षादित्यर्थः । चिन्तको हि मूर्तममूर्तं च वस्तु चिन्तयेत् । न च च्छद्मस्थोऽमूर्तं साक्षात् पश्यति, ततो ज्ञायते– 'अनुमानादेव चिन्तनीयं वस्त्ववगच्छति । कियति कस्मिंश्च काले मनोद्रव्य-पर्यायानसौ जानाति ?, इत्याह– 'काले भूयेत्यादि' भूतेऽतीते, भविष्यति चाऽनागते पल्योपमासंख्येयभागरूपे काले ये तेषां मनोद्रव्याणां भूता व्यतीताः, भविष्यन्तश्चाऽनागताश्चिन्तानुगुणाः पर्यायास्तान् जानातीति ॥८१३॥ ८१४ ।

अत्र चान्तरे "तं समासओ चउव्विहं पन्नत्तं, तं जहा– दव्वओ, खेत्तओ, कालओ, भावओ । दव्वओ णं उजुमइ अणंते अणंतपएसिए खन्धे जाणइ पासइ" इत्यादि नन्दिसूत्रेऽभिहितम् । तत्र मनःपर्यायज्ञानं पटुक्षयोपशमप्रभवत्वाद् विशेषमेव गृह्णदुत्पद्यते,

---

१ जानाति मनोद्रव्याणि नरलोके स मन्यमानानि । काले भूत-भविष्यतोः पल्यासंख्येयभागे ॥ ८१३ ॥

द्रव्यमनःपर्यायान् जानाति पश्यति च तद्गतानानन्तान् । तेनावभासितान् पुनर्जानाति बाह्यानुमानेन ॥ ८१४ ॥ २ क. ग. 'संखेज्ज' । ३ क. 'यथो' ।

४ तत् समासतश्चतुर्विधं प्रज्ञप्तम्, तद्यथा—द्रव्यतः, क्षेत्रतः, कालतः, भावतः । द्रव्यत ऋजुमतिरनन्तानानन्तप्रदेशिकान् स्कन्धान् जानाति, पश्यति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न सामान्यम्; अतो ज्ञानरूपमेवेदम्, न पुनरिह दर्शनमस्ति, सति च तस्मिन् पश्यतीत्युपपद्यते, इति कथमिहोक्तं 'पासइ' इति ?, इति चेतसि संप्रधार्य आह–

सो य किर अचक्खुदंसणेण पासइ जहा सुयन्नाणी । जुत्तं सुए परोक्खे पच्चक्खे न उ मणोनाणे ?॥८१५॥

स च मनःपर्यायज्ञानी किलाऽचक्षुर्दर्शनेन पश्यति, यथा श्रुतज्ञानी केषांचिद् मतेनाऽचक्षुर्दर्शनेन पश्यतीति प्रागुक्तम् । तथा च पूर्वमभिहितम्–

'उवउत्तो सुयनाणी सव्वं दव्वाइं जाणइ जहत्थं । पासइ य केइ सो पुण तमचक्खुदंसणेणं ति' ॥ १ ॥

इत्यादि । इदमत्र हृदयम्– परस्य घटादिकमर्थं चिन्तयतः साक्षादेव मनःपर्यायज्ञानी मनोद्रव्याणि तावज्जानाति, तान्येव च मानसेनाऽचक्षुर्दर्शनेन विकल्पयति; अतस्तदपेक्षया 'पश्यति' इतीत्युच्यते । ततश्चैकस्यैव मनःपर्यायज्ञानिनः प्रमातुर्मनःपर्यायज्ञानादनन्तरमेव मानसमचक्षुर्दर्शनमुत्पद्यते, इत्यसावेक एव प्रमाता मनःपर्यायज्ञानेन मनोद्रव्याणि जानाति, तान्येव चाऽचक्षुर्दर्शनेन पश्यतीत्यभिधीयत इति ।

अत्र कश्चित् प्रेरकः प्राह– 'जुत्तमित्यादि' "मति-श्रुते परोक्षम्" इति वचनात् परोक्षार्थविषयं श्रुतज्ञानम्, अचक्षुर्दर्शनमपि मतिभेदत्वात् परोक्षार्थविषयमेव; इत्यतो युक्तं घटमानकं श्रुतज्ञानविषयभूते मेरु-स्वर्गादिके परोक्षेऽर्थेऽचक्षुर्दर्शनम्, तस्यापि तदालम्बनत्वेन समानविषयत्वात् । किं पुनस्तर्हि न युक्तम् ?, इत्याह– 'न उ इत्यादि' "अवधि-मनःपर्याय-केवलानि प्रत्यक्षम्" इति वचनात् पुनः प्रत्यक्षार्थविषयं मनःपर्यायज्ञानम् । अतः परोक्षार्थविषयस्याऽचक्षुर्दर्शनस्य कथं तत्र प्रवृत्तिरभ्युपगम्यते, भिन्नविषयत्वात् ? ॥८१५॥

अत्र सूरिराह–

[1]जइ जुज्जए परोक्खे पच्चक्खे नणु विसेसओ[2] घडइ । नाणं जइ पच्चक्खं न दंसणं तस्स को दोसो ?॥८१६॥

यदि परोक्षेऽर्थेऽचक्षुर्दर्शनस्य प्रवृत्तिरभ्युपगम्यते, तर्हि प्रत्यक्षे सुतरामस्येयमङ्गीकर्तव्या, विशेषेण तस्य तदनुग्राहकत्वात्, चक्षुःप्रत्यक्षोपलब्धघटादिवदिति । अत्राह– को वै न मन्यते, यत् प्रत्यक्षेऽर्थः सुतरामचक्षुर्दर्शनस्याऽनुग्राहक इति ?; केवलं प्रत्यक्षमनो-

---

१ स च किलाचक्षुर्दर्शनेन पश्यति यथा श्रुतज्ञानी । युक्तं श्रुते परोक्षे प्रत्यक्षे न तु मनोज्ञाने ॥ ८१५ ॥ २ गाथा ५५३ ।

३ यदि युज्यते परोक्षे प्रत्यक्षे ननु विशेषतो घटते । ज्ञानं यदि प्रत्यक्षं न दर्शनं तस्य को दोषः ? ॥ ८१६ ॥ ४ क. 'ओ मुणइ' ।

द्रव्यार्थग्राहकत्वादित्थं मनःपर्यायज्ञानस्य प्रत्यक्षता युज्यते, न पुनरचक्षुर्दर्शनस्य, मतिभेदत्वेन तस्य परोक्षार्थग्राहकत्वात् । ततः प्रत्यक्षज्ञानित्वं मनःपर्यायज्ञानिनो विरुध्येत; इत्याशङ्क्याह– 'नाणं जइत्यादि' यदि मनःपर्यायज्ञानलक्षणं ज्ञानं प्रत्यक्षार्थग्राहकत्वात् प्रत्यक्षम्, न त्वचक्षुर्दर्शनलक्षणं दर्शनं प्रत्यक्षम्, परोक्षार्थग्राहकत्वेन परोक्षार्थत्वात्; तर्हि हन्त ! तस्य मनःपर्यायज्ञानिनः प्रत्यक्षज्ञानितायां को दोषः– को विरोधः?– न कश्चित्, भिन्नविषयत्वात्, अवधिज्ञानिनश्चक्षुर्दर्शना-ऽचक्षुर्दर्शनवदिति । न ह्यवधिज्ञानिनश्चक्षुरचक्षुर्दर्शनाभ्यां परोक्षमर्थं पश्यतः प्रत्यक्षज्ञानितायाः कोऽपि विरोधः समापद्यते, तद्वदिहाऽपि । तस्माद् मनःपर्यायज्ञानी स्वज्ञानेन मनोद्रव्य-पर्यायान् जानाति, मानसेन त्वचक्षुर्दर्शनेन पश्यतीति स्थितम् ॥ ८१६ ॥

अन्ये तु 'पश्यति' इत्यन्यथा समर्थयन्ति, इति दर्शयति–

[1]अन्नेऽवहिदंसणओ वयंति न य तस्स तं सुए भणियं । न य मणपज्जवदंसणमन्नं च चउप्पयाराओ॥८१७॥

अन्ये त्ववधिदर्शनेनाऽसौ मनःपर्यायज्ञानी पश्यति, मनःपर्यायज्ञानेन तु जानातीति वदन्ति । एतच्चाऽयुक्तमेव, इत्याह– न च नैव तस्य मनःपर्यायज्ञानिनस्तदवधिदर्शनं श्रुतेऽभिहितम् । न हि मनःपर्यायज्ञानिनोऽवधिज्ञान-दर्शनाभ्यामवश्यमेव भवितव्यम्, अवधिमन्तरेणाऽपि मति-श्रुत-मनःपर्यायलक्षणज्ञानत्रयस्याऽऽगमे प्रतिपादितत्वात् तथा चाह– "मणपज्जवनाणलद्धीया णं भन्ते ! जीवा किं नाणी, अन्नाणी ? । गोयमा ! नाणी, नो अन्नाणी । अत्थेगइया तिनाणी, अत्थेगइया चउनाणी । जे तिनाणी ते आभिणिबोहिय-सुय-मणपज्जवनाणी; जे चउनाणी ते आभिणिबोहिय-सुय-ओहि-मणपज्जवनाणी" । तदेवं मनःपर्यायज्ञानिनोऽवधिनियमस्याऽभावात् कथमवधिदर्शनेनाऽसौ पश्यतीत्युपपद्यते ? । अथैवं मन्यसे– किमेतैर्बहुभिः प्रलपितैः ?, यथाऽवधेर्दर्शनम्, तथा मनःपर्यायस्याऽपि तद् भविष्यति, ततस्तेनाऽसौ पश्यति, इत्युपपत्स्यत एव; इत्याशङ्क्याह– 'न य मणेत्यादि' न च नैव चतुष्प्रकाराच्चक्षुरादिदर्शनादन्यत् पञ्चमं मनःपर्यायदर्शनं श्रुते भणितम्, येन पश्यतीत्युपपत्स्यते । तथाचाह– "कइविहे णं भंते ! दंसणे पण्णत्ते ? । गोयमा ! चउव्विहे,

---

१ अन्येऽवधिदर्शनतो वदन्ति न च तस्य तत् श्रुते भणितम् । न च मनःपर्यवदर्शनमन्यच्च चतुष्प्रकारात् ॥ ८१७ ॥

२ मनःपर्यवज्ञानलब्धिका भगवन् ! जीवाः किं ज्ञानिनः, अज्ञानिनः ? । गौतम ! ज्ञानिनः, नो अज्ञानिनः । सन्त्येके त्रिज्ञानाः, सन्त्येके चतुर्ज्ञानाः । ये त्रिज्ञानास्ते आभिनिबोधिक-श्रुत-मनःपर्यवज्ञानिनः; ये चतुर्ज्ञानास्ते आभिनिबोधिक-श्रुता-ऽवधि-मनःपर्यवज्ञानिनः । ३ कतिविधं भगवन् ! दर्शनं प्रज्ञप्तम् ? । गौतम ! चतुर्विधम्, तद्यथा– चक्षुर्दर्शनम्, अचक्षुर्दर्शनम्, अवधिदर्शनम्, केवलदर्शनम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तं जहा– चक्खुदंसणे, अचक्खुदंसणे, ओहिदंसणे, केवलदंसणे" इति । तस्मात् पञ्चमस्य मनःपर्यायदर्शनस्याऽनुक्तत्वात् 'ते पश्यति' इत्येतदपि नोपपद्यत इति ॥ ८१७ ॥

अभिप्रायान्तरमाशङ्कमान आह–

[1]अहवा मणपज्जवदंसणस्स मयमोहिदंसणं सण्णा । विब्भंगदंसणस्स व नणु भणियमिदं सुयाईयं ॥ ८१८

अथवा कश्चिदेवं मन्येत– यथा विभङ्गदर्शनमवधिदर्शनमेवोच्यते, तथा मनःपर्यायदर्शनस्याऽप्यवधिदर्शनमिति संज्ञाऽभिमत भविष्यति । इदमुक्तं भवति– चक्षुरादिदर्शनचतुष्टयाऽऽधिक्येनाऽनुक्तमपि यथाऽवधिदर्शनेऽन्तर्भूतं विभङ्गदर्शनमिष्यते, तथा मनःपर्याय दर्शनमपि भविष्यति । ततः 'तेन मनःपर्यायज्ञानी पश्यति' इत्युपपत्स्यत एवेति । अत्र सूरिराह– नन्वेतत् श्रुतातीतमागमविरुद्धमेव त्वय भणितम् ॥ ८१८ ॥

कुतः ?, इत्याह—

[2]जेण मणोनाणविओ दो [3]तिण्णि व दंसणाइं भणियाइं । जइ ओहिदंसणं होज्ज, होज्ज नियमेण तो [4]तिण्णि॥८१९

यस्माद् भगवत्यामाशीविषोद्देशके मनःपर्यायज्ञाने चक्षु-रचक्षुर्दर्शनलक्षणे द्वे दर्शने, चक्षु-रचक्षु-रवधिदर्शनलक्षणानि त्रीणि व दर्शनानि प्रोक्तानि– यो मति-श्रुत-मनःपर्यायज्ञानत्रितयवांस्तस्य द्वे दर्शने, यस्तु मति-श्रुता-ऽवधि-मनःपर्यायज्ञानचतुष्टयवांस्तस्य त्रीणि दर्शनानीति भावः । तस्मादुत्सूत्रं मनःपर्यायज्ञानवतोऽवधिदर्शनसंज्ञितदर्शनाभिधानम् । यदि पुनरित्थं स्यात्, तदा मति-श्रुत-मनःपर्या यज्ञानत्रयवतोऽपि दर्शनानि नियमात् त्रीण्येव स्युः, न तु कापि द्वे, तस्मात् श्रुतातीतमिदमिति ॥ ८१९ ॥

अन्ये त्वाहुः । किम् ?, इत्याह—

[5]अन्ने उ मणोनाणी जाणइ पासइ य जोऽवहिसमग्गो । इयरो य जाणइ च्चिय संभवमेत्तं सुएऽभिहियं ॥८२०

अन्ये तु मन्यन्ते– योऽवधिज्ञानयुक्तो मनःपर्यायज्ञानी चतुर्ज्ञानीत्यर्थः, असौ मनःपर्यायज्ञानेन जानाति, अवधिदर्शनेन तु

---

१ अथवा मनःपर्यवदर्शनस्य मतमवधिदर्शनं संज्ञा । विभङ्गदर्शनस्येव ननु भणितमिदं श्रुतातीतम् ॥ ८१८ ॥ २ क. ग. 'मन्यते य' ।

३ येन मनोज्ञानविदो द्वे त्रीणि वा दर्शनानि भणितानि । यद्यवधिदर्शनं भवेत् , भवेयुर्नियमेन ततस्त्रीणि ॥ ८१९ ॥ ४ क. ख. ग. 'तिन्नि व । ५ क. ग. ङ. 'तिन्नि

६ अन्ये तु मनोज्ञानी जानाति पश्यति च योऽवधिसहितः । इतरश्च जानात्येव संभवमात्रं श्रुतेऽभिहितम् ॥ ८२० ॥

५०

पश्यति । यस्त्ववधिरहितस्त्रिज्ञानी स मनःपर्यायज्ञानेन जानात्येव, न तु पश्यति, तस्याऽवधिदर्शनाभावात् । अतो मनःपर्यायज्ञानमात्र-माश्रित्य संभवमात्रतो जानाति, पश्यति चेति नन्दिसूत्रेऽभिहितमिति ॥ ८२० ॥

अन्ये तु 'जानाति, पश्यति' इत्यन्यथा समर्थयन्ति, इत्याह—

[1]अन्ने जं सागारं तो तं नाणं न दंसणं तम्मि । जम्हा पुण पच्चक्खं पेच्छइ तो तेण तन्नाणी ॥ ८२१ ॥

अन्ये त्वाहुः– यद् यस्मात् पटुक्षयोपशमप्रभवत्वाद् मनःपर्यायज्ञानं साकारमेवोत्पद्यते, ' तो त्ति ' ततस्तज्ज्ञानमेव, तेन जानात्येवेत्यर्थः, न पुनस्तत्र मनःपर्यायज्ञानेऽवधि-केवलयोरिव दर्शनमस्ति । तर्हि ' पश्यति' इति कथम् ?, इत्याह– [2]यस्मात् पुनः प्रत्यक्षं मनःपर्यायज्ञानं, 'तो त्ति' ततः प्रत्यक्षत्वात् तेनैव मनःपर्यायज्ञानेन पश्यत्यसौ तज्ज्ञानी- स चासौ ज्ञानी च तज्ज्ञानी, मनःपर्यायज्ञानी-त्यर्थः । इदमुक्तं भवति– 'दृशिर् प्रेक्षणे' प्रकृष्टं चेक्षणं प्रत्यक्षस्यैवोपपद्यते, प्रत्यक्षं च मनःपर्यायज्ञानम्, अतस्तेन पश्यतीति घटत एव । साकारत्वेन तु तस्य ज्ञानत्वात् 'तेन जानाति इति निर्विवादमेव सिद्धम् । तस्माद् दर्शनाभावेऽपि यथोक्तन्यायात् 'मनःपर्यायज्ञानी जानाति, पश्यति' इत्युपपद्यत एवेति ।

एतदपि मूलटीकाकृता दूषितमेव, तद्यथा– ननु मनःपर्यायज्ञाने साकारत्वेन ज्ञानत्वाद् दर्शनं नास्ति, अथ च 'प्रत्यक्षत्वेन दृश्य-तेऽनेन वस्तु' इति विरुद्धैवेयं वाचोयुक्तिः, साकारत्वेन निषिद्धस्यापीह दर्शनस्य 'दृश्यतेऽनेनेति दर्शनम्' इति व्युत्पत्त्या[3] सामर्थ्यादा-पत्तेः । किञ्च, 'जानाति' इत्यनेनाऽत्र साकारत्वं स्थापितम्, 'पश्यति' इत्यनेन च दर्शनरूढेन शब्देनाऽनाकारत्वं व्यवस्थाप्यते, अतो विरुद्धोभयधर्मप्राप्त्याऽपि न किञ्चिदेतदिति ॥ ८२१ ॥

आह– यद्यमी सर्वेऽपि पूर्वोक्ता अन्येषामेवाऽभिप्रायाः, सदोषाश्च केऽपि कथञ्चित् ; तर्ह्याचार्यस्य कोऽभिप्रायः ?, इत्याशङ्क्याह–

[4]भण्णइ, पन्नवणाए मणपज्जवनाणपासणा भणिया । तो एव पासए सो, संदेहो हेउणा केण ? ॥ ८२२ ॥

भण्यते स्थितः पक्षोऽत्र । कः ?, इत्याह– प्रज्ञापनायां त्रिंशत्तमपदे मनःपर्यायज्ञानस्य प्रकृष्टेक्षणलक्षणा साकारोपयोगविशेषरूपा

---

१ अन्ये यत् साकारं ततस्तज्ज्ञानं न दर्शनं तस्मिन् । यस्मात् पुनः प्रत्यक्षं प्रेक्षते ततस्तेन तज्ज्ञानी ॥ ८२१ ॥ २ क. ख. 'च म' । ३ क. ग. 'त्पत्तिसा'

४ भण्यते, प्रज्ञापनायां मनःपर्यवज्ञानपश्यत्ता भणिता । तत एव पश्यत्यसौ सः संदेहो हेतुना केन ? ॥ ८२२ ॥ ×(पृ.-९०००)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पश्यत्ता मोक्ता, तयैवासौ 'मनःपर्यायज्ञानी पश्यति' इति व्यपदिश्यते । तत् केन किल हेतुनाऽभिप्रायान्तरवादिनां संदेहोऽत्र, येनाऽपराऽपरान् निजनिजाभिप्रायानत्र प्रकटयन्ति ?, तस्यैव प्रकारस्याऽऽगमोक्तत्वेन निर्दोषत्वादिति भावः ।

प्रक्षेपगाथा चेयं लक्ष्यते, चिरन्तनटीकाद्वयेऽप्यगृहीतत्वात्, केषुचिद् भाष्यपुस्तकेष्वदर्शनाच्च; केवलं केषुचिद् भाष्यपुस्तकेषु दर्शनात्, किञ्चित्साभिप्रायत्वाच्चाऽस्माभिर्गृहीता ॥ इति द्वादशगाथार्थः ॥ सत्पदप्ररूपणतादयोऽस्याऽप्यवधिवद् वाच्याः, केवलमप्रमेयसंयतोऽस्योत्पादस्वामी, तदनुसारेण सर्वत्र नानात्वं स्वयमभ्यूह्यम् ॥ ८२२ ॥

॥ मनःपर्यायज्ञानं समाप्तमिति ॥

॥ केवलज्ञानम् ॥

अथ ज्ञानपञ्चकभणनक्रमायातं केवलज्ञानमुच्यते—

[1]अह सव्वदव्वपरिणामभावविन्नत्तिकारणमणंतं । सासयमप्पडिवाई एगविहं केवलन्नाणं ॥ ८२३ ॥

इह नन्द्यादिसूत्रनिर्देशक्रमात्, तथा शुद्धितः, लाभतश्च पूर्वं 'आभिणिबोहियनाणं' इत्यादिगाथायां मनःपर्यायज्ञानादनन्तरं केवलज्ञानमुपन्यस्तम्, अतस्तदर्थसूचकोऽयमथशब्दः । अथाऽनन्तरं केवलज्ञानमुच्यते । कथंभूतम् ?, इत्याह– सर्वाणि च तानि द्रव्याणि च सर्वद्रव्याणि जीवादीनि तेषां परिणमनानि परिणामाः प्रयोग-विस्रसोभयजन्या उत्पादादयः सर्वद्रव्यपरिणामास्तेषां भावः सत्ता स्वलक्षणं वा तस्य विविधं विशेषेण वा ज्ञपनं बोधनं विज्ञप्तिः, अथवा, विविधविशेषेण वा ज्ञानमवबोधः परिच्छित्तिर्विज्ञप्तिः, तस्याः केवलज्ञानाभेदेऽपि विवक्षितभेदायाः कारणं हेतुर्विज्ञप्तिकारणं सर्वद्रव्य-क्षेत्र-काल-भावाऽस्तित्वपरिच्छेदकमित्यर्थः । तच्चानन्तज्ञेयविषयत्वेनाऽनन्तपर्यायत्वादनन्तम्; शश्वद्भावात् शाश्वतं सततोपयोगमित्यर्थः; तथा, अप्रतिपाति– अव्ययं सदाऽवस्थायीत्यर्थः; समस्तावरणक्षयसंभूतत्वादेकविधं भेदविप्रमुक्तम्; केवलं परिपूर्णसमस्तज्ञेयावगमात्, मत्यादिज्ञाननिरपेक्षत्वादसहायं वा केवलं, तच्च तज्ज्ञानं च केवलज्ञानम् ॥ इति निर्युक्तिगाथार्थः ॥ ८२३ ॥

अथ भाष्यम्—

---

१ अथ सर्वद्रव्यपरिणामभावविज्ञप्तिकारणमनन्तम् । शाश्वतमप्रतिपाति एकविधं केवलज्ञानम् ॥ ८२३ ॥ २ गाथा ७९ ।

[1]मणपज्जवनाणाओ केवलमुद्देस-सुद्धि-लाभेहिं । पुव्वमणंतरमभिहियमहसद्दोऽयं तयत्थम्मि ॥ ८२४ ॥
सव्वदव्वाण पओग-वीससा-मीसजा जहाजोग्गं । परिणामा पज्जाया जम्म-विणासादओ सव्वे ॥८२५॥
तेसिं भावो सत्ता सलक्खणं वा विसेसओ तस्स । नाणं विण्णत्तीए कारणं केवलण्णाणं ॥ ८२६ ॥
किं बहुणा सव्वं सव्वओ सया सव्वभावओ नेयं । सव्वावरणाईयं केवलमेगं पयासेइ ॥ ८२७ ॥
पज्जायओ अणंतं सासयमिट्ठं सदोवओगाओ । अव्वयओऽपडिवाई एगविहं सव्वसुद्धीए ॥ ८२८ ॥

पञ्चापि गाथा गतार्थाः । नवरं प्रथमगाथायामुद्देशो नन्द्यादिसूत्रनिर्देशक्रमः, शुद्धिः सर्वावरणक्षयसंभवत्वेन सर्वोत्कृष्टत्वात् सर्वोपरिवर्तिनी विशुद्धिः, अतः केवलज्ञानस्यापि तत्संभूतत्वात् सर्वोपर्येवाऽभिधानम् । लाभोऽपि केवलस्य समस्तज्ञानानां पश्चादेव भवति, इत्यस्य पश्चादेव निर्देशः । 'अणंतरं ति' मनःपर्यायज्ञानादनन्तरमित्यर्थः । चतुर्थगाथायां 'सव्वउ त्ति' सर्वतः समन्तादिति । 'सव्वभावउ त्ति, सर्वपर्यायतः, सर्वैः पर्यायैरुपेतं ज्ञेयमिति तात्पर्यम् । केवलं कथंभूतम् ?, इत्याह– सर्वावरणातीतं सर्वावरणक्षयसंभूतमित्यर्थः ॥ ८२४ ॥ ८२५ ॥ ८२६ ॥ ८२७ ॥ ८२८ ॥

इह समुत्पन्नकेवलज्ञानस्तीर्थकरादिः शब्देन देशनां करोति, शब्दश्च द्रव्यश्रुतम्, स च प्रायो भावश्रुताऽविनाभावी, इति तत्संभवे केवलिनोऽनिष्टापत्तिः, इत्येवमव्युत्पन्नमतीनां मा भूद् मतिमोहः, इत्याह–

[2]केवलनाणेण त्थे नाउं जे तत्थ पन्नवणजोग्गे । ते भासइ तित्थयरो वइजोग सुयं हवइ सेसं ॥ ८२९ ॥

---

१ मनःपर्यवज्ञानात् केवलमुद्देश-शुद्धि-लाभैः । पूर्वमनन्तरमभिहितमथशब्दोऽयं तदर्थे ॥ ८२४ ॥
सर्वद्रव्याणां प्रयोग-विस्रसा-मिश्रजा यथायोग्यम् । परिणामाः पर्याया जन्म-विनाशादयः सर्वे ॥ ८२५ ॥
तेषां भावः सत्ता स्वलक्षणं वा विशेषतस्तस्य । ज्ञानं विज्ञप्तेः कारणं केवलज्ञानम् ॥ ८२६ ॥
किं बहुना सर्वं सर्वतः सदा सर्वभावतो ज्ञेयम् । सर्वावरणातीतं केवलमेकं प्रकाशयति ॥ ८२७ ॥
पर्यायतोऽनन्तं शाश्वतमिष्टं सदोपयोगात् । अव्ययतोऽप्रतिपाति एकविधं सर्वशुद्धया ॥ ८२८ ॥

२ केवलज्ञानेनाऽर्थान् ज्ञात्वा यांस्तत्र प्रज्ञापनयोग्यान् । तान् भाषते तीर्थकरो वाग्योगः श्रुतं भवति शेषम् ॥ ८२९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

इह समुत्पन्नकेवलज्ञानस्तीर्थकरादिरर्थान् धर्मास्तिकायादीन् मूर्ता-ऽमूर्ता-ऽभिलाप्या-ऽनभिलाप्यान् केवलज्ञानेनैव ज्ञात्वाऽवबुध्य, न तु श्रुतज्ञानेन, तस्य क्षायोपशमिकत्वात्, केवलिनश्चाऽऽवरणस्य सर्वथा क्षीणत्वेन तत्क्षयोपशमाभावात्; न हि सर्वशुद्धे पटे देशशुद्धिः संभवति, तद्वदिहापीति भावः; ततः किम् ?, इत्याह– तत्र तेषामर्थानां मध्ये ये प्रज्ञापनीयाः प्ररूपणीया योग्यास्तानभिलप्यान् भाषते, नेतरान्– अनभिलप्यान् । प्रज्ञापनीयानपि न सर्वानेव भाषते, तेषामनन्तत्वात्, आयुषस्तु परिमितत्वात् । किं तर्हि ?, योग्यानेव भाषते ग्रहीतृशक्त्यपेक्षया, यो हि यावतां योग्य इति । यत्र चाभिहिते शेषमनुक्तमपि विनेयोऽभ्यूहति तदपि योग्यं भाषते; यथा ऋषभसेनादीनामुत्पादादिपदत्रयोपन्यासेनैव शेषगतिः । तत्र केवलज्ञानोपलब्धार्थाभिधायकः शब्दराशिर्भाष्यमाणस्तस्य भगवतो 'वइजोग त्ति' वाग्योग एव भवति, न तु श्रुतम्, नामकर्मोदयजन्यत्वात्, श्रुतस्य च क्षायोपशमिकत्वात्, ज्ञानमप्यस्य क्षायिकत्वात् केवलमेव, न भावश्रुतम् ।

आह– ननु वाग्योगः, वाक्परिस्पन्दः, वाग्वीर्यम्, इत्यनर्थान्तरम् । अयं च भवतु नामकर्मोदयजन्यः, भाष्यमाणस्तु पुद्गलात्मकः शब्दः किं भवतु ?, इति चेत् । उच्यते– सोऽपि श्रोतॄणां भावश्रुतकारणत्वाद् द्रव्यश्रुतमात्रं भवति, न तु भावश्रुतम् । तर्हि किं तद् भावश्रुतम् ?, इत्याह– 'सुयं हवइ सेसं ति' यच्छद्मस्थानां गणधरादीनां श्रुतग्रन्थानुसारि ज्ञानं तदेव केवलगतज्ञानापेक्षया शेषमन्यद् भावश्रुतं भवति, क्षायोपशमिकोपयोगात्, न तु केवलिगतम्, तस्य क्षायिकत्वादिति ।

अथवा 'सुयं हवइ सेसं' इत्यन्यथा व्याख्यायते– तद् भण्यमानं शब्दमात्रं तत्काल एव श्रुतं न भवति, किं तर्हि ?, शेषं 'कालम्' इति वाक्यशेषः । इदमुक्तं भवति– तत् केवलिनः शब्दमात्रं श्रोतॄणां श्रवणानन्तरलक्षणे शेषकाले श्रोतृगतज्ञानकारणत्वेनोपचारात् श्रुतं भवति, न तु भणनक्रियाकाल इति । अथवा, अन्यथा व्याख्यायते– स केवलिनः संबन्धी वाग्योगः श्रुतं भवति । कथंभूतम् ?, शेषं– गुणभूतम्–×प्रधानम्, औपचारिकत्वादिति । अन्ये तु पठन्ति– 'वइजोगसुयं हवइ तेसिं ति' । तत्र तेषां भाषमाणानां संबन्धी वाग्योगः श्रोतृगतश्रुतकारणत्वात् श्रुतं भवति, द्रव्यश्रुतमित्यर्थः । अथवा, तेषामिति श्रोतॄणां तानाश्रित्येत्यर्थः, भाषकगतं वाग्योग एव श्रुतं वाग्योगश्रुतं भवति, भावश्रुतकारणत्वाद् द्रव्यश्रुतमेवेत्यर्थः अथवा, तानर्थान् भाषते केवली, वाग्योगश्चाऽयमस्य भाषमाणस्य भवति, तेषां श्रोतॄणां भावश्रुतकारणत्वात् श्रुतमसौ भवति ॥ इति निर्युक्तिगाथार्थः ॥ ८२९ ॥ (× अ-)

अथ भाष्यम्—

नाऊण केवलेणं भासइ न सुएण ज सुयाईओ । पण्णवणिज्जे भासइ नाणभिलप्पे सुयाईए ॥ ८३० ॥
तत्थ वि जोग्गे भासइ नाजोग्गे गाहयाणुवित्तीए । भणिए व जम्मि सेसं सयमूहइ भणइ तम्मत्तं ॥८३१॥
वइजोगो तं न सुयं खओवसमियं सुयं जओ न तओ । विन्नाणं से खइयं सद्दो उण दव्वसुयमित्तं ॥८३२॥
सेसं छउमत्थाणं विन्नाणं सुयाणुसारेणं । तं भावसुयं भण्णइ खओवसमिओवओगाओ ॥ ८३३ ॥
भण्णंतं वा न सुयं सेसं कालं सुयं सुणेंताणं । तं चेव सुयं भण्णइ कारणकज्जोवयारेण ॥ ८३४ ॥
अहवा वइजोगसुयं सेसं सेसं ति जं गुणब्भूयं । भावसुयकारणाओ जमप्पहाणं तओ सेसं ॥ ८३५ ॥
वइजोगसुयं तेसिं ति केइ तेसिं ति भासमाणाणं । अहवा सुयकारणओ वइजोगसुयं सुणेंताणं ॥ ८३६ ॥

सप्तापि व्याख्यातार्था एव । नवरं प्रथमगाथायां यद् यस्मात् श्रुतातीतः केवलज्�ानेनैवाऽवभासितसमस्तत्रिभुवनोदरत्वात् श्रुतातिक्रान्तोऽसौ भगवान् केवली 'सुयाईए त्ति' वाग्गोचरातिक्रान्तत्वेन श्रुतातीतानर्थान् न भाषत इति । तृतीयगाथायां 'न तउ त्ति तकः क्षयोपशमोऽस्य केवलिनो नास्तीति ॥ ८३० ॥ ८३१ ॥ ८३२ ॥ ८३३ ॥ ८३४ ॥ ८३५ ॥ ८३६ ॥

तदेवं प्रतिपादितं केवलज्ञानस्वरूपम् । अथाऽस्य गत्यादिद्वारेषु सत्पदप्ररूपणतादयो वाच्याः । तत्र गतौ तावत्– मनुष्यसिद्धयोः केवलज्ञानं प्राप्यते । इन्द्रियद्वारे– अतीन्द्रियाणाम्; कायद्वारे– त्रसकाया-ऽकाययोः; योगद्वारे– सयोगा-ऽयोगयोः वेदद्वारे– अवेदकानाम्; कषायद्वारे– अकषायाणाम्; लेश्याद्वारे– सलेश्या-ऽलेश्ययोः; सम्यक्त्वद्वारे– सम्यग्दृष्टीनाम्; ज्ञानद्वारे

---

१ ज्ञात्वा केवलेन भाषते न श्रुतेन यत् श्रुतातीतः । प्रज्ञापनीयान् भाषते नाऽनभिलाप्यान् श्रुतातीतान् ॥ ८३० ॥
तत्रापि योग्यान् भाषते नाऽयोग्यान् ग्राहकानुवृत्त्या । भणिते च यस्मिन् शेषं स्वयमूहते भणति तन्मात्रम् ॥ ८३१ ॥
वाग्योगस्तद् न श्रुतं क्षायोपशमिकं श्रुतं यतो न सकः । विज्ञानं तस्य क्षायिकं शब्दः पुनर्द्रव्यश्रुतमात्रम् ॥ ८३२ ॥
शेषं छद्मस्थानां विज्ञानं श्रुतानुसारेण । तद् भावश्रुतं भण्यते क्षायोपशमिकोपयोगात् ॥ ८३३ ॥
भण्यमानं वा न श्रुतं शेषं कालं श्रुतं शृण्वताम् । तदेव श्रुतं भण्यते कारणकार्योपचारेण ॥ ८३४ ॥
अथवा वाग्योगश्रुतं शेषं शेषमिति यद् गुणभूतम् । भावश्रुतकारणाद् यदप्रधानं ततः शेषम् ॥ ८३५ ॥
वाग्योगश्रुतं तेषामिति केचिद् तेषामिति भाषमाणानाम् । अथवा श्रुतकारणतो वाग्योगश्रुतं शृण्वताम् ॥ ८३६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

केवलज्ञानिनाम्; दर्शनद्वारे- केवलदर्शनिनाम्; संयतद्वारे- संयतानाम् नोसंयता-ऽसंयतानां च; उपयोगद्वारे- साकारा-ऽनाकारोपयोगयोः; आहारकद्वारे- आहारका-ऽनाहारकयोः; भाषकद्वारे- भाषका-ऽभाषकयोः; परीत्तद्वारे- परीत्तानां, नोपरीत्ता-ऽपरीत्तानां च; पर्याप्तद्वारे- पर्याप्तानां नोपर्याप्ता-ऽपर्याप्तानां च; सूक्ष्मद्वारे- बादराणां, नोबादर-सूक्ष्माणां च; संज्ञिद्वारे- नोसंज्ञि-ऽसंज्ञिनाम्; भव्यद्वारे- भव्यानां, नोभव्या-ऽभव्यानां च। चरमद्वारे- चरमाणां भवस्थकेवलिनां, नोचरमा-ऽचरमाणां च सिद्धानां केवलज्ञानं प्राप्यते। पूर्वप्रतिपन्न-प्रतिपद्यमानकयोजना तु स्वबुद्ध्या कर्तव्येति। द्रव्यप्रमाणद्वारे- प्रतिपद्यमानकानाश्रित्योत्कृष्टतोऽष्टोत्तरशतं केवलिनां प्राप्यते, पूर्वप्रतिपन्नास्तु जघन्यत उत्कृष्टतश्च कोटिपृथक्त्वप्रमाणा भवस्थकेवलिनः प्राप्यन्ते, सिद्धास्त्वनन्ताः। क्षेत्र-स्पर्शनाद्वारयोस्तु जघन्यतो लोकस्याऽसंख्येयभागे केवली लभ्यते, उत्कृष्टतस्तु सर्वलोके। कालद्वारे- साद्यपर्यवसितं कालं सर्वोऽपि केवली भवति। अन्तरं तु केवलज्ञानस्य नास्ति, उत्पन्नस्य प्रतिपाताऽभावात्। भागद्वारं मतिज्ञानवदिति। भावद्वारे- क्षायिके भावे केवलमवाप्यते। अल्प-बहुत्वद्वारे मतिज्ञानवद् वाच्यमिति॥

तदेवं केवलज्ञानं समाप्तम्।

॥ तत्समाप्तौ च ज्ञानपञ्चकं समाप्तमिति ॥

॥ अर्हम् ॥

तदेवं '[1]तस्स फल-जोग-मंगल-समुदायत्था तहेव दाराइं' इत्यादिकायां धुरि निर्दिष्टद्वितीयगाथायां मङ्गलरूपं तृतीयद्वारं परिसमाप्य, चतुर्थं समुदायार्थद्वारमभिधानीयम्, इति चेतसि निधाय तावदिदमाह-

[2]केवलनाणं नन्दी मंगलमिति चेह परिसमत्ताइं। अहुणा स मंगलत्थो भण्णइ पगओऽणुओग त्ति ॥८३७॥

केवलज्ञानमिह समाप्तम्, तत्समाप्तौ च नामादिभेदभिन्ना नन्दी समाप्ता, तत्समाप्तौ च मङ्गलं परिसमाप्तम्। अधुना स एव मङ्गलार्थः प्रकृतानुयोगो भण्यते। मङ्गलेनाऽर्थ्यते- प्राप्तुं साधयितुमिष्यत इति मङ्गलार्थो मङ्गलसाध्यः; अथवा, अर्थ्यते गम्यते साध्यत इत्यर्थः, मङ्गलस्यार्थो मङ्गलार्थो मङ्गलसाध्यः, इतीहापि स एवार्थः। स च कः?, प्रकृतोऽधिकृतोऽनुयोग इति॥ ८३७॥

ननूक्तज्ञानपञ्चकस्य मध्ये कतमस्य ज्ञानस्याऽयमनुयोगः?, इत्याह-

[3]सो मइनाणाईणं कयरस्स, सुयस्स, जं न सेसाइं। होंति पराहीणाइं न य परबोहे समत्थाइं॥ ८३८॥
पाएण पराहीणं दीवो व्व परप्पबोहयं जं च। सुयनाणं तेण परप्पबोहणत्थं तदणुओगो॥ ८३९॥

स प्रकृतानुयोगः पूर्वोक्तमत्यादिज्ञानपञ्चकस्य मध्ये कतरस्य ज्ञानस्य?, इति प्रश्ने सत्याह- श्रुतस्य श्रुतज्ञानस्येत्यर्थः; यद् यस्माद् न शेषज्ञानानि पराधीनानि गुर्वायत्तानि भवन्ति, किन्त्वावरणक्षय-क्षयोपशमाभ्यां स्वत एव जायन्ते। अनुयोगश्च व्याख्यानरूपः परायत्तस्यैव भवति, श्रुतमेव च प्रायः पराधीनम्, न शेषज्ञानानि। प्रत्येकबुद्धादीनां श्रुतस्य स्वयमेव भावात् तद्व्यवच्छेदार्थं प्रायोग्रहणम्। किञ्च, श्रुतज्ञानमेव परप्रबोधे समर्थम्, मुखरत्वात्; न शेषज्ञानानि, मूकत्वात्। इदमुक्तं भवति- उपदेशेनैव परः प्रबोध्यते, उपदेशश्च शब्देनैव, शब्दश्च कारणे कार्योपचारात् श्रुतज्ञान एवाऽन्तर्भवति, न शेषज्ञानेषु; अतः शब्दात्मकं श्रुतमेव परप्रबोधकम्। तथा,

---

१ गाथा २। २ केवलज्ञानं नन्दी मङ्गलमिति चेह परिसमाप्तानि। अधुना स मङ्गलार्थो भण्यते प्रकृतोऽनुयोग इति॥ ८३७॥
३ स मतिज्ञानादीनां कतरस्य, श्रुतस्य, यद् न शेषाणि। भवन्ति पराधीनानि न च परबोधे समर्थानि॥ ८३८॥
प्रायेण पराधीनं दीप इव परप्रबोधकं यच्च। श्रुतज्ञानं तेन परप्रबोधनार्थं तदनुयोगः॥ ८३९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रदीप इव श्रुतज्ञानमेव यस्मात् स्व-परस्वरूपप्रकाशकम्, न शेषज्ञानानि । न हि श्रुतज्ञानं विहाय स्वकीयं स्वरूपं, शेषज्ञानचतुष्टयस्वरूपं चाऽन्यज्ज्ञानं परस्य प्रकाशयितुं शक्नोति । अनुयोगोऽपि परप्रबोधनायैव प्रवर्तते । अतः परप्रबोधकत्वेनाऽऽसन्नत्वात् तस्यैव श्रुतस्याऽनुयोगः परप्रबोधनार्थमारभ्यते, न शेषज्ञानानामिति ॥ ८३८ ॥ ८३९ ॥

अथ प्रेर्यमुत्थाप्य परिहरन्नाह–

सोऽहिगओ च्चिय आवस्सयस्स कयरस्स किं त्थ चिंताए । तं च्चिय सुयं ति साहइ सुयाणुयोगाभिहाणेण ॥८४०॥[1]

आह– ननु 'केयप्पवयणप्पणामो' इत्यादौ 'आवस्सयाणुओगं' इत्यनेनाऽसावावश्यकानुयोगोऽधिकृत एवाऽऽस्ते, किमत्र 'सो मइनाणाईणं कयरस्स' इत्यनया चिन्तया कार्यम् ?– न किञ्चिदित्यर्थः । अत्रोत्तरमाह– इह श्रुतज्ञानस्यानुयोग इत्यभिधानेन तदेवावश्यकं श्रुतविशेष एव, नापरं किञ्चिद् घटादिवस्तु, इति साधयति कथयति । अतो नन्द्यादिषु यदुक्तम्– 'आवश्यकस्याऽनुयोगं वक्ष्यामि' इति, तत् 'श्रुतविशेषरूपस्यैवैतस्य' इत्यावेदितं भवतीति ॥ ८४० ॥

आह– यद्येवम्, 'अनुयोगः' इति कः शब्दार्थः ?, इत्याह–

अणुवयणमणुओगो सुयस्स नियएण जमभिहेएणं । वावारो वा जोगो जोऽणुरूवोऽणुकूलो वा ॥ ८४१ ॥
अहवा जमत्थओ थोव-पच्छभावेहिं सुयमणु तस्स । अभिहिए[+] वावारो जोगो तेणं व संबंधो ॥ ८४२ ॥

यत् सूत्रस्य निजेनाभिधेयेनाऽनुयोजनमनुसंबन्धनमसावनुयोग इत्यर्थः । अथवा, योऽनुरूपोऽनुकूलो वा घटमानः संबध्यमानो व्यापारः प्रतिपादनलक्षणः सूत्रस्य निजार्थविषयेऽयमनुयोगः । अथवा, यद् यस्मादर्थतोऽर्थात् सकाशादणु सूक्ष्मं लघु सूत्रम्, काभ्याम् ?, इत्याह– स्तोक-पश्चाद्भावाभ्यां– एकस्यापि सूत्रस्यानन्तोऽर्थ इत्यर्थात् स्तोकत्वात्, तथा, प्रथममुत्पाद-व्यय-ध्रौव्यलक्षणं तीर्थकरोक्तमर्थं चेतसि व्यवस्थाप्य पश्चादेव सूत्रं रचयन्ति गणधराः, इत्येवमर्थात् पश्चाद्भावाच्च सूत्रमणु एवेति भावः, तस्मात् तस्याऽणोः सूत्रस्य यः स्वकीयाभिधेये योगो व्यापारः, तेन वाऽणुना सूत्रेण सह यः संबन्धो योगोऽसावनुयोग इति ॥ ८४१ ॥ ८४२ ॥

---

१ सोऽधिकृत एवावश्यकस्य कतरस्य किमत्र चिन्तया ? । तदेव श्रुतमिति कथयति श्रुतानुयोगाभिधानेन ॥ ८४०॥ २ गाथा १ । ३ गाथा ८३८।
४ अनुवचनमनुयोगः श्रुतस्य नियतेन यदभिधेयेन । व्यापारो वा योगो योऽनुरूपोऽनुकूलो वा ॥ ८४१ ॥ + धेये–।
अथवा यदर्थतः स्तोक-पश्चाद्भावाभ्यां श्रुतमणु तस्य । अभिहिते व्यापारो योगस्तेन वा संबन्धः ॥ ८४२ ॥

तस्मादावश्यकस्याऽनुयोग इति स्थिते विनेयपृच्छाम्, उत्तरं चाह––

आवस्सयस्स जइ सो तत्थंगाईण अट्ठ पुच्छाओ[2] । तं होइ सुयक्खंधो अज्झयणाइं च, न उ सेसा ॥८४३॥

यद्यावश्यकस्याऽयमनुयोगः, तेथाऽऽवश्यकं श्रुतविशेषः; तत्रैवाङ्गादीन्याश्रित्याऽष्टौ पृच्छाः संभवन्ति, तद्यथा— 'आवस्सयं णं किं अंगं, अंगाइं; सुयक्खंधो, सुयक्खंधा; अज्झयणं, अज्झयणाइं; उद्देसो, उद्देसा ?' इति । अत्रोत्तरमाह— इह तदावश्यकं षडध्ययनसमुदायलक्षणश्रुतस्कन्धः, प्रत्येकमध्ययनानि च षडिति । शेषाः षट् प्रकाराः प्रतिषेद्धव्याः, असंभवित्वादिति ॥ ८४३ ॥

अत्र प्रेरकः प्राह—

नणु नंदीवक्खाणे भणियमणंगं इहं कओ संका ? । भण्णइ अकए संका तस्सानियमं च दाएइ ॥८४४॥

ननु नन्द्यध्ययने व्याख्यायमाने 'इमं पुण पट्ठवणं पडुच्च अंगबाहिरस्स उद्देसो, समुद्देसो, अणुण्णा, अणुओगो पवत्तइ' इत्यादिवचनादावश्यकमङ्गबाह्यत्वादङ्गं न भवतीति भणितमेव, इति कुतोऽत्र शङ्का, येन पृच्छा क्रियते ? । अत्र निर्वचनमाह– भण्यतेऽत्रोत्तरम्, श्रुतस्कन्धादिविषये तावदस्त्येव शङ्का, तत्राऽस्यार्थस्याऽनिर्णीतत्वात्; अतस्तद्विषयास्तावत् कर्तव्या एव पृच्छाः । अङ्गाऽनङ्गरूपतायामपि यदा नन्द्यध्ययनमश्रुत्वा विनेयः प्रथमत एवेदं शृणोति, तदाऽकृते नन्दिव्याख्यानेऽस्त्येव शङ्का– किमावश्यकमङ्गम्, तद्बाह्यं वेति ? । आह– ननु नन्द्यध्ययनं श्रुत्वा तदावश्यकं श्रोतव्यम्, इतीत्थं क्रमः, अतः कथं नन्द्यध्ययनस्य प्रथमं व्याख्यानाकरणम्, येन प्रस्तुतशङ्का स्यात् ?, इत्याशङ्क्याह– 'तस्सेत्यादि' तस्य प्रथमं नन्दिव्याख्यानकरणस्याऽत एवाऽङ्गा-ऽनङ्गप्रश्ननिर्णयवचनादाचार्योऽनियमं दर्शयति, पुरुषाद्यपेक्षयाऽन्यथाऽपि नन्द्यादिव्याख्यानकरणादिति ॥ ८४४ ॥

आह– ननु मङ्गलार्थं सर्वेषामपि शास्त्राणामादौ नन्दिव्याख्यानं कर्तव्यमेव, इति कथं तदनियमः ?, इत्याह–

नाणाभिहाणमेत्तं मंगलमिट्ठं न तीए वक्खाणं । इहमट्ठाणे जुज्जइ, जं सा वीसुं सुयक्खंधो ॥ ८४५ ॥

---

१ आवश्यकस्य यदि स तत्राङ्गादीनामष्ट पृच्छाः । तद् भवति श्रुतस्कन्धोऽध्ययनानि च, न तु शेषाः ॥"८४३॥ २ क.ग. 'तच्चाव' ।
३ आवश्यकं किमङ्गम्, अङ्गानि; श्रुतस्कन्धः, श्रुतस्कन्धाः; अध्ययनम्, अध्ययनानि; उद्देशः, उद्देशाः ? ।
४ ननु नन्दीव्याख्याने भणितमनङ्गमिह कुतः शङ्का ? । भण्यतेऽकृते शङ्का तस्यानियमं च दर्शयति ॥ ८४४ ॥
५ इदं पुनः प्रस्थापनं प्रतीत्याऽङ्गबाह्यस्योद्देशः, समुद्देशः, अनुज्ञा, अनुयोगः प्रवर्तते ।
६ ज्ञानाभिधानमात्रं मङ्गलमिष्टं न तस्या व्याख्यानम् । इहाऽस्थाने युज्यते, यत् सा विष्वक् श्रुतस्कन्धः ॥ ८४५ ॥ ७ क. 'इसट्ठा' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

ज्ञानपञ्चकाभिधानमात्रमेव शास्त्रादौ मङ्गलमिष्टं, न तु तस्या नन्द्याः सर्वस्या अपि शास्त्ररूपाया इहाऽस्थाने व्याख्यानं युज्यते; यथा हि पथि प्रस्थितैर्मङ्गलभूतदधि-दूर्वा-ऽक्षतादिवस्तूनामभिधान-दर्शनादीन्येव मङ्गलतया गृह्यन्ते, न तु तद्भक्षण-तद्गुणश्रवणादीन्यपि क्रियन्ते; तथेहापि ज्ञानोत्कीर्तनमात्रमेव मङ्गलं युज्यते, न तु नन्दिव्याख्यानम्, इह तस्याऽस्थानत्वात्। न ह्यावश्यकशास्त्रारम्भे शास्त्रान्तरभूताया नन्द्या व्याख्यानं युज्यते, अतिप्रसङ्गात्। न च वक्तव्यम्- सर्वशास्त्रान्तर्भूतैव नन्दी, यद् यस्मात् सा विष्वक् पृथगेव श्रुतस्कन्धतया सिद्धान्ते प्रसिद्धा, श्रुतस्कन्धत्वं चास्याः पद-वाक्यसमूहात्मकत्वेनैव द्रष्टव्यम्, न त्वध्ययनकलापात्मकं परिभाषितम्, एकाध्ययनरूपत्वेन रूढत्वादिति ॥ ८४५ ॥

ननु यदि नन्दिव्याख्यानस्याऽस्थानमिदम्, तर्हि किमितीत्थमादावेव भवद्भिर्ज्ञानपञ्चकं विस्तरेण व्याख्यातम् ? इति पौर्वापर्येण स्ववचनविरोधः, इत्याशङ्क्याह—

[1]ईह साणुग्गहमुइयं न उ नियमोऽयमहवाऽपवादोऽयं । दाइज्जइ कहणाए कयाइ पुरिसादेवेक्खाए ॥८४६॥

इहावश्यकारम्भे यद्विस्तरेण ज्ञानपञ्चकस्यादौ व्याख्यानम्, तत्सानुग्रहं शिष्यानुग्रहमास्थायोदितमस्माभिर्न पुनरयं नियम एव, ज्ञानोत्कीर्तनमात्रस्यैव नियमेन मङ्गलतयाऽभीष्टत्वात्। अथवा, कथनायाः कथनविधेरपवादोऽयं दर्श्यते, यथेह पुरुषाद्यपेक्षया कदाचिदुत्क्रमेणापि शास्त्राणि व्याख्यायन्ते- अन्यारम्भेऽन्यद् व्याख्यायत इति ॥ ८४६ ॥

तस्मादावश्यकश्रुतस्कन्धस्याऽनुयोग इति स्थिते किमिदानीं कर्तव्यम् ?, इत्याह—

[2]आवस्सयसुयखंधो नामं सत्थस्स तस्स जे भेया । ताइं अज्झयणाइं नासो आवस्सयाईणं ॥ ८४७ ॥

कज्जो पिह प्पिहाणं जहत्थमजहत्थमत्थसुण्णं ति । नामे चेव परिच्छा गज्झं जइ होहिइ जहत्थं ॥८४८॥

इह प्रस्तुतशास्त्रस्याऽऽवश्यकश्रुतस्कन्ध इति नाम। तस्य चावश्यकस्य ये सामायिकादयः षड् भेदास्तान्यध्ययनान्यभिधीयन्ते।

---

१ ध.छ.'कं परि' । २ घ.छ.'कमेवाध्य' । ३ इह सानुग्रहमुदितं न तु नियमोऽयमथवाऽपवादोऽयम्। दर्श्यते कथनायाः कदाचित् पुरुषाद्यपेक्षया ॥ ८४६ ॥

४ क. 'दविक्खा' । ५ आवश्यकश्रुतस्कन्धो नाम शास्त्रस्य तस्य ये भेदाः । तान्यध्ययनानि न्यास आवश्यकादीनाम् ॥ ८४७ ॥ × व्यद् धा-।
कार्यः। पृथक् पृथग् यथार्थमयथार्थमर्थशून्यमिति । नाम्नैव परीक्षा ग्राह्यं यदि भवेद् यथार्थम् ॥ ८४८ ॥

अत आवश्यकादिपदानाम्-'आवश्यकम्, श्रुतस्कन्धः, अध्ययनम्' इत्येषां पदानां न्यासो निक्षेपः पृथक् पृथक् कार्यः। कुतः ?, इत्याह- यस्माद्धेतोः किञ्चिद् नाम तावद् यथार्थं भवति, यथा दीपः, दहन इत्यादि; किञ्चित् स्वयथार्थं भवति, यथा पलाशः, मण्डप इत्यादि; अपरं त्वर्थशून्यं भवति, यथा डित्थः, डवित्थ इत्यादि। यथार्थं च शास्त्राभिधानमिष्यते, तत्रैव समुदायार्थावगतेः। अतो नाम्नैव परीक्षा विचारणा क्रियते, ततो ग्राह्यमिदं यदि यथार्थं स्यादिति ॥ ८४७ ॥ ८४८ ॥

तमेवाऽऽवश्यकादिन्यासमाह—

[1]नामाईओ नासो चउव्विहो मंगलस्स व स नेओ । विण्णेओ य विसेसो सुत्तगओ, किंचि वुच्छामि ॥८४९॥

इह तावदावश्यकस्य नाम-स्थापना-द्रव्य-भावैरूपश्चतुर्विधो निक्षेपो भवति, स चैवैव प्रागुक्तमङ्गलपदस्येव ज्ञातव्यः, यश्च मङ्गलनिक्षेपेण सह विशेषः स सूत्रेऽनुयोगद्वारादिलक्षणे गतः स्थितो भणितः सूत्रगतो विज्ञेयः। किञ्चित्पुनस्तद्विशेषं विनेयानुग्रहार्थमहमत्रापि वक्ष्यामीति ॥ ८४९ ॥

तत्र नाम-स्थापने क्षुण्णत्वाद् नोच्येते। द्रव्यावश्यकं तु द्विधा- आगमतः, नोआगमतश्च। तत्राऽऽगमतः प्राह-

[2]आगमओ दव्वावासयं तमावासयं पयं जस्स । सिक्खियमिच्चाइ तयं तयणुवउत्तो निगदमाणो ॥८५०॥

आगमतो द्रव्यावश्यकं भवति। कः ?, इत्याह- तदावश्यकं निगदन् पठन्- अध्येता। कथंभूतः ?, तस्मिन्नावश्यकेऽनुपयुक्तः। यस्याऽध्येतुः, किम् ?, इत्याह- यस्य तदावश्यकपदं प्रथमं शिक्षितं, स्थितं, जितमित्यादिविशेषणविशिष्टं भवति ॥ ८५० ॥

अथ तान्येवाऽनुयोगद्वारादिसूत्रप्रोक्तानि शिक्षितादिविशेषणानि व्याख्यानयन्नाह-

[3]सिक्खियमंतं नीयं हिययम्मि ठियं जियं दुयं एइ । संखियवण्णाइ मियं परिजियमेत्तुक्कमेणं पि ॥ ८५१ ॥

जह सिक्खियं सनामं तंह तं पि तहा ठियाइ नामसमं । गुरुभणियघोससरिसं गहियमुदत्तादओ ते य ॥८५२॥

---

१ नामादिको न्यासश्चतुर्विधो मङ्गलस्येव स ज्ञेयः। विज्ञेयश्च विशेषः सूत्रगतः, किञ्चिद् वक्ष्यामि ॥ ८४९ ॥ २ क.ख.ग. 'वस्वरू' ।

३ आगमतो द्रव्यावासकमावासकं पदं यस्य । शिक्षितमित्यादि तत् तदनुपयुक्तो निगदन् ॥ ८५० ॥

४ शिक्षितमन्तं नीतं हृदये स्थितं जितं द्रुतमेति । संख्यातवर्णादि मितं परिजितमेत्योत्क्रमेणापि ॥ ८५१ ॥
यथा शिक्षितं स्वनाम तथा तदपि तथा स्थितादि नामसमम्। गुरुभणितघोषसदृशं गृहीतमुदात्तादयस्ते च ॥ ८५२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

नं विहीणक्खरमहियक्खरं च वोच्चत्थरयणमाल व्व । वाइद्धक्खरमेयं वच्चासियवण्णविण्णासं ॥ ८५३ ॥
न क्खलियमुवलहलं पिव अमिलियमसरूवधण्णमेलो व्व । वोच्चत्थगंथमहवा अमिलियपय-वक्कविच्छेयं॥८५४॥
न य विविहसत्थपल्लवविमिस्समट्ठाणच्छिन्नगहियं वा । विच्चामेलिय कोलियपायसमिव भेरिकंथ व्व ॥८५५॥
मत्ताइनिययमाणं पडिप्पुण्णं छंदसाऽहवत्थेणं । नाकंखाइसदोसं पुण्णमुदत्ताइघोसेहिं ॥ ८५६ ॥
कंठो-ट्ठविप्पमुक्कं नाव्वत्तं बाल-मूयभणियं व । गुरुवायणोवयातं न चोरियं पोत्थयाओ वा ॥ ८५७ ॥

इहाऽनुयोगद्वारेषूक्तम्- "[1]से किं तं आगमओ दव्वावस्सयं आवस्सयं ? । जस्स णं आवस्सयं ति पयं सिक्खियं, ठियं, जियं, मियं, परिजियं, नामसमं, घोससमं, अहीणक्खरं, अणच्चक्खरं, अव्वाइद्धक्खरं, अक्खलियं, अमिलियं, अविच्चामेलियं, पडिपुण्णं, पडिपुण्णघोसं, कंठो-ट्ठविप्पमुक्कं, गुरुवायणोवगयं; से णं तत्थ वायणाए, पुच्छणाए, परियट्टणाए, धम्मकहाए, ('वर्तते' इत्यध्याहारः) नो अणुपेहाए (इहाऽपि 'वर्तते' इति शेषः)" इदं च सूत्रं 'आगमओ दव्वावासयं' इत्यादिप्रागुक्तगाथया प्रायो व्याख्यातम् । शिक्षितादीनि पदानि त्विदानीं व्याख्यायन्ते- तत्र शिक्षितमिति कोऽर्थः- अन्तं नीतं, सर्वमधीतमिति । स्थितम्- हृदि व्यवस्थितमव्यच्युतमित्यर्थः । जितम्- द्रुतमागच्छति । वर्णादिभिः संख्यातं मितम् । यदुत्क्रमेणाऽप्येति- आगच्छति, तत् सर्वतो जितं परिजितम् । स्वकीयेन नाम्ना समं नामसमम् , यथा स्वनाम शिक्षितम् , तथा तदप्यावश्यकम् ; तथा यथैव स्वनाम स्थितादिविशेषणविशिष्टं पठने स्थितं, जितं, मितं,

---

१ न विहीनाक्षरमधिकाक्षरं च व्यत्यस्तरत्नमालेव । व्याविद्धाक्षरमेतद् व्यत्यासितवर्णविन्यासम् ॥ ८५३ ॥
न स्खलितमुपललेहलमिव अमिलितमसरूपधान्यमेल इव । व्यत्यस्तग्रन्थमथवाऽमिलितपद-वाक्यविच्छेदम् ॥ ८५४ ॥
न च विविधशास्त्रपल्लवविमिश्रमस्थानच्छिन्नगृहीतं वा । व्यत्याम्रेडितं कौलिकपायसमिव भेरीकन्थेव ॥ ८५५ ॥
मात्रादिनियतमानं परिपूर्णं छन्दसाऽथवाऽर्थेन । नाऽऽकाङ्क्षादिसदोषं पूर्णमुदात्तादिघोषैः ॥ ८५६ ॥
कण्ठौ-ष्ठविप्रमुक्तं नाव्यक्तं बाल-मूकभणितमिव । गुरुवाचनोपयातं न चोरितं पुस्तकाद् वा ॥ ८५७ ॥ २ ध.छ. 'मेयं व' । ३ ध.छ. 'व न मि' ।
४ अथ किं तदागमतो द्रव्यावश्यकमावश्यकम् ? । यस्य 'आवश्यकम्' इति पदं शिक्षितम् , स्थितम् , जितम् , मितम् , परिजितम् , नामसमम् , घोषसमम् , अहीनाक्षरम् , अनत्यक्षरम् , अव्याविद्धाक्षरम् , अस्खलितम् , अमिलितम् , अव्यत्याम्रेडितम् , परिपूर्णम् , परिपूर्णघोषम् , कण्ठौष्ठविप्रमुक्तम् , गुरुवाचनोपगतम् , तदिदं तत्र वाचनायाम् , पृच्छायाम् , परिवर्तनायाम् , धर्मकथायाम् ; नो अनुप्रेक्षायाम् । ५ गाथा ८५० ।

परिजितमित्यर्थः, एवं तदप्यावश्यकं, अतः स्वनामसममुच्यते । यद् वाचनाचार्याभिहितैरुदात्ता-ऽनुदात्त-स्वरितलक्षणैर्घोषैः सदृशमेव गृहीतं तद् घोषसमम् । न हीनाक्षरमहीनाक्षरम् , नाप्यधिकाक्षरम् ।

'वोच्चत्थेत्यादि' यथा प्रान्ताभीरीप्रोतरत्नमाला विपर्यस्तन्यस्तरत्ननिचया भवति, एवं यद् व्यत्यासितवर्णविन्यासं विपर्ययोपन्यस्तवर्णसंतानमित्यर्थः, तद् व्याविद्धाक्षरं, न तथाऽव्याविद्धाक्षरम् । इदं वर्णमात्रापेक्षं विवक्ष्यते, न तु पद-वाक्यापेक्षम् ; पद-वाक्यविपर्यस्तस्य वक्ष्यमाणाऽमिलितविषयत्वादिति । उपलशकलाकुलभूतलेहलमिव यद् न स्खलति तदस्खलितम् । विसदृशानेकधान्यमेलकवद् यद् न मिलति तदमिलितम् ; अथवा, विपर्यस्तपद-वाक्यग्रन्थं मिलितम्, नैवं यत् , तदमिलितम् । 'अमिलियपय-वक्कविच्छेयं ति' अथवेत्यत्रापि तृतीयव्याख्यान्तरसूचकः संबध्यते, अमिलितोऽसंयुक्तः पद-वाक्यविच्छेदो यत्र, तद् वाऽमिलितमुच्यते ।

अव्यत्याम्रेडितं व्याख्यातुमाह- 'न य विविहेत्यादि' विविधानि नानाप्रकाराण्यनेकानि शास्त्राणि तेषां पद-वाक्यावयवरूपा बहवः पल्लवास्तैर्विमिश्रं व्यत्याम्रेडितम् , अथवा, अस्थानच्छिन्नग्रथितं व्यत्याम्रेडितम्, यथा- " प्राप्तराज्यस्य रामस्य राक्षसा निधनं गताः " कौलिकपायसवद् भेरीकन्थावद् वा; यथोक्तरूपं यद् न भवति तदव्यत्याम्रेडितम् । परिपूर्णं द्विधा- सूत्रतः, अर्थतश्च । तत्र च्छन्दसा च्छन्दः समाश्रित्य मात्रादिनियतमानं सूत्रतः, परिपूर्णम् , यत्तु नाऽऽकाङ्क्षादिसदोषं तदर्थतः परिपूर्णम्- यत् क्रियाध्याहारं नापेक्षते, अव्यापकम् , अस्खलन्त्रं च न भवति तदर्थतः परिपूर्णमिति भावः ।

परिपूर्णघोषमिति व्याख्यातुमाह- 'पुण्णमित्यादि' उदात्तादिघोषैर्यत् परिपूर्णं परावर्तनादिकाले उच्चारयति तत् परिपूर्णघोषम् । इह च शिक्षाकालेऽध्यापकनिगदितोदात्तादिघोषैः समं शिक्षमाणस्य घोषसमम् , शेषकाले तु परावर्तनादि कुर्वन् यदुदात्तादिघोषैः परिपूर्णमुच्चारयति, तत् परिपूर्णघोषम् , इत्यनयोर्विशेषः । कण्ठौ-ष्ठविप्रमुक्तं स्पष्टं, न तु बाल-मूकभाषितवदव्यक्तम् । गुरोः सकाशाद् वाचनयोपयातमायातम् , न पुस्तकादेव चोरितम्- स्वतन्त्रेणैवाऽधीतम् ; वाशब्दात् कर्णाघाटकेन वा गृहीतमिति ॥ ८५१-८५७ ॥

अत्र प्रेरकः प्राह—

आगमओऽणुवउत्तो वत्ता दव्वं ति सिद्धमावासं । किं सिक्खियाइसुयगुणविसेसणे फलमिहब्भहियं ॥८५८॥

---

१ ध.छ.'प्रान्ताभी' । २ आगमतोऽनुपयुक्तो वक्ता द्रव्यमिति सिद्धमावश्यकम् । किं शिक्षितादिश्रुतगुणविशेषणे फलमिहाभ्यधिकम् ॥ ८५८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

नन्वागमतोऽनुपयुक्तो वक्ता द्रव्यावश्यकम्, इत्येतावतैव सिद्धमागमतो द्रव्यावश्यकम्, 'किं शिक्षितम्, स्थितम्, जितम्' इत्यावश्यकश्रुतगुणविशेषणैरिहाभ्यधिकं फलम्? इति ॥ ८५८ ॥

अत्रोत्तरमाह—

[1]जह सव्वदोसरहियं पि निगदओ सुत्तमणुवउत्तस्स । दव्वसुयं, दव्वावासयं च तह सव्वकिरियाओ ॥८५९॥

उवउत्तस्स उ क्खलियाइयं पि सुद्धस्स भावओ सुत्तं । साहइ तह किरियाओ सव्वाओ निज्जरफलाओ ॥८६०॥

इह शिक्षितादिविशेषणकलापं कुर्वन्नाचार्य इति साधयति– एतत् कथयति, इति द्वितीयगाथायां क्रिया। किं साधयति?, इत्याह– यथा शिक्षितादिगुणोपेतत्वात् सर्वदोषरहितमपि सूत्रमनुपयुक्तस्य निगदतो द्रव्यश्रुतम्, वक्ष्यमाणद्रव्यावश्यकं चोक्तस्वरूपं भवति, तथा, प्रत्युपेक्षण-प्रमार्जने-र्यादि क्रिया अपि सर्वा अनुपयुक्तस्य कुर्वतोऽन्तःप्रणिधानशून्यत्वाद् द्रव्यक्रियास्तत्फलविकला भवन्ति, 'तथा–तथैव' सामर्थ्यादिदं लभ्यते, उपयुक्तस्य त्वन्तःप्रणिधानयुक्तस्य करणाऽवैफल्यादिकारणात् कथमपि स्खलितादिदोषदुष्टमपि सूत्रं निगदतो भावतः शुद्धस्य तस्य भावसूत्रमेव भवति; तथा, सर्वा अपि प्रत्युपेक्षणादिक्रिया उपयुक्तस्य कुर्वतः कर्मनिर्जराफला एव भवन्ति। अतः सर्वेष्वपि भगवदुक्तानुष्ठानेष्वन्तःप्रणिधानेऽतिप्रयत्नः कार्य इति ॥ ८५९ ॥ ८६० ॥

इह चाधिक-हीनाक्षरश्रुतपाठेऽपायदर्शनार्थमुदाहरणान्याह—

अहिए कुणाल-कविणो हीणे विज्जाहराइदिट्ठंता । बाला-उरातिभोयण-भेसज्जविवज्जआ उभए ॥ ८६१ ॥

अक्षर-बिन्द्वाद्यधिकसूत्रपाठे कुणालनामा राजपुत्रः, कपिश्च वानर उदाहरणम्। हीनाक्षरपाठे तु विद्याधरादयः। अधिक-हीनाक्षरलक्षणे तूभये बाला-ऽऽतुरयोरतिभोजन-भेषजविपर्ययौ बाला-ऽऽतुरातिभोजन-भेषजविपर्ययौ, इति समासः– अतिमात्रं हीनमात्रं च भोजनं यथा बालस्य, भेषजं तु तथाभूतं यथाऽऽतुरस्य दोषाय, तथा सूत्रमपीति भावः ॥ ८६१ ॥

---

१ यथा सर्वदोषरहितमपि निगदतः सूत्रमनुपयुक्तस्य। द्रव्यश्रुतं द्रव्यावासकं च तथा सर्वक्रियाः ॥ ८५९ ॥
उपयुक्तस्य तु स्खलितादिकमपि शुद्धस्य भावतः सूत्रम्। कथयति तथा क्रियाः सर्वा निर्जराफलाः ॥ ८६० ॥

२ अधिके कुणाल-कपी हीने विद्याधरादिदृष्टान्ताः। बाला-ऽऽतुरातिभोजन-भैषज्यविपर्ययावुभयस्मिन् ॥ ८६१ ॥

अथ कोऽयं कुणालनामा राजपुत्र उदाहरणम्?, इति तत्कथांसूचनाय श्लोकमाह– 'चंदगुत्तेत्यादि'। अस्यार्थः कथानकादवसेयः, तच्चेदम्–

पाटलीपुत्रनामनगरे मौर्यवंशसमुद्भवोऽशोकश्रीनाम्नि भूपालः। तस्य चैकस्या राज्ञ्याः कुणालनामा तनयः समुत्पन्नः। तस्य च भुक्तौ उज्जयिनीनगरी नरपतिना प्रदत्ता। ततश्च सातिरेकाष्टवार्षिके तस्मिन् कुमारे लेखवाहकेनाऽऽगत्याऽशोकश्रीराजाय निवेदितम्, यथा– एतावति वयसि वर्तते युष्मत्पुत्रः। ततश्चान्तःपुरोपविष्टेन भूपतिना स्वहस्तेनैव लिखितः कुमाराय लेखः। तस्य तत्र चेदमलेखि, यथा– 'इदानीमधीयतां कुमारः'। तं च लेखमसंवर्तितमेव मुक्त्वा शरीरचिन्तार्थमुत्थितो नरनाथः। ततश्चैकया राज्ञ्या गृहीत्वा वाचितोऽसौ लेखः। चिन्तितं च, यथा– ममापि विद्यते पुत्रः, केवलं लघुरसौ, महांश्च कुणालः, ततस्तस्मिन् राज्ययोग्यतां बिभ्रति न मदीयपुत्रस्य राज्यावाप्तिः, ततस्तथा करोमि, यथा कुणालो राज्यस्याऽयोग्यो भवति, अवसरश्चायम्। इति विचिन्त्य निष्ठीवनार्द्रीकृतया हस्तस्थितनयनाञ्जनशलाकयाऽकारस्योपरि प्रदत्तो बिन्दुः। जातं च ततः 'अंधीयतां कुमारः'। ततस्तथैव राज्ञ्या मुक्तस्तत्रैव प्रदेशे लेखः। राज्ञा च कथमपि पुनरवाचित एव संवर्तितोऽसौ। गतश्च कुमारसमीपम्। अवधारितश्च केनापि नियोगिना, अप्रकटश्च विरुद्ध इति मत्वा न वाचितः। कुमारनिर्बन्धे च वाचितः। ततो विज्ञातलेखार्थेन प्रोक्तं कुमारेण– मौर्यवंशोद्भवानामस्माकमाज्ञां भुवनेऽपि न कश्चित् खण्डयति, तत् किमहमेव तातस्याऽऽज्ञां लङ्घयिष्यामि?, न भवत्येवैतत्, इत्युक्त्वा तत्क्षण एवाऽग्रितप्तां लोहशलाकां गृहीत्वा मुक्तहाहारवे सर्वस्मिन्नपि परिजने निवारयति अक्षिते अक्षिणी। जातश्चान्धः। ततो विज्ञातसमस्तैतद्व्यतिकरो राजा महान्तं खेदं विधाय कुणालस्योज्जयिनीमुत्सार्योचितं किमप्यन्यग्राममात्रं दत्तवान्।

तत्र च स्थितेन कुणालकुमारेण शिक्षिता प्रकर्षवती गीतकला। पुत्रश्चान्यदा तस्य समुत्पन्नः। ततस्तद्राज्यावाप्तिनिमित्तं गतः पाटलीपुत्रं नगरं कुणालः। समाक्षिप्तश्चातीव तन्नगरनिवासी समस्तोऽपि लोकस्तेन गीतकलया। गता च तत्प्रसिद्धिः। भूपालान्तिकं नीतश्चासौ। तत्र कृतं च यवनिकान्तरे तेन गीतम्। अतीवाक्षिप्तश्च जगाद पृथिवीपतिः– याचस्व भोः!, प्रयच्छामि तव समीहितम्। ततः पठितं कुणालेन–

[3]चंदगुत्तपपुत्तो उ बिंदुसारस्स नत्तुओ। असोगसिरिणो पुत्तो अंधो जायइ कागणिं ॥ ८६२ ॥

---

१ क. ग. 'थानकसू'। २ घ. छ. 'त्रन'। ३ चन्द्रगुप्तप्रपौत्रस्तु बिन्दुसारस्य नप्तृकः। अशोकश्रियः पुत्रोऽन्धो याचते राज्यम् ॥ ८६२ ॥ (क्र)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अस्यायं भावार्थः– पाटलीपुत्रनगरे चाणक्यप्रतिष्ठितो मौर्यः प्रथमं किल चन्द्रगुप्तो राजा बभूव । ततस्तत्पुत्रो बिन्दुसारः समभूत् । तदनन्तरं तु तत्पुत्रोऽशोकश्रीर्जातः । तस्य चान्धोऽसौ कुणालः पुत्रः । एवं च सत्येष चन्द्रगुप्तस्य प्रपौत्रः, बिन्दुसारस्य तु नप्तृकः पौत्रः, अशोकश्रीभूपतेस्तु पुत्रः, 'काकणिं' क्षत्रियभाषया राज्यं याचत इति । ततो यवनिकापगमं कारयित्वा किञ्चित् सकौतुकेन राज्ञा सविशेषं पृष्टः सर्वमपि स्वव्यतिकरं कुणालः कथयामास । ततः पृथिवीपतिना पृष्टोऽन्धः– त्वं राज्येन किं करिष्यसि ?। तेन प्रोक्तम्– देव ! मम राज्यार्हः पुत्र उत्पन्नो वर्तते । राज्ञा प्रोक्तम्– कदा ? । कुणालः प्राह– संप्रति । तत् 'संप्रतिः' इत्येव तस्य नाम प्रतिष्ठितम् । राज्यं च तस्मै प्रदत्तमिति । तदेवं यथेहाऽकारस्योपर्येकेनाप्यधिकेन बिन्दुना कुमारस्य नेत्राऽपायो जातः, तथा प्रस्तुतेऽपि सूत्रे बिन्द्वाद्याधिक्यादर्थान्तरप्राप्त्या सर्वानर्थसंभव इति संभावनीयमिति ॥ ८६२ ॥

अथ मात्राधिक्येऽन्यदिह लौकिकमुदाहरणम् । तत्सूचनार्थं 'जो जहा वट्टए कालो' इत्यादिश्लोकः । अस्यार्थः कथानकादवसेयः । तच्चेदम्–

कस्मिंश्चिदटवीप्रदेशे सरोवरमेकमासीत् । तच्च लौकिकेषु 'कामिकतीर्थम्' उच्यते । तस्य हि तीरे वञ्जुलनामा वृक्षोऽभूत् । तच्छाखामारुह्य यदि तिर्यक् सरोवरजले निपतति, तदा तीर्थमाहात्म्यात् किल मनुष्यो भवति । यस्तु मनुष्य एव संनिपतति, असौ देवो जायते । यस्तु लोभाधिक्याद् द्वितीयामपि वारां निपतति स तादृशः मागासीत् पुनरपि तादृश एव संपद्यते । एवं चान्यदा वानरमिथुनस्य पश्यतो नरमिथुनं वञ्जुलवृक्षशाखातो निपतितं तत्सरोवरजले । संजातं च भास्वरशरीरं देवमिथुनम् । ततो वानरमिथुनमपि तथैव तत्र पतितम् । जातं च प्रवररूपधरं नरमिथुनम् । ततो वानरेण प्रोक्तम्– पुनरपि 'तथैवेह निपतावः, येन देवरूपौ भवावः' । ततोऽसौ निपिद्धो योषिता– ' यद् न ज्ञायते, पुनरपीत्थं कृते किं संपद्यते ?, पर्याप्तं चानेनैव प्रवरमानुषत्वेन, निषिद्धो ह्यतिलोभः सर्वशास्त्रेष्वपि' इति । इत्थं निवार्यमाणोऽपि तयाऽसौ पुरुषो द्वितीयामपि वारां तथैव तत्र निपपात । जातश्च पुनरपि वानरः । ततो गृहीता सा प्रवररूपा योषित् तत्राऽऽयातेन केनापि राज्ञा । संजाता च तस्य वल्लभा पत्नी । वानरस्तु गृहीतो मायेन्द्रजालिकैः, शिक्षितश्च नर्तयितुम् । नीतश्चासौ सकलत्रोपविष्टस्य राज्ञः पुरतः । प्रत्यभिज्ञाता च तेन सा राज्ञी । तयाऽप्युपलक्षितोऽसौ वानरः । धावति च पुनः पुनर्निगृह्यमाणोऽपि राज्ञ्याः संमुखं ग्रहणार्थम् । अतो राज्ञ्या पठितम्–

[1]जो जहा वट्टए कालो तं तहा सेव वानरा ! । मा वंजुलपरिभट्ठो वानरा ! पडणं सर ॥ ८६३ ॥

---

१ यो यथा वर्तते कालस्तं तथा सेवस्व वानर ! । मा वञ्जुलपरिभ्रष्टो वानर ! पतनं सर ॥ ८६३ ॥

उक्तानार्थश्चायं श्लोकः । तदेवं यथाऽधिको लोभाभिप्रायः कृतो वानरस्याऽनर्थाय जातः, तथा मात्राद्यधिकं सूत्रमपीति भावनीयमिति ॥ ८६३ ॥

अथाऽक्षरादिहीनसूत्रपाठेऽपायप्रदर्शनार्थमुदाहरणम्–

[1]विज्जाहर रायगिहे उप्पय पडणं च हीणदोसेण । कहणो सरणागमणं पयाणुसारिस्स दाणं च ॥ ८६४ ॥

अस्या अप्यर्थः कथानकादवसेयः । तच्चेदम्– राजगृहनगरे भगवान् महावीरः समवसृतः । तदन्तिके च धर्मं श्रुत्वोत्थितायां परिषदि गृहं प्रति गच्छता श्रेणिकराजेन दूरे दृष्टः कोऽपि विद्याधारो विधुरितपक्षः पक्षीव नभस्युत्पात-निपातौ विदधानः । ततः समुत्पन्नकौतुकः प्रतिनिवृत्त्य पुनरपि समवसरणमागतः । पृष्टवांश्च तद्व्यतिकरं सर्वमेव भगवन्तम् । 'कहण त्ति' कथनं च कृतं भगवता– यदस्य खेचरस्य विस्मृतमेकमक्षरं नभोगामिन्या विद्यायाः । ततो न सा स्फुरत्यस्य सम्यक् । अतोऽयमुत्पात-निपातौ विदधाति । एतच्चाकर्णितं पितृसमीपस्थितेनाऽभयकुमारेण । ततस्तेन गत्वाऽभिहितो विद्याधरः– यद् भवतो विस्मृतमेकमक्षरं, तदहं लब्ध्वा तव कथयामि, यदि समानसिद्धिकं मां करोष्यस्या विद्यायाः । ततः प्रतिपन्नमिदं खेचरेण । कथितं च पदानुसारिलब्ध्या समुपलभ्य तदक्षरमभयकुमारेण । प्रदत्ता च तस्य पदानुसारिणः खेचरेण विद्या । स्वयं च ततः क्षेमेण प्राप्तो वैताढ्यशिखरिशिखरस्थितप्रवरविद्याधरीसंगमसुखानि । तदेवं यथाऽक्षरहीना विद्या न स्फुरति, अनर्थफला च जायते, तथा सूत्रमपीति ॥ ८६४ ॥

अथ हीना-ऽधिकाक्षरोभयोदाहरणमाह—

[2]तित्त-कडुभेसयाइं मा णं पीलेज्ज ऊणए देइ । पउणइ न तेहिं अहियेहिं मरइ बालो तहाहारे ॥ ८६५ ॥

तिक्त-कटुभेषजान्यातुरस्य 'मा पीडयेताऽयमेतैः' इति विचिन्त्य माता-पितृ-वैद्यादिर्यूनानि ददाति तदाऽसौ तैर्न प्रगुणीभवति, हीनमात्रत्वात् । अथ कथमप्यधिकानि प्रयच्छति, तदा तैरधिकमात्रैराक्रान्तोऽसौ म्रियत एवाऽऽतुरः । 'बालो तहाहारे त्ति' तथा तेनैव प्रकारेण हीना-ऽधिके आहारेऽपि बालोऽपायमाप्नोति । एवं सूत्रेऽपि हीना-ऽधिके दोषा वाच्या इति ॥ ८६५ ॥

---

१ विद्याधरो राजगृहे उत्पातं पतनं च हीनदोषेण । कथनं शरणागमनं पदानुसारिणो दानं च ॥ ८६४ ॥

२ तिक्त-कटुभैषज्यानि मा तं पीडयेयुरूनानि ददाति । प्रगुणीभवति न तैरधिकैर्म्रियते बालस्तथाहारे ॥ ८६५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

के पुनस्ते दोषाः ?, इत्याह–

अत्थस्स विसंवाओ सुयभेआओ तओ चरणभेओ। तत्तो मोक्खाभावो मोक्खाभावेऽफला दिक्खा ॥८६

मात्रादिहीनाधिक्ये सूत्रस्य भेदः, सूत्रभेदाच्चार्थस्य विसंवादः, तद्विसंवादे च क्रियारूपस्य चरणस्य विसंवादः, तद्विसंवादे मोक्षाभावः, तदभावे च दीक्षावैफल्यमिति। तदेवमुक्तमागमतो द्रव्यावश्यकम् ॥ ८६६ ॥

अथ नोआगमतस्तदभिधित्सुराह–

[1]नोआगमओ जाणय-भव्वसरीरा-ऽइरित्तमावासं। लोइय लोगुत्तरियं कुप्पावयणं जहा सुत्ते ॥ ८६७ ॥

नोआगमतो द्रव्यावश्यकं त्रिविधम्– ज्ञशरीरद्रव्यावश्यकम्, भव्यशरीरद्रव्यावश्यकम्, तदुभयव्यतिरिक्तं द्रव्यावश्यकं च। तत्र सम्यक् पूर्वाधीतावश्यकं सिद्धशिलातलगतजीवविप्रमुक्तं मुनिशरीरमनुभूतभावत्वाज्ज्ञशरीरद्रव्यावश्यकम्। यत् पुनरावश्यकं ज्ञास्यति, न पुनरिदानीं जानाति, तत् सचेतनं देवदत्तादिशरीरं योग्यत्वाद् भव्यशरीरद्रव्यावश्यकम्। एतदुभयव्यतिरिक्तं तु नोआगमतो द्रव्यावश्यकं त्रिविधम्– लौकिकम्, लोकोत्तरम्, कुप्रावचनिकं च। तत्र लौकिकं राजादीनां मुखप्रक्षालनाद्यावश्यकम्। लोकोत्तरं तु ये इमे श्रमणगुणविप्रमुक्ता लिङ्गमात्रधारिणः साध्वाभासाः प्रतिपदमनेकान्यसंयमस्थानान्यासेव्योभयकालं प्रतिक्रमणाद्यावश्यकं कुर्वन्ति तद् विज्ञेयम्। कुप्रावचनिकं तु यत् पाखण्डिनश्चामुण्डाऽऽयतनोपलेपनाद्यावश्यकं कुर्वन्ति तद् बोद्धव्यम्। नोशब्दश्चेह सर्वाऽऽगमसर्वनिषेधे द्रष्टव्यः। एतच्च सर्वमपि नोआगमतो द्रव्यावश्यकं सप्रभेदं यथा सूत्रेऽनुयोगद्वाराख्ये प्रोक्तं तथा विज्ञेयमिति ॥८६७

इह लोकोत्तरं यद् नोआगमतो द्रव्यावश्यकमुक्तम्; तत्रोदाहरणमाह–

[4]लोउत्तरे अभिक्खणमासेवालोयओ उदाहरणं। स रयणदाहगवाणियनाएण जईहुवालद्धो ॥ ८६८ ॥

लोकोत्तरे नोआगमतो द्रव्यावश्यकेऽभीक्ष्णमासेवकालोचकः साध्वाभास उदाहरणम्। आसेवकश्चासावालोचकश्चेति समास

---

१ अर्थस्य विसंवादः श्रुतभेदात् ततश्चरणभेदः। ततो मोक्षाभावो मोक्षाभावेऽफला दीक्षा ॥ ८६६ ॥ २ क. ग. 'दादेव चार्थ'।

३ नोआगमतो ज्ञायकभव्यशरीरा-ऽतिरिक्तमावश्यकम्। लौकिकं लौकोत्तरिकं कुप्रावचनिकं यथा सूत्रे ॥ ८६७ ॥

४ लोकोत्तरेऽभीक्ष्णमासेवकालोचक उदाहरणम्। स रत्नदाहकवणिग्ज्ञातेन यतिभिरुपालब्धः ॥ ८६८ ॥

आसेवकालोचकस्य च योऽगीतार्थगुरुः स खलु रत्नदाहकवणिग्ज्ञातेन गीतार्थयतिभिरुपालब्धः। इत्यक्षरार्थः। भावार्थस्तु कथानकगम्यः। तच्च कथ्यते–

वसन्तपुरं नाम नगरम्। तत्र चाऽगीतार्थः संविग्नाभास एको गच्छः सूरिसहितो विचरति। तन्मध्ये चैकः साध्वाभासस्तिष्ठति। स च प्रतिदिनमुदकार्द्रहस्तादिदोषदुष्टान्यनेषणीयभक्त-पानकादीनि गृहीत्वाऽऽवश्यककाले महान्तं संवेगमिवोद्वहन् सर्वं गुर्वन्तिकेऽन्वहमालोचयति। गुरुरपि तथैव प्रायश्चित्तं प्रयच्छति। तच्च प्रयच्छन्नगीतार्थत्वेन नित्यमेवं वक्ति– अहो ! धर्मश्रद्धालुरयं महाभागः सुखेनाऽऽसेव्यते, दुष्करं च यदित्थमालोच्यते, अतोऽशठत्वादेव शुद्धोऽयम्। एतच्च दृष्ट्वाऽन्ये मुग्धसाधवश्चिन्तयन्ति– अहो ! आलोचयितव्यमेवेह साध्यम्, तच्चेत् क्रियते, तर्ह्यकृत्यासेवनेऽपि न कश्चिद् दोष इति। एवं सर्वस्मिन्नपि गच्छे प्रायः प्रवृत्तमसमञ्जसमिति। इत्थं च व्रजति कालेऽन्यदा गीतार्थसाधुः कश्चित् तत्र गच्छे प्राघूर्णकः समायातः। तेन च सोऽविधिः सर्वोऽपि दृष्टः। ततश्चिन्तितम्– अहो ! अनेनाऽगीतार्थगुरुणा सर्वोऽप्ययं नाशितो गच्छः। ततस्तेन भणितो गुरुः– अहो ! त्वममुं नित्यमकृत्यासेवकं साधुमित्थं प्रशंसन् भवसि गिरिनगरनृपतेस्तन्नगरनिवासिलोकस्य च सदृशः। कथम् ?, इत्यत्रोच्यते–

गिरिनगरं नाम नगरम्। तत्र चैको वणिक् कोटीश्वरो निवसति। स च वैश्वानरभक्तत्वात् प्रतिवर्षं रत्नानामपवरकं भृत्वा वह्निं प्रदीपयति। तं च तथा कुर्वन्तं राजा नगरलोकश्च सर्वदा प्रशंसति, यथा– अहो ! वैश्वानरे भक्तिरस्य, यदमुं भगवन्तं प्रतिवर्षमित्थं रत्नैस्तर्पयत्यसौ। एवं च प्रशस्यमानोऽयमादततरः प्रतिसंवत्सरं तथाऽनुतिष्ठति। ततोऽन्यदा प्रचण्डपवनोद्धूतस्तेन प्रदीपितो वह्निः सराजगृहं समस्तमपि नगरं भस्मसात् करोति। ततः सनगरेण राज्ञा 'किमस्माभिरित्थं कुर्वन्नसौ पूर्वं न निषिद्धः ?, किं वा प्रशंसितः ?' इत्यादिदुष्टं पश्चात्तापं कृत्वा दण्डितः, निर्वासितश्च नगरादसौ वणिगिति।

एवमाचार्य ! त्वमप्यविधिप्रवृत्तस्याऽस्य साधोर्नित्यमित्थं प्रशंसां कुर्वन्नमुम्, आत्मानम्, गच्छं च नाशयसि। तस्माद् मथुरापुरीनरपतेः, तन्निवासिलोकस्य च सदृशो भव, यतोऽनर्थभाग् न भवसि। कथम् ?, इत्यत्राप्यभिधीयते–

मथुरानगर्यामपि वैश्वानरभक्तेन केनापीश्वरवणिजेत्थमेव रत्नभृतं गृहं प्रदीपयितुमारब्धम्। ततः सनगरलोकेन राज्ञा दण्डितः, तिरस्कृतश्चासौ वणिक्। अटव्यां गृहं कृत्वा किमित्थं न प्रदीपयसि ?, इति निष्कासितो नगरादिति। त्वमपीत्थं कुर्वन्नमुम्, आत्मानं, गच्छं चानर्थेभ्यो रक्षसि। तदेवं युक्तिभिः शिक्ष्यमाणोऽप्यसौ गुरुरगीतार्थत्वेन साग्रहतया, निर्धर्मतया च स्वप्रवृत्तेर्न निवर्तते। ततस्तेन प्राघूर्णकसाधुना गच्छसाध्वोऽभिहिताः– अलमेवंभूतस्य गुरोर्वशवर्तित्वेन, परिह्रियतामयम्; अन्यथा सर्वेषामनर्थाय संपत्स्यते। त-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

तस्तथैवाऽनुष्ठितं तैरपि । तदेवंभूतस्य गच्छस्य सत्कं नोआगमतो लोकोत्तरं द्रव्यावश्यकमभिधीयत इति । तदेवं सोदाहरणमुक्तं द्रव्यावश्यकम् ॥ ८६८ ॥

अथ भावावश्यकमभिधीयते- तच्च द्विधा- आगमतः, नोआगमतश्च । तदेतदुभयमप्याह-

आगमओ भावावासयं तदत्थोवओगपरिणामो । नोआगमओ भावे परिणामो नाण-किरियासु ॥८६९॥

आगमतो भावावश्यकमावश्यकार्थोपयोगपरिणामः । नोआगमतस्तु ज्ञान-क्रियोभयपरिणामः, मिश्रवचनत्वाद् नोशब्दस्येति॥८६९॥

इदं च त्रिविधमिति दर्शयन्नाह-

[3]लोइय लोउत्तरियं कुप्पावयणं च तं समासेणं । लोउत्तरं पसत्थं सत्थे तेणाहिगारोऽयं ॥८७०॥

तद् नोआगमतो भावावश्यकं त्रिविधम्- लौकिकम् , लोकोत्तरम् , कुप्रावचनिकं च । एवं चोपन्यासः पूर्वं व्यतिरिक्तद्रव्यावश्यके, अत्र च भावावश्यके बन्धानुलोम्यादिना केनापि हेतुना कृतः, यावताऽनुयोगद्वारसूत्रे इत्थमुक्तम्- 'लौकिकम् , कुप्रावचनिकम् , लोकोत्तरं च' इति । तत्र लौकिकं नोआगमतो भावावश्यकम् 'पूर्वाह्णे भारतम् , अपराह्णे रामायणं वाचनीयम्' इत्यादि । कुप्रावचनिकं तु मन्त्रादिपाठपूर्वकमिज्याऽञ्जलिहोमादि । लोकोत्तरं पुनरुपयुक्तस्य श्रमणादेर्मुखवस्त्रिकाप्रत्युपेक्षणा-ऽऽवर्तादिक्रियामिश्रमुभयकालमावश्यकसूत्रोच्चारणम् । एवं सर्वत्र ज्ञान-क्रियामिश्रता भावनीया । इह च त्रिविधेऽपि नोआगमतो भावावश्यके पारमार्थिकाऽनुपमापवर्गसुखप्राप्तिहेतुत्वाल्लोकोत्तरमेव प्रशस्तम् । तदेवेह शास्त्रेऽधिक्रियत इति ॥ ८७० ॥

अथावश्यकस्य पर्यायनामान्यभिधित्सुराह—

[4]तस्साभिन्नत्थाइं सुपसत्थाइं जहत्थनिययाइं । अव्वामोहाइनिमित्तमाह पज्जायनामाइं ॥ ८७१ ॥

तस्याऽऽवश्यकस्य पर्यायनामान्याहेति संबन्धः । कथंभूतानि ?, अभिन्नार्थानि, सुप्रशस्तानि, यथाऽर्थो व्यवस्थितस्तथैव नियतानि निश्चितानि । किमिति ?, आह- अव्यामोहादिनिमित्तम् ; ऐकार्थिकैर्हि पर्यायनामभिर्ज्ञातैरन्यान्यस्थानेष्वन्यान्यनामश्रवणतः शिष्यो न मुह्यति । आदिशब्दाद् नानादेशजविनेयानां सुखेनैवाऽर्थप्रतिपत्तिर्भवतीत्यादि वाच्यमिति ॥ ८७१ ॥

कानि पुनस्तानि पर्यायनामानि ?, इत्याह—

[1]आवस्सयं अवस्सकरणिज्जं धुव निग्गहो विसोही य । अज्झयणछक्क वग्गो नाओ आराहणा मग्गो ॥ ८७२ ॥

एतानि दश पर्यायनामानि ॥ ८७२ ॥

तत्राऽऽवश्यकमिति कः शब्दार्थः ?, इत्याह—

[2]समणेण सावएण य अवस्सकायव्वयं हवइ जम्हा । अंतोअहो-निसिस्स उ तम्हा आवस्सयं नाम॥८७३॥

श्रमणादिभिरहोरात्रमध्येऽवश्यं करणादावश्यकमितीह तात्पर्यमिति ॥ ८७३ ॥

एतदेव सविशेषमाह—

[3]जदवस्सं कायव्वं तेणावस्सयमिदं गुणाणं वा । आवस्सयमाहारो आ मज्जाया-भिविहिवाई ॥ ८७४ ॥

आ वस्सं वा जीवं करइ जं नाण-दंसण-गुणाणं । संनिज्झ-भावण-च्छायणेहिं वावासयं गुणओ ॥८७५॥

यद् यस्मादवश्यं कर्तव्यं, तेन तस्मादावश्यकमिदमिति । एतत् प्राक्तनगाथायाः पर्यवसितार्थकथनमेव । अथवा, आङ् मर्यादा-ऽभिविधिवाची, आ- मर्यादया, अभिविधिना वा गुणानामपाश्रय आधार इदमित्यापाश्रयः- गुणाधार इत्यर्थः । नन्वाधारवाचक आपाश्रयशब्दः पुंलिङ्गे वर्तते, तत् कथमापाश्रयमिति नपुंसकम् ? इति चेत् । न, प्राकृतशैलीवशतोऽदोषादिति । अथवा, ज्ञानादिगुणानामा समन्ताद् वश्यमात्मानं करोतीत्यावश्यकम् , यथा- अन्तं करोतीत्यन्तकः । सांनिध्य-भावना-ऽऽच्छादनैर्वाऽऽवासकं गुणत इत्यावासकमुच्यते । इदमुक्तं भवति- 'वस निवासे' इति गुणशून्यमात्मानं गुणैः, आ- समन्ताद् वासयति गुणसांनिध्यमात्मनः करोतीत्या-

१ क.ख.ग. 'अधुना भा' । २ आगमतो भावावश्यकं तदर्थोपयोगपरिणामः । नोआगमतो भावे परिणामो ज्ञान-क्रिययोः ॥ ८६९ ॥

३ लौकिकं लौकोत्तरिकं कुप्रावचनिकं च तत् समासेन । लोकोत्तरं प्रशस्तं शास्त्रे तेनाऽधिकारोऽयम् ॥ ८७० ॥

४ तस्याऽभिन्नार्थानि सुप्रशस्तानि यथार्थनियतानि । अव्यामोहादिनिमित्तमाह पर्यायनामानि ॥ ८७१ ॥

१ आवश्यकमवश्यकरणीयं ध्रुवं निग्रहो विशुद्धिश्च । अध्ययनषट्कं वर्गो न्याय आराधना मार्गः ॥ ८७२ ॥

२ श्रमणेन श्रावकेण चावश्यकर्तव्यकं भवति यस्मात् । अन्तरहर्निशं तु तस्मादावश्यकं नाम ॥ ८७३ ॥

३ यदवश्यं कर्तव्यं तेनावश्यकमिदं गुणानां वा । आपाश्रय आधार आ मर्यादा-ऽभिविधिवाची ॥ ८७४ ॥
आ वश्यं वा जीवं करोति यज्ज्ञान-दर्शन-गुणानाम् । सांनिध्य-भावना-ऽऽच्छादनैर्वाऽऽवासकं गुणतः ॥ ८७५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वासकम् । अथवा, यथा वस्त्रं वास-धूपादयः, तथा गुणैरा समन्तादात्मानं वासयति भावयति रञ्जयतीत्यावासकम् । यदि वा 'वस आच्छादने' गुणैरा समन्तादात्मानं च्छादयति– 'छद खट्ट संवरणे' इति दोषेभ्यः संवृणोतीत्यावासकमिति । तदेवं 'आवस्सयं' इत्यार्ष पर्यायनाम व्याख्यातम् ॥ ८७४ ॥ ८७५ ॥

शेषाण्यतिदिशन्नाह—

[1]एवं चिय सेसाइं विउसा सुय-लक्खणाणुसारेण । कमसो वत्तव्वाइं तहा सुय-क्खंधनामाइं ॥ ८७६ ॥

एवमेव शेषाण्यप्यवश्यकरणीयादिनामानि सिद्धान्त-लक्षणानुसारेण क्रमशो विदुषा वक्तव्यानिः तद्यथा– मुमुक्षुभिरवश्यं क्रियत इत्यवश्यकरणीयमिदमुच्यते; तथा, अर्थतो ध्रुवत्वात् शाश्वतत्वाद् ध्रुवम् । निगृह्यन्त इन्द्रिय-कषायादयो भावशत्रवोऽनेनेति निग्रहः । अन्ये तु– प्रवाहतोऽनादिकालीनत्वाद् ध्रुवं कर्म, तद् निगृह्यतेऽनेनेति 'ध्रुवनिग्रहः' इत्येकमेवेदं पर्यायनाम व्याचक्षते । कर्ममलिनस्यात्मनो विशुद्धिहेतुत्वाद् विशुद्धिः । सामायिकादिषडध्ययनात्मकत्वादध्ययनषट्कम् । 'वृजी वर्जने' वृज्यन्ते दूरतः परिहियन्ते रागादयो दोषा अनेनेति वर्गः । अन्ये तु– षडध्ययनकलापात्मकत्वात् 'अध्ययनषट्कवर्गः' इतीदमप्येकमेव पर्याय नाम ब्रुवते । अभिप्रेतार्थसिद्धेः सम्यगुपायत्वाद् न्यायः; अथवा, जीव-कर्मसंबन्धापनयनाद् न्यायः । अयमभिप्रायः– यथा कारणिकैर्दृष्टो न्यायो द्वयोरर्थि-प्रत्यर्थिनोर्भूमिद्रव्यादिसंबन्धं चिरकालीनमप्यपनयतीति, एवं जीव-कर्मणोरनादिकालीनमप्याश्रयाश्रयिभावसंबन्धमपनयतीत्यावश्यकमपि न्याय उच्यते । मोक्षाऽऽराधनाहेतुत्वादाराधना । मोक्षपुरप्रापकत्वाद् मार्ग इव मार्ग इति ।

अतिदेशप्रस्तावाद् वक्ष्यमाणान्यप्येकार्थिकनामान्यतिदिशन्नाह– 'तहा सुयक्खंधनामाइं ति' तथा तेनैवोक्तप्रकारेण श्रुत-सूत्र-ग्रन्थ-सिद्धान्त-प्रवचन-ऽऽज्ञो-पदेशा-ऽऽगमादीनि श्रुतैकार्थिकनामानि, गण-काय-निकाय-स्कन्ध-वर्ग-राश्यादीनि च स्कन्धैकार्थिकनामानि श्रुतानुसारेण, लक्षणानुसारेण चाऽर्थतो विदुषा वक्तव्यानीत्यर्थ इति । तदेवं विहितो नामादिन्यास आवश्यकपदस्य ॥ ८७६ ॥

अथ श्रुतपदस्य तं चिकीर्षुरिदमाह–

[2]आगमओ दव्वसुयं वत्ता सुत्तोपओगनिरवेक्खो । नोआगमओ जाणय-भव्वसरीरा-ऽइरित्तमिदं ॥८७७॥

---

१ एवमेव शेषाणि विदुषा श्रुत-लक्षणानुसारेण । क्रमशो वक्तव्यानि तथा श्रुत-स्कन्धनामानि ॥ ८७६ ॥

२ आगमतो द्रव्यश्रुतं वक्ता श्रुतोपयोगनिरपेक्षः । नोआगमतो ज्ञायक भव्यशरीरा-ऽतिरिक्तमिदम् ॥ ८७७ ॥

इह नाम-स्थापने सुगमत्वाद् नोक्ते । द्रव्यश्रुतं त्वागमतः, नोआगमतश्च । तत्राऽऽगमतो द्रव्यश्रुतं वक्ता तदुपयोगनिरपेक्षः– अनुपयुक्त इत्यर्थः । नोआगमतस्तु त्रिविधम्– ज्ञशरीरद्रव्यश्रुतम्, भव्यशरीरद्रव्यश्रुतम्, तद्व्यतिरिक्तं द्रव्यश्रुतं चेति । तत्राद्यभेदद्वयमावश्यकवदेव बोद्धव्यम् ॥ ८७७ ॥

तद्व्यतिरिक्तं त्विदं किम् ?, इत्याह—

[1]पत्ताइगयं सुत्तं सुत्तं च जमंडजाइ पंचविहं । आगमओ भावसुयं सुउवउत्तो तओऽणण्णो ॥ ८७८ ॥

इह श्रुतं सूत्रं च द्वे अपि क्लीबेकार्थे । तत्र तल-ताल्यादिप्रभवानि पत्राणि प्रतीतानि, तेषु गतं लिखितं सूत्रं पत्रादिगतम्; आदिशब्दात् पत्रसंघातनिष्पन्नाः पुस्तकाः[2], वस्त्रादयश्च गृह्यन्ते; तेष्वपि लिखितं सूत्रं ज्ञशरीर-भव्यशरीरव्यतिरिक्तं द्रव्यश्रुतमुच्यते । अथवा, अण्डजाद्यपि यदागमे[3] पञ्चविधं सूत्रमुक्तम्; तद्यथा– "अंडए, बोंडए, कीडए, वालए, वागए" * । एतदपि सूत्राभिधानसाम्याद् व्यतिरिक्तं द्रव्यश्रुतमुच्यते । तत्राण्डाच्चतुरिन्द्रियकीटविशेषनिर्वर्तितकोशकाररूपाज्जातमण्डजं लोकप्रतीतं चटकसूत्रमित्यर्थः । बोण्डं वमनीफलं तस्माज्जातं बोण्डजं कर्पाससमूत्रमित्यर्थः । कीटजं तु पञ्चविधम्, तद्यथा–"[4]पट्टे, मलए, अंसुए, चीणंसुए, किमिराए"* एते पञ्चापि पट्टसूत्रविशेषाः । वालजमपि पञ्चविधम्, तद्यथा– 'ऊणिए, उट्टिए, मिगलोमिए, कोतवे, किट्टिसे' * । तत्र मूषिकलोमनिष्पन्नं कौतवम्, ऊर्णाद्युद्धरितकिट्टिसनिष्पन्नं सूत्रं किट्टिसम्; अथवा, ऊर्णादीनां द्विकादिसंयोगनिष्पन्नं किट्टिसम्; यदिवा, उक्तशेषाऽश्वादिजीवलोमनिष्पन्नं किट्टिसम् । शेषं प्रतीतम् । सणा-ऽतस्यादिप्रभवं वल्कजम्* । तदेतत् सर्वमपि व्यतिरिक्तं द्रव्यश्रुतम् ।

भावश्रुतमपि द्विधा– आगमतः, नोआगमतश्च । तत्र श्रुतोपयुक्तस्तदध्येताऽऽगमतो भावश्रुतम् । ननूपयोग एव भावश्रुतं युज्यते, तत्कथमिह तद्वान् गृह्यते ?, इत्याह 'तओऽणण्णो त्ति' ततः श्रुतोपयोगादनन्य इति कृत्वोपचारतः स एव भावश्रुतमुच्यत इति ॥८७८॥

नोआगमतो भावश्रुतमाह–

---

१ पत्रादिगतं सूत्रं सूत्रं च यदण्डजादि पञ्चविधम् । आगमतो भावश्रुतं श्रुतोपयुक्तस्ततोऽनन्यः ॥ ८७८ ॥ *(अनुयोगद्वारसूत्रे)

२ पुस्तकशब्दस्य पौंस्नं न दोषाय, "पुस्तक-मुस्तक-" इति लिङ्गानुशासने तस्य पुंनपुंसकत्वेनाऽनुशासनात् ।

३ अण्डजम्, बोण्डजम्, कीटजम्, वालजम्, वल्कजम् । ४ पट्टम्, मलयम्, अंशुकम्, चीनांशुकम्, कृमिरागम् ।

५ और्णिकम्, औष्ट्रिकम्, मृगलोमिकम्, कौतवम्, किट्टिसम् । * अनुयोगद्वारसूत्रस्थोऽयं पाठः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]नोआगमओ भावे लोइय लोउत्तरं पुराभिहियं । सम्मत्तपरिग्गहियं सम्मसुयं मिच्छमियरं ति ॥८७९॥

नोआगमतो भावश्रुतं द्विविधम्– लौकिकं, लोकोत्तरं च । तत्र लौकिकं भारत-रामायणादि । इदं चेहैव पूर्वं श्रुतज्ञानविचारे प्रोक्तम् । लोकोत्तरं त्वङ्गप्रविष्टादि, इदमपि पूर्वं तत्रैवोक्तम् । एतच्च सर्वं सम्यक्त्वपरिगृहीतं सम्यक्श्रुतं, मिथ्यात्वपरिगृहीतं तु मिथ्याश्रुतमिति ॥ ८७९ ॥

अत्र प्रेरकः प्राह—

[2]आगमओ भावसुयं जुत्तं नोआगमे कहं होइ । जइ नागमो न सुत्तं, अह सुत्तमणागमो किह णु ?॥८८०॥

यदागमतो भावश्रुतमुक्तम् तद् युक्तम्– घटत एव । नोआगमतस्तु भावश्रुतं कथं भवति ?– न घटत एवैतदित्यर्थः । तथाहि– नोशब्दस्तावद् निषेधवचनः, ततश्च यदि न- नैवाऽऽगमः, तर्हि न श्रुतम्, तस्याऽऽगमरूपत्वात् । अथ श्रुतम्, तर्ह्यनागमः कथम् ? । तस्माद् नोआगमतो भावश्रुतमिति 'माता वन्ध्या' इत्यादिवद् विरुद्धमेवेति ॥ ८८० ॥

प्रेरक एवाऽऽशङ्क्याह—

[3]उवओगो जम्मत्ते तं तं जइ वागमोऽवसेसं तु । नोआगमो त्ति एवं किमणुवउत्तम्मि दव्वसुयं ? ॥ ८८१ ॥

यदिवा, एवं सिद्धान्तवादी ब्रूयात्– यावन्मात्रे यत्र यत्र श्रुताध्येतरि तदुपयोगस्तत्तदागमतो भावश्रुतम्, यत् त्ववशेषमनुपयुक्तस्याऽध्येतुः श्रुतं तद् नोआगमतो भावश्रुतमिति सर्वं सुस्थमिति । हन्त ! तर्हि 'आगमओ दव्वसुयं वत्ता सुत्तोवओगनिरवेक्खो' इत्यनेनाऽनुपयुक्ते वक्तरि यत् पूर्वं द्रव्यश्रुतमुक्तं तत् किं स्यात्, तद्विषयस्येदानीं नोआगमतो भावश्रुतत्वेन त्वया प्रतिपाद्यमानत्वात् ?– निर्विषयमेव तत् स्यादिति भावः ॥ ८८१ ॥

पर एवाचार्यमतमाशङ्क्य परिहरन्नाह—

[4]अविसुद्धनयमएण व जइ लद्धिसुयमणुवउत्ते वि । भावसुयं चिय पढओ किमणुवउत्तस्स दव्वसुयं ?॥८८२॥

---

१ नोआगमतो भावे लौकिकं लोकोत्तरं पुराभिहितम् । सम्यक्त्वपरिगृहीतं सम्यक्श्रुतं मिथ्येतरदिति ॥ ८७९ ॥

२ आगमतो भावश्रुतं युक्तं नोआगमे कथं भवति ? । यदि नागमो न सूत्रं, अथ सूत्रमनागमः कथं नु ? ॥ ८८० ॥

३ उपयोगो यन्मात्रे तत्तद् यदि वाऽऽगमोऽवशेषं तु । नोआगम इत्येवं किमनुपयुक्ते द्रव्यश्रुतम् ? ॥ ८८१ ॥ ४ गाथा ८७७ ।

५ अविशुद्धनयमतेन वा यदि लब्धिश्रुतमनुपयुक्तेऽपि । भावश्रुतमेव पठतः किमनुपयुक्तस्य द्रव्यश्रुतम् ? ॥ ८८२ ॥

यदि च सूरिरेतद् ब्रूयात्– अविशुद्धनयमतेन श्रुतलब्धिरपि भावश्रुतमुच्यते । ततश्चानुपयुक्तेऽपि लब्धिसंपन्ने जीवे तल्लब्धिरूपं श्रुतं लब्धिश्रुतं भावश्रुतमेवाऽङ्गीक्रियते, अन्यत्तु लब्ध्यादिशून्यस्य यत् श्रुतं तद् द्रव्यश्रुतम्, इति न तस्य निर्विषयतेति भावः । हन्त ! तर्ह्यनुपयुक्तस्य पठतो वक्तुः किं द्रव्यश्रुतम् ?, तस्यापि श्रुतलब्धिसद्भावतो भावश्रुतप्राप्त्या तदवस्थैव द्रव्यश्रुतस्य निर्विषयतेति भावः । न हि श्रुतलब्धिरहितः कोऽपि पठति । तस्मादेतदपि वाङ्मात्रत्वाद् न किञ्चिदिति ॥ ८८२ ॥

अथाचार्यः प्रतिविधानमाह—

[1]आगम सुओवओगो सुद्धो चिय न चरणाइसंमिस्सो । मीसेऽवि वा विवक्खा सुयस्स चरणाइभिन्नस्स ॥८८३॥

इह तावत् सर्वस्याप्यस्य प्रक्रमस्य भावार्थ उच्यते– परेण निषेधवचनं नोशब्दमवगम्य पूर्वपक्षः कृतः । आचार्यस्तु मिश्रवचनं नोशब्दं चेतसि निधाय प्रतिविधत्ते । मिश्रवचनेनापि नोशब्देन द्रव्यश्रुतम्, आगमतो भावश्रुतम्, नोआगमतो भावश्रुतं चेत्येतत्त्रितयं कथं पृथगुपपद्यते ? इति चेत् । उच्यते–अनुपयुक्तस्य श्रुताध्येतुस्तावद् द्रव्यश्रुतं 'आगम त्ति' एकदेशेन समुदायस्य गम्यमानत्वादागमतो भावश्रुतमुच्यते । किम् ?, इत्याह–शुद्ध एव श्रुतोपयोगः, न चरणादिमिश्रः । यदि वा, चरणादिमिश्रेऽपि श्रुतोपयोगे तद्भिन्नश्रुतोपयोगस्य विवक्षा क्रियते । इदमुक्तं भवति–चरणादिमिश्रमपि श्रुतोपयोगं भिन्नं विवक्षितत्वादागमतो भावश्रुतमुच्यत इति ॥ ८८३ ॥

तर्हि नोआगमतो भावश्रुतं किम् ?, इत्याह—

[2]चरणाइसमेयम्मि उ उवओगो जो सुए न तओ समए । नोआगमो त्ति भण्णइ नोसद्दो मीसभावम्मि ॥८८४॥

चरणादिसमेते तु श्रुते यश्चरणादिमिश्र उपयोगस्तकोऽसौ समयप्रसिद्धया नोआगमतो भावश्रुतमुच्यते । नोशब्दश्चेह मिश्रवचन इति । निषेधवचनस्तु नोशब्दोऽत्र नेष्यते, यतोऽसौ सर्वनिषेधवचनो वा स्यात्, देशनिषेधवचनो वा ? ॥ ८८४ ॥

तत्र सर्वनिषेधवचनत्वे नोशब्दस्य दोषमाह–

[3]सव्वनिसेहे दोसो सव्वसुयमणागमो पसज्जेज्जा । होज्जा वाऽणागमओ सुयवज्जमणागमसुयं तु ॥८८५॥

---

१ आगमतः श्रुतोपयोगः शुद्ध एव न चरणादिसंमिश्रः । मिश्रेऽपि वा विवक्षा श्रुतस्य चरणादिभिन्नस्य ॥ ८८३ ॥ X क्षिप्तचादा-।

२ चरणादिसमेते तूपयोगो यः श्रुते सकः समये । नोआगम इति भण्यते नोशब्दो मिश्रभावे ॥ ८८४ ॥

३ सर्वनिषेधे दोषः सर्वश्रुतमनागमः प्रसज्येत । भवेद् वाऽनागमतः श्रुतवर्जमनागमश्रुतं तु ॥ ८८५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वनिषेधवचने नोशब्देऽत्र गृह्यमाणे दोषः प्रसज्यते । कः ?, इत्याह– 'सव्वसुयमित्यादि' नोआगमतो भावश्रुतमिति कोऽर्थः ?– अनागमः सर्वमपि यद् भावश्रुतमिति– सर्वनिषेधवाचकत्वे नोशब्दस्य सर्वस्यापि भावश्रुतस्याऽऽगमत्वनिषेधः स्यादिति भावः। अयुक्तं चैतत्, श्रुतस्यागमत्वेन सुप्रतीतत्वात् । अथवा, सर्वनिषेधवाचके नोशब्दे नोआगमतो भावश्रुतमित्ययमर्थः स्यात् । कः ? इत्यत्रोच्यते– अनागमतोऽनागमत्वात् श्रुतवर्जं मत्यादिचतुष्टयात्मकं यदनागमरूपं ज्ञानं तत् श्रुतं भावश्रुतं भवेदिति– अश्रुतरूपस्यापि मत्यादिज्ञानचतुष्टयस्य श्रुतप्रसङ्गः स्यादिति भावः ॥ ८८५ ॥

देशनिषेधवचनेऽप्यत्र नोशब्दे दूषणमाह—

देसे[1][2]निसेहे सयलं नोआगमओ सुयं न पावेज्जा । भिन्नं पि व तं देसो चरणाईणं पसज्जेज्जा ॥ ८८६ ॥

देशनिषेधवचने नोशब्दे सकलमाप्याचारादि श्रुतं नोआगमतो भावश्रुतं न प्राप्नुयात्– न स्यात्, किन्तु तदेकदेश एव नोआगमतो भावश्रुतं स्यादित्यर्थः । सर्वश्रुतस्य चैतदिष्यते, समस्तस्यापि द्वादशाङ्गगणिपिटकस्य ज्ञान-दर्शन-चारित्रपर्यायपिण्डात्मकत्वात् नोआगमत्वेन सिद्धान्ते रूढत्वात् ; एतच्च मिश्रवचन एव नोशब्दे घटते, नान्यथेति भावः । अत्रैकदेशनिषेधपक्षे दूषणान्तरमाह– 'भिन्नं पि वेत्यादि' 'वा' इत्यथवा, भिन्नमपि पृथग्भूतमपि सत् तद् भावश्रुतं चरणादीनामेकदेशः प्रसज्येत; अभिन्नदेशं चेष्यते तच्चरणादिभिः सह, घात्वज्जनकपिशवर्णकवत् ; अन्यथा संकरैकत्वादिदोषप्रसङ्गादिति ॥ ८८६ ॥

किञ्च, देशनिषेधको नोशब्द एकदेशवाचकः, तत्र चापरोऽपि दोषः । कः ?, इत्याह—

[3]होज्ज व नोआगमओ सुओवउत्तो वि जं स देसम्मि । उवजुज्जइ न उ सव्वे तेणायं मीसभावम्मि॥८८७

यः श्रुतोपयुक्तः पूर्वमागमतो भावश्रुतमुक्तः, सोऽपि नोशब्दस्य देशवचनत्वे नोआगमतो भावश्रुतं भवेत् । कुतः ?, इत्याह– यद् यस्मात् स श्रुतैकदेश एवोपयुज्यते, न तु सर्वस्मिन्नपि श्रुते, सर्वस्यापि श्रुतस्याऽनन्ताभिलाप्यार्थविषयत्वात्, एतदुपयोगस्य चैकदाऽसंभवात् । ततश्चैकदेशवचनत्वे नोशब्दस्याऽयं नोआगमः । तस्माद् येनैवं सति आगम-नोआगमभावश्रुतयोरविशेषः प्राप्नोति, तेनाऽयं नोशब्दो मिश्रभावे ग्राह्य इति ॥ ८८७ ॥

---

१ क.ख. 'न प्र' । २ देशनिषेधे सकलं नोआगमतः श्रुतं न प्राप्नुयात् । भिन्नमपि वा तद् देशश्चरणादीनां प्रसज्येत ॥ ८८६ ॥

३ भवेद् वा नोआगमतः श्रुतोपयुक्तोऽपि यत् स देशे । उपयुज्यते न तु सर्वस्मिन् तेनाऽयं मिश्रभावे ॥ ८८७ ॥

अथ प्रेरकाभिप्रायमाशङ्कमान आह—

[4]आह नणु मीसभावे नाभिहिओ, अभिहिओ य नोसद्दो । देसे तदन्नभावे दव्वे किरियाए भावे य ॥८८८॥

आह– प्रतिषेधवाचकत्वाद् नोशब्दो मिश्रभावे न क्वचिदाभिहितः । किं तर्हि ?, देशादिषु पञ्चस्वर्थेष्वभिहितः । तत्र देशे नोघटो घटैकदेश उच्यते, यतो घटैकदेशस्तावदघटो न वक्तव्यः, नापि घटः, किं तर्हि ?, नोघटः । तथाहि– घटैकदेशस्य ग्रीवादेरघटत्वे तदन्यदेशानामपि तद्वदेवाऽघटत्वात् सर्वघटाभावप्रसङ्गः, एवं पटै-शकटादावप्यभावप्रसङ्गेन सर्वशून्यतापत्तिः । नापि घटैकदेशो घटः, एवं हि प्रत्यवयवं घटप्राप्त्यैकस्मिन्नपि घटे घटबाहुल्यापत्तिः, तथा च सत्येकघटविषयप्रवृत्ति-निवृत्त्यादिव्यवहारोच्छेदप्रसङ्गः । तस्मात् पारिशेष्याद् घटैकदेशो नोघट एवोच्यते, पर्यायशब्दत्वादनयोः । तदन्यभावेऽपि नोशब्दो दृश्यते, यथा 'नोघटः' इत्युक्ते तदन्यः पटादिः प्रतीयते, यथा 'नो ब्राह्मणः' इत्यभिहिते क्षत्रियादिर्गम्यते । द्रव्ये तु नोशब्दो घटैकदेशवचनादिः– नो घटः, नो पटः, नो स्तम्भ इत्यादिघटाद्येकदेशवाचक इत्यर्थः । ननु देशवाचकादस्य को भेदः ?, इति चेत् । उच्यते– तत्र घटादिसंबद्ध एव तदेकदेशो नोघटादिरुक्तः, अत्र तु स एव घटाद्येकदेशो ग्रीवादिः पृथग्भूतो रथ्यादिपतितः स्वतन्त्र एव गृह्यते । स च घटादेः पार्थक्येन वर्तमानत्वात् पृथगेव स्वतन्त्रं द्रव्यम्, इति द्रव्ये नोशब्दः । क्रियानिषेधवचनो नोशब्दः– 'नो पचति, नो पक्तव्यमित्यादि । भावनिषेधे तु नोशब्दो 'नो शय्यते, नो स्थीयते' इत्यादि । भाव-क्रिययोश्च विशेषः सिद्ध-साध्यतादिरूपः कोऽपि शब्दशास्त्रादिगतो बोद्धव्यः । इत्येवं विवक्षावशाद् देशादिष्वर्थेषु दृष्टो नोशब्दः, न तु मिश्रभाव इति ॥ ८८८ ॥

अत्रोत्तरमाह—

[5]सच्चमयं देसाईसु तहवत्थवसेण सद्दविणिओगो । अभियत्था य निवाया जुज्जइ तो मीसभावे वि ॥८८९॥

सत्यम्, देशप्रतिषेधादिवचनोऽयं नोशब्दः, तथाप्यर्थवशाच्छब्दानां विनियोगः– यो यत्राऽर्थो घटते, तस्मिन्नर्थे तत्र ते प्रयुज्यन्त इत्यर्थः। आह– नन्वेकस्यापि शब्दस्य किमनेकार्था विद्यन्ते, येनैवमुच्यते ?, इत्याशङ्क्याह– द्योतकत्वेनापरिमितार्थाश्च निपाता इति मिश्रवचनोऽपि प्रयुज्यते नोशब्दः, न किञ्चित् क्षूयत इति ॥ ८८९ ॥

---

१ आह ननु मिश्रभावे नाभिहितः, अभिहितश्च नोशब्दः । देशे तदन्यभावे द्रव्ये क्रियायां भावे च ॥ ८८८ ॥ २ क.ग. 'त्वाभा' । ३ क.ग. 'टक' ।

४ क.ख.ग. 'तारू' । ५ सत्यमयं देशादिषु तथाऽप्यर्थवशेन शब्दविनियोगः । अभितार्थाश्च निपाता युज्यते ततो मिश्रभावेऽपि ॥ ८८९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथवा, देशवचनोऽपि भवत्वत्र नोशब्दः, न कश्चिद् दोषः, इति दर्शयन्नाह—

[1]अविसेसियसंमिस्सोवओगदेसु त्ति वा सुयं काउं । नोआगमभावसुए नोसद्दो होज्ज देसे वि ॥ ८९० ॥

अविशेषितश्चासौ ज्ञान-दर्शन-चारित्राणां परिपूर्णघटादिरिवाऽखण्डः संमिश्रोपयोगश्चाविशेषितसंमिश्रोपयोगस्तस्य घटादेर्ग्रीवादिरिव श्रुतं देश एकदेश इति कृत्वा नोआगमतो भावश्रुते विचार्ये नोशब्दो देशेऽपि युज्यते । इदमुक्तं भवति– यथा सामान्येन परिपूर्णघटादेरिहाऽखण्डस्यैकदेशो ग्रीवादिर्नोघट उच्यते, एवमविशेषितभेदस्य ज्ञान-क्रियापरिणामरूपस्याऽखण्डस्य वस्तुनः श्रुतमेकदेश इति कृत्वा ज्ञान-क्रियापरिणामो नोआगमतो भावश्रुतमिति स्थितम् ॥ ८९० ॥

अथ मतान्तरमुपदर्श्य परिहरन्नाह—

[2]नोआगमओ केई सद्दसहायमुवओगमिच्छंति । नणु सुतरमागमत्तं हि दव्व-भावागमे जुत्तं ॥ ८९१ ॥

केचिदाचार्याः शब्दसहायं श्रुतोपयोगं नोआगमतो भावश्रुतमिच्छन्ति । अयमभिप्रायः– श्रुतोपयोगपूर्वकं ब्रुवाणस्य यः श्रुतोपयोगसहितः शब्दः स नोआगमतो भावश्रुतम् । तत्र किलोपयोग-शब्दसमुदाये उपयोगलक्षणस्याऽऽगमस्यैकदेशत्वात्, शब्दनिरपेक्षं तूपयोगमात्रमागमतो भावश्रुतमिति । एतच्चायुक्तमिति दर्शयति– 'नण्वित्यादि' नन्वत्र हि स्फुटं श्रुतोपयोगो भावागमः, शब्दस्तु द्रव्यागमः, इति सुतरामागमत्वमेव युक्तम् ; आगमत एव श्रुतं युज्यते, न तु नोआगमत इत्यर्थः । यदि हि केवलोऽपि श्रुतोपयोग आगम उच्यते, तर्हि द्वितीये शब्दलक्षणे द्रव्यागमे मिलिते सुतरामयमागम एव युज्यते, न तु नोआगमः, आगमा-ऽनागमसमुदाय एवं तस्य युज्यमानत्वादिति भावः ॥ ८९१ ॥

पराभिप्रायमेवाशङ्क्य निराचिकीर्षुराह–

[3]अह नागमो त्ति सद्दो नोआगमथा य तदहियत्तणओ । आगमओ दव्वसुयं किह सद्दो नागमो जइ सो ? ॥८९२॥

अथ परो मन्येत– शब्द आगमो न भवति, तत उपयोगस्य तदधिकत्वादनागमरूपशब्दाधिकत्वाद् नोआगमता, आगमा-ऽनागमसमुदाये आगमस्यैकदेशत्वाद् नोआगमत्वमित्यभिप्रायः । अत्र सूरिराह– हन्त ! यद्यसौ शब्द आगमो न भवति तर्ह्यागमतो द्रव्यश्रुतं

१ अविशेषितसंमिश्रोपयोगदेश इति वा श्रुतं कृत्वा । नोआगमभावश्रुते नोशब्दो भवेद् देशेऽपि ॥ ८९० ॥ २ क.ग. 'देसो त्ति' ।

३ नोआगमतः केचित् शब्दसहायमुपयोगमिच्छन्ति । ननु सुतरामागमत्वं हि द्रव्य-भावागमयोर्युक्तम् ॥ ८९१ ॥ ४ घ.छ. 'वं यु' ।

५ अथ नागम इति शब्दो नोआगमता च तदधिकत्वतः । आगमतो द्रव्यश्रुतं कथं शब्दो नागमो यदि सः ? ॥ ८९२ ॥ (x न कथमेव)

स्यात् ? । सुप्रतीतमप्यस्यैत्थमागमतो द्रव्यश्रुतत्वं न स्यात्, अनागमत्वात् । तस्माद् द्रव्यत आगम एवाऽयम्, अतो द्रव्यागमसहायो भावागम आगमत एव भावश्रुतम्, न तु नोआगमत इति स्थितम् ॥ ८९२ ॥

अथान्यदपि मतान्तरमुपन्यस्य दूषयति—

[1]अन्ने नोआगमओ सामित्ताणासियं सुयं बेंति । जइ न सुयमणुवओगे नणु सुयरमणासियं नत्थि ॥८९३॥

अन्ये तु केचनाऽप्याचार्याः स्वामिनमाश्रितं श्रुतोपयोगं भावश्रुतं ब्रुवते, स्वाम्यनाश्रितं तु तमेव नोआगमतो भावश्रुतं ब्रुवते, एतच्चातिफल्गवेवेति दर्शयति– 'जइत्यादि' यद्यनुपयुक्तेऽपि वक्तरि श्रुतं नोक्तम्, किन्तु विशिष्टेऽपि तस्मिन् स्वामिनि द्रव्यश्रुतमेव पूर्वमभिहितम् ; मूढ ! तर्हि सुतरामेवाऽनाश्रितं भावश्रुतं नास्ति, स्वामिनमन्तरेण पुस्तकादिलिखिते श्रुते उपयोगस्य दूरोत्सारितत्वात्, उपयोगमन्तरेण च भावश्रुतस्य सर्वथाऽसत्त्वात् ; 'स्वाम्यनाश्रितं च श्रुतं क्वाप्यस्ति' इति प्रतिपादयितुर्महासाहसिकत्वमिति यत् किञ्चिदेतदिति । तदेवमुक्तं नोआगमतोऽपि भावश्रुतम् ॥ ८९३ ॥

अथ श्रुतस्यैकार्थिकनामान्याह—

[2]सुय-सुत्त-गंथ-सिद्धंत-सासणे आण-वयण उवएसो । पण्णवण आगमो वि य एगट्ठा पज्जया सुत्ते ॥८९४॥

एतेषां च नाम्नामर्थः प्रागतिदेशेनोक्त एवेति । तदेवं विहितः श्रुतस्यापि नामादिन्यासः ॥ ८९४ ॥

अथ स्कन्धस्य तमभिधातुमाह—

[3]खंधपएसणुवउत्तो वत्ताऽऽगमओ स दव्वखंधो उ । नोआगमओ जाणय-भव्वसरीरा-ऽइरित्तोऽयं ॥८९५॥

इहापि नाम-स्थापने सुखप्ररूपणीयत्वाद् नोक्ते । द्रव्यस्कन्धस्त्वागमतः स्कन्धपदेऽनुपयुक्तो वक्ता । नोआगमतस्तु ज्ञशरीरद्रव्यस्कन्धः, भव्यशरीरद्रव्यस्कन्धः, तदुभयव्यतिरिक्तद्रव्यस्कन्धश्चेत्येवं त्रिविधोऽयमिति ॥ ८९५ ॥

तत्र व्यतिरिक्तद्रव्यस्कन्धः सचित्तादिभेदात् पुनरपि त्रिविध इति दर्शयति—

१ अन्ये नोआगमतः [illegible]स्वाम्याश्रितं श्रुतं ब्रुवन्ति । यदि न श्रुतमनुपयोगे ननु सुतरामनाश्रितं नास्ति ॥ ८९३ ॥

२ श्रुत-सूत्र-ग्रन्थ-सिद्धान्त-शासनानि आज्ञा-वचने उपदेशः । प्रज्ञपनमागमोऽपि चैकार्थाः पर्यायाः सूत्रे ॥ ८९४ ॥ x(न भावश्रुते)

३ स्कन्धपदेऽनुपयुक्तो वक्ताऽऽगमतः स द्रव्यस्कन्धस्तु । नोआगमतो ज्ञायक-भव्यशरीरा-ऽतिरिक्तोऽयम् ॥ ८९५ ॥ + सत्यं-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]सचित्तो अचित्तो मीसो य समासओ जहासंखं । दुपयाई दुपएसाइओ य सेणाइदेसाई ॥ ८९६ ॥

व्यतिरिक्तद्रव्यस्कन्धः समासतः संक्षेपेण तावत् सचित्ता-ऽचित्त-मिश्रभेदात् त्रिविधः । स च यथासंख्यं द्विपदादिर्द्रष्टव्यः, तथाहि– द्विपदा-ऽपद-चतुष्पदरूपः सचित्तस्कन्धः । तत्र द्विपदं मनुष्य-शुक-सारिकादि, अपदं दाडिमा-ऽऽम्र-बीजपूरकादि, चतुष्पदं तु गवादि । द्विप्रदेशिकादिरनन्ताणुकस्कन्धपर्यवसानोऽचित्तस्कन्धः सेनाया हस्त्य-श्व-रथ-पदाति-खड्ग-कुन्ताद्यात्मकः पाश्चात्य-मध्यमा-ऽग्रदेशरूपो मिश्रस्कन्धः । आदिशब्दाद् ग्राम-नगराद्येकदेशपरिग्रहः ॥ ८९६ ॥

अथवा व्यतिरिक्तस्कन्धस्य प्रकारान्तरेण त्रैविध्यमाह—

[2]अहवा कसिणो [×]अकसिणो अणेगदव्वो स एव विण्णेओ । देसाऽवचिओवचिओ अणेगदव्वो विसेसोऽयं ॥८९७॥

अथवा स एव व्यतिरिक्तस्कन्धोऽन्यथा त्रिविधो विज्ञेयः, तद्यथा– कृत्स्नस्कन्धः, अकृत्स्नस्कन्धः, अनेकद्रव्यस्कन्धश्चेति । यस्मादन्यो बृहत्तरः स्कन्धो नास्ति स कृत्स्नः परिपूर्णः स्कन्धः कृत्स्नस्कन्धः, स च हयस्कन्धः, गजस्कन्धः, नरस्कन्ध इत्यादि । आह– यद्येवम्, प्रकारान्तरमसिद्धम्, सचित्ततुरङ्गमादिस्कन्धस्यैव संज्ञान्तरेणोक्तत्वात् । नैवम्, यतः प्राक् सचित्तस्कन्धाधिकारात् तथाऽसंभविनोऽपि बुद्ध्या निष्कृष्य जीवा एवोक्ताः, इह तु जीव-तदधिष्ठितशरीरावयवलक्षणः समुदायः कृत्स्नस्कन्धत्वेन विवक्षितः, अतोऽभिधेयभेदात् सिद्धं प्रकारान्तरत्वम् । अस्त्येवम्, केवलं हयादिस्कन्धस्य कृत्स्नत्वं नोपपद्यते, तदपेक्षया गजादिस्कन्धस्य बृहत्तरत्वात् । नैतदेवम्, यतोऽसंख्येयप्रदेशात्मको जीवः, तदधिष्ठिताश्च शरीरपुद्गला इत्येवंभूतः समुदाय एव हयादिस्कन्धत्वेन विवक्षितः, जीवस्य चासंख्येयप्रदेशात्मकतया सर्वत्र तुल्यत्वाद् गजादिस्कन्धस्य बृहत्तरत्वमसिद्धम् । यदि हि जीवप्रदेश-पुद्गलसमुदायः सामस्त्येन वर्धेत, तदा स्याद् गजादिस्कन्धस्य बृहत्त्वम्, तच्च नास्ति, समुदायस्य वृद्ध्यभावात्, केवलपुद्गलवृद्धि-हान्यो-श्चेहाऽविवक्षितत्वात्, इति सर्वत्र हयादौ कृत्स्नस्कन्धत्वं न विरुध्यते । अन्ये तु पूर्वं सचित्तस्कन्धविचारे जीव-तदधिष्ठितशरीरपुद्गलस-मुदायः सचित्तस्कन्धः, अत्र तु शरीराद् बुद्ध्या पृथक् कृतो जीव एव केवलः कृत्स्नस्कन्ध इति व्यत्ययं व्याचक्षते । तदत्र व्याख्याने प्रेर्यमेव नास्ति, हय-गजादि-जीवानां प्रदेशतो हीनाधिक्याभावेन कृत्स्नस्कन्धत्वस्य सर्वत्राविरोधादिति ।

---

१ सचित्तोऽचित्तो मिश्रश्च समासतो यथासंख्यम् । द्विपदादिर्द्विप्रदेशादिकश्च सेनादिदेशादिः ॥ ८९६ ॥(× 5 क०-1)

२ अथवा कृत्स्नोऽकृत्स्नोऽनेकद्रव्यः स एव विज्ञेयः । देशाऽपचितोपचितोऽनेकद्रव्यो विशेषोऽयम् ॥ ८९७ ॥

अथाऽकृत्स्नस्कन्ध उच्यते– यस्मादन्यो बृहत्तरः स्कन्धोऽस्ति, सोऽपरिपूर्णत्वादकृत्स्नस्कन्धः, स च द्विप्रदेशिकादिर्यावत् सर्वो-त्कृष्टानन्तपरमाणुसन्ततिनिष्पन्न एकेन परमाणुना न्यूनस्तावद् विज्ञेयः । उत्कृष्टानन्ताणुस्कन्धापेक्षया ह्येकपरमाणुन्यूनोत्कृष्टानन्ताणु-कोऽकृत्स्नस्कन्धः, तदपेक्षया तु परमाणुद्वयन्यूनोत्कृष्टानन्ताणुकोऽकृत्स्नस्कन्धः । एवमेकैकपरमाणुहान्या तावद् नेयं यावत् त्रिप्रदेशिक-स्कन्धापेक्षया द्विप्रदेशिकस्कन्धोऽकृत्स्नस्कन्धः । अत एव प्रागुक्ताचित्तस्कन्धादस्य भेदः; पूर्वं हि द्विप्रदेशिकादेः परिपूर्णोत्कृष्टानन्ता-णुस्कन्धपर्यन्तस्य सर्वस्याप्यचित्तस्कन्धस्य सामान्येन संग्रहात् ; अत्र त्वेकः परिपूर्णोत्कृष्टानन्ताणुको न संगृह्यते, तस्य कृत्स्नस्कन्ध-त्वादिति ।

अथानेकद्रव्यस्कन्ध उच्यते– अनेकैः सचित्ता-ऽचित्तलक्षणैर्द्रव्यैर्निष्पन्नः स्कन्धोऽनेकद्रव्यस्कन्धः । स च हय-गजादिस्कन्ध एव । कथंभूतः ?, इत्याह– 'देसोऽवचिओवचिओ त्ति' अपचितश्चासावुपचितश्चापचितोपचितः, देशेऽपचितोपचितो देशापचितोपचितः । इदमुक्तं भवति– देशे नख-दशन-केशादिलक्षणेऽपचितो जीवप्रदेशैर्विरहितो देशापचितः, अन्यस्मिंस्तु पृष्ठ-हृदय-बाहु-वादिलक्षणे देशे उपचितो जीवप्रदेशैर्व्याप्तो देशोपचितः– विशिष्टैकपरिणामपरिणतसचेतना-ऽचेतनदेशसमुदायात्मको हयादिस्कन्धोऽनेकद्रव्यस्कन्ध इत्यर्थः । आह– यद्येवम्, कृत्स्नस्कन्धादस्य को विशेषः ? । उच्यते–तत्र किल हयादिर्यावानेव जीवप्रदेशैर्व्याप्तस्तावानेव कृत्स्नस्कन्ध-त्वेन विवक्षितः, न तु जीवप्रदेशाव्याप्तनखाद्यपेक्षयापि ; अत्र तु नखादियुक्तोऽनेकद्रव्यस्कन्धः, इति विशेषः । तर्हि पूर्वोक्ताद् मिश्र-स्कन्धादस्य को भेदः ? । उच्यते– तत्राऽश्व-गजादिजीवानां खड्गाद्यजीवानां च पृथग्व्यवस्थितानां समूहकल्पनया मिश्रस्कन्धत्वमुक्तम्, अत्र तु जीवप्रयोगतो विशिष्टैकपरिणामपरिणतानां सचेतना-ऽचेतनद्रव्याणामनेकद्रव्यस्कन्धत्वम्, इति भेदः । अत एवाऽऽह– 'विसेसो-ऽयं' इति । कृत्स्नस्कन्धाद् मिश्रस्कन्धाच्चायमनन्तरोक्तोऽस्यानेकद्रव्यस्कन्धस्य विशेषो भेद इति । तदेवमुक्तो द्रव्यस्कन्ध इति ॥८९७॥

अथ भावस्कन्धमाह—

[1]आगमभावक्खंधो खंधपयत्थोवओगपरिणामो । नोआगमओ भावम्मि नाण-किरिया-गुणसमूहो ॥८९८॥

आगमतो भावस्कन्धः । कः ?, इत्याह– स्कन्धपदार्थोपयोगपरिणामः । नोआगमतस्तु भावस्कन्धो ज्ञान-क्रिया-गुणसमूहः । ज्ञानमत्रावश्यक-श्रुत-स्कन्धावबोधोपयोगलक्षणम्, क्रिया तदुक्तसामाचारीकरणरूपा, गुणास्तु मूलगुणो-त्तरगुणभेदभिन्नाः, तेषां समूहः समुदायो मीलको ज्ञान-क्रिया-गुणसमूह इति ॥ ८९८॥

---

१ आगमभावस्कन्धः स्कन्धपदार्थोपयोगपरिणामः । नोआगमतो भावे ज्ञान-क्रिया-गुणसमूहः ॥ ८९८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

स च ज्ञान-क्रिया-गुणसमूहः कः ?, इत्याह—

सामाइयाइयाणं छण्हज्झयणाण सो समावेसो । नोआगमो त्ति भण्णइ नोसद्दो मीसभावम्मि ॥८९९॥

स च ज्ञान-क्रिया-गुणसमूहोऽत्र वक्ष्यमाणस्वरूपाणां सामायिकादीनां षण्णामध्ययनानां समावेशः समुदाय उच्यते, अस्यैव ज्ञान-क्रिया-गुणमयत्वात् । अयं च नोआगमो भण्यते । कुतः ?, इत्याह– यतो नोशब्दो मिश्रभावे वर्तते, मिश्रश्चैष ज्ञान-क्रिया-गुणोपयोग इति । तदेवमुक्तो भावस्कन्धोऽपि ॥८९९॥

अथ स्कन्धस्यैकार्थिकनामान्याह—

गण-काय-निकाए य खंधे वग्गे तहेव रासी य । पुंजे पिंडे नियरे संघाए आउल समूहे ॥९००॥

एषामपि स्कन्धैकार्थनाम्नामर्थः प्रागतिदेशतः प्रोक्त एवेति । तदेवमावश्यकस्य श्रुतस्य स्कन्धस्य च विहितो नामादिन्यासः । अथास्य पदत्रयस्यापि समास उच्यते । षण्णां श्रुतविशेषाणां स्कन्धः श्रुतस्कन्धः, आवश्यकं च तत् श्रुतस्कन्धश्चावश्यकश्रुतस्कन्धः । अथवा, आवश्यकं च तत् श्रुतं चावश्यकश्रुतम्, तस्य षडध्ययनसमुदायात्मकः स्कन्ध आवश्यकश्रुतस्कन्ध इति । उक्तं शास्त्राभिधानम् ॥ ९०० ॥

अथ सामायिकाद्यध्ययनानामर्थाधिकारदर्शनार्थं प्रस्तावनामाह–

किं पुण छक्कज्झयणं, जेण च्छलत्थाहिगारविणिउत्तं । सामाइयाइयाणं ते य इमे च्छ ज्जहासंखं ॥९०१॥

आह–किं पुनरिह कारणम्, येन षडध्ययनमिदमावश्यकम्–षड् अध्ययनानि यत्र तत् षडध्ययनमिति समासः ? । अत्रोच्यते–येन षड्भिरर्थाधिकारैर्विनियुक्तं निबद्धम् । ते च षडर्थाधिकाराः सामायिकादीनां षण्णामध्ययनानां यथासंख्यमेते द्रष्टव्या इति ॥९०१॥

के पुनस्ते ?, इत्याह—

---

१ सामायिकादिकानां षण्णामध्ययनानां स समावेशः । नोआगम इति भण्यते मोशब्दो मिश्रभावे ॥ ८९९ ॥

२ गण-काय-निकायाश्च स्कन्धो वर्गस्तथैव राशिश्च । पुञ्जः पिण्डो निकरः संघात आकुलः समूहः ॥ ९०० ॥ ३ 'काए अ निकाए खं' इत्यनुयोगद्वारसूत्रे ।

४ ध. छ.'मूहो' । ५ किं पुनः षडध्ययनं, येन षडर्थाधिकारविनियुक्तम् । सामायिकादिकानां ते चेमे षट् यथासंख्यम् ॥ ९०१ ॥

सावज्जजोगविरई उक्कित्तण गुणवओ य पडिवत्ती । खलियस्स निंदणा वणतिगिच्छ गुणधारणा चेव॥९०२॥

सावद्ययोगविरतिरर्थाधिकारः सामायिकाध्ययनस्य । अर्हतां गुणोत्कीर्तनमर्थाधिकारश्चतुर्विंशतिस्तवाध्ययनस्य । गुणवतो गुरोर्वन्दनकदानादिपूजाविशेषरूपा प्रतिपत्तिरर्थाधिकारो वन्दनाध्ययनस्य । श्रुत-शीलस्खलितनिन्दनार्थाधिकारः प्रतिक्रमणाध्ययनस्य । चारित्रात्मनो व्रणचिकित्सा–अपराधव्रणसंरोहणमर्थाधिकारः कायोत्सर्गाध्ययनस्य । व्रतभङ्गातिचारोपचितकर्मविशरणार्थमनशनादिगुणधारणाऽर्थाधिकारः प्रत्याख्यानाध्ययनस्येति । तदेवमावश्यक-श्रुत-स्कन्धलक्षणस्य पदत्रयस्य विहितो नामादिन्यासः । कृतं च षडर्थाधिकारभणनलक्षणं समुदायार्थनिरूपणम् ॥ ९०२ ॥

अथाध्ययनस्य पूर्वप्रतिज्ञातो नामादिन्यासो वक्तव्यः । स चावसरप्राप्तोऽपि नोच्यते, यत उपक्रमाद्यनुयोगद्वारक्रमागतानामेव सामायिकादीनां षण्णामप्यध्ययनानां पृथक् पृथगोघनिष्पन्ने निक्षेपे लाघवार्थमिहैवाग्रे वक्ष्यते; एतदेवाह—

दारक्कमागयाणं वीसुं वीसुमिहमोहनिप्फन्ने । अज्झयणाणं नासं वक्खामो लाघवनिमित्तं ॥ ९०३ ॥

पातनयैव व्याख्यातेति ॥ ९०३ ॥

अथोक्तमुपसंहरन् वक्ष्यमाणं च संबन्धयन्नाह—

आवस्सयस्स एसो पिंडत्थो वण्णिओ समासेणं । एत्तो एक्केक्कं पुण अज्झयणं वण्णयिस्सामि ॥९०४॥

इत्येवं पूर्वोक्तप्रकारेण 'आवश्यकश्रुतस्कन्धः' इति सान्वर्थशास्त्रनामप्रतिपादनादेवाऽऽवश्यकस्यैष पूर्वोक्तः पिण्डार्थः समुदायार्थः समासेन संक्षेपेण वर्णितः । अथावयवार्थकथननिमित्तमेकैकं सामायिकाद्यध्ययनं वर्णयिष्यामीति । इति समुदायार्थकथनलक्षणे चतुर्थद्वारे प्रसङ्गायाताऽष्टषष्टिगाथादिरूपकार्थः ॥ ९०४ ॥

॥ तदेवमभिहितं समुदायार्थकथनलक्षणं चतुर्थद्वारम् ॥

---

१ सावद्ययोगविरतिरुत्कीर्तनं गुणवतश्च प्रतिपत्तिः । स्खलितस्य निन्दना व्रणचिकित्सा गुणधारणा चैव ॥ ९०२ ॥

२ द्वारक्रमागतानां विष्वग् विष्वगिहौघनिष्पन्ने । अध्ययनानां न्यासं वक्ष्यामो लाघवनिमित्तम् ॥ ९०३ ॥

३ आवश्यकस्यैष पिण्डार्थो वर्णितः समासेन । इत एकैकं पुनरध्ययनं वर्णयिष्यामि ॥ ९०४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अथ '[1]तस्स फल-जोग-मंगल-समुदायत्था तहेव दाराइं' इत्यादिगाथाभणनक्रमायातमुपक्रमाद्यनुयोगद्वारभणनरूपं पञ्चमं द्वारमभिधित्सुः, प्रथमं तावत् सामायिकाध्ययनं वर्णयन्नाह—

[2]तत्थज्झयणं सामाइयं ति समभावलक्खणं पढमं । जं सव्वगुणाहारो वोमं पिव सव्वदव्वाणं ॥९०५॥

तत्र तेषु षट्स्वध्ययनेषु मध्ये समभावेन लक्ष्यते समभावलक्षणं सामायिकाध्ययनं सर्वेषामपि प्रथममाद्यम् । कुतस्तस्य प्राथम्यम् ?, इत्याह— यद् यस्मात् कारणात् सर्वेषामपि मूलो-त्तरगुणानां तदेव सामायिकाध्ययनमाधारः, तस्मिन् सत्येव तद्भावात्, तदभावे च तेषामभावात् । न हि समताशून्ये प्राणिनि क्वापि पारमार्थिकगुणावस्थानमस्ति । यथा केषां किमाधारः ?, इत्याह— व्योम आकाशं तदिव सर्वेषामपि धर्मास्तिकायादिद्रव्याणामिति ॥ ९०५ ॥

अथवा प्राथम्ये तस्य कारणान्तरमाह—

[3]अहवा तब्भेय च्चिय सेसा जं दंसणाइयं तिविहं । न गुणो य नाण-दंसण-चरणब्भहिओ जओ अत्थि ॥९०६॥

अथवा, तद्भेदा एव सामायिकाध्ययनविशेषा एव शेषाणि चतुर्विंशतिस्तवाद्यध्ययनानि । कुतः ?, इत्याह— यद् यस्माद् दर्शन-ज्ञान-चारित्रसामायिकभेदात् त्रिविधं सामायिकम् ; यद् वक्ष्यति— '[4]सामाइयं च तिविहं सम्मत्त सुयं तहा चरित्तं च' इति । अस्मिंश्च भेदत्रये सर्वाऽपि गुणजातिरन्तर्भवति, यस्माद् न ज्ञान-दर्शन-चारित्रेभ्योऽन्यः कश्चनापि चतुर्विंशतिस्तवादिगतो गुणः समस्ति । तदेवं शेषाध्ययनानां तद्भेदत्वात् सामायिकमेवादौ निर्दिष्टमिति ॥ ९०६ ॥

ततः किम् ?, इत्याह—

[5]अणुओगद्दाराइं महापुरस्सेव तस्स चत्तारि । अणुओगो त्ति तदत्थो दाराइं तस्स उ मुहाइं ॥ ९०७ ॥

---

१ गाथा २ । २ क.ग. 'ज्झमद्वा' । ३ तत्राध्ययनं सामायिकमिति समभावलक्षणं प्रथमम् । यत् सर्वगुणाधारो व्योमेव सर्वद्रव्याणाम् ॥ ९०५ ॥

४ क.ख.ग.'थ प्रा' । ५ अथवा तद्भेदा एव शेषा यद् दर्शनादिकं त्रिविधम् । न गुणश्च ज्ञान-दर्शन-चारित्राभ्यधिको यतोऽस्ति ॥ ९०६ ॥

६ सामायिकं च त्रिविधं सम्यक्त्वं श्रुतं तथा चारित्रं च ।

तस्य च सामायिकाध्ययनस्य महापुरस्य द्वाराणीव चत्वार्यनुयोगद्वाराणि भवन्ति । तत्रानुयोगः किमुच्यते ?, इत्याह— तदर्थोऽध्ययनार्थः । आह— नन्वनुयोगो व्याख्यानमुच्यते, तत् कथं तदेवाध्ययनार्थ उच्यते ? । सत्यम् , किन्तु व्याख्यानेऽप्यध्ययनार्थः कथ्यते, अतोऽभेदोपचारात् तदपि तथोच्यत इत्यदोषः । द्वाराणि पुनस्तत्प्रवेशमुखानि ॥ ९०७ ॥

अथैतामेव पुरकल्पनां द्वारकल्पनां चार्थवतीं दर्शयन्नाह—

[1]अकयद्दारमनगरं कएगदारं पि दुक्खसंचारं । चउमूलद्दारं पुण सपडिद्दारं सुहाहिगमं ॥ ९०८ ॥

अकृतद्वारं नगरं संततप्राकारवलयवेष्टितमनगरमेव भवति, जनप्रवेश-निर्गमाभावात् । तथा, कृतैकद्वारमपि हस्त्य-श्व-रथ-जनसंकुलत्वाद् दुःखसंचारं जायते, कार्यातिपत्तये च भवति । कृतचतुर्मूलप्रतोलीद्वारं तु सप्रतिद्वारं सुखाधिगमं सुखनिर्गम-प्रवेशं भवति, कार्याननतिपत्तये च संपद्यत इति ॥ ९०८ ॥

तथा किम् ?, इत्याशङ्क्य निर्दिष्टदृष्टान्तस्योपनयमाह—

[2]सामाइयं[3]महपुरमवि अकयदारं तहेगदारं वा । दुरहिगमं, चउदारं सपडिद्दारं सुहाहिगमं ॥ ९०९ ॥

एवं सामायिकमहापुरमप्यर्थाधिगमोपायभूतद्वारशून्यमशक्याधिगमम्, कृतैकानुयोगद्वारमपि कृच्छ्रेण द्राघीयसा च कालेनाधिगम्यते । विहितसप्रभेदोपक्रमादिद्वारचतुष्टयं पुनरयत्नेनाऽल्पीयसा च कालेनाधिगम्यत इति ॥ ९०९ ॥

कानि पुनस्तान्यनुयोगद्वाराणि ?, इत्याह—

[4]ताणीमाणि उवक्कम-निक्खेवा-ऽणुगम-नयसनामाइं । छ-त्ति-दु-दुविगप्पाइं पभेयओऽणेगभेयाइं ॥९१०॥

तानि चैतान्यनुयोगद्वाराणि, तद्यथा— उपक्रमो वक्ष्यमाणभेदादिस्वरूपः, निक्षेपः, अनुगमः, नयश्चेत्येतैर्नामभिः सनामानि साभिधानानीति ॥

॥ पञ्चमं द्वारोपन्यासद्वारं समाप्तम् ॥

---

१ अकृतद्वारमनगरं कृतैकद्वारमपि दुःखसंचारम् । चतुर्मूलद्वारं पुनः सप्रतिद्वारं सुखाधिगमम् ॥ ९०८ ॥

२ सामायिकमहापुरमप्यकृतद्वारं तथैकद्वारं वा । दुरधिगमं, चतुर्द्वारं सप्रतिद्वारं सुखाधिगमम् ॥ ९०९ ॥ ३ क. ज्ञ. 'यपुरमेवं अ'। ४ क. 'मतिकृ'।

५ तानीमानि उपक्रम-निक्षेपा-ऽधिगम-नयसनामानि । षट्-त्रि-द्वि-द्वि-विकल्पानि प्रभेदतोऽनेकभेदानि ॥ ९१० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अथ 'तब्भेय त्ति' तद्भेदद्वारमाह- 'छ-त्ती'त्यादि' इह यथासंख्यं संबन्धः- उपक्रमः षड्विकल्पः, निक्षेपश्चित्रभेदः, अनुगमो द्विभेदः, नयोऽपि द्विभेदः । प्रभेदतस्तूपक्रमादयोऽनेकभेदाः । एषां च भेद-प्रभेदानां स्वरूपं पुरस्ताद् विस्तरेण वक्ष्यते ॥ ९१० ॥

॥ इति षष्ठं तद्भेदद्वारम् ॥

अथ "निरुत्त त्ति' सप्तमं निरुक्तिद्वारमभिधित्सुराह--

[2]सत्थस्सोवक्कमणं उवक्कमो तेण तम्मि व तओ वा । सत्थसमीवीकरणं आणयणं नासदेसम्मि ॥ ९११ ॥

उप सामीप्ये, 'क्रमु पादविक्षेपे' उपक्रमणं दूरस्थस्य शास्त्रादिवस्तुनस्तैस्तैः प्रतिपादनप्रकारैः समीपीकरणं न्यासदेशानयनं निक्षेपयोग्यताकरणमित्युपक्रमः; उपक्रान्तं हि उपक्रमान्तर्गतभेदैर्विचारितं निक्षिप्यते, नान्यथेति भावः । उपक्रम्यते वा निक्षेपयोग्यं क्रियतेऽनेन गुरुवाग्योगेनेत्युपक्रमः । अथवा, उपक्रम्यतेऽस्मिन् शिष्यश्रवणभावे सतीत्युपक्रमः । यदिवा, उपक्रम्यतेऽस्माद् विनीतविनेयविनयादित्युपक्रमः; विनयेनाऽऽराधितो हि गुरुरुपक्रम्य निक्षेपयोग्यं शास्त्रं करोतीत्यभिप्रायः । तदेवं करणा-ऽधिकरणो-पादानकारकैर्गुरुवाग्यो-गादयोऽर्था विवक्षाभेदतो भेदेनोक्ताः; यदि तु विवक्षया सर्वेऽप्येकैककरणादिकारकवाच्यत्वेनोच्यन्ते, तथापि न दोषः । 'सत्थसमीवीकरणं ति' शास्त्रस्य समीपीकरणं शास्त्रस्य न्यासदेशानयनं निक्षेपयोग्यताकरणमुपक्रम इति सर्वत्र संबध्यत इति ॥ ९११ ॥

अथ निक्षेपस्य निरुक्तिमाह—

[3]निक्खिप्पइ तेण तहिं तओ व निक्खेवणं व निक्खेवो । नियओ व निच्छिओ वा खेवो नासो त्ति जं भणियं ॥९१२॥

निक्षिप्यते शास्त्रमध्ययनो-देशादिकं च नाम-स्थापना-द्रव्यादिभेदैर्न्यस्यते व्यवस्थाप्यतेऽनेन, अस्मिन्, अस्माद् वेति निक्षेपः; गुरुवाग्योगादिविवक्षा तथैव । अथवा, निक्षेपणं शास्त्रादेर्नाम-स्थापनादिभेदैर्न्यसनं व्यवस्थापनमिति निक्षेपः । निशब्द-क्षेपशब्दयोरर्थमाह-- नियतो निश्चितो वा, क्षेपः— शास्त्रादेर्नामादिन्यास इति निक्षेप इति यदुक्तं, भवत्यर्थं परमार्थ इत्यर्थः ॥ ९१२ ॥

अथानुगमनिरुक्तिमाह—

---

१ गाथा २ । २ शास्त्रस्योपक्रमणमुपक्रमस्तेन तस्मिन् वा ततो वा । शास्त्रसमीपीकरणमानयनं न्यासदेशे ॥ ९११ ॥ अति-। + वा-।

३ निक्षिप्यते तेन तस्मिंस्ततो वा निक्षेपणं वा निक्षेपः । नियतो वा निश्चितो वा क्षेपो न्यास इति यद् भणितम् ॥ ९१२ ॥

[1]अणुगम्मइ तेण तहिं तओ [2]अणुगमणमेव वाणुगमो । अणुरूवओ वा जं सुत्तत्थाणमणुसरणं ॥९१३॥

अनुगम्यते व्याख्यायते सूत्रमनेन, अस्मिन्, अस्माद् वेत्यनुगमः, वाच्यार्थविवक्षा तथैव । अथवा, अनुगमनमनुगमः अनुगो वा सूत्रस्य गमो व्याख्यानमित्यनुगमः; यदि वा, अनुरूपस्य घटमानस्याऽर्थस्य गमनमनुगमः । सर्वत्र किमुक्तं भवति ?, इत्याह- यत् सूत्रार्थयोरनुरूपमनुकूलं सरणं संबन्धकरणमित्यनुगम इति ॥ ९१३ ॥

अथ नयनिरुक्तिमाह—

[3]सं नयइ तेण तहिं वा तओऽहवा वत्थुणो व जं नयणं । बहुहा पज्जायाणं संभवओ सो नओ नाम ॥९१४॥

स एव वक्ता संभवद्भिः पर्यायैर्वस्तु नयति गमयतीति नयः; अथवा, नीयते परिच्छिद्यतेऽनेन, अस्मिन्, अस्माद् वेति नयः; अनन्तधर्माध्यासिते वस्तुन्येकांशग्राहको बोध इत्यर्थः । यदिवा, बहुधा वस्तुनः पर्यायाणां संभवाद् विवक्षितपर्यायेण यद् नयनमधिगमनं परिच्छेदनमसौ नयो नाम ॥ ९१४ ॥

॥ इति सप्तमं निरुक्तिद्वारम् ॥

नन्वादावुपक्रमः, तदनन्तरं निक्षेपः, तदनन्तरं चानुगमः, ततोऽप्यनन्तरं नयः, इत्यमीषामनुयोगद्वाराणामित्थं क्रमोपन्यासे किं प्रयोजनम् ?, इत्याशङ्क्य 'कैम-पओयणाइं च वच्चाई' इत्यष्टमं क्रमप्रयोजनद्वारमभिधित्सुराह—

[4]दारक्कमोऽयमेव उ निक्खिप्पइ जेण नासमीवत्थं । अणुगम्मइ नाणत्थं नाणुगमो नयमयविहूणो ॥९१५॥

संबंधोवक्कमओ समीवमाणीय नत्थनिक्खेवं । सत्थं तओऽणुगम्मइ नएहिं नाणाविहाणेहिं ॥ ९१६ ॥

एषामनुयोगद्वाराणामयमेवोपन्यासक्रमः, येन नासमीपस्थमनुपक्रान्तं निक्षिप्यते, न च नामादिभिरनिक्षिप्तमर्थतोऽनुगम्यते,

---

१ अनुगम्यते तेन तस्मिंस्ततोऽनुगमनमेव वाऽनुगमः । अणुनोऽनुरूपतो वा यत् सूत्रा-ऽर्थयोरनुसरणम् ॥ ९१३ ॥ (X S वणु)

२ स नयति तेन तस्मिन् वा ततोऽथवा वस्तुनो वा यद् नयनम् । बहुधा पर्यायाणां संभवतः स नयो नाम ॥ ९१४ ॥ ३ गाथा २ ।

४ द्वारक्रमोऽयमेव तु निक्षिप्यते येन नासमीपस्थम् । अनुगम्यते नाऽन्यस्तं नानुगमो नयमतविहीनः ॥ ९१५ ॥
संबन्धोपक्रमतः समीपमानीय न्यस्तनिक्षेपम् । शास्त्रं ततोऽनुगम्यते नयैर्नानाविधानैः ॥ ९१६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाऽपि नयमतविकलोऽनुगम इति । यतश्च संबन्धरूप उपक्रमः संबन्धोपक्रमस्तेन संबन्धकर्त्रोपक्रमेण समीपमानीय न्यासयोग्यं विधाय न्यस्तनिक्षेपं विहितनाम-स्थापनादिनिक्षेपं सत् शास्त्रं ततोऽर्थतोऽनुगम्यते व्याख्यायते नानाविधानेर्नानाभेदैर्नयैः; तस्मादयमेवानुयोग-द्वारक्रमः ॥ ९१५ ॥ ९१६ ॥

॥ इति क्रमप्रयोजनद्वारं समाप्तम् ॥

॥ तत्समाप्तौ च 'तैरस फल-जोग-' इत्यादि गाथा समाप्ता ॥

इह चोपक्रमो भावोपक्रमतो विस्तरेण पुरस्ताद् वक्ष्यते । तथा, आनुपूर्वी-नाम-प्रमाण-वक्तव्यता-ऽर्थाऽधिकार-समवतारलक्षणैः षड्भिर्भेदैर्विस्तरेणाभिधास्यते । विस्तरवतश्चार्थस्यैदंपर्यमवधारयितुं न शक्नुवन्ति मन्दमतयः, अतस्तदनुग्रहार्थं वक्ष्यमाणभावोपक्रमगतम्, आनुपूर्व्यादिषडर्थगतं च संक्षेपमाह—

[1]गुरुभावोवक्कमणं का परिवाडी कइत्थमज्झयणं । भावम्मि कम्मि वट्टइ किमिदं दव्वं गुणो कम्मं ? ॥९१७॥
जीवगुणोऽजीवगुणो किं नाणं दंसणं चरित्तं वा । पच्चक्खं अणुमाणं ओवम्ममहागमो वावि ? ॥ ९१८ ॥
लोइय लोउत्तरिओ किं सुयमत्थोऽहवोभयं होज्जा । अप्पयओ अणंतरओ परंपरं वागमो कस्स ? ॥९१९॥
किं दिट्ठिवाइयं कालियं व किंवा सुयत्थपरिमाणं । ससमय-परसमयोभयसिद्धंताणं व को वच्चो ? ॥९२०॥
को व समएगदेसो समुदायत्थाहियार इह नियओ । अज्झयणोवक्कमणं कायव्वमिहेवमाईहिं ॥ ९२१ ॥

इह सामायिकाद्यध्ययनार्थं बुभुत्सुना विनेयेन गुरोर्भावोपक्रमो विधेयः, केन पुनः प्रकारेणैष सुप्रसन्नः स्यादिति भावोपक्रम-

---

१ गाथा २ । २ गुरुभावोपक्रमणं का परिपाटी कतिथमध्ययनम् । भावे कस्मिन् वर्तते किमिदं द्रव्यं गुणः कर्म ? ॥ ९१७ ॥
जीवगुणोऽजीवगुणः किं ज्ञानं दर्शनं चारित्रं वा । प्रत्यक्षमनुमानमौपम्यमथाऽऽगमो वापि ? ॥ ९१८ ॥
लौकिको लोकोत्तरिकः किं श्रुतमर्थोऽथवोभयं भवेत् । आत्मतोऽनन्तरतः परम्परातो वागमः कस्य ? ॥ ९१९ ॥
किं दृष्टिवादिकं कालिकं वा किंवा श्रुतार्थपरिमाणम् । स्वसमय-परसमयो-भयसिद्धान्तानां वा को वाच्यः ? ॥ ९२० ॥
को वा समयैकदेशः समुदायार्थाधिकार इह नियतः । अध्ययनोपक्रमणं कर्तव्यमिहैवमादिभिः ॥ ९२१ ॥

संक्षेपार्थः । परिपाटी– आनुपूर्व्युच्यते । सा च त्रिविधा वक्ष्यते, तद्यथा– पूर्वानुपूर्वी, पश्चानुपूर्वी, अनानुपूर्वी चेति । तत्रेहाध्ययने का परिपाटी प्रयोजनवती ?, इति प्रश्ने त्रिविधापीह सप्रयोजनेति वाच्यम् । तथा, पूर्वानुपूर्व्यादिना चिन्त्यमानमिदमध्ययनं कतिथम् ? इति प्रष्टव्यम् । तत्र पूर्वानुपूर्व्या प्रथमं, पश्चानुपूर्व्या षष्ठम्, अनानुपूर्व्या पुनः सातिरेकसप्तभङ्गकशतविषयत्वादनियतमिति वक्ष्यते । इत्यानुपूर्वीसंक्षेपार्थः । नाम पुनरौदयिकादिषड्भावविषयत्वात् षड्विधं वक्ष्यते । तत्र कस्मिन् भावे इदमध्ययनं वर्तते ? इति प्रष्टव्यम् । तत्र च क्षायोपशमिके भावे वर्तत इति वक्ष्यते । इति नामसंक्षेपार्थः । प्रमाणविषयसंक्षेपमाह– 'किमिदमित्यादि' किमिदमध्ययनं द्रव्यम्, गुणः, कर्म वा ? इति चिन्तायां गुण इति वाच्यम् । गुणत्वेऽपि किं जीवगुणः, अजीवगुणः ? इति चिन्तायां जीवगुण इति वक्तव्यम् । जीवगुणत्वेऽपि किं ज्ञानं, दर्शनं, चारित्रं वा ? इति चिन्तायां ज्ञानमिति वक्ष्यते । तदपि किं प्रत्यक्षम्, अनुमानम्, औपम्यम्, आगमो वा ? इति चिन्तायामागम इति वक्ष्यते । आगमत्वेऽपि किमसौ लौकिकः, लोकोत्तरो वा ? इति चिन्तायां लोकोत्तर इति वक्ष्यते । लोकोत्तरत्वेऽपि किं सूत्रागमः, अर्थागमः, उभयागमो वा ?; तथा, किमात्मागमः, अनन्तरागमः, परम्परागमो वा ? इति चिन्तायां तीर्थकराणामर्थत इदमध्ययनमात्मागमः, सूत्रतस्तु गणधराणामात्मागम इत्यादि वक्ष्यते । अपि च, लोकोत्तरागमत्वेऽपि किमिदमध्ययनं दृष्टिवादिकम्, कालिकं वा ? इति चिन्तायां कालिकमिति वाच्यम्– कालवेलावर्जे काले पठ्यत इत्यर्थः । कालिकत्वेऽपि किमस्य सूत्रार्थपरिमाणम् ? इति वाच्यम् । इति प्रमाणसंक्षेपार्थः । स्व-परो-भयसमयानां मध्ये कोऽत्र वक्तव्यः ? इति प्रश्ने स्वसमयोऽत्र वक्तव्यः । इति वक्तव्यतासंक्षेपार्थः । स्वसमयत्वेऽपि कोऽस्य समयैकदेशः समुदायार्थत्वेनाऽधिक्रियते ? इति प्रश्ने, सावद्य-योगविरतिरिहाऽर्थाधिकार इति प्रतिवचनम् । इत्यर्थाधिकारसंक्षेपार्थः । समवतारस्त्वानुपूर्व्यादिषु विहित एवेति । एवमादिभिः प्रकारैरस्याध्ययनस्योपक्रमणं निक्षेपयोग्यताऽऽपादनं कर्तव्यम् । इत्युपक्रमसंक्षेपार्थः । इति सप्तदशगाथार्थः ॥९१७॥९१८॥९१९॥९२०॥९२१॥

अथ पूर्वं यदुक्तम्– 'उपक्रमः षड्भेदः' । तत्र तानेव षड् भेदान् स्वरूपतः प्राह—

[2]नामाई छब्भेओ उवक्कमो दव्वओ सचित्ताई । तिविहो य पुणो दुविहो परिकम्मे वत्थुनासे य ॥ ९२२ ॥

इह नाम-स्थापना-द्रव्य-क्षेत्र-काल-भावोपक्रमभेदादुपक्रमः षड्भेदः । तत्र नाम-स्थापने सुगमे । द्रव्योपक्रमस्त्वागमतः, नोआगमतश्च । तत्रागमत उपक्रमपदार्थज्ञस्तत्रानुपयुक्तः, नोआगमतस्तु ज्ञशरीरद्रव्योपक्रमः, भव्यशरीरद्रव्योपक्रमश्च ।

---

१ ध. छ. 'र्या तु ष' २ नामादिः षड्भेद उपक्रमो द्रव्यतः सचित्तादिः । त्रिविधश्च पुनर्द्विविधः परिकर्मणि वस्तुनाशे च ॥ ९२२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्राद्यभेदद्वयं सुगमम्। तद्व्यतिरिक्तद्रव्योपक्रमस्तु सचित्तादिभेदात् त्रिविधः। तत्र सचित्तद्रव्योपक्रमो द्विपद-चतुष्पदादीनाम्, अचित्तद्रव्योपक्रमो गुड-खण्ड-कुसुम्भादीनाम्, मिश्रद्रव्योपक्रमस्तु तेषामेवाऽऽभरणादियुक्तानां द्विपदादीनाम्। अयं च सचित्तादुपक्रमः प्रत्येकं पुनरपि द्विधा–परिकर्मणि, वस्तुनाशे चेति ॥ ९२२ ॥

तत्र परिकर्म-विनाशयोः स्वरूपमाह–

[1]परिकम्मं किरियाए वत्थूणं गुणविसेसपरिणामो। तदभावे य विणासो दव्वाईणं जहाजोगं ॥ ९२३ ॥

इह परिकर्मोच्यते। किम्?, इत्याह– क्रियया क्रियाविशेषेण यो वस्तूनां गुणविशेषपरिणामो गुणविशेषाधानमित्यर्थः। तद्यथा– पुरुषादीनां घृत-रसायनाद्युपयोगक्रियया, स्नेहमर्दनादिक्रियया च वर्ण-बल-वयःस्तम्भादयः, कर्ण-स्कन्धवर्धनादयश्च क्रियन्ते। केचित् शास्त्र-शिल्प-गन्धर्ववृत्त्यादिकलाऽऽपादनमपि प्रस्तुतोपक्रममाचक्षते; एतच्च विज्ञानविशेषाधानरूपत्वाद् भावोपक्रमो युज्यते; यदि वा, आत्मद्रव्यसंस्कारविवक्षया द्रव्योपक्रमेऽप्यविरोधः। एवं शुक-सारिकादीनामपि शिक्षागुणाधाने भावनीयम्। इत्युक्तः परिकर्मणि द्विपदादीनां सचित्तद्रव्योपक्रमः।

अथ वस्तुनाशोपक्रम उच्यते– 'तदभावे विणासो त्ति' तदभावे वस्त्वभावापादने विनाशो विनाशस्योपक्रम इत्यर्थः, तेषामेव पुरुषादीनां कालान्तरभाविनो विनाशस्य खड्गादिभिरुपक्रम्येदानीमेव क्रियमाणत्वादिति। एवं चतुष्पदानामपि हस्त्य-श्वादीनाम्, अपदानां दाडिमा-ऽऽम्र-कपित्थादीनां परिकर्म-विनाशौ भावनीयाविति। एवं सचित्तद्रव्योपक्रमः। अचेतनस्य तु मणि-मौक्तिक-वस्त्रादेः क्षार-मृत्पुटपाकादिना परिकर्मोपक्रमः, तेनाऽऽघातादिना तु नाशोपक्रमः। मिश्रद्रव्यस्य पुनस्तस्यैव द्विपदादेर्वस्त्रालङ्कारादियुक्तस्य द्विविधोऽप्युपक्रमो भावनीयः। एवं यथा द्रव्यस्योपक्रमः, एवमादिशब्दात् क्षेत्र-कालयोरपि यथायोगं भावनीयः। अत एवोक्तम्–'दव्वाईणं जहाजोगं ति'। तं च क्षेत्र-कालोपक्रमं 'नावाए उवक्कमणं' इत्यादिना स्वत एव वक्ष्यतीति ॥ ९२३ ॥

अत्र पराभिप्रायमाशङ्क्य परिहरन्नाह—

[4]खेत्तमरूवं निच्चं न तस्स परिकम्मणा न य विणासो। आहेयगयवसेण उ करण-विणासोवयारोऽत्थ ॥९२४॥

---

१ परिकर्म क्रियया वस्तूनां गुणविशेषपरिणामः। तदभावे च विनाशो द्रव्यादीनां यथायोगम् ॥ ९२३ ॥ २ क. ग. 'घनघा'। ३ गाथा ९२५। ४ क्षेत्रममूर्तं नित्यं न तस्य परिकर्म न च विनाशः। आधेयगतवशेन तु करण-विनाशोपचारोऽत्र ॥ ९२४ ॥ ग्रां-। +स्नेहन-।

क्षेत्रममूर्तम्, नित्यं च, इति न तस्य परिकर्म-विनाशौ कर्तुं शक्येते; तदाधेयद्रव्यस्य तु जल-भूम्यादेस्तौ सुप्रतीतावेव। ततस्तद्गतयोस्तयोरत्र क्षेत्रे 'मञ्चाः क्रोशन्ति' इत्यादिन्यायादुपचारः क्रियत इति ॥ ९२४ ॥ छ ॥९२४॥

आधेयद्वारेणापि कथं क्षेत्रस्य तौ भवतः?, इत्याह—

[1]नावाए उवक्कमणं हल-कुलियाईहिं वा वि खेत्तस्स। संमज्जभूमिकम्मे पंथतलागाइयाणं च ॥ ९२५ ॥

जलाधारस्य क्षेत्रस्य नावुडुपादिभिरुपक्रमः क्रियते, भूम्याधारस्य तु तस्य हल-कुलिकादिभिः परिकर्मोपक्रमः। तत्र हलं प्रतीतम्, कुलिकं तु दन्तालवच्चिर्यक्कृतकाष्ठे उभयपार्श्वनिखातकाष्ठमयकीलकयोस्तिर्यग्व्यवस्थापिततीक्ष्णलोहपट्टकं हरितादिच्छेदनार्थं क्षेत्रेषु यद् वाह्यते, तल्लाटादिकृषीबलप्रतीतं वेदितव्यम्। एवं संमार्जन-भूमिकर्म-मार्गतडागादीनां च करणेन परिकर्मणि क्षेत्रोपक्रमः। विनाशोपक्रमस्तु क्षेत्रस्य गजबन्धनादिभिर्विज्ञेय इति ॥ ९२५ ॥

अथ कालोपक्रममाह–

[2]जं वत्तणाइरूवो कालो दव्वाण चेव पज्जाओ। तो तक्करणविणासे कीरइ कालोवयारोऽत्थ ॥ ९२६ ॥

यद् यस्मात् कारणात् 'कालश्चेत्येके' इति वचनाद् वर्तनादिरूपः कालो द्रव्याणामेव पर्यायः, न पुनरन्यः कश्चित् समयावलिकादिरूपः, ततस्तत्करण-विनाशयोर्द्रव्यस्य परिकर्म-विनाशयोः सतोरित्यर्थः, अत्रैव तत्पर्याये कालोपक्रमोपचारः क्रियते। इदमुक्तं भवति– इह केचिद् वर्तनादिरूपमेव कालमिच्छन्ति, न पुनः समयादिरूपम्; तत्र तेन तेन द्व्यणुक-त्र्यणुकादिरूपेण परमाण्वादिद्रव्याणां वर्तनं वर्तना, आदिशब्दात् परिणाम-क्रियादिपरिग्रहः, नव-पुराणादिभावेन वस्तूनां परिणमनं परिणामः। अतीता-ऽनागत-वर्तमानलक्षणा तु क्रिया। तदेष वर्तना-परिणाम-क्रियादिरूपः कालो द्रव्याणामेव पर्यायः, नान्यः। ततो द्रव्यस्य परिकर्म-विनाशौ वर्तनादिरूपे तत्पर्यायेऽप्युपचर्येते इति ॥ ९२६ ॥

आह– ननु ये समयादिरूपं कालमिच्छन्ति, तदभिप्रेतस्य समयादिकालस्य कथं परिकर्म-विनाशौ?, इत्याशङ्क्याह—

---

१ नावोपक्रमणं हल-कुलिकादिभिर्वापि क्षेत्रस्य। संमार्जभूमिकर्मणि पथितडागादिकानां च ॥ ९२५ ॥

२ यद् वर्तनादिरूपः कालो द्रव्याणामेव पर्यायः। ततस्तत्करण-विनाशयोः क्रियते कालोपचारोऽत्र ॥९२६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

[1]छायाए नालियाए च परिकम्मं से जहत्थविण्णाणं । रिक्खाइचारेहिं च तस्स विणासो विवज्जासो॥९२७॥

'से' तस्य समया-ऽऽवलिका-घटिका-मुहूर्तादिलक्षणस्य कालस्येदमेव परिकर्म । यत्, किम् ?, इत्याह– यद् यथार्थविज्ञानं यथावत् परिज्ञानम् । कया ?, इत्याह– शङ्कादिप्रतिच्छायारूपया छायया, घटिकारूपया च नाडिकया । विनाशस्तर्हि तस्य कः ?, इत्याह– विपर्यासो वैपरीत्यभवनम्– अनिष्टफलदायकतया परिणमनमित्यर्थः । कैः, इत्याह– ऋक्ष-ग्रहादिचारैः; तथा च वक्तारो भवन्ति– 'अमुकेन नक्षत्रेण, अमुकेन ग्रहेण चेत्थमित्थं च गच्छता विनाशितः कालः' इति । उक्तः कालोपक्रमः ॥ ९२७ ॥

अथ भावोपक्रममाह—

[2]जं परहिययाकूयावधारणमुवक्कमो स भावस्स । तस्सासुभस्स मरुइणि-गणिया-मच्चादओऽभिहिया ॥९२८॥

इह यदिङ्गिताकारादिना परहृदयाकूतस्य परकीयभावस्याऽवधारणं परिज्ञानं स सामान्येन भावोपक्रमः । स च विशेषितो द्विधा– संसारकारणभूतोऽप्रशस्तः, मोक्षनिबन्धनभूतस्तु प्रशस्तः । तत्राऽशुभस्य तस्य भावोपक्रमस्य ब्राह्मणी-वेश्या-अमात्यादयो दृष्टान्ताः प्रतिपादिताः । तद्यथा—

एकस्या ब्राह्मण्यास्तिस्रः पुत्रिकाः । तासां च परिणयनानन्तरं तथा करोमि यथैताः सुखिता भवन्ति, इति विचिन्त्य माता ज्येष्ठदुहितरं प्रत्यवोचत्, यदुत– त्वया वासभवनसमागमे स्वभर्ता कश्चिदपराधमुद्भाव्य मूर्ध्नि पादप्रहारेण हन्तव्यः । हतश्च यदनुतिष्ठति तद् ममाऽऽख्येयम् । कृतं च तया तथैव । सोऽप्यतिस्नेहतरलितमनाः 'अयि प्रियतमे ! पीडितस्ते सुकुमालश्चरणो भविष्यति' इत्यभिधानपूर्वकं तस्याश्चरणोपमर्दनं चकार । अमुं च व्यतिकरं सा मात्रे निवेदितवती । साऽप्युपक्रान्तजामात्रिकभावा हृष्टा दुहितरं प्रत्यवादीत्– पुत्रिके ! यद् रोचते तत् त्वदीयगृहे कुरु त्वम्, न तवाऽवचनकरो भर्ता भविष्यतीति । द्वितीयाऽपि तथैव शिक्षिता । तयापि च तथैव स्वभर्ता शिरसि प्रहतः, केवलमसौ 'नैतत् कुलप्रसूतानां युज्यते' इत्यादि किञ्चित् क्षणमेकमूषित्वा व्युपरतः । तस्मिंश्च व्यतिकरे तया मातुर्निवेदिते प्रोक्तं मात्रा– वत्से ! त्वमपि यथेष्टं[3] तद्गृहे विजृम्भस्व, केवलं तव भर्ता क्षणमेकं मूषित्वा स्थास्यति । एवं

१ छायया नाडिकया च परिकर्म तस्य यथार्थविज्ञानम् । ऋक्षादिचारैश्च तस्य विनाशो विपर्यासः ॥ ९२७ ॥

२ यत् परहृदयाकूतावधारणमुपक्रमः स भावस्य । तस्याशुभस्य ब्राह्मणी-गणिका-ऽमात्यादयोऽभिहिताः ॥ ९२८ ॥ ३ ध. छ. 'ष्टं विजृम्भस्व तद्गृहे के' ।

तथैवाऽपि मातृशिक्षिततया दुहित्रा तथैव प्रहतः स्वभर्ता । केवलमेतेनोच्छलदतुच्छकोपेन 'नूनमकुलीना त्वम्, येनैवं विशिष्टजनानुचितं विधिषे' इत्याद्यभिधाय गाढं कुट्टयित्वा निष्कासिता गृहात् । तया च गत्वा सर्वं मात्रे निवेदितम् । ततस्तया विज्ञातजामातृस्वभावया तत्समीपं गत्वा 'वत्स ! कुलस्थितिरियमस्माकं यदुत– प्रथमसमागमे वध्वा वरस्येत्थं विधातव्यम्' इत्यादि किञ्चिदभिधाय कथमप्युपनीताऽसौ । दुहिता च प्रोक्ता– वत्से ! दुराराधस्ते भर्ता भविष्यति, परमदेवतावदप्रमत्ततया समाराधनीयः । इति ब्राह्मणीदृष्टान्तः ।

अथ गणिकादृष्टान्त उच्यते— एकस्मिन् नगरे चतुःषष्टिविज्ञानसहिता देवदत्ताभिधाना रूपादिगुणवती वेश्या परिवसति । तया च भुजङ्गजनाभिप्रायपरिज्ञानार्थं स्वस्वव्यापारं कुर्वत्यः सर्वा अपि राजपुत्रादिजातयो रतिभवनभित्तिषु चित्रकर्मणि लेखिताः । तत्र यः कश्चिद् राजपुत्रादिरागच्छति, स यत्र यत्र कृताभ्यासस्तत् तदेव चित्रलिखितं दृष्ट्वाऽत्यर्थं प्रशंसति । ततोऽसौ विलासिनी राजपुत्रादीनामन्यतरत्वेन निश्चित्य यथौचित्येनोपचरति । आनुकूल्येनोपचरिताश्च राजपुत्रादयस्तस्यै प्रचुरमर्थजातं प्रयच्छन्ति । इति गणिकादृष्टान्तः ।

अथामात्यदृष्टान्तोऽभिधीयते– एकस्मिन् नगरे कश्चिद् राजाऽमात्येन सहाऽश्ववाहनिकायां निर्गतः । तत्र च पथि गच्छता राजतुरङ्गमेन क्वचित् खिलप्रदेशे प्रस्रवणमकारि । तच्च तत्प्रदेशपृथिव्याः स्थिरत्वेन बद्धच्छिल्लरकं चिरेणाप्यशुष्कं व्यावर्तमानो राजा तथैव व्यवस्थितमद्राक्षीत् । चिरावस्थायिजलः शोभनोऽत्र प्रदेशे तडागो भवतीति विचिन्तयंश्चिरमवलोकितवांस्तदिति । ततश्चेङ्गिताकारकुशलतया विदिततदभिप्रायेणाऽमात्येन राजादेशमन्तरेणापि खानितं तत्र प्रदेशे महत् सरः । तत्पाल्यां च रोपिताः सर्वर्तुकपुष्पफलसमृद्धयो नानाजातीयतरुनिवहाः । अन्यदा च तेनैव प्रदेशेन गच्छता भूपालेन दृष्टम्, पृष्टं च– अहो ! मानससरोवरवद् रमणीयं केनेदं खानितं सरः ?। अमात्यो जगाद– देव ! भवद्भिरेव । राजा सविस्मयं प्राह, कथं कश्च कदा मयैतत्कारणाय निरूपितः ? इति । ततः सचिवो यथावृत्तं सर्वमपि कथितवान् । 'अहो ! परचित्तोपलक्षकत्वममात्यस्य' इति विचिन्त्य परितुष्टो राजा तस्य वृत्तिवर्धनादिना प्रसादं चकार । तदेवमादिकः संसारफलोऽपरोऽप्यप्रशस्तभावोपक्रमः स्वयमभ्यूह्य इति ॥९२८॥

अथ प्रशस्तभावोपक्रममाह—

[3]सीसो गुरुणो भावं जमुवक्कमए सुयं[x] पसत्थमणो । सहियत्थं, स पसत्थो इह भावोवक्कमोऽहिगओ ॥९२९॥

x(सुहं) १ क. ग. 'वं शि' । २ क. ख. ग. 'महास' । ३ शिष्यो गुरोर्भावं यदुपक्रमते श्रुतं प्रशस्तमनाः । स्वहितार्थं, स प्रशस्त इह भावोपक्रमोऽधिकृतः ॥ ९२९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

इह यच्छिष्यः स्वहितार्थं श्रुताध्ययनादिहेतोः प्रशस्तमनाः शुभहेतुत्वात् श्रुतं गुरुभावमुपक्रामति– इङ्गिताकारादिना जानाति, स मोक्षफलत्वात् प्रशस्तभावोपक्रमः । तेनैव चेहाऽधिकारः, मोक्षार्थत्वादेव सर्वस्याऽस्य प्रारम्भस्येति ॥ ९२९ ॥

अत्र परः प्राह—

[1]को वक्खाणावसरे गुरुचित्तोवक्कमाहिगारोऽयं ? । भण्णइ वक्खाणंगं गुरुचित्तोवक्कमो पढमं ॥ ९३० ॥

नन्वावश्यकस्यानुयोगो व्याख्यानमिह प्रक्रान्तम्, ततस्तदवसरे प्रस्तुते कोऽयमप्रस्तुतेन गुरुचित्तोपक्रमेणाधिकारः ? । अत्रोत्तरमाह– 'भण्णई'त्यादि' भण्यतेऽत्र प्रतिविधानम्, यद् व्याख्यानमिह प्रस्तुतं भवता गीयते, तद् गुरुचित्तायत्तमेव । ततश्च गुरुचित्तोपक्रमः प्रथममेव व्याख्यानस्याङ्गं कारणम्, कारणमन्तरेण च कार्यस्याभावात् तस्मिन् प्रकृते तत्कारणस्याधिकाराभिधानं न किञ्चिदप्रस्तुतमिति ॥ ९३० ॥

न केवलं गुरुचित्तोपक्रमः प्रथमं व्याख्यानम्, किन्तु यानि कानिचित् सामान्येन शास्त्रानुपक्रम-पुस्तको-पाश्रया-ऽऽहार-वस्त्र-पात्र-सहायादीनि व्याख्यानाऽङ्गानि, तानि सर्वाण्यपि गुरुचित्तायत्तानि यतो वर्तन्ते, तस्माद् यथा गुरुचित्तं सुप्रसन्नं भवति, तथा कार्यम्, इति दर्शयन्नाह—

[2]गुरुचित्तायत्ताइं वक्खाणंगाइं जेण सव्वाइं । तो जेण सुप्पसन्नं होइ तयं तं तहा कज्जं ॥ ९३१ ॥

गतार्थैव, नवरं गुरुचित्तं च तदा सुप्रसन्नं भवति, यदेङ्गिताकाराद्यभिज्ञः शिष्यस्तदुपक्रमानुकूल्येन प्रवर्तते । अतो न गुरुचित्तोपक्रमोऽप्राऽप्रस्तुत इति भावः ॥ ९३१ ॥

गुरुचित्तक्षमादनोपायानेवाह—

[3]जो जेण पगारेणं तुस्सइ करण-विणया-ऽणुवत्तीहिं । आराहणाए मग्गो सो च्चिय अव्वाहओ तस्स ॥९३२॥

---

१ को व्याख्यानावसरे गुरुचित्तोपक्रमाधिकारोऽयम् ? । भण्यते व्याख्यानाङ्गं गुरुचित्तोपक्रमः प्रथमम् ॥ ९३० ॥

२ गुरुचित्तायत्तानि व्याख्यानाङ्गानि येन सर्वाणि । ततो येन सुप्रसन्नं भवति तत् तत् तथा कार्यम् ॥ ९३१ ॥

३ यो येन प्रकारेण तुष्यति करण-विनया-ऽनुवृत्तिभिः । आराधनाया मार्गः स एवाऽव्याहतस्तस्य ॥ ९३२ ॥ (मार्गः)

आगारिंगियकुसलं जइ सेयं वायसं वए पुज्जा । तहवि य सिं न विकूडे विरहम्मि य कारणं पुच्छे ॥९३३॥

निवपुच्छिएण गुरुणा भणिओ गंगा कओमुही वहइ । संपाइयवं सीसो जह तह सव्वत्थ कायव्वं ॥९३४॥

तिस्रोऽपि सुगमाः, नवरं प्रथमगाथायां 'करणेत्यादि' करणं गुर्वादिष्टस्य संपादनम्, विनयोऽभिमुखगमना-ऽऽसनप्रदान-पर्युपास्ति-ऽञ्जलिबद्धानुव्रजनादिलक्षणः, अनुवृत्तिस्त्विङ्गितादिना गुरुचित्तं विज्ञाय तदानुकूल्ये प्रवृत्तिः, ताभिः । द्वितीयगाथायामाकारेङ्गितकुशलं शिष्यं प्रति यदि श्वेतं वायसं पूज्या गुरवो वदेयुः, तथापि 'सिं ति' तेषां संबन्धि वचो न विकूटयेद् न प्रतिहन्यात् । विरहे च तद्विषयं कारणं पृच्छेदिति ।

नृपपृष्टेन गुरुणा भणितो 'गङ्गा केन मुखेन वहति ?' । ततो यथा सर्वमपि गुरुभणितं शिष्यः संपादितवान्, तथा सर्वत्र सर्वप्रयोजनेषु कार्यम् । इति तृतीयगाथाऽक्षरार्थः । भावार्थस्तु कथानकेनोच्यते– कन्यकुब्जे पुरे केनचिद् राज्ञा सूरिणा सह गोष्ठीप्रबन्धे प्रोक्तम्– राजपुत्रा विनीताः । सूरिणा तूक्तम्– साधवः । ततो विवादे सूरिणाऽभ्यधायि– युष्मदीयः सर्वोत्कृष्टविनयगुणो राजपुत्रः परीक्ष्यते, अस्मदीयस्त्वविनीतो भवतां यः प्रतिभाति स एव साधुः परीक्ष्यते । ततोऽभ्युपेतं राज्ञा । समादिष्टश्चातिविनीततया प्रसिद्धो राजपुत्रः– 'कुतोमुखी गङ्गा वहति ?' इति शोधय । तेनोक्तम्– किमिह शोधनीयम् ?, बालानामपि प्रतीतमेवेदम्– 'पूर्वाभिमुखी गङ्गा प्रवहति' इति । राज्ञा प्रोक्तम्– किमित्यत्रापि वितण्डावादं करोषि ?, गत्वा निरीक्षस्व तावत् । ततो हृयमूयावान् बहिः संवृतिं कृत्वा महता कष्टेन ततः प्रदेशाद् निर्गतः । सिंहद्वारे च निर्गच्छन् पृष्टः केनापि मित्रेण– भद्र ! क्व गन्तव्यम् ? । ततोऽमूयया प्रोक्तम्– अरण्ये रोझानां लवणदानार्थम् । ततो मित्रेणोक्तम्– कोऽयं व्यतिकरः ? । राजपुत्रेण सर्वमपि राजादिष्टं निवेदितम् । मित्रेणोक्तम्– यदि राज्ञो ग्रहः संलग्नः, तत् किं तवापि ?, गत्वा निवेदय– 'निरीक्षिता मया गङ्गा, पूर्वाभिमुखी वहति' इति । तथैवानुष्ठितं राजपुत्रेण । प्रच्छन्नप्रहरिकेण च निवेदितं राज्ञस्तच्चेष्टितम् । ततो विलक्षेण राज्ञा प्रोक्तम्– भव्यम्, साधुरपि परीक्ष्यतां तावत् । ततो यः कश्चिदविनीतो राज्ञा लक्षितस्तद्विषये परीक्षाप्रतिपादितेन गुरुणा भणितः शिष्यः– गत्वा निरीक्षस्व, 'केन मुखेन गङ्गा वहति ?' इति । ततः 'पूर्वाभिमुखी साऽत्र वहति, इति गुरवो विदन्त्येव, परं कारणेन केनाप्यत्र भवितव्यम्' इति चेतसि निश्चित्य प्रोक्तं तेन– 'इच्छाम्यादेशम्' इति ।

---

१ आकारे-ङ्गितकुशलं यदि श्वेतं वायसं वदेयुः पूज्याः । तथापि च तेषां न विकूटयेद् विरहे च कारणं पृच्छेत् ॥ ९३३ ॥ ×(अभ्युपगतं)

नृपपृष्टेन गुरुणा भणितो गङ्गां कुतोमुखी वहति ? । संपादितवान् शिष्यो यथा तथा सर्वत्र कर्तव्यम् ॥ ९३४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]आगारिंगियकुसलं जइ सेयं वायसं वए पुज्जा । तहवि य सिं न विकूडे विरहम्मि य कारणं पुच्छे ॥९३३॥
निवपुच्छिएण गुरुणा भणिओ गंगा कओमुही वहइ । संपाइयवं सीसो जह तह सव्वत्थ कायव्वं ॥९३४॥

तिस्रोऽपि सुगमाः, नवरं प्रथमगाथायां 'करणेत्यादि' करणं गुर्वादिष्टस्य संपादनम्, विनयोऽभिमुखगमना-ऽऽसनप्रदान-पर्युपास्त्य-ऽञ्जलिबद्धानुव्रजनादिलक्षणः, अनुवृत्तिस्त्विङ्गिताद्दिना गुरुचित्तं विज्ञाय तदानुकूल्ये प्रवृत्तिः, ताभिः । द्वितीयगाथायामाकारेङ्गित-कुशलं शिष्यं प्रति यदि श्वेतं वायसं पूज्या गुरवो वदेयुः, तथापि 'सिं ति' तेषां संबन्धि वचो न विकूटयेद् न प्रतिहन्यात् । विरहे च तद्विषयं कारणं पृच्छेदिति ।

नृपपृष्टेन गुरुणा भणितो 'गङ्गा केन मुखेन वहति ?'। ततो यथा सर्वमपि गुरुभणितं शिष्यः संपादितवान्, तथा सर्वत्र सर्वमयोजनेषु कार्यम् । इति तृतीयगाथाऽक्षरार्थः । भावार्थस्तु कथानकेनोच्यते– कन्यकुब्जे पुरे केनचिद् राज्ञा सूरिणा सह गोष्ठीप्रबन्धे प्रोक्तम्– राजपुत्रा विनीताः । सूरिणा तूक्तम्– साधवः । ततो विवादे सूरिणाऽभ्यधायि– युष्मदीयः सर्वोत्कृष्टविनयगुणो राजपुत्रः परीक्ष्यते, अस्मदीयस्त्वविनीतो भवतां यः प्रतिभाति स एव साधुः परीक्ष्यते । ततोऽभ्युपेतं राज्ञा । समादिष्टश्चातिविनीततया प्रसिद्धो राजपुत्रः– 'कुतोमुखी गङ्गा वहति ?' इति शोधय । तेनोक्तम्– किमिह शोधनीयम् ?, बालानामपि प्रतीतमेवेदम्– 'पूर्वाभिमुखी गङ्गा प्रवहति' इति । राज्ञा प्रोक्तम्– किमित्यत्रापि वितण्डावादं करोषि ?, गत्वा निरीक्षस्व तावत् । ततो हृष्यसूयावान् बहिः संवृतिं कृत्वा महता कष्टेन ततः प्रदेशाद् निर्गतः । सिंहद्वारे च निर्गच्छन् पृष्टः केनापि मित्रेण– भद्र ! क्व गन्तव्यम् ?। ततोऽसूयया प्रोक्तम्– अरण्ये रोझानां लवणदानार्थम् । ततो मित्रेणोक्तम्– कोऽयं व्यतिकरः ?। राजपुत्रेण सर्वमपि राजादिष्टं निवेदितम् । मित्रेणोक्तम्– यदि राज्ञो ग्रहः संलग्नः, तत् किं तवापि ?, गत्वा निवेदय– 'निरीक्षिता मया गङ्गा, पूर्वाभिमुखी वहति' इति । तथैवानुष्ठितं राजपुत्रेण । प्रच्छन्नप्रेरिकेण च निवेदितं राज्ञस्तच्चेष्टितम्। ततो विलक्षेण राज्ञा प्रोक्तम्– भव्यम्, साधुरपि परीक्ष्यतां तावत्। ततो यः कश्चिदविनीतो राज्ञा लक्षितस्तद्विषये परीक्षाप्रतिपादितेन गुरुणा भणितः शिष्यः– गत्वा निरीक्षस्व, 'केन मुखेन गङ्गा वहति ?' इति। ततः 'पूर्वाभिमुखी साऽत्र वहति, इति गुरवो विदन्त्येव, परं कारणेन केनाप्यत्र भवितव्यम्' इति चेतसि निश्चित्य प्रोक्तं तेन– 'इच्छाम्यादेशम्' इति ।

---

१ आकारे-ङ्गितकुशलं यदि श्वेतं वायसं वदेयुः पूज्याः । तथापि च तेषां न विकूटयेद् विरहे च कारणं पृच्छेत् ॥ ९३३ ॥
नृपपृष्टेन गुरुणा भणितो गङ्गा कुतोमुखी वहति ? । संपादितवान् शिष्यो यथा तथा सर्वत्र कर्तव्यम् ॥ ९३४ ॥

समाधानान्तरमाह—

[2]अहवोवक्कमसामण्णओ मया पगयनिरुवओगा वि । अण्णत्थ सोवओगा एवं चिय सव्वनिक्खेवो ॥९३८॥

यदिवा, प्रकृते प्रस्तुते निरुपयोगाः प्रकृतनिरुपयोगाः, एवंभूता अपि सन्तो नाम-स्थापना-द्रव्याद्युपक्रमा उपक्रमसामान्यतोऽत्र मता उपन्यस्ताः । कुतः ?, इत्याह– अन्यत्र स्थानान्तरे सोपयोगा इति कृत्वा, न केवलमत्रैवाऽसौ न्यायः, किन्त्वत्र शास्त्रे, अन्येषु वा शास्त्रेषु ये केचन बहुप्रकारा नामादिनिक्षेपास्तेषां सर्वेषामप्यपरसमाधानाभावे इदमेव समाधानं वाच्यमिति । तदेवं नामादिभेदैर्दर्शितमुपक्रमस्य षड्विधत्वम् ॥ ९३८ ॥

यदिवा, अन्यथैवाऽयमुपक्रमः षड्विध इति दिदर्शयिषुः प्रस्तावनामाह—

[3]गुरुभावोवक्कमणं कयमज्झयणस्स छव्विहमियाणिं । तत्थणुपुव्वाईसुं इदमज्झयणं समोयारे ॥ ९३९ ॥

तदेवं नामादिभेदैः षड्विधे उपक्रमे विचार्यमाणे कृतं गुरुभावोपक्रमणम् । तत्करणे च दर्शितमेकेन प्रकारेणोपक्रमस्य षड्विधत्वम् । इदानीं प्रकारान्तरेण प्रस्तुतस्य सामायिकाध्ययनस्य षड्विधमुपक्रमणमुच्यते– आनुपूर्वी-नाम-प्रमाण-वक्तव्यता-ऽर्थाधिकार-समवतारभेदात् षड्विध उपक्रमोऽभिधीयत इत्यर्थः । अत एवाह– आनुपूर्व्यादिषु पञ्चस्वपक्रमद्वारभेदेषु षष्ठे समवतारद्वारभेदे विचार्यमाण इदं सामायिकाध्ययनं समवतारयेत् । ततश्चानुपूर्व्यादिभेदेन षड्विध उपक्रमोऽभिहितो भवति । इत्यष्टादशगाथार्थः ॥ ९३९ ॥

तत्रानुपूर्वीलक्षणे प्रथमोपक्रमभेदेऽस्य सामायिकाध्ययनस्यावतारं चिन्तयितुमाह—

[4]अणुपुव्विसमोयारो कज्जो सामाइयस्स संभवओ । नियमावतारणं पुण कित्तण-गणणाणुपुव्वीसु ॥९४०॥

आनुपूर्व्या तावदस्य सामायिकाध्ययनस्य समवतारः संभवतो यत्र यत्रानुपूर्वीभेदे समवतारः संभवति, तत्र तत्रासौ कर्तव्यः । आह– ननु

---

१ अथवोपक्रमसामान्यतो मताः प्रकृतनिरुपयोगा अपि । अन्यत्र सोपयोगा एवमेव सर्वनिक्षेपः ॥ ९३८ ॥ २ घ.छ. 'मन्नओ' ।
३ गुरुभावोपक्रमणं कृतमध्ययनस्य षड्विधमिदानीम् । तत्रानुपूर्व्यादिषु इदमध्ययनं समवतारयेत् ॥ ९३९ ॥
४ आनुपूर्वीसमवतारः कार्यः सामायिकस्य संभवतः । नियमादवतारणं पुनरुत्कीर्तन-गणनानुपूर्व्योः ॥ ९४० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

"नामं ठवणा दविए खेत्ते काले य गणणअणुपुव्वी । उक्कित्तण-संठाणे सामायारी य भावे य ॥ १ ॥"

इति वचनादानुपूर्वी दशभेदा, तत् कस्मिन् भेदे नियमात् सामायिकस्य समवतारः ?, इत्याह– 'नियमेत्यादि' नियमेन निश्चयेन पुनः समवतारोऽस्य सामायिकाध्ययनस्योत्कीर्तनानुपूर्व्याम्, गणनानुपूर्व्या च द्रष्टव्यः । तत्रोत्कीर्तनं संशब्दनं 'सामायिकं, चतुर्विंशतिस्तवः' इत्यादिनामोत्कीर्तनमात्रमित्यर्थः । तत्र 'सामायिकम्' इत्येवमिदमध्ययनमुत्कीर्त्यत इत्युत्कीर्तनानुपूर्व्यामेतत् समवतरति । गणनं तु– एकं, द्वे, त्रीणि, इत्यादिपरिसंख्यानम् । तत्र प्रथम-द्वयादिकायां संख्यायामिदमध्ययनमवतरतीति; अतो गणनानुपूर्व्यामस्य समवतार इति ॥ ९४० ॥

यद्येवम्, गणनानुपूर्व्या कतिथमिदमध्ययनम् ?, इत्याह—

पुव्वाणुपुव्विओ तं पढमं, पच्छाणुपुव्विओ छट्ठं । जायइ गणिज्जमाणं अनियमियमणाणुपुव्वीए ॥९४१॥

इहानुपूर्वी त्रिविधा– पूर्वानुपूर्वी, पश्चानुपूर्वी, अनानुपूर्वी चेति । तत्र पूर्वानुपूर्व्या तत् सामायिकाध्ययनं प्रथमं भवति, पश्चानुपूर्व्या तु षष्ठम्, अनानुपूर्व्या तु गण्यमानमनियमितं जायते– क्वचिद् भङ्गके प्रथमम्, क्वचिद् द्वितीयम्, क्वचित्तु तृतीयम्; इत्यमीषां षण्णामावश्यकाध्ययनानामष्टादशोत्तराणि सप्त शतान्यनानुपूर्वीभङ्गकानां भवन्तीति ॥ ९४१ ॥

एतेषां च भङ्गकानां सामान्येन सर्वसंख्यानयने करणगाथामाह—

एगादेगुत्तरया छगच्छगया परोप्परब्भत्था । पुरिमंतिमदुगहीणा परिमाणमणाणुपुव्वीणं ॥ ९४२ ॥

एकाद्या एकोत्तरका अङ्का व्यवस्थाप्यन्ते । एकैक उत्तरो वर्धमानो येषु ते एकोत्तरकाः । ते चेह षडध्ययनप्रस्तावात् षड्गच्छगताः समवसेयाः । तत्र षण्णां गच्छः समुदायः षड्गच्छः, तं गतास्तत्प्रतिबद्धाः । ते च परस्पराभ्यस्ताः परस्परंगुणिताः प्रथमान्त्यभङ्गकद्वयरहिताः सर्वसंख्यारूपमनानुपूर्वीणां परिमाणं भवति । तथाहि– एकाद्या एकोत्तरकाः षडध्ययनविषयाः षडङ्का व्यवस्थाप्यन्ते; तद्यथा– १ । २ । ३ । ४ । ५ । ६ । एते च परस्परं गुण्यन्ते । तद्यथा– एकेन द्विको गुणितो जातौ द्वावेव, द्वाभ्यां त्रिको गुणितो जाताः षट्, तैश्च चत्वारो गुणिताः संजाताश्चतुर्विंशतिः, तया च पञ्चाभ्यस्ता जातं विंशं शतम् । तेन च षड्गुणिताः संपद्यन्ते विंशतिसप्तभङ्गकशतानि । इह च प्रथमभङ्गः पूर्वानुपूर्वीरूपः, चरमभङ्गस्तु पश्चानुपूर्व्यात्मकः; अतस्तदपनयनेऽष्टादशोत्तराणि सप्त शतानि सामान्येन सर्वसंख्यारूपमनानुपूर्वीभङ्गकपरिमाणं भवति । एवं सप्तादीनामप्यनन्तपर्यन्तानां पदानामयमेव सामान्येन सर्वभङ्गकसंख्यानयनोपाय इति ॥ ९४२ ॥

अथ विशेषतोऽनानुपूर्वीभङ्गकानामानयनोपायभूतां करणगाथामाह—

पुव्वाणुपुव्विहेट्ठा समयाभेएण कुण जहाजेट्ठं । उवरिमतुल्लं पुरओ नसेज्ज पुव्वक्कमो सेसो ॥ ९४३ ॥

इह विवक्षितपदानां क्रमेण स्थापना पूर्वानुपूर्वीत्युच्यते, तस्या 'हेट्ठ त्ति' अधस्ताद् द्वितीयादिभङ्गकान् जिज्ञासुः 'कुण त्ति' स्थापय 'एकादिपदानि' इति शेषः । कथम्, इत्याह– ज्येष्ठस्यानतिक्रमेण यथाज्येष्ठं यो यस्यादौ स तस्य ज्येष्ठो यथा– द्विकस्यैककोज्येष्ठः, त्रिकस्य त्वयमनुज्येष्ठः, चतुष्कादीनां त्वेकोऽपि ज्येष्ठानुज्येष्ठः; एवं त्रिकस्य द्विको ज्येष्ठः, स एव चतुष्कस्यानुज्येष्ठः, पञ्चकादीनां तु स एव ज्येष्ठानुज्येष्ठ इत्यादि । एवं च सत्युपरितनाङ्कस्याधस्ताज्ज्येष्ठो निक्षिप्यते, तत्रालभ्यमानेऽनुज्येष्ठः, तत्राप्यलभ्यमाने ज्येष्ठानुज्येष्ठः, इति यथाजेट्ठं निक्षेपं कुरु । किमनियमेन ?, न, इत्याह– समयाभेदेनेति, समयः संकेतः प्रस्तुतभङ्गकरचनव्यवस्था, तस्या अभेदोऽनतिक्रमस्तेन समयाभेदेन निक्षेपं कुरु । समयस्य च भेदस्तदा भवति, यदा तस्मिन्नेव भङ्गके निक्षिप्ताङ्कसदृशोऽपरोऽङ्कः पतति । तत एवंभूतं समयभेदं वर्जयन्नेव ज्येष्ठाद्यङ्कनिक्षेपं विदध्यात्, उक्तं च–

"जेहिम्मि य निक्खेत्ते पुणरवि सो चेव होइ कायव्वो । सो होइ समयभेओ वज्जेयव्वो पयत्तेण ॥ १ ॥"

निक्षिप्तस्य चाङ्कस्य यथासंभवं 'पुरओ त्ति' अग्रत उपरितनाङ्कैस्तुल्यं सदृशं यथा भवति, एवं न्यस्येत्– उपरितनाङ्कसदृशानेवाङ्कान् पुरतः स्थापयेदित्यर्थः । 'पुव्वक्कमो सेस त्ति' निक्षिप्ताङ्कस्य यथासंभवं पृष्ठतः शेष उद्धरितशेषाङ्कानामधस्तात् तानेवोद्धरितशेषानङ्कान् पूर्वक्रमेण स्थापयेदित्यर्थः । यः संख्यया लघुरेककादिः स प्रथमं स्थाप्यते, यस्तु तया महान् स पश्चात् स्थाप्यत इति पूर्वक्रमः, पूर्वानुपूर्वीलक्षणे प्रथमभङ्गके इत्थमेव दृष्टत्वादिति भावः ॥ इति गाथार्थः ॥

---

१ नाम स्थापना द्रव्यं क्षेत्रं कालश्च गणनानुपूर्वी । उत्कीर्तन-संस्थाने सामाचारी च भावश्च ॥ १ ॥ २ क.ग. 'रतोत्यतो' ।

३ पूर्वानुपूर्वीतस्तत् प्रथमं, पश्चानुपूर्वीतः षष्ठम् । जायते गण्यमानमनियमितमनानुपूर्व्याम् ॥ ९४१ ॥

४ एकाद्या एकोत्तरकाः षड्गच्छगताः परस्परमभ्यस्ताः । प्रथमा-ऽन्तिमद्विकहीना परिमाणमनानुपूर्वीणाम् ॥ ९४२ ॥ ५ क.ग. 'रगणि' ।

१ क.ख.ग. '२ पदभिश्चत्वा' । २ घ.छ. 'पदतादिताः' । ३ पूर्वानुपूर्व्यधस्तात् समयाभेदेन कुरु यथाज्येष्ठम् । उपरितुल्यं पुरतो न्यस्येत् पूर्वक्रमः शेषः ॥ ९४३ ॥

४ यस्मिंश्च निक्षिप्ते पुनरपि स एव भवति कर्तव्यः । स भवति समयभेदो वर्जितव्यः प्रयत्नेन ॥ १ ॥ ×(ग्रं. १०००) +(घो)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

भावार्थस्तु दिङ्मात्रदर्शनार्थं सुखाधिगमाय च दर्शन-ज्ञान-चारित्रादीनि त्रीणि पदान्याश्रित्य तावद् दर्श्यते– तस्य चैक-द्वि-त्रिलक्षणस्य पदत्रयस्य परस्पराभ्यासे सामान्येन सर्वेऽपि षड् भङ्गा भवन्ति। विशेषतस्तु त एवमानीयन्ते– पूर्वानुपूर्वीलक्षणस्तावत् प्रथमो भङ्गः, तद्यथा– १।२।३। अस्याश्च पूर्वानुपूर्व्या अधस्ताद् भङ्गकरचने क्रियमाणे एकस्य तावज्ज्येष्ठ एव नास्ति, द्विकस्य तु विद्यते एककः, स तदधस्ताद् निक्षिप्यते, तस्य चाग्रतः 'उवरिमतुल्लं पुरओ नसेज्ज' इतिवचनात् त्रिको न्यस्यते, पृष्ठतस्तु स्थापितशेषो द्विको दीयते, ततोऽयं द्वितीयो भङ्गः संपद्यते– २।१।३। अत्र च द्विकस्य विद्यत एकको ज्येष्ठः, परं नासौ तदधस्ताद् निक्षिप्यते, अग्रतः सदृशाङ्कपातेन समयभेदप्रसङ्गात्। एककस्य तु ज्येष्ठ एव नास्ति, त्रिकस्य तु विद्यते द्विको ज्येष्ठः, स तदधस्ताद् न्यस्यते, अत्र चाग्रभागस्य तावदसंभव एव, पृष्ठतस्तु स्थापितशेषावेकक-त्रिकौ क्रमेण स्थाप्येते 'पुव्वक्कमो सेसो' इति वचनात्। ततस्तृतीयो भङ्गः संजायते– १।३।२। अत्राप्येककस्य ज्येष्ठ एव नास्ति, त्रिकस्य तु ज्येष्ठोऽस्ति द्विकः, न च तदधस्ताद् निक्षिप्यते, अग्रे सदृशाङ्कपातेन समयभेदापत्तेः, ततोऽस्यैवानुज्येष्ठ एककः स्थाप्यते, अग्रतस्तु द्विको दीयते 'उवरिमतुल्लं' इत्यादिवचनात्, पृष्ठतस्तु स्थापितशेषस्त्रिको व्यवस्थाप्यत इति चतुर्थो भङ्गः– ३।१।२। अत्र त्रिकस्य विद्यते द्विको ज्येष्ठः, एककश्चानुज्येष्ठः, परं तौ तदधस्ताद् न निक्षिप्येते, पुरतस्तुल्याङ्कपातेन समयभेदप्राप्तेः, एककस्य तु ज्येष्ठ एव नास्ति, द्विकस्य त्वस्त्येककको ज्येष्ठः स तदधस्ताद् न्यस्यते, तत्पृष्ठतस्तु स्थापितशेषौ द्विक-त्रिकौ क्रमशः स्थाप्येते इति पञ्चमो भङ्गः– २।३।१। अत्र द्विकस्याऽस्त्येककको ज्येष्ठः, किन्त्वसौ तदधस्ताद् न निक्षिप्यते, पुरतः सदृशाङ्कन्यासापत्त्या समयभेदप्रसङ्गात्। त्रिकस्य तु द्विको ज्येष्ठः, स तदधस्ताद् निक्षिप्यते, अग्रतस्त्वेककको दीयते, 'उवरिमतुल्लं' इति वचनात्; पृष्ठतस्तु स्थापितशेषस्त्रिकः स्थाप्यत इति षष्ठो भङ्गः। एषां च षण्णामपि भङ्गानामियं स्थापना–

१।२।३।
२।१।३।
१।३।२।
३।१।२।
२।३।१।
३।२।१।

अत्राप्याद्यभङ्गस्याऽनुपूर्वीत्वात्, अन्तिमस्य च पश्चानुपूर्वीत्वाद् मध्यमा एव चत्वारो भङ्गा अनानुपूर्वीत्वेन मन्तव्याः। एवं चतु-ष्पञ्च-प ,-सप्तादीनामपि पदानामनया दिशा भङ्गकाः समानेतव्याः। तदेवं संक्षेपत उक्ता आनुपूर्व्यः, विस्तरतस्त्विमा वक्ष्यमाणाश्च नामादिभेदा अनुयोगद्वारेभ्योऽवसेया इति ॥ ९४३ ॥

अथ संक्षेपतो नाम विचारयन्नाह–

[1]जं वत्थुणोऽभिहाणं पज्जयभेयाणुसारि तं नामं। पइभेयं जं नमए पइभेयं जाइ जं भणियं ॥ ९४४ ॥

यज्जीवादिवस्तुनोऽभिधानं तद् नामेति संबन्धः। कथंभूतम्?, इत्याह– पर्याया ज्ञान-दर्शन-चारित्र-रूप-रस-गन्ध-स्पर्श-नव-पुराणादयस्तेषां भेदा नानाविधस्वभावास्तांस्तद्वाचकत्वेनाऽनुसरतीति पर्यायभेदानुसारि नामेति। किमुक्तं भवति?, इत्याशङ्क्य तात्पर्यमाह– 'पइभेयमित्यादि' 'णम प्रह्वत्वे' प्रतिपर्यायभेदं यद् नमति याति तद्वाचकत्वेन परिणमति प्रह्वीभवति तद् नामेति यद् भणितं भवति, इत्येतत् तात्पर्यमित्यर्थ इति ॥ ९४४ ॥

एतच्च नाम द्विनाम-त्रिनामयावद्दशनामभेदाद् दशभेदम्, समस्ताभिलाप्यवस्तुविषयत्वाद् बहुभेदं चाऽनुयोगद्वारेषूक्तम्। तत्र षड्नाम्नि क्षायोपशमिके भावे सामायिकस्याऽध्ययनस्यावतार इति दर्शयन्नाह–

[2]छव्विहनामे भावे खओवसमिए सुयं समोयरइ। जं सुयनाणावरणखओवसमजं तयं सव्वं ॥ ९४५ ॥

अनुयोगद्वाराध्ययने षड्नाम्न्यौदयिकादयः षड् भावाः पठ्यन्ते। तत्र च क्षायोपशमिके भावे सर्वमप्याचारादि श्रुतं समवतरति, यद् यस्मात् सर्वमपि तत् श्रुतं श्रुतज्ञानावरणकर्मक्षयोपशमादेव जायते, नान्यतः, तस्मात् क्षायोपशमिक एव भावे समवतरति। अत इदं सामायिकाध्ययनमपि श्रुतविशेषरूपत्वात् क्षायोपशमिक एव भावे समवतरति, नान्यत्रेत्यर्थादुक्तं भवति। इत्युक्तं संक्षेपतो नाम॥९४५॥

सांप्रतं प्रमाणमभिधित्सुराह–

[3]दव्वाइचउब्भेयं पमीयए जेण तं पमाणं ति। इदमज्झयणं भावो त्ति भावमाणे समोयरइ ॥ ९४६ ॥

---

१ यद् वस्तुनोऽभिधानं पर्यायभेदानुसारि तद् नाम। प्रतिभेदं यद् नमति प्रतिभेदं याति यद् भणितम् ॥ ९४४ ॥

२ षड्विधनाम्नि भावे क्षायोपशमिके श्रुतं समवतरति। यत् श्रुतज्ञानावरणक्षयोपशमजं तत् सर्वम् ॥ ९४५ ॥

३ द्रव्यादिचतुर्भेदं प्रमीयते येन तत् प्रमाणमिति। इदमध्ययनं भाव इति भावमाने समवतरति ॥ ९४६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

द्रव्य-क्षेत्र-काल-भावभेदाच्चतुर्विधं प्रमेयम्, प्रमेयचातुर्विध्याच्च प्रमाणमपि चतुर्विधम्– द्रव्यप्रमाणम्, क्षेत्रप्रमाणम्, कालप्रमाणम्, भावप्रमाणं चेति, द्रव्यादिकं चतुर्विधं प्रमेयं प्रमीयतेऽनेनेति कृत्वा। तत्रेदं सामायिकाध्ययनं श्रुतज्ञानविशेषत्वेन जीवपर्यायत्वाज्जीवभावत्वाद् भावप्रमाणे समवतरति। आह– ननु भावप्रमाणमपि त्रिविधम्– गुणप्रमाणम्, नयप्रमाणम्, संख्याप्रमाणं चेति; तत्र सामायिकं क्व समवतरति ? इति। उच्यते– गुणप्रमाणे। ननु गुणप्रमाणमपि द्विविधम्– जीवगुणप्रमाणम्, अजीवगुणप्रमाणं च; तत्र सामायिकं क्व समवतरति ? इति। उच्यते– जीवानन्यत्वेन जीवगुणप्रमाणे। ननु जीवगुणोऽपि त्रिविधः– ज्ञान-दर्शन-चारित्रभेदात्; तत्र क्व सामायिकस्याऽवतारः ?। उच्यते– बोधात्मकत्वाद् ज्ञानगुणे। ननु ज्ञानमपि प्रत्यक्षा-ऽनुमानो-पमाना-ऽऽगमभेदाच्चतुर्विधम्, तत्र केदमवतरति ? इति। उच्यते– आगमे। ननु सोऽपि लौकिक-लोकोत्तरभेदाद् द्विविधः। लोकोत्तरोऽपि सूत्रा-र्थो-भयरूपित्वात् त्रिविध एव, तत् केदं समवतरति ? इति। उच्यते सूत्रा-ऽर्थो-भयभेदात् त्रिविधेऽपि लोकोत्तर आगमे समवतरति, तत्स्वभावत्वात् तत्स्वरूपत्वादिति ॥ ९४६ ॥

एतदेवाह—

[1]जीवाणण्णत्तणओ जीवगुणे बोहभावओ नाणे। लोउत्तरसुत्तत्थोभयागमे तस्सभावाओ ॥ ९४७ ॥

व्याख्यातार्थैव ॥ ९४७ ॥

आह– नन्वात्मागमा-ऽनन्तरागम-परम्परागमभेदतोऽपि लोकोत्तरागमस्त्रिविधः, तत् क्वेदमवतरति ?, इत्याशङ्क्याह—

[2]सुयओ गणहारीणं तस्सिस्साणं तहाऽवसेसाणं।
एवं अत्ता-णंतर-परंपरागमपमाणम्मि ॥ ९४८ ॥
अत्थेण उ तित्थंकर-गणहर-सेसाणमेवमेवेदं।

यथा जीवगुणादिष्वस्यावतारः, एवमात्मा-ऽनन्तर-परम्परागमप्रमाणेऽप्यवतारो मन्तव्यः। कथम् ?, इत्याह– सूत्रतो गणधरा-

१ जीवानन्यत्वतो जीवगुणे बोधभावतो ज्ञाने। लोकोत्तरसूत्रार्थोभयागमे तत्स्वभावात् ॥ ९४७ ॥

२ श्रुततो गणधारिणां तच्छिष्याणां तथाऽवशेषाणाम्। एवमात्मा-ऽनन्तर-परम्परागमप्रमाणे ॥ ९४८ ॥
अर्थेन तु तीर्थङ्कर-गणधर-शेषाणामेवमेवेदम्।

णामिदमात्मागमः, तैरेव तन्मूत्रस्य निर्वर्तितत्वात्, अत आत्मन एव सकाशादागमनमस्येति कृत्वा। तच्छिष्याणां तु जम्बूस्वाम्यादीनां सामायिकसूत्रमनन्तरागमः, अनन्तरादेव गणधरादागमनमागमोऽस्येति हेतोः। तथाऽवशेषाणां प्रभव-शय्यंभवादीनामेतत् सूत्रं परम्परागमः सूरिपरम्पर्याऽऽगमनमागमोऽस्येति युक्तेः। तदेवं सूत्रतो यथासंख्येन गणधरादीनामात्मागमादित्वयोजना कृता ॥९४८॥ अर्थेनाप्येवमेवेदं सामायिकं यथासंख्येन तीर्थकर-गणधर-शेषजम्बुप्रभृतीनामात्मागमा-ऽनन्तरागम-परम्परागमत्वेन वक्तव्यमिति ॥

ननु नयप्रमाणे समवतारोऽस्य भवति, नवा ?, इत्याशङ्क्य गाथोत्तरार्धमाह—

[1]मूढनयं ति न संपइ नयप्पमाणेऽवयारो से ॥ ९४९ ॥

'मूढनइयं सुयं कालियं, न नया समोयरंति इहं' इतिवचनाद् मूढनयं चिरन्तनमुनिभिः शिष्यव्यामोहभयाद् निषिद्धनयविचारं संप्रति श्रुतम्, अतो नयप्रमाणे नाऽस्याऽवतार इति ॥ ९४९ ॥

आह– ननु कियतः कालादर्वाक् कालिकश्रुतेन नयविचारो निषिद्धः ?, इत्याह—

[2]आसी पुरा सो नियओ अणुओगाणमपुहुत्तभावम्मि। संपइ नत्थि पुहुत्ते होज्ज व पुरिसं समासज्ज ॥९५०॥

पुरा पूर्वं चरणकरण-धर्मकथा-गणित-द्रव्यानुयोगलक्षणानां चतुर्णामनुयोगानामपृथग्भावे प्रतिसूत्रं चतुर्णामप्यवतारे स नयावतारो नियतो निश्चित आसीत्। साम्प्रतं पुनरनुयोगानां पृथक्त्वे

"[3]कालियसुयं च इसिभासियाइं तइया य सूरपन्नत्ती। सव्वो य दिट्ठिवाओ चउत्थओ होइ अणुओगो ॥ १ ॥"

इति वचनात् पार्थक्येन व्यवस्थापने सति नास्त्यसौ नयावतारः। किं सर्वथा ?, न, इत्याह– भवेद् वा प्राज्ञपुरुषविशेषं समासाद्य कोऽपि कियानपीति। इदमुक्तं भवति– श्रीमदार्यरक्षितसूरीन् यावदेकैकस्मिन् सूत्रेऽनुयोगचतुष्टयव्याख्यानम्, नयविचारश्च विस्तरेणाऽऽसीत्। ततश्च तैरेव श्रीमदार्यरक्षितसूरिभिर्विचारबाहुल्याद् मुग्धतः शिष्यानवलोक्य चत्वारोऽप्यनुयोगा भेदेन व्यवस्थापिताः, तद्यथा– कालिकश्रुते चरणकरणानुयोग एव व्याख्येयः, उत्तराध्ययनादिषु धर्मकथानुयोगः, सूर्यप्रज्ञप्त्यादिषु गणितानुयोगः, दृष्टिवादे

१ मूढनयमिति न संप्रति नयप्रमाणेऽवतारस्तस्य ॥ ९४९ ॥ २ मूढनयिकं श्रुतं कालिकं, न नयाः समवतरन्तीह।

३ आसीत् पुरा स नियतोऽनुयोगानामपृथग्भावे। संप्रति नास्ति पृथक्त्वे भवेद् वा पुरुषं समासाद्य ॥ ९५० ॥

४ कालिकश्रुतं ऋषिभाषितानि तृतीया च सूरप्रज्ञप्तिः। सर्वश्च दृष्टिवादश्चतुर्थको भवत्यनुयोगः ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

द्रव्यानुयोगः । नयविचारश्चाऽर्वाक् प्रायो निषिद्धः । इति न सामायिकस्य प्रायो नयैरवतार इति ॥ ९५० ॥

संख्याप्रमाणे तत्रावतरतीदं नवा ?, इत्याह–

[1]संखामाणे कालियसुयपरिमाणे परित्तपरिमाणं । सुयओ तदत्थओ पुण भणियं तमणंतपज्जायं ॥ ९५१ ॥

संख्या नाम-स्थापना-द्रव्य-क्षेत्र-काल-पर्य-परिमाण-भावभेदाऽनुयोगद्वारेष्वष्टधा प्रोक्ता । तत्र संख्यामाने संख्याप्रमाणे विचार्यमाणे कालिकश्रुतपरिमाणे एतदवतरति । तत्र कालिकश्रुतपरिमाणं द्विविधम्– सूत्रतः, अर्थतश्च । तत्र सूत्रतस्तु सामायिकाध्ययनं परीत्तं संख्याताक्षरादिनियतपरिमाणम् । तस्य सामायिकस्यार्थस्तदर्थस्ततः पुनरनन्तपर्यायत्वादनन्तपरिमाणं भणितमिति । तदेवं प्रमाणमप्युक्तं संक्षेपतः ॥ ९५१ ॥

अथ वक्तव्यतामभिधित्सुराह–

[2]समओ जो सिद्धंतो सो स-परो-भयगओ तिविहभेओ । तत्थ इमं अज्झयणं ससमयवत्तव्वयानिययं॥९५२॥

यः सिद्धान्तः स तावत् समय उच्यते । स च त्रिविधः– स्वसमय-परसमयो-भयसमयभेदात् । अत एव वक्तव्यताऽनुयोगद्वारेषु त्रिविधा प्रोक्ता– स्वसमयवक्तव्यता, परसमयवक्तव्यता, स्व-परोभयवक्तव्यता चेति । तत्रेदं सामायिकाध्ययनं स्वसमयवक्तव्यतानियतं, स्वसमयस्यैवेह प्रतिपाद्यमानत्वादिति ॥ ९५२ ॥

न केवलमिदमध्ययनम् , किन्तु सर्वाण्यप्यध्ययनानि स्वसमयवक्तव्यतानियतान्येव । कुतः ?, इत्याह–

[3]परसमओ उभयं वा सम्मद्दिट्ठिस्स ससमओ जेण । तो सव्वज्झयणाइं ससमयवत्तव्वनिययाइं ॥९५३॥

यतः परसमयः, उभयसमयो वा सम्यग्दृष्टेः स्वसमय एव, यथावद्विषयविभागेन व्यवस्थापनात् । ततो यद्यपि केषुचिदध्ययनेषु परो-भय-समयवक्तव्यतापि श्रूयते, तथापि तानि सर्वाण्यपि स्वसमयवक्तव्यतानियतान्येव, सम्यग्दृष्टिपरिग्रहात् । एतच्च पूर्वमनेकशो भावितमेवेति ॥ ९५३ ॥

---

१ संख्यामाने कालिकश्रुतपरिमाणे परीत्तपरिमाणम् । श्रुततस्तदर्थतः पुनर्भणितं तदनन्तपर्यायम् ॥ ९५१ ॥

२ समयो यः सिद्धान्तः स स्व-परो-भयगतस्त्रिविधभेदः । तत्रेदमध्ययनं स्वसमयवक्तव्यतानियतम् ॥ ९५२ ॥

३ परसमय उभयं वा सम्यग्दृष्टेः स्वसमयो येन । ततः सर्वाण्ययनानि स्वसमयवक्तव्यनियतानि ॥ ९५३ ॥

किञ्च—

[1]मिच्छत्त[2]समयसमूहं सम्मत्तं जं च तदुवगारम्मि । वट्टइ परसिद्धंतो तो तस्स तओ ससिद्धंतो ॥ ९५४ ॥

मिथ्यात्वानामेकान्तक्षणिकत्वा-ऽक्षणिकत्ववादिसौगतादिमतानां यः समूहः समुदायः स्यात्पदलाञ्छितः, स एव यस्मात् सम्यक्त्वम्, नान्यत् । यस्माच्च तस्य स्वसमयस्योपकारस्तदुपकारस्तस्मिन् वर्तते परसिद्धान्तः, परसिद्धान्तव्यावृत्त्यैव स्वसिद्धान्तसिद्धेः, असमञ्जसत्वादित्वं परसिद्धान्तानां दृष्ट्वा स्वसिद्धान्ते स्थैर्यसिद्धेश्चेति । ततस्तस्मात्तस्य सम्यग्दृष्टेस्तकः परसिद्धान्तः स्वसिद्धान्त एव । तदेवं सम्यग्दृष्टेः सर्वोऽपि विषयविभागेन स्थापितः स्वसिद्धान्त एव; इति सर्वाण्यप्यध्ययनानि स्वसमयवक्तव्यतानियतान्येवेति स्थितम् । तदेवमभिहिता वक्तव्यता ॥ ९५४ ॥

अथार्थाधिकारमभिधित्सुराह—

[3]सावज्जजोगविरई अज्झयणत्थाहिगार इह सो य । भण्णइ समुदायत्थो ससमयवत्तव्वयादेसो ॥९५५॥

इह सावद्ययोगविरतिः सामायिकाध्ययनस्यार्थाधिकारः, स च समुदायार्थो भण्यत इति प्रागप्युक्तमेव । स एव च स्वसमयवक्तव्यतायाः संपूर्णाया एकदेशोऽभिधीयत इति । उक्तोऽर्थाधिकारः ॥ ९५५ ॥

अथ समवतारमभिधित्सुराह—

[4]अहुणा य समोयारो जेण समोयारियं पइद्दारं । सामाइयं सोऽणुगओ लाघवओ नो पुणो वच्चो ॥ ९५६ ॥

अधुना समवतारोऽवसरमाप्तः । चकारो भिन्नक्रमे, तद्यथा– स च 'लाघवउ त्ति' लाघवमाश्रित्य लाघवार्थमित्यर्थः, अनुगतः पूर्वमेव गतोऽतिक्रान्तः पूर्वमेवाभिहित इत्यर्थः । कथम् ?, इत्याह– येन यस्मात् प्रतिद्वारं सामायिकाध्ययनं समवतारितमेव । ततो नेदानीं पुनरपि समवतारो वाच्यः, तद्व्यापारस्याऽध्ययनसमवतारणलक्षणस्य प्रतिद्वारमनिष्ठितत्वात् । एतदुक्तं भवति– अधुना षष्ठ

---

१ मिथ्यात्वमतसमूहः सम्यक्त्वं यच्च तदुपकारे । वर्तते परसिद्धान्तस्ततस्तस्य सकः स्वसिद्धान्तः ॥ ९५४ ॥ २ घ. छ. ज्ञ. 'त्तसमूहमयं स' ।

३ क. ग. 'दिम' । *४ सावद्ययोगविरतिरध्ययनार्थाधिकार इह स च । भण्यते समुदायार्थः स्वसमयवक्तव्यतादेशः ॥ ९५५ ॥

५ अधुना च समवतारो येन समवतारितं प्रतिद्वारम् । सामायिकं सोऽनुगतो लाघवतो नो पुनर्वाच्यः ॥ ९५६ ॥ मलधारि (मधि)-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

उपक्रमभेदः समवतारः प्रस्तुतः, स च लाघवार्थं सामायिकस्य प्रतिद्वारं समवतारितत्वात् पूर्वमेवाभिहितः, इति न पुनरप्यत्रोच्यते, पौनरुक्त्यप्रसङ्गात् ॥ इति सप्तदशगाथार्थः ॥ ९५६ ॥

॥ इत्युपक्रमः समाप्तः ॥

अथ निक्षेपलक्षणं द्वितीयमनुयोगद्वारमभिधित्सुराह—

भण्णइ घिप्पइ य मुहं निक्खेवपयाणुसारओ सत्थं । ओहो नामं सुत्तं निक्खेतव्वं तओऽवस्सं ॥ ९५७ ॥

यस्माद् नामादिनिक्षेपानुसारतः शास्त्रम्, अध्ययनम्, उद्देशको वा सुखेनैव भण्यतेऽभिधीयते, सुखेनैव च गृह्यतेऽधिगम्यते, तस्मात् शास्त्रादेः संबन्धी ओघो, नाम, सूत्रं चावश्यमेव निक्षेप्तव्यम् । एतेन च यद् निक्षेपस्य पूर्वं सामान्येन त्रैविध्यमुक्तम्, तदिदानीं विशेषतो दर्शितमवगन्तव्यम्; तद्यथा– त्रिविधो निक्षेपः– ओघनिष्पन्नः, नामनिष्पन्नः, सूत्रालापकनिष्पन्नश्चेति ॥ ९५७ ॥

तत्रौघः किमुच्यते ?, इत्याह—

[2]ओहो जं सामण्णं सुयाभिहाणं चउव्विहं तं च । अज्झयणं अज्झीणं आओ ज्झवणा य पत्तेयं ॥९५८॥

नामाइचउब्भेयं वण्णेऊणं सुयाणुसारेणं । सामाइयमाउज्जं चउसु पि कमेण भावेसु ॥ ९५९ ॥

इह यत् श्रुतस्य जिनवचनरूपस्य सामान्यमङ्गा-ऽध्ययनो-द्देशकादिकं नाम तदोघ इत्युच्यते, सामान्यं शास्त्रनामेत्यर्थः । तत्रेह सामायिकस्य प्रस्तुतत्वात् तद्विषयं सामान्यनाम आह– अध्ययनम्, अक्षीणम्, आयः, क्षपणा चेति । इदं च सामायिकादिशास्त्रविशेषस्य सामान्यमध्ययनादिकमभिधानमनुयोगद्वारलक्षणश्रुतानुसारेण प्रत्येकं नामादि चतुर्विधमुपवर्ण्यते; तद्यथा– नामाध्ययनम्, स्थापनाध्ययनम्, द्रव्याध्ययनम्, भावाध्ययनम्; तथा, नामाक्षीणं, स्थापनाक्षीणम्, द्रव्याक्षीणम्, भावाक्षीणम् । एवमाय-क्षपणयोरप्युक्त्वा क्रमेण चतुर्ष्वपि भावेषु भावाध्ययने, भावाक्षीणे, भावाऽऽये, भावक्षपणायां चेत्यर्थः । किम् ?, इत्याह– सामायिकमायोज्यम्– सामायिकमेव भावाध्ययनादिवाच्यत्वेनात्र बोद्धव्यमित्यर्थः ॥ ९५८ ॥ ९५९ ॥

---

१ भण्यते गृह्यते च सुखं निक्षेपपदानुसारतः शास्त्रम् । ओघो नाम सूत्रं निक्षेप्तव्यं ततोऽवश्यम् ॥ ९५७ ॥

२ ओघो यत् सामान्यं श्रुताभिधानं चतुर्विधं तच्च । अध्ययनमक्षीणमायः क्षपणा च प्रत्येकम् ॥ ९५८ ॥
नामादिचतुर्भेदं वर्णयित्वा श्रुतानुसारेण । सामायिकमायोज्यं चतुर्ष्वपि क्रमेण भावेषु ॥ ९५९ ॥ ३ घ. छ. 'दि ना' ।

अथाध्ययनादीनां चतुर्णामपि क्रमेण निरुक्तमाह—

[1]जेण सुहज्झप्पजणं अज्झप्पाणयणमहियमयणं वा । बोहस्स संजमस्स व मोक्खस्स व जं तमज्झयणं ॥९६०॥

इह नैरुक्तेन विधिना प्राकृतस्वाभाव्याच्च, शुभं 'अज्झप्पं चित्तं जणेइ त्ति प्पगारलोवाओ अज्झयणं, अहवा, अज्झप्पाणयणं प्पगार-आकार-णकारलोवाओ अज्झयणं ति' । अथवा, बोधस्य, संयमस्य, मोक्षस्य वाऽधिकमयनं तद्धेतुत्वात् प्रापकं यत् तदध्ययनमिति ॥ ९६० ॥

[3]अज्झीणं दिज्जंतं अव्वोच्छित्तिनयओ अलोओ व्व । आओ नाणाईणं ज्झवणा पावाण खवणं ति ॥९६१॥

अर्थिभ्योऽनवरतं दीयमानमपि वर्धत एव न तु क्षीयत इत्यक्षीणम् । अथवा, अव्यवच्छित्तिनयमतेन सर्वदैवाव्यवच्छेदात्, अलोकवत् अक्षीणम् । आयो लाभः प्राप्तिर्ज्ञानादीनामस्मादित्यायः । क्षपणाऽपचयो निर्जरा पापकर्मणामस्मादिति क्षपणेति । तदेवमभिहितमोघनाम, तदभिधाने चोक्त ओघनिष्पन्नो निक्षेपः ॥ ९६१ ॥

अथ नामनिष्पन्नं निक्षेपमभिधित्सुरध्ययनस्य विशेषनाम, तन्निक्षेपं चाह–

[5]सामाइयं ति नामं विसेसविहियं चउव्विहं तं च । नामाइं निरुत्तीए सुत्तप्फासे व तं वोच्छं ॥ ९६२ ॥

प्रस्तुताध्ययनस्य सामायिकमिति विशेषविहितं नाम । तच्च चतुर्विधम् । कथम् ?, इत्याह– नामादि– नामसामायिकम्, स्थापनासामायिकम्, द्रव्यसामायिकम्, भावसामायिकं चेति । एतच्चार्थनिरूपणतो वक्ष्येऽहम् । क्व ?, इत्याह– निरुक्तौ 'उद्देसे निद्देसे य निग्गमे' इत्यानुपोद्घातनिर्युक्तिगतगाथाद्वयपर्यन्ते 'भेयागरिसपोसणनिरुत्ती' इति यद् निर्युक्तिद्वारं तत्रार्थतोऽभिधास्य इत्यर्थः । यदिवा निर्युक्त्यनुगमभेदरूपायामेव सूत्रस्पर्शिकनिर्युक्तौ वक्ष्य इति ॥ ९६२ ॥

अत्राक्षेप-परिहारौ आह—

---

१ येन शुभाध्यात्मजनकमध्यात्मानयनमधिकमयनं वा । बोधस्य संयमस्य वा मोक्षस्य वा यत् तदध्ययनम् ॥ ९६० ॥ + निरुक्ति- ।

२ अध्यात्मं चित्तं जनयतीति प्प(कार)लोपादध्ययनम्, अथवा, अध्यात्मानयनं प्प(कार) आकार-णकारलोपादध्ययनमिति ।

३ अक्षीणं दीयमानमव्यवच्छित्तिनयतोऽलोक इव । आयो ज्ञानादीनां क्षपणा पापानां क्षपणमिति ॥ ९६१ ॥ ४ क. ग. 'लोय व्व' । उप !

५ सामायिकमिति नाम विशेषविहितं चतुर्विधं तच्च । नामादि निरुक्तौ सूत्रस्पर्शे वा तद् वक्ष्ये ॥ ९६२ ॥ ६ गाथा ९७३ । ७ गाथा ९७४ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]इह जइ कीरा निरुत्ते तत्थ व भणियमिह भण्णए कीस ?। निक्खेवमित्तमिहइं तस्स निरुत्तीए वक्खाणं ॥९६३॥

आह- यद्यत्रापीदं चतुर्विधं विशेषनाम भणनीयत्वेनावसरप्राप्तम्, तर्हि किमुच्यते- निरुक्त्यादौ वक्ष्ये ?। अथ तत्र वक्ष्यते, तर्ह्यत्र किमर्थमुच्यते ?। अत्रोत्तरमाह- 'निक्खेवेत्यादि' इह नामादिनिक्षेपमात्रस्यैव भणनावसरः, स च नामादिश्चातुर्विध्यभणनादुक्त एव, निरुक्तौ तु तदर्थो निरूपयिष्यत इत्यदोषः ॥ ९६३ ॥

पुनरप्यन्यथाऽऽक्षिप्य परिहरति—

[2]तो कीस पुणो सुत्ते, सुत्तालावो तओ न तन्नामं। इह उण नामं नत्थं तं वक्खायं निरुत्तीए ॥ ९६४ ॥

हन्त ! यदि निरुक्तौ सामायिकं व्याख्यायते, तर्हि 'करोमि भदन्त ! सामायिकम्' इत्यादि किमिति पुनरपि सूत्रे व्याख्यायते ?। नैवम्, यतः सूत्रालापक एव तकोऽसौ व्याख्यायते, न पुनस्तन्नामव्याख्यानम्, इह पुनर्नामादिभेदैः सामायिकनाम न्यस्तम्, तच्च निरुक्तौ व्याख्यातम्, इति विषयविभागात् सर्वं सुस्थमिति ॥ ९६४ ॥

पुनः प्रेर्यमुत्थाप्य परिहरति—

[3]इह पुण कीस न भण्णइ जं निक्खेवो इमो स निज्जुत्ती। निज्जुत्ती वक्खाणं निक्खेवो नासमेत्तं तु ॥९६५॥

नन्विहैव निक्षेपद्वारे किमिति न भण्यते न व्याख्यायते सामायिकम्, येन निरुक्तौ व्याख्यायते ?। अत्रोच्यते- यद् यस्मादसौ निक्षेपः प्रस्तुतः, तत्र च प्रस्तुते व्याख्यानस्य कोऽवसरः ?। 'स निज्जुत्ति त्ति' सा पुनर्वक्ष्यमाणा निर्युक्तिरुपोद्घातनिर्युक्तिद्वाररूपत्वाद् निर्युक्तिः। यदि नाम सा निर्युक्तिः, तथापि तत्र व्याख्यानस्य किमायातम् ?, इत्याह- 'निज्जुत्ती वक्खाणं ति' निर्युक्तिरनुगमभेदत्वाद् व्याख्यानात्मिकैव भवति, अतो युक्तं तस्यां व्याख्यानम्। निक्षेपोऽपि तर्हि व्याख्यानरूपो भविष्यति, इत्याह- 'निक्खेवो नासमेत्तं तु त्ति' निक्षेपस्तु नामादिन्यासमात्रात्मक एव वर्तते, न तु व्याख्यानरूपः, अनुगमस्यैव तद्रूपत्वात्। अतः कोऽत्र निक्षेपे व्याख्यानावसरः ? इति ॥ ९६५ ॥

---

१ इह यदि कस्माद् निरुक्तौ तत्र वा भणितमिह भण्यते कस्मात् ?। निक्षेपमात्रमिह तस्य निरुक्तौ व्याख्यानम् ॥ ९६३ ॥

२ ततः कस्मात् पुनः सूत्रे, सूत्रालापः सको न तन्नाम। इह पुनर्नाम न्यस्तं तद् व्याख्यातं निरुक्तौ ॥ ९६४ ॥

३ इह पुनः कस्माद् न भण्यते यद् निक्षेपोऽयं सा निर्युक्तिः। निर्युक्तिर्व्याख्यानं निक्षेपो न्यासमात्रं तु ॥ ९६५ ॥

पुनरपि परमतमाशङ्क्य प्रतिविधातुमाह—

[1]नणु निज्जुत्तिअणुगमे भणिया एसा वि नासनिज्जुत्ती। सच्चमियं निज्जुत्ती इयं तु निक्खेवमित्तस्स॥९६६॥

ननु यदि निर्युक्तावेव व्याख्यानमिष्यते भवद्भिः, तर्ह्यत्रापि ब्रूमो वयं यदुत- एषाऽपि निर्युक्त्यनुगमे न्यासनिर्युक्तिर्भणिता, अयमपीह प्रस्तुतो निक्षेपो वक्ष्यमाणे निर्युक्त्यनुगमे निक्षेपनिर्युक्तित्वेन भणिष्यत इत्यर्थः। इदमुक्तं भवति-अनुगमो द्विविधो वक्ष्यते, तद्यथा- सूत्रानुगमः, निर्युक्त्यनुगमश्च। निर्युक्त्यनुगमस्त्रिविधोऽभिधास्यते- निक्षेपनिर्युक्त्यनुगमः, उपोद्घातनिर्युक्त्यनुगमः, सूत्रस्पर्शिकनिर्युक्त्यनुगमश्चेति। तथा- "से[2] किं तं निक्खेवनिज्जुत्तिअणुगमे ?। निक्खेवनिज्जुत्तिअणुगमे अणुगए, वक्खमाणे य"। एतदपि वक्ष्यते। तत्रायमर्थः- अत्रैव प्रागावश्यकसामायिकादिपदानां नाम-स्थापनादिनिक्षेपद्वारेण यद् व्याख्यानं कृतम्, तेन निक्षेपनिर्युक्त्यनुगमोऽनुगतः प्रोक्तो द्रष्टव्यः, सूत्रालापकानां निक्षेपप्रस्तावे पुनर्वक्ष्यते च। तदेवमेतेनैषोऽपि निक्षेपो निक्षेपनिर्युक्तित्वेनाऽनुगमे प्ररूप्यमाणेऽभिधास्यते। अतः किमुच्यते- 'नेह व्याख्यानम्, किन्तु निरुक्तावेव इति ?।

तदेवमतिनिपुणं परस्य प्रेर्यमवलोक्याऽभ्युपगमपूर्वकमुत्तरमाह- 'सच्चमित्यादि' सत्यम्, इयमपि प्रस्तुतनिक्षेपलक्षणा निर्युक्तिः, किन्त्वियं निक्षेपमात्रस्य नाम-स्थापनादिनिक्षेपस्वरूपनिरूपणायैव, न विशेषार्थस्येत्यर्थः; निरुक्तौ तु '[3]सम्मदिट्ठि अमोहो सोहीसब्भावदंसणं बोही' इत्यादिना ग्रन्थेन शब्दार्थादिविचारः करिष्यत इति भावः ॥ ९६६ ॥

अथवा, किमनेन बहुना प्रोक्तेन ?, अतिगहनं प्रकरणमिदम्, अतः संक्षिप्य विशेषविषयविभागतात्पर्यमुच्यते, तथा चाह-

[4]निक्खेवमित्तमिह वा अत्थवियारो य नासजुत्तीए। सद्दगओ य निरुत्ते सुत्तप्फासम्मि सुत्तगओ ॥९६७॥

अथवा, इह निक्षेपद्वारे सामायिकस्य नामादिनिक्षेपमात्रमेवोच्यते, तदर्थनिरूपणमात्रमेव च निक्षेपनिर्युक्तौ निर्दिश्यते। नैरुक्तस्तु शब्दगतो विचार उपोद्घातनिर्युक्त्यन्तर्गते निरुक्तिद्वारे- 'सम्मदिट्ठि अमोहो' इत्यादिना ग्रन्थेन शब्दार्थविचारः करिष्यत इत्यर्थः। सूत्रस्पर्शे तु सूत्रगतो विचारः- सूत्रस्पर्शिकनिर्युक्तौ सूत्रालापद्वाराऽऽयातस्य सामायिकस्यार्थविचारः क्रियते, न तु सामायिकनाम्न इत्यर्थः। एवं विषयविभागेनाऽवस्थानात् सर्वं समञ्जसमिति। तदेवमभिहितो नामनिष्पन्नोऽपि निक्षेपः ॥ ९६७ ॥

---

१ ननु निर्युक्त्यनुगमे भणितैषाऽपि न्यासनिर्युक्तिः। सत्यमियं निर्युक्तिरियं तु निक्षेपमात्रस्य ॥ ९६६ ॥

२ अथ कः स निक्षेपनिर्युक्त्यनुगमः ?। निक्षेपनिर्युक्त्यनुगमोऽनुगतः, वक्ष्यमाणश्च। ३ गाथा २७६४।

४ निक्षेपमात्रमिह वाऽर्थविचारश्च न्यासनिर्युक्तौ। शब्दगतश्च निरुक्ते सूत्रस्पर्शे सूत्रगतः ॥ ९६७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ सूत्रालापकनिक्षेपस्याऽवसरः, तत्राह—

[1]जो सुत्तपयन्नासो सो सुत्तालावयाण निक्खेवो । इह पत्तलक्खणो सो निक्खिप्पइ न पुण किं कज्जं ? ॥९६८॥
सुत्तं चेव न पावइ इह सुत्तालावयाण कोऽवसरो ? । सुत्ताणुगमे काहिइ तण्णासं लाघवनिमित्तं ॥९६९॥

'[2]करेमि भन्ते! सामाइयं' इत्यादिसूत्रपदानां यो नाम-स्थापनादिरूपेण न्यासः, स सूत्रालापकनिक्षेपः । स चेह प्राप्तलक्षणः—प्राप्तावसर एव, न पुनर्निक्षिप्यते— न पुनः सूत्रालापक इदानीमेव निक्षिप्यत इति भावः । किं कार्यं— कस्माद्धेतोः ?, इत्याह— सूत्रमेव तावदिदानीं न प्राप्नोति, अतः सूत्रालापकानामिह निक्षेपे कर्तव्ये कोऽवसरः ?। इदमुक्तं भवति-सूत्रानुगम एव सूत्रमुच्चारयितव्यम्, उच्चारिते च सूत्रे तदालापकविभागः; तद्विभागे च तन्निक्षेपः । अतः सूत्राभावात् कः सूत्रालापकानामिह निक्षेपेऽवसरः ?। तर्हि कदा तन्निक्षेपो विधेयः ?, इत्याह— सूत्रानुगमे प्राप्ते करिष्यति लाघवार्थं सूरिस्तन्निक्षेपमिति ॥ ९६८ ॥ ९६९ ॥

अथ पूर्वापरासंबद्धतामाशङ्क्य परिहरति—

[3]इह जइ पत्तो वि तओ न नस्सए कीस भण्णए इहइं । दाइज्जइ सो निक्खेवमेत्तसामण्णओ नवरं ॥९७०॥

नन्विह प्राप्तावसरोऽपि यदि तकोऽसौ सूत्रालापकनिक्षेपो न न्यस्यते न विधीयते, तर्ह्यत्र किमर्थं भण्यते—'सूत्रालापकनिक्षेपश्च' इत्येवं निक्षेपतृतीयभेदत्वेन किमर्थमिहोपन्यस्यते ?, अनुगमेऽपि किमिति न भण्यते ? इति भावः । सत्यम्, किन्त्वोघनिष्पन्नादिना निक्षेपेण सह निक्षेपमात्रसाम्यात् नवरं केवलं दर्श्यत एवाऽयमत्र, न तूपन्यस्यते, ग्रन्थगौरवभयात् ॥ इति चतुर्दशगाथार्थः ॥९७०॥

॥ इति निक्षेपः समाप्तः ॥

अथानुगमलक्षणं तृतीयमनुयोगद्वारं संबन्धोपदर्शनपूर्वकमाह—

[4]संपयमोहाईणं संनिक्खित्ताणमणुगमो कज्जो । सोऽणुगमो दुविगप्पो नेओ निज्जुत्ति-सुत्ताणं ॥९७१॥

---

१ यः सूत्रपदन्यासः स सूत्रालापकानां निक्षेपः । इह प्राप्तलक्षणः स निक्षिप्यते न पुनः किं कार्यम् ? ॥ ९६८ ॥
सूत्रमेव न प्राप्नोतीह सूत्रालापकानां कोऽवसरः ? । सूत्रानुगमे करिष्यति तन्न्यासं लाघवनिमित्तम् ॥ ९६९ ॥ २ करोमि भदन्त! सामायिकम् ।
३ इह यदि प्राप्तोऽपि सको न न्यस्यते कस्माद् भण्यते इह ? । दर्श्यते स निक्षेपमात्रसामान्यतो नवरम् ॥ ९७० ॥
४ सांप्रतमोघादीनां संनिक्षिप्तानामनुगमः कार्यः । सोऽनुगमो द्विविकल्पो ज्ञेयो निर्युक्ति-सूत्रयोः ॥ ९७१ ॥

ओघादीनां निक्षिप्तानां सतां सांप्रतमनुगमस्तद्व्याख्यानरूपः कार्य इत्यनुगमस्यावसरः । स च द्विविधः— निर्युक्त्यनुगमः, सूत्रानुगमश्च; छन्दोऽनुवृत्त्या च कयाचिदित्थं व्यत्ययोपन्यासः । इत्थं च पुनर्द्रष्टव्यः— सूत्रानुगमः, निर्युक्त्यनुगमश्चेति । तथा चानुयोगद्वारेऽभ्युक्तम्— "[1]अणुगमे दुविहे पन्नत्ते, तं जहा— सुत्ताणुगमे, निज्जुत्तिअणुगमे य"। "[2]निज्जुत्तिअणुगमे तिविहे पन्नत्ते, तं जहा— निक्खेवनिज्जुत्तिअणुगमे, उवग्घायनिज्जुत्तिअणुगमे, सुत्तप्फासियनिज्जुत्तिअणुगमे य" इति ॥ ९७१ ॥

एतदेव निर्युक्तित्रैविध्यं भाष्यकारोऽप्याह—

[3]निज्जुत्ती तिविगप्पा नासो-वग्घाय-सुत्तवक्खाणं । निक्खेवस्साणुगया उद्देसाईहुवग्घाओ ॥ ९७२ ॥

निर्युक्तिस्त्रिविकल्पा त्रिभेदा । कथम् ?, इत्याह— 'नासो-वग्घाय-सुत्तवक्खाणं ति' न्यासो नामादिनिक्षेपः, उपोद्घातः शास्त्रोत्पत्तिः, सूत्रं प्रतीतं, तेषां व्याख्यानम्— निक्षेपनिर्युक्तिः, उपोद्घातनिर्युक्तिः, सूत्रस्पर्शिकनिर्युक्तिश्चेत्यर्थः । तत्र निक्षेपनिर्युक्तिरनुगता— अनुक्रान्ता, पूर्वमेवोक्तेति यावदिति, अत्रैव प्रागावश्यक-सामायिकादिपदानां नाम-स्थापनादिनिक्षेपद्वारेण यद् व्याख्यानं कृतं, तेन निक्षेपनिर्युक्तिरनुगता प्रोक्ता द्रष्टव्येत्यर्थः । उपोद्घातनिर्युक्तिस्तूद्देश-निर्देशादिभिर्द्वारैरवगन्तव्येति ॥ ९७२ ॥

तान्येवोद्देशादीनि द्वाराण्याह—

[4]उद्देसे निद्देसे य निग्गमे खेत्त काल पुरिसे य । कारण पच्चय लक्खण नए समोयारणाणुमए ॥ ९७३ ॥
किं कइविहं कस्स कहिं केसु कहं केच्चिरं हवइ कालं । कइ संतरमविरहियं भवा-गरिस-फोसणनिरुत्ती॥९७४॥

इदं गाथाद्वयमपि पुरस्ताद् विस्तरेण व्याख्यास्यते ॥ ९७३ ॥ ९७४ ॥

आक्षेप-परिहारौ तु यथासंभवं केषुचिद् द्वारेष्वत्रापि विभणिषुः, उद्देश-निर्देशस्वरूपं तावदाह—

---

१ अनुगमो द्विविधः प्रज्ञप्तः, तद्यथा— सूत्रानुगमः, निर्युक्त्यनुगमश्च । २ निर्युक्त्यनुगमस्त्रिविधः प्रज्ञप्तः, तद्यथा— निक्षेपनिर्युक्त्यनुगमः, उपोद्घातनिर्युक्त्यनुगमः, सूत्रस्पर्शिकनिर्युक्त्यनुगमश्च ।
३ निर्युक्तिस्त्रिविकल्पा न्यासो-पोद्घात-सूत्रव्याख्यानम् । निक्षेपस्यानुगता उद्देशादिभिरुपोद्घातः ॥ ९७२ ॥
४ उद्देशो निर्देशश्च निर्गमः क्षेत्रं कालः पुरुषश्च । कारणं प्रत्ययो लक्षणं नयः समवतारणाऽनुमतः ॥ ९७३ ॥
किं कतिविधं कस्य कुत्र केषु कथं कियच्चिरं भवति कालम् । कति सान्तरमविरहितं भाव-ऽऽकर्ष-स्पर्शननिरुक्तिः ॥ ९७४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]अज्झयणं उद्देसोऽभिहियं सामाइयं ति निद्देसो । सामण्ण-विसिट्ठाणं अभिहाणं सत्थ-नामाणं ॥९७५॥

शास्त्रं च नाम च शास्त्र-नामनी तयोः सामान्य-विशिष्टयोः सामान्य-विशेषभूतयोरोघनिष्पन्ने नामनिष्पन्ने च निक्षेपे यदभिधानमभिहितम्, तावुद्देश-निर्देशौ । यथासंख्येन चेह योजना, तद्यथा– सामान्यस्य शास्त्रस्यौघनिष्पन्ननिक्षेपे यदध्ययनमित्यभिधानमभिहितं स उद्देश इत्युच्यते, नामनिष्पन्ने च निक्षेपे विशिष्टस्य नाम्नो यत् सामायिकमित्यभिधानमभिहितं स निर्देश इत्यभिधीयत इति ॥९७५॥

अथ प्रेरकः प्राह—

[2]दारोवन्नासाइसु निक्खेवे ओह-नामनिप्फन्ने । उद्देसो निद्देसो भणिओ इह किं पुणग्गहणं ? ॥ ९७६ ॥

आह– नन्वसावावश्यकशास्त्रस्य प्रथममध्ययनं सामायिकम्, तस्य च चत्वार्यनुयोगद्वाराणि, इत्यादिना द्वारोपन्यासादिषु प्रक्रमेषु; यदिवा, ओघनिष्पन्न-नामनिष्पन्नयोर्निक्षेपयोः सामान्यनामरूप उद्देशः, विशेषनामरूपश्च निर्देशोऽनेकशः प्रोक्त एव; किमर्थमिहोपोद्घात-निर्युक्तौ पुनरपि तयोर्ग्रहणम् ? इति ॥ ९७६ ॥

अत्रोत्तरमाह—

[3]इह विहियाणमणागयगहणं तत्थन्नहा कहं कुणउ । तेसिं गहणमकाउं दारन्नासाइकज्जाइं ? ॥ ९७७ ॥

इहोपोद्घाते आद्यद्वारद्वयविहितयोरेवोद्देश-निर्देशयोस्तत्र द्वारोपन्यासादौ शास्त्रकृताऽनागतमेव ग्रहणं कृतम्, अन्यथा हि तयोः सामान्य-विशेषनामरूपयोरुद्देश-निर्देशयोस्तत्र ग्रहणमकृत्वा कथं निराश्रयाणि द्वारोपन्यासादिकार्याणि करोतु ? इति ॥ ९७७ ॥

प्रतिविधानान्तरमाह—

[4]अहवा तत्थुद्देसो निद्देसो वि य कओ इहं तेसिं । अत्थाणुगमावसरे विहाणवक्खाणमारद्धं ॥ ९७८ ॥

---

१ अध्ययनमुद्देशोऽभिहितं सामायिकमिति निर्देशः । सामान्य-विशिष्टयोरभिधानं शास्त्र-नाम्नोः ॥ ९७५ ॥

२ द्वारोपन्यासादिषु निक्षेप ओघ-नामनिष्पन्नयोः । उद्देशो निर्देशो भणित इह किं पुनर्ग्रहणम् ? ॥ ९७६ ॥

३ इह विहितयोरनागतग्रहणं तत्रान्यथा कथं करोतु । तेषां ग्रहणमकृत्वा द्वारन्यासादिकार्याणि ? ॥ ९७७ ॥

४ अथवा तत्रोद्देशो निर्देशोऽपि च कृत इह तयोः । अर्थानुगमावसरे विधानव्याख्यानमारब्धम् ॥ ९७८ ॥

अथवा, तत्र द्वारोपन्यासादौ सामान्य-विशेषाभिधानरूप उद्देशो निर्देशश्च कृत इत्युपगच्छामः, केवलमिहार्थानुगमावसरेऽर्थव्याख्याप्रस्तावे तयोः पूर्वविहितयोरुद्देश-निर्देशयोर्विधानतो भेदतो व्याख्यानमारब्धमित्यदोष इति ॥ ९७८ ॥

अन्ये तु– ब्रुवते । किम् ?, इत्याह—

[1]अन्ने उ विसेसमिहं भणंति नोद्देसबद्धमेयं ति । जाणावियमज्झयणं समासदारावयारेणं ॥ ९७९ ॥

अन्ये तु पूर्वविहितयोरपीह विशेषमाचक्षते– नोद्देशकवद्धमिदमध्ययनमित्येतज्ज्ञापितं किल । कुतः ?, अङ्ग-श्रुतस्कन्धाध्ययनसमासद्वारावतारात् । इदमत्र हृदयम्–

[2]'नामं ठवणा दविए खेत्ते काले समासउद्देसे । उद्देसुद्देसम्मि य भावम्मि य होइ अट्ठमओ ॥ १ ॥'

इति पुरस्तादिहैव वक्ष्यमाणगाथायामुद्देशोऽष्टविधोऽभिधास्यते; तथा, [3]'एमेव य निद्देसो' इत्यादिगाथायां निर्देशोऽपि चाष्टविधो वक्ष्यते । तत्र च समासद्वारे संक्षेपाभिधायकं नाम समासोद्देश इति व्याख्यास्यते; तद्यथा– अङ्गम्, श्रुतस्कन्धः, अध्ययनम्, उद्देश इत्यादि । तत्रेदं सामायिकाध्ययनं किलाध्ययनोद्देशो भवति, न तूद्देशोद्देशः, उद्देशरहितत्वात् । एतच्च तत्र व्याख्यास्यते । तदत्रोद्देश-निर्देशयोरष्टविधत्वभणनेन षष्ठं समासद्वारमायातम् । अनेन च समासद्वारेण विचार्यमाणेनेदमध्ययनमुद्देशरहितमिति ज्ञापितम् । एतच्चैवोद्देश-निर्देशाभणनेन निर्मूलस्य समासद्वारस्यैवाऽभावात् किल न ज्ञायेतेति ॥ ९७९ ॥

एतच्च यत्किञ्चिदेव, इति दर्शयति—

[4]अंगाइपण्हकाले कालियसुयमाणसमवयारे य । तमणुद्देसयबद्धं भणियं चिय इह किमब्भहियं ?॥ ९८० ॥

'आवश्यकं किमङ्गम्, अङ्गानि ?' इत्यादिप्रश्नकाल एव कालिकश्रुतपरिमाणसंख्यावतारे चाध्ययनसंख्यावतारात्, 'नोद्देशकः, नोद्देशकाः' इति निषेधाच्च तत् सामायिकाध्ययनमुद्देशकवद्धं न भवतीति भणितमेव, इह किमभ्यधिकमज्ञातं ज्ञायते ? । तस्मादु यत्किञ्चिदेवेदम् । अत एतयोरिह भणनं व्याख्यानार्थमेवेति स्थितम् । तदेवं कृतोद्देश-निर्देशविषया चालना, प्रत्यवस्थानं च ॥ ९८० ॥

---

१ अन्ये तु विशेषमिह भणन्ति नोद्देशवद्धमेतदिति । ज्ञापितमध्ययनं समासद्वारावतारेण ॥ ९७९ ॥

२ नाम स्थापना द्रव्ये क्षेत्रे काले समासोद्देशे । उद्देशोद्देशे च भावे च भवत्यष्टमकः ॥ १ ॥ ३ एवमेव च निर्देशः ।

४ अङ्गादिप्रश्नकाले कालिकश्रुतमानसमवतारे च । तदनुद्देशकबद्धं भणितमेवेह किमभ्यधिकम् ? ॥ ९८० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथवा, तत्र द्वारोपन्यासादौ सामान्य-विशेषाभिधानरूप उद्देशो निर्देशश्च कुत इत्युपगच्छामः, केवलमिहार्थानुगमावसरेऽर्थव्याख्यानप्रस्तावे तयोः पूर्वविहितयोरुद्देश-निर्देशयोर्विधानतो भेदतो व्याख्यानमारब्धमित्यदोष इति ॥ ९७८ ॥

अन्ये तु- ब्रुवते । किम् ?, इत्याह—

[1]अन्ने उ विसेसमिहं भणंति नोद्देसबद्धमेयं ति । जाणावियमज्झयणं समासदारावयारेणं ॥ ९७९ ॥

अन्ये तु पूर्वविहितयोरपीह विशेषमाचक्षते- नोद्देशकबद्धमिदमध्ययनमित्येतज्ज्ञापितं किल । कुतः ?, अङ्ग-श्रुतस्कन्धाध्ययनसमासद्वारावतारात् । इदमत्र हृदयम्-

'[2]नामं ठवणा दविए खेत्ते काले समासउद्देसे । उद्देसुद्देसम्मि य भावम्मि य होइ अट्ठमओ ॥ १ ॥'

इति पुरस्तादिहैव वक्ष्यमाणगाथायामुद्देशोऽष्टविधोऽभिधास्यते; तथा, [3]एमेव य निद्देसो' इत्यादिगाथायां निर्देशोऽपि चाष्टविधो वक्ष्यते । तत्र च समासद्वारे संक्षेपाभिधायकं नाम समासोद्देश इति व्याख्यास्यते; तद्यथा- अङ्गम्, श्रुतस्कन्धः, अध्ययनम्, उद्देश इत्यादि । तत्रेदं सामायिकाध्ययनं किलाध्ययनोद्देशो भवति, न तूद्देशोद्देशः, उद्देशरहितत्वात् । एतच्च तत्र व्याख्यास्यते । तदनेनोद्देश-निर्देशयोरष्टविधत्वभणनेन षष्ठं समासद्वारमायातम् । अनेन च समासद्वारेण विचार्यमाणेनेदमध्ययनमुद्देशरहितमिति ज्ञापितम् । एतच्चेहोद्देश-निर्देशाभणनेन निर्मूलस्य समासद्वारस्यैवाऽभावात् किल न ज्ञायेतेति ॥ ९७९ ॥

एतच्च यत्किञ्चिदेव, इति दर्शयति—

[4]अंगाइपण्हकाले कालियसुयमाणसमवयारे य । तमणुद्देसयबद्धं भणियं चिय इह किमब्भहियं ?॥ ९८० ॥

'आवश्यकं किमङ्गम्, अङ्गानि ?' इत्यादिप्रश्नकाल एव कालिकश्रुतपरिमाणसंख्यावतारे चाध्ययनसंख्यावतारात्, 'नोद्देशकः, नोद्देशकाः' इति निषेधाच्च तत् सामायिकाध्ययनमुद्देशकबद्धं न भवतीति भणितमेव, इह किमभ्यधिकमज्ञातं ज्ञायते ? । तस्माद् यत्किञ्चिदेवेदम् । अत एतयोरिह भणनं व्याख्यानार्थमेवेति स्थितम् । तदेवं कृतोद्देश-निर्देशविषया चालना, प्रत्यवस्थानं च ॥ ९८० ॥

---

१ अन्ये तु विशेषमिह भणन्ति नोद्देशबद्धमेतदिति । ज्ञापितमध्ययनं समासद्वारावतारेण ॥ ९७९ ॥

२ नाम स्थापना द्रव्ये क्षेत्रे काले समासोद्देशे । उद्देशोद्देशे च भावे च भवत्यष्टमकः ॥ १ ॥ ३ एवमेव च निर्देशः ।

४ अङ्गादिप्रश्नकाले कालिकश्रुतमानसमवतारे च । तदनुद्देशकबद्धं भणितमेवेह किमभ्यधिकम् ? ॥ ९८० ॥

५ परिहारमाह—

[1]निद्देसमेत्तमुत्तं वक्खाणिज्जइ सवित्थरं तमिह । अहवा सुयस्स भणियं लक्खणमिह तं चउण्हं पि ॥ ९८४ ॥

निर्देशमात्रमेव लक्षणस्य प्रागुक्तम्- निर्दिष्टमेव पूर्वं लक्षणम्, न तु तथाविधव्याख्यया व्याख्यातमित्यर्थः । इह त्वनुगमे व्याख्यानप्रस्तावात् सविस्तरं तद् व्याख्यायते । अथवा, स क्षायोपशमिको भावः श्रुतसामायिकस्यैव पूर्वं लक्षणमुपपद्यते, इह तु श्रद्धान-ज्ञान-देशविरति-सर्वविरतिरूपं चतुर्णामपि सम्यक्त्व-श्रुत-देशचारित्र-सर्वचारित्रसामायिकानां लक्षणमुच्यत इति[2] विशेषः ॥९८४॥

अथ नयद्वारे आक्षेपमाह—

[3]भणिया नयप्पमाणे भण्णंतीहं नया पुणो कीस ? । मूलदारे य पुणो एएसिं को णु विणिओगो ? ॥९८५॥

ननु पूर्वं नयप्रमाणे भणिता एव नयाः, किमिहोपोद्घाते पुनरपि भण्यन्ते ?; तथा, वक्ष्यमाणे चतुर्थे नयलक्षणे[4] मूलानुयोगद्वारे भणिष्यन्ते । तदमीषां पूर्वमनेकशो भणितानां पुनर्भणने को विनियोगः किं फलम् ?, न किञ्चिदित्यर्थः ॥ ९८५ ॥

अत्र परिहारमाह—

[5]जे चिय नयप्पमाणे[6] ते चिय इहइं सवित्थरा भणिया । जं तमुवक्कममेत्तं वक्खाणमिणं अणुगमो त्ति ॥९८६॥

य एव प्राक् प्रमाणद्वारे संक्षेपमात्रेण नया उक्ताः, त एवेह सविस्तरा भणिताः, अग्रे भणिष्यन्त इति भावः । कुतः ?, यत्तस्तदध्ययनोपक्रमणरूपमुपक्रममात्रम्, एतत् स्वर्थानुगम इति कृत्वा नयानां व्याख्यानमिति ॥ ९८६ ॥

परिहारान्तरमाह—

[7]अहवा तत्थ पमाणं इहं सरूवावहारणं तेसिं । तत्तोवक्कंता वा इह तदणुमयावयारोऽयं ॥ ९८७ ॥

अथवा, प्रमाणद्वाराधिकारात् प्रमीयते वस्त्वेभिरिति प्रमाणं भावमात्रं नयानां तत्राभिहितम्, इह तूपोद्घातनिर्युक्त्यनुगमे

---

१ निर्देशमात्रमुक्तं व्याख्यायते सविस्तरं तदिह । अथवा श्रुतस्य भणितं लक्षणमिह तच्चतुर्णामपि ॥ ९८४ ॥ २ घ. छ. 'ति शे' ।

३ भणिता नयप्रमाणे भण्यन्त इह नयाः पुनः कस्मात् ? । मूलद्वारे च पुनरेतेषां को नु विनियोगः ? ॥ ९८५ ॥ ४ घ. छ. 'णे मोला' ।

५ य एव नयप्रमाणे त एवेह सविस्तरा भणिताः । यत् तदुपक्रममात्रं व्याख्यानमिदमनुगम इति ॥ ९८६ ॥ ६ क. ग. 'णे ति चि' ।

७ अथवा तत्र प्रमाणमिह स्वरूपावहारणं तेषाम् । तत्रोपक्रान्ता वा इह तदनुमतावतारोऽयम् ॥ ९८७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेषां सरूपव्याख्यानम्, अथवा, तत्रोपक्रान्ताः, इह स्वयं तदनुमतावतारश्चिन्त्यते। इदमुक्तं भवति– प्रागुपक्रमाधिकारादध्ययनं नयैरुपक्रम्यते, इह तु कस्य नयस्य किं सामायिकमनुमतम् ? इति चिन्त्यते; तथा च वक्ष्यति–

'तव संजमो अणुमओ निग्गंथं पवयणं च ववहारो। सद्दुज्जुसुयाणं पुण निव्वाणं संजमो चेव ॥ १ ॥'

तेषां च नयानामिह समवतरणं समवतारो यत्र संभवति तत्र दर्शनीयः, यद् वक्ष्यते– 'मूढनइयं सुयं कालियं तु न नया समोयरंति इहं' इत्यादीति ॥ ९८७ ॥

मूलद्वारनयैः सहामीषां भेदमाह–

[1]सामाइयसमुदायत्थमेत्तवावारतप्परा एए। मूलद्दारनया पुण सुत्तप्फासोवओगपरा ॥ ९८८ ॥

सर्वेऽपि चैते नय-प्रमाणोक्ताः, उपोद्घातनिर्युक्तिद्वारोक्ताश्च नयाः सामायिकसमुदायार्थमात्रे व्याप्रियन्ते, न तु सूत्रार्थविनियोगिनः। वक्ष्यमाणास्तु मूलद्वारनयाः प्रतिपदं सूत्रार्थविषया इति विशेष इति ॥ ९८८ ॥

अथ किंद्वारे आक्षेप-परिहारौ प्राह–

[4]जीवगुणो नाणं ति य भणिए इह किं ति का पुणो संका ?। तं चिय किं जीवाओ अण्णमणण्णं ति संदेहो ॥९८९॥

ननु प्रमाणद्वारभेदे गुणप्रमाणे सामायिकं जीवगुणः तत्रापि ज्ञानम्, इत्युक्तेऽत्र 'किं सामायिकम् ?' इति का शङ्का येन किंद्वारमुच्यते ?, इत्याह– 'तं चियेत्यादि' तदेव सामायिकं किं जीवादन्यत्, अनन्यद् वा ? इति संदेहः, तदपनोदार्थमिह किंद्वारोपन्यास इति ॥ ९८९ ॥

अथ कथंद्वारविषयावाक्षेप-परिहारौ प्राह–

भणिए खओवसमियं ति किं पुणो लब्भए कहं तं ति। इह सो च्चिय चिंतिज्जइ किह लब्भइ सो खओवसमो ? ॥९९०॥

---

१ तपः संयमोऽनुमतो नैर्ग्रन्थं प्रवचनं च व्यवहारः। शब्द-ऋजुसूत्रयोः पुनर्निर्वाणं संयम एव ॥१॥

२ मूढनयिकं श्रुतं कालिकं तु न नयाः समवतरन्तीह।

३ सामायिकसमुदायार्थमात्रव्यापारतत्परा एते। मूलद्वारनयाः पुनः सूत्रस्पर्शोपयोगपराः ॥९८८॥

४ जीवगुणो ज्ञानमिति च भणिते इह किमिति का पुनः शङ्का ?। तदेव किं जीवादन्यदनन्यदिति संदेहः ॥९८९॥

५ भणिते क्षायोपशमिकमिति किं पुनर्लभ्यते कथं तदिति। इह स एव चिन्त्यते कथं लभ्यते स क्षयोपशमः ? ॥९९०॥

ननु नामद्वारे 'क्षायोपशमिकं सामायिकम्' इत्युक्ते 'तदावरणक्षयोपशमात् तल्लभ्यते' इत्यर्थोदुक्तमेव भवति। अतः 'कथं तल्लभ्यते ?' इत्यर्थप्रतिपादकं किमितीह पुनरपि कथंद्वारमुच्यते ?। अत्रोत्तरमाह– इह कथमितिद्वारे स एवं क्षयोपशमश्चिन्त्यते। कथम् ?, इत्याह— कथं लभ्यते स क्षयोपशमः ?, इत्येष विशेषः ॥ ९९० ॥

अथ द्वारबाहुल्याद् ग्रन्थविस्तरमवलोक्य संक्षिप्तमाह—

[2]किं बहुणा, जमुवक्कम-निक्खेवेसु भणियं पुणो भणइ। अत्थाणुगमावसरे तं वक्खाणाहिगारत्थं ॥९९१॥

किं बहुना ?, सर्वेष्वप्येतेषूपोद्घातद्वारेषु यदुपक्रम-निक्षेपयोर्भणितमपि पुनरप्याचार्यो भणति, तदिहार्थानुगमावसरे पूर्वोपक्रान्तनिक्षिप्तवस्तुव्याख्यानाधिकारार्थम्, इत्येवं भावनीयमिति ॥ ९९१ ॥

तदेवमुपोद्घातोक्तेष्वेतेषूद्देशादिद्वारेषु प्रत्येकं विशेषतश्चालना-प्रत्यवस्थाने अभिधाय, इदानीं सामान्येन सर्वस्याऽप्युपोद्घातस्य चालनामाह—

[3]सत्थसमुत्थाणत्थो पायेणोवक्कमो तहाऽयं पि। सत्थस्सोवग्घाओ को एएसिं पइविसेसो ? ॥ ९९२ ॥

आह– ननूपक्रमोऽपि प्रायः शास्त्रसमुत्थानार्थमेव, तत्रानुपूर्व्यादिभिर्द्वारैरुपक्रम्य शास्त्रं नामादिन्यासव्याख्यानयोग्यतामानीयत इत्यर्थः; तथाऽयमप्युपोद्घातः शास्त्रस्योद्देश-निर्देश-निर्गमादिभिर्द्वारैरुत्थानमुपवर्ण्य व्याख्यानयोग्यतामुपकल्पयति, इति कोऽनयोर्विशेषः ?– न कश्चित्। तत एतयोर्द्वयोरन्यतर एव वाच्य इत्यभिप्राय इति ॥ ९९२ ॥

प्रत्यवस्थानमाह—

[5]उद्देसमेत्तनियओ उवक्कमोऽयं तु तव्विबोहत्थं। पायेणोवग्घाओ नणु भणिओऽयं जओऽणुगमो ॥ ९९३ ॥

उद्देशमात्रनियत एवोपक्रमः– नाम-स्थापना-द्रव्यादिभिः, आनुपूर्व्यादिभिश्च भेदैरुपक्रमः शास्त्रमुद्दिशत्येव, न तु व्याख्यानयतीत्यर्थः। अयं पुनरुपोद्घातः प्रायेण तस्य शास्त्रस्य विबोधार्थो व्याख्यानार्थः। कुत इदं ज्ञायते ?, इत्याह– ननु यस्मादयं प्रस्तुतोऽनुगमो भणितः, उपोद्घातश्चानुगमभेद एव, अनुगमस्य च व्याख्यानरूपत्वात् सिद्धमुपोद्घातस्य व्याख्यानार्थत्वमिति ॥ ९९३॥

---

१ क. ग. 'व च क्ष'। २ किं बहुना, यदुपक्रम-निक्षेपयोर्भणितं पुनर्भणति। अर्थानुगमावसरे तद् व्याख्यानाधिकारार्थम् ॥ ९९१ ॥

३ शास्त्रसमुत्थानार्थः प्रायेणोपक्रमस्तथाऽयमपि। शास्त्रस्योपोद्घातः क एतेषां प्रतिविशेषः ? ॥ ९९२ ॥ ४ क. 'स्त्रोद्देशोद्देशनि'।

५ उद्देशमात्रनियत उपक्रमोऽयं तु तद्विबोधार्थम्। प्रायेणोपोद्घातो ननु भणितोऽयं यतोऽनुगमः ॥ ९९३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

परिहारान्तरमाह—

[1]नासस्स व संबंधणमुवक्कमोऽयं तु सुत्तवक्खाए । संबंधोवग्घाओ भण्णइ जं सा तदंतम्मि ॥ ९९४ ॥

अथवा, न्यासस्याऽध्ययनसंबन्धिनो नामादिनिक्षेपस्य संबन्धनं तद्योग्यताऽऽपादनमुपक्रम उच्यते, तदन्ते तत्प्रतिपादनात् । अयं तूपोद्घातः सूत्रव्याख्यायाः संबन्धस्तद्योग्यताव्यवस्थापनरूपः, यद् यस्मात् तदन्ते उपोद्घातान्ते सैव सूत्रव्याख्या भण्यते । इत्युपक्रमोपोद्घातयोर्विशेषः । तदेवमभिहितं संक्षेपेणोपोद्घातनिर्युक्तेर्भावार्थमात्रम् ; विस्तरार्थस्तु पुरस्तादभिधास्यते ॥ ९९४ ॥

अथ सूत्रस्पर्शिकनिर्युक्तेरवसरः, तदाह—

[2]संपइ सुत्तप्फासियनिज्जुत्ती जं सुयस्स वक्खाणं । तीसेऽवसरो सा उण पत्ता वि ण भण्णए इहइं॥९९५॥

यत् सूत्रस्य व्याख्यानं सा सूत्रस्पर्शिकनिर्युक्तिः । सूत्रं व्याख्यानहेतोः स्पृशतीति सूत्रस्पर्शिका, सा चासौ निर्युक्तिश्च सूत्रस्पर्शिकनिर्युक्तिरित्यर्थः । सांप्रतं तस्या भणितव्याऽवसरः, परं सा क्रमप्राप्ताऽपि नेह भण्यते ॥ ९९५ ॥

अत्र विनेयप्रश्नमाशङ्क्योत्तरमाह—

[3]किं जेणासइ सुत्ते कस्स तई तं जया कमप्पत्ते । सुत्ताणुगमे वोच्छिइ होहिइ तीए तया भागो ॥९९६॥

किं कारणम्, येन क्रमप्राप्तापि नेहासौ भण्यते ? । उच्यते– येनाऽसति सूत्रे ' कस्स तई त्ति ' कस्य सा प्रवर्तते ? । सूत्रं हि स्पृशतीति सूत्रस्पर्शिका भण्यते, तच्च नास्ति, तत्कथं तदवसरः ? । कदा पुनरसौ तर्हि भविष्यति ?, इत्याह– 'तमित्यादि' तत् सूत्रं क्रमप्राप्ते सूत्रानुगमे यदा वक्ष्यति, तदा तस्यास्तदर्थव्याख्यारूपत्वाद् भागोऽवसरो भविष्यति, नाऽर्वाग् ॥ ९९६ ॥

पुनराह मेरकः—

[4]अत्थाणमिदं तीसे जइ तो सा कीस भण्णए इहइं ?। इह सा भण्णइ निज्जुत्तिमेत्तसामन्नओ नवरं॥९९७॥

---

१ न्यासस्य वा संबन्धनमुपक्रमोऽयं तु सूत्रव्याख्यायाः । संबन्ध उपोद्घातो भण्यते यत् सा तदन्ते ॥ ९९४ ॥

२ संप्रति सूत्रस्पर्शिकनिर्युक्तिर्यद् श्रुतस्य व्याख्यानम् । तस्या अवसरः सा पुनः प्राप्तापि न भण्यत इह ॥ ९९५ ॥

३ किं येनासति सूत्रे कस्य सा तद् यदा क्रमप्राप्ते । सूत्रानुगमे वक्ष्यते भविष्यति तस्यास्तदा भागः ॥ ९९६ ॥

४ अर्थानामिदं तस्या यदि ततः सा कस्माद् भण्यत इह ?। इह सा भण्यते निर्युक्तिमात्रसामान्यतो नवरम् ॥ ९९७ ॥

तस्याः सूत्रस्पर्शिकनिर्युक्तेर्यद्येतदस्थानम्, ततः सा किमितीह भण्यते ? इति । अत्राह– नवरमिह निर्युक्तिभणनमस्तावे सा निर्युक्तिसाम्यमात्राद् भण्यते, न तु सूत्रस्पर्शिकत्वेन प्रवर्तते, सूत्रस्याऽव्याप्यसत्त्वादिति । तदेवं त्रिविधापि निर्युक्तिरुक्ता । ततो निर्युक्त्यनुगमः समर्थितः ॥ ९९७ ॥

सांप्रतं सूत्रानुगमो भणनीयः, इति तमेव संबन्धयन्नाह—

[1]तेणेदाणिं सुत्तं सुत्ताणुगमेऽभिधेयमणवज्जं । अक्खलियाइविसुद्धं सलक्खणं लक्खणं चेमं ॥ ९९८ ॥

येन सूत्रे सत्येव सूत्रस्पर्शिकनिर्युक्तिः प्रवर्तते, तेनेदानीं सूत्रानुगमे क्रमप्राप्ते सूत्रमभिधेयम् । कथंभूतम् ?, अनवद्यम्– ऊनाधिकथादिदोषावद्यरहितम् । पुनः कथंभूतम् ?, अस्खलितादिविशुद्धम्– स्खलित-मिलितादिवक्तृदूषणविशुद्धम् । सह वक्ष्यमाणेन लक्षणेन प्रवर्तत इति सलक्षणम् । तच्च लक्षणमिदम् ॥ ९९८ ॥

किं तत् ?, इत्याह--

[2]अप्पग्गंथ-महत्थं बत्तीसादोसविरहियं जं च । लक्खणजुत्तं सुत्तं अट्ठहि य गुणेहिं उववेयं ॥ ९९९ ॥

अल्पग्रन्थं महार्थं च सूत्रं विज्ञेयम्, "उत्पाद-व्यय-ध्रौव्ययुक्तं सत्" इत्यादिवत् सूत्रमल्पग्रन्थं महार्थं च भवतीत्यर्थः; यच्च द्वात्रिंशद्दोषविरहितम्, तल्लक्षणयुक्तं सूत्रमुच्यते । ते चैतेऽन्यत्रोक्ता द्वात्रिंशद् दोषाः—

"[3]अलियमुवघायजणयं निरत्थयमवत्थयं छलं दुहिलं । निस्सारमहियमूणं पुणरुत्तं वाहयमजुत्तं ॥ १ ॥
कमभिन्नं वयणभिन्नं विभत्तिभिन्नं च लिंगभिन्नं च । अणभिहियमपयमेव य सहावहीणं ववहियं च ॥ २ ॥
काल-जइ-छविदोसो समयविरुद्धं च वयणमेत्तं च । अत्थावत्ती दोसो नेओ असमासदोसो य ॥ ३ ॥

---

१ तेनेदानीं सूत्रं सूत्रानुगमेऽभिधेयमनवद्यम् । अस्खलितादिविशुद्धं सलक्षणं लक्षणं चेदम् ॥ ९९८ ॥ २ ध. छ. 'तलक्ष' । × दोस–।

३ अल्पग्रन्थमहार्थं द्वात्रिंशद्दोषविरहितं यच्च । लक्षणयुक्तं सूत्रमष्टाभिश्च गुणैरुपेतम् ॥ ९९९ ॥ ४ तत्त्वार्थसूत्रे ५, २९ ।

५ अलीकमुपघातजनकं निरर्थकमपार्थकं छलं दुहिलम् । निःसारमधिकमूनं पुनरुक्तं व्याहतमयुक्तम् ॥ १ ॥
क्रमभिन्नं वचनभिन्नं विभक्तिभिन्नं च लिङ्गभिन्नं च । अनभिहितमपदमेव च स्वभावहीनं व्यवहितं च ॥ २ ॥
काल-यति-च्छविदोषः समयविरुद्धं च वचनमात्रं च । अर्थापत्तिर्दोषो ज्ञेयोऽसमासदोषश्च ॥ ३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उवमा-रूवगदोसो निद्देस-पयत्थ-संधिदोसो य। एए उ सुत्तदोसा बत्तीसं होंति नायव्वा ॥ ४ ॥"

तत्राऽलीकमभूतोद्भावनम्, भूतनिह्नवश्च; यथा– 'ईश्वरकर्तृकं जगत्' इत्याद्यभूतोद्भावनम्, 'नास्त्यात्मा' इत्यादिकस्तु भूतनिह्नवः। उपघातजनकं सत्त्वोपघातादिप्रवर्तकम्, यथा– 'वेदविहिता हिंसा धर्माय' इत्यादि। निरर्थकम्– यत्र वर्णानां क्रमनिर्देशमात्रमुपलभ्यते, न त्वर्थः, यथा– 'अ आ इ ई' इत्यादि, डित्थादिवद् वेति। अपार्थकम्– असंबद्धार्थम्, यथा– 'दश दाडिमानि, षडपूपाः, कुण्डमजाऽजिनम्, पललपिण्डः, त्वर कीटिके, दिशमुदीचीम्' इत्यादि। यत्राऽनिष्टस्याऽर्थान्तरस्य संभवतो विवक्षितार्थोपघातः कर्तुं शक्यते तच्छलम्, यथा– 'नवकम्बलो देवदत्तः' इत्यादि। जन्तूनामहितोपदेशेन पापव्यापारपोषकत्वाद् द्रोहस्वभावं द्रुहिलम्, यथा—

"यस्य बुद्धिर्न लिप्येत हत्वा सर्वमिदं जगत्। आकाशमिव पङ्केन नासौ लिप्येत कर्मणा ॥ १ ॥"

तथा—

"एतावानेव लोकोऽयं यावानिन्द्रियगोचरः। भद्रे! वृकपदं पश्य यद् वदन्ति बहुश्रुताः ॥ १ ॥"

"पिब खाद च साधु शोभने! यदतीतं वरगात्रि! तद् न ते। न हि भीरु! गतं निवर्तते समुदयमात्रमिदं कलेवरम् ॥ १ ॥"

इत्यादि। निःसारम्– वेदवचनादिवत् तथाविधयुक्तिविकलं परिफल्गुवति। अधिकम्– अक्षर-मात्रा-पदादिभिरभ्यधिकम्। तैरेव हीनमूनम्। अथवा, हेतू-दाहरणाभ्यधिकमधिकम्, यथा– 'अनित्यः शब्दः, कृतकत्व-प्रयत्नानन्तरीयकत्वाभ्याम्' इति हेत्वधिकम्; 'अनित्यः शब्दः, कृतकत्वात्, घट-पटवत्' इत्युदाहरणाधिकमित्यादि। एताभ्यामेव हीनमूनम्, यथा 'अनित्यः शब्दः, घटवत्' इति हेतूनम्; 'अनित्यः शब्दः, कृतकत्वात्' इत्युदाहरणहीनमित्यादि। पुनरुक्तं द्विधा– शब्दतः, अर्थतश्च। तथा, अर्थापन्नस्य पुनर्वचनं च पुनरुक्तम्। तत्र शब्दतः पुनरुक्तं यथा– 'घटः, घटः, घटः' इत्यादि। अर्थतः पुनरुक्तं यथा– 'घटः, कुटः, कुम्भः' इत्यादि। अर्थापन्नस्य पुनर्वचनं यथा– 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्युक्तेऽर्थादेव गम्यते– 'रात्रौ भुङ्क्ते' इति; तत्रार्थापन्नमपि यः साक्षादेतद् ब्रूयात्, तस्य पुनरुक्तता। व्याहतं यत्र पूर्वेण परं विहन्यते, यथा– 'कर्म चास्ति फलं चास्ति कर्ता न त्वस्ति कर्मणाम्' इत्यादि। अयुक्तम्– अनुपपत्तिक्षमम्, यथा—

---

१ उपमा-रूपकदोषो निर्देश-पदार्थ-संधिदोषश्च। एते तु सूत्रदोषा द्वात्रिंशद् भवन्ति ज्ञातव्याः ॥ ४ ॥

" तेषां कटतटभ्रष्टैर्गजानां मदबिन्दुभिः। प्रावर्तत नदी घोरा हस्त्य-ऽश्व-रथवाहिनी ॥ १ ॥ "

इत्यादि ॥ १ ॥

क्रमभिन्नम्– यत्र क्रमो नाराध्यते, यथा– 'स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्राणामर्थाः स्पर्श-रस-गन्ध-रूप-शब्दाः' इति वक्तव्ये 'स्पर्श-रूप-शब्द-गन्ध-रसाः' इति ब्रूयादित्यादि। वचनभिन्नम्– यत्र वचनव्यत्ययः, यथा– 'वृक्षावेतौ पुष्पिताः' इत्यादि। विभक्तिभिन्नम्, यथा– 'वृक्षं पश्य' इति वाच्ये 'वृक्षः पश्य' इति वदेदित्यादि। लिङ्गभिन्नम्– यत्र लिङ्गव्यत्ययः, यथा– 'अयं स्त्री' इत्यादि। अनभिहितम्– स्वसिद्धान्तेऽनुपदिष्टम्, यथा– 'सप्तमः पदार्थो वैशेषिकस्य, प्रकृति-पुरुषाभ्यामभ्यधिकं सांख्यस्य, दुःख-समुदय-मार्ग-निरोधलक्षणचतुरार्यसत्यातिरिक्तं वा बौद्धस्य' इत्यादि। पद्यबन्धेऽन्यच्छन्दोऽधिकारेऽन्यच्छन्दोऽभिधानमपदम्, यथा– 'आर्यापदेऽभिधातव्ये वैतालीयपदमभिदध्यात्' इत्यादि। यत्र वस्तुस्वभावोऽन्यथास्थितोऽन्यथाऽभिधीयते, तत् स्वभावहीनम्, यथा– 'शीतो वह्निः, मूर्तिमदाकाशम्' इत्यादि। यत्र प्रकृतमुत्सृज्याऽप्रकृतं व्यासतोऽभिधाय पुनः प्रकृतमुच्यते, तद् व्यवहितम् ॥ २ ॥

कालदोषः– यत्राऽतीतादिकालव्यत्ययः, यथा– 'रामो वनं प्रविवेश' इति वक्तव्ये 'रामो वनं प्रविशति' इत्याहेत्यादि। यतिदोषः– अस्थानविरतिः, सर्वथाऽविरतिर्वेति। छविरलङ्कारविशेषस्तेजस्विता तद्रहिते छविदोषः। समयविरुद्धम्– स्वसिद्धान्तविरोधि, यथा– 'सांख्यस्याऽसत् कारणे कार्यम्, वैशेषिकस्य वा सत्' इत्यादि। वचनमात्रम्– निर्हेतुकम्, यथा– 'कश्चिद् यथेच्छया कञ्चित् प्रदेशं लोकमध्यतया जनेभ्यः प्ररूपयति'। यत्रार्थापत्त्याऽनिष्टमापतति, तत्रार्थापत्तिदोषः, यथा– 'गृहे कुक्कुरो न हन्तव्यः' इत्युक्तेऽर्थापत्त्या 'शेषघातोऽदुष्टः' इत्यापतति। यत्र समासविधिप्राप्तौ समासं न करोति, व्यत्ययेन वा करोति, तत्र समासदोषः ॥ ३ ॥

उपमादोषः– यत्र हीनोपमा क्रियते, यथा– 'मेरुः सर्षपोपमः' अधिकोपमा वा क्रियते, यथा– 'सर्षपो मेरुसंनिभः'। अनुपमा वाऽभिधीयते, यथा– 'मेरुः समुद्रोपमः' इत्यादि। स्वरूपभूतानामवयवानामरूपणम्, व्यत्ययरूपणं वा स रूपकदोषः, यथा– 'पर्वते रूपयितव्ये तत्स्वरूपभूतान् शिखरादीनवयवान् न रूपयति; अन्यस्य वा समुद्रादेः संबन्धिनस्तांस्तत्र रूपयति' इत्यादि। निर्देशदोषः– यत्र निर्दिष्टपदानामेकवाक्यता न क्रियते, यथा– 'इह देवदत्तः स्थाल्यां पचति' इत्यभिधातव्ये पचतिशब्दं नाभिधत्ते। पदार्थदोषः– यत्र वस्तुपर्यायोऽपि सन् पदार्थान्तरत्वेन कल्प्यते, यथा– सतो भावः सत्तेति कृत्वा वस्तुपर्याय एव सत्ता, सा च वैशेषिकैः षट्सु पदा

---

१ क. ग. 'नं वि'। २ घ. छ. 'नं वि'। ३ क. ग. 'मये वि'। × कुर्कुटो-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

र्थेषु मध्ये पदार्थान्तरत्वेन कल्प्यते; एतच्चायुक्तम्, वस्तूनामनन्तपर्यायत्वेन पदार्थानन्त्यप्रसङ्गादिति। यत्र सन्धिप्रासौ तं न करोति, दुष्टं वा करोति, असौ संधिदोषः। इति द्वात्रिंशत् सूत्रदोषाः। एतैर्विरहितं यत् तल्लक्षणयुक्तं सूत्रमिति ॥ ४ ॥

तथा, अष्टाभिश्च गुणैर्यदुपेतं तल्लक्षणयुक्तं सूत्रमिति वर्तते। ते चेमे गुणाः—

"[1]निद्दोसं सारवंतं च हेउजुत्तमलंकियं। उवणीयं सोवयारं च मियं महुरमेव य ॥ १ ॥"

निर्दोषम्– समस्तोक्ता-ऽनुक्तदोषविप्रमुक्तम्, दोषाभावोऽपि चेह गुणत्वेन विवक्षितः। सारवत्– गोशब्दादिवद् बहुपर्यायक्षमम्। हेतुः– अन्वय-व्यतिरेकोपपत्तिलक्षणः, तेनान्वितं हेतुयुक्तम्। उपमा-दृष्टेक्षादिभिरलङ्कारैर्विभूषितमलङ्कृतम्। उपनयोपसंहृतमुपनीतम्। अग्राम्यमणितिसंयुक्तं सोपचारम्। वर्णाद्युचितपरिमाणं मितम्। श्रुतिमनोहरं मधुरमिति ॥ १ ॥

अन्यैस्तु कैश्चित् षड् गुणाः सूत्रस्य पठ्यन्ते, तद्यथा—

"[3]अप्पक्खरमसंदिद्धं सारवं विस्सओमुहं। अत्थोभमणवज्जं च सुत्तं सव्वण्णुभासियं ॥ १ ॥"

तत्राऽल्पाक्षरम्– बह्वर्थसंग्राहकपरिमिताक्षरम्, यथेदमेव सामायिकसूत्रम्। असंदिग्धम्– सैन्धवशब्दवल्लवण-वसन-तुरङ्ग-पुरुषाद्यनेकार्थसंशयकारि न भवति। सारवत्त्वं च पूर्ववत्। विश्वतोमुखं प्रतिसूत्रं चरणानुयोगाद्यनुयोगचतुष्टयव्याख्याक्षमम्; अथवा, 'अनन्तार्थत्वाद् यतो विश्वतोमुखम्, अतः सारवत्' इत्येवं सारवत्त्वस्यैव हेतुभावेनेदं योज्यते; अस्मिंश्च व्याख्याने पञ्चैते गुणा भवन्ति। स्तोभकाः– चकार-हिकार-तुशब्द-वाशब्दादयो निपाताः, तैर्निरर्थकैर्विमुक्तमस्तोभकम्। अनवद्यम्– कामादिपापव्यापाराऽप्ररूपकम्। एवंभूतं सूत्रं सर्वज्ञभाषितमिति। यैस्तु पूर्वेऽष्टौ गुणाः प्रोक्ताः, तेऽनन्तरश्लोकोक्तगुणास्तेष्वष्टसु गुणेष्वन्तर्भावयन्ति; ये त्वनन्तरश्लोकोक्तानेव सूत्रगुणान् पठन्ति, तेऽमीभिरेव पूर्वोक्तानामष्टानामपि संग्रहं प्रतिपादयन्ति ॥ ९९९ ॥

तदेवंभूतं सूत्रं सूत्रानुगमे उच्चारणीयम्, तस्मिंश्चोच्चारिते कदा सूत्रस्पर्शिकनिर्युक्तेरवसरो भवति?, इत्याह—

[5]सुत्तेऽणुगए सुद्धे त्ति निच्छिए तह कए पयच्छेए। सुत्तालावयनासे निक्खित्ते सुत्तफासो उ ॥१०००॥

---

१ क. ग. 'तमाहा' । २ निर्दोषं सारवच्च हेतुयुक्तमलङ्कृतम्। उपनीतं सोपचारं च मितं मधुरमेव च ॥ १ ॥

३ अल्पाक्षरमसंदिग्धं सारवद् विश्वतोमुखम्। अस्तोभमनवद्यं च सूत्रं सर्वज्ञभाषितम् ॥ १ ॥ ४ क. ग. 'रण-पु'।

५ सूत्रेऽनुगते शुद्ध इति निश्चिते तथा कृते पदच्छेदे। सूत्रालापकन्यासे निक्षिप्ते सूत्रस्पर्शस्तु ॥ १००० ॥

सूत्रानुगमावसरत्वात् सूत्रेऽनुगते उच्चारिते सति, यथा– "करेमि भन्ते! सामाइयं सव्वं सावज्जं जोगं" इत्यादि; तथा, सर्वदोषरहितत्वात् 'शुद्धमिदम्' इत्येवं निश्चिते; तथा, व्याख्यानावसरत्वादेव 'करोमि, भदन्त!, सामायिकम्, सावद्यं, योगम्' इत्यादिपदच्छेदे कृते; तथा, सूत्रालापकानां यथासंभवं नाम-स्थापनादिन्यासे निक्षिप्ते न्यस्ते विहिते, ततस्तव्याख्यानार्थं सूत्रस्पर्शिकनिर्युक्तेर्व्यापारः ॥ इति द्वात्रिंशद्गाथार्थः ॥ १००० ॥

एवं च सति किम्?, इत्याह—

[1]एवं सुत्ताणुगमो सुत्तालावगगओ य निक्खेवो। सुत्तप्फासियजुत्ती नया य वच्चंति समयं तु ॥१००१॥

तदेवं सूत्रानुगमोऽनुगमप्रथमभेदः; तथा, सूत्रालापकगतश्च निक्षेपो निक्षेपद्वारतृतीयभेदः; तथा, सूत्रस्पर्शिका निर्युक्तिर्निर्युक्त्यनुगमतृतीयभेदः; तथा, नयाश्च चतुर्थानुयोगद्वारोपन्यस्ताः, समकं युगपत् प्रतिसूत्रं व्रजन्ति गच्छन्तीति ॥ १००१ ॥

आह विनेयः– नन्वनुगमोऽयं द्विविधोऽपि भणितः, परमसौ तावद् व्याख्यास्वरूपः, तत्र व्याख्यायाः किं लक्षणम्?, इति; अत्राह—

[2]सुत्तं पयं पयत्थो संभवओ विग्गहो वियारो य। दूसियसिद्धी नयमयविसेसओ नेयमणुसुत्तं ॥१००२॥

व्याख्यानविधौ प्रस्तुते प्रथमं तावदस्खलितादिगुणोपेतं यथोक्तलक्षणयुक्तं सूत्रमुच्चारणीयम्। इयं चान्यथाऽस्खलितपदोच्चारणरूपा संहिता भण्यते। ततश्च 'पदं' इति पदच्छेदो दर्शनीयः। ततः पदार्थो वक्तव्यः। ततः संभवतो विग्रहः समासः कर्तव्यः। ततश्चालनारूपो विचारः कर्तव्यः। ततो दूषितसिद्धिः– दूषणपरिहारः प्रत्यवस्थानरूपो निरूपणीयः। एवमुक्तक्रमेणाऽनुसूत्रं प्रतिसूत्रं नियमितविशेषतो नयानां मतविशेषैर्व्याख्यानं ज्ञेयम्। इति गाथासंक्षेपार्थः। विस्तरार्थस्तु संहिताया: सूत्रलक्षणाभिधानतो भाष्यकारेण वस्तुतोऽभिहित एव ॥ १००२ ॥

पदादिगतं त्वमुं स एवाह—

---

१ एवं सूत्रानुगमः सूत्रालापकगतश्च निक्षेपः। सूत्रस्पर्शिक(निर्)युक्तिर्नयाश्च व्रजन्ति समकं तु ॥१००१॥ × (न्यासगत)

२ सूत्रं पदं पदार्थः संभवतो विग्रहो विचारश्च।। दूषितसिद्धिर्नयमतविशेषतो ज्ञेयमनुसूत्रम् ॥ १००२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

पयमत्थवायगं जोयगं च तं नामियाइं पंचविहं । कारग-समास-तद्धिय-निरुत्तवच्चो वि य पयत्थो ॥१००३॥
परबोहहिओ वत्थो किरिया-कारगविहाणओ वच्चो । पज्जायवयणओ वि य तह भूयत्थाभिहाणेण ॥१००४॥
पच्चक्खओऽहवा सोऽणुमाणओ लेसओ च सुत्तस्स । वच्चो व जहासंभवमागमओ हेउओ चेव ॥१००५॥

पदं द्विविधं भवति– अर्थवाचकम्, द्योतकं च । तत्र 'वृक्षः, तिष्ठति' इत्यादि वाचकम् । प्रादिकम्, चादिकं च द्योतकम् । तथा, पुनरपि पदं सामान्येन पञ्चविधं नामिकादि । तत्र 'अश्वः' इति नामिकम्, 'खलु' इति नैपातिकम्, 'परि' इत्यौपसर्गिकम्, 'धावति' इत्याख्यातिकम्, 'संयतः' इति मिश्रम् । एवंभूतानां पदानां विच्छेदो द्वितीयं व्याख्यानाङ्गम् । तृतीयं तु व्याख्यानाङ्गं पदार्थः । स च कारकवाच्यादिभेदाच्चतुर्विधः । तत्र कारकेणोच्यत इति कारकवाच्यः, कारकविषय इत्यर्थः, यथा 'पचतीति पाचकः' इत्यादि । समासेनोच्यते समासवाच्यः, 'राज्ञः पुरुषो राजपुरुषः' इत्यादि । तद्धितेनोच्यते तद्धितवाच्यः, 'वसुदेवस्याऽपत्यं वासुदेवः' इत्यादि । निरुक्तेनोच्यते निरुक्तवाच्यः, 'भ्रमति च रौति च भ्रमरः' इत्यादि । तदेवं पदार्थस्य चातुर्विध्यमुक्तम् ।

अथ प्रकारान्तरेण त्रिधोऽप्येष संभवतीति दर्शयति– 'परबोहेत्यादि' वेत्यथवा, परेषां श्रोतृणां बोधः परबोधः, तत्र कर्तव्ये हितो योऽर्थः पदार्थः स त्रिविधोऽपि वाच्यः, तद्यथा– क्रियाकारकविधानतः, पर्यायवचनतः, भूतार्थाभिधानेन च । तत्र क्रियाकारकभेदेन यथा– 'घट चेष्टायाम्' घटतेऽसाविति घटः । पर्यायवचनैर्यथा– घटः, कुटः, कुम्भः, कलश इत्यादि । भूतः सद्भूतो यथावस्थितोऽर्थस्तदभिधानतस्तत्प्ररूपणेन च पदार्थो वाच्यः, तद्यथा– य ऊर्ध्वकुण्डलोष्ट आयतवृत्तग्रीवः पृथुवृध्नोदरः स घट उच्यत इत्यादि ।

अथवा, अन्यथा पदार्थः सूत्रस्याऽर्थस्त्रिविधो वाच्यः, तद्यथा– प्रत्यक्षतः, अनुमानतः, लेशतश्च । अत्र प्रत्यक्षेणैव यादृशं पुस्तकादिलिखितमुपलभ्यते, गुरुमुखाद् वा यादृशं श्रूयते, तादृशमेव साक्षाद् यत्र प्ररूप्यते, स प्रत्यक्षतः पदार्थ उच्यते; यथा–"सम्यग्दर्शन-ज्ञान-चारित्राणि मोक्षमार्गः" इति गुरुमुखादेः श्रवणादिप्रत्यक्षेणोपलभ्य सम्यग्दर्शनादीनां मोक्षमार्गत्वं प्ररूपयति । अनुमानं त्विहार्थापत्तिरूपं गृह्यते, तस्यामप्यन्यथानुपपन्नार्थादतीन्द्रियस्य साध्यार्थस्याऽनुमीयमानत्वात् । तत्र प्रत्यक्षोपलब्ध एवाऽर्थो यमर्थापत्तिलब्ध-

---

१ पयमर्थवाचकं द्योतकं च तद् नामिकादि पञ्चविधम् । कारक-समास-तद्धित-निरुक्तवाच्योऽपि च पदार्थः ॥ १००३ ॥ +(ज)
परबोधहितो वाऽर्थः क्रिया-कारकविधानतो वाच्यः । पर्यायवचनतोऽपि च तथा भूतार्थाभिधानेन ॥ १००४ ॥ × (वि)
प्रत्यक्षतोऽथवा सोऽनुमानतो लेशतश्च सूत्रस्य । वाच्यो वा यथासंभवमागमतो हेतुतश्चैव ॥ १००५ ॥
घ. छ. 'ख्याति' । ३ क. ग. 'यविधान' । ४ तत्त्वार्थाधिगमसूत्रे १, १।

मर्थं कथयति, सोऽनुमानतः पदार्थ उच्यते, यथा– कथयन्ति मिथ्यादर्शनादीनि, पुनर्मोक्षमार्गो न भवति' इत्यर्थादेव गम्यत इति। तथा, लेशतः पदार्थो भवति, तत्र 'लिश श्लेषणे' लेशः श्लेषः, श्लिष्टं, समस्तमिति यावत्, तन्निर्देशात् पदार्थो गम्यते; यथा "सम्यग्दर्शन-ज्ञान-चारित्राणि' इति त्रयाणामपि समस्तानां निर्देशात् 'समुदितानामेव मोक्षमार्गत्वम्, नैकैकशः' इति गम्यते । ततोऽसौ लेशेन श्लेषेण सूचितो लेशतः पदार्थोऽभिधीयते । तदेवं प्रकारान्तरेणाऽप्युक्तस्त्रिविधः पदार्थः ।

अथवा, यथासंभवमागमतः, हेतुतश्च द्विविधः पदार्थो वाच्यः, तत्र भव्या-ऽभव्य-निगोदादिप्रतिपादकपदानामागमत आज्ञामात्रेणैवाऽर्थः प्रतिपाद्यते । न हि भव्या-ऽभव्यादिभावप्ररूपणे आगमं विहाय प्रायः प्रमाणान्तरं प्रवर्तते । अतोऽयमागमतः पदार्थ उच्यते । यत्र च हेतुः संभवति, तत्र हेतुतः पदार्थोऽभिधीयते, यथा-- कायप्रमाण आत्मा न सर्वगतः, कर्तृत्वात्, कुलालादिवत्, इत्यादि । ननु मूर्त आत्मा, कर्तृत्वात्, कुलालादिवत्, इत्येवं मूर्तिमत्त्वमप्यात्मनोऽनेन हेतुना सिध्यतीति चेत् । सत्यम्, इष्यत एव संसार्यात्मनो मूर्तत्वमपि, इति न किञ्चिद् नः क्षूयते । इति हेतुतोऽयं पदार्थोऽभिधीयते । तदनेन

"आणागेज्झो अत्थो आणाए चेव सो कहेयव्वो । दिट्ठंतिओ दिट्ठंता कहणविहिविराहणा इहरा ॥ १ ॥"

इत्ययमर्थः समर्थितो भवतीति । तदेवमुक्तो विस्तरतः पदार्थः ॥ १००३ ॥ १००४ ॥ १००५ ॥

अथ पदविग्रहमाह—

पायं पयविच्छेओ सामासविसओ तयत्थनियमत्थं । पयविग्गहो त्ति भण्णइ सो सुद्धपए न संभवइ ॥१००६॥

इह प्रायेण यः समासविषयः पदयोः पदानां वाऽनेकार्थसंभवे सतीष्टपदार्थनियमाय विच्छेदः क्रियते स पदविग्रहः, यथा– राज्ञः पुरुषो राजपुरुषः, श्वेतः पटोऽस्येति श्वेतपटः, मत्ता बहवो मातङ्गा यस्मिन् वने तद् मत्तबहुमातङ्गं वनमित्यादि । स च शुद्ध एकस्मिन् पदे न संभवति, अतः पदयोः, पदानां चेत्युच्यते । इह कश्चित् पदविच्छेदोऽपि समासविषयो न भवति, क्वचित् समासनिषेधात्; यथा– व्यासः पाराशर्यः, रामो जामदग्न्य इत्यादि । अतः प्रायोग्रहणमिति ॥ १००६ ॥

---

१ आज्ञाग्राह्योऽर्थ आज्ञयैव स कथयितव्यः । दार्ष्टान्तिको दृष्टान्तात् कथनविधिविराधनेतरथा ॥ १ ॥ २ क. ग. 'णागज्झो' । × निशु
३ प्रायः पदविच्छेदः समासविषयस्तदर्थनियमार्थम् । पदविग्रह इति भण्यते स शुद्धपदे न संभवति ॥ १००६ ॥ +(स) ०(त्ति)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अथ चालना-प्रत्यवस्थाने आह—

[1]सुत्तगयमत्थविसयं व दूसणं चालणं मयं, तस्स । सद्द-त्थण्णायाओ परिहारो पच्चवत्थाणं ॥ १००७ ॥

यत् सूत्रविषयम्, अर्थविषयं वा शिष्य-प्रेरकैर्दूषणमुद्भाव्यते, तच्चालनं विचारो मतमभिप्रेतम् । सूरीणां 'तस्स त्ति' तस्य चालनस्य परिहारः प्रत्यवस्थानं दूषितसिद्धिरित्यर्थः । कस्माद् योऽसौ परिहारः ?, इत्याह– शब्दा-ऽर्थन्यायतः– शब्दविषयिण्या न्यायेन शब्दसंभविन्या युक्त्या शब्दगतदूषणस्य परिहारः, अर्थविषयिणा न्यायेनाऽर्थसंभविन्या युक्त्याऽर्थगतदूषणस्य परिहारः प्रत्यवस्थानं दूषितसिद्धिरिति भावार्थः । नयमतविशेषाच्च शब्दा-ऽर्थगतदूषणस्य परिहारः प्रत्यवस्थानमित्यपि द्रष्टव्यम् ।

इदमुक्तं भवति– 'करोमि भदन्त ! सामायिकम्' इत्यादौ गुर्वामन्त्रणवचनो भदन्तशब्द इत्युक्ते कश्चिच्चालनां करोति– नन्वेवं तर्हि गुरुविरहे भदन्तशब्दाऽनभिधानप्रसङ्गः, अभिधाने वाऽऽनर्थक्यादिदोषप्रसङ्गः । अत्र प्रत्यवस्थानमुच्यते– आचार्याभावे स्थापनाचार्यस्य पुरतः सर्वोऽपि सामाचारी क्रियत इति ज्ञापनार्थमिदम्, अन्यत्रापि चोक्तम्– " ठवणाआयरियस्स सामायारी पउंजए यं " इत्यादि । तथा, दृश्यते चार्हदभावेऽर्हत्प्रतिमोपदेशनमिति । अथवा, गुरुविरहेऽपि स्वातन्त्र्यनिषेधो विनयमूलधर्मोपदर्शनार्थं च गुरुगुणज्ञानोपयोगो विधेय इत्येतज्ज्ञानेन ज्ञाप्यते । यदि वा, नाम-स्थापना-द्रव्य-भावभेदाच्चतुर्विध आचार्यः, तत्राचार्योपयोगरूपो योऽसौ भावाचार्यः शिष्यस्य मनसि वर्तते, तद्विषयमिदमामन्त्रणं मनोविवर्तमानगुणमयाचार्यनिबन्धनमिति भावः । अतो गुरुविरहोऽप्यत्रासिद्ध एवेति भावः । इत्येवमन्यत्रापि चालना-प्रत्यवस्थाने यथासंभवमभ्यूह्ये इति । तदनेन

"संहिता च पदं चैव पदार्थः पदविग्रहः । चालना प्रत्यवस्थानं व्याख्या तन्त्रस्य षड्विधा ॥ १ ॥"

इत्येतद् यदन्यत्र षड्विधं व्याख्यास्वरूपमुक्तम्, तदिह समर्थितमिति ॥ १००७ ॥

नन्विदं षड्विधं व्याख्यास्वरूपं सर्वत्रापि व्यापकम्, आहोस्वित् प्रतिनियतसूत्रविषयम् ?, इत्यत्रोपसंहारगर्भमुत्तरम्, नैगमादिनयविषयं च दर्शयन्नाह–

---

१ सूत्रगतमर्थविषयं वा दूषणं चालनं मतं तस्य । शब्दा-ऽर्थन्यायात् परिहारः प्रत्यवस्थानम् ॥ १००७ ॥ २ क. 'तविषयिद्' ।
३ क. 'णप' । ४ क. ग. 'गुर्वभावे भ' । ५ स्थापनाऽऽचार्यस्य सामाचारी प्रयुज्यते च । ६ क. ग. 'पसेत्तन' ।

[2]एवमणुसुत्तमत्थं सव्वनयमयावयारपरिसुद्धं । [3]भासिज्ज निरवसेसं पुरिसं व पडुच्च जं जोग्गं ॥ १००८ ॥

एवमित्थं षड्विधव्याख्यानेन सूत्रं सूत्रं प्रति सर्वत्र सर्वनयावतारपरिशुद्धं निरवशेषमर्थं भाषेत– व्याख्यानयेत्; पुरुषं वा प्रज्ञादिगुणोपेतं प्रतीत्य यद् यस्य व्याख्यानं नयमतविचारणं वा योग्यम्, तत् तस्य वदेत्; उक्तं च—

"नत्थि नएहिं विहूणं सुत्तं अत्थो य जिणमये किंपि । आसज्ज उ सोयारं नए नयविसारओ बूया ॥१॥" इति ।

नन्वेतेषु षट्सु व्याख्यानभेदेषु मध्ये सूत्रानुगमादीनां कः कस्य विषयः ?, इत्याशङ्क्याह—

[4]होइ कइत्थो वोत्तुं सपयच्छेयं सुयं सुयाणुगमो । सुत्तालावन्नासो नामाइन्नासविणिओगं ॥ १००९ ॥
सुत्तप्फासियनिज्जुत्तिनिओगो सेसओ पयत्थाई । पायं सो च्चिय नेगमनयाइमयगोयरो होइ ॥ १०१० ॥

अस्खलितादिगुणोपेतं सूत्रमुच्चार्य तत्पदच्छेदं चाभिधाय सूत्रानुगमोऽनुगमप्रथमभेदः कृतार्थोऽवसितप्रयोजनो भवति । सूत्रालापकन्यासस्तु निक्षेपतृतीयभेदरूपो नाम-स्थापनादिन्यासविनियोगमात्रं कृत्वा कृतार्थो जायते । 'सुत्तप्फासियेत्यादि' वक्ष्यमाणं प्रायोग्रहणमत्रापि संबध्यते । ततश्च प्रायः शेषः पदार्थ-पदविग्रह-चालना-प्रत्यवस्थानलक्षणव्याख्याचतुष्टयरूपः सूत्रस्पर्शिकनिर्युक्तेर्नियोगो व्यापारः स एव च पदार्थादिः प्रायो नैगमादिनयमतगोचरो भवति, पदार्थादावेव कथ्यमाने नैगमादिनयप्रवृत्तेरिति ॥१००९ ॥१०१०॥

अथवा प्रायोग्रहणस्य फलमाह—

[5]पायं पयविच्छेओ उ सुत्तप्फासोवसंहिओ जेण । कत्थइ तयत्थ-कारग-कालाइगई तओ चेव ॥१०११॥

न केवलं पदार्थादयः, किन्तु प्रायः पदविच्छेदोऽपि सूत्रस्पर्शिकनिर्युक्त्युपसंहृत एव तत्क्रोडीकृतस्तदन्तर्भाव्येव मन्तव्य इत्यर्थः,

---

१ एवमनुसूत्रमर्थं सर्वनयमतविचारपरिशुद्धम् । भाषेत निरवशेषं पुरुषं वा प्रतीत्य यद् योग्यम् ॥ १००८ ॥ २ क. ग. 'भासेज्ज' ।
३ नास्ति नयैर्विहीनं सूत्रमर्थश्च जिनमते किमपि । आसाद्य तु श्रोतारं नयान् नयविशारदो ब्रूयात् ॥ १ ॥ ✱ (कइत्थो)
४ भवति कृतार्थ उक्त्वा सपदच्छेदं श्रुतं श्रुतानुगमः । सूत्रालापन्यासो नामादिन्यासविनियोगम् ॥ १००९ ॥
सूत्रस्पर्शिकनिर्युक्तिनियोगः शेषकः पदार्थादिः । प्रायः स एवं नैगमनयादिमतगोचरो भवति ॥ १०१० ॥ ५ क. ग. 'य प्रा' ।
६ प्रायः पदविच्छेदस्तु सूत्रस्पर्शोपसंहृतो येन । कुत्रचित् तदर्थ-कारक-कालादिगतिस्तत एव ॥ १०११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति पूर्वगाथायां प्रायोग्रहणमकारि । कस्मात् पुनः पदविच्छेदोऽपि तद्विषयः ?, इत्याह- येन कारणेन तेषां विच्छिन्नपदानामर्थस्तदर्थस्तस्य, तथा, कारक-काल-क्रियादीनां च गतिरवबोधस्तत एव पदच्छेदमात्रादेव जायते । ततस्तत्र पदविच्छेदमात्रमेव सूत्रस्पर्शिकनिर्युक्तिः करोति, तावतैव तद्व्यापारपरिसमाप्तेः । अतः पदच्छेदोऽपि तदन्तर्भाव्येव । उपलक्षणं चैतत्, ततो न केवलं पदार्थादिरेव नैगमादिनयविषयः, किन्तु पदच्छेद-सूत्रालापकन्यासादयोऽपि प्रायस्तद्विषयः, तत्रापि तद्विचारमहत्तेरिति । तदेवमुक्तोऽनुगमः, तद्गुणनप्रसङ्गतो नयाश्चाभिहिताः । तथा च समाप्तान्यनुयोगद्वाराणि ॥ १०११ ॥ × (इति समाप्तानि चत्वारि अनु०)

अत आह—

[1]अणुओगद्दाराणं परूवणं तप्पओयणं जं च । इह चेव परिसमाणियमव्वामोहत्थमत्थाणे ॥ १०१२ ॥

यद्यप्यध्ययनसमाप्तावेवाऽनुयोगद्वाराणां सामस्त्येन समाप्तिरिष्यते, तथापि यच्चतुर्णामप्यनुयोगद्वाराणां प्ररूपणम्, यच्च तत्प्रयोजनम्, तदिहाऽऽदावस्थान एव शिष्याणामव्यामोहार्थं परिसमापितम्। अन्यथा ह्यध्ययनस्याऽऽदावुपक्रमः समाप्येत, ततो दूरव्यवधानेन क्वचिद् निक्षेपः, क्वाप्यनुगमः, क्वचित्तु नयाः परिसमाप्येरन् । एवं चातिग्रन्थव्यवधानेनाऽनुयोगद्वाराणां समाप्तौ व्यामुह्येयुर्विनेयाः॥१०१२

कथं पुनरित्थं समाप्तौ तेषामव्यामोहः ?, इत्याह—

[2]दाइयदारविभागो संखेवेणेह, वित्थरेणावि । दाराणं विणिओगं नाहिइ काउं जहाजोगं ॥ १०१३ ॥

इहैव संक्षेपेण दर्शितानुयोगद्वारविभागो विनेयः पुरस्ताद् विस्तरेणापि यथायोग्यं यथास्थानं स्वयमेव ज्ञास्यति विनियोगं कर्तुम्, न तु मोहमनुभविष्यति ॥ इति त्रयोदशगाथार्थः ॥ १०१३ ॥

॥ अनुयोगद्वाराणि समाप्तानि ॥

इदानीं 'तित्थयरे भगवंते' इत्यादिवक्ष्यमाणग्रन्थस्य प्रस्तावनामुपरचयन्नाह—

[5]संपयमत्थाणुगमे सत्थोवग्घायवित्थरं वोच्छं । कयमंगलोवयारो सोऽतिमहत्थो त्ति काऊणं ॥ १०१४ ॥

---

१ अनुयोगद्वाराणां प्ररूपणं तत्प्रयोजनं यच्च । इहैव परिसमापितमव्यामोहार्थमस्थाने ॥ १०१२ ॥ २ क. ग. 'रितीष्य' ।
३ दर्शितद्वारविभागः संक्षेपेणेह, विस्तरेणापि । द्वाराणां विनियोगं ज्ञास्यति कर्तुं यथायोगम् ॥ १०१३ ॥ ४ गाथा १०२५ ।
५ सांप्रतमर्थानुगमे शास्त्रोपोद्घातविस्तरं वक्ष्ये । कृतमङ्गलोपचारः सोऽतिमहार्थ इति कृत्वा ॥ १०१४ ॥

अर्थानुगमेऽर्थानुगमाख्ये तृतीयेऽनुयोगद्वारे 'उद्देसे निद्देसे य निग्गमे' इत्यादिना यः पूर्वं संक्षेपेण शास्त्रस्योपोद्घात उक्तः, तस्यैव सांप्रतमहं विस्तरं वक्ष्ये । कथंभूतः सन् ?, इत्याह- कृतमङ्गलोपचारः कृततीर्थकरादिनमस्कारः सन् । किम् ?, इत्याह- समस्तसिद्धान्तानुयोगसाधारणत्वात् सोऽतिमहार्थ इति कृत्वा ॥ १०१४ ॥

अत्र प्रेरकः प्राह—

[6]नणु मंगलं कयं चिय किं भुज्जो, अह कयं पि कायव्वं । दारे दारे कीरइ तो कीस न मंगलग्गहणं ?॥ १०१५॥

नन्वादौ '[7]आभिणिबोहियनाणं' इत्यादिना मङ्गलं कृतमेव, तत् किमिति भूयस्तदारम्भः ?। अथ कृतमपि पुनः कर्तव्यं तत्, तर्हि प्रत्यध्ययनम्, प्रत्युद्देशकम्, प्रतिसूत्रं च द्वारे द्वारे उपक्रमादिके किमिति न मङ्गलग्रहणं क्रियते ? इति ॥ १०१५ ॥

अत्र कश्चिदाचार्यदेशीयोऽन्तरभाषया प्रतिविधानमाह—

[8]नणु मज्झम्मि वि मंगलमाइट्ठं तं च मज्झमेयं ति । सत्थमणारद्धं चिय एयं कत्तोच्चयं मज्झं ? ॥१०१६॥

ननु शास्त्रस्यादौ, मध्ये, अवसाने च मङ्गलं कर्तव्यत्वेन पूर्वसूरिभिरादिष्टम्, तत्रादौ विहितं मङ्गलम्। एतच्च शास्त्रस्य मध्यम्, ततो मध्यमङ्गलमत्र कर्तव्यमेव, किमनेन प्रेर्येण ? इति । तदेतदुत्तरमयुक्तमेव, इत्याचार्यो दर्शयति- 'सत्थमित्यादि' नन्वादिमङ्गलार्थं नन्दिरुक्तः, ततोऽनुयोगद्वाराण्यभिहितानि, यत्तु सामायिकाध्ययनलक्षणं शास्त्रं तदनारब्धमेव, तस्याऽद्याप्यक्षरमपि न व्याख्यायते, कौतस्त्रः पुनस्तन्मध्यं, येन मध्यमङ्गलताऽस्य भवेत् ? इति ॥ १०१६ ॥

[9]अत्राचार्यदेशीय एव शास्त्रस्य मध्यतां समर्थयन्नाह—

[10]चउरणुओगद्दारं जं सत्थं तस्स तेण मज्झमिणं । साहइ मंगलगहणं सत्थस्संगाइं दाराणि ॥ १०१७ ॥

---

१ गाथा ९७३ । २ ननु मङ्गलं कृतमेव किं भूयः, अथ कृतमपि कर्तव्यम् । द्वारे द्वारे क्रियते ततः कस्माद् न मङ्गलग्रहणम् ? ॥ १०१५ ॥
३ गाथा ७९ । ४ ननु मध्येऽपि मङ्गलमादिष्टं तच्च मध्यमेतदिति । शास्त्रमनारब्धमेवैतत् कौतस्त्यं मध्यम् ? ॥ १०१६ ॥ ५ क.ग. 'लमेव त' ।
६ ग.घ.छ. 'आचा' । ७ चतुरनुयोगद्वारं यत् शास्त्रं तस्य तेन मध्यमिदम् । कथयति मङ्गलग्रहणं शास्त्रस्याङ्गानि द्वाराणि ॥ १०१७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

उपक्रमादीनि चत्वार्यनुयोगद्वाराणि यस्य तच्चतुरनुयोगद्वारं यतः शास्त्रम्, तेनोपक्रम-निक्षेपलक्षणमनुयोगद्वारद्वयमतिक्रम्य यदिदमनुगमभेदात्मकस्योपोद्घातस्यादौ मङ्गलं तद् युक्तित एव मध्यमङ्गलं भवति। यच्च शास्त्रेऽनारब्धेऽप्यनुयोगद्वारमध्ये मङ्गलग्रहणं तदेव साधयति[2] कथयति ज्ञापयति यदुत- शास्त्रस्याऽङ्गानि शास्त्रस्वरूपभूतान्येवाऽनुयोगद्वाराणि, न पुनस्ततो भिन्नानि, अतस्तदारम्भे शास्त्रमारब्धमेव मन्तव्यम्। ततः शास्त्रस्यैवेदं मध्यमङ्गलमिति स्थितम् ॥ १०१७ ॥

इत्याचार्यदेशीयेनोक्ते सूरिराह—

[3]तहवि न मज्झं एयं भणियमिहावस्सयस्स जं मज्झं। तं मंगलमाइट्ठं इदमज्झयणस्स होज्जाहि॥१०१८॥

तथापि भवदुक्तयुक्त्यापि नैतद् मध्यं भणितं- नैतद् मध्यमुपपद्यते, किन्त्विह षडध्ययनात्मकस्याऽऽवश्यकस्य यद् मध्यं तस्पूर्वमादावेव भाष्यकृता मङ्गलमादिष्टं मध्यमङ्गलत्वेन प्रतिपादितम्, इदं त्वावश्यकमध्यं न भवत्येव, किन्तु भवदभिहितयुक्त्या यदि भवति तदा प्रथमस्य सामायिकाध्ययनस्यैतद् मध्यं भवेदपीति ॥ १०१८ ॥

सूरिरेवाह, किञ्च—

[4]भणियं च पुव्वमेयं सव्वं चिय मंगलं ति किमणेण ?। मंगलं ति य बुद्धिपरिग्गहं पि कारावियो सीसो॥१०१९॥

भणितं चेदमादौ- सर्वमेवैतच्छास्त्रं मङ्गलरूपमेव, तत्किमनेन विशेषतो मध्यादिमङ्गलकरणकदर्थनयेव ?। अथैवं ब्रूषे- समस्तशास्त्रस्य मङ्गलरूपत्वेऽपि शिष्यस्य मङ्गलत्रयमतिपरिग्रहार्थो यत्नः। तदपि न, यस्मात् शिष्योऽपि मङ्गलत्रयमतेः परिग्रहं प्रागेव कारितः, इति किमनेन ?॥ १०१९ ॥

अथाचार्यदेशीयो निरुत्तरीकृतो विलक्षः सन् प्राह- ननु यदि सर्वमप्येतच्छास्त्रं मङ्गलम्, मङ्गलत्रयमतिपरिग्रहं च प्रागेव कारितः शिष्यः, अतो नेदं मध्यमङ्गलम्, तर्हि भवन्तोऽपि कथयन्तु- किमर्थमिदं मङ्गलम् ?, इत्याशङ्क्य सूरिर्यथावस्थितं समाधानमाह—

[5]आवस्सयस्स तं कयमिदं तु नावासमित्तयं किंतु। सव्वाणुओगनिज्जुत्तिसत्थपारंभ एवायं ॥ १०२० ॥

---

१ क.ग. 'यच्छास्त्रे'। २ क.ग. 'ति ज्ञा'। ३ तथापि न मध्यमेतद् भणितमिहावश्यकस्य यद् मध्यम्। तद् मङ्गलमादिष्टमिदमध्ययनस्य भवेत् ॥ १०१८ ॥

४ भणितं च पूर्वमेतत् सर्वमेव मङ्गलमिति किमनेन ?। मङ्गलमिति च बुद्धिपरिग्रहमपि कारितः शिष्यः ॥ १०१९ ॥

५ आवश्यकस्य तत्कृतमिदं तु नावश्यकमात्रकं किन्तु। सर्वानुयोगनिर्युक्तिशास्त्रारम्भ एवाऽयम् ॥ १०२० ॥ ६ क.ग. 'सत्थोपा'।

'आभिणिबोहियनाणं' इत्यादिना यदादौ मङ्गलं कृतम्, यच्च 'सर्वमपि शास्त्रमेतद् मङ्गलात्मकमेवेत्युक्तम्, यदपि च शिष्यो मङ्गलत्रयमतिपरिग्रहं कारितः, तदेतत् सर्वमावश्यकस्य कृतम्। इदं तु यस्याऽऽरम्भे प्रस्तुतं मङ्गलं क्रियमाणमास्ते, तद् नावश्यकमात्रम्, किन्तु सर्वेषामपि सिद्धान्तशास्त्राणां योऽयमनुयोगस्तत्संबद्धा येयमुपोद्घातनिर्युक्तिः, तल्लक्षणं यद् वस्तुतोऽन्यत् शास्त्रं तत्पारम्भ एवाऽयम्। तस्य चोपोद्घातनिर्युक्तिशास्त्रस्य सकलसिद्धान्तव्यापकत्वेन महार्थत्वादविघ्नसंपादनायेदं मङ्गलमिति ॥ १०२० ॥

आह- कुतः पुनरेतदवसीयते, यत्सर्वानुयोगनिर्युक्तिशास्त्रारम्भोऽयम् ?, इत्याह—

[2]दसकालियाइनिज्जुत्तिगहणओ भणियमुपरि वा जं च। सेसेसु वि अज्झयणेसु होइ एसेव निज्जुत्ती ॥१०२१॥

[3]'आवस्सयस्स दसकालियस्स तह उत्तरज्झमायारे' इत्याद्यनन्तरवक्ष्यमाणग्रन्थे यद् दशकालिकादिनिर्युक्तिग्रहणं करिष्यति तस्माद्, यदि वा यदुपरिष्टादिहैवाग्रे वक्ष्यति- शेषेष्वपि चतुर्विंशतिस्तवादिषु निःशेषसिद्धान्तगतेषु चाध्ययनेष्वेषैवोपोद्घातनिर्युक्तिर्भवतीति। एतस्माच्चैतज्ज्ञायते, यत्सर्वानुयोगनिर्युक्तिशास्त्रारम्भोऽयमिति ॥ १०२१ ॥

अत्राप्याह प्रेरकः—

[4]सामाइयवक्खाणे दसालियाईण कोऽहिगारोऽयं। जं पायमुवग्घाओ तेसिं सामन्न एवायं ॥ १०२२ ॥

इह तेसिं तम्मि गए वीसुं वीसुं विसेसमित्तोऽयं। घिच्छिइ सुहं लहुं चिय तग्गहणं लाघवत्थमओ ॥१०२३॥

ननु सामायिकाध्ययनस्येह व्याख्याने प्रस्तुते को हि दशकालिकादीनां ग्रहणेऽवसरः ?। अत्रोच्यते- यद् यस्मादयमुपोद्घातः प्रायस्तेषामपि दशकालिकादीनां सामान्य एव- समानवक्तव्यतारूप एव। अत उपोद्घातसामान्यात् तेषामपीह ग्रहणम्। प्रायोग्रहणात् सामायिकस्य तीर्थकराद् निर्गमः, दशकालिकस्य शय्यंभवात्, उत्तराध्ययनानां तीर्थकरादिनानामहर्षिभ्यो निर्गम इत्यादिविशेषोऽपि कश्चिदल्पो द्रष्टव्यः। ततश्चेह तेषां दशकालिकादीनां तस्मिन् सामान्ये उपोद्घाते गतेऽवगतेऽवबुद्धे यत् पृथक् पृथग् निर्गमादिकं किमपि

---

१ गाथा ७९। २ दशकालिकादिनिर्युक्तिग्रहणतो भणितमुपरि वा यच्च। शेषेष्वध्ययनेषु भवत्येषापि निर्युक्तिः ॥ १०२१ ॥ ३ गाथा १०७४।

४ सामायिकव्याख्याने दशकालिकादीनां कोऽधिकारोऽयम्। यत्प्राय उपोद्घातस्तेषां सामान्य एवाऽयम् ॥ १०२२ ॥

इह तेषां तस्मिन् गते विष्वग् विष्वग् विशेषमात्रोऽयम्। ग्रहीष्यति सुखं लघ्वेव तद्ग्रहणं लाघवार्थमतः ॥ १०२३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषमात्रं तच्छिष्यः सुखेन लघु च स्वयमपि ग्रहीष्यति । अतो लाघवार्थमिह दशकालिकादीनां ग्रहणमिति ॥ १०२२॥ १०२३ ॥

अथोपसंहरंस्तात्पर्यमाह—

[1]तम्हा जेण महत्थं सत्थं सव्वाणुओगविसयमिणं । सत्थंतरमेवहवा तेण पुणो मंगलग्गहणं ॥ १०२४ ॥

तस्माद् येन कारणेन सर्वानुयोगविषयत्वादिदमुपोद्घातलक्षणं शास्त्रं महार्थम्, अथवा, बहुवक्तव्यत्वाद् वस्तुतो यस्माच्छास्त्रान्तरमेवेदम्, न त्वावश्यकमात्रम्, तेनाऽस्यादौ पुनरपि मङ्गलग्रहणम्, इत्येष स्थितः पक्षः ॥ इत्येकादशगाथार्थः ॥ १०२४ ॥

किं पुनस्तद् मङ्गलम् ?, इत्याह—

[2]तित्थयरे भगवंते अणुत्तरपरक्कमे अभियनाणी । तिण्णे सुगइगइगए सिद्धिपहपएसए वंदे ॥ १०२५ ॥

तीर्यते भवोदधिरनेन, अस्मात्, अस्मिन्निति वा तीर्थं वक्ष्यमाणस्वरूपम्, तत्करणशीलाः "कृञो हेतुताच्छील्ये०" इत्यादिना टप्रत्यये तीर्थकराः, तान् वन्दे, इति संबन्धः । कथंभूतान् ?, इत्याह– भगः समग्रैश्वर्यादिलक्षणो विद्यते येषां ते भगवन्तोऽर्हन्तस्तान् भगवतः । पुनरपि कथंभूतान् ?, इत्याह– अनुत्तरपराक्रमानिति– पराक्रमो वीर्यं, तदनन्तत्वादनुत्तरं येषाम्; अथवा, परेषां क्रोधादिशत्रूणामाक्रमणं विक्षेपणं पराक्रमः सोऽनुत्तरः प्रधानरूपो येषां तेऽनुत्तरपराक्रमास्तानिति । तथा, अनन्तज्ञेयपरिच्छेदादमितमपरिमितं केवलरूपं ज्ञानं येषां तेऽमितज्ञानिनस्तानिति । तथा, तरन्ति स्म भवार्णवमिति तीर्णास्तानिति । तीर्त्वा च भवजलधिं सुगतिगतिगतानिति,– तत्र राग-द्वेषविकलत्व-सर्वज्ञत्व-सर्वदर्शित्वादिभ्यो निरुपमसुखभागिनः सुगतयः सिद्धास्तैरेव गम्यमानत्वाद् गतिः सिद्धिस्तां गताः सुगतिमतिगतास्तानिति । तथा, तस्या एव सिद्धेः पन्थाः सम्यग्दर्शन-ज्ञानादिको मार्गस्तस्य प्रकृष्टा देशकाः सिद्धिपथप्रदेशकास्तान् वन्देऽभिवादये स्तौमि ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥ १०२५ ॥

विस्तरार्थं तु विभणिषुर्भाष्यकार एवाह—

[3]तिज्जइ जं तेण तहिं तओ व तित्थं तयं च दव्वम्मि । सरियाईणं भागो निरवायो, तम्मि य पसिद्धे ॥१०२६॥

---

१ तस्माद् येन महार्थं शास्त्रं सर्वानुयोगविषयमिदम् । शास्त्रान्तरमेवाऽथवा तेन पुनर्मङ्गलग्रहणम् ॥ १०२४ ॥

२ तीर्थकरान् भगवतोऽनुत्तरपराक्रमानमितज्ञानान् । तीर्णान् सुगतिगतिगतान् सिद्धिपथप्रदेशकान् वन्दे ॥ १०२५ ॥ ३ पाणिनीये ॥३।२।२०॥

४ तीर्यते यत् तेन तत्र ततो वा तीर्थं तच्च द्रव्ये । सरिदादिकं भागो निरपायः, तस्मिंश्च प्रसिद्धे ॥ १०२६ ॥

[4]तरिया तरणं तरियव्वं च सिद्धाणि, तारओ पुरिसो । बाहो-डुवाइ तरणं, तरणिज्जं निन्नयाईयं ॥१०२७॥

यत् यस्मात् तीर्यते दुस्तरं वस्तु तेन तस्मिंस्ततो वेत्यतस्तीर्थमुच्यते । तच्च नाम-स्थापना-द्रव्य-भावभेदाच्चतुर्विधम् । तत्र नाम-स्थापने सुगमे । द्रव्ये द्रव्यभूतमप्रधानभूतं सरित्-समुद्रादीनां निरपायः कोऽपि नियतो भागः प्रदेशस्तीर्थमुच्यते । तस्मिंश्च प्रसिद्धे सिद्धे सत्यस्याऽऽपेक्षिकशब्दत्वादेतानि नियमात् सिध्यन्ति । कानि ?, इत्याह– तरिता पुरुषः, तरणं बाहो-डुपादि, तरणीयं तु निम्नगादिकमिति ॥ १०२७ ॥

कथं पुनरिदं द्रव्यतीर्थम् ?, इत्याह—

[2]देहाइतारयं जं बज्झमलावणयणाइमत्तं च । णेगंताणच्चंतियफलं च तो दव्वतित्थं तं ॥ १०२८ ॥

यस्मादिदं देहादिकमेव द्रव्यमात्रं तारयति– नद्यादिपरकूलमात्रं नयति, न पुनर्जीवं संसारसमुद्रस्य मोक्षलक्षणं परकूलं प्रापयति, अतोऽप्रधानत्वाद् द्रव्यतीर्थम् । तथा बाह्यमेव मलादिद्रव्यमात्रमपनयति, न त्वन्तरङ्गं प्राणातिपातादिजन्यकर्ममलम् । तथा, अनैकान्तिकफलमेवेदं नद्यादितीर्थम्– कदाचिदनेन नद्यादेस्तरणात्, कदाचित्तु तत्रैव मज्जनात् । तथा, अनात्यन्तिकफलं चेदम्, तथाहि– एकदाऽनेन तीर्णमपि नद्यादिकं पुनरपि च तीर्यत इत्यनात्यन्तिकफलत्वम् । आत्मना वाऽस्य नद्यादितीर्थस्य द्रव्यमात्रत्वेनाऽप्रधानत्वात् सर्वत्र द्रव्यतीर्थत्वं भावनीयमिति ॥ १०२८ ॥

इह केषांचिद् मतमाशङ्क्य परिहरन्नाह—

[3]इह तारणाइफलयं ति ण्हाण-पाणा-ऽवगाहणाईहिं । भवतारयं ति केई तं नो जीवोवघायाओ ॥ १०२९ ॥
सूणंगं पि व तमुदूहलं व न य पुण्हकारणं ण्हाणं । न य जइजोग्गं तं मंडणं व कामंगभावाओ ॥१०३०॥

---

१ तरीता तरणं तरयितव्यं च सिद्धानि, तारकः पुरुषः । बाहो-डुपादि तरणं, तरणीयं निम्नगादिकम् ॥ १०२७ ॥

२ देहादितारकं यद् बाह्यमलापनयनादिमात्रं च । नैकान्ता-ऽऽत्यन्तिकफलं च ततो द्रव्यतीर्थं तत् ॥ १०२८ ॥ ३ क. ग. 'लमनै' ।

४ इह तारणादिफलकमिति स्नान-पाना-ऽवगाहनादिभिः । भवतारकमिति केचित् तन्नो जीवोपघातात् ॥ १०२९ ॥
सूनाङ्गमपि वा तदुदूखलमिव न च पुण्यकारणं स्नानम् । न च यतियोग्यं तद् मण्डनमिव कामाङ्गभावात् ॥ १०३० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

इह केचित् तीर्थिका मन्यन्ते– नद्यादेः संबन्धि द्रव्यतीर्थं किल स्नान-पाना-ऽवगाहनादिभिर्विधिवदासेव्यमानं भवतारकं संसारमहामकरालयप्रापकं भवत्येव । कुतः ?, तारणादिफलमिति कृत्वा– शरीरतारण-मलक्षालन-तृड्व्यवच्छेद-देहोपशमादिफलत्वादित्यर्थः; अनेन चाध्यक्षसमीक्षितदेहतारणादिफलेन परोक्षस्यापि संसारतारणफलस्याऽनुमीयमानत्वादिति भावः । तदेतद् नोपपद्यते, स्नानादेर्जीवोपघातहेतुत्वात्, खड्ग-ऽसि-धेनु-शूलादिवदिति । एतदुक्तं भवति– जीवोपघातहेतुत्वाद् दुर्गतिफला एव स्नानादयः कथं नु भवतारकास्ते भवेयुः, सूना-वध्यभूम्यादीनामपि भवतारकत्वप्रसङ्गात् ? इति । इतश्च– नद्यादितीर्थं भवतारकं न भवति, सूनाङ्गत्वात्– सूनाप्रकारत्वात्, उदूखलादिवदिति । न च पुण्यकारणं स्नानम्, नापि यतिजनयोग्यं तत्, कामाङ्गत्वात्, मण्डनवत्; अन्यथा ताम्बूलभक्षण-पुष्पबन्धन-देहादिधूपना-ऽभ्यञ्जनादयोऽपि च भृङ्गादीनां पुण्यहेतवः स्युः । न च देहतारणादिमात्रफलदर्शनेन विशिष्टं भवतारणादिकं फलमुपपद्यते, नियामकाभावात्, प्रत्यक्षवीक्षितप्राण्युपमर्दबाधितत्वाच्च; इत्याद्यभ्यूह्य स्वधियाऽत्र दोषजालमभिधानीयमिति ॥ १०२९ ॥ १०३० ॥

अथ परो ब्रूयात्; किम् ?, इत्याह—

[1]देहोवगारि वा तेण तित्थमिह दाहनासणाईहिं । महु-मज्ज-मंस-वेस्सादओ वि तो तित्थमावन्नं ॥१०३१॥

यदि प्रेरको मन्येत– जाह्नवीजलादिकं तीर्थमेव, दाहनाश-पिपासोपशमादिभिर्देहोपकारित्वात् । अत्रोच्यते– एवं सति ततो मधु-मद्य-मांस-वेश्यादयोऽपि तीर्थमापद्यन्ते, तेषामपि देहोपकारित्वाविशेषादिति । उक्तं द्रव्यतीर्थम् ॥ १०३१ ॥

अथ भावतीर्थमाह—

[2]भावे तित्थं संघो सुयविहियं तारओ तहिं साहू । नाणाइतियं तरणं तरियव्वं भवसमुद्दोऽयं ॥ १०३२ ॥

भावे भावविषयं श्रुतविहितं श्रुतप्रतिपादितं सङ्घस्तीर्थम्, तथा च भगवत्यामुक्तम्, "[3]तित्थं भंते ! तित्थं तित्थयरे तित्थं ? ।

---

१ क. ग. 'पद्युज्यते' । १ देहोपकारि वा तेन तीर्थमिह दाह-नाशनादिभिः । मधु-मद्य-मांस-वेश्यादयोऽपि ततस्तीर्थमापन्नम् ॥ १०३१ ॥

२ भावे तीर्थं संघः श्रुतविहितं तारकस्तत्र साधुः । ज्ञानादित्रिकं तरणं तरयितव्यं भवसमुद्रः ॥ १०३२ ॥

३ तीर्थं भगवन् ! तीर्थं तीर्थकरस्तीर्थम् ? । गौतम ! अर्हन्तस्तावद् नियमात् तीर्थङ्करा:, तीर्थं पुनश्चातुर्वर्णः श्रमणसंघः ।

गोयमा ! अरहा ताव नियमा तित्थंकरे, तित्थं पुण चाउव्वन्नो समणसंघो" इति । इह च तीर्थसिद्धौ तारकादयो नियमादाक्षिप्यन्त एव । तत्रेह संघे तीर्थे तद्विशेषभूत एव तारकः साधुः, ज्ञान-दर्शन-चारित्रत्रिकं पुनस्तरणम्, तरणीयं तु भवसमुद्रः । इह च तीर्थतारकादीनां परस्परतोऽन्यता, अनन्यता च विवक्षावशतो बोद्धव्या । तत्र सम्यग्दर्शनादिपरिणामात्मकत्वात् संघस्तीर्थम्, तत्रावतीर्णानामवश्यं भवोदधितरणात् । तद्विशेषभूतत्वात् तदन्तर्गत एव साधुस्तरीता, सम्यग्दर्शनाद्यनुष्ठानात् । साधकतमत्वेन तत्करणरूपतामापन्नं ज्ञानादित्रयं तु तरणम् । तरणीयं त्वौदयिकादिभावपरिणामात्मकः संसारसमुद्र इति ॥ १०३२ ॥

कस्मात् पुनः संघो भावतीर्थम् ?, इत्याह—

[1]जं नाण-दंसण-चरित्तभावओ तव्विवक्खभावाओ । भवभावओ य तारेइ तेण तं भावओ तित्थं ॥१०३३॥

यद् यस्मात् तारयति पारं प्रापयति तेन तत् संघलक्षणं भावतस्तीर्थमिति संबन्धः । कुतस्तारयति ?, इत्याह– तद्विपक्षभावादिति तेषां ज्ञान-दर्शन-चारित्राणां विपक्षोऽज्ञान-मिथ्यात्वाविरमणानि तद्विपक्षस्तल्लक्षणो भावो जीवपरिणामस्तद्विपक्षभावस्तस्मात् तारयति । कुतः ?, इत्याह– ज्ञान-दर्शन-चारित्रभावतः– ज्ञानाद्यात्मकत्वादित्यर्थः । यो हि ज्ञानाद्यात्मको भवति सोऽज्ञानादिभावात् परं तारयत्येवेति भावः । न केवलमज्ञानादिभावात् तारयति, तथा, भवभावतश्च तारयति, भवः संसारस्तत्र भवनं भावस्तस्मादित्यर्थः । यस्मात् स्वयं ज्ञानादिभावात्मकः, तथाऽज्ञानादिभावाद् भवभावाच्च भव्यांस्तारयति, तस्मादसौ संघो भावतीर्थमितीह तात्पर्यम्; उक्तं च—

" रागाद्यम्भाः प्रमादव्यसनशतचलद्दीर्घकल्लोलमालः क्रोधेर्ष्यावाडवाग्निर्मृतिजननमहानक्रचक्रौघरौद्रः ।
तृष्णापातालकुम्भो भवजलधिरयं तीर्यते येन तूर्णं तज्ज्ञानादिस्वभावं कथितमिह सुरेन्द्रार्चितैर्भावतीर्थम् ॥ १ ॥ "

इति ॥ १०३३ ॥

उपपत्त्यन्तरमाह—

[2]तह कोह-लोह-कम्ममयदाह-तण्हा-मलावणयणाइं । एगंतेणच्चंतं च कुणइ य सुद्धिं भवोघाओ ॥ १०३४ ॥

---

१ यज्ज्ञान-दर्शन-चारित्रभावतस्तद्विपक्षभावात् । भवभावतश्च तारयति तेन तद् भावतस्तीर्थम् ॥ १०३३ ॥

२ तथा क्रोध-लोभ-कर्ममयदाह-तृष्णा-मलापनयनानि । एकान्तेनाऽत्यन्तं च करोति शुद्धिं भवौघात् ॥ १०३४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा; क्रोधश्च, लोभश्च, कर्म च तन्मयास्तत्स्वरूपा यथासंख्यं ये दाह-तृष्णा-मलाः। क्रोधो हि जीवानां मनः-शरीरसंताप-जनकत्वाद् दाहः, लोभस्तु विभवविषयपिपासाऽऽविर्भावकत्वात् तृष्णा, कर्म पुनः पवनोद्धूतश्लक्ष्णरजोवत् सर्वतोऽवगुण्ठनेन मालिन्य-हेतुत्वाद् मलः; अतस्तेषां क्रोध-लोभ-कर्ममयानां दाह-तृष्णा-मलानां यदेकान्तेनाऽत्यन्तं चापनयनानि करोति। तथा, कर्मकचवरमलि-नाद् भवौघात् संसारापारनीरप्रवाहात् परकूलं नीत्वा शुद्धिं कर्ममलापनयनलक्षणां यतः करोति, तेन तत्संघलक्षणं भावतस्तीर्थमिति पूर्वसंबन्धः। अपरमपि नद्यादितीर्थं तुच्छा-ऽनैकान्तिका-ऽऽत्यन्तिकदाह-तृष्णा-मलापनयनं विदधाति, एतत्तु संघतीर्थमनादिकालाली-नत्वेनानन्तानां दाह-तृष्णा-मलानामैकान्तिकमात्यन्तिकं चापनयनं करोति; अतः प्रधानत्वाद् भावतीर्थमुच्यते, नद्यादितीर्थं त्वप्रधान-त्वाद् द्रव्यतीर्थमिति भावः ॥ १०३४ ॥

अथवा, प्राकृते 'तित्थं' इत्युक्ते 'त्रिस्थम्' इत्येतदपि लभ्यते, इत्येतदाह—

[1]दाहोवसमाइसु वा जं तिसु थियमहव दंसणाईसु। तो तित्थं संघो च्चिय उभयं व विसेसणविसेस्सं ॥१०३५॥

अथवा, यद् यस्माद् यथोक्तदाहोपशम-तृष्णाच्छेद-मलक्षालनरूपेषु, यदिवा, सम्यग्दर्शन-ज्ञान-चारित्रलक्षणेषु त्रिष्वर्थेषु स्थितं तत्त्रिस्थं संघ एव; उभयं वा संघ-त्रिस्थितिलक्षणविशेषण-विशेष्यरूपं द्वयं त्रिस्थम्। इदमुक्तं भवति— किं त्रिस्थम् ? संघः, कश्च संघः ? त्रिस्थं, नान्यः, इत्येवं विशेषण-विशेष्ययोरुभयं संलुलितं त्रिस्थमुच्यत इति ॥ १०३५ ॥

अथवा, प्राकृते 'तित्थं' इत्युक्ते 'त्र्यर्थम्' इत्यपि लभ्यते, इत्येतद् दर्शयन्नाह—

[2]कोहग्गिदाहसमणादओ व ते चेव जस्स तिण्णत्था। होइ तियत्थं तित्थं तमत्थसद्दो फलत्थोऽयं ॥१०३६॥

क्रोधाग्निदाहोपशम-लोभतृष्णाव्यवच्छेद-कर्ममलक्षालनलक्षणास्त एवानन्तरोक्तास्त्रयोऽर्थाः फलरूपा यस्य तत् त्र्यर्थं, तच्च संघ एव; तदव्यतिरिक्तं ज्ञानादित्रयं वा त्र्यर्थं प्राकृते 'तित्थं' उच्यते। अर्थशब्दश्चायं फलार्थो मन्तव्यः। इदमुक्तं भवति— भगवान् संघः, तदव्यतिरिक्तज्ञानादित्रयं वा महातरुरिव भव्यैर्निषेव्यमाणं क्रोधाग्निदाहशमनादिकांस्त्रीनर्थान् फलति, अतस्त्र्यर्थमुच्यत इति ॥ १०३६ ॥

अथवा, वस्तुपर्यायोऽत्रार्थ इत्याह—

---

१ दाहोपशमादिषु वा त्रिषु स्थितमथवा दर्शनादिषु। ततस्तीर्थं संघ एवोभयं वा विशेषणविशेष्यम् ॥ १०३५ ॥ २ ज्ञ. 'यं पि वि'।

३ क्रोधाग्निदाहशमनादयो वा त एव यस्य त्रयोऽर्थाः। भवति त्र्यर्थं तीर्थं तदर्थशब्दः फलार्थोऽयम् ॥ १०३६ ॥ × त्रिस्थः -।

[1]अहवा सम्मद्दंसण-नाण-चरित्ताइं तिन्नि जस्सत्था। तं तित्थं पुव्वोइयमिह[2] अत्थो वत्थुपज्जाओ ॥१०३७॥

अथवा, सम्यग्दर्शनादयस्त्रयोऽर्था यस्य तत् त्र्यर्थम्, अर्थशब्दश्चात्र वस्तुपर्यायः, त्रिवस्तुकमित्यर्थः। तच्च संघ एव, तदव्यति-रिक्तत्वात्, त एव वा सम्यग्दर्शनादयस्त्रयोऽर्थाः समाहृतास्त्र्यर्थम्, संख्यापूर्वत्वात्, स्वार्थत्वाच्च द्विगोरिति ॥ १०३७ ॥

तदेवं संघो भावतस्तीर्थम्, त्रिस्थम्, त्र्यर्थं वा, इति प्रतिपाद्य सांप्रतमिदमेव जैनं तीर्थमभिप्रेतार्थसाधकम्, नान्यत्, इति प्रमाणतः प्रतिपादयन्नाह—

[3]इह सम्मंसद्धाणो-वलद्धि-किरियासभावओ जइणं। तित्थमभिप्पेयफलं सम्मपरिच्छेयकिरिय व्व ॥ १०३८ ॥

इह जैनमेव तीर्थमभिप्रेतार्थसाधकमिति प्रतिज्ञा, सम्यक्श्रद्धानो-पलब्धि-क्रियास्वभावत्वात्— सम्यग्दर्शन-ज्ञान-चारित्रात्मकत्वा-दित्यर्थः, इह यत् सम्यक्श्रद्धानो-पलब्धि-क्रियात्मकं तदिष्टार्थसाधकं दृष्टम्; यथा सम्यक्परिच्छेदवती रोगापनयनक्रिया, यच्चेष्टार्थसा-धकं न भवति, तत् सम्यक्श्रद्धानो-पलब्धि-क्रियात्मकमपि न भवति, यथोन्मत्तप्रयुक्तक्रिया; तथा च शेषतीर्थानि। इदमुक्तं भवति— यथा कस्यचिद् निपुणवैद्यस्य सम्यग् रोगादिस्वरूपं विज्ञाय विशुद्धश्रद्धानवत आतुरस्य सम्यगौषधप्रयोगादिक्रियां कुर्वतोऽभिप्रेतार्थसिद्धि-र्जायते। एवं जैननीत्यादपीति ॥ १०३८ ॥

अन्यनीर्थान्यप्येवंविधानि भविष्यन्ति, न, इत्याह—

[4]नाभिप्पेयफलाइं तयंगवियलत्तओ कुतित्थाइं। वियलनयत्तणओ च्चिय वियलाइं वियलकिरिय व्व ॥१०३९॥

सुगतादिप्रणीतानि कुतीर्थानि नाभिप्रेतफलानि। कुतः ?, इत्याह— 'तयंगेत्यादि' तस्याभिप्रेतार्थस्याऽङ्गानि तदङ्गानि सम्यग्-ज्ञानादीनि कारणानि, तद्विकलत्वात्— तद्रहितत्वात्, नयविकलत्वाच्च विकलानि तानि। सर्वैरेव ह्येकैकांशग्राहिभिर्नयैर्मिलितैः संपूर्ण-मनन्तधर्मात्मकं वस्तु निश्चीयते, शेषतीर्थानि त्वेक-द्व्यादिनयमात्रमतावलम्बित्वेन समग्रनयविकलान्येवेति तानि नयविकलानि, ततो

---

१ अथवा सम्यग्दर्शन-ज्ञान-चारित्राणि त्रीणि यस्यार्थाः। तत् तीर्थं पूर्वोदितमिहाऽर्थो वस्तुपर्यायः ॥ १०३७ ॥ २ क. ग. 'हमत्थो'।

३ इह सम्यक्श्रद्धानो-पलब्धि-क्रिया-स्वभावतो जैनम्। तीर्थमभिप्रेतफलं सम्यक्परिच्छेदक्रियेव ॥ १०३८ ॥ ४ क. ग. 'थस्य सा'।

२ नाभिप्रेतफलानि तदङ्गविकलत्वतः कुतीर्थानि। विकलनयत्वत एव विकलानि विकलक्रियेव ॥ १०३९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न संपूर्णाभिप्रेतफलस्य साधकानीत्यर्थः, विकलक्रियावदिति; यथा भिषक्प्रतीचारकातुरौषधाद्यन्यतराङ्गविकला क्रिया न संपूर्णाभिप्रेतफलसाधनी, तथा कुतीर्थान्यपीति । तदेवं यथोक्तप्रकारेण द्रव्य-भावतीर्थप्ररूपणा कृता ॥ १०३९ ॥

अथ प्रकारान्तरेण तत्प्ररूपणां कर्तुमाह—

[1]अहव सुहोतारुत्तारणाइं दव्वे चउव्विहं तित्थं । एवं चिय भावम्मि वि तत्थाइमयं सरक्खाणं ॥ १०४० ॥
[x]तव्वणियाण बीयं विसयसुहकुसत्थभावणाधणियं । तइयं च बोडियाणं चरिमं जइणं सिवफलं तु ॥१०४१॥

इह द्रव्यतीर्थे चत्वारो भङ्गाः, तद्यथा- सुखावतारं सुखोत्तारम्, सुखावतारं दुरुत्तारम्, दुःखावतारं सुखोत्तारम्, दुःखावतारं दुरुत्तारम् । एवं भावतीर्थेऽपीयं चतुर्भङ्गी द्रष्टव्या । इह च यत्र सुखेनैवावतरन्ति प्रविशन्ति प्राणिनस्तत् सुखावतारम्, सुखेनैव यत उत्तरन्ति-- सुखेनैव यद् मुञ्चन्तीत्यर्थः, तत् सुखोत्तारम्; इत्याद्यभङ्गवर्तितीर्थभावार्थः । एवमन्यत्रापि ।

एतच्च सरजस्कानां शैवानां संबन्धि वेदितव्यम्; तथाहि- राग-द्वेष-कषाये-न्द्रिय-परीषहो-पसर्ग-मनो-वाक्-कायजयादिलक्षणस्य तथाविधदुष्करकष्टानुष्ठानस्य तैः क्रियमाणस्याऽदर्शनात्, यथा कथञ्चिद्रूपतयाऽपि च तैर्व्रतपरिपालनस्याऽभिधानात् सुखेनैव प्राणिनस्तद्दीक्षां प्रतिपद्यन्ते, इति तत्तीर्थस्य सुखावतारता । तच्छास्त्रेषु च न तथाविधाऽऽवासकस्वाभावा काचिद् निपुणा युक्तिरस्ति, यद्वासितान्तरात्मा पुमांस्तद्दीक्षां न परित्यजेत् । किञ्च,

"शैवो द्वादश वर्षाणि व्रतं कृत्वा ततः परम् । यद्यशक्तस्त्यजेतापि यागं कृत्वा व्रतेश्वरे ॥ १ ॥"

इत्यादिना दीक्षात्यागस्य तैर्निर्दोषतयाऽप्यभिधानात् सुखेनैव तद्दीक्षां जन्तवः परित्यजन्ति, इति तत्तीर्थस्य सुखोत्तारतेति ॥ १ ॥

(२) द्वितीयभङ्गकवर्ति तीर्थं 'तव्वणियाणं ति' सुगतानां संबन्धि मन्तव्यम्; तथाहि—

"मृद्वी शय्या प्रातरुत्थाय पेया भक्तं मध्ये पानकं चापराह्णे । द्राक्षाखण्डं शर्करा चार्धरात्रे मोक्षश्चान्ते शाक्यपुत्रेण दृष्टः ॥ १ ॥"

"मणुन्नं भोयणं भोच्चा मणुन्नं सयणासणं । मणुन्नंसि अगारंसि मणुन्नं झायए मुणी ॥ १ ॥"[2]

---

१ अथवा सुखावतारोत्तारणादि द्रव्ये चतुर्विधं तीर्थम् । एवमेव भावेऽपि तत्रादिमकं सरजस्कानाम् ॥ १०४० ॥ x तच्चणिया-।
सौगतानां द्वितीयं विषयसुखकुशास्त्रभावनाधनिकम् । तृतीयं च बोटिकानां चरमं जैनं शिवफलं तु ॥ १०४१ ॥ ॐ वासक-।

२ मनोज्ञं भोजनं भुक्त्वा मनोज्ञं शयनाऽऽसनम् । मनोज्ञेऽगारे मनोज्ञं ध्यायति मुनिः ॥ १ ॥

इत्यादेस्तैरभिधानतो विषयसुखसिद्धेस्तत्तीर्थस्य सुखावतारता । तथा, कुशास्त्रोक्तनिपुणयुक्तिभिस्तीव्रवासनोत्पादात्, व्रतत्यागे च तैर्महतः संसारदण्डादेः प्रतिपादनात्, तत्समर्पितगृहीतव्रतस्य दुष्परित्याज्यत्वात् तत्तीर्थस्य दुरुत्तारता । इमां च युक्तिं भाष्यकारः स्वयमेव किञ्चिदाह- 'विसयसुहेत्यादि' गतार्थम् ॥ २ ॥

(३) दुःखावतारं सुखोत्तारमिति तृतीयं बोटिकानां दिगम्बराणाम् । तत्र नाग्न्यादेर्लज्जादिहेतुत्वेन दुरध्यवसेयत्वात् तत्तीर्थस्य दुःखावतारता । अनेषणीयपरिभोग-कषायबाहुल्यादेस्तदसमञ्जसदर्शनात्, नाग्न्यादेश्चातिलज्जनीयत्वेन तत्पराभग्नानां तत्तीर्थस्य सुखोत्तारतेति ॥ ३ ॥

(४) दुःखावतारं दुरुत्तारमिति चरमं चतुर्थं मोक्षफलम् । जैनानां साधूनां राग-द्वेष-कषाये-न्द्रिय-परीषहो-पसर्गादिजयस्य, तथा, अप्रमत्ततया समिति-गुप्ति-शिरोलुञ्चनादिकष्टानुष्ठानस्य दर्शनात् तत्तीर्थस्य दुःखावतारता । सुशास्त्रोक्तनिपुणयुक्तिभिस्तीव्रतरवासनोत्पादनात्, व्रतत्यागे चातिमहतः संसारादिदण्डस्याऽभिधानात् तत्तीर्थस्य दुरुत्तारता ॥ ४ ॥

अन्ये तु सुखोत्तारतां दुरुत्तारतां च सर्वत्र मुक्तिप्राप्तिमाश्रित्य व्याचक्षते- तत्र सरजस्कानां स्वल्पेनैवेश्वरोक्तानुष्ठानेन किल मुक्तिप्राप्त्यभ्युपगमात् सुखोत्तारं तीर्थम्, 'सुखेनैवाऽस्माद् भवार्णवमुत्तरन्ति' इति व्युत्पत्तेः । शाक्यानां तु दुरवापविशिष्टध्यानमार्गाद् योगिज्ञानोत्पत्त्यादिक्रमेण मुक्तिप्राप्त्यभ्युपगमाद् दुःखोत्तारता 'दुःखेनाऽस्मात् संसारमुत्तरन्ति' इति कृत्वा । बोटिकानां तु भिक्षाशुद्ध्यादीनां गौणत्वेनाभ्युपगमाद् नाग्न्यलक्षणनिर्ग्रन्थत्वमात्रादेव मुक्त्यभ्युपगमात् सुखोत्तारता । साधूनां तु पूर्वोक्तकष्टानुष्ठानाद् मुक्त्याश्रयणाद् दुरुत्तारता । अवतारपक्षे तु सर्वत्र पूर्वोक्तैव भावना । इत्यलं विस्तरेणेति ॥ १०४० ॥ १०४१ ॥

अत्र प्रेरकः प्राह—

[1]नेणु जं दुहावयारं दुक्खोत्तारं च तं दुरहिगम्मं । लोयम्मि पूइयं जं सुहावयारं सुहुत्तारं ॥ १०४२ ॥

ननु यद् दुःखावतारं च दुरुत्तारं च तीर्थं तद् दुरधिगम्यम्, एवंभूतं च जैनतीर्थं भवद्भिः प्रतिपादितम् । एतच्चायुक्तम्, एवंभूततीर्थस्य करणक्रियाविघातित्वेनाऽनिष्टार्थप्रसाधकत्वात्, लोकप्रतीतिबाधितत्वाच्च; तथा चाह- लोके हि यत् सुखावतारं सुखोत्तारं च तीर्थं तत् पूजितं तदेवोपादेयम्, तरणक्रियानुकूल्येनेष्टार्थप्रसाधकत्वात् । तस्मात् प्रथम एव भङ्गः श्रेयान्, इति प्रेरकाभिप्राय इति ॥ १०४२ ॥

(+टि) १ ख. छ. 'दुःखोत्ता' । २ ननु यद् दुःखावतारं दुःखोत्तारं च तद् दुरधिगम्यं । लोके पूजितं यत् सुखावतारं सुखोत्तारम् ॥ १०४२ ॥ (प्रथम्)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अत्रोत्तरमाह—

ऐवं तु दव्वतित्थं भावे दुक्खं हियं लभइ जीवो । मिच्छत्त-ऽन्नाणा-ऽविरइ-विसयसुहभावणाणुगओ ॥ १०४३ ॥
पडिवण्णो उण कम्माणुभावओ भावओ परमसुद्धं । किह मोच्छिइ जाणंतो परमहियं दुल्लहं च पुणो ॥१०४४॥

सत्यम्, द्रव्यतीर्थमेवमेवेष्यते यथैव त्वं ब्रूषे, तस्य सुखप्राप्यत्वात्, सुखेनैव च मुच्यमानत्वादिति । भावतीर्थं तु नैवम्, तस्य मोक्षहेतुत्वेन जीवानां परमहितत्वात् । यच्च मोक्षहेतुत्वेन हितं, तद् दुःखं लभते जीवः– महता कष्टेन तत् जीवः प्राप्नोतीत्यर्थः । कथंभूतो यस्मादेष जीवः ?, इत्याह– 'मिच्छत्तेत्यादि' यस्मादनादिकालालीनमिथ्यात्वा-ऽज्ञाना-ऽविरति-विषयसुखभावनानुगतो जीवः, तस्मादित्थंभूतस्य जीवस्याऽनन्तसंसारदुःखव्यवच्छेदहेतुत्वाद् निःसीमनिःश्रेयसावाप्तिनिबन्धनत्वाच्च परमहितं भावतीर्थमतिदुरवापत्वात् पूर्वोक्तकष्टानुष्ठानयुक्तत्वाच्च दुःखावतारम्, तथा, दुरुत्तारं च । कुतः ?, इत्याह– 'पडिवण्णो इत्यादि' शुभकर्मपरिणत्यनुभावतः पुनः कथमपि परमशुद्धं भावतीर्थं भावतः परमार्थतः प्रतिपन्नो जीवः 'परमहितं दुर्लभं च पुनरपि' एतज्जानन्नपि कथं नु नाम तद् मोक्ष्यति ?– कथं तत उत्तरिष्यति ?– न कथञ्चिदित्यर्थः । अतो दुरुत्तारता तस्येति । किञ्च, सद्वैद्यप्रयुक्तकर्कशक्रियोदाहरणतश्च भावतीर्थस्य दुःखावतारो-त्तारता भावनीया ॥ १०४३ ॥ १०४४ ॥

कथम् ?, इत्याह—

अइकक्खडं व किरियं रोगी दुक्खं पवज्जए पढमं । पडिवन्नो रोगक्खयमिच्छंतो मुंचए दुःखं ॥१०४५॥
इय कम्मवाहिगहिओ संजमकिरियं पवज्जए दुक्खं । पडिवन्नो कम्मक्खयमिच्छंतो मुंचए दुक्खं ॥१०४६॥

गाथाद्वयमपि सुबोधम् ॥ १०४५ ॥ १०४६ ॥

---

१ एवं तु द्रव्यतीर्थं भावे दुःखं हितं लभते जीवः । मिथ्यात्वा-ऽज्ञाना-ऽविरति-विषयसुखभावनानुगतः ॥ १०४३ ॥
प्रतिपन्नः पुनः कर्मानुभावतो भावतः परमशुद्धम् । कथं मोक्ष्यति जानन् परमहितं दुर्लभं च पुनः ॥ १०४४ ॥

२ अतिकर्कशां वा क्रियां रोगी दुःखं प्रपद्यते प्रथमम् । प्रतिपन्नो रोगक्षयमिच्छन् भुञ्जते दुःखम् ॥ १०४५ ॥
इति कर्मव्याधिगृहीतः संयमक्रियां प्रपद्यते दुःखम् । प्रतिपन्नः कर्मक्षयमिच्छन् भुञ्जते दुःखम् ॥ १०४६ ॥

तदेवं तीर्थं प्रतिपाद्य तीर्थकरसिद्धिमाह—

[1]अणुलोम-हेउ-तस्सीलया य जे भावतित्थमेयं तु । कुव्वंति पगासंति य ते तित्थयरा हियत्थकरा ॥१०४७॥

हेतु ताच्छील्या-ऽऽनुलोम्यतो ये भावतीर्थमेतत् कुर्वन्ति, गुणतः प्रकाशयन्ति च, ते तीर्थकराः । तत्र हेतौ सद्धर्मतीर्थकरणहेतवः "[2]कृञो हेतु-ताच्छील्या-ऽऽनुलोम्येषु" इत्यादिना टप्रत्ययविधानात् तीर्थकराः, यथा यशस्करी विद्येत्यादि । ताच्छील्ये– कृतार्था अपि तीर्थकरनामकर्मोदयतः समग्रप्राणिगणानुकम्पापरतया च सद्धर्मतीर्थदेशकत्वात् तीर्थकराः, भरतादिक्षेत्रे प्रथमनरनाथकुलकरादिवदिति । आनुलोम्ये– स्त्री-पुरुष-बाल-वृद्ध-स्थविरकल्पिक-जिनकल्पिकादीनामनुरूपोत्सर्ग-ऽपवाददेशनयाऽनुलोमसद्धर्मतीर्थकरणात् तीर्थकराः, यथा वचनकर इत्यादि । एवंभूतास्तीर्थकराः, अत एव सर्वासुमतां हितस्य मोक्षार्थस्य करणात् हितार्थकराः । तान्,'वन्दे' इति क्रिया-संबन्धात् सर्वत्र कर्मप्राप्तिः । द्वितीयाबहुवचने च प्राकृतत्वादेकारान्तत्वमिति ॥ १०४७ ॥

'[3]भगवंते' इत्येतद् व्याचष्टे—

[4]ईस्सरिय-रूव-सिरि-जस-धम्म-पयत्ता मया भगाभिक्खा । ते तेसिमसामण्णा संति जओ तेण भगवंते ॥१०४८॥

[4]ऐश्वर्यादयः षडर्था भगाभिख्या भगसंज्ञास्तावद् मताः प्रोक्ताः । ते च तेषां तीर्थकराणामसामान्या असाधारणाः सन्ति यस्मात्, तेन ते भगवन्तः, तान् वन्दे । तत्र स्वाभाविककर्मक्षयजन्य-सुरनिर्वर्तितचतुस्त्रिंशदतिशयलक्षणं तेषां परमैश्वर्यम् । तथा

"[5]सव्वसुरा जइ रूवं अंगुट्ठपमाणयं विउव्वेज्जा । जिणपायंगुट्ठं पइ न सोहए तं जहिंगालो ॥ १ ॥
गणहर आहार अणुत्तरा य जाव वण चक्कि-वासु-बला । मंडलिया जा हीणा छट्ठाणगया भवे सेसा ॥ २ ॥"

---

१ अनुलोम-हेतु-तच्छीलकाश्च ये भावतीर्थमेतत् तु । कुर्वन्ति प्रकाशयन्ति च तांस्तीर्थकरान् हितार्थकरान् ॥ १०४७ ॥

२ पाणिनीये ॥ ३ । २ । २० ॥ ३ गाथा १०२५ ।

४ ऐश्वर्य-रूप-श्री-यशो-धर्म-प्रयत्ना मता भगाभिख्याः । ते तेषामसामान्याः सन्ति यतस्तेन भगवन्तः ॥ १०४८ ॥

५ सर्वसुरा यदि रूपमङ्गुष्ठप्रमाणकं विकुर्वीरन् । जिनपादाङ्गुष्ठं प्रति न शोभते तद् यथाऽङ्गारः ॥ १ ॥
गणधरा आहारका अनुत्तराश्च यावद् वानाश्चक्रि-वासु-बलाः । मण्डलिका ये हीनाः षट्स्थानगता भवे शेषाः ॥ २ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

इत्यादिग्रन्थाभिहितं निरुपमं तेषां रूपम् । तथा, श्रीरनन्यसाधारणा तपस्तेजोविभूतिरमीषाम् । तथा, जगत्त्रयातिक्रान्तानुपमगुणग्रामाविर्भावितशरदिन्दुकुन्दविशदं भुवनत्रयव्यापकं यशस्तेषाम् । तथा, समस्तचारित्रमोहनीयक्षयप्रभवत्वादुत्तमक्षमा-मार्दवादिरूपः सर्वोत्कृष्टो धर्मस्तेषाम् । तथा, प्रयतनं प्रयत्नः सर्वेष्वपि हितानुष्ठानेष्वप्रमादः, सोऽपि चारित्रावरणव्यपगमादनुत्तर एव तेषामिति॥१०४८॥

'अणुत्तरपरिक्कमे' इत्येतद् विवृण्वन्नाह—

[1]विरियं परिक्कमो किर परेऽरयो वा जओ तदक्कमणं । सोऽणुत्तरो वरो सिं अणुत्तरपराक्कमा तो ते ॥१०४९॥

पराक्रमः किल वीर्यमभिधीयते । स च भगवतां क्षीणनिःशेषवीर्यान्तरायत्वात् सर्वोऽमर-नरेन्द्रनिवहपराक्रमादनन्तगुणत्वादनुत्तर एव । अनुत्तरः पराक्रमो वीर्यं येषां तेऽनुत्तरपराक्रमाः । अथवा, परेऽरयो भावशत्रवः कषायादयः; 'जउ त्ति' जयः पराभवोऽभिभवनं तदाक्रमणं परेषामाक्रमणमाक्रमः पराक्रमः सोऽनुत्तरो वरोऽमीषाम्, ततोऽनुत्तरपराक्रमास्ते, अतस्तानिति ॥ १०४९ ॥

'अमितज्ञानिनः' इति व्याख्यानयन्नाह—

[2]अमियमणंतं नाणं तं तेसिं अमियणाणिणो तो ते । तं जेण नेयमाणं तं चाणंतं जओ नेयं ॥ १०५० ॥

अनन्तत्वाद् मातुमशक्यममितं केवलज्ञानलक्षणं ज्ञानं तत्तेषां विद्यते, ततोऽमितज्ञानिनस्ते । कथं पुनः केवलज्ञानस्याऽऽनन्त्यमित्याह– तत्केवलज्ञानं येन कारणेन ज्ञेयमानं वर्तते, ज्ञानस्य ज्ञेयानुवर्तित्वात्, तच्च ज्ञेयं सर्वमपि यतोऽनन्तम्, अतः केवलज्ञानस्याऽऽनन्त्यमिति ॥ १०५० ॥

'तिण्णे सुगइगइगए' इत्येतद् व्याख्यानयति—

[3]तिण्णा समइक्कंता भवण्णवं, कं गइं गया तरिउं?।सुगईण गइं पत्ता सुगइगइगया तओ होंति॥१०५१॥

तरन्ति स्म तीर्णा भवार्णवं समतिक्रान्ताः । आह– भवोदधिं तीर्त्वा ततस्ते कां गतिं गताः ?, इत्याह– 'सुगईणेत्यादि' ज्ञानि-

---

१ गाथा १०२५ । २ वीर्यं पराक्रमः किल परेऽरयो वा जयस्तदाक्रमणम् । सोऽनुत्तरो वर एषामनुत्तरपराक्रमास्ततस्तान् ॥ १०४९ ॥ × पर-।

३ अमितमनन्तं ज्ञानं तत् तेषाममितज्ञानास्ततस्तान् । तद् येन ज्ञेयमानं तच्चाऽनन्तं यतो ज्ञेयम् ॥ १०५० ॥

४ तीर्णाः समतिक्रान्ता भवार्णवं, कां गतिं गतास्तीर्त्वा ? । सुगतीनां गतिं प्राप्ताः सुगतिगतिगतास्ततो भवन्ति ॥ १०५१ ॥

त्वे सति सर्वबाधाविनिर्मुक्तत्वात् परमसुखिनः सुगतयः सिद्धाः, तेषां सुगतीनां सिद्धानां तैर्गम्यमानत्वाद् गतिः सिद्धिलक्षणा, न तु नरकगत्यादिका सुगतिगतिः, तां गताः प्राप्ताः, सुगतिगतिगतास्तानिति ॥१०५१॥

'सिद्धिपहपएसए' इत्येतद् व्याख्यानयन्नाह—

[1]से चिय सुगईण गई सिद्धी सिद्धाण जो पहो तंसे । तद्देसया पहाणा सिद्धिपहपएसया तो ते ॥१०५२॥

सिद्धानां संबन्धिनी येयमनन्तरगाथायां सुगतिगतिरुक्ता, सैवेह सिद्धिरभिप्रेता, तस्याः सिद्धेर्यः पन्था वक्ष्यमाणज्ञान-दर्शन-चारित्रलक्षणः स सिद्धिपथः, तस्य सिद्धिपथस्य यतः प्रधानाः प्रकृष्टा आदौ वा देशकाः प्रदेशकास्ततः सिद्धिपथप्रदेशकास्ते, अतस्तानिति ॥ १०५२ ॥

सिद्धिपथप्रदेशका इत्युक्तम् , तत्र कोऽयं सिद्धिपथः ?, इत्याशङ्क्य भाष्यकार एव तमाह—

[2]सिद्धिपहो उण सम्मत्त-नाण-चरणाइं वक्खमाणाइं । भवहेउविवक्खाओ निदाणपडिकूलकिरिय व्व ॥१०५३॥

सिद्धेस्तु पन्था इहैव वक्ष्यमाणानि सम्यक्त्व-श्रुत-चारित्रसामायिकलक्षणानि सम्यक्त्व-ज्ञान-चारित्राणि । कुतः?, इत्याह– 'भवेत्यादि' । इदमुक्तं भवति– मुक्तेर्मार्गो मुक्तेः साधकानि सम्यक्त्व-ज्ञान-चारित्राणीति प्रतिज्ञा, भवस्य संसारस्य या मिथ्यात्वाऽज्ञाना-ऽविरतिलक्षणो हेतुस्तद्विपक्षत्वात् तद्विघातकत्वात् सम्यक्त्वादीनामिति हेतुः। इह यो यद्धेतुविपक्षस्वभावः स तद्विपक्षस्य साधको दृष्टः, यथा रोगनिदानस्याऽजीर्णादेर्लङ्घनादिका प्रतिपक्षभूता क्रिया नीरोगत्वस्य साधनी, भवहेतुविपक्षभूताश्च सम्यक्त्वादयः, ततो भवविपक्षस्य मोक्षस्य साधका इति । अथवा, अन्यथा प्रयोगः क्रियते– इष्टार्थप्रसाधकमेव सम्यक्त्वादित्रयमिति प्रतिज्ञा, इष्टार्थविघातकहेतुविपक्षत्वादिति हेतुः, इह यो यस्य विघातहेतूनां विपक्षस्वभावः स तस्य साधको दृष्टः, यथा नीरोगताविघातकस्याऽजीर्णादेः प्रतिपक्षभूता लङ्घनादिक्रिया नीरोगतासाधनी, इष्टार्थस्य मोक्षस्य विघातकानां मिथ्यात्वादीनां विपक्षभूताश्च सम्यक्त्वादयः, ततो मोक्षलक्षणस्येष्टार्थस्य साधका इति ॥ १०५३ ॥

---

१ गाथा १०२५ । २ सैव सुगतीनां गतिः सिद्धिः सिद्धानां यः पथस्तस्याः । तद्देशकाः प्रधानं सिद्धिपथप्रदेशकास्ततस्तान् ॥ १०५२ ॥

३ सिद्धिपथः पुनः सम्यक्त्व-ज्ञान-चरणानि वक्ष्यमाणानि । भवहेतुविपक्षाद् निदानप्रतिकूलक्रियेव ॥ १०५३ ॥ × ज्ञा-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ ''वंदे' इत्यस्यार्थं, वक्ष्यमाणमहावीरनमस्कारप्रस्तावनां चाह—

[2]वंदेऽभिवादयेऽभित्थुणामि वा ते तिलोगमंगल्ले । सामण्णवंदणमिणं तित्थयरत्ताविसिट्ठाणं ॥ १०५४ ॥

पत्तेयवंदणमिओ संपइ तित्थाहिवस्स वीरस्स । सुयनाणत्थप्पभवो स विसेसेणोवगारि त्ति ॥ १०५५ ॥

गाथाद्वयमपि प्रसिद्धार्थम्, नवरं तीर्थकरत्वेनाऽविशिष्टानामभिन्नानामृषभादीनां समस्ततीर्थकराणामिदं वन्दनमुक्तम् । 'सुयनाणत्थप्पभवो त्ति' समस्तस्यापि श्रुतज्ञानस्य योऽर्थस्तस्य प्रभवो हेतुरिति ॥ १०५४ ॥ १०५५ ॥

प्रकारान्तरेणापि महावीरनमस्कारस्य प्रस्तावनामाह—

[3]तुल्लगुणाणं परिसं नमिऊण जह ससामियं नमइ । तह तुल्लगुणे वि जिणे नमिउं तित्थाहिवं नमइ ॥१०५६॥

अथवा, यथा तुल्यगुणानां राजादीनां परिषदं समाजं दृष्ट्वा कोऽपि सामान्येन सर्वेभ्यो नमस्कृत्य पुनर्विशेषतो निकटीभूय स्वस्वामिनं प्रणमति, तथा तुल्यगुणांस्तीर्थकरानपि सामान्येन सर्वान् नमस्कृत्य सांप्रतं तीर्थाधिपं महावीरं प्रणमति ॥ इत्येकत्रिंशद्गाथार्थः ॥ १०५६ ॥

कथम् ?, इत्याह—

[4]वंदामि महाभागं महामुणिं महायसं महावीरं । अमर-नरराय महियं तित्थयरमिमस्स तित्थस्स ॥१०५७॥

महावीरं वन्द इति योगः । भागः किलाऽचिन्त्या शक्तिः, महान् भागोऽस्येति महाभागो महाप्रभाव इत्यर्थः, तं तथाभूतम् । तथा, मुणति, मनुते, मन्यते वा जगतस्त्रिकालावस्थामिति मुनिः, सर्वज्ञत्वाद् महांश्चासौ मुनिश्च महामुनिः । अथवा, मुनयः साधवस्तेषां महान् प्रधानो महामुनिस्तम् । त्रिभुवनव्यापित्वाद् महद् यशोऽस्येति महायशास्तम् । महावीर इत्यभिधानम् । अथवा, 'शूर वीर विक्रान्तौ' कषायादिमहाशत्रुसैन्यजयाद् महाविक्रान्तो महावीरः । यदिवा, 'ईर गतौ' क्षियत्क्षिपितकर्मसाध्वपेक्षया विशेषत ईरयति क्षिपति तिरस्करोत्यशेषाण्यपि कर्माणीति वीरः । अथवा, विशेषत ईरयति– शिवपदं प्रति भव्यजन्तून् गमयतीति वीरः । यदिवा,

१ गाथा १०२५ । २ वन्देऽभिवादयेऽभिस्तौमि वा तांस्त्रिलोकमङ्गल्यान् । सामान्यवन्दनमिदं तीर्थकरत्वाविशिष्टानाम् ॥ १०५४ ॥
प्रत्येकवन्दनमितः संप्रति तीर्थाधिपस्य वीरस्य । श्रुतज्ञानार्थप्रभवः स विशेषेणोपकारीति ॥ १०५५ ॥
३ तुल्यगुणानां परिषदं दृष्ट्वा यथा स्वस्वामिनं नमति । तथा तुल्यगुणानपि जिनान् नत्वा तीर्थाधिपं नमति ॥ १०५६ ॥
४ वन्दे महाभागं महामुनिं महायशसं महावीरम् । अमर-नरराजमहितं तीर्थकरमस्य तीर्थस्य ॥ १०५७ ॥

विशेषतः शिवपदं स्वयमियर्ति गच्छतीति वीरः । अथवा, 'वृ विदारणे' विदारयति कर्मरिपुसंघट्टमिति वीरः । अनन्यानुभूतमहातपःश्रिया वा विराजत इति वीरः । अन्तरङ्गमोहमहाबलनिर्दलनार्थमनन्तं तपोवीर्यं व्यापारयतीति वा वीरः । उक्तं च—

''विदारयति यत्कर्म तपसा च विराजते । तपोवीर्येण युक्तश्च तस्माद् वीर इति स्मृतः ॥ १ ॥''

महांश्चासौ वीरश्चेति महावीरस्तम् । तथा, अमर-नराणां राजानः शक्र-चक्रवर्त्यादयस्तैरपि महितः पूजितः, किं पुनः शेषजनैः ?, अतस्तम् । तथा, अस्य वर्तमानतीर्थस्य प्रवर्तकस्तीर्थकरस्तम् । मङ्गल्यम्, महोपकारकं च वन्दे ॥ इति निर्युक्तिगाथार्थः ॥ १०५७ ॥

अथ भाष्यम्—

[1]भागो चिंता सत्ती स महाभागो [2]महप्पभावो त्ति । स महामुणी महंतं जं मुणइ मुणिप्पहाणो वा॥१०५८॥

तिहुयणविक्खायजसो महाजसो नामओ महावीरो । विक्कंतो व कसायाइसत्तुसेन्नं[3]प्पराजयओ ॥ १०५९ ॥

ईरेइ विसेसेणं खिवेइ कम्माइं गमेंयइ सिवं वा । गच्छइ य, तेण वीरो स महं वीरो महावीरो ॥१०६०॥

अमर-नरराय महियं ति पूइयं तेहिं, किमु य सेसेहिं ? । संपइतित्थस्स पहुं मंगल्लं महोवगारिं च ॥१०६१॥

चतस्रोऽप्युक्तार्था एवेति ॥ १०५८ ॥ १०५९ ॥ १०६० ॥ १०६१ ॥

तदेवमर्थप्रणेतुर्मङ्गलार्थं वन्दनं कृतम्, अथ सूत्रकर्त्रादीनामपि तदाह—

[5]ऍक्कारस वि गणहरे पवायए पवयणस्स वंदामि । सव्वं गणहरवंसं वायगवंसं पवयणं च ॥ १०६२ ॥

१ भागोऽचिन्त्या शक्तिः स महाभागो महाप्रभाव इति । स महामुनिर्महान्तं यं जानाति मुनिप्रधानं वा ॥ १०५८ ॥
त्रिभुवनविख्यातयशा महायशा नामतो महावीरः । विक्रान्तो वा कषायादिशत्रुसेनापराजयतः ॥ १०५९ ॥
ईरयति विशेषेण क्षेपयति कर्माणि गमयति शिवं वा । गच्छति च, तेन वीरः स महान् वीरो महावीरः ॥ १०६० ॥
अमर-नरराजमहितमिति पूजितं तैः, किमु च शेषैः ? । संप्रतितीर्थस्य प्रभुं मङ्गल्यं महोपकारिणमिति ॥ १०६१ ॥
२ क. ग. 'महाप्प' । ३ क. ग. 'नपरा' । ४ क. ग. 'मइ य सि' ।
५ एकादशापि गणधरान् प्रवाचकान् प्रवचनस्य वन्दे । सर्वं गणधरवंशं वाचकवंशं प्रवचनं च ॥ १०६२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अनुत्तरज्ञान-दर्शनादिगुणानां गणं धारयन्तीति गणधरास्तानेकादशापि गौतमादीन् वन्दे । कथंभूतान् ?, इत्याह- प्रकर्षेण, प्रधानाः, आदौ वा वाचकाः प्रवाचकाः प्रवचनस्याऽऽगमस्य । एवं तावद् मूलगणधरवन्दनं कृतम् । तथा, सर्वे निरवशेषं, गणधरा जम्बू-प्रभव-शय्यंभवादयः शेषा आचार्यास्तेषां परम्परया प्रवाहो वंशस्तम् । तथा, वाचका उपाध्यायास्तेषां वंशस्तम् । तथा, प्रवचनं चागमं वन्दे ॥ इति निर्युक्तिगाथार्थः ॥ १०६२ ॥

अथ भाष्यम्--

पुज्जो जहत्थवत्ता सुयवत्तारो तहा गणहरा वि । पुज्जा पवायगा पवयणस्स ते बारसंगस्स ॥ १०६३ ॥
जह वा रायाणत्तं रायनिउत्तपणओ सुहं लहइ । तह जिणवरिंदविहियं गणहरपणओ सुहं लहइ ॥१०६४॥
जह मूलसुयप्पभवा पुज्जा जिण-गणहरा तहा जेहिं । तदुभयमाणीयमिदं तेसिं वंसो किह न पुज्जो ? ॥१०६५॥
जिणगणहरुग्गयस्स वि सुयस्स को गहणधरणदाणाइं । कुणमाणो जइ गणहरवायगवंसो न होज्जाहि ?॥१०६६॥
सीसहिया वत्तारो गणाहिवा गणहरा तयत्थस्स । सुत्तस्सोवज्झाया वंसो तेसिं परंपरओ ॥ १०६७ ॥
पगयं पहाणवयणं पवयणं बारसंगमिह तस्स । जइ वत्तारो पुज्जा तं पि विसेसेण तो पुज्जं ॥ १०६८ ॥

षडपि सुगमार्थाः, नवरं यथाऽर्थस्य वक्ता तीर्थकरः पूज्यः, तथा गणधरा अपि गौतमादयः पूज्याः, यतस्तेऽपि प्रवचनस्य द्वादशाङ्गस्य सूत्रतः प्रवाचका एवः इति तेषामपि नमस्कारः कृतः । अथवा, यथा राज्ञा पृथ्वीपतिनाऽऽज्ञप्तं तदाज्ञापितमर्थादिकं राजनियुक्तानामप्यमात्यादीनां प्रणतः सुखेनैव लभते, तथा प्रणतिप्रसन्नैर्जिनवरेन्द्रैर्विहितं विस्तीर्णं मङ्गलादिकं गणधरप्रणतः सुखेनैव लभते,

१ पूज्यो यथाऽर्थवक्ता श्रुतवक्तारस्तथा गणधरा अपि । पूज्याः प्रवाचकाः प्रवचनस्य ते द्वादशाङ्गस्य ॥ १०६३ ॥ × पृथिवी-।
यथा वा राज्ञाज्ञप्तं राजनियुक्तप्रणतः सुखं लभते । तथा जिनवरेन्द्रविहितं गणधरप्रणतः सुखं लभते ॥ १०६४ ॥ ३ प्रणप्तित्-।
यथा मूलश्रुतप्रभवाः पूज्या जिन-गणधरास्तथा यैः । तदुभयमानीतमिदं तेषां वंशः कथं न पूज्यः ? ॥ १०६५ ॥ + वित्तीर्ण-।
जिन-गणधरोद्गतस्यापि श्रुतस्य को ग्रहण-धरण-दानादि । कुर्वन् यदि गणधर-वाचकवंशो न भवेत् ? ॥ १०६६ ॥
शिष्यहिता वक्तारो गणाधिपा गणधरास्तदर्थस्य । सूत्रस्योपाध्याया वंशस्तेषां परम्परकः ॥ १०६७ ॥
प्रकृतं प्रधानवचनं प्रवचनं द्वादशाङ्गमिह तस्य । यदि वक्तारः पूज्यास्तदपि विशेषेण ततः पूज्यम् ॥ १०६८ ॥ २ क. ग. 'तं दापि' ।

इति तेषामपि नमस्कारः । अथ सामान्येन शेषाचार्यो-पाध्यायनमस्कृतौ हेतुमाह- 'जहेत्यादि' यथा मूलश्रुतस्य द्वादशाङ्गीसंबन्धिनोऽर्थस्य सूत्रस्य च प्रभवा हेतवो यथासंख्यं जिना गणधराश्च पूज्याः; तथा यैरिदं तयोर्द्वादशाङ्गीसंबन्धिसूत्रार्थयोरुभयमियतीं कालकलां यावदानीतम्, तेषां शेषाचार्यरूपगणधरो-पाध्यायानां वंशः कथं न पूज्यः ?- अपितु पूज्य एवेति ।

किञ्च, 'जिणेत्यादि'। अथ विशेषतो गणधराणाम्, उपाध्यायानां च नमस्कृतौ हेतुमाह- 'सीसेत्यादि' यथा गणाधिपा गौतमादयः, गणधरास्तु जम्बूस्वाम्यादयः शेषाचार्यास्तदर्थस्य द्वादशाङ्गार्थस्य वक्तारो व्याख्यातारः सन्तः शिष्यवर्गस्य हिताः, तद्धितत्वाच्च नमस्क्रियन्ते; तथा तत्सूत्रस्य वक्तारः पाठयितारः सन्त उपाध्याया अपि शिष्यहिता एव । वंशश्च तेषामेवोपाध्यायानां परम्परकः पारम्पर्येण व्यवस्थितः समूहः, अतः शिष्यहेतुत्वात् सोऽपि नमस्क्रियते । शेषं सुबोधमिति ॥ १०६३ ॥ १०६४ ॥ १०६५ - १०६८ ॥

नन्वेषां तीर्थकर-गणधराणां नमस्कारं कृत्वा ततः किं कर्तव्यम् ?, इत्याह—

[1]ते वंदिऊण सिरसा अत्थपुहत्तस्स तेहिं कहियस्स । सुयनाणस्स भगवओ निज्जुत्तिं कित्तयिस्सामि ॥१०६९॥

तान् पूर्वोक्तांस्तीर्थकरादीन् शिरसा, उपलक्षणत्वाद् मनः-कायाभ्यां च वन्दित्वा तैरेव कथितस्य प्ररूपितस्य, अर्थान् कथञ्चिद्भिन्नत्वात् सूत्रं पृथगुच्यते, प्राकृतत्वाच्च पृथगेव च पृथक्त्वम्, अर्थस्तु सूत्राभिधेयः प्रतीत एव, अर्थश्च पृथक्त्वं चार्थपृथक्त्वमिति समाहारद्वन्द्वः, तस्याऽर्थपृथक्त्वस्य सूत्रार्थोभयरूपस्य श्रुतज्ञानस्य भगवतः, सूत्रार्थयोः परस्परं [2]नियोजनं संबन्धनं निर्युक्तिस्तां कीर्तयिष्यामि ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥ १०६९ ॥

विस्तरार्थं तु भाष्यकारः प्राह—

[3]ते तित्थयराईएऽभिवन्दिउं सुकयमङ्गलायारो । निव्विग्घमओ वोच्छं पगयमुवग्घायनिज्जुत्तिं ॥१०७०॥

पाठसिद्धा ॥ १०७० ॥

[4]अत्थो सुयस्स विसओ तत्तो भिन्नं सुयं पुहत्तं ति। उभयमिदं सुयनाणं नियोजणं तेसिं निज्जुत्ती ॥१०७१॥

×(हित-)

१ तान् वन्दित्वा शिरसाऽर्थ-पृथक्त्वस्य तैः कथितस्य । श्रुतज्ञानस्य भगवतो निर्युक्तिं कीर्तयिष्यामि ॥ १०६९ ॥ २ क. ग. 'नियोज' ।
३ तांस्तीर्थकरादीनभिवन्द्य सुकृतमङ्गलाचारः । निर्विघ्नमतो वक्ष्ये प्रकृतमुपोद्घातनिर्युक्तिम् ॥ १०७० ॥ ४ क. ग. 'त्थगरा' ।
५ अर्थः श्रुतस्य विषयस्ततो भिन्नं श्रुतं पृथक्त्वमिति । उभयमिदं श्रुतज्ञानं नियोजनं तयोर्निर्युक्तिः ॥ १०७१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अर्थः किमुच्यते ?, इत्याह-- श्रुतस्य विषयोऽभिधेयः । तस्माच्चार्थात् कथञ्चिद्भिन्नत्वात् सूत्रं पृथगुच्यते, प्राकृतत्वात् तदेव पृथक्त्वम् । इदं च सूत्रा-ऽर्थलक्षणमुभयं श्रुतज्ञानम् । 'तेसिं ति' तयोः सूत्रा ऽर्थयोः परस्परं [1]नियोजनम्– 'अस्य सूत्रस्याऽयमर्थः' इत्येवं संबन्धनं निर्युक्तिस्तां कीर्तयिष्यामि ॥ १०७१ ॥

अथवा, 'अत्थपुहत्तं' इत्यन्यथा व्याचष्टे—

[3]अत्थस्य व पिहुभावो पुहत्तमत्थस्स वित्थरत्तं ति। इह सुयस्स विसेसणं चिय अत्थपुहत्तं व से सण्णा ॥१०७२॥

अथवा, पृथु सामान्येन विस्तीर्णमुच्यते, तस्य भावः पृथुत्वम् , अर्थस्य पृथुत्वं पृथुभावः, किम् ?, इत्याह– अर्थस्य विस्तरत्वं जीवाद्यर्थविस्तर इति यावत् । एतच्चेह श्रुतविशेषणम्– श्रुतज्ञानस्य कथंभूतस्य ?, अर्थप्रतिपादकेनोपचारादर्थपृथुत्वस्यार्थविस्तररूपस्येत्यर्थः । अथवा, अर्थपृथक्त्वम्, अर्थपृथुत्वं चेति श्रुतज्ञानस्य संज्ञैवेयम्। ततश्चार्थपृथक्त्वसंज्ञितस्य, अर्थपृथुत्वसंज्ञितस्य वा श्रुतज्ञानस्य भगवतो निर्युक्तिं कीर्तयिष्यामीति ॥ १०७२ ॥

अथवा— .

[4]अत्थाओ व पुहत्तं जस्स तओ वा पुहत्तओ जस्स। जं वा अत्थेण पिहुं अत्थपुहुत्तं ति तब्भावो ॥१०७३॥

अथवा, अर्थात् पृथक्त्वं कथञ्चिद्भेदो यस्य तदर्थपृथक्त्वम् , स चाऽर्थः पृथक्त्वतः पार्थक्येन भेदेन वर्तते यस्य तदर्थपृथक्त्वम्, अर्थेन वा पृथु विस्तीर्णमर्थपृथु तद्भावोऽर्थपृथोर्भावोऽर्थपृथुत्वम् । अत्र पक्षे भावप्रत्ययान्तस्याप्यर्थपृथुत्वशब्दस्य प्राकृतत्वेन स्वार्थवाचकत्वात् श्रुतज्ञानेन सह सामानाधिकरण्यम् । ततश्च तस्याऽर्थपृथक्त्वस्य, अर्थपृथुत्वस्य वा श्रुतज्ञानस्य भगवतो निर्युक्तिं कीर्तयिष्यामि ॥ इति गाथाचतुष्टयार्थः ॥ १०७३ ॥

किं सर्वस्यापि श्रुतज्ञानस्य निर्युक्तिर्वक्तव्या ?, नैवम् ; किं तर्हि—

[6]आवस्सयस्स दसकालियस्स तह उत्तरज्झमायारे। सुयगडे निज्जुत्तिं वोच्छामि तहा दसाणं च ॥१०७४॥

---

१ क. ग. 'नियोज'। २ गाथा १०६९। ३ अर्थस्य वा पृथुभावः पृथुत्वमर्थस्य विस्तीर्णत्वमिति । इह श्रुतस्य विशेषणमेवाऽर्थपृथक्त्वं वा तस्य संज्ञा ॥ १०७२ ॥
४ क.ग. 'त्तं ति से' । ५ अर्थाद् वा पृथक्त्वं यस्य सको वा पृथक्त्वतो यस्य । यद्वाऽर्थेन पृथु अर्थपृथुत्वमिति तद्भावः ॥ १०७३ ॥ × पृथुपादकत्वेन
६ आवश्यकस्य दशकालिकस्य तथोत्तराध्ययना-ऽऽचारयोः । सूत्रकृते निर्युक्तिं वक्ष्ये तथा दशानां च ॥ १०७४ ॥

[1]कप्पस्स य निज्जुत्तिं ववहारस्स य परमनिउणस्स। सूरियपण्णत्तीए वोच्छं इसिभासियाणं च ॥१०७५॥

एएसिं निज्जुत्तिं वोच्छामि अहं जिणोवएसेण । आहरण-हेउ-कारणपयनिवहमिणं समासेण ॥ १०७६ ॥

आवश्यकस्य, दशवैकालिकस्य, तथा, सूत्रस्य सूचकत्वादेकदेशेन समुदायावगतेश्चोत्तराध्ययना-ऽऽचारयोः, सूत्रकृतविषयां च निर्युक्तिं वक्ष्ये । तथा, दशानां च कल्पस्य च निर्युक्तिं व्यवहारस्य च परमनिपुणस्य, तथा, सूर्यप्रज्ञप्तेर्वक्ष्ये । ऋषिभाषितानां च देवेन्द्रस्तवादीनाम् । एतेषां श्रुतविशेषाणामहं जिनोपदेशेनाहरण-हेतु-कारणपदनिवहमेतां निर्युक्तिं समासेन वक्ष्यामि ॥ इति निर्युक्तिगाथात्रयार्थः ॥ १०७४ ॥ १०७५ ॥ १०७६ ॥

अथाहरण-हेत्वादिस्वरूपं भाष्यकारो व्याख्यातुमाह—

[2]हेऊ अणुगम-वइरेगलक्खणो सज्झवत्थुपज्जाओ । आहरणं दिट्ठंतो कारणमुववत्तिमेत्तं तु ॥ १०७७ ॥

एवं पयाण निवहो हेऊ-दाहरण-कारणत्थाणं । अहवा पयनिवहो चिय कारणमाहरण-हेऊणं ॥ १०७८ ॥

'यत्र साधनं तत्र साध्यं भवत्येव' इत्येवंलक्षणः साध्यस्य साधनेन सहाऽन्वयोऽनुगमः, साध्याभावे साधनाभावरूपो व्यतिरेकः, अनुगमश्च व्यतिरेकश्च तौ लक्षणं स्वरूपं यस्य स एवंभूतो हेतुः ; यथा– अनित्यत्वादिविशिष्टे शब्दादौ साध्ये कृतकत्वादिः । कथंभूतोऽयम् ?, इत्याह– साध्यस्याऽनित्यत्वादिविशिष्टस्य शब्दादिवस्तुनः पर्यायः, अन्यस्य वैयधिकरण्यादिदोषदुष्टत्वेन साध्यसाधकत्वायोगादिति । यत् साधर्म्येण वैधर्म्येण वा साध्यसाधनायोपन्यस्यते तदाहरणमुदाहरणं दृष्टान्त इत्यर्थः । तत्र यो भोक्ता स कर्ता दृष्टः, यथा देवदत्तः, इति साधर्म्योदाहरणम् ; यस्तु न कर्ता स भोक्तापि न भवति यथाऽऽकाशम् , इति वैधर्म्योदाहरणम् ।

कारणं तु यद्यप्यन्यत्र हेतुरेवोच्यते तथापीह हेतोः साक्षात् पृथगेवोपादानात् कारणमुपपत्तिमात्रमेवावगन्तव्यम् । यथा–

---

१ कल्पस्य च निर्युक्तिं व्यवहारस्य च परमनिपुणस्य । सूर्यप्रज्ञप्तेर्वक्ष्य ऋषिभाषितानां च ॥ १०७५ ॥
एतेषां निर्युक्तिं वक्ष्येऽहं जिनोपदेशेन । आहरण-हेतु-कारणपदनिवहामिमां समासेन ॥ १०७६ ॥
२ हेतुरनुगम-व्यतिरेकलक्षणः साध्यवस्तुपर्यायः । आहरणं दृष्टान्तः कारणमुपपत्तिमात्रं तु ॥ १०७७ ॥
एवं पदानां निवहो हेतू-दाहरण-कारणार्थानाम् । अथवा पदनिवह एव कारणमाहरण-हेतूनाम् ॥ १०७८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

निरुपमसुखाः सिद्धाः, ज्ञाना-ऽनाबाधाप्रकर्षादिति; उपपत्तिमात्रता चेह आविद्वदङ्गनादिलोकप्रतीतस्य साध्य-साधनधर्मानुगतस्य कस्यचिद् दृष्टान्तस्य दर्शयितुमशक्यत्वात्; दृष्टाश्च प्रकृष्टज्ञानाः, राग-द्वेष-क्षुत्-पिपासा-परपरिभवादिभिर्मनोबाधारहिताश्च साधवः परमसुखिनः; अतोऽतिप्रकर्षप्राप्तकेवलज्ञानरूपेण ज्ञानेन, सर्वथा निराबाधत्वेन च सह यद्यपि निरुपमसुखत्वस्येहाऽन्वयो न दृश्यते, तथापि गीतार्थप्रशान्तसाधुसुखित्वदर्शनमात्रेण निरुपमसुखसमृद्धिः सिद्धानां संभाव्यते, इतीहोपपत्तिमात्रतेति ।

अत्र च भाष्यकृता प्रथमं हेतुर्व्याख्यातः, ततो दृष्टान्तः, प्रायेणेत्थमेव प्रयोगोपन्यासात् । निर्युक्तिकृता तु प्रथमं दृष्टान्तम्, ततो हेतुमुपन्यस्यतैतद् दर्शितं यदुत- अस्त्ययमपि न्यायो यत् क्वचिद्धेतुमनभिधाय दृष्टान्त एवोपदर्श्यते, यथा- गतिपरिणतानां जीव-पुद्गलानां गत्युपष्टम्भको धर्मास्तिकायः, मत्स्यादीनां सलिलवदिति । तथा, क्वापि हेतुरेव केवलोऽभिधीयते न दृष्टान्तः, यथा- मदीयोऽयमग्निः, प्रागस्मदृदृष्टविशिष्टचिह्नान्यथानुपपत्तेः । तथा चोक्तं निर्युक्तिकारेण—

[1]'जिणवयणं सिद्धं चेव भण्णइ कत्थइ उदाहरणं । आसज्ज उ सोयारं हेऊ वि [x]कहिं च भासेज्जा ॥ १ ॥' इति ।

'एवमित्यादि' एवमुक्तस्वरूपाणि हेतू-दाहरण-कारणार्थानि हेतू-दाहरण-कारणाभिधायकानि यानि पदानि तेषां निवहः संघातो यस्यां निर्युक्तौ सा हेतू-दाहरण-कारणपदनिवहा तां वक्ष्य इति तात्पर्यम् । हेतू-दाहरणपदव्यत्यये तु कारणपदाभिहितमेव । अथवा, आहरणानि च हेतवश्चाहरण-हेतवस्तेषां कारणं वाचकत्वेन कारणभूतः पदनिवह एव यस्यां सा तथाभूता, तां वक्ष्य इति भावार्थ इति॥१०७७॥१०७८॥

अथोत्तरनिर्युक्तिगाथासंबन्धनार्थमाह—

[2]इय सव्वसंगहाईए जेणमावासयं अहिगयं च । सामाइयं च तस्स वि तो पढमं तस्स वुच्छामि ॥१०७९॥

यस्मात् 'आवासयस्स दसकालियस्स' इत्यादिकस्याऽस्य संग्रहस्यादावावश्यकमुपन्यस्तम्, तथेदमेव च यतोऽत्राधिकृतम्; तस्यापि च यस्मात् सामायिकं प्रथमम्; ततस्तस्यैव प्रथममुपोद्घातनिर्युक्तिं वक्ष्यामि ॥ इति गाथात्रयार्थः ॥ १०७९ ॥(सं. ११०००)

एतदेवाह निर्युक्तिकारः—

---

१ जिनवचनमसिद्धमेव भण्यते कुत्रचिदुदाहरणम् । आसाद्य तु श्रोतारं हेतुरपि [x] क्व च भाष्येत ॥ १ ॥ x कहंचि -। (कथंचित्)

२ इति सर्वसंग्रहादौ येनावश्यकमधिकृतं च । सामायिकं च तस्यापि ततः प्रथमं तस्य वक्ष्यामि ॥ १०७९ ॥ ३ गाथा १०७४ ।

[1]सामाइयनिज्जुत्तिं वोच्छं उवएसियं गुरुजणेणं । आयरियपरंपरएण आगयं आणुपुव्वीए ॥ १०८० ॥

सामायिकस्य निर्युक्तिः सामायिकनिर्युक्तिः, तां वक्ष्ये । कथंभूताम्?, उपदेशितामादौ तीर्थंकर-गणधरलक्षणेन गुरुजनेन, पुनरुपदेशकालादारभ्याचार्यपारंपर्येणाऽऽयाताम् । कथम्?, आनुपूर्व्या परिपाट्या- जम्बूस्वामिनः प्रभवेणाऽऽनीता, ततः शय्यंभवादिभिः । अथवा, जिन-गणधरेभ्य आरभ्याऽऽचार्यपरम्परागतां पश्चात् स्वकीयेनैवाचार्यो-पाध्यायरूपेण गुरुजनेनोपदिष्टाम् ॥ इति निर्युक्तिगाथार्थः ॥ १०८० ॥

'गुरुजणेणं' इत्यस्यार्थमाह भाष्यकारः—

[2]जिण-गणहरगुरुदेसियमायरियपरंपरागयं तत्तो । आयं व परंपरया पच्छा सयगुरुजणोवदिट्ठं ॥१०८१॥

जिन-गणधरलक्षणेन गुरुजनेन देशितम्, ततो जम्बूस्वाम्याद्याचार्यपारम्पर्येणाऽऽगताम्; अथवा, जिन-गणधरेभ्य आरभ्य जम्बूस्वाम्याद्याचार्यपरम्परयाऽऽगतां सतीं पश्चात् स्वकेनाऽऽत्मीयेनैव वर्तमानाचार्यो-पाध्यायरूपेण गुरुजनेनोपदिष्टां 'सामायिकोपोद्घातनिर्युक्तिं वक्ष्यामि' इति प्रक्रम इति ॥ १०८१ ॥

'[3]परंपरएण' इत्यस्य भावार्थमाह—

[4]उज्जेणीओ नीया जहिट्ठगाओ पुरा परंपरया । पुरिसेहिं कोसंबिं तहागएयं परंपरया ॥ १०८२ ॥

यथोज्जयिन्या नगर्याः पुरा पूर्वं चण्डप्रद्योतनरपतिपुरुषैर्बद्धपङ्क्तिभिः परम्परया संचारयद्भिरिष्टकाः प्राकारकरणहेतोः कौशाम्बीं नगरीं नीताः, तथैवेयमपि निर्युक्तिराचार्यपरम्परयाऽऽगता । इत्यक्षरार्थः । भावार्थस्तु कथानकगम्यः । तच्चाऽऽवश्यकवृत्तितो विस्तरतोऽवसेयम् । संक्षेपतस्तु प्रकृतोपयोगि किञ्चिदत्रापि लिख्यते; तद्यथा—

अत्रैव भरतक्षेत्रे यमुनानदीकूले पूर्वदिग्वधूकण्ठनिवेशितमुक्ताफलकाण्ठिकेव कौशाम्बी नाम नगरी । तत्र च सहस्रानीकराज-

---

१ सामायिकनिर्युक्तिं वक्ष्य उपदेशितां गुरुजनेन । आचार्यपरम्परकेणाऽऽगतामानुपूर्व्या ॥ १०८० ॥ २ गाथा १०८० ।

३ जिन-गणधरगुरुदेशितामाचार्यपरम्परागतां ततः । आगतां वा परम्परया पश्चात् स्वकगुरुजनोपदिष्टाम् ॥ १०८१ ॥

४ उज्जयिनीतो नीता यथेष्टकाः पुरा परम्परया । पुरुषैः कौशाम्बीं यथागतेयं परम्परया ॥ १०८२ ॥ (तथाऽऽगते)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

सूनुः स्वकुलमहासरःसरसिजायमानः शतानीको नाम राजा । तस्य च चेटकराजदुहिता श्रीमहावीरजिनक्रमकमलमधुकरी च भुवनाति-शायिरूपा मृगापतिर्नाम पट्टमहादेवी । अन्यदा च शतानीकनरपतिना निजमनःकुविकल्पसंभावितालीकापराधेन स्वनगरीनिवासिन-स्तोषितसाकेतपुरप्रतिष्ठितसुरप्रियाभिधानयक्षावासवरस्य निरपराधस्यैवैकस्य चित्रकरस्याऽङ्गुष्ठ-प्रदेशन्योरग्रं छेदितम् । ततस्तेन 'नि-रर्थकमपमानितोऽहम्' इति गाढं प्रकुपितेनोपायं विमृश्य स्त्रीलोलत्वादतिबलिष्ठत्वाच्चोज्जयिनीनिवासिनश्चण्डप्रद्योतनरनाथस्य चित्रफलके वरलब्धतया यथावस्थितं मृगापतिरूपं प्रदर्शितम् । ततस्तेनातिमदनपरवशेन तद्याचनाय शतानीकान्तिके दूतः प्रेषितः । स च शतानी-केन बाढमपमान्य निर्भर्त्स्य च विसर्जितः । ततस्तद्वचनाकर्णनप्रकुपितश्चण्डप्रद्योतो महाबलैरनेकभटकोटिस्वामिभिर्बद्धमुकुटैश्चतुर्दशभिर्भू-पालैः, महता स्वबलेन च सह प्रचलितः शतानीकस्योपरि । तं च तथा महाबलभरेणाऽऽगच्छन्तं श्रुत्वा, आत्मानं चाल्पसामग्रीकं ज्ञात्वा हृदयसङ्कटेन संजाततीसाररोगः पञ्चत्वमुपगतः शतानीकः । × प्रदेशि-1 + अति-1 फ स्थाला-1

ततो मृगापत्या चिन्तितम्– धिङ् मम रूपम्, यदर्थं मद्भर्तुस्तावद् मरणमागतम् । न चैतावता स्थास्यतीदम्, किन्तु भवको-टीष्वप्यतिदुरवापं श्रीमन्महावीरोपदेशतः सुचिरमनुपालितं मम शीलाभरणमपि विलुप्येत लग्नम् । तस्मादुपायमत्र चिन्तयामि, इति विमृ-श्यन्त्याः स्वबुद्धिलब्धसम्यगुपायया चण्डप्रद्योतस्यागच्छतो दूरस्थितस्यैव निरूपितः संमुखो दूतः । तेन च गत्वा मृगापतिवचनात् प्रोक्तं यथा– राजन् ! मृगापतिर्भणयति यद्– भर्तरि मृते स्वाधीनैव तावत् त्वमहम्, परं किन्त्वद्यापि राजा बाल एवाऽयमुदायननामा मत्पुत्रः । ततो यद्यस्य सुस्थमकृत्वैवाऽहं त्वया सह गच्छामि, तदा सीमालराजादिभिरसौ परिभूयते । तस्मादिहैव दूरे स्थितोऽमुं सुस्थं कुरु । अथास्मिन्नकृतेऽप्येवमेवाऽर्वाग् मदेशसीमायां समेष्यसि, तदा विषादिप्रयोगतो मरिष्यामि । ०५-थ-1

ततश्चण्डप्रद्योतेनोक्तम्– मयि विद्यमाने न कोऽप्यस्य संमुखमप्यपलोकयिष्यति । ततो दूतेनोक्तम्– नैवम्, यत उच्छीर्ष-स्थितविषधरस्य योजनशतस्थायी वैद्यः किं कुरुते ?, तस्मात् सुस्थं कुरु । तेनोक्तम्– कथं पुनरेतत् संपद्यते ? । ततो दूतेनोक्तम्– उज्ज-यिनीनगरीसत्का बलिष्ठा इष्टका भवन्ति, ताभिः कौशाम्ब्याः प्राकारं कारय । उज्जयिन्याश्चातिदूरे कौशाम्बी, ततो गन्त्यादिवाहनै-रिष्टका आनेतुं न शक्यन्ते । अतः पदातिपुरुषपरम्पर्यया चण्डप्रद्योतेन तान् परम्परया व्यवस्थाप्य हस्तात् हस्तसंचारेणेष्टका आनाय्य कारितः कौशाम्ब्याः प्राकारः । ततो मृगापत्या प्रोक्तम्– धान्य-जल-तृणादिकं यथा नगरीमध्ये प्रचुरं भवति तथा कारय । ततो रागान्धत्वेन नष्टबुद्धिना तेन सर्वं तत् तथैव कारितम् । ततो रोधकसज्ज्ञायां तस्यां नगर्यां संजातायां व्यभिचरिता मृगापतिश्चण्ड-प्रद्योतस्य । ततो नगरीद्वारे समायातो विलक्षीभूतस्तिष्ठत्यसौ । ततो मृगापत्या चिन्तितम्– पुत्रराज्योपद्रवव्यतिकरे निश्चिन्ता संजा-ताऽहं तावत्, ततो धन्यास्ते ग्राम-नगरादिप्रदेशा येषु भगवान् महावीरो विचरति; धन्यश्च स एव लोको यस्तत्पादरजोरञ्जितभालतलः सततं तदन्तिकोपासीनस्तद्वचःपीयूषदृष्टिभिर्निर्वाप्यमानः कालं निर्वाहयति; तद् यद्यत्र कथमपि भगवान् समागच्छति, ततोऽवलोकिता-तिदुरन्तसंसारवैरस्याऽहमप्येतत् करोमि, प्रव्रज्यां चाऽभ्युपगच्छामि । एतच्च तदाकूतं विज्ञाय समागतस्तत्र भगवान् । मृगापतिश्चण्डप्र-द्योतश्च तत्र वन्दनार्थमुपगतः । धर्मकथावसाने च मृगापत्या व्रतग्रहणार्थं चण्डप्रद्योतो मुत्कलापितः । तेनापि भगवल्लज्जया तस्याश्च सदेव-मर्त्या-ऽसुरायाः परिषदो लज्जमानेन सा मुत्कलिता, प्रव्रजिता च ।

तदेवं यथोज्जयिन्याः पुरुषपरम्परया कौशाम्ब्यामिष्टकाः समायाताः, तथेयमपि निर्युक्तिराचार्यपरम्परयाऽत्र समायाता, केवलमिष्टकोदाहरणे द्रव्यपरम्परकः, प्रस्तुतस्तु भावपरम्परक इति ॥ १०८२ ॥

अत्र प्रेरकः प्राह—

दव्वस्स परंपरओ जुत्तो भावसुयसंकमो कत्तो ? । सद्दो वि नागओऽयं स एव जिण-गणहरुच्चरिओ ॥१०८३॥

ननु द्रव्यस्येष्टकादेः पुरुषपारम्पर्येणागमनरूपः परम्परको युक्तः, निर्युक्तेस्तु भावश्रुतरूपायाः संक्रमः कुतः ?– न घटत एवेत्यर्थः, भावश्रुतस्य जीवपर्यायत्वात्, पर्यायस्य च वस्त्वन्तरसंक्रमायोगात् । अथ ब्रूयात्– भावश्रुतकारणस्य शब्दात्मकस्य द्रव्य-श्रुतस्येत्थमागमनसंभवाद् भावश्रुतेऽप्युपचारादागतव्यपदेशः क्रियते । एतदप्ययुक्तम्, यतः शब्दोऽपि य आदौ जिन-गणधरैरुच्चारितः, न स एवायमत्राऽऽयातः, तस्योच्चारणानन्तरमेवोपरमात्; इति कुतस्तमप्याश्रित्याऽऽगतव्यपदेशः ? इति ॥ १०८३ ॥

अत्र प्रतिविधानमाह—

आगयमिवागयं तं तत्तो जत्तो समुब्भवो जस्स । स परंपरओ य जओ तमागयमिओ तदुवयारो ॥१०८४॥

'जत्तो त्ति' यतो यस्माद् रूपकादेर्घटादेर्वा सकाशाद् यस्य भोजनादे रूपादिविज्ञानस्य वा समुद्भव उत्पत्तिः 'तं ति' तद् भो-जनादिकं रूपादिज्ञानं वा वस्तु 'तत्तो त्ति' ततो रूपकादेर्घटादेर्वा सकाशादागतमिवाऽऽगतमुच्यते, हिमवतः समागतगङ्गाप्रवाहस्येव

१ द्रव्यस्य परम्परको युक्तो भावश्रुतसंक्रमः कुतः ? । शब्दोऽपि नागतोऽयं स एव जिन-गणधरोच्चरितः ॥ १०८३ ॥

२ आगतमिवागतं तत् ततो यतः समुद्भवो यस्य । स परम्परातश्च यतस्तदागतमितस्तदुपचारः ॥ १०८४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

नस्य तद्धेतुकत्वादित्यर्थः। प्रकृते योजयन्नाह- 'स परंपरओ येत्यादि' चकारस्य भिन्नक्रमत्वात् स च समुद्भव उत्पादोऽत्र प्रस्तुते सामायिकनिर्युक्तेः परम्परात आचार्यपारम्पर्यादिति। यतः परम्परकात् किम्?, इत्याह- 'जओ तमागयं ति' यतो जम्बूस्वाम्याद्याचार्यपारम्पर्यात् तत् सामायिकमागतम्, तत एव तन्निर्युक्तिसमुद्भवः। 'इओ तदुवयारो त्ति' इतोऽस्मात् कारणात् सामायिकनिर्युक्तेस्तदुपचार आगतत्वोपचारः क्रियते; आगतशब्दश्चेहोत्पत्तिवचनो बोधवचनो वा मन्तव्यः।

इदमत्र हृदयम्- यस्य वस्तुनो यस्माद् वस्तुनः सकाशात् समुद्भवस्तद् वस्तु तस्माद् वस्तुन आगतमिवागतं व्यपदिश्यते। यथा कार्षापणरूपकादिसमुद्भूतं धान्य-भोजनादि, घटादेः समुद्भूतं रूपादिज्ञानं वा ततः समागतमित्युच्यते। स च समुद्भवोऽत्र सामायिकनिर्युक्तेर्यत आचार्यपारम्पर्यात् तत् सामायिकमागतं तत एव भवति, अत इह सामायिकनिर्युक्तेस्तस्मादाचार्यपारम्पर्यात् तदुपचार आगतत्वोपचारो विधीयते॥ इति गाथाचतुष्टयार्थः॥ १०८४॥

अथ निर्युक्तिशब्दार्थमाह—

[1]निज्जुत्ता ते अत्था जं बद्धा तेण होइ निज्जुत्ती। तहवि य इच्छावेइ विभासिउं सुत्तपरिवाडी॥१०८५॥

निश्चयेन, आधिक्येन, आदौ वा, साधु वा यथा भवत्येवं युक्ताः संबद्धाः सूत्रे निर्युक्ता एव 'जं ति' यद् यस्मात् कारणात् ते प्रसिद्धाः श्रुताभिधेया जीवादयोऽर्था अनया प्रस्तुतानिर्युक्त्या बद्धा निबद्धा व्यवस्थापिता व्याख्याता इति यावत्, तेनेयं निर्युक्तिर्भवति, निर्युक्तानां सूत्रे प्रथममेव संबद्धानां सतामर्थानां व्याख्यारूपा योजनं युक्तिः, निर्युक्तयुक्तिरिति प्राप्ते युक्तलक्षणस्य मध्यपदस्य लोपाद् निर्युक्तिः, यथा पद्ममुखी कन्या, इति सूत्रे निर्युक्तानामेवार्थानां व्याख्या निर्युक्तिर्भण्यत इत्यर्थः।

ननु यदि प्रथममेव सूत्रेऽर्थाः संबद्धा एव सन्ति, तर्हि किमिति ते निर्युक्त्या व्याख्यायन्ते?, इत्याह- 'तहवि येत्यादि' यद्यपि सूत्र एवाऽर्थाः संबद्धाः सन्ति तथापि सूत्रे निर्युक्तानप्यर्थान् विभाषितुं व्याख्यातुं सूत्रपरिपाटी सूत्रपद्धतिरेवैषयति प्रेरयति प्रयोजयति। इदमुक्तं भवति- सतोऽप्यर्थानमतिबुध्यमाने श्रोतरि तदनुग्रहार्थं गुरुं सूत्रपरिपाट्येव विभाषितुमेषयतीव 'इच्छत इच्छत मां व्याख्यातुम्' इत्येवं प्रयोजयतीत्यर्थः॥ इति निर्युक्तिगाथासंक्षेपार्थः॥ १०८५॥

विस्तरतो व्याख्यातुं भाष्यकारः प्राह—

---

१ निर्युक्तास्तेऽर्था यद् बद्धास्तेन भवति निर्युक्तिः। तथापि चेषयति विभाषितुं सूत्रपरिपाटी॥ १०८५॥

[2]जं निच्छयाइजुत्ता सुत्ते अत्था इमीए वक्खाया। तेणेयं निज्जुत्ती निज्जुत्तत्थाभिहाणाओ॥ १०८६॥

यद् यस्मात् सूत्रे निश्चयेन, आदिशब्दादाधिक्येन, आदौ, साधु वा युक्ताः संबद्धा निर्युक्ता एव सन्तोऽर्था अनया निर्युक्त्या व्याख्याताः, तेन तस्मात्कारणादियं निर्युक्तार्थाभिधानाद् निर्युक्तानां युक्तिर्युक्तशब्दलोपाद् निर्युक्तिर्भवति॥ १०८६॥

अथ प्रेर्यमाशङ्क्य परिहरन्नाह—

[3]सुत्ते निज्जुत्ताणं निज्जुत्तीए पुणो किमत्थाणं?। निज्जुत्ते वि न सव्वे कोइ अवक्खाणिए मुणइ॥१०८७॥

ननु सूत्र एव निर्युक्तानां निबद्धानां सतामर्थानां तद्व्याख्यानार्थं क्रियमाणया निर्युक्त्या किं पुनः कार्यम्?- न किञ्चिदित्यर्थः। ये हि सूत्र एव विद्यमानार्थाः सन्ति, तान् स्वत एव विनेयवर्गो ज्ञास्यति, अतस्तद्विभाषणप्रवृत्ता वृथैव निर्युक्तिरिति भावः। अत्रोत्तरम्- 'निज्जुत्ते वीत्यादि' सूत्रे निर्युक्तानपि सतः सर्वानप्यर्थान् कोऽपि तथाविधप्रज्ञापाटवरहितः शिष्यो निर्युक्त्याऽव्याख्यातान् न मुणति नावबुध्यत इति॥ १०८७॥

ततः किम्?, इत्याह—

[4]तो सुयपरिवाडि च्चिय इच्छावेइ तमणिच्छमाणं पि। निज्जुत्ते वि तदत्थे वोत्तुं तदणुग्गहट्ठाए॥१०८८॥

ततः श्रुतपरिपाट्येव सूत्रपद्धतिरेव विभाषितुमनिच्छन्तमपि तन्निर्युक्तिकर्तारमाचार्यं तस्य सूत्रस्यार्थास्तदर्थान् सूत्रे निर्युक्तानप्यनवबुध्यमाने श्रोतरि तदनुग्रहार्थं तान् वक्तुमेषयतीव एषयति प्रयोजयति, अतस्तानाचार्यो निर्युक्त्या विभाषते, इति तस्याः साफल्यमिति॥ १०८८॥

अत्र दृष्टान्तमाह—

[5]फलयलिहियं पि मंखो पढइ पभासइ तहा कराईहिं। दाएइ य पइवत्थुं सुहबोहत्थं तह इहं पि॥१०८९॥

---

१ यद् निश्चयादियुक्ताः सूत्रेऽर्था अनया व्याख्याताः। तेनेयं निर्युक्तिर्निर्युक्तार्थाभिधानात्॥ १०८६॥

२ सूत्रे निर्युक्तानां निर्युक्त्या पुनः किमर्थानाम्?। निर्युक्तानपि न सर्वान् कश्चिदव्याख्यातान् जानाति॥ १०८७॥

३ ततः सूत्रपरिपाट्येवैषयति तमनिच्छन्तमपि। निर्युक्तानपि तदर्थान् वक्तुं तदनुग्रहार्थम्॥ १०८८॥

४ फलकलिखितमपि मङ्खः पठति प्रभाषते तथा करादिभिः। दर्शयति च प्रतिवस्तु सुखबोधार्थं तथेहाऽपि॥ १०८९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथा मङ्खः फलके नानाप्रकारं लिखितमपि वस्तु ग्रन्थतः पठति, अर्थतश्च प्रभाषते– व्याचष्टे, शलाकाकुल्यादिना च बालगोपालाङ्गनादिमुग्धप्रबोधनार्थं प्रतिवस्त्वपरजन्माचीर्णं कर्मविपाकादिकं दर्शयति, यथा– अन्यजन्मन्यनया भर्ता साटिकया वञ्चितः, तेनाऽस्या ईदृशो मातङ्गकुलजन्मादिको विपाकः; अनया च भर्तृमित्रे प्राघूर्णके समायाते मुखमोटको दत्त आसीत्; अनया तु सत्यपि विभवे भिक्षाचरेष्वागच्छत्सु सदैव 'नास्ति नास्ति' इत्याद्येवोद्घुष्टम्, तेनेदृश ईदृशश्च दुःखविपाको जात इत्यादि, तथाऽत्रापि श्रोतुर्वैचित्र्यं पश्यन् सर्वानुग्रहप्रवणबुद्धिराचार्यः सूत्रे निर्युक्तानप्यर्थान् निर्युक्त्या विभाषत इति ॥ १०८९ ॥

अथवा, निर्युक्तिगाथोत्तरार्धमन्यथा व्याख्यायते । कथम् ?, इत्याह—

[1]अहवा सुयपरिवाडी सुयोवएसोऽयमेव जदवस्सं । सोयव्वं निस्संकियसुयविणयत्थं सुबोहं पि ॥१०९०॥

अथवा, श्रुतपरिपाटी श्रुतस्य विधिः श्रुतस्योपदेशोऽयमेव यदवश्यं सुबोधमपि श्रुतं निःशङ्कितत्वहेतोर्विनयोपचारार्थं च मुमुक्षुभिः श्रोतव्यम् । अत एवंभूता सूत्रपरिपाटी यद्यपि सूत्रे निर्युक्ता एवाऽर्थाः सन्ति, तथापि विभाषितुं व्याख्यानयितुमेषयति प्रयोजयति, इत्येषोऽत्र भावार्थः स्वयमेवाऽवगन्तव्य इति ॥ १०९० ॥

'सूत्रपरिपाटीं' इति पाठान्तरं क्वचित्, तत्राह—

[2]इच्छह विभासिउं मे सुयपरिवाडिं न सुट्ठु बुज्झामि । नातिमई वा सीसो गुरुमिच्छावेइ वोत्तुं जे॥१०९१॥

'वा' इत्यथवा, नातिशयेन मतिर्यस्याऽसौ नातिमतिर्मन्दमतिः शिष्यो गुरुमाचार्यं 'इच्छावेइ त्ति' एषयति प्रयोजयति वक्तुम् । 'जे' इत्यलङ्कारार्थः । कथं वक्तुमेषयति ?, इत्याह– 'इच्छह विभासिउं मे त्ति' इच्छत इच्छत विभाषितुं मम श्रुतपरिपाटीं सूत्रपद्धतिम्, नाहमेतां सुष्ठु बुध्ये– प्रथममेव निर्युक्तत्वेन सतोऽप्येतदभिधेयानर्थान् मन्दमतित्वाद् भवद्भिरव्याख्यातान् नाहं सम्यगवच्छामीत्यर्थः ।

अथवा, प्रक्रमादेवेह निर्युक्तिः प्रयोक्त्री विवक्ष्यते । ततश्चेत्थमक्षरयोजना– यद्यपि सूत्रे निर्युक्तत्वेन सन्त एवाऽर्थाः, तथापि तानप्रतिबुध्यमानः श्रोता यदैवं वक्ति– नातिमतिर्मन्दमतिरहं सदर्थामपि सूत्रपरिपाटीं सुष्ठु न बुध्ये सम्यग् नावगच्छामि, अत इच्छत इच्छत प्रभो ! एतां मम विभाषितुमिति । तदित्थं वदति तस्मिन् श्रोतरि निर्युक्तिरेव गुरुं सूत्रपरिपाटीं वक्तुमेषयति प्रयोजयति–

१ अथवा श्रुतपरिपाटी श्रुतोपदेशोऽयमेव यदवश्यम् । श्रोतव्यं निःशङ्कितश्रुतविनयार्थं सुबोधमपि ॥ १०९०॥ २ क. ग. 'थं मु' ।

३ इच्छत विभाषितुं मम श्रुतपरिपाटीं न सुष्ठु बुध्ये । नातिमतिर्वा शिष्यो गुरुमेषयति वक्तुम् ॥१०९१॥

इच्छत इच्छतामै महानुभावायैतां विभाषितुम् । ततो निर्युक्तिद्वारेणैव तस्य शिष्यस्य गुरुस्तां विभाषत इति । तदेवं 'निज्जुत्ता ते अत्था' इत्यादिप्राक्तननिर्युक्तिगाथा व्याख्याता ॥१०९१॥

अथोत्तरगाथासंबन्धनार्थमाह—

[3]कत्तो पसूयमागयमायरियपरंपराइ सुयनाणं । सामाइयाइयमिदं सव्वं चिय सुत्तमत्थो वा ? ॥ १०९२ ॥

ननु पूर्वं भवतेदमुक्तम्– 'आचार्यपरम्परया समागतां सामायिकनिर्युक्तिमहं वक्ष्ये' । तत्रेदं पृच्छ्यते– 'कत्तो पसूयमित्यादि' आदौ कुतः पुरुषविशेषात् प्रसूतामुत्पन्नां सतीं तत आचार्यपरम्परयाऽऽगतामायातां तां सामायिकनिर्युक्तिं त्वं वक्ष्यसि ? इत्युपस्कारः । तथा, इदमपि पृच्छ्यते । किम् ?, इत्याह– 'सुयनाणमित्यादि' सर्वमपि च सामायिकादिकं बिन्दुसारपर्यन्तं सूत्रार्थरूपं श्रुतज्ञानमिदं प्रथमं कुतः प्रस्तुतं सत् पश्चादाचार्यपरम्परयाऽत्राऽऽगतम् ? इति ॥ १०९२ ॥

एवमुत्तरगाथाप्रस्तावनां कुर्वन्नाचार्य आत्मनः प्रेर्यमाशङ्क्य परिहरन्नाह—

[4]एयं नणु भणियं चिय अत्थपुहत्तस्स तेहिं कहियस्स । इह तेसिं चिय सीलाइकहण-गहणं फलविसेसो ॥१०९३॥

ननु 'सामायिकनिर्युक्तिः श्रुतज्ञानं वा सर्वं कुतः पुरुषात् प्रथमं प्रसूतम् ?, इत्यत्र यदुक्तं नन्वेतद् भणितमेव प्रोक्तमेव निर्णीतार्थमेवेत्यर्थः । क ?, इत्याह– 'अत्थपुहत्तस्सेत्यादि' 'तैस्तीर्थकर-गणधरैः कथितस्याऽर्थपृथक्त्वरूपस्य श्रुतज्ञानस्य भगवतो निर्युक्तिं कीर्तयिष्ये' इत्युक्ते तीर्थकर-गणधरेभ्यः सर्वमपि श्रुतज्ञानमादौ प्रसूतम्, इत्युक्तमेव, तत् किमिति पुनरपि प्रश्नः ? । अत्र प्रतिविधानमाह– 'इहेत्यादि' सत्यम्, ज्ञातमेवेदं यत्– तीर्थकर-गणधरेभ्य एव सर्वमिदमादौ प्रसूतम्, किन्त्विह तेषामेव तीर्थकर-गणधराणां शीलादिस्वरूपकथनम्, ग्रन्थनम्, फलविशेषश्च विशेषतोऽभिधास्यते, इत्ययं पुनरपि प्रश्नोत्तरोपन्यासः । तत्र तीर्थकृतां तपो-नियम-ज्ञानानि शीलमभिधास्यते, आदिशब्दः स्वगतभेदप्रख्यापकः, तान्येव वृक्षः, तदारूढस्य पुष्पप्रक्षेपकल्पा तु देशना कथनम्, तत्फलविशेषस्तु भव्यजनविबोधनार्थतेति । गणधराणां तु बुद्धिमयपटेन तीर्थकरोक्तं गृहीत्वा सूत्रग्रन्थनं प्रतिपादयिष्यते, फलविशेषस्तु प्रवचनार्थता, सुखग्रहणाद्यनुग्रहश्च ॥ इति गाथाष्टकार्थः ॥ १०९३ ॥

× प्रसूतं–।

१ गाथा १०८५ । २ कुतः प्रसूतमागतमाचार्यपरम्परया श्रुतज्ञानम् । सामायिकादिकमिदं सर्वमेव सूत्रमर्थो वा ॥ १०९२ ॥

३ एतद् ननु भणितमेवार्थपृथक्त्वस्य तैः कथितस्य । इह तेषामेव शीलादिकथन-ग्रन्थने फलविशेषः ॥ १०९३ ॥ 卐 प्रस्तुतम्–।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथोक्तप्रश्नस्यैवोत्तरमाह—

[1]तव-नियम-नाणरुक्खं आरूढो केवली अमियनाणी । तो मुयइ नाणवुट्ठिं भवियजणविबोहणट्ठाए ॥१०९४॥
तं बुद्धिमएण पडेण गणहरा गिण्हिउं निरवसेसं । तित्थयरभासियाइं गंथंति तओ पवयणट्ठा ॥ १०९५ ॥

रूपकमिदं द्रष्टव्यम् । तत्र वृक्षो द्विधा– द्रव्यतः, भावतश्च । द्रव्यतः प्रधानः कल्पवृक्षः, यथा च तमाश्रित्य कश्चिद् गन्धादिगुणविशिष्टानां कुसुमानां संचयं कृत्वा तदधोभागवर्तिनां तदारोहणासमर्थानां पुरुषाणामनुकम्पया कुसुमानि विसृजति, तेऽपि भूपात-रजोगुण्ठनभिया विमलविस्तीर्णपटेषु प्रतीच्छन्ति, ततो यथोपयोगमुपभुञ्जानाः, परेभ्यश्चोपकुर्वाणाः सुखमाप्नुवन्ति । एवं भाववृक्षेऽपि सर्वमिदमायोज्यम्; यद्यथा– तपश्च नियमश्च ज्ञानं च तान्येव वृक्षस्तत् । तपो बाह्या-ऽभ्यन्तरभेदतो द्वादशधा प्रतीतमेव । इन्द्रिय-नोइन्द्रियसंयमस्तु नियमः । तत्र श्रोत्रादीन्द्रियाणां निग्रह इन्द्रियसंयमः, कषायादीनां तु निग्रहो नोइन्द्रियसंयमः । ज्ञानमिह केवलं संपूर्णं गृह्यते । एतत्त्रयरूपं वृक्षमारूढः । ज्ञानमकेवलरूपमपि स्यात्, तद्व्यवच्छेदार्थमाह– 'केवली' केवलशब्दस्येह संपूर्णवाचकत्वात् केवलं संपूर्णमस्याऽस्तीति केवली । अयमपि श्रुत-क्षायिकसम्यक्त्व-क्षायिकज्ञानभेदात् त्रिविधः, अथवा, श्रुता-ऽवधि-मनःपर्याय-केवलज्ञानभेदाच्चतुर्विधः, तत्र शेषव्यवच्छेदार्थमाह– 'अमितज्ञानी' क्षायिकज्ञानकेवली सर्वज्ञ इत्यर्थः । स चेह प्रक्रमाद् भगवांश्चतुस्त्रिंशदतिशयसंपन्नस्तीर्थकरः । 'तो त्ति' ततो वृक्षाज्ज्ञानरूपकुसुमवृष्टिकारणे कार्योपचाराज्ज्ञानकारणभूतशब्दकुसुमवृष्टिमित्यर्थः । किमर्थम्?, भव्याश्च ते जनाश्च तेषां विबोधनं तदर्थं तन्निमित्तमिति ।

तां च ज्ञानकुसुमवृष्टिं बुद्ध्या निर्वृत्तो बुद्धिमयस्तेन विमलबुद्धिमयेन पटेन गणधरा गौतमादयो ग्रहीतुं गृहीत्वाऽऽदाय निरवशेषां संपूर्णाम्, ततस्तीर्थकरभाषितानि कुसुमकल्पानि भगवदुक्तानि विचित्रप्रधानकुसुममालावद् ग्रथ्नन्ति । किमर्थम्?, प्रगतं, शस्तम्, आदौ वा वचनं प्रवचनं द्वादशाङ्गम्, प्रवक्तीति वा प्रवचनं संघस्तदर्थं तन्निमित्तम् ॥ इति निर्युक्तिगाथाद्वयार्थः ॥ १०९४ ॥ १०९५ ॥

भाष्यकारः प्राह—

[2]रुक्खाइरूवयनिरूवणत्थमिह दव्वरुक्खदिट्ठंतो । जह कोइ विउलवणसंडमज्झयारट्ठियं रम्मं ॥१०९६॥

---

१ तपो-नियम-ज्ञानवृक्षमारूढः केवली अमितज्ञानः । ततो मुञ्चति ज्ञानवृष्टिं भव्यजनविबोधनार्थम् ॥ १०९४ ॥ × भव्यात्-।
तां बुद्धिमयेन पटेन गणधरा गृहीत्वा निरवशेषाम् । तीर्थकरभाषितानि ग्रथ्नन्ति ततः प्रवचनार्थम् ॥ १०९५ ॥ २ क. ग. 'रतो' ।

३ वृक्षादिरूपकनिरूपणार्थमिह द्रव्यवृक्षदृष्टान्तः । यथा कश्चिद् विपुलवनषण्डमध्यस्थितं रम्यम् ॥ १०९६ ॥

[1]तुंगं विउलक्खंधं साइसओ कप्परुक्खमारूढो । पज्जत्तगहियबहुविहसुरभिकुसुमोऽणुकंपाए ॥१०९७॥
कुसुमत्थिभूमिचिट्ठियपुरिसपसारियपडेसु पक्खिवइ । गंथंति ते वि घेत्तुं सेसजणाणुग्गहट्ठाए ॥१०९८॥
लोगवणसंडमज्झे चोत्तीसाइसयसंपदोवेओ । तव-नियम-नाणमइयं स कप्परुक्खं समारूढो ॥ १०९९ ॥
मा होज्ज नाणगहणम्मि संसओ तेण केवलिग्गहणं । सो वि चउहा ततोऽयं सव्वण्णू अमियनाणि त्ति ॥११००॥
पज्जत्तनाणकुसुमो ताइं छउमत्थभूमिसंथेसु । नाणकुसुमत्थिगणहरसियबुद्धिपडेसु पक्खिवइ ॥११०१॥

षडपि सुगमा एव, नवरमिह वृक्षादिरूपकनिरूपणार्थं द्रव्यवृक्षदृष्टान्तोऽभिधीयते । कः पुनरसौ?, इत्याह– 'जह कोई'त्यादि' । 'साइसउ त्ति' वक्ष्यमाणकेवलिस्थानीयः सातिशयः कोऽपि नरः । उक्तो द्रव्यवृक्षदृष्टान्तः । अथ प्रस्तुते भाववृक्षे सर्वं योजयन्नाह– 'लोगवणसंडे'त्यादि' । छद्मस्थत्वमेव भूमिश्छद्मस्थत्वभूमिरिति भावप्रधानोऽयं निर्देशः, तत्संस्थेषु । ज्ञानकुसुमार्थिनो ये गणधरास्तच्छ्वेतबुद्धिपटेष्विति ॥ १०९६ ॥ १०९७ ॥ १०९८ ॥ १०९९ ॥ ११०० ॥ ११०१ ॥

अथ प्रेरकः—

[2]कीस कहइ कइत्थो किं वा भवियाण चेव बोहत्थं । सव्वोवायविहिण्णू किं वाऽभव्वे न बोहेइ ?॥११०२॥

शब्दवृष्टिमोचनेन तीर्थकृतां धर्मकथनं सूचितम्, तत्र कृतार्थोऽप्यसौ भगवान् किमिति कथयति ? । भव्यजनविबोधनार्थमिति चोक्तम्, तत्र किमसौ भव्यानेव बोधयति ?, यावता सर्वोपायविधिज्ञः सन्नभव्यानपि किमिति न बोधयति ? इति ॥ ११०२ ॥

अत्र प्रतिविधानमाह—

---

१ तुङ्गं विपुलस्कन्धं सातिशयः कल्पवृक्षमारूढः । पर्याप्तगृहीतबहुविधसुरभिकुसुमोऽनुकम्पया ॥ १०९७ ॥
कुसुमार्थिभूमिस्थितपुरुषप्रसारितपटेषु प्रक्षिपति । ग्रथ्नन्ति तेऽपि गृहीत्वा शेषजनानुग्रहार्थम् ॥ १०९८ ॥
लोकवनषण्डमध्ये चतुस्त्रिंशदतिशयसंपदुपेतः । तपो-नियम-ज्ञानमयं स कल्पवृक्षं समारूढः ॥ १०९९ ॥
मा भूज्ज्ञानग्रहणं संशयस्तेन केवलिग्रहणम् । सोऽपि चतुर्धा ततोऽयं सर्वज्ञोऽमितज्ञान इति ॥ ११०० ॥
पर्याप्तज्ञानकुसुमस्तानि छद्मस्थ (स्व) भूमिसंस्थेषु । ज्ञानकुसुमार्थिगणधरसितबुद्धिपटेषु प्रक्षिपति ॥ ११०१ ॥
२ कस्मात् कथयति कृतार्थः किं वा भव्यानामेव बोधार्थम् । सर्वोपायविधिज्ञः किं वाऽभव्यान् न बोधयति ? ॥ ११०२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]नेगंतेण कयत्थो जेणोदिन्नं जिणिन्दनामं से । तदवञ्झफलं तस्स य खवणोवाओऽयमेव जओ ॥११०३॥
जं व कयत्थस्स वि से अणुवकयपरोवगारिसाभव्वं । परमहियदेसयत्तं भासयसाभव्वमिव रविणो ॥११०४॥
किं व कमलेसु राओ रविणो बोहेइ जेण सो ताइं । कुमुएसु व से दोसो जं न विबुज्झंति से ताइं ?॥११०५॥
जं बोह-मउलणाइं सूरकरामरिसओ समाणाओ । कमण-कुमुयाण तो तं साभव्वं तस्स तेसिं च ॥११०६॥
जह वोलूगाईणं पगासधम्मा वि सो सदोसेणं । उइओ वि तमोरूवो एवमभव्वाण जिणसूरो ॥ ११०७ ॥
सज्झं तिगिच्छमाणो रोगं रागी न भण्णए वेज्जो । मुणमाणो य असज्झं निसेहयंतो जह अदोसो ॥११०८॥
तह भव्वकम्मरोगं नासंतो रागवं न जिणवेज्जो । न य दोसी अभव्वासज्झकम्मरोगं निसेहंतो ॥११०९॥
मोत्तुमजोग्गं जोग्गे दलिए रूवं करेइ रूयारो । न य रागदोसिल्लो तहेव जोग्गे विबोहंतो ॥ १११० ॥

सर्वा अपि सुगमाः, नवरं नैकान्तेन तीर्थकरः कृतार्थः, येन तीर्थकरनाम 'से' तस्योदीर्णम्, तच्चाऽवन्ध्यफलम्, इति नाऽवेदितं क्षीयते । तत्क्षपणोपायश्च यस्मादयमेव धर्मकथनादिकः, ततः कथयतीति । किञ्च, कृतार्थत्वे सत्यपि रवेर्भासकस्वाभाव्यमिव यद् यस्मात् 'से' तस्य भगवतस्तीर्थकरस्य कृतार्थस्यापि यदिदं परमाहितदेशकत्वं तदनुपकृतोपकारिणः स्वभावोऽनुपकृतोपकारिस्वभावस्तस्य भावोऽनुपकृतोपकारिस्वाभाव्यं, तस्मात् कथयति । कृतार्थस्याऽप्यनुपकृतोपकारिणो भगवतः परोपदेशदातृत्वं स्वभावत एव, इत्यतस्तत्स्वाभाव्यात् कथयतीति तात्पर्यमिति ।

---

१ नैकान्तेन कृतार्थो येनोदीर्णं जिनेन्द्रनाम तस्य । तदवन्ध्यफलं तस्य च क्षपणोपायोऽयमेव यतः ॥ ११०३ ॥
यद्वा कृतार्थस्यापि तस्यानुपकृतपरोपकारिस्वाभाव्यम् । परमाहितदेशकत्वं भासकस्वाभाव्यमिव रवेः ॥ ११०४ ॥
किं वा कमलेषु रागी रवेर्बोधयति येन स तानि । कुमुदेषु वा तस्य दोषो यद् न विबुध्यन्ते तस्य तानि ? ॥ ११०५ ॥ (द्वे)
न बोध-मुकुलने सूरकरामर्शतः समानात् । कमल-कुमुदानां ततस्तत् स्वाभाव्यं तस्य तेषां च ॥ ११०६ ॥
यथा वोलूकादीनां प्रकाशधर्माऽपि स स्वदोषेण । उदितोऽपि तमोरूप एवमभव्यानां जिनसूरः ॥ ११०७ ॥
साध्यं चिकित्सन् रोगं रागी न भण्यते वैद्यः । जानंश्चासाध्यमनिषेधन् यथाऽदोषः ॥ ११०८ ॥ (द्वे)
तथा भव्यकर्मरोगं नाशयन् रागवान् न जिनवैद्यः । न च दोष्यभव्यासाध्यकर्मरोगमनिषेधन् ॥ ११०९ ॥
मोक्तुमयोग्यं योग्ये दलिके रूपं करोति रूपकारः । न च राग-द्वेषवांस्तथैव योग्यान् विबोधन् ॥ १११० ॥ २ घ. छ. 'दोसेल्लो' । (द्वे)

न च भव्यानेव प्रतिबोधयतस्तस्य राग-द्वेषौ, इति दृष्टान्तेन दर्शयति– 'किं व कमलेसु इत्यादि' । 'से त्ति' । 'से' तस्य रवेः प्रतिबोधयतोऽपि यत् तानि कुमुदानि न विबुध्यन्त इति । तस्मात् कोऽत्राभिप्रायः ?, इत्याह– 'जं बोहेत्यादि' समानादपि सूरकरपरामर्शाद् यतो बोध-मुकुलनानि यथासंख्यमेव कमल-कुमुदानां जायमानानि दृष्टानि, 'तो त्ति' ततो ज्ञायते– तस्य रवेः, तेषां च कमल-कुमुदानां स्वभावोऽयं यद्– रविः कमलान्येव बोधयति न तु कुमुदानि, कमलान्यपि रवेः सकाशाद् बुध्यन्ते न कुमुदानि, न पुनरिह कस्यापि राग-द्वेषौ । एवं भगवतोऽपि भव्या-ऽभव्येषु योज्यमिति । दृष्टान्तान्तरमाह– 'जह वेत्यादि' उलूकादीनां रात्रिञ्चराणां घूकादीनां 'सो त्ति' रविः । अपरमप्यत्र दृष्टान्तमाह– 'सज्झमित्यादि' । अत्रैवोदाहरणान्तरमाह– 'मोत्तुमित्यादि' दलिके काष्ठादौ 'रूयारो' रूपकारः । इति व्याख्याता प्रथमनिर्युक्तिगाथा ॥ ११०३ ॥ ११०४ ॥ ११०५ ॥ ११०६ ॥ ११०७ ॥ ११०८ ॥ ११०९ ॥ १११० ॥

अथ द्वितीयनिर्युक्तिगाथाव्याख्यानमाह—

[2]तं नाणकुसुमवुट्ठिं घेत्तुं बीयाइबुद्धओ सव्वं । गंथंति पवयणट्ठा माला इव चित्तकुसुमाणं ॥ १११ ॥
पगयं वयणं पवयणमिह सुयनाणं कहं तयं होज्जा ?। पवयणमहवा संघो गहंति तयणुग्गहट्ठाए ॥१११२॥

तां तीर्थकरमुक्तां ज्ञानकुसुमवृष्टिं गृहीत्वा बीजादिबुद्धयो गणधराः, यः पदादप्यनेकानि पदशतानि गृह्णाति, असौ बीजबुद्धिः, आदिशब्दात् कोष्ठबुद्ध्यादिपरिग्रहः; कोष्ठकप्रक्षिप्तं धान्यमिव यस्य सूत्रा-ऽर्थौ सुचिरमपि तिष्ठतः स कोष्ठबुद्धिः ; सर्वं तीर्थकरभाषितं विचित्रकुसुममालामिव प्रवचनार्थं ग्रथ्नन्ति । प्रवचनशब्दार्थमेव कथयति– प्रगतं प्रधानं प्रशस्तमादौ वा वचनम्, अत्र श्रुतज्ञानं द्वादशाङ्गम्, 'तत् कथं नु नाम भवेद् निष्पद्यते ?' इत्येवं संप्रधारयन्तस्तदर्थं ग्रथ्नन्ति । अथवा, प्रवक्तीति प्रवचनं संघस्तदर्थं ग्रथ्नन्ति ॥ इत्येकादशगाथार्थः ॥ ११११ ॥ १११२ ॥

'प्रवचनार्थं ग्रथ्नन्ति' इत्युक्तम् । अथवा प्रयोजनान्तरमाह—

[3]घेत्तुं व सुहं सुहगुणण-धारणा दाउं पुच्छिउं चेव । एएहिं कारणेहिं जीयं ति कयं गणहरेहिं ॥ १११३ ॥

---

१ क. ग. 'पत्र' । २ तां ज्ञानकुसुमवृष्टिं गृहीत्वा बीजादिबुद्धयः सर्वम् । ग्रथ्नन्ति प्रवचनार्थं माला इव चित्रकुसुमानाम् ॥ १११ ॥
प्रकृतं वचनं प्रवचनमिह श्रुतज्ञानं कथं तद् भवेत् ? । प्रवचनमथवा संघो ग्रथ्नन्ति तदनुग्रहार्थम् ॥ १११२ ॥
३ ग्रहीतुं वा सुखं सुखगुणन-धारणा दातुं प्रष्टुं चैव । एतैः कारणैर्जीवितमिति कृतं गणधरैः ॥ १११३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

मुत्कलं भगवता तीर्थकरेणोक्तं वचनवृन्दं मुत्कलकुसुमनिकुरम्बमिव ग्रथितं सूत्रीकृतं सद् ग्रहीतुं वाऽऽदातुं सुखं भवति । इदमुक्तं भवति– पद-वाक्य-प्रकरणा-ऽध्याय-प्राभृतादिनियतक्रमस्थापितं जिनवचनमयत्नत एव ग्रहीतुं शक्यम्– 'एतावदस्य गृहीतम्, 'एतावच्चाद्यापि पुरस्ताद् ग्रहीतव्यम्' इत्यादिविवक्षया ग्रथितं सत् सुखेनैव ग्रहीतुं शक्यमित्यर्थः । तथा, गुणनं च धारणा च गुणन-धारणे, ते अपि ग्रथिते सूत्रे सुखं भवतः । तत्र गुणनं परावर्तनमभ्यासः, धारणा त्वविच्युतिरविस्मृतिः । तथा, दातुं प्रष्टुं च सुखमेव भवति । तत्र दानं शिष्येभ्योऽतिसर्जनम्, प्रश्नस्तु संशयापन्नस्य निःसंशयार्थं गुरुप्रच्छनम् । एतैः कारणैः कृतं रचितं गणधरैः । किं तत् ?, इत्याह– 'जीयं ति' जीवितं श्रुतं द्वादशाङ्गम् । अयमत्राभिप्रायः– यथा जीवस्य जीवितमात्रं न कदाचिद् व्यवच्छिद्यते, तथाऽव्यवच्छित्तिनयाभिप्रायतः श्रुतमपि न कदाचिद् व्यवच्छिद्यते । अतो जीवितमिव जीवितं श्रुतमुच्यते, तद्गणधरैः सुखग्रहणादिकारणेभ्यः कृतम् । अथवा, न सुखादिकारणेभ्य एव, किं तर्हि ?, 'जीयं ति' जीवितं मर्यादा, ततश्च गणधराणां जीवितं धर्मो मर्यादैवेयं यदुत– तन्नामकर्मोदयतस्तत्स्वाभाव्यात् कर्तव्यमेव तैः श्रुतविरचनम् । अथवा, 'जीयं ति' जीवितमाचरितम्, कल्प एवाऽयं सर्वगणधराणां यत्– तैः संदर्भणीयमेव श्रुतम् । अतः समस्तगणधरैरेतस्मादपि हेतोः कृतं श्रुतं 'इदम्' इति शेषः ॥ इति निर्युक्तिगाथार्थः ॥१११३॥

अत्र भाष्यम्---

मुक्ककुसुमाणं गहणाइयाइं जह दुक्करं करेउं जे । गुच्छाणं तु सुहयरं तहेव जिणवयणकुसुमाणं ॥१११४॥
पय-वक्क-पगरण-ज्झाय-पाहुडाइनियतक्कमपमाणं । तदणुसरता सुहं चिय घेप्पइ गहियं इदं गेज्झं ॥१११५॥
एवं गुणणं धरणं दाणं पुच्छा य तदणुसारेणं । होइ सुहं जीयं पि य कायव्वमिदं जओऽवस्सं ॥१११६॥
सव्वेहिं गणहरेहिं जीयं ति सुयं जओ न वोच्छिन्नं । गणहरमज्जाया वा जीयं सव्वाणुचिन्नं वा ॥१११७॥

यथा मुत्कानां मुत्कलानां कुसुमानां ग्रहणादीनि कर्तुं दुष्कराणि, ग्रथितानां तु सुकराणि, तथा जिनवचनकुसुमानामपि द्रष्टव्यम् । अतो गणधरास्तानि ग्रथ्नन्ति । 'अज्झाय त्ति' अध्ययनम्, प्राभृतं पूर्वान्तर्गतः श्रुतविशेषः । 'गहियं इदं गेज्झं ति' एतावदस्य

१ मुत्ककुसुमानां ग्रहणादिकानि यथा दुष्कराणि कर्तुम् । गुच्छानां तु सुखकरं तथैव जिनवचनकुसुमानाम् ॥ १११४ ॥
पद-वाक्य-प्रकरणा-ऽध्याय-प्राभृतादिनियतक्रमप्रमाणम् । तदनुसरता सुखमेव गृह्यते गृहीतमिदं ग्राह्यम् ॥ १११५ ॥
एवं गुणनं धरणं दानं पृच्छा च तदनुसारेण । भवति सुखं जीवितमित्यपि च कर्तव्यमिदं यतोऽवश्यम् ॥ १११६ ॥
सर्वैर्गणधरैर्जीवितमिति श्रुतं यतो न व्यवच्छिन्नम् । गणधरमर्यादा वा जीवितं सर्वानुचीर्णं वा ॥ १११७ ॥

गृहीतम्, एतावच्चाद्यापि पुरस्ताद् ग्रहीतव्यम्, इत्यादिविवक्षया पद-वाक्यादिक्रमेण विरचितं सत् तत्पदाद्यनुसरता सुखेनैव श्रुतं गृह्यते, एवं गुणनाद्यपि सुखं भवति, अत एतेभ्यः कारणेभ्यः 'जीयं पि य त्ति' जीवितं श्रुतम् । अथवा, जीवितं मर्यादा । यदिवा जीवितं सर्वानुचीर्णम् । कोऽर्थः ?, इत्याह– 'कायव्वमित्यादि' कर्तव्यमिदं यतोऽवश्यं सर्वैर्गणधरैः, इत्युत्तरगाथायां संबन्धः । ततो जीवितं द्वादशाङ्गश्रुतं, मर्यादा, सर्वगणधराचीर्णं वेदमिति कृत्वा कृतं कथितं गणधरैरिति । तदेवं 'जीयं' इति शब्दस्यार्थत्रयं भवति, इति तांस्त्रीनप्यर्थांस्तस्य दर्शयति– 'जीयं ति सुयं' इत्यादि । शेषं सुगमम् ॥ इति गाथाचतुष्टयार्थः ॥ १११४ ॥ १११५ ॥ १११६ ॥ १११७ ॥

उत्तरनिर्युक्तिगाथासंबन्धनार्थमाह—

जिणभणिइ च्चिय सुत्तं गणहरकरणम्मि को विसेसो त्थ ?। सो तदविक्खं भासइ न उ वित्थरओ सुयं किंतु॥१११८॥

ननु 'तित्थयरभासियाइं गंथंति' इत्यादिवचनाज्जिनभणितिरेव तीर्थकरोक्तिरेव तर्हि श्रुतम्, गणधरसूत्रीकरणे तु तत्र को विशेषः ? । अत्रोच्यते– स तीर्थकरस्तदपेक्षं गणधरप्रज्ञापेक्षमेव किञ्चिदल्पं भाषते, न तु सर्वजनसाधारणं विस्तरतः समस्तमपि द्वादशाङ्गश्रुतम्, किन्तु यद् भाषते तद् दर्श्यते– ॥ इति गाथार्थः ॥ १११८ ॥

किं पुनस्तत् ?, इत्याह—

अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणं । सासणस्स हियट्ठाए तओ सुत्तं पवत्तेइ ॥ १११९ ॥

अर्थमेवाऽर्हन् भाषते, न सूत्रं द्वादशाङ्गरूपम् । गणधरास्तु तत् सूत्रं सर्वमपि निपुणं सूक्ष्मार्थप्ररूपकं बह्वर्थं चेत्यर्थः; अथवा, नियताः प्रमाणनिश्चिता गुणा यत्र तद् नियतगुणं निगुणं ग्रथ्नन्ति । ततः शासनस्य हितार्थं सूत्रं प्रवर्तते ॥ इति निर्युक्तिगाथाक्षरार्थः ॥ १११९ ॥

भावार्थं त्वभिधित्सुर्भाष्यकारः प्रेर्यं परिहारं च प्राह—

नणु अत्थोऽणभिलप्पो स कहं भासइ न सद्दरूवो सो ?। सद्दम्मि तदुच्चारो अत्थप्पच्चायणफलम्मि ॥११२०॥

१ जिनभणितिरेव सूत्रं गणधरकरणे को विशेषोऽत्र ?। स तदपेक्षं भाषते न तु विस्तरतः श्रुतं किन्तु ॥ १११८ ॥ २ गाथा १०९५ ।
३ अर्थं भाषतेऽर्हन् सूत्रं ग्रथ्नन्ति गणधरा निपुणम् । शासनस्य हितार्थं ततः सूत्रं प्रवर्तते ॥ १११९ ॥
४ नन्वर्थोऽनभिलाप्यः स कथं भाषते न शब्दरूपः सः ?। शब्दे तदुच्चारोऽर्थप्रत्यायनफले ॥ ११२० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

आह- ननु भाष्यमाणः सर्वत्र शब्द एव दृश्यते, यस्त्वर्थः सोऽनभिलाप्यः- अशब्दात्मकत्वाद् वक्तुमशक्य एव, इति कथं स तीर्थकरस्तमशब्दरूपमर्थं भाषते ? । उच्यते- अर्थप्रत्यायनफले शब्द एव तदुपचारोऽर्थोपचारः क्रियते । एतदुक्तं भवति- अर्थप्रतिपादनस्य कारणभूते शब्देऽर्थोपचारं कृत्वाऽर्थं भाषत इत्युच्यत इत्यदोष इति ॥ ११२० ॥

प्रेरकः प्राह—

तो[1] सुत्तमेव भासइ अत्थप्पच्चायगं, न नामत्थं । गणहारिणो वि तं चिय करेंति को पडिविसेसो त्थ ? ॥११२१॥

ततस्तर्हि त्वदुक्तयुक्त्या शब्दभाषकस्तीर्थकरः सूत्रमेवाऽर्थप्रत्यायकं भाषते, न त्वर्थम् । गणधारिणोऽपि तदेव कुर्वन्ति, तत् को नामोभयत्र विशेषः ?- न कश्चिदिति ॥ ११२१ ॥

आचार्यः प्राह—

सो[2] पुरिसो[3]विक्खाए थोवं भणइ न उ बारसंगाइं । अत्थो तदेंविक्खाए सुत्तं चिय गणहराणं तं ॥११२२॥

ननु प्रागेवोक्तं यत्- गणधरलक्षणपुरुषापेक्षया स तीर्थकरः "उप्पज्जेइ वा, विगमेइ वा, धुवेइ वा" इति मातृकापदत्रयमात्ररूपं स्तोकमेव भाषते, न तु द्वादशाऽङ्गानि । ततश्च तद् मातृकापदत्रयमात्रं शब्दरूपमपि सत् तदपेक्षया द्वादशाङ्गापेक्षया तदर्थसंक्षेपरूपत्वादर्थो भण्यते । गणधराणां तु गणधरापेक्षया त्वित्यर्थः, तदेव मातृकापदत्रयं शब्दरूपत्वात् सूत्रम् , इति नोभयत्र समानतादोष इति ॥११२२॥

आह- ननु मातृकापदत्रयस्य शब्दरूपत्वात् सूत्ररूपता बुध्यते, अर्थरूपतां तु तस्य नावगच्छाम इत्याशङ्क्य पुनरपि तस्य तां समर्थयन्नाह—

अंगाइसुत्तरयणानिरवेक्खो[4] जेण तेण सो अत्थो । अहवा न सेसपवयणहियउ त्ति जह बारसंगमिणं॥११२३॥

पवयणहियं पुण तयं जं सुहगहणाइ गणहरेहिंतो । बारसविहं पवत्तइ निउणं सुहुमं महत्थं च ॥ ११२४ ॥

---

१ ततः सूत्रमेव भाषतेऽर्थप्रत्यायकं, न नामार्थम् । गणधारिणोऽपि तदेव कुर्वन्ति किं प्रतिविशेषोऽत्र ? ॥ ११२१ ॥

२ स पुरुषापेक्षया स्तोकं भणति न तु द्वादशाङ्गानि । अर्थस्तदपेक्षया सूत्रमेव गणधराणां तत् ॥ ११२२ ॥

३ क. ग.'सावेक्खा' । ४ क.ग.'दवेक्खा'। ५ उत्पद्यते वा, विगच्छति वा, ध्रुवं वा । ६ 'क. घ. छ. 'प्पण्णेइ' ।

७ अङ्गादिसूत्ररचनानिरपेक्षो येन तेन सोऽर्थः । अथवा न शेषप्रवचनहितक इति यथा द्वादशाङ्गमिदम् ॥ ११२३ ॥
प्रवचनहितं पुनस्तद् यत् सुखग्रहणादि गणधरेभ्यः । द्वादशविधं प्रवर्तते निपुणं सूक्ष्मं महार्थं च ॥ ११२४ ॥ ८ 'णहेउ' ।

अङ्ग-ऽनङ्गादिविभागेन विरचितमेव सूत्रं प्रसिद्धम् , अयं तु मातृकापदत्रयरूपः शब्दो येन कारणेनाऽङ्गादिविभागेन या सूत्ररचना तन्निरपेक्षस्तत्समुदायार्थरूपत्वेन तद्बहिर्भूत इत्यतः सोऽर्थ इति व्यपदिश्यते । अथवा, शेषस्य गणधरापेक्षयाऽन्यस्य संघरूपस्य प्रवचनस्य यः सुखग्रहण-धारणादिभ्यो हितः शब्दराशिः स एव सूत्रतया प्रोक्तः । अयं तु मातृकापदत्रयरूपः शब्दो न शेषप्रवचनस्येत्थं हितः, यथेदं द्वादशाङ्गम्, अतो नासौ सूत्रम्, किन्त्वर्थ इति । तत्पुनः शब्दजालं शेषप्रवचनस्य हितमेव । यत् किम् ?, इत्याह- यत् सुखग्रहणादिकारणेभ्यो द्वादशधा- आचारादिद्वादशभेदं गणधरेभ्यः प्रवर्तते । अतस्तदेव सूत्रम्, मातृकापदत्रयं त्वर्थ इति स्थितम् । अथ "निउणं" इति निर्युक्तिगाथावयवस्यार्थमाह- तदाचारादिकं द्वादशविधं सूत्रं कथम्भूतम् ?, निपुणं सूक्ष्मम्, सूक्ष्मार्थप्रतिपादकत्वात्; महानपरिमितोऽर्थो यस्मिंस्तद् महार्थं च निपुणमिति ॥ ११२३ ॥ ११२४ ॥

अथान्तरमाह—

[2]नियय[1]गुणं वा निउणं निद्दोसं गणहराऽहवा निउणा । तं पुण किमाइ-पज्जंतमाणमह को न से सारो ?॥११२५॥

अथवा, नियतगुणं निश्चितगुणं निगुणं संनिहितसमस्तसूत्रगुणत्वाद् निर्दोषमित्यर्थः । 'निउणा' इति पाठान्तरे गणधरा विशेष्यन्ते- निपुणाः, सूक्ष्मार्थदर्शित्वात्, निगुणा वा गणधराः, संनिहितसमस्तगुणत्वादित्यर्थः । वक्ष्यमाणानिर्युक्तिगाथायाः प्रस्तावनामाह- तत् पुनः श्रुतं किमादि ?, किंपर्यन्तमानं- कियत्परिमाणम् ?, को वाऽस्य सारः ? ॥ इति गाथाषट्कार्थः ॥ ११२५ ॥

अनन्तरपृष्टस्यैवोत्तरमाह—

[3]सामाइयमाईयं सुयनाणं जाव बिंदुसाराओ । तस्स वि सारो चरणं सारो चरणस्स निव्वाणं ॥ ११२६ ॥

तच्च श्रुतज्ञानं सामायिकादि वर्तते, चरणप्रतिपत्तिकाले सामायिकस्यैवादौ प्रदानात् । यावद् बिन्दुसारादिति बिन्दुसाराभिधानचतुर्दशपूर्वपर्यन्तमित्यर्थः, यावच्छब्दादेव च द्वय-ऽनेक-द्वादशपरिमाणं तद् वेदितव्यम् । तस्यापि श्रुतज्ञानस्य सारश्चरणम् । सारशब्दोऽत्र प्रधानवचनः, फलवचनश्च मन्तव्यः; तस्मादपि श्रुतज्ञानाच्चारित्रं प्रधानम्, तस्य फलं च तदित्यर्थः । अपिशब्दात् सम्यक्त्वस्यापि सारश्चरणमेव । अथवा, अपिशब्दस्य व्यवहितः संबन्धः, तस्य श्रुतज्ञानस्य सारश्चरणमपि, अपिशब्दाद् निर्वाणमपीत्यर्थः, अन्यथा

---

१ गाथा १११९ । २ नियतगुणं वा निपुणं निर्दोषं गणधरा अथवा निपुणाः । तत्पुनः किमादि-पर्यन्तमानमथ को वा तस्य सारः ? ॥ ११२५ ॥

३ क. ग. 'श्रुतज्ञानं कि' । ४ सामायिकादिकं श्रुतज्ञानं यावद् बिन्दुसारात् । तस्यापि सारश्चरणं सारश्चरणस्य निर्वाणम् ॥ ११२६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

ज्ञानस्य निर्वाणहेतुत्वं न स्यात्, किन्तु चरणस्यैव ज्ञानरहितस्यापि तत् स्यात्, अनिष्टं चैतत्, "[1]सम्यग्दर्शन-ज्ञान-चारित्राणि मोक्ष-मार्गः" तथा, "[2]नाण-किरियाहिं मोक्खो" इत्यादिवचनादिति । इह तु ज्ञान-चरणयोः समानेऽपि निर्वाणहेतुत्वे गुण-प्रधानभावख्यापनार्थमित्थमुपन्यासः 'तस्स वि सारो चरणं' इति । 'सारो चरणस्स निव्वाणं ति' अत्र सारशब्दः फलवचनः, चरणस्य संयम-तपोरूपस्य सारः फलं निर्वाणमित्यर्थः । इहापि शैलेश्यवस्थाभाविसर्वसंवररूपचारित्रमन्तरेण निर्वाणस्याऽभावात्, तद्भावे चावश्यंभावादित्थमुक्तम्, अन्यथा सम्यग्दर्शनादित्रयस्य समुदितस्यैव निर्वाणहेतुत्वमवगन्तव्यम्, शैलेश्यवस्थायामपि क्षायिकदर्शन-ज्ञानयोरवश्यं सद्भावात् ॥ इति निर्युक्तिगाथार्थः ॥११२६ ॥

तदेवं '[3]तं पुण किमाइ-पज्जन्तमाणमह को व से सारो' इत्यनया प्रागुक्तसामान्यतया समायातं व्याख्यातं 'तस्स वि सारो चरणं' इति गाथादलम् । साम्प्रतं त्वस्य पातनान्तरमाह—

सोउं सुयण्णवं वा दुग्गेज्झं सारमेत्तमेयस्स । घेच्छं तयं ति पुच्छइ सीसो चरणं गुरू भणइ ॥११२७॥

'वा'[4] इत्यथवा पातनान्तरसूचकः । 'सोउं ति' सामायिकादि बिन्दुसारपर्यन्तं श्रुतार्णवं दुर्ग्राह्यमतिदुस्तरं श्रुत्वा 'यदि समस्तमपि तं ग्रहीतुं न शक्ष्यामि, तर्हि सारमात्रमस्य श्रुतार्णवस्य ग्रहीष्यामि' इति सञ्चिन्त्य शिष्यस्तत्सारमात्रं पृच्छति—'कोऽस्य द्वादशाङ्गस्य सारः ?' इति सोपस्कारमिह व्याख्येयम् । तत्र गुरुर्भणति— तस्यापि श्रुतज्ञानस्य सारश्चरणमिति । एतत्पुनरपृष्टेनापि गुरुणा निर्युक्तिगाथान्ते प्रोक्तम्— सारश्चरणस्य निर्वाणमिति ॥ ११२७ ॥

अथ प्रेरकः प्राह—

[5]अन्नाणओ हय त्ति य किरिया नाण-किरियाहिं निव्वाणं । भणियं तो किह चरणं सारो नाणस्स तमसारो ? ॥११२८॥

ननु 'हयं नाणं कियाहीणं हया अन्नाणओ किया' इत्यादिवचनादज्ञानतो हतैव क्रिया, इति ज्ञान-क्रियाभ्यां समुदिताभ्यामेव निर्वाणमागमे भणितम्— अनेकस्थानेषु प्रतिपादितम् । ततः कथं ज्ञानस्य सारश्चरणम्, तनु ज्ञानमसारः ? इति ॥ ११२८ ॥

---

१ तत्त्वार्थाधिगमसूत्रे १,१ । २ ज्ञान-क्रियाभ्यां मोक्षः । ३ गाथा ११२५ ।

४ श्रुत्वा श्रुतार्णवं वा दुर्ग्रहं सारमात्रमेतस्य । ग्रहीष्यामि तदिति पृच्छति शिष्यश्चरणं गुरुर्भणति ॥ ११२७ ॥

५ अज्ञानतो हतेति च क्रिया ज्ञान-क्रियाभ्यां निर्वाणम् । भणितं ततः कथं चरणं सारो ज्ञानस्य तदसारः ? ॥ ११२८ ॥ ६ गाथा ११५९ ।

अत्रोत्तरमाह—

[1]चरणोवलद्धिहेऊ जं नाणं चरणओ य निव्वाणं । सारो त्ति तेण चरणं पहाण-गुणभावओ भणियं ॥११२९॥

नाणं पयासयं वि गुत्ति-विसुद्धिफलं च जं चरणं । मोक्खो य दुगाहीणो चरणं नाणस्स तो सारो ॥११३०॥

यद् यस्माद् मति-श्रुतादिकं ज्ञानं चरणोपलब्धेश्चारित्रप्राप्तेरेव मुख्यं कारणम्, ज्ञानं विना चरणविषयस्य जीवा-ऽजीवादेर्हेयोपादेयादेश्च वस्तुनोऽपरिज्ञानात्, अपरिज्ञातस्य च यथावत् कर्तुमशक्यत्वात् । चरणाच्च तपःसंयमरूपाद् निर्वाणमुपजायते । अतो निर्वाणस्य सर्वसंवररूपं चरणमेव मुख्यं प्रधानं कारणम्, ज्ञानं तु कारणकारणत्वाद् गौणं तस्य कारणम् । अतस्तेन कारणेन प्रधान-गुणभावाज्ज्ञानस्य सारश्चरणं भणितम् ।

प्रधान-गुणभावमेव भावयति— 'नाणमित्यादि' ज्ञानं यस्मात् कृत्या-ऽकृत्यादिवस्तुनः प्रकाशकमेव वस्तुपरिज्ञानमात्रे व्याप्रियत इत्यर्थः । चरणं पुनर्गुप्ति-विशुद्धिफलम्— गुप्तिः संवरः, विशुद्धिस्तु कर्मनिर्जरा, गुप्ति-विशुद्धी फलं यस्य तत् तथा । एवं च सति ज्ञान-चरणलक्षणद्वयाधीनो मोक्षः, केवलं प्रधानतया चरणस्याऽधीनोऽसौ, गौणतयैव च ज्ञानस्य । ततः प्रधान-गुणभावाच्चरणं ज्ञानस्य सार इति ॥११२९ ॥ ११३० ॥

प्रकारान्तरेणापि ज्ञानाच्चारित्रस्य प्रधानत्वं भावयन्नाह—

[2]जं सव्वनाणलाभाणंतरमहवा न मुच्चए सव्वो । मुच्चइ य सव्वसंवरलाभे तो सो पहाणयरो ॥११३१॥

अथवा, यद् यस्मात् सर्वं जानातीति सर्वज्ञानं केवलज्ञानं तल्लाभानन्तरमेव सर्वोऽपि प्राणी न मुच्यते— न मुक्तिं प्राप्नोति, मुच्यते च यस्माच्छैलेश्यवस्थायां सर्वसंवरलाभेऽवश्यमेव सर्वः । ततो ज्ञायते केवलज्ञानादप्यन्वय-व्यतिरेकाभ्यां मुख्यो मोक्षकर्ता सर्वसंवर एव प्रधानतरः, स च क्रियारूपत्वाच्चारित्रमिति ॥ ११३१ ॥

अमुमेवार्थं समर्थयन्नाह—

---

१ चरणोपलब्धिहेतुर्यज्ज्ञानं चरणतश्च निर्वाणम् । सार इति तेन चरणं प्रधान-गुणभावतो भणितम् ॥ ११२९ ॥
ज्ञानं प्रकाशकमपि गुप्ति-विशुद्धिफलं च यच्चरणम् । मोक्षश्च द्विकाधीनश्चरणं ज्ञानस्य ततः सारः ॥११३०॥

२ यत् सर्वज्ञानलाभानन्तरमथवा न मुच्यते सर्वः । मुच्यते च सर्वसंवरलाभे ततः स प्रधानतरः ११३१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]लाभे वि जस्स मोक्खो न होइ जस्स य स होइ स पहाणो। एवं चिय सुद्धनया निव्वाणं संजमं बेंति ॥११३२॥

यस्य मत्यादिज्ञानपञ्चकस्य लाभेऽप्यनन्तरमेव मोक्षो न भवति, तज्ज्ञानं मोक्षस्यानन्तर्येण कारणत्वाभावात् 'अप्रधानम्' इति शेषः। यल्लाभानन्तरमेव च स मोक्षोऽवश्यं भवति स संवरो ज्ञानात्प्रधानः। एवमेव च संयमस्य प्रधानकारणतां मन्यमानाः शुद्धनया ऋजुसूत्र-शब्दादयः संयममेव निर्वाणमाहुः, अत्यन्तमत्यासन्नकारणे सर्वसंवरसंयमे कार्यस्य निर्वाणस्योपचारात्; न तु ज्ञानं निर्वाणं ते ब्रुवते, तस्य व्यवहितकारणत्वादिति भावः। तथा चोक्तम्—

'[2]तेवसंजमो अणुमओ निग्गंथं पवयणं च ववहारो। सद्द-ज्जुसुयाणं पुण निव्वाणं संजमो चेव ॥ १ ॥'

इति ॥११३२॥

प्रेरकः प्राह—

[3]आह पहाणं नाणं न चरित्तं, नाणमेव वा सुद्धं। कारणमिह न उ किरिया सा वि हु नाणप्फलं जम्हा॥११३३॥

ज्ञानवादी प्राह– ज्ञानमेव प्रधानं मोक्षकारणम्, न चारित्रम्। यदिवा, शुद्धं ज्ञानमेवैकं मोक्षस्य कारणं, न तु क्रिया, यस्मादसावपि ज्ञानफलमेव ज्ञानकार्यमेव। ततश्च यथा मृत्तिका घटस्य कारणं भवन्त्यपि तदपान्तरालवर्तिनां पिण्ड-शिवक-कुशूलादीनामपि कारणं भवति, एवं ज्ञानमपि मोक्षस्य कारणं तदपान्तरालभाविनां सर्वसंयमक्रियादीनामपीति। यथा च क्रिया ज्ञानस्य कार्यम्, तथा शेषमपि यत्क्रियानन्तरभावि मोक्षादिकम्, यच्च क्रियाया अर्वाग्भावि बोधिलाभकाले तत्त्वपरिज्ञानादिकं राग-द्वेषनिग्रहादिकं च तत् सर्वं ज्ञानस्यैव कार्यम्। यच्चेह सकलजनप्रत्यक्षं मनश्चिन्तितमहामन्त्रपूतविषभक्षण-भूत-शाकिनीनिग्रहादिकं तत् सर्वं क्रियारहितस्य ज्ञानस्यैव कार्यम्। अतो दृष्टेनाऽदृष्टमपि निर्वाणं ज्ञानस्यैव कार्यमित्यनुमीयत इति ॥ ११३३॥

एतद् दर्शयन्नाह—

[4]जह सा नाणस्स फलं तह सेसं पि तह बोहकाले वि। नेयपरिच्छेयमयं रागादिविणिग्गहो जो य ॥११३४॥

---

१ लाभेऽपि यस्य मोक्षो न भवति, यस्य च स भवति स प्रधानम्। एवमेव शुद्धनया निर्वाणं संयमं ब्रुवते ॥ ११३२ ॥

२ तपःसंयमोऽनुमतो नैर्ग्रन्थं प्रवचनं च व्यवहारः। शब्द-ऋजुश्रुतयोः पुनर्निर्वाणं संयम एव ॥ १ ॥ × संवर-।

३ आह प्रधानं ज्ञानं न चारित्रं, ज्ञानमेव वा शुद्धम्। कारणमिह न तु क्रिया सापि खलु ज्ञानफलं यस्मात् ॥ ११३३ ॥

४ यथा सा ज्ञानस्य फलं तथा शेषमपि तथा बोधकालेऽपि। ज्ञेयपरिच्छेदमयं रागादिविनिग्रहो यश्च ॥ ११३४ ॥

[1]जं च मणोचिंतियमंतपूतविसभक्खणाइबहुभेयं। फलमिह तं पच्चक्खं किरियारहियस्स नाणस्स ॥११३५॥

द्वे अप्युक्ताऽर्थे एव ॥११३४॥ ११३५॥

एवं ज्ञानवादिना परेणोक्ते सत्याचार्यः प्राह—

[2]जेणं चिय नाणाओ किरिया तत्तो फलं च तो दो वि। कारणमिहरा किरियारहियं चिय तं पसाहेज्जा ॥११३६॥

येनैव च यस्मादेव कारणात् ज्ञानात् क्रिया भवति, ततस्तस्याश्च क्रियायाः समनन्तरमिष्टं फलमवाप्यते; तत एव ते ज्ञान-क्रिये द्वे अप्यभीष्टफलस्य मोक्षादेः कारणं भवतः। अन्यथा ज्ञान-क्रियाभ्यां मोक्षभवनपरिकल्पनमनर्थकमेव स्यात्, क्रियारहितमेव ज्ञानमात्मलाभानन्तरमेव झगित्यभीष्टफलं केवलमपि प्रसाधयेत्, क्रियावदिति ॥११३६॥

अपिच,

[3]नाणं परंपरमणंतरा उ किरिया तयं पहाणयरं। जुत्तं कारणमहवा समयं तो दोन्नि जुत्ताइं ॥११३७॥

यदि ज्ञानं परम्परया कार्यस्योपकुरुते, क्रिया त्वानन्तर्येण, ततो यदेवानन्तरमुपकुरुते तदेव प्रधानं कारणं युक्तम्। अथ समकं युगपद् द्वे अपि ज्ञान-क्रिये कार्योत्पत्तावुपकुरुतः, तर्हि द्वयोरपि प्राधान्यं युक्तम्, न त्वेकस्य ज्ञानस्येति ॥ ११३७ ॥

किंच, ज्ञानात् क्रिया भवन्त्यपि मोक्षस्य कारणमसाविष्यते, नवा ?। यदि नेष्यते, तर्हि तामनपेक्ष्यैव केवलादपि ज्ञानात् क्रियावद् मोक्षोऽपि भवेत्, अकारणस्याऽनपेक्षणीयत्वात्। अथ क्रियापि कार्यस्य कारणमिष्यते, तत्राह—

[4]कारणमंतं मोत्तुं किरियमणंतं कहं मयं नाणं ?। सहचारित्ते व कहं कारणमेक्कं न पुणरेक्कं ? ॥११३८॥

नन्वेवं सत्यानन्तर्योपकारित्वादन्त्यकारणभूतां क्रियां मुक्त्वा कथं परम्परोपकारित्वादनन्त्यं ज्ञानं कारणं भवतोऽभिमतम् ? इति निवेद्यताम् ?। अथ ब्रूषे–नेहाऽन्त्या-ऽनन्त्यविभागः, किन्तु कार्यस्योत्पित्सोः सहैव युगपद् द्वे अप्युपकुरुतः, तर्ह्येवं हन्त ! द्वयोरपि

---

१ यच्च मनश्चिन्तितमन्त्रपूतविषभक्षणादिबहुभेदम्। फलमिह तत्प्रत्यक्षं क्रियारहितस्य ज्ञानस्य ॥ ११३५ ॥

२ येनैव ज्ञानात् क्रिया ततः फलं च ततो द्वे अपि। कारणमितरथा क्रियारहितमेव तत् प्रसाधयेत् ॥ ११३६ ॥

३ ज्ञानं पारम्परमनन्तरा तु क्रिया तत् प्रधानतरम्। युक्तं कारणमथवा समकं ततो द्वे युक्ते ॥ ११३७ ॥

४ कारणमन्त्यां मोक्तुं क्रियामनन्त्यं कथं मतं ज्ञानम् ? । सहचारित्वे वा कथं कारणमेकं न पुनरेकम् ? ॥११३८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सहचारित्वे कथमेकं ज्ञानं मोक्षस्य कारणम्, न पुनरेकं क्रियारूपं कारणमिष्यते ?। न ह्याग्रहग्रहग्रस्ततां विहायापरो हेतुरिहोपलभ्यत इति भावः ॥ ११३८ ॥

यदुक्तम्- '[1]रागादिविणिग्गहो जो य त्ति'। तत्राह—

[2]रागाइसमो संजमकिरिय च्चिय नाणकारणा होज्ज। तीसे फले विवाओ तं तत्तो नाणसहियाओ ॥११३९॥

रागादिशमो रागादिनिग्रहस्तावत् संयमक्रियैव भण्यते, नापरं किञ्चित्; सा च ज्ञानं कारणं यस्याः सा ज्ञानकारणा ज्ञानफला भवेदेव, नेहाऽस्माकं काचिद् विप्रतिपत्तिः। किन्तु यँत् तस्याः समनन्तरं मोक्षादिकं फलमुपजायते तत्र विवदामः, तथाहि- तत्किं ज्ञानादेव केवलादुपजायते, आहोस्वित् केवलक्रियातः, उत ज्ञान-क्रियोभयात्? इति त्रयी गतिः। तत्र न तावदाद्यः पक्षः, ज्ञानादपान्तराले भवतापि क्रियोत्पत्तेरभ्युपगमात्। नापि द्वितीयः पक्षो युक्तः, ज्ञानशून्यक्रियातो मोक्षादिकार्याभ्युपगमे उन्मत्तादिक्रियातोऽपि मुक्तिप्रसङ्गात्। तस्मात् तृतीय एव पक्षो युज्यते, अत एवाह 'तं तत्तो नाणसहियाउ त्ति' तद् मोक्षादिकार्यं ततस्तस्याः क्रियायाः सकाशादुत्पद्यते। कथंभूतायाः?, ज्ञानसहितायाः इति ॥ ११३९ ॥

यदुक्तम्- '[5]जं च मणोचिन्तियमंतपूयेत्यादि'। तत्राह—

[6]परिजवणाई किरिया मंतेसु वि साहणं न तम्मत्तं। तण्णाणओ य न फलं तं नाणं जेणमक्किरियं ॥११४०॥

विषघात-नभोगमनादिहेतुषु मन्त्रेष्वपि परिजपनादिक्रिया मन्त्रसहायिनी कार्यस्य साधनं कार्यसाधिकेत्यर्थः; न तु तन्मात्रं मन्त्रमात्रमेव तत्साधकम्। अथाभिधत्से- ननु प्रत्यक्षविरुद्धमिदम्, यतो दृष्टं क्वचिद् मन्त्रानुस्मरणज्ञानमात्रादप्यभीष्टफलम्; इत्याह- तज्ज्ञानाच्च केवलाद् मन्त्रानुस्मरणज्ञानाच्च न तत्फलम्, येन कारणेनाऽक्रियमेव तज्ज्ञानम्, अमूर्तत्वात्, यच्चाक्रियं न तत् कार्याणि करुते, यथाऽऽकाशम्, अक्रियं च ज्ञानम्, इति कथं कार्याणि कुर्यात्?; यच्च करोति तत् सक्रियं दृष्टम्, यथा कुलालः, न चैवं ज्ञानम्, इति न तत्केवलं किमपि करोति। न चेदं प्रत्यक्षविरुद्धम्। न हि क्रियासाहाय्यरहितं ज्ञानं क्वचिदपि फलमुपाहरदुपलभ्यत इति॥११४०॥

अथ प्रेर्यमाशङ्क्य परिहरन्नाह—

---

१ क. ग. 'हप्रस्त'। २ गाथा ११३४। ३ रागादिशमः संयमक्रियैव ज्ञानकारणा भवेत्। तस्याः फले विवादस्तत् ततो ज्ञानसहितायाः ॥ ११३९ ॥
४ घ. छ. 'यस्याः'। ५ गाथा ११३५। ६ परिजपनादिः क्रिया मन्त्रेष्वपि साधनं न तन्मात्रम्। तज्ज्ञानतश्च न फलं तज्ज्ञानं येनाऽक्रियम् ॥ ११४० ॥

[1]तो तं कत्तो, भन्नइ तं समयनिबद्धदेवओवहियं। किरियाफलं चिय जओ न मंतनाणोवओगस्स ॥११४१॥

यदि केवलमन्त्रज्ञानकृतं नभोगमनादिकार्यं न भवति, ततस्तर्हि कुतस्तत्? इति वाच्यम्?। भण्यतेऽत्रोत्तरम्- तद् नभोगमनादिकार्यं समयनिबद्धदेवतोपहितं सत् क्रियाफलमेव यस्मात्, ततो न ज्ञानोपयोगमात्रस्यैव फलमिति। इदमुक्तं भवति- समयः संकेततस्ततो यत्र यत्र देवतानां समये संकेते उपनिबद्धा मन्त्रास्तत् तद् देवताकृतमेव तत्तत् फलम्, देवताश्च सक्रिया एव। अतः सक्रियदेवताभिरुपाहृतं सत् तत्क्रियाफलमेव यतः, अतो न केवलस्य ज्ञानमात्रोपयोगस्य फलमिति स्थितम्।

आह- ननु देवताह्वानं तावत् केवलादेव मन्त्रानुस्मरणज्ञानोपयोगाद् भवति, न वा, इति वक्तव्यम्?। यदि भवति, तर्हि शेषकार्याण्यपि केवलात् तत एव किं नेष्यन्ते?। अथ न भवति, तर्हि कथमसाविहागत्य नभोगमन-विषवीर्यापहारादिकार्याणि कुर्यात्?। अत्रोच्यते- देवताह्वानं भवति, परं न केवलादेव मन्त्रस्मरणज्ञानोपयोगमात्रात्; किन्तु पुनः पुनस्तज्जपन-पूजनादिक्रियासहायात् तस्माद् देवताह्वानमपि संपद्यते, इत्यलं विस्तरेणेति ॥ ११४१ ॥

आह- किं ज्ञानं सर्वथैव निष्क्रियम्?, किं वा कांचिदेव विशिष्टां [2]क्रियामधिकृत्य तन्निष्क्रियम्? इति। अत्रोच्यते- वस्तुपरिच्छेदमात्रं तत् करोति, तत्करणादेव च सहकारिकारणतया जीवस्य चारित्रक्रियां जनयति, यत्तु विशिष्टं मोक्षलक्षणं कार्यं, तन्निर्वर्तकं ज्ञानमानन्तर्येण न भवति, इत्येतद् दिदर्शयिषुः, तथा वक्ष्यमाणं च संबन्धयितुमाह—

[3]वत्थुपरिच्छेयफलं हवेज्ज किरियाफलं च तो नाणं। न उ निव्वत्तयमिट्ठं सुद्धं चिय जं तओऽभिहियं ॥११४२॥

'किरियाफलं ति' क्रियैव फलं यस्य तत् क्रियाफलम्। शेषं सुगमम् ॥ इति षोडशगाथार्थः ॥ ११४२ ॥

किं पुनरभिहितम्?, इत्याह—

[4]सुयनाणम्मि वि जीवो वट्टंतो सो न पाउणइ मोक्खं। जो तव-संजममइए जोगे न चएइ वोढुं जे ॥११४३॥

श्रुतज्ञानेऽपि, अपिशब्दाद् मत्यादिज्ञानेष्वपि जीवो वर्तमानः सन् न प्राप्नोति मोक्षम्, इत्यनेन प्रतिज्ञार्थः सूचितः। यः कथं-

---

१ ततस्तत् कुतो, भण्यते तत् समयनिबद्धदेवतोपहितम्। क्रियाफलमेव यतो न मन्त्रज्ञानोपयोगस्य ॥ ११४१ ॥ २ क. ग. 'क्रियां सम'।
३ वस्तुपरिच्छेदफलं भवेत् क्रियाफलं च ततो ज्ञानम्। न तु निर्वर्तकमिष्टं शुद्धमेव यत् ततोऽभिहितम् ॥११४२ ॥
४ श्रुतज्ञानेऽपि जीवो वर्तमानः स न प्राप्नोति मोक्षम्। यस्तपः-संयममयान् योगान् न शक्नोति वोढुम् ॥ ११४३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

भूतः ?, इत्याह– यस्तपः-संयमात्मकान् योगान् न शक्नोति वोढुम्, इत्यनेन हेत्वर्थ इति । दृष्टान्तस्त्वभ्यूह्यः, वक्ष्यति वा ॥ इति निर्युक्तिगाथार्थः ॥ ११४३ ॥

अथ सूचितप्रयोगम्, वक्ष्यमाणनिर्युक्तिगाथासंबन्धं च विवक्षुराह—

[1]सक्किरियाविरहाओ न इच्छियसंपावयं ति नाणं ति । मग्गण्णू वाऽचिट्ठो वायविहीणोऽहवा पोओ ॥११४४॥

केवलमेव ज्ञानं नेप्सितार्थसंप्रापकम्, सत्क्रियाशून्यत्वात्, यथा– स्वसमीहितदेशप्रापणक्षमसच्चेष्टाविरहितो मार्गज्ञः पुरुषः स्वाभिलषितदेशाऽप्रापकः । अथवा, सौत्र एव दृष्टान्तः, यथा– ईप्सितदिक्संप्रापकवातसत्क्रियारहितः पोत ईप्सितदिगसंप्रापकः, सत्क्रियाविरहितं च ज्ञानम्, तस्माद् नेष्टार्थसंपादकं तत् ॥ इति गाथार्थः ॥ ११४४ ॥

तथाहि—

[2]जह छेयलद्धनिज्जामओ वि वाणियगइच्छियं भूमिं । वाएण विणा पोओ न चएइ महण्णवं तरिउं ॥११४५॥
तह नाणलद्धनिज्जामओ वि सिद्धिवसहिं न पाउणइ । निउणो वि जीवपोओ तव-संजममारुयविहीणो ॥११४६॥
संसारसागराओ उच्छुडो मा पुणो निबुड्डेज्जा । चरणगुणविप्पहीणो बुड्डइ सुबहुं पि जाणंतो ॥११४७॥

छेको दक्षो लब्धः प्राप्तो निर्यामको येन पोतेन स तथाविधः, अपिशब्दात् सुकर्णधाराद्यधिष्ठितोऽपि वणिज इष्टां वणिगिष्टां तां भूमिं महार्णवं तीर्त्वा वातेन विना पोतो न शक्नोति 'प्राप्तुम्' इति वाक्यशेषः । उपनयमाह– तथा श्रुतज्ञानलब्धनिर्यामकोऽपि, अपिशब्दात् सुनिपुणमतिकर्णधाराद्यधिष्ठितोऽपि संयम-तपो-नियममारुतसत्क्रियारहितो निपुणोऽपि जीवपोतो भवार्णवं तीर्त्वा सन्मनोरथवणिजोऽभिप्रेतां सिद्धिवसतिं न प्राप्नोति । तस्मात् तपः-संयमानुष्ठानेऽप्रमादवता भवितव्यमिति ।

तथा चोपदेशमाह– 'संसारेत्यादि' विनेयस्योपदिश्यते– भो देवानुप्रिय ! कथं कथमपि महता कष्टेनातिदुर्लभं श्रीसर्वज्ञधर्मा-

---

१ सत्क्रियाविरहाद् नेप्सितसंप्रापकमिति ज्ञानमिति । मार्गज्ञो वाऽचेष्टो वातविहीनोऽथवा पोतः ॥ ११४४ ॥ २ घ. छ. 'वाऽचेट्ठो' ।
३ यथा छेकलब्धनिर्यामकोऽपि वणिगिष्टा भूमिम् । वातेन विना पोतो न शक्नोति महार्णवं तरीतुम् ॥ ११४५ ॥
तथा ज्ञानलब्धनिर्यामकोऽपि सिद्धिवसतिं न प्राप्नोति । निपुणोऽपि जीवपोतस्तपः-संयममारुतविहीनः ॥ ११४६ ॥
संसारसागरादुन्मग्नो मा पुनर्निबुडीः । चरणगुणविप्रहीणो बुडति सुबहूवपि जानन् ॥ ११४७ ॥ ४ क. ग. 'विहूणो' ।

न्वितं मानुषजन्म त्वया लब्धम् । तल्लाभाच्च संसारसागरादुन्मग्न इवोन्मग्नस्त्वं वर्तसे । अतश्चरणकरणाद्यनुष्ठानप्रमादेन मा तत्रैव निमाक्षीरिति । न च वक्तव्यम्- विशिष्टश्रुतज्ञानयुक्तोऽहं तद्बलेनैव वस्तुपरिज्ञानमात्रादेव मुक्तिमासादयिष्यामीति; यतश्चरणगुणविप्रहीणः सुबहुपि श्रुतज्ञानेन जानन् बुडति निमज्जति पुनरपि संसारसमुद्रे । अतो ज्ञानमात्रसमुत्थमवष्टम्भमपहाय चरणकरणानुष्ठान एवोद्यमो विधेयः ॥ इति निर्युक्तिगाथात्रयार्थः ॥ ११४५ ॥ ११४६ ॥ ११४७ ॥

तृतीयगाथाभावार्थं भाष्यकारो दृष्टान्तेनाह—

[1]संसारसागराओ कुम्मो इव कम्मचम्मविवरेण । उम्मज्जिउमिह जइणं नाणाइपगासमासज्ज ॥ ११४८ ॥
दुलहं पि जाणमाणो सयणसिणेहाइणा तयं तत्तो । संजमकिरियारहिओ तत्थेव पुणो निबुड्डेज्जा ॥११४९॥

अयमत्र भावार्थः– यथा कश्चित् कूर्मः कच्छपस्तृणपत्रपटलप्रचुरातिनिबिडसेवालाच्छादितोदकान्धकारमहाह्रदान्तर्गतोऽनेकजलचरक्षोभादिव्यसनव्यथितमानसः सर्वतः परिभ्रमन् कथमपि सेवालरन्ध्रमासाद्य तेनैवोपरि निर्गत्य च शरत्पार्वणचन्द्रचन्द्रिकास्पर्शसुखमनुभूय भूयोऽपि स्वबन्धुभूताऽन्यजलचरस्नेहाकृष्टचित्तः, तेषामपि वराकाणामदृष्टकल्याणानामहमिदं सुरलोककल्पं किमपि दर्शयामि, इत्यवधार्य पुनस्तदेव ह्रदमध्यं प्रविष्टः । अथ समाहूतशेषजलचरवृन्दस्तद्रन्ध्रोपलब्ध्यर्थं पर्यटन्, अपश्यंश्च कष्टतरं व्यसनमनुभवति । एवमयमपि जीवकच्छपोऽनादिकर्मसंतानाच्छादिताद् मिथ्याज्ञानतिमिरानुगताद् विविधशिरो-नेत्रव्यथा-ज्वर-कुष्ठ-भगन्दरादिशारीरे-ष्टविप्रयोगा-ऽनिष्टसंप्रयोगादिमानसदुःखजलचरसमूहानुगतात् संसारसागरात् कथञ्चिदेव मनुष्यभवप्राप्तियोग्यकर्मोदयलक्षणं रन्ध्रमासाद्य मानुषत्वप्राप्त्योन्मग्नः सन् जिनवरेन्द्रचन्द्रवाक्चन्द्रिकासंगमसुखमनुभूय 'दुष्प्रापोऽयं जिनवचनबोधिलाभः' इत्येवं जानन्नपि स्वजनस्नेहविषयानुरक्तचित्ततया पुनरपि तत्रैव भवसागरे निमज्जेत् । अत उच्यते– 'मा त्वमित्थमस्मिन्नेव भवसागरे निमाक्षीः, किन्तु सदनुष्ठानेष्वप्रमादपरो भव' इति ।

अक्षरार्थस्तु सुगम एव, नवरं मनुष्यभवप्राप्त्यावारककर्मैव चर्म सेवालः कर्मचर्म तस्य विवरोऽनुदयावस्था तेन । 'जइणमित्यादि' जैनं ज्ञानादिप्रकाशं ज्ञान-दर्शन-चारित्रस्वरूपावबोधात्मकं तत्स्वरूपश्रवणादिद्वारेण गुरुभ्यः समासाद्येति । 'तयं ति' ज्ञानादिप्रकाशं दुर्ल-

---

१ संसारसागरात् कूर्म इव कर्मचर्मविवरेण । उन्मज्ज्येह जैनं ज्ञानादिप्रकाशमासाद्य ॥ ११४८ ॥
दुर्लभमपि जानन् स्वजनस्नेहादिना तत् ततः । संयमक्रियारहितस्तत्रैव पुनर्निबुडेत् ॥ ११४९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भमपि 'जानानः' इत्यत्र संबध्यते, स्वजनस्नेहादिना ततो वियोजितः संयमक्रियारहितः पुनरपि तत्रैव भवसागरे निमज्जेदेष संसारिजीवः ॥ इति गाथाद्वयार्थः ॥ ११४८ ॥ ११४९ ॥

अत्र प्रेरकः प्राह—

[1]आहण्णाणी कुम्मो पुणो निमज्जेज्ज न उण तन्नाणी । सक्किरियापरिहीणो बुड्डइ नाणी जहन्नाणी ॥११५०॥

नेच्छइयनयमएण अन्नाणी चेव सो मुणन्तो वि । नाणफलाभावाओ कुम्मो व निबुड्डए भवोहे ॥११५१॥

आह परः— ननु चाज्ञानी हिता-ऽहितविभागपरिज्ञानशून्यः पुनरपि तत्रैव जले निमज्जेत् कूर्मः, नेह किमपि चित्रम् । एतत्तु न विदुषां मतं यत्— जैनमार्गज्ञो हिता-ऽहितविभागवेत्ता ज्ञान्यपि भवसागरे पुनर्निमज्जति । अत्राचार्यः प्राह— ज्ञान्यपि पुनर्भवसागरे निमज्जति, सत्क्रियाविरहात्, अज्ञानिकूर्मवत् समुद्र इति । 'वा' इत्यथवा, निश्चयनयमतेन जानन्नप्यज्ञान्येवासौ सत्क्रियापरिहीणः, ज्ञानफलस्य विरतेरभावात् । अतोऽज्ञानिकूर्म इव पुनर्बुडति निमज्जति भवौघे संसारसमुद्रसंबन्धिनि जन्म-जरा[2]-ऽऽमय-मरणसलिलप्रवाहे ॥ इति गाथाद्वयार्थः ॥ ११५० ॥ ११५१ ॥

अत एवाह निर्युक्तिकारः—

[3]सुबहुं पि सुयमहीयं किं काही चरणविप्पहीणस्स । अंधस्स जह पलित्ता दीवसयसहस्सकोडी वि ? ॥११५२॥

सुबहुपि श्रुतमधीतं चरणविप्रहीणस्य निश्चयतोऽज्ञानमेव । अतस्तस्य फलशून्यत्वादकिञ्चित्करमेव । यथाऽन्धस्य दीपशतसहस्रकोट्यपि प्रदीप्ता न किञ्चित् करोति । दीपानां शतसहस्राणि लक्षा इत्यर्थः, तेषां कोटी, अपिशब्दात् तद्द्व्यादिकोट्योऽपि ॥ इति निर्युक्तिगाथार्थः ॥ ११५२ ॥

अथ भाष्यम्—

[4]संतं पि तमण्णाणं नाणफलाभावओ सुबहुयं पि । सक्किरियापरिहीणं अंधस्स पईवकोडि व्व ॥ ११५३ ॥

---

१ आहाज्ञानी कूर्मः पुनर्निमज्जेद् न पुनस्तज्ज्ञानी । सत्क्रियापरिहीणो मुडति ज्ञानी यथाऽज्ञानी ॥ ११५० ॥ ✕ नु मतं—।
नैश्चयिकनयमतेनाऽज्ञान्येव स जानन्नपि । ज्ञानफलाभावात् कूर्म इव निबुडेद् भवौघे ॥ ११५१ ॥ २ क. ग. 'रामर' ।
३ सुबहूक्तमपि श्रुतमधीतं किं करिष्यति चरणविप्रहीणस्य । अन्धस्य यथा प्रदीप्ता दीपशतसहस्रकोटिरपि ? ॥ ११५२ ॥
४ सदपि तदज्ञानं ज्ञानफलाभावतः सुबहुकमपि । सत्क्रियापरिहीणमन्धस्य प्रदीपकोटिरिव ॥ ११५३ ॥

गतार्थैव ॥ ११५३ ॥

अत्र प्रेर्यमुत्थाप्य परिहरति—

[1]अंधोऽणवबोहो च्चिय बोहफलं पुण सुयं किमण्णाणं ?। बोहो वि तओ विफलो तस्स जमंधस्स व बबोहो ॥११५४॥

आह— नन्वत्र दृष्टान्त-दार्ष्टान्तिकयोर्वैषम्यमेव, यतोऽन्धोऽनवबोध एव । न खलु तस्य बहुभिरपि प्रदीपकोटिभिः प्रज्वलिताभिर्घटाद्यवबोधो जन्यते, स्वयं चक्षुर्विकलत्वात् तस्य । श्रुतज्ञानं तु सज्जचक्षुषः प्रदीपवद् बोधफलमेव, ततः किमिदमज्ञानमभिधीयते ?— किमिति केवलाधीतश्रुतस्य तदकिञ्चित्करमुच्यते ? इति भावः । अत्रोत्तरम्— बोधोऽपि तकोऽसौ श्रुतजनितस्तस्य चरणहीनस्य विफलो यस्मात्, तस्मादनवबोध एवेति भावः, यथाऽन्धस्य 'अवबोहो त्ति' अवबोधः ॥ इति गाथाद्वयार्थः ॥ ११५४ ॥

व्यतिरेकमाह—

[3]अप्पं पि सुयमहीयं पगासयं होइ चरणजुत्तस्स । एक्को वि जह पईवो सचक्खुअस्सा पयासेइ ॥११५५॥

अल्पमपि श्रुतमधीतं चरणयुक्तस्य तद्धेतुत्वात् प्रकाशकं भवति— प्रकाशकं भण्यते, क्रियाहेतुत्वेन सफलत्वाज्ज्ञानत्वेन व्यपदिश्यत इति तात्पर्यम् । यथैकोऽपि प्रदीपो हेयो-पादेयपरिहारो-पादानादिक्रियाहेतुत्वाच्चक्षुष्मतः प्रकाशयति प्रकाशको भण्यते ॥ इति निर्युक्तिगाथार्थः ॥ ११५५ ॥

भाष्यम्—

[4]किरियाफलसंभवओ अप्पं पि सुयं पगासयं होइ । एको वि हु चक्खुमओ किरियाफलदो जह पईवो॥११५६॥

पूर्वार्धस्यान्ते ' चरणयुक्तस्य' इति शेषः । शेषमुक्तार्थमेव ॥ ११५६ ॥

वक्ष्यमाणवृत्तं संबन्धयन्नाह—

[5]नं हि नाणं विफलं चिय किलेसफलयं पि चरणरहियस्स । निप्फलपरिवहणाओ चंदणभारो खरस्सेव ॥११५७॥

---

१ अन्धोऽनवबोध एव बोधफलं पुनः श्रुतं किमज्ञानम् ? । बोधोऽपि सको विफलस्तस्य यदन्धस्येवाऽवबोधः ॥ ११५४ ॥ २ घ. छ. 'दवो' ।
३ अल्पमपि श्रुतमधीतं प्रकाशकं भवति चरणयुक्तस्य । एकोऽपि यथा प्रदीपः सचक्षुषः प्रकाशयति ॥ ११५५ ॥
४ क्रियाफलसंभवतोऽल्पमपि श्रुतं प्रकाशकं भवति । एकोऽपि खलु चक्षुष्मतः क्रियाफलदो यथा प्रदीपः ॥ ११५६ ॥
५ न हि ज्ञानं विफलमेव क्लेशफलकमपि चरणरहितस्य । निष्फलपरिवहणाच्चन्दनभारः खरस्येव ॥ ११५७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

गतार्थैव ॥ ११५३ ॥

अत्र प्रेर्यमुत्थाप्य परिहरति—

[1]अंधोऽणवबोहो च्चिय बोहफलं पुण सुयं किमण्णाणं ?। बोहो वि तओ विफलो तस्स जमंधस्स व वबोहो ॥११५४॥

आह– नन्वत्र दृष्टान्त-दार्ष्टान्तिकयोर्वैषम्यमेव, यतोऽन्धोऽनवबोध एव । न खलु तस्य बहुभिरपि प्रदीपकोटिभिः प्रज्वलिताभिर्घटाद्यवबोधो जन्यते, स्वयं चक्षुर्विकलत्वात् तस्य । श्रुतज्ञानं तु सज्जचक्षुषः प्रदीपवद् बोधफलमेव, ततः किमिदमज्ञानमभिधीयते ?– किमिति केवलाधीतश्रुतस्य तदकिञ्चित्करमुच्यते ? इति भावः । अत्रोत्तरम्– बोधोऽपि तकोऽसौ श्रुतजनितस्तस्य चरणहीनस्य विफलो यस्मात्, तस्मा[2]दनवबोध एवेति भावः, यथाऽन्धस्य 'अवबोहो त्ति' अवबोधः ॥ इति गाथाद्वयार्थः ॥ ११५४ ॥

व्यतिरेकमाह—

[3]अप्पं पि सुयमहीयं पगासयं होइ चरणजुत्तस्स । एक्को वि जह पईवो सचक्खुअस्सा पयासेइ ॥११५५॥

अल्पमपि श्रुतमधीतं चरणयुक्तस्य तद्धेतुत्वात् प्रकाशकं भवति– प्रकाशकं भण्यते, क्रियाहेतुत्वेन सफलत्वाज्ज्ञानत्वेन व्यपदिश्यत इति तात्पर्यम् । यथैकोऽपि प्रदीपो हेयो-पादेयपरिहारो-पादानादिक्रियाहेतुत्वाच्चक्षुष्मतः प्रकाशयति प्रकाशको भण्यते ॥ इति निर्युक्तिगाथार्थः ॥ ११५५ ॥

भाष्यम्—

[4]किरियाफलसंभवओ अप्पं पि सुयं पगासयं होइ । एको वि हु चक्खुमओ किरियाफलदो जह पईवो॥११५६॥

पूर्वार्धस्यान्ते ' चरणयुक्तस्य' इति शेषः । शेषमुक्तार्थमेव ॥ ११५६ ॥

वक्ष्यमाणवृत्तं संबन्धयन्नाह—

[5]नं हि नाणं विफलं च्चिय किलेसफलयं पि चरणरहियस्स । निप्फलपरिवहणाओ चंदणभारो खरस्सेव ॥११५७॥

---

१ अन्धोऽनवबोध एव बोधफलं पुनः श्रुतं किमज्ञानम् ? । बोधोऽपि सको विफलस्तस्य यदन्धस्येवाऽवबोधः ॥ ११५४ ॥ २ ध. छ. 'दवो' ।

३ अल्पमपि श्रुतमधीतं प्रकाशकं भवति चरणयुक्तस्य । एकोऽपि यथा प्रदीपः सचक्षुषः प्रकाशयति ॥ ११५५ ॥

४ क्रियाफलसंभवतोऽल्पमपि श्रुतं प्रकाशकं भवति । एकोऽपि खलु चक्षुष्मतः क्रियाफलदो यथा प्रदीपः ॥ ११५६ ॥

५ न हि ज्ञानं विफलमेव क्लेशफलकमपि चरणरहितस्य । निष्फलपरिवहणाच्चन्दनभारः खरस्येव ॥ ११५७ ॥

मुच्यते ?, इत्याह– यतो यस्माद् यद् विफलं तदिह हतं विवक्षितम्, फलं च ज्ञानस्य क्रियैव, ततो विगतफलं ज्ञानं क्रियाहीनमेवोच्यते, नान्यत् । अत्र च प्रयोगः– हतं ज्ञानमेव केवलम्, सत्क्रियाहीनत्वात्, महानगरप्रदीपनकदाहे पलायनक्रियारहितपङ्गुलोचनज्ञानवदिति । एवमुक्ते सति क्रियात एव मोक्षमिच्छन् ज्ञानेऽनादृतस्तत्त्यागं मा कार्षीच्छिष्यः; इत्यतो भण्यते– हताऽज्ञानतः क्रिया । हता मोक्षलक्षणफलरहिताऽज्ञानपरिगृहीता निह्नवादेः क्रिया, सम्यग्दृष्टेरपि ज्ञानोपयोगशून्यस्य क्रिया हतैव, तथाविधफलविकलत्वात्, सर्वतः संकटप्रदीप्तनगरे दह्यमानगृहाद्यभिमुखपलायमानान्धगतिक्रियावदिति । तस्मादन्योन्यापेक्षे समुदिते एव ज्ञान-क्रिये मोक्षस्य साधनमेष्टव्ये, न प्रत्येकमिति ॥ ११६० ॥ ११६१ ॥

एतदेवाह—

[1]अइसंकडपुरदाहम्मि अंधपरिधावणाइकिरिय व्व । तेणं नोभावेक्खा साहणमिह नाण-किरियाओ ॥११६२॥

गतार्थैव ॥ ११६२ ॥

अत्र परः प्राह—

[2]पत्तेयमभावाओ निव्वाणं समुदियासु वि न जुत्तं। नाण-किरियासु वोत्तुं सिकतासमुदायतेल्लं व ॥११६३॥

आह– ननु भवत्प्रतिपादितन्यायेन प्रत्येकावस्थायां ज्ञान-क्रिययोर्निर्वाणसाधकसामर्थ्याभावात् समुदिताभ्यामपि ज्ञान-क्रियाभ्यां निर्वाणं वक्तुं न युक्तम्, सिकतासमुदाये तैलवत् । अत्र प्रयोगः– इह यद् यतः प्रत्येकावस्थायां [3]नोत्पद्यते, तत् ततः समुदायेऽपि न भवति, यथा सिकताकणेषु प्रत्येकमभवत् तैलं तत्समुदायेऽपि न भवति, न जायते च प्रत्येकं ज्ञान-क्रियाभ्यां मोक्षः, अतस्तत्समुदायादप्यसौ न युज्यत इति । तदेतदयुक्तम्, प्रत्यक्षविरुद्धत्वात्; तथाहि– मृत्-तन्तु-चक्र-चीवरादिभ्यः प्रत्येकमभवन्तोऽपि तत्समुदायाद् घटादिपदार्थसार्थाः प्रादुर्भवन्तो दृश्यन्ते, अतोऽदृष्टस्य मोक्षस्यापि ज्ञान-क्रियासमुदायात् प्रादुर्भूतिरविरुद्धैवेति ॥११६३॥

किञ्च,

[4]वीसुं न सव्वह च्चिय सिकतातेल्लं व साहणाभावो । देसोवगारिया जा सा समवायम्मि संपुण्णा ॥११६४॥

---

१ अतिसंकटपुरदाहेऽन्धपरिधावनादिक्रियेव । तेनाऽन्योन्यापेक्षे साधनमिह ज्ञान-क्रिये ॥ ११६२ ॥

२ प्रत्येकमभावाद् निर्वाणं समुदितयोरपि न युक्तम् । ज्ञान-क्रिययोर्वक्तुं सिकतासमुदायतैलमिव ॥११६३ ॥ ३ क. ग. 'नोत्पद्यते' ।

४ विष्वग् न सर्वथैव सिकतातैलमिव साधनाभावः । देशोपकारिता या सा समवाये संपूर्णा ॥ ११६४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

न च विष्वक् पृथक् सर्वथैव सिकताकणानां तैल इव साध्ये ज्ञान-क्रिययोर्मोक्षं प्रति साधनत्वाभावः, किन्तु या च यावती च तयोर्मोक्षं प्रति देशोपकारिता प्रत्येकावस्थायामप्यस्ति, सा च समुदाये संपूर्णा भवति, इत्येतावान् विशेषः, अतः संयोग एव ज्ञान-क्रिययोः कार्यसिद्धिः ॥ इति गाथापञ्चकार्थः ॥ ११६४ ॥

एतदेवाह—

[1]संजोगसिद्धीइ फलं वयंति न हु एगचक्केण रहो पयाइ ।
अंधो य पंगू य वणे समिच्चा ते संपउत्ता नगरं पविट्ठा ॥ ११६५ ॥

ज्ञान-क्रिययोः संयोगनिष्पत्तावेव मोक्षलक्षणं फलमाचक्षते तीर्थकराः । न हि लोकेऽप्येकचक्रेण रथः प्रवर्तते । एवमन्यदपि सर्वं सामग्रीजन्यमेव कार्यमवगन्तव्यम् । तथा चान्ध-पङ्गूदाहरणमिह वक्तव्यम्; तद्यथा— कस्यापि नगरस्य सत्को लोकः कुतोऽपि राजभयादरण्यं गतः । तत्रापि तस्करघाटीभयाद् वाहनादिकमुज्झित्वा प्रपलायितः । अन्ध-पङ्गू पुनरनाथौ तत्रैव स्थितौ । तत्र च दवाग्नौ सर्वतः प्रदीप्ते तौ परस्परं संप्रयुक्तौ । पङ्गुरन्धेन स्वस्कन्धमारोपितः । स चान्धस्य सम-विषम-स्थाणु-कण्टकादिकं कथयति । अतस्तस्य सत्केन चाक्षुषज्ञानेन, अन्धसत्कया च गतिक्रियया सम्यग् मार्गप्रवृत्त्या क्षेमेण नगरं प्रविष्टाविति । एवं सर्वत्र संयोगात् फलसिद्धिर्भावनीया ॥ इति निर्युक्तिवृत्तार्थः ॥ ११६५ ॥

अत्र भाष्यम्—

[2]दुगसंजोगम्मि फलं सम्मकिरिओ-वलद्धिभावाओ । इट्ठपुरागमणं पिव संजोए अन्ध-पंगूणं ॥ ११६६ ॥
वइरेगो जं विफलं न तत्थ सम्मकिरिओ-वलद्धीओ । दीसंति गमणविफले जहेगचक्के मुवि रहम्मि ॥११६७॥

अनेन गाथाद्वयेन प्रस्तुतार्थसिद्धयेऽन्वय-व्यतिरेकप्रयोगौ निर्दिष्टौ; तथाहि— द्विकं ज्ञान-क्रियालक्षणं तत्संयोग एव फलं मोक्ष-

---

१ संयोगसिद्धौ फलं वदन्ति न खल्वेकचक्रेण रथः प्रयाति । अन्धश्च पङ्गुश्च वने समेत्य तौ संप्रयुक्तौ नगरं प्रविष्टौ ॥११६५॥

२ द्विकसंयोगे फलं सम्यक्क्रियो-पलब्धिभावात् । इष्टपुराऽऽगमनमिव संयोगेऽन्ध-पङ्ग्वोः ॥ ११६६ ॥
व्यतिरेको यद् विफलं न तत्र सम्यक्क्रियो-पलब्धी । दृश्येते गमनविफले यथैकचक्रे भुवि रथे ॥ ११६७ ॥ ३ क. ग. 'क्षफलं भ' ।

लक्षणं भवति । कुतः ?, अत्र संयोगे सम्यक्क्रियो-पलब्धिभावादिति । क्रिया चारित्ररूपा, उपलब्धिस्तु ज्ञानम् । इह यत्र यत्र सम्यक्-क्रिया-ज्ञाने तत्र तत्रेष्टफलसिद्धिः, यथाऽन्ध-पङ्गुसम्यक्क्रिया-ज्ञानसंयोगे, सम्यक्क्रिया-ज्ञाने चात्र द्वयसंयोगे, तस्मादतो मोक्षफलसिद्धिः । इत्यन्वयप्रयोगः । अथ व्यतिरेकप्रयोग उच्यते— यद् विफलं न तत्र सम्यक्क्रिया-ज्ञाने दृश्येते, यथा भुवि पृथिव्यां गतिक्रियारहिते विघटितैकचक्रे रथे, सम्यक्क्रिया-ज्ञाने चात्र द्वयसंयोगे, तस्मादतो मोक्षफलप्राप्तिरिति ॥ ११६७ ॥

वक्ष्यमाणनिर्युक्तिगाथासंबन्धनार्थमाह—

[1]सहकारित्ते तेसिं किं केणोवकुरुते सहावेणं । नाण-चरणाणमहवा सहावनिद्धारणमियाणिं ॥ ११६८ ॥

आह— ज्ञान-क्रिययोः सहकारित्वे सति किं केन स्वभावेनोपकुरुते— किमविशेषेणोपकुरुतः, शिबिकावाहकपुरुषसंघातवत् ? ; आहोस्विद् भिन्नस्वभावतया, गतिक्रियायां नयन-चरणादिवत् ? । अत्रोच्यते— भिन्नस्वभावतया, यत आह— 'नाणं पयासय-मित्यादि' । इत्येका वक्ष्यमाणगाथायाः प्रस्तावना । अथवा, संक्षिप्ताऽन्या प्रस्तावनोच्यते, यथा— तयोरेव ज्ञान-चरणयोरिदानीं स्वभाव-निर्धारणं क्रियते । इति संक्षेप-विस्तरकृत एव भेदः, न तु पारमार्थिकः ॥ इति गाथात्रयार्थः ॥ ११६८ ॥

[2]नाणं पयासयं सोहओ तवो संजमो य गुत्तिकरो । तिण्हं पि समाओगे मोक्खो जिणसासणे भणिओ ॥११६९॥

इह यथा किञ्चिदुद्घाटद्वारं बहुवातायनजालकच्छिद्रं वाताकृष्टादिमचुररेणु-कचवरपूरितं शून्यगृहम् । तत्र च वस्तुकामः कोऽपि तत् शुशोधयिषुर्द्वारवातायनजालकानि सर्वाण्यपि बाह्यरेणु-कचवरप्रवेशनिषेधार्थं स्थगयति । मध्ये च प्रदीपं प्रज्वलयति । पुरुषं च कचवराद्याकर्षणाय व्यापारयति । तत्र च प्रदीपो रेण्वादिमलप्रकाशनव्यापारेणोपकुरुते, द्वारादिस्थगनं तु बाह्यरेण्वादिप्रवेशनिषेधेन, पुरुषस्तु रेण्वाद्याकर्षणात् तच्छोधनेन । एवमिहापि जीवापवरक उद्घाटाश्रवद्वारः सद्गुणशून्यो मिथ्यात्वादिहेत्वाकृष्टकर्मकचवरपूरितो मुक्तिसुखनिवासहेतोः शोधनीयो वर्तते । तत्र च प्रदीपस्थानीयं ज्ञानं जीवादिवस्तूनां प्रकाशकम्, तपस्तु पुरुषस्थानीयं कर्मकचवरशोध-कम्, संयमस्तु द्वारादिस्थगनकल्पो गुप्तिकरो नूतनकर्मकचवरप्रवेशनिषेधकः । एवं त्रयाणामपि ज्ञानादीनां समायोगे समवाये मोक्षो जीवस्य जिनशासने भणितः । एवं शुद्धस्वरूपे जीवमन्दिरे सिद्धिसुखानि संततं निवसन्ति ॥ इति निर्युक्तिगाथार्थः ॥ ११६९ ॥

---

१ सहकारित्वे तयोः किं केनोपकुरुते स्वभावेन ? । ज्ञान-चरणयोरथवा स्वभावनिर्धारणमिदानीम् ॥ ११६८ ॥

२ ज्ञानं प्रकाशकं शोधकं तपः संयमश्च गुप्तिकरः । त्रयाणामपि समायोगे मोक्षो जिनशासने भणितः ॥ ११६९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

आह– ननु जीवापवरकशोधने किमिति ज्ञानादीनां त्रितयमप्यपेक्ष्यते, यावताऽन्यतरेणैकेनापि तच्छुद्धिर्भविष्यति ?, इत्याशङ्क्यैकैकस्यात् कार्यसिद्धिनिराकरणेन त्रितयसमुदायादेव तत्सिद्धिं समर्थयन्नाह भाष्यकारः—

[1]असहायमसोहिकरं नाणमिह पगासमेत्तभावाओ । सोहेइ घरकयारं जह सुपगासो वि न पईवो ॥११७०॥
न य सव्वविसोहिकरी किरिया वि जमपगासधम्मा सा । जह न तमोगेहमलं नरकिरिया सव्वहा हरइ॥११७१॥
दीवाइपयासं पुण सक्किरियाए विसोहियकयारं । संवरियकयारागमदारं सुद्धं घरं होइ ॥ ११७२ ॥
तह नाणदीवविमलं तवकिरियासुद्धकम्मयकयारं । संजमसंवरियमुहं जीवघरं होइ सुविसुद्धं ॥ ११७३ ॥

इह न ज्ञानमसहायमेकाक्येव शोधयितुमलम्, प्रकाशमात्रस्वभावत्वात्, यदक्रियं प्रकाशमात्रस्वभावं न तद् विशुद्धिकरं दृष्टम्, यथा न गृहरजो-मलविशुद्धिकृद् दीपः, यच्च विशुद्धिकरं न तत् प्रकाशमात्रस्वभावम्, यथेष्टा-ऽनिष्टप्राप्ति-परिहारपरिस्पन्दवान् नयनादिप्रकाशधर्मा देवदत्तः, प्रकाशमात्रस्वभावं च ज्ञानम्, तस्मादसहायत्वाद् न विशुद्धिकरं तदिति । क्रियाप्येकाकिनी न सर्वशुद्धिकरी, अप्रकाशधर्मकत्वात्, यद् यदप्रकाशधर्मकं न तत् सर्वविशुद्धिकरम्, यथा न समस्तगृहरजो-मलविशुद्धयेऽन्धक्रिया, चक्षुष्मतो वा क्रिया यथा तमोयुक्तं गृहं तमोगृहं तस्य न सर्वविशुद्धयेऽलम्, या च सर्वविशुद्धयेऽलं न साऽप्रकाशस्वभावा, यथा चक्षुष्मतो नरस्य त्रितमस्कगृहे समस्तरजो-मलापनयनक्रिया, अप्रकाशस्वभावा चैकाकिनी क्रिया, अतो न सर्वविशुद्धिकरीति ।

त्रितयादपि समुदितात् तर्हि शुद्धिर्न भविष्यतीति चेत् । नैवम्, इत्याह– दीपादिप्रकाशं पुनर्यथा गृहं सत्क्रियया विशोधितकचवरं संवृतकचवरागमहेतुभूतद्वारं सर्वथा शुद्धं भवति; तथा तेनैव प्रकारेण ज्ञानदीपविमलितं तपःक्रियया शोधितकर्मकचवरं संयमेन संवृतसमस्ताश्रवद्वारं जीवगृहं सुविशुद्धं सिद्धिसुखसंदोहनिवासयोग्यं भवतीत्यर्थ इति ॥ ११७० ॥ ११७१ ॥ ११७२ ॥ ११७३ ॥

आह– ननु पूर्वं ज्ञान-क्रियालक्षणाद् द्वयाद् मोक्षः, इदानीं तु ज्ञान-तपः-संयमरूपात् त्रितयादसावुच्यते, इति कथं न पूर्वा-

---

१ असहायमशुद्धिकरं ज्ञानमिह प्रकाशमात्रभावात् । शोधयति गृहकचवरं यथा सुप्रकाशोऽपि न प्रदीपः ॥ ११७० ॥
न च सर्वविशुद्धिकरी क्रियाऽपि यदप्रकाशधर्मा सा । यथा न तमोगेहमलं नरक्रिया सर्वथा हरति ॥ ११७१ ॥
दीपादिप्रकाशं पुनः सत्क्रियया विशोधितकचवरम् । संवृतकचवरागमद्वारं शुद्धं गृहं भवति ॥ ११७२ ॥
तथा ज्ञान-दीपविमलं तपःक्रियाशुद्धकर्मकचवरम् । संयमसंवृतमुखं जीवगृहं भवति सुविशुद्धम् ॥ ११७३ ॥

परविरोधः ?, इत्याशङ्क्याह—

[2]संजम-तवोमई जं संवरनिज्जरफला मया किरिया । तो तिगसंजोगो वि हु ताउ च्चिय नाण-किरियाओ ॥११७४॥

संयम-तपोमयी संवर-निर्जरफला च यद् यस्मात् तीर्थकर-गणधराणां मता संमता क्रिया, ततस्तस्माज्ज्ञान-तपः-संयमरूपस्त्रिकसंयोगोऽप्यसौ ते एव पूर्वोक्ते ज्ञान-क्रिये, नाधिकं किञ्चिदिति । इदमुक्तं भवति– एकैव चारित्रक्रिया संयम-तपोभेदाद् द्विधा भिद्यते, तपः-संयमरूपत्वाच्चारित्रस्य । अत एव संवरो निर्जरा च तस्याः फलम्, संयमस्याऽऽश्रवद्वारसंवरहेतुत्वात्, तपसस्तु कर्मनिर्जराकारणत्वात् । अतो यद्यपीह ज्ञानादित्रयाद् मोक्ष उच्यते, तथापि तपः-संयमयोः क्रियायामेवैकस्यामन्तर्भावाज्ज्ञान-क्रियालक्षणद्वयादेवाऽयम्, इति न कश्चिद् विरोधः ।

अपरस्त्वाह– ननु " [3]सम्यग्दर्शन-ज्ञान-चारित्राणि मोक्षमार्गः " इति प्रसिद्धम्, अत्र तु ज्ञान-चारित्राभ्यां स प्रतिपाद्यते, इति कथं न विरोधः ? । एतदप्ययुक्तम्, अभिप्रायापरिज्ञानात्, यतो ज्ञानग्रहणेनैवेह सम्यक्त्वमाक्षिप्यते, सम्यक्त्वमन्तरेण ज्ञानस्याऽप्यभावात्, मिथ्यादृष्टिज्ञानस्याऽज्ञानत्वेनाऽसकृत्प्रतिपादनात्; तथा, ज्ञानविशेष एव सम्यक्त्वम्, इति प्रागप्युक्तमेव, तद्यथा—

'[4]नाणमवाय-धिईओ दंसणमिट्ठं जहोग्गहे-हाओ । तह तत्तरुई सम्मं रोइज्जइ जेण तं नाणं ॥ १ ॥'

तस्माज्ज्ञानान्तर्गतमेव सम्यक्त्वम्, अतो ज्ञानग्रहणात् तद् गृहीतमेव, इत्यलं प्रसङ्गेन । तदेवं व्याख्याता 'नाणं पयासगं' इत्यादिगाथा ॥ ११७४ ॥

अथ 'भावे खओवसमिए' इत्याद्युत्तरगाथासंबन्धनार्थमाह—

[5]न लहइ सिवं सुयम्मि वि वट्टंतो अचरणो त्ति जं तस्स । [6]हेऊ खओवसमओ जह वट्टंतोऽवहिण्णाणे ॥११७५॥

इह 'जं ति' '[7]सुयनाणम्मि वि जीवो वट्टंतो सो न पाउणइ मोक्खं' इत्यादिगाथायां यत् पूर्वं प्रतिज्ञातमित्यर्थः । किं प्रतिज्ञा-

---

१ संयम-तपोमयी यत् संवर-निर्जराफला मता क्रिया । ततस्त्रिकसंयोगोऽपि खलु ते एव ज्ञान-क्रिये ॥ ११७४ ॥
२ तत्त्वार्थाधिगमसूत्रे १, १ । ३ गाथा ५३६ । ४ गाथा ११६९ । ५ गाथा ११८० ।
५ न लभते शिवं श्रुतेऽपि वर्तमानोऽचरण इति यत् तस्य । हेतुः क्षयोपशमतो यथा वर्तमानोऽवधिज्ञाने ॥ ११७५ ॥ ६ गाथा ११४३ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तम् ?, इत्याह– 'न लभते शिवं मोक्षं श्रुतेऽपि वर्तमानोऽचरणो जीवः' इति । तस्य प्रतिज्ञातस्य हेतुरयं द्रष्टव्यः । कः ?, इत्याह– 'खओवसमउ त्ति' क्षायोपशमिकत्वात्– श्रुतज्ञानस्य क्षायोपशमिकभाववर्तित्वात्, मोक्षस्य च क्षायिकज्ञान एव भावादिति भावः । यथाऽवधिज्ञाने वर्तमान इति दृष्टान्तः ॥ ११७५ ॥

अत्र परः प्राह– ननु यद्येवम्, तर्हि चरणसहितादपि श्रुताद् मोक्षो न भवत्येव, अस्मादेव हेतोः, अमुष्मादेव च दृष्टान्तादिति । कः किमाह ?– क्षायोपशमिके चरणसहितेऽपि ज्ञाने न भवत्येव मोक्ष इति सिद्धसाध्यतैव, किन्तु क्षायिकज्ञान-चारित्राभ्यामेव मोक्ष इति । एतदेवाह—

[1]सक्किरियम्मि वि नाणे मोक्खो खइयम्मि न उ खओवसमे । सुत्तं च खओवसमे न तम्मि तो चरणजुत्ते वि॥११७६॥

गतार्थैव ॥ ११७६ ॥

आह– यद्येवं क्षायोपशमिकभाववृत्तित्वेनैव श्रुताद् मोक्षो निषिद्ध इत्यतश्चरणसहितात् ततः प्राग् यद् मोक्षाभिधानं तच्छून्यचित्तभाषितमेव । नैवम्, यतः साक्षादानन्तर्येणैव श्रुताद् मोक्षो निषिध्यते, पारम्पर्येण तु तस्मादप्यसौ भवत्येव, यस्मात् श्रुतज्ञान-चारित्राभ्यां क्षायिकज्ञान-चारित्रे लभ्येते, ताभ्यां च मोक्षः संप्राप्यते । ततश्चारित्रयुक्तं श्रुतं मोक्षहेतुरिति यदुक्तं प्राक्, तदप्यविरुद्धमेवेति । एतदेवाह—

[2]जं [3]सुयं-चरणेहिंतो खाइयनाण-चरणाणि लब्भंति । तत्तो सिवं सुयं तो सचरणमिह मोक्खहेउ त्ति॥११७७॥

व्याख्यातार्थैव ॥ ११७७ ॥

ननुः कुतः पुनरिदमवसीयते यत्– क्षायोपशमिके भावे श्रुतं वर्तते ? । उच्यते– आगमे तथैवाऽभिधानात् । कः पुनरेवमागमः ?, इत्याह– '[4]भावे खओसमिए इत्यादि' इत्येवमेकया पातनयेयं गाथा संबध्यते । अथ पातनान्तरं चिकीर्षुराह—

[5]आह व निज्जिण्णे च्चिय कम्मे नाणं ति किंव चरणेणं ? । न सुयं खयओ केवलनाण-चरित्ताइं खइयाइं ॥११७८॥

---

१ सक्रियेऽपि ज्ञाने मोक्षः क्षायिके न तु क्षयोपशमे । सूत्रं च क्षयोपशमे न तस्मिंस्ततश्चरणयुक्तेऽपि ॥ ११७६ ॥ × सुय–।

२ यत् श्रुत-चरणाभ्यां क्षायिकज्ञान-चारित्रे लभ्येते । ततः शिवं श्रुतं ततः सचरणमिह मोक्षहेतुरिति ॥ ११७७ ॥ ३ गाथा ११८० ।

४ आह वा निर्जीर्णे एव कर्मणि ज्ञानमिति किंवा चरणेन ? । न श्रुतं क्षयतः केवलज्ञान-चारित्रे क्षायिके ॥ ॥ ११७८ ॥

तसुं य ठियस्स मोक्खो तो सुयमिह सचरणं तदट्ठाए । तं कह मीसं खइयं च केवलं जं सुएऽभिहियं ॥११७९॥

'आह व त्ति' अथवा, पर आह– ननु च स्वावारके कर्मणि तावत् सर्वथा निर्जीर्णे परिक्षीणे सर्वमपि ज्ञानमुत्पद्यते, न तूदयप्राप्ते । ततश्च यथा चारित्रमन्तरेणापि कथमपि तज्ज्ञानावरणं कर्म क्षीणम्, तथा मोक्षलाभावारकमपि कथमप्येवमेव क्षयमुपयास्यति, ततो ज्ञानादेव केवलाद् मोक्षो भविष्यति, किं चारित्रेण ? इति । अत्रोत्तरमाह– 'न सुयं खयउ त्ति' सर्वमपि ज्ञानं स्वावरणे सर्वथा क्षीणे समुत्पद्यते, इत्येतदसिद्धम्, यस्मात् श्रुतज्ञानम्, उपलक्षणत्वाद् मत्य-ऽवधि-मनःपर्यायज्ञानानि च न स्वावरणक्षयात्, किन्तु तत्क्षयोपशमादेवैतानि जायन्ते । क्षायिकं त्वेकमेव केवलज्ञानम्, तथा, क्षीणमोहसंबन्धि चारित्रं च क्षायिकम्; तयोश्च स्थितस्याऽनन्तर्येण मोक्षो जायते । ततः सचरणं श्रुतमिह तदर्थाय क्षायिकज्ञान-चारित्रलाभाय भवति, इत्येवं परम्परया चारित्रसहितात् श्रुताद् मोक्षप्राप्तेः पूर्वोक्तं न विरुध्यते । परः प्राह– कथं पुनरिदं विज्ञायते– तत् श्रुतज्ञानं मिश्रं क्षायोपशमिकम्, केवलज्ञानं तु क्षायिकमिति ? । आचार्यः प्राह– यद् यस्मात् श्रुत आगमेऽभिहितमेतत् ॥ इति गाथादशकार्थः ॥ ११७९ ॥

किं तदभिहितम् ?, इत्याह—

[1]भावे खओवसमिए दुवालसंगं पि होइ सुयनाणं । केवलियनाणलंभो नण्णत्थ खए कसायाणं ॥११८०॥

भवनं भावः, भवतीति वा भावः, तत्र भावे श्रुतज्ञानं भवति । कस्मिन् ?, इत्याह– क्षयो-पशमाभ्यां निर्वृत्तः, क्षयो-पशमावेव वा क्षायोपशमिकस्तस्मिन्, न त्वौदयिकादिके । कियत् ?, इत्याह–द्वादशाऽङ्गानि यत्र तद् द्वादशाङ्गम्, अपिशब्दाद् बाह्यमपि सर्वम्, तथा, मत्य-ऽवधि-मनःपर्यायज्ञानत्रयमपि,तथा,क्षायिकौ-पशमिकभाववृत्तिवर्जसामायिकचतुष्टयमपि । केवलस्य भावः कैवल्यं घातिकर्मवियोग इत्यर्थः, तस्मिन् कैवल्ये सति ज्ञानं कैवल्यज्ञानं केवलज्ञानमित्यर्थः, तल्लाभः पुनः कषायाणां क्रोधादीनां सर्वथा क्षये सत्येव भवति, नान्यत्र नान्येन प्रकारेण । इह च यद्यपि घातिकर्मसु चतुर्ष्वपि क्षीणेषु केवलज्ञानं भवति, न तु केवलेषु कषायेषु; तथापि प्राधान्यख्यापनार्थं तेषामेव ग्रहणम्, तत्क्षये शेषकर्मक्षयस्याऽवश्यंभावित्वात् ॥ इति निर्युक्तिगाथार्थः ॥ ११८० ॥

---

१ तयोश्च स्थितस्य मोक्षस्ततः श्रुतमिह सचरणं तदर्थाय । तत् कथं मिश्रं क्षायिकं च केवलं यत् श्रुतेऽभिहितम् ॥ ११७९ ॥

२ भावे क्षायोपशमिके द्वादशाङ्गमपि भवति श्रुतज्ञानम् । कैवल्यज्ञानलाभो नान्यत्र क्षये कषायाणाम् ॥ ११८० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

भाष्यम्—

[1]सव्वं पि किमुय देसो केवलवज्जाणि वाविसद्देणं । चत्तारि खओवसमे सामइयाइं च पाएणं ॥११८१॥

सव्वकसायावगमे केवलमिह नाण-दंसण-चरित्तं । देसक्खए वि सम्मं धुवं सिवं सव्वखइएसुं ॥११८२॥

सर्वमपि श्रुतं क्षायोपशमिकभाववर्ति, किमुत तद्देशः, इत्यपिशब्दभावार्थः । अथवा, अपिशब्दात् केवलज्ञानवर्जानि चत्वारि ज्ञानानि, सामायिकानि च सम्यक्त्व-श्रुत-देश-सर्वविरमणरूपाणि चत्वारि, प्रायोग्रहणादक्षायिकौ-पशमिकानीति । इह '[3]नेण्णत्थ खए कसायाणं' इति केवलज्ञानविषयसामान्योक्तावतिप्रसङ्गाद् विशेषं दर्शयति– केवलज्ञानं, केवलदर्शनं, केवलं परिपूर्णं क्षायिकं चारित्रं चेति । एतानि त्रीणि सर्वेषामेव क्रोधादिकषायाणामपगमे क्षये भवन्ति । क्षायिकं[4] सम्यक्त्वं पुनस्तेषामनन्तानुबन्धिचतुष्टयरूपदेशक्षयेऽपि भवति । ततः सर्वेष्वपि ज्ञान-दर्शन-सम्यक्त्व-चारित्रेषु क्षायिकेषु जातेषु सत्सु ध्रुवं निश्चितं शिवं मोक्षो भवति जीवस्येति ॥११८१॥११८२॥

अथोत्तरनिर्युक्तिगाथासंबन्धनार्थमाह—

[5]कहमेयाणमलाभो लाभो व कमो तदावरणया वा । आवरणखउवसमो समो खओ वा कहं कस्स ?॥११८३॥

कथं पुनरेतेषां सम्यक्त्वादीनामलाभः ?, कथं वा लाभः– कुतो हेतोरित्यर्थः ?, को वा लाभक्रमः ?, कस्य वा किमावरणम् ?, कस्य वा कथमावरणक्षयोपशमः ?, कथं वोपशमः ?, क्षयो वा ? इत्येका पातना ॥ ११८३ ॥

पातनान्तरमाह—

[6]अहवा तवाइमइयं कहमारूढो तरुं जिणो कह वा । तत्तो पवक्खमाणा जाया जिणपवयणुप्पत्ती ? ॥ ११८४ ॥

अथवा, 'तव-नियम-नाणरुक्खं' इत्यादि प्रागुक्तम्, तत्रेदानीमेतत् पृच्छ्यते– तं तपोनियमादिवृक्षं जिनः कथमारूढः– केन हेतुना, केन वा क्रमेण ? इत्यर्थः, कथं वा ततो जिनात् प्रवक्ष्यमाणा भणिष्यमाणा जिनप्रवचनोत्पत्तिर्जाता ? इति ॥ ११८४ ॥

---

१ सर्वमपि किमुत देशः केवलवर्जानि वाऽपिशब्देन । चत्वारि क्षयोपशमे सामायिकानि च प्रायेण ॥ ११८१ ॥
सर्वकषायापगमे केवलमिह ज्ञान-दर्शन-चारित्रम् । देशक्षयेऽपि सम्यग् ध्रुवं शिवं सर्वक्षायिकेषु ॥ ११८२ ॥ २ गाथा ११८० ।
३ क.ग.'कं पुनस्तेषां सम्यक्त्वमन' । ४ कथमेतेषामलाभो लाभो वा क्रमस्तदावरणता वा ? । आवरणक्षयोपशमः शमः क्षयो वा कथं कस्य ? ॥ ११८३ ॥
५ क.ग.'म्यग्ज्ञानादी' । ६ अथवा तपआदिमयं कथमारूढस्तरुं जिनः कथं वा । ततः प्रवक्ष्यमाणा जाताः जिनप्रवचनोत्पत्तिः ? ॥ ११८४ ॥ ७ गाथा १०९४ ।

अत्र ग्रन्थगाम्भीर्यमालोक्य पौर्वापर्यमूढतां शिष्यस्याऽऽशङ्कमानः संक्षिप्य तात्पर्यमाह—

[2]निज्जुत्तिसमुत्थाणप्पसंगओ नाणतरुसमारोहो । वच्चइ य वक्खमाणा समयं जिणपवयणुप्पत्ती ॥ ११८५ ॥

कुतः पुरुषादियं सामायिकनिर्युक्तिः प्रसूता ?, इत्येवं सामायिकनिर्युक्तिसमुत्थानप्रसङ्गतो यस्तपो-नियम-ज्ञानवृक्षसमारोहः प्राक् प्रस्तुतः, या च वक्ष्यमाणा जिनप्रवचनोत्पत्तिः, एतद्द्वितयमप्येवं सति समकं युगपद् व्रजति– युगपत् समर्थयिष्यत इत्यर्थः ॥ इति गाथापञ्चकार्थः ॥ ११८५ ॥

सम्यक्त्वाद्यलाभकारणं तावदाह—

[3]अट्ठण्हं पयडीणं उक्कोसट्ठिईए पवट्टमाणो उ । जीवो न लहइ सामाइयं चउण्हं पि एगयरं ॥ ११८६ ॥

अष्टानां ज्ञानावरणीयादिकर्मप्रकृतीनामुत्कृष्टस्थितौ वर्तमानो जीवो न लभते सामायिकम् । किंविशिष्टम् ?, चतुर्णां सम्यक्त्व-सामायिक-श्रुतसामायिक-देशविरतिसामायिक-सर्वविरतिसामायिकानामेकतरमन्यतरादिति । अपिशब्दाद् मत्यादि च न लभते । न केवलमेतानि न लभते, पूर्वप्रतिपन्नोऽप्यायुर्वर्जकर्मोत्कृष्टस्थितौ न भवति, यतोऽवाप्तसम्यक्त्वस्तत्परित्याग एव कार्मग्रन्थिकमतेनोत्कृष्टस्थितीः कर्मप्रकृतीर्बध्नाति; सैद्धान्तिकाभिप्रायतस्तु भिन्नग्रन्थेः पुनरप्युत्कृष्टस्थितिबन्ध एव न भवति; आयुषस्तूत्कृष्टस्थितौ वर्तमानः सम्यक्त्व-श्रुतसामायिकद्वयस्यानुत्तरसुर उत्पादकाले पूर्वप्रतिपन्नो भवति, न तु प्रतिपद्यमानकः । तुशब्दादायुर्वर्जशेषसप्तकर्मप्रकृतीनां जघन्यस्थितावपि वर्तमानः सूक्ष्मसंपरायादिः सम्यक्त्व-श्रुत-सर्वविरतिसामायिकत्रयस्य पूर्वप्रतिपन्नत्वाद् न लभते न किञ्चित् प्रतिपद्यते । आयुषस्तु जघन्यस्थितौ वर्तमानो न पूर्वप्रतिपन्नः, नापि प्रतिपद्यमानकः, आयुर्जघन्यस्थितेः क्षुल्लकभवग्रहणरूपत्वात्, तद्वतां च जीवानां सम्यक्त्वाद्युभयाभावात्, सास्वादनस्यापि तेष्वनुत्पादात् ॥ इति निर्युक्तिगाथार्थः ॥११८६॥

'अष्टानां कर्मप्रकृतीनामुत्कृष्टस्थितौ' इत्युक्तम्; तत्रोत्कृष्टे-तरभेदभिन्नां तत्स्थितिमेव भाष्यकृदाह—

[4]वीस सयरोवमाणं कोडाकोडीउ नाम-गोयाणं । सयरी मोहस्स ठिई सेसाणं तीसमुक्कोसा ॥११८७॥

---

१ घ. छ.'अथ प्र' । २ निर्युक्तिसमुत्थानप्रसङ्गतो ज्ञानतरुसमारोहः । व्रजति च वक्ष्यमाणा समकं जिनप्रवचनोत्पत्तिः ॥ ११८५ ॥
३ अष्टानां प्रकृतीनामुत्कृष्टस्थितौ प्रवर्तमानस्तु । जीवो न लभते सामायिकं चतुर्णामप्येकतरम् ॥ ११८६ ॥
४ विंशतिः सागरोपमाणां कोटाकोट्यो नाम-गोत्रयोः । सप्ततिर्मोहस्य स्थितिः शेषाणां त्रिंशदुत्कृष्टा ॥ ११८७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]आउस सागराइं तेत्तीसं, अवरओ मुहुत्तंतो । अट्ठ य नामा-गोए वेअणीए बारस मुहुत्ता ॥११८८॥

नाम-गोत्रयोर्विंशतिः सागरोपमकोटाकोट्य उत्कृष्टा स्थितिः, मोहनीयस्य तु सप्ततिः, शेषाणां तु ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां त्रिंशत्, आयुषस्तु त्रयस्त्रिंशत् सागरोपमाण्युत्कृष्टा स्थितिः । अवरतो जघन्यतः पुनर्मुहूर्तान्तः– ज्ञानावरण-दर्शनावरण-ऽऽयु-मोहनीया-ऽन्तरायलक्षणानां पञ्चानां कर्मप्रकृतीनामन्तर्मुहूर्तं जघन्या स्थितिरित्यर्थः; नाम-गोत्रयोरष्टौ मुहूर्ताः, वेदनीयस्य तु द्वादश मुहूर्ता जघन्या स्थितिः ।

तत्र मोहनीयस्य जघन्यस्थितिबन्धकोऽनिवृत्तिबादरः, आयुषस्तु मिथ्यादृष्टयस्तिर्यग्-मनुष्याः, ज्ञानावरण-दर्शनावरण-वेदनीय-नाम-गोत्रा-ऽन्तरायाणां तु सूक्ष्मसंपरायो जघन्यस्थितिबन्धकः । कषायप्रत्यया चेह जघन्या स्थितिर्विवक्षिता, योगप्रत्यया तूपशान्तमोहादीनां वेदनीयस्य सामयिक्यप्येषा स्यादिति । आह– किमेताः कर्मप्रकृतयो युगपदेवोत्कृष्टस्थितयो भवन्ति, आहोस्विदेकस्या उत्कृष्टस्थितौ जातायां पश्चादन्या उत्कृष्टस्थितयो भवन्ति, अन्यथा वा कथञ्चित् ? । अत्रोच्यते– वैचित्र्यमत्र ॥ ११८७ ॥ ११८८ ॥

किं पुनस्तत् ?, इत्याह—

[2]मोहस्सुक्कोसाए ठिईए सेसाण छण्हमुक्कोसा । आउस्सुक्कोसा वा मज्झिमिया वा न उ जहण्णा ॥ ११८९ ॥

मोहविवज्जुक्कोसयठिईए मोहस्स सेसियाणं च । उक्कोस मज्झिमा वा कासइ व जहण्णिया होज्जा ॥११९०॥

मोहनीयस्योत्कृष्टायां स्थितौ बध्यमानायां शेषाणां ज्ञानावरण-दर्शनावरण-वेदनीय-नाम-गोत्रा-ऽन्तरायलक्षणानां षण्णां कर्मणामुत्कृष्टैव स्थितिर्भवति । उत्कृष्टसंक्लेशे हि मोहनीयस्योत्कृष्टा स्थितिर्बध्यते । तत्र वर्तमानो जन्तुर्ज्ञानावरणादीनामप्युत्कृष्टां स्थितिं बध्नातीति सुमतीतमेव । आयुषस्तु यदोत्कृष्टस्थितिकेन मोहनीयेन सहोत्कृष्टं नारकायुरपि बद्ध्वा सप्तमपृथिव्यामुत्पद्यते, तदा नारकायुराश्रित्योत्कृष्टा त्रयस्त्रिंशत्सागरोपमलक्षणा स्थितिर्लभ्यते । यदा तु षष्ठपृथिव्यादिषूत्पद्यते, तदा तस्यैव मध्यमा स्थितिर्लभ्यते, न तु जघन्या । एतावत्संक्लेशवतो नरक एवोत्पादात्, तत्र च क्षुल्लकभवग्रहणलक्षणाया आयुर्जघन्यस्थितेरसंभवात् । यदाऽप्युत्कृष्टसंक्लेशौ नारक-देवावुत्कृष्टस्थितिकं मोहनीयं बद्ध्वा तिर्यक्षूत्पद्येते, तदाप्यायुषो जघन्यस्थितिर्न संभवति, क्षुल्लकभवग्रहणलक्षणतज्जघन्यस्थितिषु जीवेषु नारक-देवानामनुत्पादादिति ।

'मोहविवज्जुक्कोसयेत्यादि' यदा तु मोहनीयं वर्जयित्वा शेषस्य ज्ञानावरणाद्यन्यतरस्य कर्मण उत्कृष्टा स्थितिर्बध्यते, तदा मोहनीयस्य, तथा, विवक्षितोत्कृष्टस्थितिकज्ञानावरणादिकर्मणः सकाशादन्यकर्मप्रकृतीनां चोत्कृष्टा वा, मध्यमा वा स्थितिर्लभ्यते, न तु जघन्या; तथाहि– यदा सर्वोत्कृष्टसंक्लेशे वर्तमान उत्कृष्टस्थितिकं ज्ञानावरणीयादिकं कर्म बध्नाति, तदा शेषाणां मोहादिकर्मणामुत्कृष्टा स्थितिर्भवतीत्यवगम्यत एव । यदा तु स्वप्रायोग्योत्कृष्टसंक्लेश उत्कृष्टस्थितीनि ज्ञानावरणादिकर्माणि बध्यन्ते, तदाऽसौ ज्ञानावरणादिकर्मोत्कृष्टस्थितिप्रायोग्यः संक्लेशो मोहनीयकर्मोत्कृष्टस्थितिनिबन्धनसंक्लेशापेक्षया मध्यम एव भवति; अतस्तत्र वर्तमानो मोहनीयं मध्यमस्थितिकं बध्नाति, इत्येदपि सुबोधमेव । दर्शनावरण-वेदनीयादिकर्मोत्कृष्टस्थितिनिबन्धनसंक्लेशापेक्षया त्वसावुत्कृष्टो वा स्यात्, मध्यमो वा; तत्रोत्कृष्टे तस्मिन् दर्शनावरणीयादिकर्माणि तीव्ररसान्युत्कृष्टस्थितीनि बध्यन्ते, मध्यमे तु तस्मिन् मध्यमस्थितीनि तानि बध्यन्ते, इत्येतदपि घटमानकं लक्ष्यते । जघन्या तु तत्स्थितिर्न संभवति । मोहनीय-दर्शनावरणीयादिकर्मणां हि जघन्याऽन्तर्मुहूर्तादिका स्थितिरुक्ता, तां चाऽनिवृत्तिबादर-सूक्ष्मसंपरायावेव बध्नीतः, तौ च ज्ञानावरणादिकर्मोत्कृष्टस्थितिं कदाचिदपि न निर्वर्तयतः, किन्तु मिथ्यादृष्टिरेव; इति न ज्ञानावरणाद्युत्कृष्टस्थितौ मोहनीय-दर्शनावरणादिजघन्यस्थितिसंभवः । किं सर्वथा न ?, इत्याह– 'कासइ व जहण्णिया होज्ज त्ति' कस्याऽप्यायुर्लक्षणस्य कर्मणो जघन्या स्थितिः स्यात्, यथोत्कृष्टस्थितिकं ज्ञानावरणादि कर्म बध्नतस्तिरश्चो मनुष्यस्य वा जघन्यक्षुल्लकभवग्रहणाऽऽयुर्बन्धः । इत्येवं तावद् यथावगतं तथा व्याख्यातमिदं गाथाद्वयम्, परमार्थं त्विह केवलिनः, बहुश्रुता वा विदन्तीति ॥ ११८९ ॥ ११९० ॥

एवं च सति किम् ?, इत्याह—

[3]सम्म-सुय-देस-सव्वव्वयाण सामाइयाणमेक्कं पि । उक्कोसठिई न लभइ भयाउए पुव्वलद्धाइं ॥११९१॥

सव्वजहण्णठिईउ वि न लभए जेण पुव्वपडिवन्नो । आउयजहण्णठिईओ न पवज्जंतो न पडिवन्नो॥११९२॥

सम्यक्त्व-श्रुत-देशव्रत-सर्वव्रतलक्षणानां चतुर्णां सामायिकानामेकमप्युत्कृष्टकर्मस्थितिको जन्तुर्न लभते, पूर्वलब्धानि तूत्कृष्टस्थि-

१ आयुषः सागरास्त्रयस्त्रिंशत्, अवरतो मुहूर्तान्तः । अष्ट च नाम-गोत्रयोर्वेदनीये द्वादश मुहूर्ताः ॥ ११८८ ॥ २ क. ग. 'या तेषूप' ।
३ मोहस्योत्कृष्टायां स्थितौ शेषाणां षण्णामुत्कृष्टा । आयुष उत्कृष्टा वा मध्यमा वा न तु जघन्या ॥ ११८९ ॥
मोहविवर्जोत्कृष्टस्थितौ मोहस्य शेषाणां च । उत्कृष्टा मध्यमा वा कस्यचिद् वा जघन्या भवेत् ॥ ११९० ॥ ४ क. ग. 'रणीयादी' ।

१ क. ग. 'रणादि' । २ सम्यक्-श्रुत-देश-सर्वव्रतानां सामायिकानामेकमपि । उत्कृष्टस्थितिर्न लभते भजाऽऽयुषि पूर्वलब्धानि ॥ ११९१ ॥
सर्वजघन्यस्थितिकोऽपि न लभते येन पूर्वप्रतिपन्नः । आयुर्जघन्यस्थितिको न प्रपद्यमानो न प्रतिपन्नः ॥ ११९२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिक एकस्मिन्नायुषि भज विकल्पयैतानि– कस्यचित् किञ्चिद् भवति, कस्यचिद् नेति । तत्र चानुत्तरसुरस्य सम्यक्त्व-श्रुतसामायिके पूर्वप्रतिपन्ने भवतः, न शेषमित्युक्तमेवेति । ज्ञानावरणादिसर्वजघन्यस्थितिकोऽपि सूक्ष्मसंपरायादिर्न लभते– नैतानि प्रतिपद्यते, येन यस्मात् सम्यक्त्व-श्रुत-सर्वविरतिसामायिकानां पूर्वप्रतिपन्नोऽसौ वर्तते, तस्मात् पुनरपि न लभते, लब्धस्य पुनर्लाभासंभवादिति । आयुषस्तु क्षुल्लकभवग्रहणजघन्यस्थितिको न पूर्वप्रतिपन्नः, नापि प्रतिपद्यमानकः, इति प्राक् सर्वं भावितमेव ॥ इति गाथाषट्कार्थः ॥ ११९१ ॥ ११९२ ॥

अथ सम्यक्त्वादीनां लाभकारणमाह—

[1]सत्तण्हं पयडीणं अब्भिंतरओ उ कोडकोडीए । काऊण सागराणं जइ लहइ चइण्हमन्नयरं ॥ ११९३ ॥

सप्तानामायुर्वर्जानां कर्मप्रकृतीनां स्थितिमङ्गीकृत्य याऽन्त्या सागरोपमाणां कोटाकोटी तस्या अभ्यन्तरत एव कृत्वा 'आत्मानम्' इति गम्यते, यदि लभते– चतुर्णामन्यतरत् सामायिकं लभते, तदेत्थं लभते नाऽन्यथेत्यर्थः ॥ इति गाथार्थः ॥ ११९३ ॥

भाष्यम्—

[2]अंतिमकोडाकोडीए सव्वकम्माणमाउवज्जाणं । पलियासंखिज्जइमे भागे खीणे भवइ गंठी ॥ ११९४ ॥

यदा किल क्षप्यमाणानामायुर्वर्जसप्तकर्मणां स्थितेरन्त्या सागरोपमकोटाकोटी अवतिष्ठते, तदा तस्मध्यादपि पल्योपमासंख्येयभागे क्षपिते ग्रन्थिराविर्भवति ॥ ११९४ ॥

ग्रन्थिः किमुच्यते ?, इत्याह—

[3]गंठि त्ति सुदुब्भेओ कक्खडघणरूढगूढगंठि व्व । जीवस्स कम्मजाणिओ घणराग-दोसपरिणामो ॥११९५॥

ग्रन्थिरिति भण्यते । कः ?, इत्याह– घनोऽतिनिबिडो राग-द्वेषोदयपरिणामः । कस्य ? । जीवस्य । कथंभूतः ? । कर्मजनितः– कर्मविशेषप्रत्ययः । अयं च दुर्भेदो दुर्भेदो दुःक्षेपणीयो भवति । क इव ? । वल्कादेर्दारुविशेषस्य संबन्धी कर्कशघनरूढगूढग्रन्थिरिव ।

---

१ सप्तानां प्रकृतीनामभ्यन्तरस्तु कोटाकोट्याः । कृत्वा सागराणां यदि लभते चतुर्णामन्यतरत् ॥ ११९३ ॥ २ ध. छ. 'कं त' ।

३ अन्तिमकोटाकोट्यां सर्वकर्मणामायुर्वर्जानाम् । पल्यासंख्येये भागे क्षीणे भवति ग्रन्थिः ॥ ११९४ ॥ ४ क. ग. 'समस्तक' ।

५ ग्रन्थिरिति सुदुर्भेदः कर्कशघनरूढगूढग्रन्थिरिव । जीवस्य कर्मजनितो घनराग-द्वेषपरिणामः ॥ ११९५ ॥ द्वै-।

कर्कशोऽतिपरुषः । घनः सर्वतो निबिडः । स चार्द्रोऽपि स्यादित्याह– रूढः शुष्कः । गूढः कथमप्युद्वेष्टयितुमशक्योऽतिप्रचयमापन्नः । यथैवंभूतो द्रव्यग्रन्थिर्दुर्भेदो भवति, एवं राग-द्वेषोदयपरिणामोऽप्यसौ दुर्भेदो भवति । अतो ग्रन्थिरिव ग्रन्थिरुपदिश्यत इति ॥११९५॥

ततः किम् ?, इत्याह—

[1]भिन्नम्मि तम्मि लाभो सम्मत्ताईण मोक्खहेऊणं । सो य दुलभो परिस्सम-चित्तविघायाइविग्घेहिं ॥११९६॥

तस्मिन् ग्रन्थौ भिन्ने क्षपयित्वा समतिक्रान्ते मोक्षहेतुभूतानां सम्यक्त्वादीनां लाभो भवति । स च ग्रन्थिभेदो मनोविघात-परिश्रमादिविघ्नैरतिदुर्लभोऽतिशयेन दुष्करः । तस्य हि जीवस्य ग्रन्थिभेदं चिकीर्षोर्विद्यासाधकस्येव बिभीषिकादिभ्यो मनोविघातो मनःक्षोभो भवति; प्रचुरदुर्जयकर्मशत्रुसंघातजयाच्च महासमरगतसुभटस्येव परिश्रमश्चातिशयेन संजायत इति ॥ ११९६ ॥

एतदेवाह—

[2]सो तत्थ परिस्सम्मइ घोरमहासमरनिग्गयाइ व्व । विज्जा य सिद्धिकाले जह बहुविग्घा तहा सो वि॥११९७॥

स जीवस्तत्र ग्रन्थिभेदे प्रवृत्तो घोरमहासमरशिरसि दुर्जयापाकृतानेकशत्रुगणः सुभट इव, आदिशब्दाद् महासमुद्रादितारकवत्, परिश्राम्यति । यथा च सिद्धिकाले विद्या बहुविघ्ना संपद्यते– साधकस्योपसर्गैर्मनःक्षोभं जनयति, तथा सोऽपि ग्रन्थिभेद इति ॥११९७॥

अथ प्रेरकः प्राह—

[3]कम्मट्ठिई सुदीहा खविया जइ निग्गुणेण, सेसं पि । स खवेउ निग्गुणो च्चिय किं पुणो दंसणाईहिं॥११९८॥

यदि ग्रन्थिभेदात् पूर्वं सम्यक्त्वादिगुणविकलेनैवाऽनेन जन्तुना सुदीर्घा द्राघीयसी कर्मस्थितिः क्षपिता, तर्हि शेषमपि कर्माऽसौ सम्यक्त्वादिगुणशून्य एव क्षपयतु, ततो मोक्षमप्येवमेवाऽऽसादयतु, किं पुनः सम्यग्दर्शनादिगुणैस्तद्धेतुभिर्विकल्पितैः ? इति ॥११९८॥

अत्रोत्तरमाह—

---

१ भिन्ने तस्मिँल्लाभः सम्यक्त्वादीनां मोक्षहेतूनाम् । स च दुर्लभः परिश्रम-चित्तविघातादिविघ्नैः ॥ ११९६ ॥ ★ किं च-।

२ स तत्र परिश्राम्यति घोरमहासमरनिर्गतादिरिव । विद्या च सिद्धिकाले यथा बहुविघ्ना तथा सोऽपि ॥ ११९७ ॥

३ कर्मस्थितिः सुदीर्घा क्षपिता यदि निर्गुणेन, शेषमपि । स क्षपयतु निर्गुण एव किं पुनर्दर्शनादिभिः ? ॥ ११९८ ॥ ४ क. ग. 'भिः क' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पाएण[1] पुव्वसेवा परिमउई साहणम्मि गुरुतरिया । होइ महाविज्जाए किरिया पायं सविग्घा य ॥११९९॥
तह कम्मट्ठिइखवणे परिमउई मोक्खसाहणे गुरुई । इह दंसणाइकिरिया दुलहा पायं सविग्घा य ॥१२००॥

महाविद्यासाधनवदेतद् द्रष्टव्यम्– यथा महाविद्यायाः सिसाधयिषितायाः प्रायः पूर्वसेवा नातिगुर्वी, किन्तु परिमृद्वी भवति; तत्साधनकाले तु या क्रिया सा गुरुतराऽतिगरीयसी भवति, सविघ्ना च प्रायः संजायते; तथा ग्रन्थिभेदात् पूर्वं कर्मस्थितिक्षपणे या यथाप्रवृत्तकरणक्रिया सा नातिगुर्वी, किन्तु परिमृद्वी; या पुनर्ग्रन्थिभेदादारभ्य मोक्षसाधने सम्यग्दर्शनज्ञानसहितचारित्रक्रिया, सातीव गुर्वी, दुष्प्रापा, सविघ्ना च भवति । न चैतां सम्यग्दर्शन-ज्ञानान्वितचारित्रक्रियामन्तरेण कस्यापि कदाचिदपि मोक्षो भवति । इति कथमुच्यते– 'सम्यक्त्वादिगुणविकलोऽपि सर्वं कर्म क्षपयित्वा मोक्षमासादयतु जीवः' इति ? ॥ ११९९ ॥ १२०० ॥

प्रतिविधानान्तरमाह—

अहव[3] जओ च्चिय सुबहुं खवियं तो निग्गुणो न सेसं पि । स खवेइ जओ लभए सम्मत्त-सुयाइगुणलाभं ॥१२०१॥

अथवा, यत एव गुणवैकल्यावस्थायां सुबहुतरं कर्म क्षपितम्, अत एव शेषमपि कर्म निर्गुणः सन् न क्षपयति । कुतः ?, इत्याह– यतः क्षपितबहुकर्मत्वादपचितबहुदोषो ग्रन्थिभेदादूर्ध्वं सम्यक्त्वादिगुणलाभं लभते, इति कथं तदा निर्गुणः स्यात् ? । अयमभिप्रायः– न हि केनाप्यध्याहृत्यापेक्षिताः सम्यक्त्वादिगुणा भवन्ति, येन भवता प्रोच्यते– 'किं सम्यक्त्वादिगुणैर्मोक्षहेतुतया कल्पितैः?' इति । क्षपितबहुक्लिष्टकर्मणामनपेक्षिता अपि स्वयमेव प्रादुर्भवन्ति गुणाः, इति कथं निर्गुण एव शेषमपि क्षपयतु ? इति ॥ १२०१ ॥

ग्रन्थिभेदं च जीवो यथाप्रवृत्तादिकरणक्रमेण विदधाति; तत्र कानि, कियन्ति, कस्य चैतानि करणानि भवन्ति ?, इत्याह—

करणं[4] अहापवत्तं अपुव्वमनियट्टियमेव भव्वाणं । इयरेसिं पढमं चिय भन्नइ करणं ति परिणामो ॥१२०२॥

इह भव्यानां त्रीणि करणानि भवन्ति, तद्यथा– यथाप्रवृत्तकरणम्, अपूर्वकरणम्, अनिवर्तिकरणं चेति । तत्र येनाऽनादिसं-

---

१ प्रायेण पूर्वसेवा परिमृद्वी साधने गुरुतरा । भवति महाविद्यायां क्रिया प्रायः सविघ्ना च ॥ ११९९ ॥
तथा कर्मस्थितिक्षपणे परिमृद्वी मोक्षसाधने गुर्वी । इह दर्शनादिक्रिया दुर्लभा प्रायः सविघ्ना च ॥ १२०० ॥ २ क. ग. 'प्राप्या स' ।
३ अथवा यत एव सुबहु क्षपितं ततो निर्गुणो न शेषमपि । स क्षपयति यतो लभते सम्यक्त्व-श्रुतादिगुणलाभम् ॥ १२०१ ॥
४ करणं यथाप्रवृत्तमपूर्वमनिवर्तिकमेव भव्यानाम् । इतरेषां प्रथममेव भण्यते करणमिति परिणामः ॥ १२०२ ॥

सिद्धप्रकारेण प्रवृत्तं यथाप्रवृत्तं, क्रियते कर्मक्षपणमनेनेति करणं सर्वत्र जीवपरिणाम एवोच्यते, यथाप्रवृत्तं च तत्करणं च यथाप्रवृत्तकरणम्, एवमुत्तरत्रापि करणशब्देन कर्मधारयः; अनादिकालात् कर्मक्षपणप्रवृत्तोऽध्यवसायविशेषो यथाप्रवृत्तकरणमित्यर्थः । अप्राप्तपूर्वमपूर्वम्, स्थितिघात-रसघाताद्यपूर्वार्थनिर्वर्तकं वाऽपूर्वम् । निवर्तनशीलं निवर्ति, न निवर्ति– अनिवर्ति– आ सम्यग्दर्शनलाभाद् न निवर्तत इत्यर्थः । एतानि त्रीण्यपि यथोत्तरं विशुद्ध-विशुद्धतर-विशुद्धतमाध्यवसायरूपाणि भव्यानां करणानि भवन्ति । इतरेषां त्वभव्यानां प्रथममेव यथाप्रवृत्तकरणं भवति, नेतरे द्वे इति ॥ १२०२ ॥

एतेषां करणानां मध्ये कस्यामवस्थायां किं भवति ?, इत्याह—

जा[1] गंठी ता पढमं गंठि समइच्छओ अपुव्वं तु । अनियट्टीकरणं पुण सम्मत्तपुरक्खडे जीवे ॥१२०३॥

अनादिकालादारभ्य यावद् ग्रन्थिस्थानं तावत् प्रथमं यथाप्रवृत्तकरणं भवति, कर्मक्षपणनिबन्धनस्याऽध्यवसायमात्रस्य सर्वदैव भावात्, अष्टानां कर्मप्रकृतीनामुदयप्राप्तानां सर्वदैव क्षपणादिति । ग्रन्थिं तु समतिक्रामतो भिन्दानस्याऽपूर्वकरणं भवति, प्राक्तनाद् विशुद्धतराध्यवसायरूपेण तेनैव ग्रन्थेर्भेदादिति । अनिवर्तिकरणं पुनः सम्यक्त्वं पुरस्कृतमभिमुखं यस्याऽसौ समक्त्वपुरस्कृतोऽभिमुखसम्यक्त्व इत्यर्थः, तत्रैवंभूते जीवे भवति । तत एव विशुद्धतमाध्यवसायरूपादनन्तरं सम्यक्त्वलाभात् ॥ इति गाथादशकार्थः ॥१२०३॥

अथेदमेव करणत्रयमाश्रित्य सामायिकलाभदृष्टान्तानाह—

पल्लग[2]-गिरिसरिउवल-पिवीलिया-पुरिस-पह-जरग्गहिया । कोद्दव-जल-वत्थाणि य सामाइयलाभदिट्ठंता ॥१२०४॥

पल्लको धान्याधारभूत इहैव प्रतीतः, गिरिसरिदुपलः पर्वतनदीपाषाणः, पिपीलिकाः कीटिकाः, पुरुषाः प्रतीताः, पन्थानो मार्गाः, ज्वरगृहीताः समुत्पन्नज्वररोगाः, कोद्रवाः, जलानि, वस्त्राणि । एतेषां पल्लकादीनां संबन्धिनो नव सामायिकलाभदृष्टान्ता वक्तव्याः ॥ इति निर्युक्तिगाथार्थः ॥ १२०४ ॥

अथ पल्लकदृष्टान्तमधिकृत्याह–

जो[4] पल्लेऽतिमहल्ले धण्णं पक्खिवइ थोवथोवयरं । सोहेइ बहुबहुतरं झिज्जइ थोवेण कालेण ॥ १२०५ ॥

---

१ यावद् ग्रन्थिस्तावत् प्रथमं ग्रन्थिं समतिगच्छतोऽपूर्वं तु । अनिवर्तिकरणं पुनः पुरस्कृतसम्यक्त्वे जीवे ॥ १२०३ ॥
२ पल्लक-गिरिसरिदुपल-पिपीलिका-पुरुष-पथ-ज्वरगृहीताः । कोद्रव-जल-वस्त्राणि च सामायिकलाभदृष्टान्ताः ॥ १२०४ ॥ ३ क. ग. 'संपन्न' ।
४ यः पल्येऽतिमहति धान्यं प्रक्षिपति स्तोकस्तोकतरम् । शोधयति बहुबहुतरं क्षीयते स्तोकेन कालेन ॥ १२०५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

[1]तह कम्मधन्नपल्ले जीवोऽणाभोगओ बहुतरागं। सोहंतो थोवतरं गिण्हंतो पावए गंठिं ॥ १२०६ ॥

यथा कश्चित् कुटुम्बिकोऽतिमहति धान्यभृतपल्ये कदाचित् कथमपि स्तोकस्तोकतरमन्यद् धान्यं प्रक्षिपति, बहुतरं तु शोधयति– गृहव्ययार्थं ततस्तत् समाकर्षति। एवं च सति क्रमशो गच्छता कालेन तस्य धान्यं क्षीयते। प्रस्तुते योजयति– 'तहेत्यादि' तथा तेनैव प्रकारेण कर्मैव धान्यभृतपल्यः कर्मधान्यपल्यः, तत्र कर्मधान्यपल्ये, चिरसंचितप्रचुरकर्मणीत्यर्थः, कुटुम्बिकस्थानीयो जीवः कदाचित् कथमप्येवमेवाऽनाभोगतो बहुतरं चिरबद्धं कर्म शोधयन् क्षपयन्, स्तोकतरं तु नूतनं गृह्णानो बध्नन् ग्रन्थिं यावत् प्राप्नोति– देशोनकोटीकोटिशेषाण्यायुर्वर्जसप्तकर्माणि धृत्वा शेषं तत् कर्म क्षपयतीत्यर्थः। एष यथाप्रवृत्तकरणस्य व्यापार इति ॥ १२०६ ॥

अत्र कश्चिदाह– नन्वागमविरुद्धमिदम्, यतो ग्रन्थिभेदादर्वागसंयतोऽविरतोऽनादिमिथ्यादृष्टिरयम्। अस्य चैवंभूतस्य जन्तोर्बहुतरस्य कर्मणः क्षेपणम्, स्तोकस्य च बन्धोऽन्यत्रागमे निषिद्ध एव, यदाह—

"पल्ले महइमहल्ले कुंभं पक्खिवइ सोहए नालिं। असंजए अविरए बहु बंधए निज्जरे थोवं ॥ १ ॥
पल्ले महइमहल्ले कुंभं सोहए पक्खिवे नालिं। जे संजए पमत्ते बहु निज्जरे बंधए थोवं ॥ २ ॥
पल्ले महइमहल्ले कुंभं सोहेइ पक्खिवे न किंचि। जे संजए अपमत्ते बहु निज्जरे बंधए न किंचि ॥ ३ ॥"

तदेवमिह गाथात्रय आद्यगाथायामसंयता-ऽविरत-मिथ्यादृष्टेः प्रतिसमये बन्धस्य बहुत्वम्, निर्जरायास्त्वल्पत्वमुक्तम्; भवद्भिस्त्वेतद्विपरीतमिह प्रतिपाद्यते, इति कथं न विरोधः ?।

अत्रोच्यते– प्रायोवृत्तिरेषा यत्– असंयतस्य बहुतरकर्मण उपचयः, अल्पतरस्य चापाय इति। यदि पुनरित्थमेव सर्वदैव स्यात्, तदोपचितबहुकर्मणां जीवानां कदापि कस्यापि सम्यक्त्वादिलाभो न स्यात्, न चैतदस्ति, सम्यग्दृष्ट्यादीनां प्रत्यक्षत एवोपलम्भात्। किञ्च, यदि सर्वदैव बहुतरस्य कर्मण उपचयः, तदा कालक्रमेण सर्वस्यापि पुद्गलराशेः कर्मतयैव ग्रहणप्रसङ्गः स्यात्, न चैतदप्यस्ति, स्तम्भ-कुम्भा-ऽभ्र-भू-भवन-तनु-तरु-गिरि-सरित्-समुद्रादिभावेनापि परिणतानां तेषां सदैव दर्शनात्। तस्मादिह त्रयो

१ तथा कर्मधान्यपल्ये जीवोऽनाभोगतो बहुतरम्। शोधयन् स्तोकतरं गृह्णानः प्राप्नोति ग्रन्थिम् ॥ १२०६ ॥ + चापचय-ई

२ पल्ये महातिमहति कुम्भे प्रक्षिपति शोधयति नाडीम्। असंयतोऽविरतो बहु बध्नाति निर्जृणाति स्तोकम् ॥ १ ॥
पल्ये महातिमहति कुम्भं शोधयति प्रक्षिपति नाडीम्। यः संयतः प्रमत्तो बहु निर्जृणाति बध्नाति स्तोकम् ॥ २ ॥
पल्ये महातिमहति कुम्भे शोधयति प्रक्षिपति न किञ्चित्। यः संयतोऽप्रमत्तो बहु निर्जृणाति बध्नाति न किञ्चित् ॥ ३ ॥*

भङ्गा द्रष्टव्याः, तद्यथा– कस्यचिद् बन्धहेतूनां प्रकर्षात्, पूर्वोपचितकर्मक्षपणहेतूनामपकर्षाच्चोपचयप्रकर्षः, कस्यचित्तु बन्धहेतूनां क्षपणहेतूनां च साम्यादुपचया-ऽपचयसाम्यम्, कस्यचित् पुनर्बन्धहेतूनामपकर्षात् क्षपणहेतूनां च प्रकर्षादपचयप्रकर्षः। तदिह तृतीयभङ्गे यदाऽसौ मिथ्यादृष्टिरपि वर्तते तदा ग्रन्थिदेशं प्राप्नोति। इत्युक्तः पल्यदृष्टान्तः ॥ १२०५ ॥ १२०६ ॥

कथं पुनरनाभोगत एवैतावतः कर्मणोऽपचयः ?, इत्याशङ्क्य द्वितीयं गिरिसरिदुपलदृष्टान्तमाह—

[1]गिरिनइ-वत्तणिपत्थरघडणोवम्मेण पढमकरणेणं। जा गंठी कम्मट्ठितिक्खवणमणाभोगओ तस्स॥१२०७॥

गिरिनदीपाषाणानां, तथा, वर्तनी मार्गस्तत्पतितपाषाणानां च लघूपलशकलानां या घटना परस्परादिघर्षणा तदौपम्येन ग्रन्थिं यावत् कर्मस्थितिक्षपणमनाभोगत एव तस्य जीवस्य प्रथमेन यथाप्रवृत्तकरणेन भवति। अयमभिप्रायः– यथा गिरिनदीपाषाणाः मार्गपतितपाषाणाश्चानाभोगतोऽपि– 'वयमीदृशा भवामः' इत्यध्यवसायमन्तरेणापि, परस्परतो लोकचरणादिना वा घृष्यमाणा घञ्जनघोलनान्यायेन केनापि वृत्त-त्र्यस्र-चतुरस्र-ह्रस्व-दीर्घाद्यनेकाकारा भवन्ति; एवमिहापि कथमप्येवमेवाऽनाभोगतो यथाप्रवृत्तकरणेन जीवाः कर्म क्षपयित्वा ग्रन्थिदेशमाप्नुवन्ति ॥ १२०७ ॥

पिपीलिकोदाहरणमधिकृत्याह—

[2]खितिसाभावियगमणं थाणूसरणं तओ समुप्पयणं। ठाणं थाणुसिरे वा ओरुहणं वा मुइंगाणं ॥१२०८॥
खिइगमणं पिव पढमं थाणूसरणं व करणमपुव्वं। उप्पयणं पिव तत्तो जीवाणं करणमनियट्टिं ॥१२०९॥
थाणु व्व गंठिदेसे गंठियसत्तस्स तत्थवत्थाणं। ओयरणं पिव तत्तो पुणो वि कम्मट्ठिइविवुड्ढी ॥१२१०॥

'मुइंगाणं ति' कीटिकानामत्र पञ्चाऽर्थाः किल विवक्षिताः; तद्यथा– क्षितौ तावत् स्वाभाविकमविशिष्टमितश्चेतश्च गमनं पर्यटनम्;

१ गिरिनदी-वर्तनीपाषाणघटनौपम्येन प्रथमकरणेन। यावद् ग्रन्थिं कर्मस्थितिक्षपणमनाभोगतस्तस्य ॥ १२०७ ॥ × ठाणु-। + प्पुव्वं-।

२ क्षितिस्वाभाविकगमनं स्थाणूत्सरणं ततः समुत्पतनम्। स्थानं स्थाणुशिरसि वाऽवरोहणं वा कीटिकानाम् ॥ १२०८ ॥
क्षितिगमनमिव प्रथमं स्थाणूत्सरणमिव करणमपूर्वम्। उत्पतनमिव ततो जीवानां करणमनिवर्ति ॥ १२०९ ॥
स्थाणाविव ग्रन्थिदेशे ग्रन्थिकसत्त्वस्य तत्रावस्थानम्। अवसर्पणमिव ततः पुनरपि कर्मस्थितिविवृद्धिः ॥ १२१० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

तथा, क्वापि स्थाणौ कीलके उत्सरणमारोहणम्, संजातपक्षाणां च तासां ततः स्थाणोः समुत्पतनम्; कासांचित् तु 'ठाणं थोणुसिरे व त्ति' स्थाणुबुध्नेऽवस्थानं वेत्यर्थः; कासांचित् तु स्थाणुशिरसः स्थाणुबुध्नादवरोहणं वा व्यावर्तनमिति। तत्र कीटिकानां क्षितिगमनसदृशं स्वाभाविकं सदा प्रवृत्तं प्रथमं यथाप्रवृत्तकरणम्। स्थाण्वारोहणसदृशं त्वपूर्वत्वादपूर्वकरणम्। ततः कीलकादुत्पतनमिव जीवानामनिवर्तिकरणम्, अनिवर्तिकरणबलेन मिथ्यात्वादुत्प्लुत्य सम्यग्दृष्टिगुणस्थानकगमनात्। तथा, स्थाणाविव स्थाणुवत् स्थाणुबुध्न इत्यर्थः, यथा स्थाणुबुध्ने कीटिकानामवस्थानं तथा ग्रन्थिना सह वर्तत इति ग्रन्थिकः स चासौ सत्त्वश्च ग्रन्थिकसत्त्वः– अभिन्नग्रन्थिजीवः, तस्य तत्र ग्रन्थिदेशे ग्रन्थिसंनिधानेऽवस्थानम्। यथा च कीटिकानां ततः स्थाणुबुध्नादवसर्पणं व्यावर्तनं तथा जीवस्य पुनरपि कर्मस्थितिविवर्धनमिति ॥ १२०८ ॥ १२०९ ॥ १२१० ॥

पुरुषदृष्टान्तमाश्रित्याह—

[1]जह वा तिन्नि मणूसा जंतडविपहं सहावगमणेणं। वेलाइक्कमभीया तुरंति पत्ता य दो चोरा ॥१२११॥
दट्ठुं मग्गतडत्थे ते एगो मग्गओ पडिनियत्तो। बितिओ गहिओ तइओ समइक्कंतुं पुरं पत्तो ॥१२१२॥
अडवी भवो मणूसा जीवा कम्मट्ठिई[2] पहो दीहो। गंठी य भयट्ठाणं राग-दोसा य दो चोरा ॥१२१३॥
भग्गो ठिइपरिवुड्ढी गहिओ पुण गंठिओ गओ तइओ। सम्मत्तपुरं एवं जोएज्जा तिण्णि करणाणि ॥१२१४॥

यथा वात्र केचित् त्रयः पुंमासोऽटवीमध्येन किञ्चित् पुरं गन्तुं प्रपन्नाः स्वभावगत्या सुदीर्घं पन्थानं यान्ति। ततो वेलातिक्रमभीता यावत् त्वरन्ते तावद् भयस्थाने कस्मिंश्चिद् द्वौ तस्करौ प्राप्तौ। तौ चोत्खातनिशितकरालकरवालव्यग्रहस्तौ[3] मार्गस्योभयतटस्थावतीव भीषणौ दृष्ट्वा, एकः पुरुषो विजृम्भितमनःक्षोभो मार्गतः प्रतीपं पश्चान्मुखो व्यावृत्तः; द्वितीयस्तु ताभ्यां गृहीतः; तृतीयस्तु

---

१ यथा वा त्रयो मनुष्या यान्त्यटवीपथं स्वभावगमनेन। वेलातिक्रमभीतास्त्वरन्ते प्राप्तौ च द्वौ चौरौ ॥ १२११ ॥ × थाणुं-।
दृष्ट्वा मार्गतटस्थौ तावेको मार्गतः प्रतिनिवृत्तः। द्वितीयो गृहीतस्तृतीयः समतिक्रम्य पुरं प्राप्तः ॥ १२१२ ॥
अटवी भवो मनुष्या जीवाः कर्मस्थितिः पथो दीर्घः। ग्रन्थिश्च भयस्थानं राग-द्वेषौ च द्वौ चौरौ ॥ १२१३ ॥ (द्वे-)
भग्नः स्थितिपरिवर्धी गृहीतः पुनर्ग्रन्थिको गतस्तृतीयः। सम्यक्त्वपुरमेवं योजयेत् त्रीणि करणानि ॥ १२१४ ॥

२ क. ग. 'ट्ठिति प'। ३ क. ग. 'करवालकरालव्य'।

तौ तिरस्कृत्य समतिक्रम्य चेष्टपुरं प्राप्तः। एवं प्रस्तुतेऽपि सर्वमिदं गोज्यते. तथाहि- अटवी तावद् भवो द्रष्टव्यः। मनुष्यत्रयरूपास्तु व्यावृत्ताभिन्नग्रन्थिक-ग्रन्थिदेशस्थित-भिन्नग्रन्थिकभेदात् त्रिविधा जीवाः। दीर्घः पन्था द्राघीयसी कर्मस्थितिः, तदतिक्रमणं दीर्घकर्मस्थितिक्षपणम्। भयस्थानं ग्रन्थिदेशः। चौरौ तु राग-द्वेषौ। भग्नः प्रतीपगामी ग्रन्थिदेशमेत्य पुनरप्यशुभपरिणामः कर्मस्थितिवर्धकः। तस्करद्वयगृहीतस्तूदितप्रबलराग-द्वेषो ग्रन्थिकसत्त्वः। इष्टपुरप्राप्तस्तु सम्यग्दर्शनादिषु प्राप्तः। अथ करणत्रयं योज्यते– पुरुषत्रयस्य स्वाभाविकगमनं ग्रन्थिदेशप्रापकं यथाप्रवृत्तिकरणम्, शीघ्रगमनेन तस्करातिक्रमणमपूर्वकरणम्, इष्टसम्यक्त्वादिपुरप्रापकमनिवर्तिकरणमिति ॥ १२११ ॥ १२१२ ॥ १२१३ ॥ १२१४ ॥

आह– ननु ग्रन्थिभेदं कृत्वा सम्यक्त्वादिरूपं निर्वाणपथं जीवाः किं परोपदेशाल्लभन्ते, स्वयमेव वा, न लभन्ते वोभयथापि ?, इत्याशङ्क्य पथदृष्टान्तमाह—

[1]उवएसओ सयं वा लभइ पहं कोइ न लभए कोइ। गंठिट्ठाणं पत्तो सम्मत्तपहं तहा भव्वो ॥ १२१५ ॥

यथेह कश्चित् पथि परिभ्रष्टोऽटव्यामितश्चेतश्च परिभ्रमन् कथमपि स्वयमेव लभते पन्थानम्, कश्चित् तु परोपदेशात् तं प्राप्नोति, कोऽपि पुनर्न लभते। एवं सर्वथा प्रनष्टसत्पथो जीवः संसाराटव्यां पर्यटन् कोऽपि भव्यो ग्रन्थिस्थानं प्राप्तः स्वयमेव सम्यक्त्वादिसत्पथं लभते, कोऽपि परोपदेशात्, कश्चित्तु दूरभव्यः, अभव्यो वा न लभते– ग्रन्थिदेशप्राप्तोऽपि ह्यसौ व्यावर्तत इति भावः ॥ १२१५ ॥

अथ ज्वरगृहीतदृष्टान्तमाह—

[2]भेसज्जेण सयं वा नस्सइ जरओ न नस्सए कोइ। भव्वस्स गंठिदेसे मिच्छत्तमहाजरो चेवं ॥ १२१६ ॥

यथा ज्वरगृहीतस्य कस्यापि कथमपि ज्वरः स्वयमेवापैति, कस्यचित्तु भेषजोपयोगात्, अपरस्य तु नापगच्छति। एवं मिथ्यात्वमहाज्वरोऽपि कस्यापि ग्रन्थिभेदादिक्रमेण स्वयमेवापगच्छति, कस्यचित्तु गुरुवचनभेषजोपयोगात्, अन्यस्य तु नापैति। तदेवमेतास्तिस्रोऽपि गतयो भव्यस्य भवन्ति, अभव्यस्य त्वेकैव तृतीया गतिरिति ॥ १२१६ ॥

---

१ उपदेशतः स्वयं वा लभते पथं कश्चिद् न लभते कश्चित्। ग्रन्थिस्थानं प्राप्तः सम्यक्त्वपथं तथा भव्यः ॥ १२१५ ॥

२ भैषज्येन स्वयं वा नश्यति ज्वरको न नश्यति कश्चित्। भव्यस्य ग्रन्थिदेशे मिथ्यात्वमहाज्वरश्चैवम् ॥ १२१६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अथ कोद्रवोदाहरणमाह—

[1]नासइ सयं व परिकम्मओ व जह कोद्दवाण मयभावो । नासइ तह मिच्छमओ सयं व परिकम्मणाए वा॥१२१७॥

यथा केषांचित् कोद्रवाणां मदनभावः स्वयमेवापैति, केषांचित्तु गोमयादिपरिकर्मतः, केषांचित् पुनर्नैवापैति; तद्वद् मिथ्यात्व-मदनभावोऽपि कश्चित् स्वयमेवापैति, कश्चित्तु गुरूपदेशपरिकर्मणया, कश्चित् पुनर्नापैति ॥ १२१७ ॥

केन पुनः कारणेन मदनकोद्रवस्थानीयं मिथ्यात्वं शोधयति ?, इत्याह—

[2]अपुव्वेण तिपुंजं मिच्छत्तं कुणइ कोद्दवोवमया । अनियट्टीकरणेण उ सो सम्मद्दंसणं लहइ ॥ १२१८ ॥

इह यथा कस्यचिद् गोमयादिप्रयोगेण शोधयतस्त्रिधा कोद्रवा भवन्ति; तद्यथा– शुद्धाः, अर्धविशुद्धाः, अविशुद्धाश्चेति; तथाऽपूर्व-करणेन मिथ्यात्वं शोधयित्वा जीवाः शुद्धादिभेदेन त्रिभिः पुञ्जैर्व्यवस्थापयन्ति । तत्र सम्यक्त्वावारककर्मरसं क्षपयित्वा विशोधिता ये मिथ्यात्वपुद्गलास्तेषां पुञ्जः सम्यग् जिनवचनरुचेरनावारकत्वादुपचारतः सम्यक्त्वमुच्यते । अर्धशुद्धपुद्गलपुञ्जस्तु सम्यग्मिथ्यात्वम् । अविशुद्धपुद्गलपुञ्जः पुनर्मिथ्यात्वमिति । तदेवं पुञ्जत्रये सत्यप्यनिवर्तिकरणविशेषात् सम्यक्त्वपुञ्जमेव गच्छति जीवः, नेतरौ द्वौ । यद्यपि प्रतिपतितसम्यक्त्वः पुनरपि सम्यक्त्वं लभते, तदाऽप्यपूर्वकरणेन पुञ्जत्रयं कृत्वाऽनिवर्तिकरणेन तल्लाभादेष एव क्रमो द्रष्टव्यः ।

ननु तदाऽपूर्वकरणस्य पूर्वलब्धस्यैव लाभात् कथमपूर्वता ? इति चेत् । सत्यम्, किन्तु 'अपूर्वमिवाऽपूर्वं स्तोकवारमेव लाभात्' इति वृद्धाः, सैद्धान्तिकमतं च सर्वमप्येतत्, कार्मग्रन्थिकमतेन तु– 'मिथ्यात्वस्यान्तरकरणं करोति, तत्प्रविष्टश्चौपशमिकं सम्यक्त्वं लभते, तेन च मिथ्यात्वस्य पुञ्जत्रयं करोति, ततः क्षायोपशमिकपुञ्जोदयात् क्षायोपशमिकसम्यक्त्वं लभते' इत्यलं विस्तरेणेति॥१२१८॥

आह– नन्वित्थं तावत् सर्वत्र भव्यस्यैव सम्यक्त्वलाभ उक्तः, अभव्यस्य तु का वार्ता ?, इत्याह—

[3]तित्थंकराइपूयं दट्ठूणण्णेण वा वि कज्जेण । सुयसामाइयलाहो होज्ज अभव्वस्स गंठिम्मि ॥ १२१९ ॥

---

१ नश्यति स्वयं वा परिकर्मतो वा यथा कोद्रवाणां मदनभावः । नश्यति तथा मिथ्यात्वमदनः स्वयं वा परिकर्मणया वा ॥ १२१७ ॥

२ अपूर्वेण त्रिपुञ्जं मिथ्यात्वं करोति कोद्रवोपमया । अनिवर्तिकरणेन तु स सम्यग्दर्शनं लभते ॥ १२१८ ॥

३ तीर्थङ्करादिपूजां दृष्ट्वाऽन्येन वाऽपि कार्येण । श्रुतसामायिकलाभो भवेदभव्यस्य ग्रन्थौ ॥ १२१९ ॥

अर्हदादिविभूतिमतिशयवतीं दृष्ट्वा 'धर्मादेवंभूतः सत्कारः, देवत्वराज्यादयो वा प्राप्यन्ते' इत्येवमुत्पन्नबुद्धेरभव्यस्यापि ग्रन्थिस्थानं प्राप्तस्य 'तद्विभूतिनिमित्तम्' इति शेषः; देवत्व-नरेन्द्रत्व-सौभाग्य-रूप-बलादिलक्षणेनाऽन्येन वा प्रयोजनेन सर्वथा निर्वा-णश्रद्धानरहितस्याऽभव्यस्यापि कष्टानुष्ठानं किञ्चिदङ्गीकुर्वतोऽज्ञानरूपस्य श्रुतसामायिकमात्रस्य लाभो भवेत्, तस्याऽप्येकादशाङ्गपाठानु-ज्ञानात् । सम्यक्त्वादिलाभस्तु तस्य न भवत्येव, अभव्यत्वहानिप्रसङ्गादिति ॥ १२१९ ॥

अथ यदुक्तम्– '[1]अपुव्वेण तिपुंजं मिच्छत्तं कुणइ' इत्यादि । तद्विवरणमाह—

[2]मेयणा दरनिव्वलिया निव्वलिया य जह कोद्दवा तिविहा । तह मिच्छत्तं तिविहं परिणामवसेण सो कुणइ॥१२२०॥

यथा परिकर्म्यमाणाः कोद्रवास्त्रिविधा भवन्ति, तद्यथा– मदनाः– अशुद्धा एवेत्यर्थः, तथा, ' दरनिव्वलिय त्ति ' ईषन्निर्व-लिताः शुद्धा-ऽशुद्धस्वरूपा इत्यर्थः, 'निव्वलिया य त्ति' निर्वलिताश्च शुद्धा एवेत्यर्थः, तथाऽपूर्वकरणलक्षणपरिणामवशेन शुद्धा-ऽशुद्ध-मिश्रभेदाद् मिथ्यात्वं जीवस्त्रिविधं करोतीति ॥ १२२० ॥

अथ जल-वस्त्रदृष्टान्तौ युगपदाह—

[3]जह वेह किंचि मलिणं दरसुद्धं सुद्धमंबु वत्थं च । एवं परिणामवसा करेइ सो दंसणं तिविहं ॥१२२१॥

यथा वा किञ्चिदम्बु जलं, वस्त्रं च मलिनं कलुषं भवति– शोध्यमानमपि न शुध्यति, किञ्चित्तु दरशुद्धमीषद् विशुद्धं भवति, अपरं तु शुद्धं भवति । एवमपूर्वकरणलक्षणपरिणामवशाद् दर्शनमोहनीयं कर्म जीवो मिथ्यात्व-मिश्र-सम्यक्त्वभेदात् त्रिधा करोतीति॥१२२१॥

ननूक्त इत्थं सम्यक्त्वलाभः, अथ देशविरत्यादिलाभः कथम् ?, इत्याह—

[4]सम्मत्तम्मि उ लद्धे पलियपुहत्तेण सावओ होज्जा । चरणो-वसम-खयाणं सागर संखंतरा होंति ॥१२२२॥

यावत्यां कर्मस्थितौ सम्यक्त्वं लब्धं तन्मध्यात् पल्योपमपृथक्त्वलक्षणस्थितिखण्डे क्षपिते श्रावको देशविरतो भवेत् । ततोऽपि संख्यातेषु सागरोपमेषु क्षपितेषु चारित्रमवाप्नोति । ततोऽपि संख्यातेषु सागरोपमेषु क्षपितेषूपशमश्रेणीं प्रतिपद्यते, ततोऽपि संख्यातेषु

---

१ गाथा १२१८ । २ मदना दरनिर्वलिता निर्वलिताश्च यथा कोद्रवास्त्रिविधाः । तथा मिथ्यात्वं त्रिविधं परिणामवशेन स करोति ॥ १२२० ॥

३ यथा वेह किञ्चिद् मलिनं दरशुद्धमम्बु वस्त्रं च । एवं परिणामवशात् करोति स दर्शनं त्रिविधम् ॥ १२२१ ॥

४ सम्यक्त्वे तु लब्धे पल्यपृथक्त्वेन श्रावको भवेत् । चरणो-पशम-क्षयाणां सागराः संख्या अन्तरं भवन्ति ॥ १२२२ ॥ ५ क. ग. 'वगो हो' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सागरोपमेषु क्षपितेषु क्षपकश्रेणिर्भवतीति ॥ १२२२ ॥

कियत्सु भवेष्वेवं देशविरत्यादिलाभो भवति ?, इत्याह—

[1]एवं अपरिवडिए सम्मत्ते देव-मणुयजम्मेसु । अण्णयरसेढिवज्जं एगभवेणं व सव्वाइं ॥ १२२३ ॥

एवमप्रतिपतितसम्यक्त्वस्य देव-मनुष्यजन्मसु [2]संसरणं कुर्वतोऽन्योन्यमनुष्यभवे देशविरत्यादिलाभो भवति । यदिवा, तीव्रशुभपरिणामवशात् क्षपितबहुकर्मस्थितेरेकस्मिन्नपि भवेऽन्यतरश्रेणिवर्जान्येतानि सर्वाण्यपि भवन्ति । श्रेणिद्वयं त्वेकस्मिन् भवे सैद्धान्तिकाभिप्रायेण न भवत्येव, किन्त्वेकैवोपशमश्रेणिः, क्षपकश्रेणिर्वा भवतीति ॥ तदेवमभिहितं क्रमद्वारम् ॥ १२२३ ॥

अथ तदावरणद्वारं चेतसि निधाय वक्ष्यमाणगाथासंबन्धनार्थमाह—

[3]अहुणा जस्सोदयओ न लभइ दंसणाइसामइयं । लद्धं व पुणो भस्सइ तदिहावरणं कसायाई ॥ १२२४ ॥

सुगमा, नवरं तदिह कषायादिकमावरणमुच्यते । तत्रानन्तानुबन्धिकषायचतुष्टयं मिथ्यात्वं च सम्यक्त्वस्याऽऽवरणम्, श्रुतस्य श्रुतज्ञानावरणम्, चारित्रस्य चारित्रमोहनीयमिति, तदेवाह– 'पढमिल्लुआणेत्यादि' ॥ १२२४ ॥

अथवा पातनान्तरमाह—

[4]अहवा खयाइओ केवलाइं जं जेसिं ते कइ कसाया । को वा कस्सावरणं को व खयाइक्कमो कस्स?॥१२२५॥[5]

अथवा, यत् केवलादिकं, आदिशब्दाद् दर्शन-चारित्रादिपरिग्रहः, येषां कषायाणां क्षयादितो भवति, आदिशब्दात् क्षयोपशमादिपरिग्रहः; ते कति कषायाः ?, को वा कस्य सामायिकस्याऽऽवरणम् ?, को वा क्षयादिक्रमः कस्य ? ॥ इत्येकविंशतिगाथार्थः ॥ १२२५ ॥

अथ क्रमेणोत्तरमाह—

[6]पढमिल्लुआण उदए नियमा संजोयणाकसायाणं । सम्मद्दंसणलंभं भवसिद्धीया वि न लहंति ॥१२२६॥

---

१ एवमप्रतिपतिते सम्यक्त्वे देव-मनुजजन्मसु । अन्यतरश्रेणिवर्जमेकभवेन वा सर्वाणि ॥ १२२३ ॥ २ क. ग. 'संचर' ।

३ अधुना यस्योदयतो न लभते दर्शनादिसामायिकम् । लब्धं वा पुनर्भ्रश्यति तदिहावरणं कषायादिः ॥ १२२४ ॥

४ अथवा क्षयादितः केवलादि यद् येषां ते कति कषायाः । को वा कस्यावरणं को वा क्षयादिक्रमः कस्य ? ॥ १२२५ ॥ ५ क. ग. 'नप' ।

६ प्रथमानामुदये नियमात् संयोजनाकषायाणाम् । सम्यग्दर्शनलाभं भवसिद्धिका अपि न लभन्ते ॥ १२२६ ॥ (कषायाणाम्-)

प्रथमिल्लुकानां संयोजनाकषायाणामुदये नियमात् सम्यग्दर्शनलाभं भवसिद्धिका अपि न लभन्ते, किमुताऽभव्याः ? । इत्यक्षरयोजना । भावार्थस्त्वयम्– प्रथमा एव देशीवचनतः प्रथमिल्लुकास्तेषां प्रथमिल्लुकानामनन्तानुबन्धिक्रोध-मान-माया-लोभानामित्यर्थः । प्राथम्यं चैषां सम्यक्त्वाख्यप्रथमगुणविघातित्वात्, क्षपणक्रमाद् वेति । उदये विपाकानुभवे सति । नियमाद् नियमेन, अस्य व्यवहितः संबन्धः, स च दर्शित एव । किंविशिष्टानां प्रथमिल्लुकानाम् ?, इत्याह– कर्मणा, तत्फलभूतसंसारेण वा सह संयोजयन्तीति संयोजनास्ते च ते कषायाश्चेति संयोजनकषायाः, दीर्घत्वं प्राकृतत्वात्; अथवा, संयोजनाहेतवः कषायाः संयोजनाकषायास्तेषामुदये नियमात् सम्यगविपरीतं दर्शनं सम्यग्दर्शनं सम्यक्त्वं तस्य लाभस्तम् । भवे सिद्धिर्येषां ते भवसिद्धिकाः । ननु सर्वेषामपि सिद्धिर्भव एव कस्मिंश्चिद् भवेत्, इति किमनेन व्यवच्छिद्यते ? । सत्यम्, किन्त्विह व्याख्यानात् तद्भव एवं भवो गृह्यते, तद्भवसिद्धिका इत्यर्थः, तेऽपि न लभन्ते, किमुताऽभव्याः ? ॥ इति निर्युक्तिगाथार्थः ॥ १२२६ ॥

भाष्यम्—

[1]खवणं पडुच्च पढमा पढमगुणविघाइणो त्ति वा जम्हा । संजोयणाकसाया भवादिसंजोयणाउ त्ति॥ १२२७॥

गतार्थैव ॥ १२२७ ॥

कषायशब्दार्थमाह—

[2]कम्मं कसं भवो वा कसमाओ सिं जओ कसाया तो । कसमाययंति व जओ गमयंति कसं कसाय त्ति॥१२२८॥

आओ व उवादाणं तेण कसाया जओ कसस्साया । चत्तारि बहुवयणओ एवं बिइयादओ वि मया ॥१२२९॥

कर्षन्ति परस्परं हिंसन्ति प्राणिनोऽस्मिन्निति कषं कर्म, भवो वा; अथवा, [3]कृष्यन्ते शारीर-मानसदुःखलक्षैर्घृष्यन्ते प्राणिनोऽस्मिन्निति कषं कर्मैव, भव एव वा; यतो [4]यस्मात् कषं कर्म, कषो वा भव आयो लाभो येषां ततस्ते कषायाः । अथवा, कषमायन्ति यतः, अतः कषायाः– कषं गमयन्तीत्यर्थः । अथवा, आय उपादानं हेतुरित्यनर्थान्तरम्, यस्मात् कषस्याऽऽया हेतवस्तेन

---

१ क. ग. 'व गृ' । २ क्षपणं प्रतीत्य प्रथमाः प्रथमगुणविघातिन इति वा यस्मात् । संयोजनाकषाया भवादिसंयोजनादिति ॥ १२२७ ॥ X कृष्यन्ते-।

३ कर्म कषं भवो वा कषमाय एषां यतो कषायास्ततः । कषमाययन्ति वा यतो गमयन्ति कषं कषाया इति ॥ १२२८ ॥ + (छं. १२०००)

आयो वोपादानं तेन कषाया यतः कषस्यायाः । चत्वारो बहुवचनत एवं द्वितीयादयोऽपि मताः ॥ १२२९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कषायाः । ते च बहुवचननिर्देशाच्चत्वारः क्रोधादयो गम्यन्ते । एवं देशविरत्याद्युत्तरोत्तरगुणघातित्वाद् द्वितीय-तृतीय-चतुर्थत्वेन, कषायशब्दादिवाच्यत्वेन च द्वितीयादयोऽपि मताः संमता इति ॥ १२२८ ॥ १२२९ ॥

'भवसिद्धीया वि' इत्येतद् व्याख्यानयति—

[2]भवसिद्धिया वि भणिए नियमा न लहंति तयमभव्वा वि । अविसद्देण व गहिया परित्तसंसारियाईया॥१२३०॥

'भवसिद्धिकाः' इत्युक्तेऽपिशब्दात् 'अभव्यास्तु नैव लभन्ते' इत्यवगम्यत एव । अथवा, अपिशब्दात् 'परीत्तसंसारादयोऽपि न लभन्ते' इति गम्यते ॥ इति गाथाचतुष्टयार्थः ॥ उक्ताः सम्यक्त्वस्याऽऽवरणभूताः कषायाः ॥ १२३० ॥

अथ देशविरत्यावरणभूतांस्तानाह—

[3]बीयकसायाणुदए अप्पच्चक्खाणनामधेयाणं । सम्मद्दंसणलंभं विरयाविरइं न उ लहंति ॥ १२३१ ॥

सर्वप्रत्याख्यानं देशप्रत्याख्यानं च येषामुदये न लभ्यते, तेऽप्रत्याख्यानाः; अकारस्य सर्वप्रतिषेधवचनत्वात्, अप्रत्याख्यानानामधेयं येषां तेऽप्रत्याख्याननामधेयास्तेषामप्रत्याख्याननामधेयानाम् । द्वितीयस्य देशविरतिगुणस्याऽऽवारकत्वाद् द्वितीयाः, ते च ते कषायाश्च द्वितीयकषायास्तेषां द्वितीयकषायाणामुदये 'भव्याः सम्यग्दर्शनलाभं लभन्ते' इति वाक्यशेषः । अयं च वाक्यशेषो 'विरयाविरइं न उ लहंति' इत्यत्र तुशब्दोपादानाल्लभ्यते, एषामुदये भव्याः सम्यग्दर्शनलाभं लभन्ते, विरताविरतिं देशविरतिं पुनर्न लभन्त इति वाक्यसंगतेरिति । विरतं चाऽविरतिश्च यस्यां निवृत्तौ सा विरताविरतिस्ताम् ॥ इति निर्युक्तिगाथार्थः ॥ १२३१ ॥

भाष्यम्—

[4]सव्वं देसो व जओ पच्चक्खाणं न जेसिमुदएणं । ते अप्पच्चक्खाणा सव्वनिसेहे मओऽकारो ॥१२३२॥
सम्मद्दंसणलंभं लभंति भविय त्ति वक्कसेसोऽयं । विरयाविरइविसेसणतुसद्दसंलक्खिओऽयं च ॥१२३३॥

---

१ गाथा १२२६ । २ भवसिद्धिका अपि भणिते नियमाद् न लभन्ते तद्भव्या अपि । अपिशब्देन वा गृहीताः परीत्तसंसारादिकाः ॥ १२३० ॥
३ द्वितीयकषायाणामुदयेऽप्रत्याख्याननामधेयानाम् । सम्यग्दर्शनलाभं विरताविरतिं न तु लभन्ते ॥ १२३१ ॥
४ सर्वं देशो वा यतः प्रत्याख्यानं न येषामुदयेन । तेऽप्रत्याख्यानाः सर्वनिषेधे मतोऽकारः ॥ १२३२ ॥
सम्यग्दर्शनलाभं लभन्ते भव्या इति वाक्यशेषोऽयम् । विरताविरतिविशेषणतुशब्दसंलक्षितोऽयं च ॥ १२३३ ॥

गतार्थे एव ॥ १२३२ ॥ १२३३ ॥

अथ तृतीयस्य सर्वविरतिगुणस्याऽऽवारकांस्तृतीयकषायानाह—

[2]तइयकसायाणुदए पच्चक्खाणावरणनामधेज्जाणं । देसे-क्कदेसविरइं चरित्तलंभं न उ लहंति ॥ १२३४ ॥

सर्वविरतिलक्षणतृतीयगुणघातित्वात्, क्षपणक्रमाद् वा तृतीयाश्च ते कषायाश्च तृतीयकषायाः क्रोधादयश्चत्वारस्तेषामुदये । कथंभूतानाम् ?, आवृण्वन्तीत्यावरणाः, प्रत्याख्यानं सर्वविरतिलक्षणं, तस्याऽऽवरणाः प्रत्याख्यानावरणाः, एतदेव नामधेयं येषां ते प्रत्याख्यानावरणनामधेयाः, तेषाम् । आह— ननु 'अप्रत्याख्याननामधेयानामुदये सर्वथा प्रत्याख्यानं नास्ति' इत्युक्तम्, नञा प्रतिषिद्धत्वात्; इहाऽपि चावरणशब्देन प्रत्याख्यानस्य सर्वस्यापि निषेधो गम्यते, इति क एषां प्रतिविशेषः ? इति । अत्रोच्यते— तत्र नञ् सर्वनिषेध उक्तः, इह त्वाङो मर्यादे-षदर्थत्वात्, आ— सर्वविरतिप्रत्याख्यानमर्यादया, अथवा, ईषत्— सावद्ययोगानुमतिमात्रविरतिरूपं प्रत्याख्यानमावृण्वन्तीति प्रत्याख्यानावरणा इति व्युत्पत्तेः सर्वविरतिरूपप्रत्याख्याननिषेधार्थ एवायं वर्तते, न देशविरतिप्रत्याख्याननिषेध आवरणशब्दः, तथा चाह— देशश्चैकदेशश्च देशै-कदेशौ तत्र देशः स्थूलप्राणातिपातादिः, एकदेशस्तु तस्यैव दृश्यवनस्पतिकायाद्यतिपातः, तयोर्देशै-कदेशयोर्विरतिर्निवृत्तिस्तां 'लभन्ते' इति वाक्यशेषः । अत्राप्येष वाक्यशेषः 'चरित्तलंभं न उ लहंति' इत्यत्र तुशब्दोपादानादेव लभ्यते । चरन्त्यनिन्दितमनेनेति चारित्रम्, अष्टविधकर्मचयरिक्तीकरणाद् वा चारित्रम्, सर्वविरतिक्रियेत्यर्थः, तस्य लाभस्तम्, एषामुदये न लभन्ते, देशै-कदेशविरतिं पुनर्लभन्ते ॥ इति निर्युक्तिगाथार्थः ॥ १२३४ ॥

भाष्यम्—

[3]सव्वं पच्चक्खाणं वरेंति ते जं न देसमेएणं । पच्चक्खाणावरणा आमज्जादी-सदत्थेसु ॥ १२३५ ॥

यद् यस्मात् सर्वविरतिरूपं सर्वं प्रत्याख्यानमावृण्वन्ति ते तृतीयकषायाः, न देशप्रत्याख्यानम्, एतेन कारणेन प्रत्याख्यानावरणा अमी उच्यन्ते, 'न तु प्रत्याख्यानमावृण्वन्तीति प्रत्याख्यानावरणा इति व्युत्पत्तेः सर्वमपि प्रत्याख्यानमेषामुदये न भवति' इति गम्यते । अयं तु विशेषः कुतः, यत् सर्वविरतिप्रत्याख्यानमावृण्वन्त्यमी, न देशप्रत्याख्यानम् ?, इत्याशङ्क्याह— 'आ मज्जादी-सद-

---

१ घ.छ. 'तीयाना' । २ तृतीयकषायाणामुदये प्रत्याख्यानावरणनामधेयानाम् । देशै-कदेशविरतिं चारित्रलाभं न तु लभन्ते ॥ १२३४ ॥
३ सर्वं प्रत्याख्यानमावृण्वन्ति ते यद् न देशमेतेन । प्रत्याख्यानावरणा आ मर्यादे-षदर्थयोः ॥ १२३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

त्थेसु ति' आङ् इह मर्यादायाम्, ईषदर्थे वा; आ– सर्वविरतिप्रत्याख्यानमर्यादया प्रत्याख्यानमावृण्वन्ति, अथवा आ– ईषत् सावद्ययोगानुमतिमात्रविरतिरूपं प्रत्याख्यानमावृण्वन्तीति प्रत्याख्यानावरणा इत्यर्थः। देशविरतो ह्यनन्तं सावद्ययोगं प्रत्याख्याय यदेकादशीं प्रतिमां प्रतिपन्नः सावद्ययोगस्य परिमितमनुमतिमात्रं न प्रत्याचष्टे, तदेतत्कषायावरणसामर्थ्यात्, इत्यनया विवक्षयेषत्प्रत्याख्यानावरणा एतेऽभिधीयन्त इति ॥ १२३५ ॥

आह– ननु प्रत्याख्यानस्यावरणं सतः, असतो वा ?, इत्याशङ्क्य[2] प्राह—

[3]नासंतस्सावरणं न सतोऽभव्वाइविरमणपसंगा। पच्चक्खाणावरणा तम्हा तस्संभवावरणा ॥ १२३६ ॥

एकान्तेनाऽसतस्तावदावरणं न संभवति, खरविषाणस्यापि तत्प्रसङ्गात्। नापि सतः, अभव्यानामपि प्रत्याख्यानसत्त्वेन विरतिमत्त्वप्रसङ्गात्। तर्हि किमेते कषाया आवृण्वन्ति ?, इत्याह– तस्मात् तत्संभवस्य प्रत्याख्यानसंभवस्य प्रत्याख्यानपरिणतेरावरणाः प्रत्याख्यानावरणा उच्यन्ते, परिणतिशब्दलोपादिति ॥ १२३६ ॥

एतदेव व्यक्तीकुर्वन् सदृष्टान्तमाह—

[4]उदए विरइपरिणई न होइ जेसिं खयाइओ होइ। पच्चक्खाणावरणा त इह जहा केवलावरणं ॥१२३७॥

येषामुदये विरतिपरिणतिरात्मनो न भवति, यत्क्षय-क्षयोपशमादिभ्यस्त्वसौ भवति, त इह प्रत्याख्यानावरणा उच्यन्ते, केवलज्ञानावरणवदिति। इदमुक्तं भवति– केवलावरणेन केवलज्ञानं न सदाऽऽव्रियते, अभव्यानामपि केवलित्वप्रसङ्गात्। अस्त्यभव्यानां केवलम्, किन्त्वावृतमिति चेत्। तदयुक्तम्, मल्लकसंपुटावृतप्रदीपेन तन्मध्यस्थेव स्वात्मनस्तेन प्रकाशनप्रसङ्गात्। नाऽप्यसत् केवलज्ञानं केवलज्ञानेनाऽऽव्रियते, खरविषाणस्याऽप्यावरणप्रसङ्गात्। तस्मात् सदसद्रूपं केवलज्ञानं तदावरणेनाऽऽव्रियते। तद्धि जीवद्रव्यरूपतया सदाऽऽव्रियते, आविर्भूततत्परिणत्या त्वसदाऽऽव्रियते, सदसद्रूपयोश्च कथञ्चिदेकत्वमेव। ततः सदसद्रूपस्य केवलज्ञानस्य यथा स्वरूपेण परिणतिसंभवस्तदावरणेनाऽऽव्रियते– आवरणसामर्थ्यात् केवलज्ञानपरिणत्या परिणन्तुं जीवो न लभत इत्यर्थः; एवं प्रत्याख्यानावरणकषायैरपि विरतिपरिणतिसंभव आव्रियते– विरतिपरिणामेन परिणन्तुं जीवो न प्राप्नोतीत्यर्थः। अत्र बहु वक्तव्यम्, तत्तु नोच्यते, ग्रन्थविस्तरभयात् ॥ इति गाथात्रयार्थः ॥ १२३७ ॥

---

१ क.ग. 'त्रू'। २ क.ग. 'शङ्कयाह'। ३ नाऽसत आवरणं न सतोऽभव्यादिविरमणप्रसङ्गात्। प्रत्याख्यानावरणास्तस्मात् तत्संभवावरणाः ॥ १२३६ ॥

४ उदये विरतिपरिणतिर्न भवति येषां क्षयादितो भवति। प्रत्याख्यानावरणास्त इह यथा केवलावरणम् ॥ १२३७ ॥

अथोक्तमेवार्थं संगृह्य विभणिषुः, तथा चतुर्थकषायाणां यथाख्यातचारित्रादिविघातित्वं च दिदर्शयिषुराह—

[5]मूलगुणाणं लंभं न लहइ मूलगुणघाइणो उदए। संजलणाणं उदए न लहइ चरणं अहक्खायं ॥१२३८॥

इह सम्यक्त्वं, व्रता-ऽणुव्रतानि च मूलभूता गुणा मूलगुणाः, उत्तरगुणानामाधारभूतत्वात्, तेषां मूलगुणानां लाभं न लभते। कदा ?, इत्याह– यथोक्तान् मूलगुणान् हन्तुं शीलं येषां ते मूलगुणघातिनस्तेषां मूलगुणघातिनामनन्तानुबन्ध्य-ऽप्रत्याख्यान-प्रत्याख्यानावरणानां द्वादशानां कषायाणामुदये। एतच्च 'पढमिल्लुआण उदए' इत्यादिना सर्वं भावितमेव। तथा, ईषज्ज्वलनात् संज्वलनाः, सपदि ज्वलनाद् वा संज्वलनाः, परीषहादिसंपाते चारित्रिणमपि ज्वलयन्तीति वा संज्वलनाः क्रोधादय एव चत्वारः कषायाः, तेषामुदये न लभते, लब्धं वा त्यजति चरणं चारित्रम्। किं सर्वमपि ?, न, इत्याह– यथैव तीर्थकर-गणधरैराख्यातं यथाख्यातमकषायमित्यर्थः, सकषायं तु लभते। न च यथाख्यातचारित्रमात्रमेवोपघ्नन्ति संज्वलनाः, किन्तु शेषचारित्राणामपि देशोपघातिनो भवन्ति, तदुदये शेषचारित्रातिचारसिद्धेः ॥ इति निर्युक्तिगाथार्थः ॥ १२३८ ॥

के पुनस्ते मूलगुणाः, यद्विघातिनो द्वादश कषायाः ?, इत्याह—

[6]सम्मत्तसमेयाइं महव्वया-णुव्वयाइं मूलगुणा। मूलं सेसाहारो बारस तग्घाइणो एए ॥ १२३९ ॥

गतार्था, नवरं शेषाणामुत्तरगुणानामाधारत्वात् सम्यक्त्व-महाव्रतादीनि मूलमुच्यते, तद्विघातिन एते द्वादश कषाया इति॥१२३९॥

अत्रार्थापत्त्याऽऽक्षिप्तमनवगच्छन्नाह परः—

"[7]निसिभत्तविरमणं पि हु नणु मूलगुणो कहं न गहियं तं ?। वयधारिणो च्चिय तयं मूलगुणो सेसयस्सियरो॥१२४०॥
आहारविरमणाओ तवो व तव एव वा जओऽणसणं। अहव महव्वयसंरक्खत्तणाओ समिइउ व्व ॥ १२४१ ॥

---

१ मूलगुणानां लाभं न लभते मूलगुणघातिन उदये। संज्वलनानामुदये न लभते चरणमथाख्यातम् ॥ १२३८ ॥ २ घ. छ. 'त्वं महाव्रतानि।

३ गाथा १२२६। ४ सम्यक्त्वसमेतानि महाव्रता-ऽणुव्रतानि मूलगुणाः। मूलं शेषाधारो द्वादश तद्घातिन एते ॥ १२३९ ॥

५ निशिभक्तविरमणमपि हि ननु मूलगुणः कथं न गृहीतं तत् ?। व्रतधारिण एव तद् मूलगुणः शेषस्येतरः ॥ १२४० ॥
आहारविरमणात् तप इव तप एव वा यतोऽनशनम्। अथवा महाव्रतसंरक्षत्वात् समितय इव ॥ १२४१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

ननु रात्रीभोजनविरमणमपि मूलगुणः, तदिह किमिति मूलगुणत्वेन नोपात्तम् ?। अत्रोत्तरमाह– व्रतधारिणः संयतस्यैव तद् रात्रीभोजनविरमणं मूलगुणः, शेषस्य तु गृहिणो देशविरतस्योत्तरगुण इत्यर्थः। कुतः ?, आहारविरमणरूपत्वात्, तपोवत्। अथवा, तप एव वा तद् निशिभोजनविरमणमिति प्रतिज्ञा, यतोऽनशनम्– अशनत्यागरूपत्वादिति हेतुः, चतुर्थादिवत्, इत्यनुक्तोऽपि दृष्टान्तः स्वयं दृश्यः, तपश्चोत्तरगुण एवेति भावः। इतश्चेदमुत्तरगुणः। कुतः ?, महाव्रतसंरक्षणात्मकत्वात्, समित्यादिवदिति ॥१२४०॥१२४१॥

अत्राह– यद्येवम्, उक्तयुक्तेर्व्रतधारिणोऽपि तद् मूलगुणो न प्राप्नोति, इत्याह—

तेह वि तयं मूलगुणो भण्णइ मूलगुणपालयं जम्हा। मूलगुणगहणम्मि य तं गहियं उत्तरगुण व्व ॥१२४२॥

तथापि व्रतिनस्तन्मूलगुणो भण्यते, समस्तव्रतानुपालनात्, समस्तव्रतसंरक्षणेनाऽत्यन्तोपकारित्वात्, प्राणातिपातविरमणवद्, मूलगुणग्रहणाच्च साक्षादनुपात्तमपि तद् गृहीतमेव द्रष्टव्यम्, उत्तरगुणवदिति ॥ १२४२ ॥

कस्माद् मूलग्रहणे तद् गृह्यते ?, इत्याह—

जम्हा मूलगुण च्चिय न होंति तव्विरहियस्स पडिपुन्ना। तो मूलगुणग्गहणे तग्गहणमिहत्थओ नेयं ॥१२४३॥

यस्मात् तद्विरहितस्य रात्रीभोजनविरमणविरहितस्य महाव्रतादयो मूलगुणा एव परिपूर्णा न भवन्ति, अतो मूलगुणग्रहणे तद्ग्रहणमिहार्थतो विज्ञेयम्; तथाहि– रात्रौ भोजने विधेये रात्रौ भिक्षार्थमचक्षुर्विषये पर्यटनाद् वह्निप्रदीपनादिभिः स्पर्शनात्, पुरःकर्मपश्चात्कर्मोद्गमैषणादोषदुष्टाहारग्रहणादेश्च प्राणातिपातव्रतविघातः। अन्धकारबलेन च पतितहिरण्यादिद्रविणग्रहणादेः, योषित्परिभोगसंभवाच्च शेषव्रतविलोपः। इत्येवं रात्रिभोजनविरमणमन्तरेण न संभवन्त्येव प्राणातिपातविरत्यादिमूलगुणाः। अत एव तद्ग्रहणेऽत्यन्तोपकारित्वाद् गृहीतमेवार्थतस्तदिति ॥ १२४३ ॥

अत्र प्रेरकः प्राह—

जइ मूलगुणो मूलव्वयउवगारि त्ति तं तवाईया। तो सव्वे मूलगुणा जइव न तो, तं पि मा होज्जा ॥१२४४॥

(× गुणग्र-।) १ तथापि तद् मूलगुणो भण्यते मूलगुणपालकं यस्मात्। मूलगुणग्रहणे च तद् गृहीतमुत्तरगुण इव ॥ १२४२ ॥(+ तस्येतर-।)

२ यस्माद् मूलगुणा एव न भवन्ति तद्विरहितस्य परिपूर्णाः। ततो मूलगुणग्रहणे तद्ग्रहणमिहार्थतो ज्ञेयम् ॥ १२४३ ॥

३ यदि मूलगुणो मूलव्रतोपकारीति तद् तपआदिकाः। ततः सर्वे मूलगुणा यदिवा न ते, तदपि मा भूत् ॥ १२४४ ॥

यदि तद् निशिभोजनविरमणं मूलगुणोपकारित्वाद् मूलगुण इष्यते, ततस्तर्हि तपःप्रभृतयः सर्वेऽपि मूलगुणाः प्राप्नुवन्ति, तेषामपि तदुपकारित्वात्। अतो विशीर्णोत्तरगुणकथा। यदि पुनस्ते तपःप्रभृतयो मूलगुणा न भवन्ति, तर्हि तदपि रात्रीभोजनविरमणं मूलगुणो मा भूत्, उपकारित्वाविशेषात्। पूर्वापरविरोधश्चैवमनभ्युपगच्छतो भवतः, तथाहि– भवतैवानन्तरमुक्तं यथा– 'महाव्रतसंरक्षणादुत्तरगुण इदं, समितिवत्' इति; इदानीं त्वभिधत्से–'महाव्रतसंरक्षणाद् मूलगुण एतदिति'। अत्रोच्यते– किमिह विरुद्धम् ?, उभयधर्मकं हि रात्रीभोजनविरमणम्, यतो गृहस्थस्य तदुत्तरगुणः, तस्याऽऽरम्भजप्राणातिपातादानिवृत्तत्वात्, निशि भोजनेऽपि मूलगुणानामखण्डनात्, अत्यन्तोपकाराभावादिति; व्रतिनस्तु तदेव मूलगुणः, तस्याऽऽरम्भजादपि प्राणातिपाताद् निवृत्तत्वात्, रजनिभोजने च तत्संभवात्, अतस्तद्विधाने मूलगुणानां खण्डनात्, तद्विरमणे तु तेषां संरक्षणेनात्यन्तोपकारात् तत् तस्य मूलगुणः। तपःप्रभृतीनां चेत्थमत्यन्तोपकारित्वाभावादुत्तरगुणत्वमिति ॥ १२४४ ॥

आह च—

सव्वव्वओवगारिं जह तं न तहा तवादओ वीसुं। जं ते, तेणुत्तरिया होंति गुणा तं च मूलगुणो ॥१२४५॥

'जं ति' यस्मात् कारणाद् यथा तद् रात्रीभोजनविरमणं सर्वव्रतोपकारकम्, न तथा तपः-समित्यादयो विष्वक् पृथक्, तेन कारणेन ते उत्तरिका उत्तरगुणा भवन्ति। तत्तु रात्रीभोजनव्रतं मूलगुणानामत्यन्तोपकारित्वाद् मूलगुणः। यथा हि प्राणातिपातादिव्रतानां पञ्चानामेकस्याप्यभावे शेषाणामभावाद् मूलगुणत्वम्, एवं रात्रिभोजनव्रतस्याऽप्यभावे सर्वव्रताभावादत्यन्तोपकारित्वाद् मूलगुणत्वमिति भावः ॥ १२४५ ॥

अथ 'संजलणाणं उदए' इत्यादिनिर्युक्तिगाथोत्तरार्धव्याख्यामाह–

ईसिं सयराहं वा संपाए वा परीसहाईणं। जलणाओ संजलणा नाहक्खायं तदुदयम्मि ॥ १२४६ ॥

अकसायमहक्खायं जं संजलणोदए न तं तेण। लब्भइ लद्धं च पुणो भस्सइ सव्वं तदुदयम्मि ॥१२४७॥

---

१ घ.छ. 'अथवा म'। २ सर्वव्रतोपकारि यथा तद् न तथा तपआदयो विष्वक्। यत् ते, तेनौत्तराहा भवन्ति गुणास्तच्च मूलगुणः ॥ १२४५ ॥ ३ गाथा १२३८।

+ औत्तरिका-। ४ ईषत् शनिति वा संपाते वा परीषहादीनाम्। ज्वलनात् संज्वलना नाऽऽख्यातं तदुदये ॥ १२४६ ॥ ×(त्तरिका-१)

अकषायमथाख्यातं यत् संज्वलनोदये न तत् तेन। लभ्यते लब्धं च पुनर्भ्रंश्यति सर्वं तदुदये ॥ १२४७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]नेहु नवरिमहक्खाओवघाइणो सेसचरणदेसं पि । घाएंति, ताणमुदए होइ जओ साइयारं तं ॥१२४८॥

इह संशब्दस्य त्रयोऽर्थाः, तद्यथा– ईषज्ज्वलनात् संज्वलनाः, अथवा, 'सयराहं' झगिति ज्वलनात् संज्वलनाः, यदिवा, परीषहादिसंपाते चारित्रिणमपि ज्वलयन्तीति संज्वलनाः, तदुदये यथाख्यातचारित्रं न भवति । कुतस्तदुदये तद् न भवति ?, इत्याह– 'अकसायमित्यादि' । 'जं ति' यस्मादकषायं यथाख्यातमुच्यते, तेन कारणेन संज्वलनकषायोदये तद् न लभ्यते, पूर्वलब्धमपि च पुनस्तदुदये सर्वं तद् भ्रश्यतीति । न हि नैव यथाख्यातमात्रोपघातिनः संज्वलनाः, किन्तु शेषचारित्राणामपि देशोपघातिनो भवन्ति, यतस्तेषामुदये तदपि शेषचारित्रं सातिचारं भवति ॥ इति गाथादशकार्थः ॥ १२४६ ॥ १२४७ ॥ १२४८ ॥

अत एवाह—

[2]सव्वे चिय अइयारा संजलणाणं तु उदयओ होंति । मूलच्छेज्जं पुण होइ बारसण्हं कसायाणं ॥१२४९॥

सर्वेऽप्यालोचना-प्रतिक्रमणोभयादिच्छेदपर्यन्तप्रायश्चित्तशोध्याः, अपिशब्दात् कियन्तोऽपि च, अतिचरणान्यतिचाराश्चारित्रविराधनाविशेषाः संज्वलनानामेवोदयतो भवन्ति । द्वादशानां पुनः कषायाणामुदयतो मूलच्छेद्यं भवति– मूलेनाऽष्टमस्थानवर्तिना प्रायश्चित्तेन च्छिद्यतेऽपनीयते यद् दोषजातं तद् मूलच्छेद्यम्– अशेषचारित्रोच्छेदकारीत्यर्थः । तदेवंभूतं दोषजातं द्वादशानामनन्तानुबन्ध्यप्रत्याख्यान-प्रत्याख्यानावरणलक्षणानां कषायाणामुदये संजायते । अथवा, इदं मूलच्छेद्यं दोषजातं यथासंभवतो योज्यते, तद्यथा– प्रत्याख्यानावरणकषायचतुष्टयोदये सर्वविरतिरूपस्य चारित्रस्य मूलच्छेद्यं सर्वनाशरूपं भवति, अप्रत्याख्यानकषायचतुष्कोदये तु देशविरतिचारित्रस्य, अनन्तानुबन्धिकषायचतुष्कोदये पुनः सम्यक्त्वस्य ॥ इति निर्युक्तिगाथार्थः ॥ १२४९ ॥

भाष्यम्—

[3]अइयारा छेदंता सव्वे संजलणहेयवो होंति । सेसकसायोदयओ मूलच्छेज्जं वयारुहणं ॥ १२५० ॥

सप्तमस्थानवर्ती प्रायश्चित्तविशेषश्छेदः । ततश्चालोचनादिना छेदान्तेन सप्तविधप्रायश्चित्तेनान्तो येषां ते, एकस्याऽन्तशब्दस्य

---

१ न हि नवरमथाख्यातोपघातिनः शेषचरणदेशमपि । घ्नन्ति, तेषामुदये भवति यतः सातिचारं तत् ॥ १२४८ ॥

२ सर्वे ह्यतिचाराः संज्वलनानां तूदयतो भवन्ति । मूलच्छेद्यं पुनर्भवति द्वादशानां कषायाणाम् ॥ १२४९ ॥

३ अतिचाराश्छेदान्ताः सर्वे संज्वलनहेतवो भवन्ति । शेषकषायोदयतो मूलच्छेद्यं व्रतारोहणम् ॥ १२५० ॥

लोपाच्छेदान्ताः, सर्वेऽप्यतिचाराः संज्वलनकषायोदयजन्या भवन्ति । शेषकषायाणां द्वादशानामुदये मूलच्छेद्यं समस्तचारित्रोच्छेदकारकं दोषजातं भवति । तद्विशुद्धये च प्रायश्चित्तं पुनर्व्रतारोपणमिति ॥ १२५० ॥

अथवा, यथासंभवं मूलच्छेद्यं योज्यते, इत्येतदाह—

[1]अहवा संजममूलच्छेज्जं तइयकलुसोदए नियमं । सम्मत्ताईमूलच्छेज्जं पुण बारसण्हं पि ॥ १२५१ ॥

तृतीयानां प्रत्याख्यानावरणकषायाणामुदये संयमस्य सर्वविरतिरूपस्य मूलच्छेद्यं नियतं निश्चितं भवति, सम्यक्त्वादिमूलच्छेद्यं तु द्वादशानामप्युदये संपद्यत इति ॥ १२५१ ॥

अथ प्रेर्यमाशङ्क्य परिहरन्नाह—

[2]मूलच्छेज्जे सिद्धे पुव्वद्धे मूलगुणघाइगहणेणं । इय कीस पुणो गहणं अइयारविसेसणत्थं ति ॥१२५२॥

पगयमहक्खायं ति य अइयारे तम्मि चेव मा जोए । तो मूलच्छेज्जमिणं सेसचरित्ते निओएइ ॥१२५३॥

आह– नन्वनन्तरनिर्दिष्टनिर्युक्तिगाथायां 'मूलगुणाणं लंभं न लहइ मूलगुणघाइणो उदए' इत्येतस्मिन् पूर्वार्धे मूलगुणघातिग्रहणेन द्वादशकषायाणामुदये मूलच्छेद्यं सिद्धमेव, किमितीह पुनस्तद्ग्रहणम् ?। अत्रोत्तरमाह– अतिचारविशेषणार्थमिति– अतिचाराणां विशेषे व्यवस्थापनार्थमित्यर्थः । इदमेव व्यक्तीकुर्वन्नाह– 'पगयमित्यादि' । इदमुक्तं भवति– '[3]संजलणाणं उदए न लहइ चरणं अहक्खायं' इत्यनन्तरनिर्युक्तिगाथोत्तरार्धादिह यथाख्यातचारित्रं प्रकृतमनुवर्तते । ततश्च 'सव्वे चिय अइयारा संजलणाणं तु उदयओ होंति' इत्येतानतिचाराननन्तरानुवर्तमाने यथाख्यातचारित्र एव शिष्योऽयोक्षीत्, तदेतद् मा भूत्; ततस्तेनेह पुनरपि मूलच्छेद्यमेतद् यथाख्यातवर्जितेऽशेषचारित्रे सामायिकादिके नियोजयति । अस्यां हि गाथायां मूलच्छेद्यग्रहणात् पुनःशब्दविशेषणाच्चायमर्थः संपद्यते । संज्वलनानामुदये शेषचारित्रस्य सर्वेऽप्यतिचारा भवन्ति, द्वादशकषायाणामुदये पुनर्मूलच्छेद्यं भवति । यस्यैवास्यां गाथायां मूलच्छेद्यमुक्तम्, तस्यैवातिचारा अपि, न तु यथाख्यातचारित्रस्य, कषायोदयरहितत्वेन तस्य निरतिचारत्वात् ॥ इति गाथाचतुष्टयार्थः ॥ १२५२ ॥ १२५३ ॥

---

१ अथवा संयममूलच्छेद्यं तृतीयकलुषोदये नियतम् । सम्यक्त्वादिमूलच्छेद्यं पुनर्द्वादशानामपि ॥ १२५१ ॥

२ मूलच्छेद्ये सिद्धे पूर्वार्धे मूलगुणघातिग्रहणेन । इति कस्मात् पुनर्ग्रहणमतिचारविशेषणार्थमिति ॥ १२५२ ॥
प्रकृतमथाख्यानमिति चातिचारे तस्मिन्नेव मा यौक्षीत् । ततो मूलच्छेद्यमिदं शेषचारित्रे नियोजयति ॥१२५३॥ ३ गाथा १२३८ । ४ गाथा १२४९ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

॥ उक्तमावरणद्वारम् ॥

अथ तत्क्षयोपशमादिभ्यश्चारित्रप्राप्तिमभिधित्सुराह—

[1]बारसविहे कसाए खइए उवसामिए व जोगेहिं । लब्भइ चरित्तलंभो तस्स विसेसा इमे पंच ॥ १२५४ ॥

द्वादशविधे द्वादशप्रकारेऽनन्तानुबन्ध्यादिभेदभिन्ने कषाये, जातावेकवचनम्, क्रोधादिलक्षणे क्षपिते विध्यातामिनतुल्यतां नीते, उपशमिते भस्मच्छन्नदहनकल्पतां प्रापिते; वाशब्दात् क्षयोपशमे चार्धविध्यातज्वलनसमतामुपकल्पिते, योगैर्मनो-वाक्-कायरूपैः प्रशस्तैर्हेतुभिर्लभ्यते चारित्रलाभः, तस्य च सामान्येन चारित्रस्य विशेषा भेदा एते वक्ष्यमाणाः पञ्च ॥ इति निर्युक्तिगाथार्थः ॥ १२५४ ॥

भाष्यम्—

[2]खविए उवसमिए वासद्देणं खओवसमिए वा । बारसविहे कसाए पसत्थझाणाइजोगेहिं ॥ १२५५ ॥

गतार्था, नवरं प्रशस्तध्यानं प्रशस्तं मनः ॥ १२५५ ॥

क्षीणादिकषायस्वरूपमाह—

[3]खीणा निव्वायहुयासणो व छारपिहिय व्व उवसंता । दरविज्झायविहाडियजलणोवम्मा खओवसमा ॥१२५६॥

व्याख्यातार्था, नवरमर्धविध्यातविघट्टितज्वलनोपमाः क्षायोपशमिककषायाः । क्षयोपशमावस्थेषु हि कषायेषु दलिकस्य वेदनमप्यस्ति, तच्च विघट्टितवह्निकल्पमिति ॥ १२५६ ॥

अथ कस्य चारित्रस्य कथं लाभः ?, इत्याह—

[4]खयओ वा समओ वा खओवसमओ व तिण्णि लब्भन्ति । सुहुम-हक्खायाइं खयओ समओ व नण्णत्तो ॥१२५७॥

---

१ द्वादशविधे कषाये क्षपिते उपशमिते वा योगैः । लभ्यते चारित्रलाभस्तस्य विशेषा इमे पञ्च ॥ १२५४ ॥

२ क्षपिते उपशमिते वाशब्देन क्षायोपशमिके वा । द्वादशविधे कषाये प्रशस्तध्यानादियोगैः ॥ १२५५ ॥

३ क्षीणा निर्वातहुताशन इव भस्मपिहित इवोपशान्ताः । दरविध्यातविघट्टितज्वलनोपम्याः क्षयोपशमाः ॥ १२५६ ॥

४ क्षयतो वा शमनो वा क्षयोपशमतो वा त्रीणि लभ्यन्ते । सूक्ष्मा-ऽख्याते क्षयतः शमतो वा नान्यतः ॥ १२५७ ॥

सामायिक-च्छेदोपस्थापनीय-परिहारविशुद्धिकलक्षणान्याद्यानि त्रीणि चारित्राणि श्रेणिद्वयादन्यत्र कषायक्षयोपशमात् पूर्वप्रतिपन्नानि प्रतिपद्यमानानि च लभ्यन्ते, अनिवृत्तिबादरस्य पुनरुपशमश्रेणौ तदुपशमात् पूर्वप्रतिपन्नानां तेषां लाभः, क्षपकश्रेणौ तु क्षयादिति। सूक्ष्मसंपराय-यथाख्यातचारित्रे तूपशमश्रेणौ कषायोपशमात्, क्षपकश्रेणौ तु तत्क्षयाल्लभ्येते, नान्यतः— क्षयोपशमाद् न प्राप्यत इत्यर्थः ॥१२५७॥

आह— ननु 'तस्स विसेसा इमे पंच' इत्यत्र किं सामान्यं चारित्रमात्रं तच्छब्दस्य वाच्यम्, आहोस्विद् द्वादशानां कषायाणां क्षयादिभ्यो यदनन्तरमेवोक्तं तदेव ?, इत्याशङ्क्याह—

[2]लब्भइ चरित्तलाभो खयाइओ बारसण्ह नियमोऽयं । न उ पंचविहनियमणं पंच विसेस त्ति सामण्णं ॥१२५८॥

द्वादशानां कषायाणां क्षयादितः क्षय-क्षयोपशमो-पशमेभ्य एव लाभश्चारित्रस्य, नान्यथा, इत्येवमेवेह नियमो द्रष्टव्यः, न तु पञ्चविधनियमनम्— द्वादशकषायाणामेव क्षयादितो लब्धस्य चारित्रस्य पञ्चैते विशेषा इत्येवंभूतो नियमोऽत्र [3]न कर्तव्य इत्यर्थः । किं तर्हि ? । द्वादशानां, अधिकानां वा कषायाणां क्षयादितो लब्धस्य तस्य सामान्येनैव चारित्रस्यैते वक्ष्यमाणाः पञ्च विशेषा इत्येवं सामान्यं चारित्रमात्रं तच्छब्दस्य संबध्यत इति ॥ १२५८ ॥

अथ कस्माद् द्वादशकषायाणामेव क्षयादितो लब्धस्य चारित्रस्य पञ्चैते विशेषा इत्येवंभूतो नियमोऽत्र न क्रियते ?, इत्याह—

[4]जं तिण्णि बारसण्हं लब्भंति खयाइओ कसायाणं । सुहुमं पण्णरसण्हं चरिमं पुण सोलसण्हं पि ॥ १२५९ ॥

यतः सामायिक-च्छेदोपस्थापनीय-परिहारविशुद्धिकलक्षणानि त्रीण्येव चारित्राणि द्वादशकषायाणां क्षयादितो लभ्यन्ते, इति कथं तत्क्षयादिलभ्यस्य चारित्रस्य पञ्चविधत्वं स्यात् ?। सूक्ष्मसंपरायचारित्रं तु संज्वलनलोभवर्जितानां शेषपञ्चदशकषायाणां क्षयात्, उपशमाद् वा लभ्यते । चरमं तु यथाख्यातचारित्रं षोडशानामपि कषायाणां क्षयाद्, उपशमाद् वा प्राप्यते ; एवं च सति सामान्यस्यैव चारित्रस्य पञ्च विशेषा भवन्ति ॥ इति गाथापञ्चकार्थः ॥ १२५९ ॥

के पुनस्ते पञ्च विशेषाः ?, इत्याह—

---

१ गाथा १२५४ । २ लभ्यते चारित्रलाभः क्षयादितो द्वादशानां नियमोऽयम् । न तु पञ्चविधनियमनं पञ्च विशेषा इति सामान्यम् ॥ १२५८ ॥

३ क.ग. 'न क्रियत इ' । ४ यत् त्रीणि द्वादशानां लभ्यन्ते क्षयादितः कषायाणाम् । सूक्ष्मं पञ्चदशानां चरमं पुनः षोडशानामपि ॥ १२५९ ॥

७०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

सामाइय त्थ पढमं छेओवट्ठावणं भवे बीयं । परिहारविसुद्धीयं सुहुमं तह संपरायं च ॥ १२६० ॥
तत्तो य अहक्खायं खायं सव्वम्मि जीवलोयम्मि । जं चरिऊण सुविहिया वच्चंतयरा-मरं ठाणं ॥१२६१॥

राग-द्वेषविरहितः समस्तस्य प्रतिक्षणमपूर्वापूर्वनिर्जराहेतुभूताया विशुद्धेरायो लाभः समायः, स एव सामायिकं सर्वसावद्ययोगविरमणमित्यर्थः । ततश्च सर्वमप्येतच्चारित्रमविशेषतः सामायिकमेव; छेदादिविशेषैस्तु विशेष्यमाणमर्थतः संज्ञातश्च नानात्वं प्रतिपद्यते । तदत्रैतेषु मध्ये प्रथमं छेदादिविशेषाणामभावात् सामान्यसंज्ञायामेवावतिष्ठते सामायिकम् । एतच्च द्विधा– इत्वरम्, यावत्कथिकं च । तत्र स्वल्पकालभावीत्वरम् । इदं च भरतै-रावतक्षेत्रेषु प्रथम-पश्चिमतीर्थकरतीर्थेऽनारोपितमहाव्रतस्य[x] शिष्यस्य विज्ञेयम् । अत्र जन्मनि यावज्जीवितकथाऽस्त्यात्मनः, तावत्कालभावि यावत्कथं तदेव यावत्कथिकम्, आभवतीत्यर्थः । एतच्च भरतै-रावतमध्यमद्वाविंशतितीर्थकरसाधूनां, महाविदेहार्हत्संयतानां चावसेयम्, एषामुपस्थापनाया अभावादिति ।

द्वितीयं तु चारित्रं छेदोपस्थापनमुच्यते । तत्र च्छेदश्चोपस्थापना च यस्मिंश्चारित्रे तच्छेदोपस्थापनम्– पूर्वपर्यायस्य च्छेदः, महाव्रतेषूपस्थापनं चात्मनो यत्र तच्छेदोपस्थापनमित्यर्थः । एतदपि द्विधा– सातिचारम्, अनतिचारं च । तत्रानतिचारं यदित्वरसामायिकस्य[x] शिष्यस्योपस्थापनायामारोप्यते; तीर्थान्तरसंक्रान्तौ वा, यथा पार्श्वनाथतीर्थाद् महावीरतीर्थे संक्रामतः पञ्चयामधर्मप्रतिपत्ताविति । सातिचारं तु मूलगुणघातिनो यत्पुनरपि महाव्रतारोपणमिति ।

तृतीयं तु चारित्रं परिहारविशुद्धिकम् । तत्र परिहरणं परिहारस्तपोविशेषः, तेन कर्मनिर्जरारूपा विशुद्धिर्यस्मिंश्चारित्रे तत् परिहारविशुद्धिकम् । एतदपि द्विभेदम्– निर्विशमानकम्, निर्विष्टकायिकं च । तत्रास्यैव चारित्रस्यासेवकाः साधवो निर्विशमानका उच्यन्ते, तदव्यतिरेकादिदमपि चारित्रं निर्विशमानकं भण्यते । आसेवितैतच्चारित्रकायास्तु मुनयो निर्विष्टकायाः, त एव स्वार्थिकप्रत्ययोपादानाद् निर्विष्टकायिकाः, तदभेदादिदमपि चारित्रं निर्विष्टकायिकम् । एतत्स्वरूपं च विस्तरतो भाष्येऽभिधास्यत इति ।

'तथा' इत्यानन्तर्ये, गाथाभङ्गभयाद् व्यवहितस्योपन्यासः, 'सूक्ष्मम्' इत्यनुस्वारोऽप्यलाक्षणिकः । सूक्ष्मसंपरायं चतुर्थं चारित्रम् । तत्र संपर्येत्येभिः संसारमिति संपरायाः कषायाः, सूक्ष्मा लोभांशावशेषत्वात् संपराया यत्र तत् सूक्ष्मसंपरायम् । इदमपि द्विविधम्– विशुध्यमानकं संक्लिश्यमानकं च । तत्र विशुध्यमानकं क्षपको-पशमश्रेणिद्वयमारोहतो भवति । संक्लिश्यमानकं तूपशमश्रेणेः प्रच्यवमा-

---

१ सामायिकमत्र प्रथमं छेदोपस्थापनं भवेद् द्वितीयम् । परिहारविशुद्धिकं तथा सूक्ष्मसंपरायं च ॥ १२६० ॥ x शिक्षकस्य
ततश्च यथाख्यातं ख्यातं सर्वस्मिञ्जीवलोके । यच्चरित्वा सुविहिता व्रजन्त्यजरा-मरं स्थानम् ॥ १२६१ ॥

नस्य प्राप्यते । चः समुच्चये । ततश्च सूक्ष्मसंपरायानन्तरं सर्वत्र साधुजीवलोके ख्यातं प्रसिद्धं यथाख्यातं पञ्चमं सर्वविशुद्धं चारित्रं भवति । तत् कथम्भूतम् ?, इत्याह– यच्चरित्वाऽऽसेव्य, शोभनं विहितमनुष्ठानं येषां ते सुविहिताः सुसाधवो व्रजन्त्यजरा-मरं मोक्षलक्षणं स्थानम् । तत्र मरणं मरः । स्वरान्तत्वादल्प्रत्ययः । न विद्यते जरा-मरौ यत्र तदजरा-मरम् । इदं च कषायोदयरहितत्वात् क्षीणमोहोपशान्तमोहलक्षणस्य च्छद्मस्थवीतरागस्य सयोग-ऽयोगिकेवलिनश्च भवति ॥ इति निर्युक्तिगाथाद्वयसंक्षेपार्थः ॥ १२६० ॥ १२६१ ॥

विस्तरार्थं तु भाष्यकृदाह—

सव्वमिणं सामाइयं छेयाइविसेसओ पुणो भिन्नं । अविसेसियमाइमयं ठियमिह सामन्नसन्नाए ॥१२६२॥
सावज्जजोगविरइ त्ति तत्थ सामाइयं दुहा तं च । इत्तरमावकहं ति य पढमं पढमं-तिमजिणाणं ॥१२६३॥
तित्थेसुमणारोवियवयस्स सेहस्स थोवकालीयं । सेसाणमावकहियं तित्थेसु, विदेहयाणं च ॥ १२६४ ॥

सर्वमपीदं चारित्रमविशेषतः सामायिकमेव । एतदेव च च्छेदादिविशेषैर्विशेष्यमाणमर्थतः संज्ञातश्च नानात्वं प्रतिपद्यते । तत्राद्यं विशेषणाभावात् सामान्यसंज्ञायामेवावतिष्ठते सामायिकमिति । तत्र सावद्ययोगविरतिस्वरूपमेतत् सामायिकम् । तच्च द्विधा– इत्वरम्, यावत्कथिकं च । तत्रेत्वरं स्वल्पकालीनं भरतै-रावताऽऽद्य-चरमतीर्थकरतीर्थयोरेवानारोपितमहाव्रतस्य[x] शिष्यकस्य द्रष्टव्यम् । यावत्कथिकं यावज्जीविकं भरतै-रावतप्रथम-चरमवर्जशेषतीर्थकरतीर्थसाधूनां, महाविदेहजानां च साधूनामवसेयमिति ॥ १२६२ ॥ १२६३ ॥ १२६४ ॥

अथ प्रेरकः प्राह—

नणु जावज्जीवाए इत्तिरियं पि गहियं मुयंतस्स । होइ पइण्णालोवो जहावकहियं मुयंतस्स ॥ १२६५ ॥

आह– ननु 'करोमि भदन्त ! सामायिकं यावज्जीवम्' इत्येवं व्रतग्रहणकाले इत्वरमपि सामायिकं गृहीतमुपस्थापनायां मुञ्चतः प्रतिज्ञालोपः प्राप्नोति, यावत्कथिकपरित्याग इव ॥ १२६५ ॥

---

१ सर्वमिदं सामायिकं छेदादिविशेषतः पुनर्भिन्नम् । अविशेषितमादिमकं स्थितमिह सामान्यसंज्ञायाम् ॥ १२६२ ॥ x शिक्षकस्य ।
सावद्ययोगविरतिरिति तत्र सामायिकं द्विधा तच्च । इत्वरं यावत्कथमिति च प्रथमं प्रथमा-ऽन्तिमजिनयोः ॥ १२६३ ॥
तीर्थयोरनारोपितव्रतस्य शैक्षस्य स्तोककालिकम् । शेषाणां यावत्कथिकं तीर्थेषु, विदेहजानां च ॥ १२६४ ॥ २ क. ग. 'यमह' ।
३ ननु यावज्जीवमित्वरमपि गृहीतं मुञ्चतः । भवति प्रतिज्ञालोपो यथा यावत्कथिकं मुञ्चतः ॥ १२६५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अत्रोत्तरमाह—

[1]नणु भणियं सव्वं चिय सामाइयमिणं विसुद्धिओ भिन्नं । सावज्जविरइमइयं को वयलोवो विसुद्धीए ?॥१२६६॥

ननूक्तं सर्वमेवेदं चारित्रमविशेषतः सावद्ययोगविरतिसामान्यात् सामायिकमेव, छेदादिविशुद्धिविशेषैर्विशेष्यमाणमन्यथात्वं प्रतिपद्यते । ततः को नाम विशिष्टतरायां विशुद्धौ प्रतिपद्यमानायां व्रतलोपः ?— न कश्चिदित्यर्थः ॥ १२६६ ॥

कुतः ?, इत्याह—

[2]उज्झियकखमओ भंगो जो पुण तं चिय करेइ सुद्धयरं । सन्नामित्तविसिट्ठं सुहुमं पिव, तस्स को भंगो ? ॥१२६७॥

उज्झितकामतः प्रव्रज्यात्यागमेव कुर्वतो व्रतभङ्गो भवति । यः पुनस्तदेव प्राग् गृहीतं चारित्रं विशुद्धतरं संपादयति, संज्ञामात्रेण तु चारित्रं विशिष्टं भिन्नम्, तस्य भङ्गो न भवति, किन्तु सुतरामेव व्रतनैर्मल्यं संपद्यते । यथा सामायिकसंयतस्य 'सुहुमं ति' सूक्ष्मसंपरायं प्रतिपद्यमानस्य, च्छेदोपस्थापनीयस्य वा परिहारविशुद्धिकमङ्गीकुर्वतो व्रतनिर्मलत्वमिति ॥ १२६७ ॥

छेदोपस्थापनीयस्य व्याख्यामाह—

[3]पेरियायस्स य छेओ जत्थोवट्ठावणं वएसुं च । छेओवट्ठावणमिह तमणइयारे-यरं दुविहं ॥१२६८॥

सेहस्स निरइयारं तित्थंतरसंकमे च तं होज्जा । मूलगुणघाइणो साइयारमुभयं च ठियकप्पे ॥१२६९॥

'जत्थ त्ति' यत्र चारित्रे पूर्वपर्यायस्य च्छेदः, व्रतेषु चोपस्थापनं विधीयते, तदिह च्छेदोपस्थापनम् । तच्च द्विधा— सातिचारम्, अनतिचारं च । तत्र [x]शिष्यकस्योपस्थापनायां, तीर्थान्तरसंक्रान्तौ वा यदारोप्यते तद् निरतिचारं भवेत् । यत्तु मूलगुणघातिनः पुनरपि समारोप्यते तत् सातिचारम् । एतच्चोभयमपि स्थितकल्प एव भवति, न स्थितास्थितकल्पे । तत्र भरतै-रावतप्रथम-चरमतीर्थकरसाधूनां स्थितकल्पः—

---

१ ननु भणितं सर्वमेव सामायिकमिदं विशुद्धितो भिन्नम् । सावद्यविरतिमयं को व्रतलोपो विशुद्धौ ? ॥ १२६६ ॥ [x] शिक्षकस्य-।

२ उज्झितकामतो भङ्गो यः पुनस्तदेव करोति शुद्धतरम् । संज्ञामात्रविशिष्टं सूक्ष्ममिव, तस्य को भङ्गः ? ॥ १२६७ ॥

३ पर्यायस्य च च्छेदो यत्रोपस्थापनं व्रतेषु च । छेदोपस्थापनमिह तदनतिचारे-तरं द्विविधम् ॥ १२६८ ॥
शैक्षस्य निरतिचारं तीर्थान्तरसंक्रमे च तद् भवेत् । मूलगुणघातिनः सातिचारमुभयं च स्थितकल्पे ॥ १२६९ ॥

"[1]आचेलक्कु-द्देसिअ-सेज्जायर-रायपिंड-किइकम्मे । वय-जि ट्ठ-पडिक्कमणे मासं पज्जोसणाकप्पे ॥ १ ॥"

इत्येतस्मिन् दशविधेऽपि कल्पे तेषां स्थितत्वात् । भरतै-रावतशेषद्वाविंशतितीर्थकरसाधूनां, महाविदेहार्हत्साधूनां च स्थितास्थितकल्पः-

"[2]सिज्जायरपिंडम्मि चाउज्जामे य पुरिसजेट्ठे य । किइकम्मस्स य करणे चत्तारि अवट्ठिया कप्पा ॥ १ ॥"

एतेषु चतुर्षु कल्पेषु नियमेन तेषामपि स्थितत्वात्, शेषेषु तु षट्सु नियमाभावेनाऽस्थितत्वादिति ॥ १२६८ ॥ १२६९ ॥

अथ परिहारविशुद्धिकं विवृणोति—

[3]परिहारेण विसुद्धं सुद्धो वा तओ जहिं विसेसेण । तं परिहारविसुद्धं परिहारविसुद्धियं नाम ॥ १२७० ॥

तं दुविगप्पं निव्विस्समाण-निव्विट्ठकाइयवसेणं । परिहारिया-णुपरिहारियस्स कप्पट्ठियस्स वि य ॥१२७१॥

परिहारस्तपोविशेषः, तेन विशुद्धं परिहारविशुद्धम्, अथवा, तकोऽसौ परिहारो विशेषेण शुद्धो यत्र तत्परिहारविशुद्धम्, तदेव स्वार्थिकप्रत्ययोपादानात् परिहारविशुद्धिकं नामेति । एतच्च निर्विशमान-निर्विष्टकायिकभेदाद् द्विविधम् । कस्य पुनरेतच्चारित्रं भवति ?, इत्याह— 'परिहारिएत्यादि' इदमुक्तं भवति— नवको गण इदं प्रतिपद्यते, तद्यथा— चत्वारः परिहारिकाः, चत्वारश्चानुपरिहारिकाः एकस्तु कल्पस्थितः । तत्र परिहारिकाणां तदासेवकत्वादिदं निर्विशमानकमुच्यते, अनुपहारिकाणां कल्पस्थितस्य च विहितवक्ष्यमाणतपसां निर्विष्टकायिकमभिधीयत इति ॥ १२७० ॥ १२७१ ॥

'परिहारेण तपसा विशुद्धम्' इत्युक्तम्, किं पुनरिह परिहारः ?, इत्याह—

[4]परिहारो पुण परिहारियाण सो गिम्ह-सिसिर-वासासु । पत्तेयं तिविगप्पो चउत्थयाई तवो नेओ ॥१२७२॥

---

१ आचेलक्यौ-द्देशिक-शय्यातर-राज-पिण्ड-कृतिकर्माणि । व्रत-ज्येष्ठ-प्रतिक्रमणानि मासं पर्यूषणाकल्पः ॥ १ ॥ x (परिहारि-)

२ शय्यातरपिण्डे चातुर्यामे च पुरुषज्येष्ठे च । कृतिकर्मणश्च करणे चत्वारोऽवस्थिताः कल्पाः ॥ १ ॥

३ परिहारेण विशुद्धं शुद्धो वा सको यत्र विशेषेण । तत् परिहारविशुद्धं परिहारविशुद्धिकं नाम ॥ १२७० ॥
तद् द्विविकल्पं निर्विशमान-निर्विष्टकायिकवशेन । परिहारिका-नुपरिहारिकाणां कल्पास्थितस्यापि च ॥ १२७१ ॥

४ परिहारः पुनः परिहारिकाणां स ग्रीष्म-शिशिर-वर्षासु । प्रत्येकं त्रिविकल्पश्चतुर्थादि तपो ज्ञेयः ॥ १२७२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]गिम्ह-सिसिर-वासासुं चउत्थयाईणि बारसंताइं । अड्ढावक्कंतीए जहण्ण-मज्झिमु-क्कोसयतवाणं ॥१२७३॥

स च परिहारस्तपः पुनः परिहारिकाणां प्रस्तुततपो वोढृणां ग्रीष्म-शिशिर-वर्षासु प्रत्येकं जघन्यादित्रिविकल्पश्चतुर्थादि तपो ज्ञेय इति । एतदेव व्यक्तीकरोति– 'गिम्हेत्यादि' ग्रीष्म-शिशिर-वर्षासु चतुर्थादीनि द्वादशान्तानि तपांसि विज्ञेयानि । कया ? । अर्धापक्रान्त्या । केषां याऽर्धापक्रान्तिः ?, इत्याह– जघन्य-मध्यमो-त्कृष्टतपसाम् । इदमुक्तं भवति– ग्रीष्मे सामान्येनैवोष्णकाले जघन्यं तपश्चतुर्थं ते कुर्वन्ति, मध्यमं तु षष्ठम्, उत्कृष्टं पुनरष्टमम् । स्थापना– १ । २ । ३ ॥ एतदेवार्धापक्रान्त्या शिशिरे कुर्वन्ति । तत्रार्धस्याऽसमप्रविभागरूपस्यैकदेशस्य वैकादिपदात्मकस्यापक्रमणमवस्थानम्, शेषस्य तु द्व्यादिपदसंघातरूपस्यैकदेशस्योर्ध्वं गमनं यस्यां रचनायां सा समयपरिभाषयाऽर्धापक्रान्तिरुच्यते । तत्र चतुर्थ-षष्ठा-ऽष्टमानि ग्रीष्मे प्रोक्तानि । एतेषां मध्यादेकदेशश्चतुर्थलक्षणोऽपक्रामत्यवतिष्ठते, शेषं तु षष्ठा-ऽष्टमपदद्वयमूर्ध्वं शिशिरे गच्छति, तृतीयं तु दशमलक्षणं पदं मील्यते । ततश्च जघन्यतः षष्ठं, मध्यमतोऽष्टमम्, उत्कृष्टतस्तु दशमं शिशिरे कुर्वन्तीति सिद्धं भवति– २ । ३ । ४ ॥ एतेषां मध्यादेकदेशः षष्ठलक्षणोऽपक्रामति, अष्टम-दशमे तूर्ध्वं वर्षासु गच्छतः, तृतीयं स्वग्रेतनं द्वादशं मील्यते । ततश्च जघन्यतोऽष्टमम्, मध्यमतस्तु दशमम्, उत्कृष्टतस्तु द्वादशं तपो वर्षासु कुर्वन्ति– ३ । ४ । ५ ॥ तदत्र पदत्रयमध्यादेकदेशापक्रान्त्याऽर्धापक्रान्तिरुक्ता ॥ १२७२ ॥ १२७३ ॥

नन्वेवं परिहारिकास्तावदिदमुक्तस्वरूपं तपः कुर्वन्ति, अनुपरिहारिक-कल्पस्थितानां तु का वार्ता ? इत्याह—

[2]सेसा उ नियमभत्ता पायं भत्तं च ताणमायामं । होइ नवण्हं वि नियमा न कप्पए सेसयं सव्वं॥१२७४॥

शेषाः पुनरनुपरिहारिक-कल्पस्थिताः पञ्चापि प्रायो नियतभक्ता नित्यभोजिनो भवन्ति । प्रायोग्रहणाद् निजेच्छया कदाचिदुपवासमपि कुर्वन्ति । भक्तं च तेषां सर्वदैवाऽनुपरिहारि[3]-कल्पस्थितानां पारणके परिहारिकाणां च सर्वेषामाचाम्लमेव भवति । शेषं तु विकृति-लेपकृदादिकं वस्तु सर्वं नवानामपि नियमाद् न कल्पत इति ॥ १२७४ ॥

कियन्ति दिनानि केनेदं तपः कर्तव्यम् ?, इत्याह—

[3]परिहारिया-ऽणुपरिहारियाण कप्पट्ठियस्स वि य भत्तं । छ छम्मासा उ तवो अट्ठारसमासिओ कप्पो॥१२७५॥

---

१ ग्रीष्म-शिशिर-वर्षासु चतुर्थकादीनि द्वादशान्तानि । अर्धापक्रान्त्या जघन्य-मध्यमो-त्कृष्टतपसाम् ॥ १२७३ ॥

२ शेषास्तु नियतभक्ताः प्रायो भक्तं च तेषामाचाम्लम् । भवति नवानामपि नियमाद् न कल्पते शेषकं सर्वम् ॥ १२७४ ॥

३ परिहारिका-ऽनुपरिहारिकाणां कल्पस्थितस्यापि च भक्तम् । षट् षट् मासांस्तु तपोऽष्टादशमासिकः कल्पः ॥ १२७५ ॥

एवमुक्तप्रकारेण परिहारिकाणाम्, अनुपरिहारिकाणाम्, कल्पस्थितस्यापि च भक्तं भोजनमाचाम्लेन भवतीति शेषः, षट् षट् मासान् यथोक्तरूपं तपश्च यथायोगं वक्तव्यम् । तत्र परिहारिकास्तावद् ग्रीष्मादिषु पारणके आचाम्लपरिगृहीतचतुर्थादिक्रमेण षट् मासान् यावत् तपः कुर्वन्ति । ततश्चानुपरिहारिकाः परिहारिकत्वं प्रतिपद्येत्थमेव षट् मासान् यावत् तपः कुर्वन्ति । परिहारिकाश्च विहितपसस्तेषामनुपरिहारिकत्वमनुचरत्वं प्रतिपद्यन्ते । ततश्च कल्पस्थित एक एव परिहारिकत्वं प्रतिपद्येत्थमेव षट् मासान् यावत् तपः करोति, एकस्त्वितरेषां मध्यात् कल्पस्थितो वाचनाचार्यो भवति, शेषास्तु सप्ताऽनुचरा भवन्ति । एवमयं परिहारविशुद्धिककल्पोऽष्टादशभिर्मासैः समर्थ्यते ॥ १२७५ ॥

कल्पसमाप्तौ ते किं कुर्वन्ति ?, इत्याह— (त्रिय)

[1]कप्पसमत्तीए तयं जिणकप्पं वाउविंति गच्छं वा । ठियकप्पे नियमा दो पुरिसजुगाइं ते होंति ॥१२७६॥

कल्पसमाप्तौ चैषां त्रयी गतिः, तद्यथा– कदाचित् पुनरपि 'तयं ति' तमेव परिहारविशुद्धिककल्पं प्रतिपद्यन्ते, जिनकल्पं वाऽभ्युपगच्छन्ति, गच्छं वा पुनरप्युपयान्ति प्रविशन्ति । ते च परिहारविशुद्धिका नियमेन स्थितिकल्पे भरतै-रावतप्रथमा-ऽन्तिमजिनतीर्थे द्वे एव पुरुषयुगे यावद् भवन्ति, तीर्थकरसमीपे चामुं कल्पं प्रतिपद्यन्ते– तीर्थकरसमीपे प्रतिपन्नाः, अन्यसमीपे वा, नान्यत्रेत्यर्थः । तदेवमभिहितं परिहारविशुद्धिकचारित्रम् ॥ १२७६ ॥

अथ सूक्ष्मसंपरायचारित्रमाह—

[2]कोवाइ संपराओ तेण जओ संपरीइ संसारं । तं सुहुमसंपरायं सुहुमो जत्थावसेसो सो ॥ १२७७ ॥

सेढिं विलग्गओ तं विसुज्झमाणं तओ चयंतस्स । तह संकिलिस्समाणं परिणामवसेण विन्नेयं ॥१२७८॥

क्रोधादिः कषायवर्गः संपराय उच्यते । कुतः ?, इत्याह– यतः संपरैति पर्यटति संसारमनेनेति संपरायः सूक्ष्मोऽवशेषो यत्र तत् सूक्ष्मसंपरायम् । तच्च श्रेणिं विलगत आरोहतो विशुध्यमानकं भवति । तथा, तस्याः प्रच्यवमानस्य संक्लिश्यमानकं परिणामवशेन तद् विज्ञेयमिति ॥ १२७७ ॥ १२७८ ॥

---

१ कल्पसमाप्तौ तज्जिनकल्पं वोपयन्ति गच्छं वा । स्थितकल्पे नियमाद् द्वे पुरुषयुगे ते भवन्ति ॥ १२७६ ॥ (त्रि)

२ कोपादिः संपरायस्तेन यतः संपर्येति संसारम् । तत् सूक्ष्मसंपरायं सूक्ष्मो यत्रावशेषः सः ॥ १२७७ ॥
श्रेणिं विलगतस्तद् विशुध्यमानं ततश्च्यवमानस्य । तथा संक्लिश्यमानं परिणामवशेन विज्ञेयम् ॥ १२७८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ यथाख्यातचारित्रं विवृण्वन्नाह—

[1]अहसद्दो जाहत्थे आङोऽभिविहीए कहियमक्खायं । चरणमकसायमुदितं तमहक्खायं जहक्खायं ॥१२७९॥

'अथ' इत्ययं याथातथ्यार्थे, आङ् अभिविधौ । ततश्च याथातथ्येन, अभिविधिना वाख्यातं कथितं तदकषायं चरणं तदथाख्यातं यथाख्यातं चोदितमिति ॥ १२७९ ॥

एतच्च कतिविधम् ?, इत्याह—

[2]तं दुविगप्पं छउमत्थ-केवलिविहाणओ पुणेक्केक्कं । खय-वसमज-सजोगा-ऽजोगिकेवलिविहाणओ दुविहं ॥१२८०॥

तच्च यथाख्यातचारित्रं छद्मस्थ-केवलिस्वामिभेदाद् द्विभेदम् । छद्मस्थसंबन्धि पुनरपि द्विविधम्– मोहक्षयसमुत्थम्, तदुपशममभवं च । केवलिसंबन्ध्यपि सयोग्य-ऽयोगिकेवलिभेदतो द्विविधमेवेति ॥ १२८० ॥

अथ पूर्वोक्तं निगमयन्, उत्तरनिर्युक्तिगाथां च संबन्धयन्नाह—

[3]भणियं खओवसमओ अहुणोवसमेण लहइ जह जीवो । सामइयं तं भण्णइ सो जं च खओवसमपुव्वो॥१२८१॥

तदेवं 'सत्तण्हं पयडीणं अब्भिंतरओ कोडकोडीए' इत्यादिना भणितः क्षयोपशमात् सामायिकलाभः । अधुना तु 'अण-दंस-नपुंसि-त्थी' इत्यादिना वक्ष्यमाणाद् यथा मोहोपशमात् सामायिकं लभ्यते तद् भण्यते । किमिति प्रथमं क्षयोपशमात् तल्लाभ उक्तः ?, इत्याह– 'सो जं चेत्यादि' स यस्माद् वक्ष्यमाण उपशमः क्षयोपशमपूर्वः । पूर्वं हि मोहनीयक्षयोपशमात् सम्यक्त्वादिकं लभ्यते, पश्चाच्चोपशमश्रेणिः । अतोऽनेनैव क्रमेणैतदभिधानम् । इत्येका पातना ॥ १२८१ ॥

अथ पातनान्तरमाह—

[4]अहवा खओवसमओ चरणतियं उवसमेण खयओ वा । सुहुमा-हक्खायाइं तेणोवसम-क्खया कमसो ॥१२८२॥

---

१ क. ग. 'ख्यातं वि' । २ अथशब्दो याथार्थ्ये आङभिविधौ कथितमाख्यातम् । चरणमकषायमुदितं तदथाख्यातं यथाख्यातम् ॥ १२७९ ॥ ×(सामायिकं)

३ तद् द्विविकल्पं छद्मस्थ-केवलिविधानतः पुनरेकैकम् । क्षयो-पशमज-सयोग्य-ऽयोगिकेवलिविधानतो द्विविधम् ॥ १२८० ॥

४ भणितं क्षयोपशमतोऽधुनोपशमेन लभते यथा जीवः । सामायिकं तद् भण्यते स यच्च क्षयोपशमपूर्वः ॥ १२८१ ॥ ५ गाथा ११९३ ।

६ गाथा १२८४ । ७ अथवा क्षयोपशमतश्चरणत्रिकमुपशमेन क्षयतो वा । सूक्ष्मा-ऽख्याते तेनोपशम-क्षयौ क्रमशः ॥ १२८२ ॥

अथवा, आद्यं चारित्रत्रयं कषायाणां क्षयोपशमादुक्तम्, उपलक्षणत्वात् क्षयात्, उपशमाच्चेति । सूक्ष्मसंपराय-यथाख्यातचारित्रद्वयं तु यस्मादुपशमेन, क्षयेण वा लभ्यत इत्युक्तम्, तेन तस्मात् कारणात् तावेवोपशम-क्षयौ क्रमेण भण्येते । यो हि श्रेणिद्वयमुपलप्स्यते स पूर्वमुपशमश्रेणिं करोति, पश्चात्तु क्षपकश्रेणिम्, इत्यमुं क्रममाश्रित्य युगपद् द्वयाभिधाने प्राप्तेऽपि प्रथममत्रोपशमश्रेणी, पश्चात्तु क्षपकश्रेणी वक्ष्यत इति भावः ॥ १२८२ ॥

अथ तृतीयामपि पातनामाह—

[1]सेढिगयस्स सुहुमं सेढीओ निग्गयस्सहक्खायं । सा उवसम-क्खयओ पढमं तत्थोवसमसेढी ॥१२८३॥

'वा' इत्यथवा, श्रेण्यन्तर्भाविनः सूक्ष्मसंपरायमुक्तम्, तद्विनिर्गतस्य तु यथाख्यातम्, अतः श्रेणिद्वयं भणनीयमायातम्, उभयश्रेणिलाभे चोपशमश्रेणिमेवादौ कुरुते, इति सैव तावत् प्रथममुच्यते ॥ इति द्वाविंशतिगाथार्थः ॥ १२८३ ॥

तामेव विहितप्रस्तावनामुपश्रेणिमाह—

[2]अण-दंस-नपुंस-त्थीवेय-च्छक्कं च पुरिसवेयं च । दो दो एगंतरिए सरिसे सरिसं उवसमेइ ॥१२८४॥

इहोपशमश्रेणिप्रारम्भकोऽप्रमत्तसंयतो भवतीति केचित् । अविरत-देशविरत-प्रमत्ता-ऽप्रमत्तसंयतानामन्यतर इत्यन्ये । श्रेणेः समाप्तौ च निवृत्तोऽप्रमत्तगुणस्थाने प्रमत्तगुणस्थाने वाऽवतिष्ठते, कालगतस्तु देवेष्वविरतो वा भवति । कार्मग्रन्थिकाभिप्रायेण तु प्रतिपतितोऽसौ मिथ्यादृष्टिगुणस्थानकमपि यावद् गच्छति । तत्रेत्थमेतामारभते– 'अण त्ति' । 'अण-रण-' इत्यादिदण्डकधातुः । अणन्तीवाऽविकलहेतुत्वेनाऽसातवेद्यम्, नारकाद्यायुष्कं च शब्दयन्त्याकारयन्तीत्यणा आद्याः क्रोधादयश्चत्वारः कषायाः । अथवा,'अण त्ति' प्राकृतत्वेन अनाः, एकदेशेन समुदायस्य गम्यमानत्वादनन्तानुबन्धिनस्त एवाऽऽद्याः क्रोधादयश्चत्वारः कषाया इत्यर्थः । तत्राऽसौ प्रतिपत्ता प्रशस्तेष्वध्यवसायस्थानेषु वर्तमानः प्रथमं युगपदन्तर्मुहूर्तमात्रेण कालेनाऽनन्तानुबन्धिनः क्रोधादीनुपशमयति । 'दंस त्ति' दर्शनं दर्शः, तच्च दर्शनं मिथ्यात्व-मिश्र-सम्यक्त्वभेदात् त्रिविधम् । ततोऽनन्तानुबन्ध्युपशमानन्तरमेतदपि युगपदन्तर्मुहूर्तेनोपशमयति । ततो यदा पुरुषः श्रेणिसमारम्भको भवति, तदानुदीर्णमपि 'नपुंस त्ति' नपुंसकवेदमन्तर्मुहूर्तेनोपशमयति, ततः स्त्रीवेदमन्तर्मुहूर्तेन,

---

१ क.ग. 'यमपि ल' । २ श्रेणिगतस्य सूक्ष्मं श्रेणीतो निर्गतस्याऽख्यातम् । सोपशम-क्षयतः प्रथमं तत्रोपशमश्रेणिः ॥ १२८३ ॥ ∧ (मुपशाम-)

३ अन-दर्श-नपुंसक-स्त्रीवेद-षट्कानि च पुरुषवेदं च । द्वौ द्वावेकान्तरितौ सदृशौ सदृशमुपशमयति ॥ १२८४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततो हास्य-रत्य-ऽरति-शोक-भय-जुगुप्सालक्षणं हास्यादिषट्कं युगपदन्तर्मुहूर्तेन, ततः पुरुषवेदमन्तर्मुहूर्तेन । अथ स्त्री प्रारम्भिका, ततः प्रथमं नपुंसकवेदम् , ततः पुरुषवेदम् , ततो हास्यादिषट्कं, ततः स्त्रीवेदमुपशमयति, इत्येवं द्रष्टव्यम् । अथ नपुंसकः प्रारम्भकः, ततोऽसावनुदीर्णमपि प्रथमं स्त्रीवेदमुपशमयति, ततः पुरुषवेदम् , ततः षट्कम् , ततो नपुंसकवेदम् , इत्येष क्रमः । अत ऊर्ध्वं द्वौ द्वौ क्रोधाद्यावेकान्तरितौ संज्वलनक्रोधादिव्यवहितौ, सदृशौ क्रोधादित्वेन परस्परं तुल्यौ सदृशं युगपदेव प्रत्येकमन्तर्मुहूर्तेनोपशमयति । एतदुक्तं भवति— अप्रत्याख्यान-प्रत्याख्यानावरणौ क्रोधौ क्रोधरूपतया सदृशौ सदृशं युगपदन्तर्मुहूर्तेनोपशमयति, ततः संज्वलनं क्रोधमेकाकिनमेकान्तर्मुहूर्तेनोपशमयति । ततोऽप्रत्याख्यान-प्रत्याख्यानावरणौ मानौ मानरूपतया सदृशौ सदृशं युगपदेव, ततः संज्वलनं मानम् , ततोऽप्रत्याख्यान-प्रत्याख्यानावरणमायाद्वयं मायारूपतया सदृशम् , ततः संज्वलनां मायाम् ; ततोऽप्रत्याख्यान-प्रत्याख्यानावरणलोभद्वयं लोभरूपतया सदृशं युगपदुपशमयति, ततः संज्वलनं लोभम् । अमुं चोपशमयंस्त्रिधा करोति— द्वौ भागौ युगपदुपशमयति; तृतीयं तु भागं संख्येयानि खण्डानि करोति, तान्यपि पृथक् पृथक् कालभेदेनोपशमयति । तत एतेषां संख्येयखण्डानां यच्चरमं[+] खण्डं तदसंख्येयानि खण्डानि करोति । ततः समये समय एकैकं खण्डमुपशमयति । इह च दर्शनसप्तक उपशान्तेऽपूर्वकरणः,[×] निवृत्तिबादरो वाऽभिधीयते । तत ऊर्ध्वमनिवृत्तिबादरो यावत्संख्येयखण्डानां चरमखण्डम् । चरमसंख्येयखण्डनिष्पन्नानि त्वसंख्येयखण्डान्युपशमयन् सूक्ष्मसंपरायः । तदेवमन्तर्मुहूर्तेन संज्वलनं लोभमपि सर्वमुपशमयति । एवं सर्वत्र प्रत्येकमन्तर्मुहूर्तमुपशमकालः । सर्वापि चेयं श्रेणिर्महताऽन्तर्मुहूर्तेन समर्थ्यते ।

अस्याश्च श्रेणेरनन्तानुबन्धिचतुष्टयादीनां प्रत्येकं शून्यस्थापनया स्वरूपं भावनीयम् । तत्रानन्तानुबन्धिचतुष्टयस्थापने चत्वारि शून्यानि तिर्यग् व्यवस्थाप्यन्ते, तद्यथा— ० ० ० ० । एषामुपशमस्य प्रारम्भो निष्ठा च समकालमेव, इति तिर्यक्समतया स्थाप्यन्ते । एवमुत्तरत्रापि तिर्यक्समस्थापनायां भावार्थोऽवसेयः । एतदुपरि तिर्यक्समशून्यत्रयेण दर्शनत्रयं स्थाप्यते— ० ० ० । एतदुपर्येकस्य वेदकस्यैकं शून्यम् , तदुपरि द्वितीयस्य द्वितीयम्— ०। तदुपरि हास्यादिषट्कं समश्रेण्या तिर्यक् स्थाप्यते— ० ० ० ० ० ० । एतदुपरि तृतीयवेदशून्यम् , तदुपर्यपि तिर्यक्क्रोधशून्यद्वयम्— ० ० । एतदुपरि संज्वलनक्रोधस्य शून्यम्— ० । एतदुपरि तिर्यग्मानद्वयस्य शून्यद्वयम्— ० ० । तदुपरि मानस्यैकं शून्यम्— ० । तदुपरि मायाद्वयस्य तिर्यक् शून्यद्वयम्— ० ० । तदुपरि मायायाः शून्यम्— ० । तदुपरि लोभद्वयस्य तिर्यगेव शून्यद्वयम्— ० ० । एतदुपरि संज्वलनस्य लोभस्यैकं शून्यम्— ० । एवमूर्ध्वं स्थापनां विधाय सर्वं भावनीयम् ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥ १२८४ ॥ × नियर्त्ति-। + (संख्येयतमं)

विस्तरार्थं तु भाष्यकारः प्राह—

[1]उवसामगसेढीए पट्ठवओ अप्पमत्तविरओ उ । पज्जवसाणे सो वा होइ पमत्तो अविरओ वा ॥१२८५॥

अन्ने भणंति अविरय-देस-पमत्ता-ऽपमत्तविरयाणं । अन्नयरो पडिवज्जइ दंसणसमणम्मि उ नियट्टी ॥१२८६॥

द्वे अपि गतार्थे, नवरमविरताद्यप्रमत्तान्तानां मध्यात् केनापि दर्शनसप्तकेनोपशमिते ततो 'नियट्टि त्ति' निवृत्तिबादरो भवतीति ॥ १२८५ ॥ १२८६ ॥

'[2]अण' इत्येतद् व्याख्यातुमाह—

[3]भवमणुबंधंति जओऽणंतमणंताणुबंधिणोऽण त्ति । ते चत्तारि वि समयं समेइ अंतोमुहुत्तेणं ॥ १२८७ ॥

गाथापूर्वार्धस्यान्ते 'अण' इत्येतद्ग्रहणवाक्यम् , अतो व्याख्यानयति— 'भवमित्यादि' भवं संसारमनुबध्नन्तीत्येवंशीला अनन्तानुबन्धिनस्तान् प्रशस्तध्यानतोऽन्तर्मुहूर्तेन युगपदुपशमयति, उदयोद्वर्तनादिकरणाऽयोग्यान् सतोऽप्यसत्कल्पान् करोतीति॥१२८७॥

शेषावयवव्याख्यामाह—

[4]तत्तो य दंसणतिगं तओऽणुइण्णं जहन्नयरवेयं । तत्तो बीयं छक्कं तओ य वेयं [×]सयमुदिन्नं ॥ १२८८ ॥

ततश्चानन्तानुबन्ध्युपशमानन्तरं मिथ्यात्वादिदर्शनत्रिकम् , ततोऽनुदीर्णस्य वेदद्वयस्य मध्ये यो जघन्यो वेदस्तमुपशमयति, ततो द्वितीयम् , ततः षट्कम् , ततो यः कश्चिदुदये वर्तते वेदस्तमुपशमयति । इदमुक्तं भवति— यदि पुरुषः श्रेणिप्रारम्भकः, तदा पुरुषवेदस्तस्योदये वर्तते, स्त्री-नपुंसकवेदौ त्वनुदीर्णौ, तयोश्च मध्ये नपुंसकवेदो जघन्यतरः, ततो दर्शनत्रिकादुपरि प्रथमं तमुपशमयति, ततः स्त्रीवेदम् , उदीर्णं तु पुंवेदं षट्कादुपरि पश्चादुपशमयति । अथ स्त्री प्रारम्भिका, तदा स्त्रीवेदस्तस्या उदये, पुं-नपुंसकवेदौ त्वनुदयावस्थौ । अनयोरपि नपुंसकवेदो जघन्यतरः, इति तं प्रथममुपशमयति, ततः पुंवेदम् , उदीर्णं तु स्त्रीवेदं पश्चात् षट्कादुपर्युपशमयति ।

---

१ उपशमश्रेणौ प्रस्थापकोऽप्रमत्तविरतस्तु । पर्यवसाने स वा भवति प्रमतश्चाविरतो वा ॥ १२८५ ॥ × समउ-।
अन्ये भणन्त्यविरत-देश-प्रमत्ता-ऽप्रमत्तविरतानाम् । अन्यतरः प्रतिपद्यते दर्शनशमने तु निवृत्तिः ॥ १२८६ ॥ २ गाथा १२८४ ।
३ भवमनुबध्नन्ति यतोऽनन्तमनन्तानुबन्धिनोऽत इति । तांश्चतुरोऽपि समकं शमयत्यन्तर्मुहूर्तेन ॥ १२८७ ॥
४ ततश्च दर्शनत्रिकं ततोऽनुदीर्णं जघन्यतरवेदम् । ततो द्वितीयं षट्कं ततश्च वेदं स्वकमुदीर्णम् ॥ १२८८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदा तु नपुंसकः प्रारम्भकः, तदोदीर्णं नपुंसकवेदं षट्कादुपर्युपशमयति, अनुदीर्णं तु स्त्रीवेदं जघन्यतरत्वाद् दर्शनत्रिकादुपरि प्रथममुपशमयति, ततः पुरुषवेदमिति ॥ १२८८ ॥

ततः किम् ?, इत्याह—

[1]मज्झिल्लकसायाणं कोहाइसमाणजाइए दो दो । एक्केक्केणंतरिए संजलणेणं उवसमेइ ॥ १२८९ ॥

अनन्तानुबन्ध्युपशमस्योक्तत्वात् संज्वलनानां तूपशमस्याऽन्तरालेषु भावात्, अर्थाद् मध्यमकषाया अप्रत्याख्यान-प्रत्याख्यानावरणा एवावशिष्यन्ते । तेषां मध्यात् क्रोधादिसमानजातीयौ द्वौ द्वावेकैकेन क्रोधादिसंज्वलनेनान्तरितावुपशमयतीति ॥ १२८९ ॥

अत्र प्रेरकः प्राह—

[2]संजलणाईणं समो जुत्तो, संजोयणादओ जे उ । ते पुव्वं चिय समिया नणु सम्मत्ताइलाभम्मि ॥१२९०॥

ननु संज्वलनकषाय-हास्यादीनामुदयवर्तित्वाच्छमो युक्तः । ये तु संयोजनादयः कषायास्ते पूर्वमेव सम्यक्त्वादिगुणप्राप्तिकाले उपशमिता एव, सम्यक्त्वादिलाभान्यथानुपपत्तेः । अत इदानीं तेषामुपशमाभिधानमयुक्तमेवेति भावः ॥ १२९० ॥

अत्रोत्तरमाह—

[3]आसि खओवसमो सिं समोऽहुणा, भणइ को विसेसो सिं ?। नणु खीणम्मि उइण्णे सेसोवसमे खओवसमो ॥१२९१॥

हन्त ! सम्यक्त्वादिलाभकाले आसीदेषां संयोजनादिकषायाणां क्षयोपशमः, अत इदानीं तेषामुपशमोऽभिधातव्य एव । अथ प्रेरको भणति– ननु क्षयोपशमो-पशमयोः कः किल विशेषः ? । सूरिराह– ननूदीर्णे उदयप्राप्ते कर्मणि क्षीणे, शेषे चानुदीर्णे उपशान्ते सति क्षयोपशमोऽभिधीयत इति ॥ १२९१ ॥

प्रेरकः प्राह—

[4]सो चेव नणूवसमो उइए खीणम्मि सेसए समिए । सुहुमोदयता मीसे न तूवसमिए विसेसोऽयं ॥ १२९२ ॥

---

१ मध्यमकषायाणां क्रोधादिसमानजातीयौ द्वौ द्वौ । एकैकेनान्तरितौ संज्वलनेनोपशमयति ॥ १२८९ ॥

२ संज्वलनादीनां शमो युक्तः, संयोजनादयो ये तु । ते पूर्वमेव शमिता ननु सम्यक्त्वादिलाभे ॥ १२९० ॥

३ आसीत् क्षयोपशम एषां शमोऽधुना, भणति को विशेषोऽनयोः ? । ननु क्षीण उदीर्णे शेषोपशमे क्षयोपशमः ॥ १२९१ ॥

४ स एव ननूपशम उदिते क्षीणे शेषके शमिते । सूक्ष्मोदयता मिश्रे न तूपशमिते विशेषोऽयम् ॥ १२९२ ॥

ननूपशमोऽप्ययमेव, यः । किम् ?, इत्याह– उदिते कर्मणि क्षीणे, अनुदिते तूपशान्ते भवति । अत्रोत्तरमाह– ननु मिश्रे क्षयोपशमे सूक्ष्मोदयताऽस्ति– प्रदेशोदयेन सत्कर्मवेदनमस्तीत्यर्थः । उपशमितेऽपि तु कर्मणि तदपि नास्ति, इत्यतोऽनयोर्विशेष इति ॥१२९२॥

एतदेवाह—

[1]वेएइ संतकम्मं खओवसमिएसु नाणुभावं सो । उवसंतकसाओ पुण वेएइ न संतकम्मं पि ॥ १२९३ ॥

स क्षयोपशमावस्थकषायवाञ्जीवः क्षायोपशमिकेष्वनन्तानुबन्ध्यादिषु तत्संबन्धि सत्कर्माऽनुभवति– प्रदेशकर्म वेदयति, न पुनरनुभावम्– विपाकतस्तु तान् वेदयतीत्यर्थः । उपशान्तकषायस्तु सत्कर्माऽपि न वेदयति, इति क्षयोपशमो-पशमयोर्विशेष इति ॥१२९३॥

पुनरपि परः प्राह—

[2]संजोयणाइयाणं नणूदयो संजयस्स पडिसिद्धो । सच्चमिह सोऽणुभावं पडुच्च न पएसकम्मं तु ॥ १२९४ ॥

ननु संयतस्य संयोजनादिकषायाणामुदयो निषिद्ध एव, तदुदये संयतत्वहानिप्रसङ्गात् । अत्रोत्तरमाह– सत्यम्, अनुभावं रसं विपाकमाश्रित्येहासौ तदुदयो निषिद्धः संयतादीनाम्, न तु प्रदेशकर्म प्रतीत्य ॥ १२९४ ॥

अनुभावविरहिता अपि प्रदेशा नियमेन वेद्यन्त इत्यागमेऽप्यभिहितमेवेति दर्शयन्नाह—

[3]भणियं च सुए जीवो वेएइ नवाणुभावकम्मं ति । जं पुण पएसकम्मं नियमा वेएइ तं सव्वं ॥ १२९५ ॥

नाणुदियं निज्जीरइ नासंतमुदेइ जं तओऽवस्सं । सव्वं पएसकम्मं वेएउं मुच्चए सव्वो ॥ १२९६ ॥

सूत्रेऽपि भगवतीलक्षणे प्रोक्तम् । किम् ?, इत्याह– जीवोऽनुभावकर्म वेदयते, नवा । यत् पुनः प्रदेशकर्म तत् नियमात् सर्वं वेदयतीति । तथा चोक्तम्– "एवं खलु गोयमा ! दुविहे कम्मे पन्नत्ते, तं जहा– पएसकम्मे य, अणुभावकम्मे य । तत्थ णं जं तं

---

१ वेदयति सत्कर्म क्षायोपशमिकेषु नानुभावं सः । उपशान्तकषायः पुनर्वेदयति न सत्कर्मापि ॥ १२९३ ॥

२ संयोजनादिकानां ननूदयः संयतस्य प्रतिषिद्धः । सत्यमिह सोऽनुभावं प्रतीत्य न प्रदेशकर्म तु ॥ १२९४ ॥

३ भणितं च श्रुते जीवो वेदयति नवानुभावकर्मेति । यत्पुनः प्रदेशकर्म नियमाद् वेदयति तत् सर्वम् ॥ १२९५ ॥
नानुदितं निर्जीर्यते नास्तमुदेति यत् ततोऽवश्यम् । सर्वं प्रदेशकर्म वेदयित्वा मुच्यते सर्वः ॥ १२९६ ॥

४ एवं खलु गौतम ! द्विविधं कर्म प्रज्ञप्तम्, तद्यथा– प्रदेशकर्म च, अनुभावकर्म च । तत्र यत् तत् प्रदेशकर्म तदस्त्येकं वेदयति, अस्त्येकं नो वेदयति । १ ध.छ. 'मा मए दु' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पएसकम्मं तं + अत्थेगइयं वेएइ, अत्थेगइयं नो वेएइ " इति । यस्माद् न खल्वनुदितं कर्म निर्जीर्यते, न चासदुदेति, किन्तु सदेवोदेति । यस्मात् सर्वोऽपि मुमुक्षुः सर्वमपि प्रदेशकर्म वेदयित्वैव मुच्यते, नान्यथा । ततः प्रदेशवेद्यानामनन्तानुबन्ध्यादीनामिदानीमुपशमो निरूप्यत इति प्रकृतम् ॥ १२९५ ॥ १२९६ ॥ + (निथमा वेएइ तत्थणं जं अणुभावकम्मं)

पुनरपि परः प्राह—

[1]किह दंसणाइघाओ न होइ संजोयणाइ वेदयओ ?। मंदाणुभावयाए जहाणुभावम्मि वि कहिंचि ॥१२९७॥

निच्चोदिन्नं पि जहा सयलचउण्णाणिणो तदावरणं। न विघाइ मंदयाए पएसकम्मं तहा नेयं ॥ १२९८ ॥

नन्वेवं सति प्रदेशतोऽपि संयोजनादिकषायान् वेदयतः संयतादेः कथं सम्यग्दर्शनादिविघातो न भवति ?। अत्र प्रतिविधानमाह-- मन्दानुभावतया नीरसप्रदेशमात्रवेदनाद् न सम्यक्त्वादिघात इत्यर्थः । यथेह क्वचिदनुभावकर्मापि नातिविघातकं दृष्टम्, तद्यथा– नित्योदितमपि मति-श्रुता-ऽवधि-मनःपर्यायावरणचतुष्टयं संपूर्णचतुर्ज्ञानिनो न मत्यादिज्ञानविघाताय दृष्टम्, मन्दत्वात्; तद्वत् तत्प्रदेशकर्मापि नीरसत्वाद् न दर्शनादिविघातायेति ॥ १२९७ ॥ १२९८ ॥

किञ्च,

[2]किरियाए कुणइ रोगो मंदं पीलं जहाऽवणिज्जंतो। किरियामेत्तकयं चिय पएसकम्मं तहा तवसा ॥१२९९॥

यथेह रोगो × भिषजादिक्रियया विधिवदपनीयमानो मन्दां क्रियामात्रकृतामेवाऽऽतुरस्य पीडां करोति, नानिगुर्वीम्; तद्वत् प्रदेशकर्मापि तपसाऽपनीयमानं तपोरूपक्रियामात्रप्रकृतामेव पीडां करोतीति; तथाहि--नरकगत्यादिकाः कर्मप्रकृतयस्तद्भवसिद्धिकानामपि मुनीनां सत्तायां विद्यन्त एव, न चाननुभूतास्ताः कदाचिदपि क्षीयन्ते, न च तद्भवसिद्धिका नरकादिजन्मविपाकेन ताः समनुभवति, किन्तु तपसा प्रदेशरूपतया समनुभूय ताः क्षपयति । न च वेदयिता काश्चिद् बाधामनुभवति । ततो ज्ञायते– न प्रदेशकर्मवेदनं गुणविघाताय, बाधाकरणं वेति ॥ १२९९ ॥

× (भें) १ कथं दर्शनादिघातो न भवति संयोजनादि वेदयतः ?। मन्दानुभावतया यथानुभावेऽपि कुत्रचित् ॥ १२९७ ॥ ॐ खलु उदितं-।
नित्योदीर्णमपि यथा सकलचतुर्ज्ञानिनस्तदावरणम् । न विघाति मन्दतया प्रदेशकर्म तथा ज्ञेयम् ॥ १२९८ ॥
२ क्रियया करोति रोगो मन्दां पीडां यथाऽपनीयमानः । क्रियामात्रकृतामेव प्रदेशकर्म तथा तपसा ॥ १२९९ ॥

क्रियति कर्मण्युपशान्ते कथंभूतोऽसौ प्रोच्यते ?, इत्याह—

[1]दंसणमोहाईओ भण्णइ अनियट्टिबायरो परओ । जाव उ सेसो संजलणलोभसंखेज्जभागो त्ति ॥१३००॥

स च दर्शनसप्तक उपशमिते तदतीतः सन् परतः शेषं नपुंसकवेदादिकं कर्मोपशमयन्निवृत्तिबादरोऽभिधीयते, यावत् संज्वलनलोभस्य संख्यातमो भागः शेषः । निवृत्तिबादरस्तु न किञ्चिदुपशमयति, इति नेहासौ संगृहीतः ॥ १३०० ॥

ततः किमसौ करोति ?, इत्याह—

[2]तेदसंखेज्जइभागं समए समए समेइ एक्केक्कं । अंतोमुहुत्तमेत्तं तस्सासंखिज्जभागं पि ॥ १३०१ ॥

तमपि संज्वलनलोभस्य संख्येयभागमसंख्येयैः खण्डैः करोति । ततस्तस्य लोभसंख्येयभागस्याऽसंख्यातमममेकैकं भागं समये समय उपशमयति । तस्य च लोभसंख्यातभागस्याऽसंख्याततममपि भागं प्रतिसमयमुपशमयन्नन्तर्मुहूर्तमात्रं कालं सूक्ष्मसंपरायोऽभिधीयत इत्युत्तरगाथायां संबन्धः ॥ इति सप्तदशगाथार्थः ॥ १३०१ ॥

तदेवं सूक्ष्मसंपरायस्वरूपं सविशेषमाह—

[3]लोभाणू वेयंतो जो खलु उवसामओ व खवओ वा। सो सुहुमसंपराओ अहक्खाया ऊणओ किंचि॥१३०२॥

अन्तर्मुहूर्तमात्रं कालं यावत् सूक्ष्मसंपरायोऽभिधीयते । यः किम् ?, इत्याह– 'लोभाणू इत्यादि' लोभसंख्यातभागस्याऽसंख्याततमांशवर्त्यणून् प्रतिसमयं वेदयन् यत उपशमकः क्षपको वा भवति । अयं च लोभांशमात्रावशेषत्वाद् यथाख्याताद् किञ्चिदेव न्यूनः ॥ इति निर्युक्तिगाथार्थः ॥ १३०२ ॥

आह– ननूपशमकाधिकारे किमिति क्षपको निर्दिष्टः ?, इत्याह—

[4]उवसामयाहिगारे तस्समभागो त्ति खवगनिद्देसो । सुहुमसरागातीतो अहक्खाओ होइ निग्गंथो ॥१३०३॥

---

१ दर्शनमोहातीतो भण्यतेऽनिवृत्तिबादरः परतः । यावत्तु शेषः संज्वलनलोभसंख्येयभाग इति ॥ १३०० ॥
२ तदसंख्येयभागं समये समये शमयत्येकैकम् । अन्तर्मुहूर्तमात्रं तस्यासंख्येयभागमपि ॥ १३०१ ॥
३ लोभाणून् वेदयन् यः खलूपशमको वा क्षपको वा । स सूक्ष्मसंपरायोऽथाख्यातादूनकः किञ्चित् ॥ १३०२ ॥
४ उपशमकाधिकारे तत्समभाग इति क्षपकनिर्देशः । सूक्ष्मसरागातीतोऽथाख्यातो भवति निर्ग्रन्थः ॥ १३०३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

उपशमकसूक्ष्मसंपरायस्याधिकारे तत्समभाग इति कृत्वा तत्क्षपकोऽप्ययमेव निर्दिष्टः। यथोपशमश्रेण्यां नवमगुणस्थानकादुपरितनभागे सूक्ष्मसंपरायो भवति, तथा क्षपकश्रेण्यामपि, इति सामानभागत्वादुपशमकाधिकारे लाघवार्थं क्षपकोऽपि निर्दिष्ट इत्यर्थः। उपशमकसूक्ष्मसंपरायश्चैतद्गुणस्थानकादतिक्रान्त उपशान्तमोहनिर्ग्रन्थलक्षणो यथाख्यातो भवति ॥ १३०३ ॥

ततः किम् ?, इत्याह—

[1]बद्धाऊ पडिवन्नो सेढिगओ वा पसंतमोहो वा। जइ कुणइ कोइ कालं वच्चइ तोऽणुत्तरसुरेसु ॥१३०४॥

अनिबद्धाऊ होउं पसंतमोहो मुहुत्तमेत्तद्धं। उइयकसायो नियमा नियत्तए सेढिपडिलोमं ॥ १३०५ ॥

यदि बद्धायुरुपशमश्रेणिं प्रतिपन्नः श्रेणिमध्यगतगुणस्थानकवर्ती वा, उपशान्तमोहो वा भूत्वा कालं करोति, तदा नियमेनानुत्तरसुरेष्वेवोत्पद्यते, श्रेणिप्रतिपतितस्य तु कालकरणेऽनियमः, नानागतित्वेन नानास्थानगमनादिति। अथाऽबद्धायुस्तां प्रतिपद्यते, तदाऽन्तर्मुहूर्तमुपशान्तमोहो भूत्वा ततः कुतश्चिद् निमित्तादुदितकषायः स नियमेन श्रेणिप्रतिलोमं पश्चान्मुखं निवर्तते प्रतिपतति, एतावन्मात्रकालभावित्वादेवास्याः ॥ इति गाथात्रयार्थः ॥ १३०४ ॥ १३०५ ॥

अत एव दुरन्तं कषायसामर्थ्यमुत्कीर्तयन्नाह—

[2]उवसामं उवणीया गुणमहया जिणचरित्तसरिसं पि। पडिवायंति कसाया किं पुण सेसे सरागत्थे? ॥१३०६॥

उपशमनमुपशमस्तमपिशब्दात् क्षयोपशममप्युपनीताः। केनोपशममुपनीताः?, इत्याह— गुणैर्महान् गुणमहान् उपशमकस्तेन गुणमहतोपशमकेन। प्रतिपातयन्ति कषायाः संयमात्, भवे वा। कम्?। तमेवोपशमकम्। कथंभूतम्?। जिनस्य केवलिनश्चारित्रेण कृत्वा सदृशस्तुल्यो जिनचारित्रसदृशः, द्वयोरप्युपशान्त-मोहकेवलिनोः कषायोदयरहितचारित्रयुक्तत्वाज्जिनसमानचारित्र इत्यर्थः, तमेवंभूतमपि। किं पुनः शेषान् सरागस्थान् न प्रतिपातयन्ति?॥ इति निर्युक्तिगाथार्थः ॥ १३०६ ॥

---

१ बद्धायुः प्रतिपन्नः श्रेणिगतो वा प्रशान्तमोहो वा। यदि करोति कोऽपि कालं व्रजति ततोऽनुत्तरसुरेषु ॥ १३०४ ॥
अनिबद्धायुर्भूत्वा प्रशान्तमोहो मुहूर्तमात्रार्धम्। उदितकषायो नियमाद् निवर्तते श्रेणिप्रतिलोमम् ॥ १३०५ ॥

२ उपशममुपनीता गुणमहता जिनचारित्रसदृशमपि। प्रतिपातयन्ति कषायाः किं पुनः शेषान् सरागस्थान्? ॥ १३०६ ॥

भाष्यम्—

[3]दवदड्ढमिवंजणदुमो छारच्छन्नोऽग्गिणि व्व पच्चयओ। दावेइ जह सरूवं तह स कसायोदए सुज्जो ॥१३०७॥

यथा दवाग्निदग्धोऽञ्जनद्रुमः पुनरपि प्रत्ययत उदकाऽऽसेचनादिकारणसंसर्गादङ्कुर-प्रवाल-पत्र-पुष्पादिरूपं निजस्वरूपं दर्शयति, यथा वा भस्मावच्छन्नोऽग्निः प्रत्ययतस्तृणादीन्धनकारणसाहाय्यात् पुनरपि दाहपाकादिकर्तृत्वलक्षणं निजस्वरूपं प्रकटयति, यथा वा मिथ्यापनीतामयोऽपथ्यादिप्रत्ययतः पुनरपि निजस्वभावमाविष्करोति, तथा सोऽप्युपशान्तकषायो जीवः स्वशरीरोपधयादिमूर्च्छादिप्रत्ययतः पुनरपि कषायोदये पूर्वस्वरूपं दर्शयति, यतोऽयमुपशान्तमोहः 'अण्णयरसेढिवज्जं' इत्यादिवचनात् सैद्धान्तिकमतेन तस्मिन्नेव भवे क्षपकश्रेणिं न करोति, तामन्तरेण च न सिध्यति, उत्कृष्टतश्च देशोनार्धपुद्गलपरावर्तरूपं संसारं पर्यटति। तस्माद् विहितोपशमश्रेणिरन्तर्मुहूर्तात् नियमेन प्रतिपततीति ॥ १३०७ ॥

एतदेवाह—

[4]तम्मि भवे निव्वाणं न लभइ उक्कोसओ व संसारं। पोग्गलपरियट्टद्धं देसोणं कोइ हिण्डेज्जा ॥१३०८॥

गतार्था ॥ इति गाथाद्वयार्थः ॥ १३०८ ॥

अहो! महदाश्चर्यम्, यदेकादशं मोक्षप्रासादसोपानमारुह्यापि हतजीवः पुनरपि परिभ्रष्ट एतावद् दुःखमनुभवति, इति विस्मितान्मा गुरुरुपदेशमाह—

[5]जइ उवसंतकसाओ लहइ अणंतं पुणो वि पडिवायं। न हु मे वीससियव्वं थेवे वि कसायसेसम्मि॥१३०९॥

अणथोवं वणथोवं अग्गीथोवं कसायथोवं च। न हु मे वीससियव्वं थेवं पि हु तं बहु होइ ॥१३१०॥

'न हु मे त्ति' नैव भवद्भिर्विश्वसितव्यं स्तोकेऽपि कषायशेषे, किन्तु मिथ्यादुष्कृतादिभिर्झटित्येव ततो निवर्तनीयमिति। अणं ऋणम्। शेषं सुगमम् ॥ इति निर्युक्तिगाथाद्वयम् ॥ १३०९ ॥ १३१० ॥

---

१ दवदग्धाञ्जनद्रुमो भस्मच्छन्नोऽग्निरिव प्रत्ययतः। दर्शयति यथा स्वरूपं तथा स कषायोदये भूयः ॥ १३०७ ॥ २ गाथा १२२३।

३ तस्मिन् भवे निर्वाणं न लभत उत्कृष्टतो वा संसारम्। पुद्गलपरिवर्तार्धं देशोनं कश्चिद् हिण्डेत ॥ १३०८ ॥

४ यदुपशान्तकषायो लभतेऽनन्तं पुनरपि प्रतिपातम्। न हि भवद्भिर्विश्वसितव्यं स्तोकेऽपि कषायशेषे ॥ १३०९ ॥
ऋणस्तोकं व्रणस्तोकमग्निस्तोकं कषायस्तोकं च। न हि भवद्भिर्विश्वसितव्यं स्तोकमपि हि तद् बहु भवति ॥ १३१० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

द्वितीयनिर्युक्तिगाथाभावार्थमाह—

दासत्तं देइ अणं अइरा मरणं वणो विसप्पंतो । सव्वस्स दाहमग्गी दिंति कसाया भवमणंतं ॥१३११॥

स्तोकमपि ऋणं क्रमेण वर्धमानं दासत्वं ददाति, यथा– काचिद् वणिग्दुहिता गृहीतव्रतस्य निजभ्रातुरागतस्य प्रतिदिनं कर्षवृद्ध्या हट्टात् तैलस्य कर्षमानीय दत्तवती । साधुसेवाव्याक्षेपाच्च तया वणिजोऽसौ न दत्तः । वर्धमानश्च क्रमेण घटादिसंख्यां प्राप्तः । तया च कर्षासकर्तनमात्रेणैव जीवनादसौ दातुं न शकितः । ततस्तस्यैव वणिजः सा ऋणदासी संजाता । अन्यदा चामतेन तेनैव बन्धुसाधुना विज्ञातस्तद्व्यतिकरः । कृता च तस्य वणिजो देशना । मोचयित्वा चेयं ग्राहिता दीक्षाम् । इत्येवं[1] दासत्वदायकं स्तोकमपि ऋणम् । स्तोकोऽपि च व्रणशेषोऽपथ्यादिकमासाद्य विसर्पन्नन्तर्बहिश्च प्रसरन्नचिराद् मरणं प्रयच्छति । अग्नेश्च लवोऽपि मार्गादौ पतितस्तृणादिके लग्नः परंपरया क्रमेण प्रसरन् समस्तमपि ग्राम-नगरादिकं निर्दहति । एवं स्तोकशेषा अपि कषायाः कुतश्चिद् निमित्ताद् वृद्धिमुपगच्छन्तोऽनन्तं भवमुपकल्पयन्तीति ॥ १३११ ॥

वक्ष्यमाणगाथाप्रस्तावनार्थमाह—

ओवसमं सामाइयमुइयं खाइयमओ पवक्खामि । सुहुममहक्खायं पि य खयसेढिसमुब्भवं तं च ॥१३१२॥

तदेवमौपशमिकं सामायिकं चारित्रमुक्तम्, इदानीं क्षायिकं तदुच्यते । इत्येका पातना । अथवा, सूक्ष्मसंपरायचारित्रं यथाख्यातचारित्रं चोपशमश्रेण्याश्रितमुक्तम्, इदानीं क्षपकश्रेणिसमुद्भवं तदेवाह ॥ इति गाथाद्वयार्थः ॥ १३१२ ॥

अण-मिच्छ-मीस-सम्मं अट्ठ नपुंस-त्थिवेय-छक्कं च । पुमवेयं च खवेइ कोहाईए य संजलणे ॥ १३१३ ॥

इह क्षपकश्रेणिप्रतिपत्तोत्तमसंहननोऽविरत-देशविरत-प्रमत्ता-ऽप्रमत्तानामन्यतम उत्पन्नविशुद्धपरिणामो विज्ञेयः । तत्र पूर्वधरोऽप्रमत्तः शुक्लध्यानोपगतोऽप्येतां प्रतिपद्यते, शेषास्त्वविरतादयो धर्मध्यानोपगता एव । क्षपणक्रमश्चायम्, तद्यथा– प्रथममन्तर्मुहूर्तेना-

---

१ दासत्वं ददाति ऋणमचिराद् मरणं व्रणो विसर्पन् । सर्वस्य दाहमग्निर्ददति कषाया भवमनन्तम् ॥ १३११ ॥

२ औपशमिकं सामायिकमुदितं क्षायिकमतः प्रवक्ष्यामि । सूक्ष्ममथाख्यातमपि च क्षयश्रेणिसमुद्भवं तच्च ॥ १३१२ ॥

३ अन-मिथ्या-मिश्र-सम्यक्त्वानि अष्ट नपुंसक-स्त्रीवेद-षट्कानि च । पुंवेदं च क्षपयति क्रोधादींश्च संज्वलनान् ॥ १३१३ ॥

नन्तानुबन्धिनश्चतुरोऽपि क्रोधादीन् युगपत् क्षपयति, तदनन्तभागं च मिथ्यात्वे प्रक्षिप्य ततो मिथ्यात्वं सहैव तदंशेन युगपत् क्षपयति; तथाहि– अतिसंभृतो दावानलः खल्वर्धदग्धेन्धन एवेन्धनान्तरमासाद्योभयमपि निर्दहति, एवमसावपि क्षपकस्तीव्रशुभपरिणामत्वात् सावशेषमन्यत्र प्रक्षिप्य क्षपयति । ततस्तथैव सम्यग्मिथ्यात्वम्, ततः सम्यक्त्वम् । इह च यदि बद्धायुः प्रतिपद्यते, अनन्तानुबन्धिक्षये च व्युपरमते, ततः पश्चात् कदाचिद् मिथ्यात्वोदये पुनरप्यनन्तानुबन्धिचतुष्टयं बध्नाति, तस्याऽबन्ध्यतत्कारणत्वात्; क्षीणमिथ्यात्वस्तु तद् न बध्नाति, कारणाभावात् । तस्मिंश्चानन्तानुबन्धिचतुष्टये क्षीणेऽप्रतिपतितशुभपरिणाम एव यदि म्रियते तदा सुरलोकमेव व्रजति एवं दर्शनसप्तकक्षयेऽपि कृते वाच्यम् । प्रतिपतितपरिणामस्तु यदि पश्चाद् म्रियते, तदा नानामतित्वाद् नानागतिको भवति । यदि च बद्धायुरिमां श्रेणिं प्रतिपद्यते तदा दर्शनसप्तकं समस्तमपि क्षपयित्वा नियमाद् व्युपरमत एव, ततो यत्रायुर्बद्धं तत्रोत्पद्यते । यः पुनरबद्धायुः प्रतिपद्यते स निःशेषामप्येतां श्रेणीं समापयत्येव । तस्याश्चायं क्रमः– सम्यक्त्वस्य क्षपितशेषे स्वल्पेऽवतिष्ठमान एवाप्रत्याख्यान-प्रत्याख्यानावरणकषायाष्टकं समकमेव क्षपयितुमारभते । एतैश्चार्धक्षपितैरेवान्याः षोडश कर्मप्रकृतीः क्षपयति, तद्यथा– नरकानुपूर्वी तिर्यगानुपूर्वी, नरकगति-तिर्यग्गतिलक्षणं गतिद्वयम्, पञ्चेन्द्रियजातिवर्जाश्चतस्रश्चाद्या जातयः– एक-द्वि-त्रि-चतुरिन्द्रियजातय इत्यर्थः आतपोद्द्योत-स्थावर-साधारण-सूक्ष्माणि । निद्रानिद्रा-प्रचलाप्रचला-स्त्यानर्धिलक्षणं महानिद्रात्रयम् । एतत्क्षपणोत्तरकालं कषायाष्टकस्य यच्छेषं तत् क्षपयति । ततो नपुंसकवेदम्, ततः स्त्रीवेदम्, ततो हास्यादिषट्कम्, ततः पुरुषवेदं खण्डत्रयं कृत्वा खण्डद्वयं युगपत् क्षपयति । तृतीयखण्डं तु संज्वलनक्रोधे प्रक्षिपति । पुरुषे प्रतिपत्तर्यं क्रमो बोद्धव्यः, नपुंसकादौ तु प्रतिपत्तुर्युदितवेदस्य पश्चात् क्षपणम्, शेषानुदितवेदद्वयस्य तु मध्येऽधमवेदस्य प्रथमम्, इतरस्य तु तदनन्तरं क्षयः प्रागुक्तोपशमवद् वाच्यः । ततः क्रोधादीश्चतुरः संज्वलनान् प्रत्येकमन्तर्मुहूर्तकालेन क्षपयति । क्षपणं चैषां खण्डत्रयादिकरणक्रमेण पुरुषवेदवद् वाच्यम् । क्रोधसत्कं च तृतीयं खण्डं माने प्रक्षिपति, मानसत्कं मायायाम्, तत्सत्कं तु लोभे । क्षपणकालश्च प्रत्येकं सर्वत्रान्तर्मुहूर्तमानो मन्तव्यः । श्रेणिरप्येषा बृहत्तरान्तर्मुहूर्तमानैव । सर्वाप्येकस्मिन्नपि बृहदन्तर्मुहूर्ते लघुतरान्तर्मुहूर्तानामसंख्येयानां प्राप्ते, लोभतृतीयखण्डं तु संख्येयानि खण्डानि कृत्वा पृथक् पृथक् कालभेदेन क्षपयति । एषामपि संख्याततमं चरमखण्डमसंख्येयानि खण्डानि करोति । तान्यपि समये समये एकैकं क्षपयति । इह च क्षीणदर्शनसप्तको निवृत्तिबादर उच्यते । तत ऊर्ध्वं त्वनिवृत्तिबादरो यावत् संख्याततमं लोभखण्डम् । तत ऊर्ध्वमसंख्येयानि तत्खण्डानि क्षपयन् सूक्ष्मसंपरायोऽभिधीयते, यावच्चरमलोभांशक्षयः । तत ऊर्ध्वं क्षीणमोहयथाख्यातचारित्रः भवति । स्थापना चेहोक्तानुसारेण विधेया ॥ इति निर्युक्तिगाथार्थः ॥ १३१३ ॥ × निवर्ति- ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

भाष्यकारः प्राह—

[1]पडिवत्तीए अविरय-देस-पमत्ता-पमत्त-विरयाणं । अन्नयरो पडिवज्जइ सुद्धज्झाणोवगयचित्तो ॥१३१४॥
पढमकसाए समयं खवेइ अंतोमुहुत्तमेत्तेणं । तत्तो चिय मिच्छत्तं तओ य मीसं तओ सम्मं ॥ १३१५ ॥
बद्धाऊ पडिवन्नो पढमकसायक्खए जइ मरेज्जा । तो मिच्छत्तोदयओ विणिज्ज भुज्जो न खीणम्मि ॥१३१६॥
तम्मि मओ जाइ दिवं तप्परिणामो य सत्तए खीणे । उवरयपरिणामो पुण पच्छा नाणामइगइओ ॥१३१७॥

चतस्रोऽपि व्याख्याताार्थाः ॥ १३१४ ॥ १३१५ ॥ १३१६ ॥ १३१७ ॥

प्रेरकः प्राह—

[2]खीणम्मि दंसणतिए किं होइ तओ तिदंसणाईओ ? । भण्णइ सम्मद्दिट्ठी, सम्मत्तक्खए कओ सम्मं ? ॥१३१८॥

ननु मिथ्यात्वादिकदर्शनत्रिके क्षीणे किं तकोऽसौ क्षपकस्त्रिदर्शनातीतो भवति ?– न मिथ्यादृष्टिः, [×]मिथ्यात्वस्य क्षीणत्वात् ; न मिश्रः सम्यग्मिथ्यादृष्टिः, सम्यग्-मिथ्यात्वाभावात् ; न च सम्यग्दृष्टिः सम्यक्त्वासत्त्वादित्येवं प्राप्नोति ? इत्यर्थः । आचार्य आह– भण्यतेऽत्रोत्तरम्– दर्शनत्रिके क्षीणे विशुद्धसम्यग्दृष्टिर्भवत्यसौ । पुनरपि परः प्राह– ननूक्तं मया– सम्यक्त्वक्षये सति कुतोऽयं सम्यग्दृष्टिः ?– न घटत एवेत्यर्थः ॥ १३१८ ॥

सूरिराह—

[3]निव्वलियमयणकोद्दवरूवं मिच्छत्तमेव सम्मत्तं । खीणं, न उ जो भावो सद्दहणालक्खणो तस्स ॥१३१९॥

---

१ प्रतिपत्तावविरत-देश-प्रमत्ता-ऽप्रमत्तविरतानाम् । अन्यतरः प्रतिपद्यते शुद्धध्यानोपगतचित्तः ॥ १३१४ ॥ × मिथ्यात्वाभावात्–।
प्रथमकषायान् समकं क्षपयत्यन्तर्मुहूर्तमात्रेण । तत एव मिथ्यात्वं ततश्च मिश्रं ततः सम्यक्त्वम् ॥ १३१५ ॥
बद्धायुः प्रतिपन्नः प्रथमकषायक्षये यदि म्रियते । ततोः मिथ्यात्वोदयतो विनयेद् भूयो न क्षीणे ॥ १३१६ ॥
तस्मिन् मृतो याति दिवं तत्परिणामश्च सप्तके क्षीणे । उपरतपरिणामः पुनः पश्चाद् नानागतिगतिकः ॥ १३१७ ॥

२ क्षीणे दर्शनत्रिके किं भवति सकस्त्रिदर्शनातीतः ? । भण्यते सम्यग्दृष्टिः, सम्यक्त्वक्षये कुतः सम्यक्त्वम् ? ॥ १३१८ ॥

३ निर्वलितमदनकोद्रवरूपं मिथ्यात्वमेव सत्सम्यक्त्वम् । क्षीणं, न तु यो भावः श्रद्धानलक्षणस्तस्य ॥ १३१९ ॥

सो तस्स विसुद्धयरो जायइ सम्मत्तपोग्गलक्खयओ । दिट्ठि व्व सुण्हसुद्धब्भपडलविगमे मणूसस्स ॥१३२०॥
जह सुद्धजलाणुगयं वत्थं सुद्धं जलक्खए सुतरं । सम्मत्तसुद्धपोग्गलपरिक्खए दंसणं पेवं ॥ १३२१ ॥

हन्त ! यः सम्यक्पदार्थश्रद्धानरूपो जीवस्य भावः परिणामः स एव तावद् मुख्यतः सम्यक्त्वमुच्यते, यस्तु शोधितमिथ्यात्वपुद्गलपुञ्जः स तत्त्वतो मिथ्यात्वमेव, केवलं सम्यक्तत्त्वश्रद्धानरूपस्य जीवभावस्याशुद्धमिथ्यात्वपुञ्जवदनावारकत्वादुपचारतः सम्यक्त्वमुच्यते । एवं च सति यदाच्छादितमदनकोद्रवरूपं मिथ्यात्वमेव सदुपचारतः सम्यक्त्वं प्रसिद्धम्, तदेव तस्य क्षपकस्य क्षीणम्, न तु यस्तत्त्वश्रद्धानलक्षणो जीवस्य भावः । स च तस्य तत्त्वश्रद्धानभाव औपचारिकसम्यक्त्वरूपे सम्यक्त्वपुद्गलपुञ्जे क्षपिते प्रत्युत विशुद्धतरो जायते, यथा श्लक्ष्णशुद्धाभ्रपटलविगमे मनुष्यस्य लोचनद्वयरूपा दृष्टिः । स्वच्छाभ्रपटलसदृशो हि सम्यक्त्वपुद्गलपुञ्जः, स च क्षपितोऽभ्रपटलमिव दृष्टेर्यश्च यावच्च तत्त्वश्रद्धानपरिणामस्य विघातक एव । ततोऽनर्थरूपे तस्मिन् क्षपितेऽभ्रपटलविगमे लोचनद्वयीव तत्त्वश्रद्धानपरिणतिर्निर्मलतरैव भवति ।

दृष्टान्तान्तरमाह– 'जहेत्यादि' यथा [⊕]सुधौतं शुद्धं निर्मलं जलानुगतं किञ्चिदार्द्रं वस्त्रमातपशेषात् समस्तजलक्षये सुतरामेव शुद्धं भवति; एवमौपचारिकसम्यक्त्वरूपा ये शुद्धपुद्गलास्तत्परिक्षयात् पारिमार्थिकरुचिरूपं सम्यग्दर्शनमपि सुतरां निर्मलं भवति ॥ १३१९ ॥ १३२० ॥ १३२१ ॥

(⊕ वा वस्त्रं सुधौतं शुद्धं निर्मलीकृतं) – (शु)

अपरमपि दृष्टान्तमाह—

[2]सेसन्नाणावगमे सुद्धयरं केवलं जहा नाणं । तह खाइयसम्मत्तं खओवसमसम्मविगमम्मि ॥ १३२२ ॥

यथेह शेषस्य क्षायोपशमिकस्य मत्यादिज्ञानचतुष्टयस्यापगमेऽन्यत् क्षायिकं शुद्धतरं केवलज्ञानलक्षणं ज्ञानान्तरं प्रादुरस्ति, न पुनरज्ञो भवति जीवः, तद्वत् क्षायोपशमिकसम्यक्त्वविगमेऽन्यपरं विशुद्धतरं क्षायिकं सम्यग्दर्शनान्तरमुपजायते, न त्वदर्शनी भवति जीवः ॥ १३२२ ॥

---

१ स तस्य विशुद्धतरो जायते सम्यक्त्वपुद्गलक्षयतः । दृष्टिरिव श्लक्ष्णशुद्धाभ्रपटलविगमे मनुष्यस्य ॥ १३२० ॥ × यच्छोधित–।
यथा शुद्धजलानुगतं वस्त्रं शुद्धं जलक्षये सुतराम् । सम्यक्त्वशुद्धपुद्गलपरिक्षये दर्शनमप्येवम् ॥ १३२१ ॥ +(शो)

२ शेषज्ञानापगमे शुद्धतरं केवलं यथा ज्ञानम् । तथा क्षायिकसम्यक्त्वं क्षयोपशमसम्यक्त्वविगमे ॥ १३२२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

ननु कथं पुनः क्षायिकं सम्यक्त्वं विशुद्धतरं, क्षायोपशमिकं त्वविशुद्धम् ?, इत्याह—

[1]निव्वलियमयणकोद्दवभत्तं तिल्लाइमीसियं मदए । न उ सोऽवाओ निव्वलिय-मीसमयकोद्दवच्चाए ॥१३२३॥
तह सुद्धमिच्छसम्मत्तपोग्गला मिच्छमीसिया मिच्छं । होज्ज परिणामओ वा सोऽवाओ खइए न त्थि ॥१३२४॥

इह निर्वलिता निर्मदनीकृताः शोधिता ये मदनकोद्रवास्तन्मिश्रितं यद् भक्तमोदनस्तत् तैलादिविरुद्धद्रव्यमिश्रितं भुज्यमानं मदयेत्– विक्रियां गमयेदेव भोक्तारम् । न पुनः सोऽपायोऽस्ति । क्व सति ?, निर्वलित-मिश्रमदनकोद्रवत्यागे सति । इदमुक्तं भवति– यः शोधितान् शुद्धाशुद्धस्वरूपान् वा मदनकोद्रवान् न भुङ्क्ते तस्योक्तस्वरूपो मदनलक्षणोऽपायो न भवत्येव, तथा तेनैव प्रकारेण शुद्धं च तद् मिथ्यात्वं च शुद्धमिथ्यात्वम्– अपूर्वकरणाध्यवसायेनापनीतमिथ्यात्वभावमित्यर्थः, तदेवोपचारतः सम्यक्त्वं शुद्धमिथ्यात्वसम्यक्त्वं तस्य पुद्गलाः शुद्धमिथ्यात्वसम्यक्त्वपुद्गलाः शोधितमदनकोद्रवस्थानीया विरुद्धतैलादिद्रव्यकल्पेन मिथ्यात्वेन मिश्रिताः सन्तस्तत्क्षण एव मिथ्यात्वं भवति, कुतीर्थिकसंसर्ग-तद्वचःश्रवणादिजनितपरिणामाद् वा क्लिष्टबहुरसीकृता मिथ्यात्वरूपतां प्रतिपद्यन्ते । ततस्तथैव मिथ्यादृष्टिर्भूत्वा पुनः संसारनीरधिं बम्भ्रमीति । स चैवंभूतोऽपायः क्षायिकसम्यक्त्वे नास्ति, सर्वानर्थमूलानां शुद्धानामशुद्धानां वा मिथ्यात्वपुद्गलानां क्षपितत्वेनाऽसत्त्वात् । तस्मात् शुद्धतरं क्षायिकसम्यक्त्वम् , मलीमसं च क्षायोपशमिकम् । अत एतदपगमेऽपि क्षायिकसम्यक्त्वभावाद् नाऽदर्शनी जीवः, किन्तु प्रत्युत विशुद्धसम्यग्दर्शनीति स्थितम् ॥ १३२३ ॥ १३२४ ॥

प्रस्तुतमाह—

[2]बद्धाऊ पडिवन्नो नियमा खीणम्मि सत्तए ठाइ । इयरोऽणुवरओ च्चिय सयलं सेढिं समाणेइ ॥१३२५॥

गतार्था ॥ १३२५ ॥

योऽबद्धायुः प्रतिपद्यते स दर्शनसप्तके क्षपिते किं करोति ?, इत्याह—

---

१ निर्वलितमदनकोद्रवभक्तं तैलादिमिश्रितं मदयेत् । न तु सोऽपायो निर्वलित-मिश्रमदकोद्रवत्यागे ॥ १३२३ ॥
तथा शुद्धमिथ्यात्वसम्यक्त्वपुद्गला मिथ्यात्वमिश्रिता मिथ्यात्वम् । भवेत् परिणामतो वा सोऽपायो क्षायिके नास्ति ॥ १३२४ ॥
२ बद्धायुः प्रतिपन्नो नियमात् क्षीणे सप्तके तिष्ठति । इतरोऽनुपरत एव सकलां श्रेणिं समापयति ॥ १३२५ ॥

[1]बिइय-तइए कसाए अट्ठारंभेइ समयमासिं च । खवियम्मि मज्झभागे पयडिओ सोलसं खवेइ ॥१३२६॥

गतार्था ॥ १३२६ ॥

कास्ताः पुनः षोडश प्रकृतयः ?, इत्याह—

[2]नेरय-तिरियाणुपुव्वी गईओ चत्तारि चादिजाईओ । आयावं उज्जोयं थावरसाहारणं सुहुमं ॥ १३२७ ॥
तिन्नि महानिद्दाओ अट्ठगसेसं तओऽणुदिण्णाणं । वेयाण जहन्नयरं तत्तो बीयं तओ छक्कं ॥ १३२८ ॥
तत्तो य तइयं वेयं एक्केक्कं तो कमेण संजलणं । सव्वत्थ सावसेसे मग्गिल्ले लग्गइ पुरिल्ले ॥ १३२९ ॥

आख्यातार्था, नवरं 'सव्वत्थेत्यादि' सर्वत्र 'मग्गिल्ले' पाश्चात्येऽनन्तानुबन्ध्यादिके कर्मणि क्षपयितुमारब्धे सावशेष एव 'पुरिल्ले' अग्रेतने मिथ्यात्वादिके कर्मणि लगति क्षपयितुं प्रवर्तते, इत्येवं तावद् वाच्यं यावद् मायायां सावशेषायामेव लोभे लगति । ततश्च मायाशेषं लोभं च युगपत् क्षपयतीति ॥ १३२७ ॥ १३२८ ॥ १३२९ ॥

ननु कियति कर्मणि क्षीणे किंनामाऽसौ भवति ?, इत्याह—

[3]दंसणमोहक्खवणे नियट्टि अनियट्टिबायरो परओ । जाव उ सेसो संजलणलोभसंखेज्जभागो त्ति ॥१३३०॥
तदसंखिज्जइभागं समए समए खवेइ एक्केक्कं । तत्थइ सुहुमसरागो लोभाणू जावमेक्को वि ॥ १३३१ ॥
खीणे खवगनिगंठो वीसमए मोहसागरं तरिउं । अंतोमुहुत्तमुदहिं तरिउं थाहे जहा पुरिसो ॥१३३२॥

---

१ द्वितीय-तृतीयकषायानष्टारभते समकमेषां च । क्षपिते मध्यभागे प्रकृतीः षोडश क्षपयति ॥ १३२६ ॥
२ नरक-तिर्यगानुपूर्व्यौ गती चतस्रश्चादिजातयस्तु । आतापमुद्द्योतं स्थावरसाधारणं सूक्ष्मम् ॥ १३२७॥
तिस्रो महानिद्रा अष्टकशेषं ततोऽनुदीर्णानाम् । वेदानां जघन्यतरं ततो द्वितीयं ततः षट्कम् ॥ १३२८ ॥
ततश्च तृतीयं वेदमेकैकं ततः क्रमेण संज्वलनम् । सर्वत्र सावशेषे पाश्चात्ये लगति पुरातने ॥ १३२९ ॥
३ दर्शनमोहक्षपणे निवृत्तिरनिवृत्तिबादरः परतः । यावत्तु शेषः संज्वलनलोभसंख्येयभाग इति ॥ १३३० ॥
तदसंख्येयभागं समये समये क्षपयत्येकैकम् । तत्रापि सूक्ष्मसरागो लोभाणून् यावदेकोऽपि ॥ १३३१ ॥
४ क्षीणे क्षपकनिर्ग्रन्थो विश्राम्यति मोहसागरं तीर्त्वा । अन्तर्मुहूर्तमुदधिं तीर्त्वा स्थाघे यथा पुरुषः ॥ १३३२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

'तदसंखिज्जइभागं ति' तस्य संज्वलनलोभसंख्येयभागस्यासंख्येयतमो भागस्तदसंख्येयतमो भागस्तम् । 'खीणे त्ति' लोभाणुमात्रेऽपि सर्वथा क्षीण इत्यर्थः, क्षपकनिर्ग्रन्थतामवाप्य मोहसागरं तीर्त्वाऽन्तर्मुहूर्तकालं विश्राम्यति, यथोदधिं बाहुभ्यामुत्तीर्य स्तोकेऽगाधे पदप्रचारलङ्घनीये जानुदघ्नादिके जले प्रायः कश्चित् तारकपुरुषो विश्राम्यति । शेषं गतार्थमेवेति ॥ १३३० ॥ १३३१॥ १३३२॥

ततः क्षीणमोहः सन्नसौ किं करोति ?, इत्याह—

[1]छउमत्थकालदुचरिमसमए निद्दं खवेइ पचलं च । चरिमे केवललाभो खीणावरणंतरायस्स ॥१३३३॥

क्षीणमोहच्छद्मस्थकालस्यान्तर्मुहूर्तमानस्य योऽसौ द्विचरमसमयः, चरमाद् द्वितीयो द्विचरमः, चरमो वा द्वितीयो यस्मादसौ द्विचरमः, असंख्येयानामेतद्गुणस्थानकसमयानामुपान्त्यसमय इत्यर्थः, तत्र द्विचरमसमये निद्रां प्रचलां च क्षपयति, चरमसमये तु पञ्चविधं ज्ञानावरणम्, पञ्चविधमन्तरायम्, दर्शनचतुष्टयलक्षणं च चतुर्विधं दर्शनावरणं क्षपयित्वा केवलज्ञानमवाप्नोति ॥ १३३३ ॥

अथावरणक्षये केवलज्ञानलाभ इत्यत्र निश्चय-व्यवहारनयवादमुपदर्शयन्नाह—

[2]आवरणक्खयसमए नेच्छइअनयस्स केवलुप्पत्ती । तत्तोऽणंतरसमए ववहारो केवलं भणइ ॥१३३४॥

निश्चयनयस्याऽयमभिप्रायः— यस्मिन्नेव समये आवरणस्य क्षयः— क्षीयमाणमावरणमित्यर्थः, तस्मिन्नेव समये केवलज्ञानोत्पत्तिः, क्षीयमाणस्य क्षीणत्वात्, क्रियाकाल-निष्ठाकालयोरेकत्वात्; भेदे चान्यत्र काले क्रिया, अन्यत्र च कार्योत्पत्तिरिति स्यात्, इदं चायुक्तम्, क्रियाविरहेऽपि कार्योत्पत्त्यभ्युपगमात्, इत्थं च क्रियारम्भकालात् पूर्वमपि कार्योत्पत्तिप्राप्तेरतिप्रसङ्गादिति ।

व्यवहारनयस्तु— आवरणक्षयसमयादनन्तरसमये केवलोत्पत्तिं भणति, आवरणस्य क्षयसमये क्षीयमाणत्वात्, क्षीयमाणस्य चाक्षीणत्वात्, क्रियाकाल-निष्ठाकालयोर्भेदात्, तदेकत्वे च क्रियाकालेऽपि कार्यस्य सत्त्वे क्रियावैयर्थ्यप्रसङ्गात् । न च समानकालभाविनोः क्रिया-कार्ययोः कार्यकारणभावो युज्यते, सव्ये-तरगोविषाणादीनामपि तत्प्रसङ्गात् ॥ १३३४ ॥

तथाच व्यवहारनयो निजपक्षं समर्थयति—

---

१ छद्मस्थकालद्विचरमसमये निद्रां क्षपयति प्रचलां च । चरमे केवललाभः क्षीणावरणान्तरायस्य ॥ १३३३ ॥

२ आवरणक्षयसमये नैश्चयिकनयस्य केवलोत्पत्तिः । ततोऽनन्तरसमये व्यवहारः केवलं भणति ॥ १३३४ ॥

[1]णाणं न खिज्जमाणे, खीणे जुत्तं जओ तदावरणे । न य किरियानिट्ठाणं कालेगत्तं जओ जुत्तं ॥ १३३५ ॥

यस्मात् क्षीयमाणे तदावरणे ज्ञानमुत्पद्यत इत्येतद् न युक्तम्, अस्य क्रियाकालत्वात्, तत्काले च कार्यसत्त्वाभ्युपगमस्य दूषितत्वात्; किन्तु क्षीण एव तदावरणे ज्ञानं युज्यते, अस्य निष्ठाकालत्वात् । न च क्रिया-निष्ठयोः कालैकत्वं युज्यते, प्रतिविहितत्वादिति ॥ १३३५ ॥

अथ निश्चयनयः प्राह—

[2]जइ किरियाए न खओ को हेऊ तप्परिक्खए अन्नो ? । अह ताए, किह काले अन्नत्थ तई, खओऽणत्थ ? ॥१३३६॥

हन्त ! व्यवहारवादिन् ! आवरणस्य क्षये भवता केवलोत्पत्तिरिष्यते, न तु तत्र क्षीयमाणे। तदत्र भवन्तं पृच्छामः— आवरणक्षयकाले क्रिया समस्ति, नवा ? । यदि नास्ति, तर्हि क्रियामन्तरेणावरणक्षये कोऽन्यो हेतुरिति वक्तव्यम् ?— न कोऽपि प्राप्नोतीत्यर्थः । अथास्त्यावरणक्षयकाले तद्धेतुभूता क्रिया, तया च तत्क्षयो विधीयते; तर्ह्यायातं क्रियाकाल-निष्ठाकालयोरेकत्वम्, इति कथमुच्यते— 'अन्यसमये क्रिया, अन्यत्र च तत्परिक्षयः' ? ॥ १३३६ ॥

किञ्च—

[3]किरियाकालम्मि खओ जइ नत्थि तओ न होज्ज पच्छावि । जइवाकिरियस्स खओ पढमम्मि वि कीस किरियाए ?॥१३३७॥

यदि क्रियाकालेऽप्यावरणस्य क्षयो नास्ति, ततः पश्चादप्यसौ न भवेत्, अक्रियत्वात्, पूर्वकालवदिति । अथवा, यदि क्रियानिवृत्तौ द्वितीयसमयेऽक्रियस्य सत आवरणक्षयोऽभ्युपगम्यते, तर्हि क्रियान्वितप्रथमसमये किं क्रियया, तामन्तरेणाप्यावरणक्षयोपपत्तेः, क्रियाविरहितद्वितीयसमयवदिति ?॥ १३३७ ॥

क्रियाकाल-निष्ठाकालयोश्चैकत्वमागमेऽप्युक्तम्, इति निश्चयः स्वपक्षं द्रढयन्नाह—

---

१ ज्ञानं न क्षीयमाणे, क्षीणे युक्तं यतस्तदावरणे । न च क्रियानिष्ठानं कालैकत्वं यतो युक्तम् ॥ १३३५ ॥

२ यदि क्रियया न क्षयः को हेतुस्तत्परिक्षयेऽन्यः ? । अथ तया, कथं कालेऽन्यत्र सा, क्षयोऽन्यत्र ? ॥ १३३६ ॥

३ क्रियाकाले क्षयो यदि नास्ति ततो न भवेत् पश्चादपि । यदिवाऽक्रियस्य क्षयः प्रथमेऽपि किं क्रियया ? ॥ १३३७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]जं निज्जरिज्जमाणं निज्जिण्णं ति भणियं सुए जं च । नोकम्मं निज्जरिइ[+] नावरणं तेण तस्समए ॥१३३८॥

यद् यस्मात् "[2]चलमाणे चलिए, जाव निज्जरिज्जमाणे निज्जिण्णे" इति वचनाद् निर्जीर्यमाणं कर्म निर्जीर्णं श्रुतेऽप्युक्तम्, अतः क्षीयमाणं क्षीणमेव, इति नानयोः कालभेदः । 'जं च त्ति' यस्मादिदं चागमे प्रोक्तम् । किम् ?, इत्याह- "[3]कम्मं वेइज्जइ नोकम्मं निज्जरेज्ज" इत्येतावत् सूत्रं द्रष्टव्यम्, वेद्यमानावस्थायां कर्म वेद्यते, निर्जरावस्थायां तु नोकर्म- अकर्मेत्यर्थः, अन्यश्च वेदनासमयः, अन्यश्च निर्जरासमयः । ततस्तस्मात् कारणात् तत्समय आवरणक्षीयमाणतासमये- आवरणस्य निर्जरणसमय इत्यर्थः, 'नावरणं ति' नास्त्यावरणं-नास्ति प्रतिबन्धकं कर्म, क्षीयमाणस्य क्षीणत्वादित्यर्थः ॥ १३३८ ॥

प्रतिबन्धकाभावाच्च भवत्येवावरणक्षीयमाणतासमये केवलज्ञानोत्पत्तिः, कस्तां निरुणद्धि ? । अहमिति चेत्, इत्याह—

[4]जइ नाणमनावरणे वि नत्थि तो तं न नाम पच्छा वि । जायं च अकारणओ तमकारणओ च्चिय पडेज्जा ॥१३३९॥

यद्यनावरणेऽप्यावरणाभावेऽपि केवलज्ञानमुत्पत्तिं न लभते, ततः पश्चादप्यावरणक्षयोत्तरकालं यदा किल त्वयेष्यते तदापि तदुत्पत्तिर्न स्यात् । अथावरणाभावाविशेषेऽप्यावरणक्षयसमये केवलज्ञानं न भवति, तदुत्तरकालं तु पश्चाद् भवति, इति यदृच्छया प्रोच्यते; हन्त ! तर्हीकारणा यदृच्छयैव प्रसूतिरस्य, ततोऽकारणत एव जातम्, अकारणतयैव तत् प्रतिपतेत्, विशेषाभावादिति ॥ १३३९ ॥

तस्मात् किमिह स्थितम् ?, इत्याह—

[5]नाणस्सावरणस्स य समयं तम्हा पगास-तमसो व्व । उप्पाय-व्वयधम्मा तह नेया सव्वभावाणं ॥१३४०॥

तस्मात् केवलज्ञानस्य तदावरणस्य च युगपदेवोत्पाद-व्ययधर्मौ द्रष्टव्यौ । कयोरिव ?, इत्याह- प्रकाश-तमसोरिव । यथा हि युगपदेव तमो निवर्तते, प्रदीपादिप्रकाशस्तूत्पद्यते, इति य एव तमसो निवृत्तिसमयः स एव प्रकाशस्योत्पादसमयः । एवमिहापि युगपदेवावरणं निवर्तते, केवलज्ञानं तूत्पद्यत इति । आत्मद्रव्यं त्ववतिष्ठत इति । य एवावरणस्य क्षयसमयः स एव केवलज्ञानस्योत्पादस-

१ यद् निर्जीर्यमाणं निर्जीर्णमिति भणितं श्रुते यच्च । नोकर्म निर्जीर्यते नावरणं तेन तत्समये ॥ १३३८ ॥ × मुत्पर्तुं-१ +(निज्जिरइ)
२ चल्यमाने चलितः, यावद् निर्जीर्यमाणे निर्जीर्णः । ३ कर्म वेद्यते नोकर्म निर्जीर्यते ।
४ यदि ज्ञानमनावरणेऽपि नास्ति ततस्तद् न नाम पश्चादपि । जातं चाकारणतस्तदकारणत एव पतेत् ॥ १३३९ ॥
५ ज्ञानस्यावरणस्य च समकं तस्मात् प्रकाश-तमसोरिव । उत्पाद-व्ययधर्मौ तथा ज्ञेयौ सर्वभावानाम् ॥ १३४० ॥

मयः, तत्र हि समये आवरणस्य क्षीयमाणस्य क्षीणत्वात्, केवलज्ञानस्य चोत्पद्यमानस्योत्पन्नत्वात्, आत्मद्रव्यस्य त्ववस्थितत्वादिति । एवं सर्वेषामपि भावानां मृद-ऽङ्गुल्यादिपदार्थानां घट-ऋजुतादिभिरपूर्वपर्यायैरुत्पादः, पिण्ड-शिवक-स्थास-कोशादिभिः, वक्रत्वादिभिश्च प्राक्तनपर्यायैर्व्ययः, मृद-ऽङ्गुल्यादिद्रव्यरूपतया त्ववस्थानं युगपद् भवतीति ज्ञातव्यमिति ॥ १३४० ॥

यदि चरमसमये केवललाभः, ततः किम् ?, इत्याह—

[1]उभयावरणाईओ केवलवरनाण-दंसणसहावो । जाणइ पासइ य जिणो नेयं सव्वं सयाकालं ॥ १३४१ ॥

ततश्च सर्वमपि ज्ञेयं साद्य-ऽपर्यवसितं सदाकालं जिनः केवली जानाति केवलज्ञानेन, पश्यति च केवलदर्शनेन । कथंभूतः सन् ?, केवलवरज्ञान-दर्शनस्वभावस्तदव्यतिरिक्तस्वरूपः । तर्हि पूर्वमित्थमदृष्ट्वा किमितीदानीमेवं पश्यति ?, इत्याह- यत इदानीमुभयावरणातीतः केवलज्ञान-केवलदर्शनावरणद्वितयातीतत्वादित्यर्थः ॥ इत्यष्टाविंशतिगाथार्थः ॥ १३४१ ॥

अत एवाह—

[2]संभिन्नं पासंतो लोगमलोगं च सव्वओ सव्वं । तं नत्थि जं न पासइ भूयं भव्वं भविस्सं च ॥१३४२॥

सम्- एकीभावेन भिन्नं संभिन्नं- यथा बहिस्तथा मध्येऽपीत्यर्थः, अथवा, द्रव्य-क्षेत्र-काल-भावलक्षणं सर्वमपि ज्ञेयमत्र केवलज्ञानस्य विषयत्वेन दर्शितम्, तत्र संभिन्नमिति द्रव्यं गृह्यते, काल-भावौ च तत्पर्यायत्वाद् गृह्येते; ताभ्यां च समस्ताभ्यां समन्ताद् वा भिन्नं संभिन्नमिति कृत्वा द्रव्यं संभिन्नमुच्यते । तत् पश्यन्नुपलभमानो 'लोकमलोकं च प्रसिद्धस्वरूपं पश्यन्' अनेन क्षेत्रं प्रतिपादितं भवति। एतावदेव द्रव्यादि चतुर्विधं ज्ञेयं, नान्यदिति । किमेवमेकया दिशा पश्यन् ?, इत्याह- सर्वतः सर्वासु दिक्षु। तास्वपि किं कियदपि द्रव्यादि, उत न ?, इत्याह- सर्वं निरवशेषम् । अमुमेवार्थं स्पष्टयन्नाह- तद् नास्ति किमपि ज्ञेयं भूतमतीतम्, भवतीति भव्यं वर्तमानम्, भविष्यच्च, यद् न पश्यति केवली ॥ इति निर्युक्तिगाथार्थः ॥ १३४२ ॥

'संभिन्नं पश्यन्' इत्युक्तम्, तत्र 'संभिन्नम्' इति कोऽर्थः ?, इत्याह—

१ उभयावरणातीतः केवलवरज्ञान-दर्शनस्वभावः । जानाति पश्यति च जिनो ज्ञेयं सर्वं सदाकालम् ॥ १३४१ ॥
२ संभिन्नं पश्यन् लोकमलोकं च सर्वतः सर्वम् । तद् नास्ति यद् न पश्यति भूतं भव्यं भविष्यच्च ॥ १३४२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

बाहिं जहा तहंतो संभिन्नं सव्वपज्जवेहिं वा । अत्त-परनिव्विसेसं स-परपज्जायओ वा वि ॥ १३४३ ॥

यथा बहिस्तथाऽन्तश्चेति संभिन्नम् । अथवा, सर्वपर्यायैः संकीर्णं व्याप्तं संभिन्नम् । यदिवा, यथाऽऽत्मानं जानाति तथा परमपि, यथा परं तथात्मानमपि निर्विशेषं जानाति, इत्येवं स्व-परानिर्विशेषं संभिन्नं, स्व-परपर्यायैर्वा युक्तं संभिन्नमिति ॥ १३४३॥

अथवा—

संभिन्नग्गहणेणं व दव्वमिह सकाल-पज्जवं गहियं । लोगालोगं सव्वं ति सव्वओ खित्तपरिमाणं ॥१३४४॥

संभिन्नग्रहणेनेह सकाल-पर्यायं द्रव्यं गृह्यते, कालश्च पर्यायाश्च काल-पर्यायाः, सह तैर्वर्तत इति सकाल-पर्यायं संभिन्नम्। 'लोकालोकं च सर्वतः सर्वम्' इत्यनेन क्षेत्रपरिमाणं गृहीतम् । एतावदेव च ज्ञेयं यद् द्रव्यादिचतुष्टयमिति ॥ १३४४ ॥

तच्च पश्यन् किम् ?, इत्याह—

तं पासंतो भूयाइं जं न पासइ तओ तयं नत्थि । पंचत्थिकायपज्जयमाणं नेयं जओऽभिहियं ॥१३४५॥

तच्च द्रव्यादि चतुर्विधं ज्ञेयं पश्यंस्तकोऽसौ केवली भूतादिकालविशिष्टं तत् किमपि वस्तु नास्ति यद् न पश्यति । कुतः ?, इत्याह- यतो यस्मात् पञ्चास्तिकायपर्यायराशिप्रमाणमेव ज्ञेयमागमेऽभिहितम्, नाभ्यत् । एतच्च द्रव्यादिचतुष्टयं न गृहीतमेवेति भावः ॥१३४५॥

तदेवमियता ग्रन्थेन किमुक्तं भवति ?, इत्याह—

तव-नियम-नाणरुक्खं आरूढो जं जिणो अमियनाणी । एत्तो स परंपरओ एत्तो जिणपवयणुप्पत्ती ॥१३४६॥

तदेवमियता ग्रन्थेनाऽयं स जिनोऽमितज्ञानी प्रोक्तः । यः किम् ?, इत्याह– यस्तपो-नियम-ज्ञानवृक्षमारूढो ज्ञानवृष्टिं मुञ्चति प्राग् निर्दिष्टः । एतस्माच्च स प्रागुक्तो भावपरम्परकः– एतस्मादेव चाचार्यपारम्पर्येण सामायिकादि श्रुतमायातमित्यर्थः । एतस्माच्च जिनप्रवचनोत्पत्तिरिति ॥ १३४६ ॥

---

१ बहिर्यथा तथाऽन्तः संभिन्नं सर्वपर्यवैर्वा । आत्म-परनिर्विशेषं स्व-परपर्यायतो वापि ॥ १३४३ ॥

२ संभिन्नग्रहणेन वा द्रव्यमिह सकाल-पर्यवं गृहीतम् । लोकालोकं सर्वमिति सर्वतः क्षेत्रपरिमाणम् ॥ १३४४ ॥

३ तत् पश्यन् भूतादि यद् न पश्यति सकलतद् नास्ति । पञ्चास्तिकायपर्यायमानं ज्ञेयं यतोऽभिहितम् ॥ १३४५ ॥

४ तपो-नियम-ज्ञानवृक्षमारूढो यजिनोऽमितज्ञानी । इतः स परम्परक इतो जिनप्रवचनोत्पत्तिः ॥ १३४६ ॥

अथोपसंहारपूर्वकं प्रकृतं स्मारयन्नाह—

निज्जुत्तिसमुत्थाणप्पसंगओ जाव पवयणुप्पत्ती । पासंगियं गयमियं वुच्छामि अओ उवग्घायं ॥१३४७॥

तदेवं सामायिकनिर्युक्तिसमुत्थानप्रसङ्गतः 'तव-नियम-नाणरुक्खं आरूढो केवली अमियनाणी' इत्यादेरारभ्येदानीं जिनप्रवचनोत्पत्तिं यावत् प्रासङ्गिकमेवेदं गतम् । अतः प्रकृतमुपोद्घातं प्रारप्रतिज्ञातं वक्ष्यामीति ॥ १३४७ ॥

परं प्रस्तुतोऽपि तिष्ठत्वद्यापि तावदुपोद्घातः । कुतः ?, इत्याह—

अच्छउ तावुग्घाओ का पुण जिणप्पवयणप्पसूइ त्ति । तं कित्तियाभिहाणं पवयणमिह को विभागो सो?॥१३४८॥

एयं पसंगसेसं वुत्तुमुवग्घायवित्थरं वोच्छं । तो सेसदाराइं कमेण तस्संगहो चेमो ॥ १३४९ ॥

तिष्ठतु तावदुपोद्घातः, केयं जिनप्रवचनोत्पत्तिः ?, तद्वा जिनप्रवचनं कियदभिधानम् ?, को वाऽभिधानविभागः स तस्य प्रवचनस्य ? इति विनेयप्रश्नमाशङ्क्य, एतज्जिनप्रवचनोत्पत्ति-प्रवचनैकार्थिकता-तद्विभागलक्षणं तृतीयं प्रसङ्गशेषमुक्त्वाऽभिधाय ततः 'उद्देसे निद्देसे य निग्गमे' इत्यादिद्वारविध्युपन्यासेनोपोद्घातविस्तरं वक्ष्यामि । ततश्च 'नयविही वक्खाणविही य अणुओगो' इत्येतानि विशेषद्वाराणि क्रमेण वक्ष्यामि । एतस्य च भणनीयत्वेन प्रतिज्ञातस्यायं वक्ष्यमाणः संग्रहो मन्तव्यः ॥ इति गाथासप्तकार्थः ॥१३४८॥१३४९॥

कः संग्रहः ?, इत्याह—

जिणपवयणउप्पत्ती पवयणएगट्ठिया विभागो य । दारविही य नयविही वक्खाणविही य अणुओगो॥१३५०॥

इह जिनप्रवचनोत्पत्तिः, प्रवचनैकार्थिकानि, एकार्थिकविभागश्च, इत्येतत् त्रितयमपि तावत् प्रसङ्गशेषद्वाराण्युद्देश-निर्देशादीनि तेषां विधानं प्ररूपणं विधिर्द्वारविधिः, अयं तूपोद्घातः, नयविधिस्तूपक्रमादीनां मूलानुयोगद्वाराणां चतुर्थमनुयोगद्वारम्, शिष्याऽऽचार्यपरीक्षाभिधानं तु व्याख्यानविधिः, अनुयोगस्तु सूत्रस्पर्शिकनिर्युक्तिः, सूत्रानुगमश्च ॥ इति निर्युक्तिसंग्रहगाथार्थः ॥ १३५० ॥

---

१ निर्युक्तिसमुत्थानप्रसङ्गतो यावत् प्रवचनोत्पत्तिः । प्रासङ्गिकं गतमिदं वक्ष्यामि अत उपोद्घातम् ॥ १३४७ ॥ २ गाथा १०९४ ।

३ तिष्ठतु तावदुपोद्घातः का पुनर्जिनप्रवचनप्रसूतिरिति ? । तत् कियदभिधानं प्रवचनमिह को विभागः सः ? ॥ १३४८ ॥ * शेष-। एतं प्रसङ्गशेषमुक्त्वोपोद्घातविस्तरं वक्ष्यामि । ततः शेषद्वाराणि क्रमेण तत्संग्रहश्चायम् ॥ १३४९ ॥ ४ गाथा ९७३ । ५ गाथा १३५० ।

६ जिनप्रवचनोत्पत्तिः प्रवचनैकार्थिता विभागश्च । द्वारविधिश्च नयविधिर्व्याख्यानविधिश्चानुयोगः ॥ १३५० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

एतदेवाह भाष्यकारः—

[1]पासंगियमाइतियं दारविहि त्ति विहि[×]उ उवग्घाओ । अणुओगदारं पुण चउत्थमिट्ठं नयविहि त्ति ॥१३५१॥

सीसा-यरियपरिक्खा वक्खाणविहि त्ति कहणमज्जाया । सुत्तप्फासियजुत्ती सुत्ताणुगमोऽयमणुओगो ॥१३५२॥

गाथाद्वयमपि गतार्थम् ॥ १३५१ ॥ १३५२ ॥

अथ प्रेरकः प्राह—

[2]किं पुण चउत्थदारं नयविहिमभिधाय तोऽणुओगो त्ति । चउदारासंगहिया वक्खाणविहि त्ति किं गहिया? ॥१३५३॥

नन्वनुयोगो व्याख्यानरूपत्वादनुगम एव, अत उपक्रमो निक्षेपानुगमो नय इत्यनुयोगद्वारोपन्यासक्रममाश्रित्य नयानां पूर्वमेवानुयोगोपन्यासो युज्यते । इति कथमिह चतुर्थद्वारवर्तिनो नयानभिधाय पश्चात् तृतीयद्वारवर्त्यनुगमरूपस्यानुयोगस्योपन्यासः कृतः ? । अपरश्च, चतुरनुयोगद्वारात्मकमेव शास्त्रं भवति । यश्चायमत्र व्याख्यानविधिरुपन्यस्तः स चतुर्णामनुयोगद्वाराणां मध्यादेकेनापि न संगृह्यते; तथाहि— न तावदयमुपक्रम-निक्षेप-नयेष्वन्तर्भवति, तल्लक्षणायोगात्; नाप्यनुगमे । अतो न व्याख्यानविधिः सूत्रानुगमरूपः, नापि सूत्रस्पर्शिकनिर्युक्त्यात्मकः, अतश्चतुरनुयोगद्वारासंगृहीत्वेनाऽप्रस्तुतत्वात् कथमाकस्मिकोऽत्र व्याख्यानविधिर्गृहीतः ? इति ॥ १३५३ ॥

अत्राचार्यदेशीयस्य कस्याप्युत्तरमुपदर्श्य, निराकृत्य च घटमानकं स्वकीयमुत्तरं सूरिराह—

[3]बंधाणुलोमयाए केई न जओ तई कमेणं पि । तीरइ निबंधेउं जे तेणेयं बुद्धिपुव्व त्ति ॥ १३५४ ॥

केचिदाचार्यदेशीया मन्यन्ते— एवमेव बन्धानुलोम्यादनुयोगनयविधिविपर्ययः । एतच्च 'न जओ तइ त्ति' यतः क्रमेणापि निब-

---

१ प्रासङ्गिकमादिनिकं द्वारविधिरिति विधिस्तूपोद्घातः । अनुयोगद्वारं पुनश्चतुर्थमिष्टं नयविधिरिति ॥ १३५१ ॥ × ओ-।
शिष्या-ऽऽचार्यपरीक्षा व्याख्यानविधिरिति कथनमर्यादः । सूत्रस्पर्शिकयुक्तिः सूत्रानुगमोऽयमनुयोगः ॥ १३५२ ॥

२ किं पुनश्चतुर्थद्वारं नयविधिमभिधाय ततोऽनुयोग इति । चतुर्द्वारासंगृहीतो व्याख्यानविधिश्च किं गृहीतः ? ॥ १३५३ ॥

३ बन्धानुलोमतया केचिद् न यतः सा क्रमेणापि । शक्यते निबन्धुं तेनेयं बुद्धिपूर्वेति ॥ १३५४ ॥

न्धुं ग्रन्थितुं शक्यत एवाऽसौ गाथा; तथथा 'दारविही वक्खाणविहि अणुओगो नयविही य त्ति'। तस्माद् बुद्धिपुर्विकेयं विपर्ययरचना ॥ १३५४ ॥

कथम् ?, इत्याह—

[4]अंतम्मि उ वण्णसिउं पुव्वमणुगमस्स जं नए भणइ । तं जाणावेइ समं वच्चंति नयाणुओगो य ॥१३५५॥

उपक्रमः, निक्षेपः, अनुगमः, नयाः, इत्यनुयोगद्वाराणामन्ते पूर्वं नयानुपन्यस्य यदिदानीमनुगमस्यानुयोगस्य पूर्वं प्रथमं नयान् भणति, तज्ज्ञापयति भद्रबाहुस्वामी— नया-ऽनुयोगौ प्रतिसूत्रं युगपदेव व्रजतः । न हि नाम नयैः शून्यः कश्चिदप्यनुयोगोऽस्ति, यदि युगपद् नया-ऽनुगमौ गच्छतः, तर्ह्येतदुपन्यासोऽपि युगपदेवास्तु, इति चेत् । तदयुक्तम्, अशक्यत्वात् । तस्मादनुयोगद्वारेष्वनुगमस्यान्त उपन्यस्तानामपि नयानां यदिह तदादौ तज्ज्ञापनं तद् यौगपद्यगमनज्ञापनार्थमिति ॥ १३५५ ॥

अथ द्वितीयमेर्यस्य परिहारमाह—

[5]सुत्ताणुगमावसरे गुरु-सीसाणुग्गहोवएसत्थं । वक्खाणविहिं जंपइ मूलदाराणहिकयं पि ॥ १३५६ ॥

चतुर्षु मूलानुयोगद्वारेष्वनधिकृतमपि च— तेष्वनुक्तमपि च, व्याख्यानविधिं सूरिर्जल्पति । क ?, इत्याह— इह सूत्रानुगमावसरे— अनुयोगस्यादावित्यर्थः । किमर्थम् ?, इत्याह— गुरुश्च शिष्यश्च गुरु-शिष्यौ, तयोरनुग्रहो गुरु-शिष्यानुग्रहः, तदुपलक्षित उपदेशो गुरु-शिष्यानुग्रहोपदेशस्तदर्थम् । इदमुक्तं भवति— गुणवताऽऽचार्येण गुणवते शिष्याय समस्तगुणोपेतं सूत्रं व्याख्येयम्, इत्येवं गुरु-शिष्यानुग्रहार्थं व्याख्यानविधावुपदिष्टे सुव्याख्यानं सुश्रवणं च शास्त्रं भवति, इति गुणमपेक्ष्यानुयोगद्वारासंगृहीतोऽपीह व्याख्यानविधिरुक्त इति ॥ १३५६ ॥

तदेवं व्याख्यानविधेरनधिकृतत्वमभ्युपगम्योक्तम् । यदिवा, तदेवासिद्धम्, इत्येतदाह—

[6]अहवा साहिकय च्चिय वक्खाणंगं ति जं तओऽणुगमे । जं जं वक्खाणंगं तं तं सव्वं जओऽणुगमो ॥१३५७॥

---

१ द्वारविधिर्व्याख्यानविधिरनुयोगो नयविधिश्चेति ।

२ अन्ते तु वा न्यस्य पूर्वमनुगमस्य यद् नयान् भणति । तज्ज्ञापयति समं व्रजतो नयोऽनुयोगश्च ॥ १३५५ ॥

३ सूत्रानुगमावसरे गुरु-शिष्यानुग्रहोपदेशार्थम् । व्याख्यानविधिं जल्पति मूलद्वारानधिकृतमपि ॥ १३५६ ॥

४ अथवा सोऽधिकृत एव व्याख्यानाङ्गमिति यत् ततोऽनुगमे । यद् यद् व्याख्यानाङ्गं तत् तत् सर्वं यतोऽनुगमः ॥ १३५७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अथवा, स व्याख्यानविधिरधिकृत एवेह द्रष्टव्यः 'सा' इति प्राकृतत्वात् स्त्रीलिङ्गनिर्देशः। कथं पुनरसाविहाधिकृतः ?, इत्याह– 'यद् यस्माद् व्याख्यानाङ्गमिति, ततस्तस्मादनुगमेऽधिक्रियत इति प्रक्रमः । यदि नाम व्याख्यानाङ्गमसौ, तथापि कथमनुगमेऽन्तर्भवति ?, इत्याह– यद् यद् व्याख्यानाङ्गं, तत् तद् यस्मादनुगमः, तत्कारणत्वात्, व्याख्यानाङ्गं च व्याख्यानविधिः, तस्मादनुगमेऽन्तर्भवतीति ॥ १३५७ ॥

व्याख्यानाङ्गत्वमेवाऽस्य भावयितुमाह—

[1]सुत्ताणुगमाईए वक्खाणविही जओ तदंगं सा। जं च सुयावसरे च्चिय सफलाइं गवाइनायाइं ॥१३५८॥

यतश्च सूत्रानुगमस्यादौ प्रथमं व्याख्यानविधिः 'तीर्थकर-गणधरैरुक्तः' इति शेषः, तथा चेहापि व्याख्याविधानं पूर्वमुक्तम्—

'[2]सुत्तं पयं पयत्थो संभवओ विग्गहो वियारो य। दूसियसिद्धी नयमयविसेसओ नेयमणुसुत्तं ॥ १ ॥'

यत्तदोर्नित्याभिसंबन्धात्, तस्माद् व्याख्यानाङ्गमसौ। यच्च यस्मात् श्रुतावसर एव सूत्रानुगमप्रस्ताव एव 'गौणी चंदणकंथा चेटीउ सावए बहिरगोहे' इत्यादिनाऽत्रैवानन्तरं वक्ष्यमाणानि व्याख्यानविधिगतानि गवाद्युदाहरणानि सफलानि भवन्ति, नान्यथा। इदमुक्तं भवति– सूत्रव्याख्यानविधिविषयाण्येव हि गवाद्युदाहरणानि वक्ष्यन्ते, तानि च सफलानि तदा भवन्ति यदा व्याख्यानविधिरनुगमाङ्गमेव भवति। तद्बहिर्भूतत्वे तु तस्य तानि निरालम्बनान्येव स्युरिति ॥ १३५८ ॥

अत्र प्रेरकः प्राह—

[3]जइ साणुगमंगं चिय दारविहीए तओ किमाईए। उयारेउं भन्नइ उक्कमकरणे गुणो को णु ? ॥१३५९॥

यदि स व्याख्यानविधिरनुगमाङ्गमेवेष्यते, तर्ह्यग्रतोऽनुगमादेरवतार्याऽऽकृष्य किमिति 'उद्देसे निद्देसे य निग्गमे' इत्यादिवक्ष्यमाणद्वारविधेरादौ समानीय भण्यते– 'गौणी चंदनकंथा' इत्यादिना किमिति द्वारविध्यादौ भणिष्यते ? इत्यर्थः। यदैव ह्यग्रे सूत्रं व्याख्यास्यते तदेव तर्हि व्याख्यानविधिः 'गौणी चंदनकथा' इत्यादिर्वक्तुमुचितः, किमिति 'उद्देसे निद्देसे य' इत्यादिद्वारविधिरर्वागेव प्रस्तुतस्थाने निर्दिष्टः ?, इति भावः। को ह्येवमुत्क्रमकरणे गुणलाभः ?– न कश्चिदित्यर्थः ॥ १३५९ ॥

---

१ सूत्रानुगमादौ व्याख्यानविधिर्यत्तस्तदङ्गं सः। यच्च श्रुतावसर एव सफलानि गवादिज्ञातानि ॥ १३५८ ॥ २ गाथा १००२। ३ गाथा १४३५। ४ यदि सोऽनुगमाङ्गमेव द्वारविधौ ततः किमादौ। अवतार्य भण्यते उत्क्रमकरणे गुणः को नु ? ॥ १३५९ ॥ ५ गाथा ९७३।

अत्रोत्तरमाह—

[1]दारविही वि महत्था तत्थ वि वक्खाणविहिविवज्जासो। मा होज्ज तदाईए वक्खाणविहिं निरूवेइ ॥१३६०॥

द्वारविधिरपि सूत्रवद् बहुवृत्तान्तः कल्याणहेतुः, इत्यतस्तत्रापि व्याख्यानविधिविपर्ययोऽविधिव्याख्यानं मा भूत्। अतो '[2]दारविही य नयविही वक्खाणविही य अणुओगो' इत्येवं संग्रहगाथायामनुयोगादौ निर्दिष्टोऽपि ततोऽवतार्य तदादौ द्वारविध्यादौ व्याख्यानविधिं निरूपयति ॥ १३६० ॥

द्वारविध्यादौ निर्दिष्टस्य व्याख्यानविधेर्व्यक्ततरगुणदर्शनार्थमेवाह—

[3]एत्थेव गुरू सीसं सीसो य गुरुं परिच्छिउं पच्छा। वोच्छिइ सोच्छिइ व सुहं मोच्छिइ व सुदिट्ठपेयालो ॥१३६१॥

'एत्थेव त्ति' अत्रैव द्वारविध्यादौ निर्दिष्टं व्याख्यानविधिं श्रुत्वा 'सुदिट्ठपेयालो त्ति' सुदृष्टव्याख्यानविधिविचारो गुरुः शिष्यम्, शिष्यो वा गुरुं परीक्ष्य पश्चाद् गुणवते शिष्याय द्वारविधेरप्यर्थं सुखेनैव वक्ष्यति गुरुः, गुणवदाचार्यान्तिके श्रोष्यति वा शिष्यः, मोक्ष्यति वा त्यक्ष्यति वा दोषवन्तं शिष्यं गुरुः, गुरुं वा तद्वन्तं शिष्यः, इति गुणमपेक्ष्य द्वारविध्यादौ व्याख्यानविधिर्निर्दिष्ट इति ॥ १३६१ ॥

अत्र प्रेरकः प्राह—

[4]साणुगमंगं पि इहं जइ भन्नइ किं न कीरइ इहेव ?। दाएइ पयत्ततरं वक्खाणविही य सुत्तम्मि ॥ १३६२ ॥

ननु यद्यनुगमाङ्गमपि सन् गुणापेक्षया व्याख्यानविधिरिह द्वारविधेरादौ भण्यते, न तु सूत्रानुगमादौ, तर्हि '[5]जिणपवयणउप्पत्ती' इत्यादिसंग्रहगाथायामपीहैव द्वारविधेरादौ किं न क्रियते– किं नोपादीयते, येन 'वक्खाणविही य अणुओगो' इत्येवमनुगमादौ निर्दिष्टः ?। अत्रोत्तरमाह– संग्रहगाथायामित्थमुपन्यासं कुर्वन्नेतद् दर्शयति। किम् ?, इत्याह– प्रयत्नतरं यथा भवत्येवं सूत्रानुगमे व्याख्यानविधिरन्वेषणीय एव। यद्यपि हि द्वारविधौ कथमप्यसौ न जायते तथापि सूत्रानुगमावसरे गुणवदाचार्य-शिष्यपरिग्रहादिको विधिरवश्यमेव कर्तव्यः, इति संग्रहगाथायामनुगमादौ व्याख्यानविधिरुपात्त इति भावः ॥ १३६२ ॥

---

१ द्वारविधिरपि महार्थस्तत्रापि व्याख्यानविधिविपर्यासः। मा भूत् तदादौ व्याख्यानविधिं निरूपयति ॥ १३६० ॥ २ गाथा १३५०। ३ अत्रैव गुरुः शिष्यं शिष्यश्च गुरुं परीक्ष्य पश्चात्। वक्ष्यति श्रोष्यति वा सुखं मोक्ष्यति वा सुदृष्टविचारः ॥ १३६१ ॥ ४ सोऽनुगमाङ्गमपीह यदि भण्यते किं न क्रियत इहैव ?। दर्शयति प्रयत्नतरं व्याख्यानविधिश्च सूत्रे ॥ १३६२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अन्ये त्वाचक्षते । किम् ?, इत्याह—

[1]अणुओगाइविभागे वक्खाणविही वि तप्पसंगेण । जंपंति केइ तेसिं वुत्तुं सोउं व को जोग्गो ? ॥१३६३॥

संगहगाहाए पुणो अणुओगाईए बिंति दाएंता । जो वन्निओऽणुओगो सोऽयं स विही जदत्थं ति ॥ १३६४ ॥

इह कोचित् पुनरेवं जल्पन्ति । किम् ?, इत्युच्यते– [2]अणुओगो य निओगो भास-विभासा य वत्तियं चेव' इत्यादिना ग्रन्थेनाऽनुयोग-नियोग-भाषादीनां विभागविशेषेऽभिधास्यमाने व्याख्यानविधिरपि तत्प्रसङ्गेन द्वारविधेरग्रे संग्रहगाथायामुक्तोऽपि पूर्वमेव निर्दिष्टः । किमर्थम् ?, इत्याह– तेषामप्यनुयोग-नियोग-भाषादीनां वक्तुं श्रोतुं वा को योग्यः ?, इति परिज्ञानार्थम् । '[3]जिणपवयणउप्पत्ती' इत्यादिसंग्रहगाथायां पुनः 'वक्खाणविही य अणुओगो' इत्येवमनुयोगस्यादौ द्वारविधेस्तद्ग्रतो व्याख्यानविधिमुपदर्शयन्त एतद् ब्रुवते यदुत– योऽनुयोगादिविभागावसरे द्वारविधेः पूर्वमनुयोगो वर्णितः, सोऽयं संग्रहगाथान्ते । अयमत्र भावः– '[3]जिणपवयण' इत्यादिसंग्रहगाथायां प्रथमं द्वारविधिः, ततो व्याख्यानविधिः, ततोऽनुयोग उक्त इति, ततः प्रवचनैकार्थिकद्वारव्याख्यायां 'अणुओगो य निओगो' इत्यादिगाथयाऽनुयोग उक्तः, ततो 'गोणी चंदण' इत्यादिना स्वरूपतो व्याख्यानविधिः, ततो 'उद्देसे निद्देसे' इत्यादिद्वारविधिः, ततोऽपि सूत्रानुयोगः, इत्ययं क्रमः । अत्र च यथा द्वारविधेः पूर्वं स्वरूपतो व्याख्यानविधिरुक्तः, एवं यदि संग्रहगाथायामपि द्वारविधेः पूर्वं नामतोऽप्युच्येत तदा कस्याऽप्येवं संशयः स्यात्– संग्रहगाथान्तोक्तानुयोगद्वारविध्यनन्तरोक्तसूत्रानुयोगयोस्तावदेकत्वं सुबोधम्, संग्रहगाथान्तोक्तानुयोगव्याख्यानरूपत्वात् सूत्रानुयोगस्य, किन्तु प्रवचनैकार्थिकव्याख्यावसरे 'अणुओगो य निओगो' इत्यत्र योऽनुयोग उक्तः स संग्रहगाथान्तोक्तानुयोगादन्योऽनन्यो वा ? इति । यदा तु संग्रहगाथायामनुयोगप्रस्तावस्थ एव विधिरुच्यते, तदैतत् निश्चीयते– यस्य 'अणुओगो य निओगो' इति गाथान्तोक्तानुयोगस्य निर्युक्तौ द्वारविधिरुक्तः, संग्रहगाथान्तोक्तानुयोगोऽपि स एवेति निर्दिष्टः, यदर्थं स व्याख्यानविधिर्द्वारविधेः पूर्वं स्वरूपत उक्तः, अत्र तु संग्रहगाथायामनुयोगस्यादौ नाममात्रेणैवोक्त इति ॥१३६३॥१३६४॥

तदेवं चालना-प्रत्यवस्थाने विधाय प्रस्तुतं '[3]जिणपवयणउप्पत्ती' इत्यादिगाथाव्याख्याशेषं, वक्ष्यमाणगाथास्तावनां चाह—

---

१ अनुयोगादिविभागे व्याख्यानविधिरपि तत्प्रसङ्गेन । जल्पन्ति केचिन् तयोर्वक्तुं श्रोतुं वा को योग्यः ? ॥ १३६३ ॥
संग्रहगाथायां पुनरनुयोगादौ ब्रुवन्ति दर्शयन्तः । यो वर्णितोऽनुयोगः सोऽयं स विधिर्यदर्थमिति ॥ १३६४ ॥

२ गाथा १३८५ । ३ गाथा १३५० । ४ गाथा १४३५ । ५ गाथा ९७३ ।

[5]सुयमिह जिणपवयणं तस्सुप्पत्ती पसंगओऽभिहिया । जिण-गणहरवयणाओ इमाइं तस्साभिहाणाइं ॥१३६५॥

यदुक्तम्– 'कथं जिनप्रवचनोत्पत्तिः ?' तत्रेह जिनप्रवचनं तावत् श्रुतमुच्यते, इत्यसकृत् प्रसिद्धमेव । अस्य चोत्पत्तिर्निर्युक्तिसमुत्थानप्रसङ्गतः '[3]अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणं' इत्यादौ 'जिन-गणधरेभ्यः' इति वचनात् पूर्वमप्यभिहितैव । यत्पुनरुक्तम्– 'तथा, जिनप्रवचनं कियदभिधानम् ?, अभिधानविभागो वाऽस्य कः ?' इति । तत्रैतानि तावदस्याभिधानानि ॥ इति पञ्चदशगाथार्थः ॥ १३६५ ॥

कानि पुनस्तानि ?, इत्याह—

[6]एगट्ठियाणि तिन्नि उ पवयण सुत्तं तहेव अत्थो य । एक्केक्कस्स य एत्तो नामा एगट्ठिया पंच ॥ १३६६ ॥

एकोऽर्थो येषां तान्येकार्थिकानि त्रीण्येव । कानि पुनस्तानि ?, प्रवचनमुक्तार्थम्, वक्ष्यमाणार्थं च, सामान्येन श्रुतज्ञानम् । सूचनात् सूत्रं, तद्विशेष एव । अर्थत इत्यर्थः, अयमपि तद्विशेष एव । एषां च प्रवचन-सूत्रा-ऽर्थानां मध्य एकैकस्य प्रत्येकमेकार्थिकानि पञ्च पञ्च नामानि भवन्ति ॥ इति निर्युक्तिगाथार्थः ॥ १३६६ ॥

भाष्यम्—

[7]जमिह पगयं पसत्थं पहाणवयणं च पवयणं तं च । सामन्नं सुयनाणं विसेसओ सुत्तमत्थो य ॥ १३६७॥

गतार्था ॥ १३६७ ॥

सूत्रशब्दस्यार्थमाह—

[8]सिंचइ खरइ जमत्थं तम्हा सुत्तं निरुत्तविहिणा वा । सूएइ सवइ सुव्वइ सिव्वइ सरए व जेणत्थं ॥१३६८॥

[x]'षिंच क्षरणे' सिञ्चति सरति यस्मादर्थान्, ततो निरुक्तविधिना सूत्रम् । अथवा, निरुक्तविधिनैव सूचयति, स्रवति वाऽर्थानि-

---

x षिन्च्-।

१ सोऽयमिह जिनप्रवचनं तस्योत्पत्तिः प्रसङ्गतोऽभिहिता । जिन-गणधरवचनादिमानि तस्याभिधानानि ॥ १३६५ ॥ २ गाथा १११९ ।
३ तीर्थमेकानि त्रीणि तु प्रवचनं सूत्रं तथैवार्थश्च । एकैकस्य चैतो नामान्येकार्थिकानि पञ्च ॥ १३६६ ॥
४ यस्यं प्रकृतं प्रशस्तं प्रधानवचनं च प्रवचनं तच्च । सामान्यं श्रुतज्ञानं विशेषतः सूत्रमर्थश्च ॥ १३६७ ॥
५ सि...ते क्षरति यदर्थं तस्मात् सूत्रं निरुक्तविधिना वा । सूचयति स्रवति श्रूयते सीव्यति सरति वा येनार्थम् ॥ १३६८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ति सूत्रम् । श्रूयत इति वा सूत्रम् । सीव्यते विशिष्टघटनामानीयत इति वा सूत्रम् । सरति वाऽर्थमनुगच्छति यस्मात् ततः सूत्रमिति ॥ १३६८ ॥

तथा—

[1]अविवरियं सुत्तं पिव सुट्ठिय-वावित्तउ व सुत्तं ति । जो सुत्ताभिप्पाओ सो अत्थो अज्जए जम्हा ॥ १३६९ ॥

अर्थव्याख्यानतो यावद्व्याप्यविवृतं तावत् सूत्रं सुप्तमिव सुप्तमुच्यते, प्राकृतशैल्या च 'सुत्तं' इति । अथवा, सुस्थितत्वात् प्रमाणाबाधितत्वात्, व्यापितत्वाच्च सूत्रम्, प्राकृतत्वादेव च 'सुत्तं' । अर्थशब्दस्यार्थमाह- यः सूत्रस्याभिप्रायः सोऽर्थोऽभिधीयते यस्मादर्यते गम्यत इत्यर्थः ॥ १३६९ ॥

अथ प्रेरकः प्राह—

[2]सह पवयणेण जुत्ता न सुयत्थेगत्थया परोप्परओ । जं [+]सुयं वक्खेयं अत्थो तं तस्स वक्खाणं ॥ १३७० ॥

जुज्जइ च विभागाओ तिण्ह वि भिन्नत्थया न चेहरहा । एगत्थाणं पि पुणो किमिहेगत्थाभिहाणेहिं ? ॥ १३७१ ॥

ननु प्रवचनेन सह सूत्रा-ऽर्थयोरेकार्थता युक्ता, तद्विशेषत्वात् । तयोः सूत्रार्थयोः पुनः परस्परत एकार्थता न युज्यते, तयोरत्यन्तभेदात्; तथाहि- व्याख्येयं सूत्रम्, तद्व्याख्यानं चार्थ इति महान् भेदः । अथवा, त्रयाणामप्येषां प्रवचन-सूत्रा-ऽर्थानां भिन्नार्थतैव युज्यते । 'न च त्ति' न पुनः 'एकार्थता' इति शेषः, विभागाद् भिन्नविषयत्वात् । सामान्यविषयं हि प्रवचनम्, विशेषविषयौ च सूत्रार्थौ, इति कथं तेषामेकार्थता ? । न हि मृद्-घट-शरावादीनामेकार्थता युक्तिमती । इतरथा- यद्येकार्थान्येतानि त्रीण्यपि, तर्हि 'एक्केक्कस्स य एत्तो नामा एगट्ठिया पञ्च' इत्यनेन यान्येकैकस्य पञ्च पञ्चैकार्थिकान्यभिधास्यन्ते, तानि न युज्यन्त एव । न हीन्द्र-शक्र-पुरन्दरादिशब्दानामेकार्थानामपि पुनरपि प्रत्येकमेकार्थिकान्युपपद्यन्त इति ॥ १३७० ॥ १३७१ ॥

×सूत्तं-। १ अविवृतं सुप्तमिव सुस्थित-व्यापित्वतो वा सूत्रमिति । यः सूत्राभिप्रायः सोऽर्थोऽर्यते यस्मात् ॥ १३६९ ॥ +(सुत्तं)

२ सह प्रवचनेन युक्ता न श्रुतार्थैकार्थता परस्परतः । यत् श्रुतं व्याख्येयमर्थस्तत् तस्य व्याख्यानम् ॥ १३७० ॥
युज्यते च विभागात् त्रयाणामपि भिन्नार्थता न चेतरथा । एकार्थानामपि पुनः किमिहैकार्थाभिधानैः ? ॥ १३७१ ॥ २ गाथा १३६६ ।

अत्र प्रतिविधानमाह—

[1]मउलं फुल्लं ति जहा संकोय-विबोहमेत्तभिन्नाइं । अत्थेणाभिन्नाइं कमलं सामण्णओ चेगं ॥ १३७२ ॥

अविवरियं तह सुत्तं विवरीयमत्थो त्ति बोहकालम्मि । किंचिम्मत्तविभिन्ना सामान्नं पवयणं नेयं ॥१३७३॥

यथेह मुकुलं, फुल्लमिति च, एतयोः संकोच-विकाशरूपतया भेदः, सामान्यार्थतया चाभेदः कमलमिति । न चैषां पुनः प्रत्येकमेकार्थिकानि न युज्यन्ते, किन्तु श्रूयन्त एव प्रत्येकं तदेकार्थिकानि, तद्यथा- आद्यस्य मुकुलं, कुड्मलं, कोरकं, जालकं, कलिका, वृन्तमित्यादि; द्वितीयस्य तु फुल्लं, विकोचं, विकाशं, विकसितम्, उन्मीलितम्, उन्मिषितं, स्मितम्, उद्भिद्, विजृम्भितं, हसितम्, उद्बुद्धं, व्याकोशमित्यादि । तृतीयस्य कमलं, पद्मम्, अरविन्दं, पङ्कजं, सरोजमित्यादि । तथेहाऽप्यविवृतार्थतो मुकुलकल्पं सूत्रमुच्यते, तदेव बोधकाले व्याख्यानकाले विवृतं सत् समुत्फुल्लकमलकल्पमर्थोऽभिधीयते । विशेषरूपतया च किञ्चिन्मात्रमनयोर्भेदः, सामान्यरूपतया त्वेकत्वं ज्ञेयं प्रवचनं श्रुतज्ञानमिति । न चैषां प्रवचन-सूत्रा-ऽर्थानामेकार्थिकानि न युज्यन्ते 'सुयधम्म तित्थ' इत्यादिनाऽनन्तरमेवाभिधास्यमानत्वादिति ॥ १३७२ ॥ १३७३ ॥

अत्र दृष्टान्तान्तरेणापि प्रवचन-सूत्रा-ऽर्थानामेकार्थत्वादिरूपतां समर्थयन्नाह—

[2]सामन्न-विसेसाणं जह वेगा-णेगया ववत्थाए । तदुभयमत्थो य जहा वीसुं बहुपज्जवा ते य ॥ १३७४ ॥

एवं सुत्त-त्थाणं एगा-णेगट्ठिया ववत्थाए । पवयणमुभयं च तयं तियं च बहुपज्जयं वीसुं ॥ १३७५ ॥

'वा' इति कमलोदाहरणापेक्षयोदाहरणान्तरत्वसूचकः । ततश्च यथा वा सामान्य-विशेषयोर्व्यवस्थया विवक्षयैकता, अनेकता च दृष्टा- एकार्थत्वम्, अनेकार्थत्वं च दृष्टमित्यर्थः; तथाहि- अर्थलक्षण एकस्मिन्नर्थे द्वयोरपि सामान्य-विशेषयोर्वृत्तत्वादेकार्थता; सामान्यस्य च विजातीयव्यावृत्ताकारप्रत्ययनिबन्धनत्वात्, विशेषाणां तु सजातीय-विजातीयविभक्तत्वप्रतिभासकारणत्वादनेकार्थता ।

---

१ मुकुलं फुल्लमिति यथा संकोच-विकोचमात्रभिन्नानि । अर्थेनाभिन्नानि कमलं सामान्यतश्चैकम् ॥ १३७२ ॥ ×विकोचं-। ×× त्थया-।
अविवृतं तथा सूत्रं विवृतमर्थं इति बोधकाले । किञ्चिन्मात्रविभिन्नौ सामान्यं प्रवचनं ज्ञेयम् ॥ १३७३ ॥ २ गाथा—७८ ।

३ सामान्य-विशेषयोर्यथा चैका-ऽनेकता व्यवस्थया । तदुभयमर्थश्च यथा विष्वग् बहुपर्यवास्ते च ॥ १३७४ ॥
एवं सूत्रा-ऽर्थयोरेका-ऽनेकार्थता व्यवस्थया । प्रवचनमुभयं च तत् त्रिकं च बहुपर्यवं विष्वक् ॥ १३७५ ॥ ४ ग. 'दृश्यते ए' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'तदुभयमत्थो य जह त्ति' यथा च तयोः सामान्य-विशेषयोरुभयं तदुभयमर्थो भण्यते– अर्थशब्दवाच्यं द्वितयमप्येतद् भवतीत्यर्थः। ते च सामान्य-विशेषा-ऽर्थलक्षणास्त्रयोऽप्यर्था विष्वक् पृथग् यथा बहुपर्याया बह्वेकार्थाः, तद्यथा– सामान्यं, सत्ता, भाव इत्यादिः विशेषाः, भेदाः, पर्याया इत्यादि; अर्थः, द्रव्यं, वस्त्वित्यादि।

एवं प्रस्तुतयोः सूत्रा-ऽर्थयोरपि विवक्षयैकार्थतादयो भावनीयाः, तथाहि– प्रवचनलक्षण एकस्मिन्नर्थे द्वयोरपि सूत्रा-ऽर्थयोर्वृत्त-त्वादेकार्थताः सूत्रस्य वाचकत्वात्, अर्थस्य तु वाच्यत्वाद् भिन्नार्थता। 'पवयणमुभयं च तयं ति' तच्च सूत्रा-ऽर्थयोरुभयमपि प्रवचन-मुच्यते। त्रिकं चैतत् सूत्रा-ऽर्थ-प्रवचनलक्षणं विष्वक् पृथग् बहुपर्यायं बह्वेकार्थिकम्, तथा च वक्ष्यति– '[1]सुयधम्म तित्थ मग्गो' इत्यादि ॥ १३७४ ॥ १३७५ ॥

अथवा, नयमतभेदादेषां त्रयाणामपि प्रवचनादीनामेकार्थता, पृथग्बहुपर्यायत्वं च न विरुध्यते, इति दर्शयन्नाह—

[2]अहवा सव्वं नामं वंजणसुद्धियनयस्स भिन्नत्थं। इयरस्स अभिन्नत्थं संववहारो य तदवेक्खो ॥१३७६॥

संववहारट्ठाए तम्हा जेणेगया, न निच्छयओ। तो जुत्ताइं तेसिं वीसुं पज्जायनामाइं ॥ १३७७ ॥

अथवा, व्यञ्जनशुद्धिकनयः समभिरूढलक्षणः शुद्धनयस्तस्याभिप्रायात् सर्वमपि नाम भिन्नार्थमेव, शब्दभेदात्, घट-पटाद्य-भिधानवदिति। इतरस्य तु नैगमादेरर्थनयस्याभिप्रायादभिन्नार्थमपि नाम भवति, वस्तुनोऽनेकपर्यायत्वात्, शक्रे-न्द्र-पुरन्दरादिनामव-दिति। किञ्च, संव्यवहारश्च लोकव्यवहारश्च तदपेक्षोऽभिन्नार्थनामापेक्ष एकार्थिकनामापेक्षः प्रायः प्रवर्तत इत्यर्थः, स्वः, स्वर्गः, सुरसद्म, त्रिदशावासः, त्रिविष्टपं, त्रिदिवमित्याद्येकार्थिकनाममालादिशास्त्राणां संव्यवहारनयापेक्षयैव प्रवृत्तेरिति। ततः किम्?, इत्याह—'संववहारेत्यादि' तस्माद् येनोक्तप्रकारेण संव्यवहारार्थतया व्यवहारनयापेक्षया नान्नामेकता– एकार्थताऽप्यस्तीत्यर्थः, न निश्चयतः शुद्धतरशब्दमयलक्षणनिश्चयनयमतेन सर्वेषामपि भिन्नार्थत्वाद् न क्वचिदेकार्थतेत्यर्थः। ततस्तस्मात् तेषां प्रवचन-सूत्रा-ऽर्थानां विष्वक् पृथग् व्यवहारनयमतेन युक्तानि घटमानकानि पर्यायनामान्येकार्थिकाभिधानानि ॥ इत्येकादशगाथार्थः ॥१३७६॥१३७७॥

तत्र प्रवचन-सूत्रयोस्तावत् पञ्च पञ्चैकार्थिकान्याह—

---

१ गाथा १३७८। २ अथवा सर्वं नाम व्यञ्जनशुद्धिकनयस्य भिन्नार्थम्। इतरस्याऽभिन्नार्थं संव्यवहारश्च तदपेक्षः ॥ १३७६ ॥
संव्यवहारार्थतया तस्माद् येनैकता, न निश्चयतः। ततो युक्तानि तेषां विष्वक् पर्यायनामानि ॥ १३७७ ॥

[1]सुयधम्म तित्थ मग्गो पावयणं पवयणं च एगट्ठा। सुत्तं तंतं गंथो पाठो[×] सत्थं च एगट्ठा ॥ १३७८ ॥

श्रुतधर्मः, तीर्थं, मार्गः, प्रावचनं, प्रवचनम्, एतानि प्रवचनैकार्थिकानि। सूत्रं, तन्त्रं, ग्रन्थः, पाठः, शास्त्रं च, इत्येतानि सूत्रैकार्थिकानि ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥ १३७८ ॥

तत्र श्रुतधर्म इति कोऽर्थः?, इत्याह—

[2]बोहो सुयस्स धम्मो सुयं व धम्मो स जीवपज्जाओ। सुगईए संजमम्मि य धरणाओ वा सुयं धम्मो॥१३७९॥

श्रुतस्य धर्मः स्वभावः, स च बोधः, बोधस्वभावत्वात् श्रुतस्य। अथवा, श्रुतं च तद् धर्मश्च श्रुतधर्मो जीवपर्यायः अथवा सुगतौ, संयमे वा धारणाद् धर्मः श्रुतमुच्यते, श्रुतं च तद् धर्मश्चेति श्रुतधर्मः ॥ १३७९ ॥

अथ तीर्थशब्दार्थमाह—

[3]तित्थं ति पुव्वभणियं संघो जो नाण-चरण-संघाओ। इह पवयणं पि तित्थं तत्तोऽणत्थंतरं जेण॥१३८०॥

तीर्यतेऽनेनेति तीर्थं पूर्वमेवाऽऽख्यातम्। किम्?, इत्याह– संघः। किंविशिष्टः?। ज्ञान-दर्शन-चारित्रैर्गुणसंघातः। इह तु प्रवचनमपि तीर्थमुच्यते यस्मात्, ततः संघातात् तदपि श्रुतज्ञानरूपत्वादनर्थान्तरमेवेति ॥ १३८० ॥

मार्गशब्दार्थमाह—

[4]मज्जिज्जइ सोहिज्जइ जेणं तो[+] पवयणं तओ मग्गो। अहवा सिवस्स मग्गो मग्गणमन्नेसणं पंथो ॥१३८१॥

ततस्तस्मात् प्रवचनं मार्ग उच्यते। येन किम्?, इत्याह– 'मृजू शुद्धौ' मृज्यते शोध्यतेऽनेन कर्ममलिन आत्मा, तस्माद् हेतोः। अथवा, मार्गणं मार्गोऽन्वेषणं पन्थाः शिवस्येति ॥ १३८१ ॥

---

१ श्रुतधर्मस्तीर्थं मार्गः प्रावचनं प्रवचनं चैकार्थानि। सूत्रं तन्त्रं ग्रन्थः पाठः शास्त्रं चैकार्थानि ॥ १३७८ ॥ × ला-। + ला-।
२ बोधः श्रुतस्य धर्मः श्रुतं वा धर्मः स जीवपर्यायः। सुगतौ संयमे च धारणाद् वा श्रुतं धर्मः ॥ १३७९ ॥
३ तीर्थमिति पूर्वभणितं संघो यो ज्ञान-चारित्रसंघातः। इह प्रवचनमपि तीर्थं ततोऽनर्थान्तरं येन ॥ १३८० ॥ ४ ध. छ. ज. 'ज्जर्स'।
५ मृज्यते शोध्यते येन सतः प्रवचनं ततो मार्गः। अथवा शिवस्य मार्गो मार्गणमन्वेषणं पन्थाः ॥ १३८१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अथ प्रावचनशब्दार्थमाह—

[1]पगयाइअभिविहीए पवयणं पावयणमाइवयणं वा । सिवपावयवयणं वा पावयणं, पवयणं भणियं॥१३८२॥

'पगयाइ त्ति' पूर्ववत् प्रगताद्यर्थोऽत्रापि प्रशब्दः, आङ् मर्यादायाम्, अभिविधौ च गृह्यते । प्रगतं, प्रशस्तं, प्रधानम्, आदौ वा जीवादिष्वभिविधि-मर्यादाभ्यां वचनं प्रावचनम्, शिवप्रापकं वा वचनं प्रावचनमुच्यते । प्रवचनशब्दार्थस्तु प्रागेव भणित इति । तदेवमुक्तः प्रवचनैकार्थिकविभागः ॥ १३८२ ॥

अथ सूत्र-तन्त्र-ग्रन्थशब्दार्थमाह—

[2]सुत्तं भणियं तंतं तणिज्जए तेण तम्मि व जमत्थो । गंथिज्जइ तेण तओ तम्मि व तो तं मयं गंथो ॥१३८३॥

सूत्रशब्दार्थस्तावत् प्रागेव भणितः । तन्त्रशब्दार्थस्तूच्यते– 'तनु विस्तारे' तन्यते विस्तार्यते यद् यस्मादनेन, अस्मात्, अस्मिन् वाऽर्थ इति तन्त्रम् । अथवा, तन्यते विशिष्टरचनया तदेव विस्तार्यत इति तन्त्रं सूत्रमेवोच्यते । तथा, ग्रथ्यतेऽनेन, अस्मात्, अस्मिन् वाऽर्थ इति तदेव ग्रन्थ उच्यते । अथवा, तदेव ग्रथ्यते विरच्यत इति ग्रन्थः ॥ १३८३ ॥

पाठ-शास्त्रयोः शब्दार्थमाह—

[3]पढणं पाढो तं तेण तम्मि व पढिज्जएऽभिधेयं ति । सासिज्जए तेण तहिं व नेयमाया व तो सत्थं ॥१३८४॥

पठनं पाठः, पठ्यते वा व्यक्तीक्रियते तदिति पाठः । पठ्यतेऽभिधेयमनेन, अस्मात्, अस्मिन्निति वा पाठः । 'शासु अनुशिष्टौ' शास्यते ज्ञेयमात्मा वाऽनेन, अस्मात्, अस्मिन्निति वा शास्त्रम्, शास्यते कथ्यते तदिति वा शास्त्रम् । इति गाथाषट्कार्थः । तदेवमभिहितः सूत्रैकार्थिकविभागः ॥ १३८४ ॥

अथार्थैकार्थिकानि वक्तव्यानि, तत्राऽर्थः, व्याख्यानम्, अनुयोग इत्यनर्थान्तरम्, इत्यनुयोगैकार्थिकाऽऽह—

---

१ प्रकृताद्यभिविधौ प्रवचनं प्रावचनमादिवचनं वा । शिवप्रापकवचनं वा प्रावचनं, प्रवचनं भणितम् ॥ १३८२ ॥

२ सूत्रं भणितं तन्त्रं तन्यते तेन तस्मिन् वा यदर्थैः । ग्रथ्यते तेन ततस्तस्मिन् वा ततस्तद् मतं ग्रन्थः ॥ १३८३ ॥

३ पठनं पाठस्तत् तेन तस्मिन् वा पठ्यतेऽभिधेयमिति । शास्यते तेन तस्मिन् वा ज्ञेयमात्मा वा ततः शास्त्रम् ॥ १३८४ ॥

[1]अणुओगो य निओगो भास-विभासा य वत्तियं चेव । एए अणुओगस्स उ नामा एगट्ठिया पंच ॥ १३८५ ॥

अनुयोगः, नियोगः, भाषा, विभाषा, वार्तिकम्, इति पञ्चानुयोगैकार्थिकानि ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥ १३८५ ॥

अथानुयोगशब्दार्थं प्रागुक्तमपि विस्मरणशीलविनेयानुग्रहार्थं पुनरप्याह—

[2]अणुओयणमणुओगो सुयस्स नियएण जमभिधेएणं । वावारो वा जोगो जो अणुरूवोऽणुकूलो वा ॥ १३८६ ॥

अहवा जमत्थओ थोव-पच्छभावेहिं सुयमणुं तस्स । अभिधेये वावारो जोगो तेणं व संबंधो ॥ १३८७ ॥

यत् सूत्रस्य निजेनाभिधेयेनार्थेनानुयोजनं संबन्धनं सोऽनुयोगः । अथवा, योगो व्यापार उच्यते । ततश्चानुरूपोऽनुकूलो वा योगः सूत्रस्य निजेऽभिधेये व्यापारः, यथा घटशब्देन घटोऽभिधीयत इत्यनुयोगः । अथवा, सूत्रमणु इत्युच्यते । कुतः ? । यस्मादर्थस्यानन्तत्वात् तदपेक्षया सूत्रमणु । अथवा, "[3]उप्पन्नेइ वा" इत्यादितीर्थकरोक्तार्थात् पश्चादेव गणधराः सूत्रं कुर्वन्ति, इतरकवयोऽप्यर्थं हृदये निवेश्य ततः काव्यं कुर्वन्ति, इत्येवमर्थात् पश्चादेव भवनात् सूत्रमणु व्यपदिश्यते । ततस्तस्याणोः सूत्रस्याभिधेये व्यापारो योगोऽणुयोगः । तेन वाऽणुना सूत्रेण सहाभिधेयस्य योगः संबन्धोऽणुयोगः ॥ इति गाथाद्वयार्थः ॥ १३८६ ॥ १३८७ ॥

अथानुयोगस्यैव संभवन्तं नामादिनिक्षेपमाह—

[4]नामं ठवणा दविए खेत्ते काले वयण-भावे य । एसो अणुओगस्स उ निक्खेवो होइ सत्तविहो ॥ १३८८ ॥

नामानुयोगः, स्थापनानुयोगः, द्रव्यानुयोगः, क्षेत्रानुयोगः, कालानुयोगः, वचनानुयोगः, भावानुयोगः । एषोऽनुयोगस्य सप्तविधो निक्षेपः ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥ १३८८ ॥

विस्तरार्थं त्वभिधित्सुर्भाष्यकारो नाम-स्थापनानुयोगस्वरूपं तावदाह—

---

१ अनुयोगश्च नियोगो भाषा-विभाषे च वार्तिकं चैव । एताश्चानुयोगस्य तु नामान्येकार्थिकानि पञ्च ॥ १३८५ ॥

२ अनुयोजनमनुयोगः श्रुतस्य नियतेन यदभिधेयेन । व्यापारो वा योगो योऽनुरूपोऽनुकूलो वा ॥ १३८६ ॥
अथवा यदर्थतः स्तोक-पश्चाद्भावाभ्यां श्रुतमणु तस्य । अभिधेये व्यापारो योगस्तेन वा संबन्धः ॥ १३८७ ॥ ३ उत्पद्यन्ते वा ।

४ नाम स्थानपना द्रव्यं क्षेत्रं कालो वचन-भावौ च । एषोऽनुयोगस्य तु निक्षेपो भवति सप्तविधः ॥ १३८८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अणुओगो य निओगो भास-विभासा य वत्तियं चेव। एए अणुओगस्स उ नामा एगट्ठिया पंच॥ १३८५ ॥

अनुयोगः, नियोगः, भाषा, विभाषा, वार्तिकम्, इति पञ्चानुयोगैकार्थिकानि ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥ १३८५ ॥

अथानुयोगशब्दार्थं प्रागुक्तमपि विस्मरणशीलविनेयानुग्रहार्थं पुनरप्याह—

अणुओयणमणुओगो सुयस्स नियएण जमभिधेएणं। वावारो वा जोगो जो अणुरूवोऽणुकूलो वा॥ १३८६ ॥

अहवा जमत्थओ थोव-पच्छभावेहिं सुयमणुं तस्स। अभिधेये वावारो जोगो तेणं व संबंधो ॥ १३८७ ॥

यत् सूत्रस्य निजेनाभिधेयेनार्थेनानुयोजनं संबन्धनं सोऽनुयोगः। अथवा, योगो व्यापार उच्यते। ततश्चानुरूपोऽनुकूलो वा योगः सूत्रस्य निजेऽभिधेये व्यापारः, यथा घटशब्देन घटोऽभिधीयत इत्यनुयोगः। अथवा, सूत्रमणु इत्युच्यते। कुतः?। यस्मादर्थस्यानन्तत्वात् तदपेक्षया सूत्रमणु। अथवा, "उप्पन्नेइ वा" इत्यादितीर्थकरोक्तार्थात् पश्चादेव गणधराः सूत्रं कुर्वन्ति, इतरकवयोऽप्यर्थं हृदये निवेश्य ततः काव्यं कुर्वन्ति, इत्येवमर्थात् पश्चादेव भवनात् सूत्रमणु व्यपदिश्यते। ततस्तस्याणोः सूत्रस्याभिधेये व्यापारो योगोऽणुयोगः। तेन वाऽणुना सूत्रेण सहाभिधेयस्य योगः संबन्धोऽणुयोगः ॥ इति गाथाद्वयार्थः ॥ १३८६ ॥ १३८७ ॥

अथानुयोगस्यैव संभवन्तं नामादिनिक्षेपमाह—

नामं ठवणा दविए खेत्ते काले वयण-भावे य। एसो अणुओगस्स उ निक्खेवो होइ सत्तविहो ॥ १३८८ ॥

नामानुयोगः, स्थापनानुयोगः, द्रव्यानुयोगः, क्षेत्रानुयोगः, कालानुयोगः, वचनानुयोगः, भावानुयोगः। एषोऽनुयोगस्य सप्तविधो निक्षेपः ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥ १३८८ ॥

विस्तरार्थं स्वभिधित्सुर्भाष्यकारो नाम-स्थापनानुयोगस्वरूपं तावदाह—

---

१ अनुयोगश्च नियोगो भाषा-विभाषे च वार्तिकं चैव। एतान्यनुयोगस्य तु नाम्न्येकार्थिकानि पञ्च ॥ १३८५ ॥

२ अनुयोजनमनुयोगः सूत्रस्य नियतेन यदभिधेयेन। व्यापारो वा योगो योऽनुरूपोऽनुकूलो वा ॥ १३८६ ॥
अथवा यदर्थतः स्तोक-पश्चाद्भावाभ्यां सूत्रमणु तस्य। अभिधेये व्यापारो योगस्तेन वा संबन्धः ॥ १३८७ ॥ ३ उत्पद्यन्ते वा।

४ नाम स्थापना द्रव्यं क्षेत्रं कालो वचन-भावौ च। एषोऽनुयोगस्य तु निक्षेपो भवति सप्तविधः ॥ १३८८ ॥

हेतोरनुयोगो द्रव्यानुयोगः, द्रव्याणां वा पर्यायैः सह, द्रव्यैर्वा करणभूतैरनुरूपो योगो द्रव्यानुयोग इति। यो वाऽनुपयुक्तः कथयति- अनुपयुक्तोऽनुयोगं करोति स द्रव्यानुयोगः।

एवं क्षेत्रादीनामपि- क्षेत्र-काल-वचन-भावेष्वपि यथासंभवमित्थमेवायोज्यत इत्यर्थः, तद्यथा- क्षेत्रस्य, क्षेत्रेण, क्षेत्रे; क्षेत्राणां क्षेत्रैः, क्षेत्रेष्वनुयोगः क्षेत्रानुयोगः। तथा, क्षेत्रस्य, क्षेत्राणां वा हेतोरनुयोगः क्षेत्रानुयोगः- क्षेत्रानुज्ञार्पणाय देवेन्द्र-चक्रवर्त्यादीनामनुयोगो व्याख्यानं यत् क्रियत इत्यर्थः। तथा, क्षेत्रस्य क्षेत्राणां वा, क्षेत्रेण क्षेत्रैर्वा करणभूतैः, पर्यायेण पर्यायैर्वा सहानुरूपोऽनुकूलो योगः क्षेत्रानुयोगः। एवं काल-वचन-भाव-विषयेऽप्येकवचन-बहुवचनाभ्यां सुधिया यथासंभवं वाच्यम्, नवरं कालाद्यभिलापः कार्य इति ॥ १३९१ ॥ १३९२ ॥

'द्रव्यस्यानुयोगो व्याख्यानं द्रव्यानुयोगः' इत्यादावभिहितम्। तत्र कतिभेदं तद् द्रव्यम्, किंस्वरूपश्च तस्यानुयोगः?, इत्याशङ्क्याह—

दव्वस्स उ अणुओगो जीवदव्वस्स वा अजीवदव्वस्स। एक्केक्कम्मि वि भेया हवंति दव्वाइया चउरो॥१३९३॥

द्रव्यानुयोगो य उक्तः स द्रव्यभेदाद् द्विधा भवति- जीवद्रव्यस्य, अजीवद्रव्यस्य च। एकैकस्मिन्नपि जीवद्रव्ये, अजीवद्रव्ये च द्रव्यादयश्चत्वारो भेदा भवन्ति- जीवद्रव्ये, अजीवद्रव्ये च प्रत्येकं द्रव्यतः, क्षेत्रतः, कालतः, भावतश्चतुर्धाऽनुयोगः प्रवर्तत इत्यर्थः॥१३९३॥

(* १८०००) एतदेवाह—

दव्वेणेगं दव्वं संखाईयप्पएसओगाढं। कालेऽणाइ अनिहणो भावे नाणाइयाणंता ॥ १३९४ ॥

एमेव अजीवस्स वि परमाणू दव्व एगदव्वं तु। खेत्ते एगपएसे ओगाढो सो भवे नियमा ॥ १३९५ ॥

समयाइठिइ असंखा उसप्पिणीओ हवंति कालम्मि। वण्णाइभावणंता एवं दुपएसमाई वि॥१३९६॥

---

१ द्रव्यस्य त्वनुयोगो जीवद्रव्यस्य वाऽजीवद्रव्यस्य। एकैकस्मिन्नपि भेदा भवन्ति द्रव्यादिकाश्चत्वारः ॥ १३९३ ॥ * पल्लीय-१

२ द्रव्येणैकं द्रव्यं संख्यातीतप्रदेशावगाढम्। कालेऽनादिरनिधनो भावे ज्ञानाद्यनन्ताः ॥ १३९४ ॥ †(योज्य)
एवमेव जीवस्यापि परमाणुर्द्रव्य एकद्रव्यं तु। क्षेत्र एकप्रदेशेऽवगाढः स भवेद् नियमात् ॥ १३९५ ॥
समयादिस्थितिरसंख्या उत्सर्पिण्यो भवन्ति काले। वर्णादिभावा अनन्ता एवं द्विप्रदेशादयोऽपि ॥ १३९६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

द्रव्येण द्रव्यतो जीव एकं द्रव्यम् । क्षेत्रतस्तु तज्जीवद्रव्यं संख्यातीतप्रदेशावगाढम्, एकैकस्य जीवस्यासंख्याताकाशप्रदेशावगाढत्वात् । काले कालतोऽनादिः, अनिधनश्च जीवो भवति । भावे भावतस्तु ज्ञानादयोऽनन्तास्तस्याऽगुरुलघुपर्यायाः । अजीवद्रव्यस्याप्येवमेव द्रव्यादिभ्यश्चतुर्विधोऽनुयोगः । तत्र द्रव्ये द्रव्यतः परमाणुरेकं द्रव्यम् । क्षेत्रे क्षेत्रतस्त्वेकप्रदेशावगाढ एव । कालतस्तु जघन्यतस्तस्य स्थितिरेकः समयः, मध्यमतस्तु द्व्यादयः समयाः, उत्कृष्टतस्त्वसंख्येया उत्सर्पिण्यः-ऽवसर्पिण्यः । भावतः पुनर्वर्ण-गन्धादिरूपा अनन्ता पर्यायाः । एवं द्व्यणुकादिस्कन्धानामपि प्रत्येकं द्रव्यादिभावेन चतुर्विधोऽनुयोगो वक्तव्यः । द्रव्यस्यानुयोग इति गतम् ॥१३९४॥ ॥ १३९५ ॥ १३९६ ॥

अथ 'द्रव्याणामनुयोगः' इत्येतद् व्याचिख्यासुराह—

[3]दव्वाणं अणुओगो जीवा-जीवाण पज्जवा नेया । तत्थवि य मग्गणाओऽणेगा सट्ठाण-परठाणे ॥ १३९७ ॥

द्रव्याणामनुयोगो यदा चिन्त्यते तदा जीवा-ऽजीवद्रव्याणां पर्यवाः पर्याया ज्ञेया ज्ञातव्या यथा प्रज्ञापनायां प्ररूपिताः; तथाच तत्रोक्तम्- "[3]कइविहा णं भंते! पज्जवा पन्नत्ता?। गोयमा! दुविहा पन्नत्ता, तं जहा- जीवपज्जवा य, अजीवपज्जवा य । जीवपज्जवा णं भंते! किं संखेज्जा, असंखेज्जा, अणंता?। गोयमा! नो संखेज्जा, नो असंखेज्जा, अणंता। एवं अजीवपज्जवा वि अणंता" इत्यादि । तत्रापि द्रव्याणामप्यनुयोगपक्षे स्वस्थान-परस्थानभेदादनेका मार्गणा अन्वेषणा विचारणा ज्ञातव्याः । तत्र द्रव्यतोऽनन्तानि जीवद्रव्याणि, अनन्तान्यजीवद्रव्याणि, इत्येवं जीवा-ऽजीवद्रव्याणां द्रव्यतश्चिन्ता स्वस्थानम्, क्षेत्र-काल-भावतस्तु चिन्ता परस्थानम् । तत्र क्षेत्रतो जीवा-ऽजीवद्रव्याणि प्रत्येकं समस्तलोकावगाढानि, कालतोऽनाद्य-ऽनिधनानि, भावतस्त्वनन्तपर्यायाणि, इत्यादिमार्गणाः स्वधिया विधेया इति ॥ १३९७ ॥

यदुक्तम्- 'द्रव्येण, द्रव्यैः, द्रव्ये, द्रव्येष्वनुयोगः' इति, तत्राह—

---

१ ध. छ. ज. 'व्यः' । २ द्रव्याणामनुयोगो जीवा-ऽजीवानां पर्यवा ज्ञेयाः । तत्रापि च मार्गणा अनेकाः स्वस्थान परस्थानयोः ॥ १३९७ ॥

३ कतिविधा भगवन्? पर्यवाः प्रज्ञप्ताः?। गौतम! द्विविधा प्रज्ञप्ताः, तद्यथा- जीवपर्यवाश्च, अजीवपर्यवाश्च । जीवपर्यवा भगवन्! किं संख्येयाः, असंख्येयाः, अनन्ताः?। गौतम! नो संख्ययाः, नो असंख्येयाः, अनन्ता। एवमजीवपर्यवा अप्यवगन्तव्याः ।

[1]वत्तीए अक्खेण व करंगुलाईण वा वि दव्वेणं । अक्खेहिं य दव्वेहिं अहिगरणे कप्प-कप्पेहिं ॥१३९८॥

खटिकाचूर्णनिर्मितया वर्त्याऽक्षर-पदादिकं लिखित्वा योऽनुयोगः क्रियते स द्रव्येणानुयोगः, भङ्गकचारणादिषु च योऽक्षेण क्रियते सोऽपि तथैव । 'करंगुलाईण वा वि त्ति' योऽपि वा प्राकृतत्वेन विभक्तिव्यत्ययात् कराङ्गुल्यादिना हस्ताङ्गुल्यादिद्रव्येण किंचिद् दर्शयद्भिरनुयोगः क्रियते सोऽपि द्रव्येणानुयोगो भण्यते । बहुभिश्चाक्षैर्भङ्गकचारणाद्यर्थं योऽनुयोगोऽसौ द्रव्यैरनुयोगः । अधिकरणे [2]ऽकस्मिन् कल्पद्रव्य एककम्बलनिर्मितनिषद्यारूपे समुपविष्टो यदाऽनुयोगं करोति तदा द्रव्येऽनुयोगोऽसौ; यदा तु बहुकल्पमयनिषद्याद्रव्येषु तदा द्रव्येष्वनुयोग इति । तदेवं व्याख्यातः षड्विधो द्रव्यानुयोगः ॥ १३९८ ॥

अथ षड्विधक्षेत्रानुयोगव्याख्यामाह—

[3]पन्नत्तिजंबुदीवे खेत्तस्सेमाइ होइ अणुओगो । खेत्ताणं अणुओगो दीव-समुद्दाण पन्नत्ती ॥ १३९९ ॥

क्षेत्रस्याऽनुयोगः क्षेत्रानुयोग एवमादिको भवति । कः?, इत्याह- 'पन्नत्तिजंबुदीवे त्ति' जम्बूद्वीपप्रज्ञप्तिरित्यर्थः, जम्बूद्वीपलक्षणैकक्षेत्रव्याख्यानरूपत्वात् तस्याः । बहूनां तु क्षेत्राणामनुयोगो द्वीप-सागरप्रज्ञप्तिर्भवति, बहूनां द्वीप[3]-समुद्रक्षेत्राणां तत्र व्याख्यानादिति । तदेवं 'क्षेत्रस्य क्षेत्राणामनुयोगः' इत्युक्तम् ॥ १३९९ ॥

अथ क्षेत्रेण क्षेत्रैरनुयोग इत्येतदाह—

[4]जंबूदीवपमाणं पुढविजियाणं तु पत्थयं काउं । एवं मविज्जमाणा हवंति लोगा असंखेज्जा ॥ १४०० ॥

इह जम्बूद्वीपप्रमाणं प्रस्थकं पल्यं कृत्वा पुनः पुनस्तद्भरण-विरेचनक्रमेण यदा सर्वेऽपि सूक्ष्म-बादर-पृथ्वीकायिकजीवा मीयन्ते तदाऽसंख्येयलोकाकाशप्रदेशसंख्योपेता जम्बूद्वीपप्रमाणाः प्रस्था भवन्ति, इत्येष क्षेत्रेण जम्बूद्वीपरूपेणानुयोगोऽभिधीयत इति । क्षेत्रैस्त्वनुयोगोऽयं द्रष्टव्यः, तद्यथा- बहुद्वीपप्रमाणं प्रस्थकं कृत्वाऽभीक्ष्णं तद्भरण-विरेचनक्रमेण समस्तपृथ्वीकायिकजीवा मीयमाना असंख्येयलोकाकाशप्रदेशराशिपरिमाणा बहुद्वीपप्रमानप्रस्था भवन्ति । एतदसंख्येयकं पूर्वस्माल्लघुतरं द्रष्टव्यम्, प्रस्थस्येह बृहत्तरत्वात् । एवं बहुद्वीपलक्षणैः क्षेत्रैरनुयोग इति ॥ १४०० ॥

---

१ वर्त्याऽक्षेण वा कराङ्गुल्यादिना वापि द्रव्येण । अक्षैश्च द्रव्यैरधिकरणे कल्प-कल्पैः ॥ १३९८ ॥

२ जम्बूद्वीपप्रज्ञप्तिः क्षेत्रस्यैवमादिर्भवत्यनुयोगः । क्षेत्राणामनुयोगो द्वीप-समुद्राणां प्रज्ञप्तिः ॥ १३९९ ॥ ३ ध.छ.ज. 'पसागरक्षे' ।

४ जम्बूद्वीपप्रमाणं पृथ्वीजीवानां तु प्रस्थकं कृत्वा । एवं मीयमाना भवन्ति लोका असंख्येयाः ॥ १४०० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ क्षेत्रे क्षेत्रेषु चानुयोगमाह—

[1]खेत्तम्मि उ अणुओगो तिरियं लोगम्मि जम्मि वा खेत्ते । अड्ढाइयदीवेसुं छलद्धवीसाए खेत्तेसुं ॥१४०१॥

क्षेत्रे पुनरयमनुयोगः, तद्यथा– तिर्यग्लोकक्षेत्रे योऽनुयोगः प्रवर्तते, यत्र वा ग्राम-नगरादौ, व्याख्यानसभादौ वा क्षेत्रे स्थितोऽनुयोगकर्ताऽनुयोगं करोति, एष क्षेत्रेऽनुयोगः क्षेत्रानुयोग उच्यते । क्षेत्रेष्वनुयोगः कः ?, इत्याह– योऽर्धतृतीयद्वीप-समुद्रान्तवर्तिक्षेत्रेषु प्रवर्तते, सार्धपञ्चविंशतिजनपदरूपेषु वाऽऽर्यक्षेत्रेष्विति । उक्तः षड्विधक्षेत्रानुयोगः ॥ १४०१ ॥

अथ तावद्भेदमेव कालानुयोगमाह—

[2]कालस्स समयरूवण कालाण तदाइ जाव सव्वद्धा । कालेणानिलावहारो कालेहि उ सेसकायाणं ॥१४०२॥

कालस्यानुयोगः कः ?, इत्याह– 'समयरूवण त्ति' उत्पलपत्रशतभेद-पट-शाटिकापाटनादिदृष्टान्तैः समयस्य प्ररूपणेत्यर्थः । कालानां त्वनुयोगः 'तदाइ जाव सव्वद्ध त्ति' समयमादौ कृत्वा यावत् सर्वाद्धायाः प्ररूपणेत्यर्थः । कालेनाऽनुयोगोऽनिलापहारः । इदमुक्तं भवति– 'बादरपर्याप्तवायुकायिका वैक्रियशरीरे वर्तमाना अद्धापल्योपमस्यासंख्येयभागेनापह्रियन्त इत्येवं या प्ररूपणा स कालेनानुयोगः' इत्येवं कोट्याचार्यटीकायां विवृतम् । अन्यत्र त्वनुयोगद्वारादिषु वैक्रियशरीरिणो वायवः क्षेत्रपल्योपमासंख्येयभागप्रदेशपरिमाणा दृश्यन्ते । तत्त्वं तु केवलिनो विदन्ति । शेषाणां तु पृथिव्यादिकायानां यथासंभवं कालैरनुयोगः, तद्यथा– 'पैज्जत्तबायरानलअसंखया होंति आवलियवग्गा' इति, आवलिकायां यावन्तः समयास्तेषां वर्गः क्रियते, तथाविधेषु चासंख्यातेषु वर्गेषु यावन्तः समयास्तत्प्रमाणा बादरपर्याप्ततेजःकायिका भवन्ति । तथा, प्रत्युत्पन्नत्रसकायिका असंख्येयाभिरुत्सर्पिण्य-ऽवसर्पिणीभिरपह्रियन्ते । एवं पृथिव्यादिष्वपि यथासंभवं वाच्यमिति ॥ १४०२ ॥

अथ काले कालेषु चानुयोगमाह—

[3]कालम्मि बीयपोरिसि समासु तिसु दोसु वा वि कालेसु । [4]पवयणस्सेगवयाइवयणाणं सोलसण्हं तु॥१४०३॥

---

१ क्षेत्रे त्वनुयोगस्तिर्यग्लोके यस्मिन् वा क्षेत्रे । अर्धतृतीयद्वीपेष्वर्धषड्विंशेषु क्षेत्रेषु ॥ १४०१ ॥ ×(अथ)

२ कालस्य समयरूपणा कालानां तदादि यावत् सर्वाद्धा । कालेनाऽनिलापहारः कालैस्तु शेषकायाणाम् ॥ १४०२ ॥

३ पर्याप्तबादरानलासंख्येयका भवन्त्यावलिकावर्गाः ।

४ काले द्वितीयपौरुष्यां समासु तिसृषु द्वयोर्वापि कालयोः । वचनस्यैकवचनादिवचनानां षोडशानां तु ॥ १४०३ ॥

प्रथमपौरुष्यां किल सूत्रमध्येतव्यम्, द्वितीयपौरुष्यां तु तस्यानुयोगः प्रवर्तते । अत इह कालस्य प्राधान्येन विवक्षणात् काले द्वितीयपौरुषीलक्षणेऽनुयोगः कालानुयोग इत्युच्यते । तथा, अवसर्पिण्यां सुषमदुःषमा-दुःषमसुषमा-दुःषमारूपासु तिसृषु 'समासु त्ति' अरकेषु अनुयोगः प्रवर्तते, नान्यत्र । उत्सर्पिण्यां तु दुःषमसुषमा-सुषमदुःषमारूपयोः समयोर्द्वयोररकयोरनुयोगः प्रवर्तते, नान्यत्र । अयं च कालेष्वनुयोगः कालानुयोगोऽभिधीयते । तदेवं भणितः षड्विधकालानुयोगोऽपि । अथ वचनानुयोगमाह– 'वयणस्सेत्यादि' इत्थंभूतमेकवचनं भवति, एवंभूतं वा द्विवचनम्, ईदृशं वा बहुवचनम्, एवंस्वरूप एकवचनाद्यन्यतरवचनस्य योऽनुयोगः, अयं वचनस्यानुयोग उच्यते । वचनानां त्वनुयोगः षोडशवचनानुयोगः । कानि पुनस्तानि षोडश वचनानि ?। उच्यते—

' [1]लिंगतियं वयणतियं कालतियं तह परुक्ख-पच्चक्खं । उवणय-ऽवणयचउद्धा अज्झत्तं होइ सोलसमं ॥ १ ॥ '

एषाऽपि गाथा विनेयानुग्रहार्थं व्याख्यायते– इयं स्त्री, अयं पुरुषः, इदं कुलमिति त्रीणि लिङ्गप्रधानानि वचनानि लिङ्गत्रिकमुच्यते । एकः, द्वौ, बहव इत्येकत्वाद्यभिधायकशब्दत्रयं वचनत्रयमभिधीयते । अकरोत्, करोति, करिष्यतीति भूतादिकालत्रयप्रतिपादकं वचनं कालत्रिकं कालप्रतिपादकवचनत्रयमित्यर्थः । तथा, 'सः' इति परोक्षार्थनिर्देशः परोक्षवचनम् । 'अयम्' इति प्रत्यक्षनिर्देशः प्रत्यक्षवचनम् । उपनयः स्तुतिः । अपनयस्तु निन्दा, तयोर्वचनं चतुर्धा, तद्यथा– 'रूपवती स्त्री' इत्युपनयवचनम्, 'कुरूपा स्त्री' इत्यपनयवचनम् । 'रूपवती स्त्री, किन्तु कुशीला' इत्युपनया-ऽपनयवचनमिति । 'कुरूपा स्त्री, किन्तु सुशीला' इत्यपनयो-पनयवचनमिति । यत्रान्यच्चेतसि निधाय विप्रतारकबुद्ध्याऽन्यद् बिभणिषुरपि सहसा यच्चेतसि तदेव वक्ति, तत् षोडशमध्यात्मवचनमिति । एतत् षोडशवचनव्याख्यानं वचनानामनुयोगः । अत्र प्रथमैकवचनादीनामेकविंशतिवचनानां व्याख्या वचनानामनुयोग इत्यपि द्रष्टव्यमिति । तदेवं वचनस्य वचनानामित्युक्तम् ॥ १४०३ ॥

अथ वचनेन वचनैर्वचनेऽनुयोगः, इत्येतदाह—

[2]वयणेणायरियाई एक्केणुत्तो बहूहिं वयणेहिं । वयणे खओवसमिए वयणेसु उ नत्थि अणुओगो ॥ १४०४ ॥

वचनेनानुयोगो यथा– कश्चिदाचार्यादिः साध्वादिना सकृदेकेनापि वचनेनाऽभ्यर्थितोऽनुयोगं करोति । वचनैस्त्वनुयोगः–

---

१ लिङ्गत्रिकं वचनत्रिकं तथा परोक्ष-प्रत्यक्षे । उपनया-पनययोश्चतुर्धाऽध्यात्मं भवति षोडशम् ॥ १ ॥

२ वचनेनाचार्यादिरेकेनोक्तो बहुभिर्वचनैः । वचने क्षायोपशमिके, वचनेषु तु नास्त्यनुयोगः ॥ १४०४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदा स एवाऽसकृद् बहुभिर्वचनैरभ्यर्थितस्तं करोति । क्षायोपशमिके वचने स्थितस्यानुयोगो वचनेऽनुयोगः । वचनेषु पुनर्नास्त्यनुयोगः, वचनस्य क्षायोपशमिकत्वेनानेकत्वासंभवात् । अन्ये तु मन्यन्ते- व्यक्तिविवक्षया येष्वेव क्षायोपशमिकेषु बहुषु वचनेष्वनुयोगः, इत्यप्यविरुद्धमेवेति । तदेवं पञ्चविधः, षड्विधो वा निर्दिष्टो वचनानुयोगोऽपि ॥ १४०४ ॥

अथैतावद्भेदमेव भावानुयोगमाह—

[1]भावस्सेगयरस्स उ अणुओगो जो जहिट्ठिओ भावो । दोमाइसंनिगासे अणुओगो होइ भावाणं ॥१४०५॥

औदयिकादिभावानामेकतरस्य व्याख्यानं यो यथावस्थितो भावस्तथैव प्ररूपणं भावस्यानुयोग इति सोपस्कारस्तात्पर्यार्थः । तेषामेवौदयिकादिभावानां द्व्यादिसंनिकाशे द्व्यादिसंयोगे यद् व्याख्यानं स भावानामनुयोगः । तदेवं भावस्य भावानां वाऽनुयोग इत्युक्तम् ॥ १४०५ ॥

अथ भावेन भावैर्भावे भावेषु वानुयोग इत्येतद् विवरीषुराह—

[2]भावेण संगहाईण ण्णयरेणं दुगाइभावेहिं । भावे खओवसमिए भावेसु य नत्थि अणुओगो ॥ १४०६ ॥

अहवा आयाराइसु भावेसु वि एस होइ अणुओगो । सामित्तं आसज्ज व परिणामेसुं बहुविहेसुं ॥ १४०७ ॥

संग्रहादीनां पञ्चानामध्यवसायानामन्यतरेण चित्ताध्यवसायेन योऽनुयोगः क्रियते स भावेनानुयोगः । ते चामी पञ्चाभिप्रायाः, यदाह स्थानाङ्गे- " [3]पंचहिं ठाणेहिं सुयं वाएज्जा, तं जहा- संगहट्ठाए, उवग्गहट्ठाए, निज्जरट्ठाए, सुयपज्जवजाएणं, अव्वोच्छित्तीए" । अयमर्थः- कथं नु नामैते शिष्याः सूत्रार्थसंग्राहकाः संपत्स्यन्ते ? । तथा, कथं नु नाम गीतार्था भूत्वाऽमी वस्त्राद्युत्पादनेन गच्छस्योपग्रहकरा भविष्यन्ति ?, ममाप्येतां वाचयतः कर्मनिर्जरा भविष्यति । तथा, श्रुतपर्यवजातं श्रुतपर्यायराशिर्ममापि वृद्धिं यास्यति ।

---

१ भावस्यैकतरस्य त्वनुयोगो यो यथावस्थितो भावः । द्व्यादिसंनिकाशेऽनुयोगो भवति भावानाम् ॥ १४०५ ॥

२ भावेन संग्रहादीनामन्यतरेण, द्व्यादिभावैः । भावे क्षायोपशमिके भावेषु च नास्त्यनुयोगः ॥ १४०६ ॥
अथवाऽऽचारादिषु भावेष्वप्येष भवत्यनुयोगः । स्वामित्वमासाद्य वा परिणामेषु बहुविधेषु ॥ १४०७ ॥

३ पञ्चभिः स्थानैः श्रुतं वाचयेत्, तद्यथा- संग्रहार्थतया, उपग्रहार्थतया, निर्जरार्थतया, श्रुतपर्यवजातेन, अव्यवच्छित्त्या ।

तथा, श्रुतपर्यवजातं श्रुतपर्यायराशिर्ममापि वृद्धिं यास्यति, श्रुतस्य चाव्यवच्छित्तिर्भविष्यतीति । एवं पञ्चभिरभिप्रायैः श्रुतं सूत्रार्थतो वाचयेदिति । एषामेव संग्रहादिभावानां मध्याद् द्वि-त्र्यादिभिर्भावैः सर्वैर्वाऽनुयोगं कुर्वतो भावैरनुयोगः । क्षायोपशमिके भावे स्थितस्य व्याख्यां कुर्वतो भावेऽनुयोगः । भावेषु पुनर्नास्त्यनुयोगः, क्षायोपशमिकत्वेन तस्यैकत्वात् । अथवा, एकोऽपि क्षायोपशमिको भाव आचारादिशास्त्रलक्षणविषयभेदाद् भिद्यते । ततश्चाचारादिशास्त्रविषयभेदभिन्नेषु क्षायोपशमिकभावेष्वप्येष भवत्यनुयोगः, न कश्चिद् विरोधः । 'वा' इति अथवा, स्वामित्वमासाद्यानुयोगकर्तृस्वामिनो बहून् प्रतीत्य क्षायोपशमिकपरिणामेषु बहुष्वनुयोगप्रवृत्तेर्भावेष्वनुयोगो न विहन्यते । इत्युक्तः षड्विधो भावानुयोग इति ॥ १४०६ ॥ १४०७ ॥

एषां चानुयोगविषयाणां द्रव्यादीनां परस्परं यस्य यत्र समादेशः, भजना वा, तदेवाह—

[1]दव्वे नियमा भावो न विणा तेयावि खेत्त-कालेहिं । खेत्ते तिण्ह वि भयणा कालो भयणाए तीसुं पि ॥१४०८॥

द्रव्ये तावद् नियमाद् भावः पर्यायोऽस्ति, पर्यायविरहितस्य द्रव्यस्य क्वापि कदाचिदप्यभावात् । तावपि द्रव्य-भावौ क्षेत्र-कालाभ्यां विना न संभवतः । द्रव्य-भावयोर्हि नियमवान् सहभावो दर्शित एव । द्रव्यं चावश्यकं क्वचित् क्षेत्रेऽवगाढमन्यतरस्थितिमदेव च भवति । अतः सिद्धमिदम्- द्रव्य-भावावपि क्षेत्र-कालाभ्यां विना क्वापि न भवतः । क्षेत्रे तु त्रयाणामपि द्रव्य-काल-भावानां भजना विकल्पना- क्वापि तत्र ते प्राप्यन्ते, क्वापि नेत्यर्थः, लोकक्षेत्रे त्रयाणामपि भावात्, अलोकक्षेत्रेऽभावादिति ।

आह- अलोकक्षेत्रेऽप्याकाशलक्षणं द्रव्यमस्ति, वर्तनादिरूपस्तु कालः, अगुरुलघवश्चानन्ताः पर्यायाः सन्त्येव; तत् कथं तत्र द्रव्य-काल-भावानामभावः ? । सत्यम्, किन्त्वाकाशलक्षणं द्रव्यं यत् तत्रोच्यते, तदयुक्तम्, तस्य क्षेत्रग्रहणेनैव गृहीतत्वात् । कालस्यापीह समयादिरूपस्य चिन्तयितुं प्रस्तुतत्वात्, तस्य च समयक्षेत्रादन्यत्राभावात्, वर्तनादिरूपस्य त्वत्राविवक्षितत्वात्, क्षेत्रग्रहणेनैव तत्र तस्य गृहीतत्वाच्च । पर्यायाश्चेह धर्मा-ऽधर्म-पुद्गल-जीवास्तिकायद्रव्यसंबन्धिनो विवक्षिताः, ते चालोके न सन्त्येव । आकाशसंबन्धिनस्त्वगुरुलघुपर्यायाः क्षेत्रग्रहणेनैव गृहीतत्वाद् नेह विवक्षिताः । इत्यतोऽलोके त्रयाणामपि द्रव्य-काल-भावानामभावः । 'कालो भयणाए तीसुं पि त्ति' द्रव्य-क्षेत्र-भावेषु त्रिष्वपि कालो भजनया विकल्पनया भवति, समयक्षेत्रान्तर्वर्तिषु तेषु तस्य भावात्, तद्बहिस्त्वभावादिति । एवं च स्थितानाममीषां द्रव्यादीनां यथासंभवमनुयोगः प्रवर्तत इति ॥ १४०८ ॥

×समादेशः-१ ध. छ. 'वामिति सं' । २ द्रव्ये नियमाद् भावो न विना तौ चापि क्षेत्र-कालाभ्याम् । क्षेत्रे त्रयाणामपि भजना कालो भजनया त्रिष्वपि ॥ १४०८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपरमपि द्रव्यादिगतं किञ्चित् स्वरूपं प्रसङ्गतः प्राह—

आहारो आहेयं च होइ दव्वं तहेव भावो य । खेत्तं पुण आहारो कालो नियमाउ आहेओ ॥१४०९॥

द्रव्यमाधारो भवति पर्यायाणाम्, आधेयं च भवति क्षेत्रे । तथा, भावश्चाधारो भवति कालस्य, काल-वर्णादीनां समयादिस्थितित्वादितिः आधेयश्च भवति द्रव्ये । क्षेत्रमाकाशं पुनः सर्वेषामपि धर्मा ऽधर्म-पुद्गल-जीव-कालद्रव्याणाम्, अगुरुलघुपर्यायाणां चाधार एव, न त्वाधेयम्, सर्वस्यापि वस्तुनस्तत्रैवावगाढत्वात्, तस्य च स्वप्रतिष्ठितत्वेनान्यत्राधेयत्वायोगादिति । 'कालो नियमाउ आहेउ त्ति' कालो नियमादाधेय एव भवति, न त्वाधारः, तस्य द्रव्य-पर्यायेष्वेव स्थितत्वात्, तत्र चाऽन्यस्यास्थितत्वादिति । तदेवं व्याख्यातो नामादिभेदतः सप्तविधोऽप्यनुयोगः ॥ १४०९ ॥

एतद्विपक्षश्चाननुयोगो भवति, अतस्तं बिभणिषुरुक्तोपसंहारं प्रस्तावनां चाह—

[2]एसोऽणुरूवजोगो गओऽणुओगो इओ विवज्जत्थं । जो सो अणणुओगो तत्थेमे होंति दिट्ठंता ॥१४१०॥

तदेवं गतो भणित एषोऽनुरूपयोगोऽनुयोगः सप्तविधोऽपि । अथ विपर्यस्तमेतद्विपर्ययेण योऽयमननुयोगः स उच्यते । तत्र चैते वक्ष्यमाणा दृष्टान्ता भवन्ति ॥ इति त्रयोविंशतिगाथार्थः ॥ १४१० ॥

के पुनस्तेऽननुयोगदृष्टान्ताः ?, इत्याह—

[3]वच्छगगोणी खुज्जा सज्झाए चेव बहिरउल्लावे । गामेल्लए य वयणे सत्तेव य होंति भावम्मि ॥ १४११ ॥

सावगभज्जा सत्तवईए य कोंकणगदारए नउले । कमलामेला संबस्स साहसं सेणिए कोवो ॥ १४१२ ॥

यथाऽनुयोगो नामादिभेदात् सप्तविधो वर्णितस्तथाऽननुयोगोऽपि यथासंभवं वक्तव्यः । तत्र नाम-स्थापने सुगमे । द्रव्याननुयोगे, तत्प्रसङ्गतो द्रव्यानुयोगे च वत्सगौरुदाहरणम् । क्षेत्रे त्वननुयोगा-ऽनुयोगयोः कुब्जोदाहरणम् । काले स्वाध्यायः । वचने पुनरुदाहरण-

---

१ आधार आधेयं च भवति द्रव्यं तथैव भावश्च । क्षेत्रं पुनराधारः कालो नियमादाधेयः ॥ १४०९ ॥

२ एषोऽनुरूपयोगो गतोऽनुयोग इतो विपर्यस्तम् । यः सोऽननुयोगस्तत्रेमे भवन्ति दृष्टान्ताः ॥ १४१० ॥

३ वत्सकगौः कुब्जा स्वाध्यायश्चैव बधिरोल्लापः । ग्रामेयकश्च वचने सप्तैव च भवन्ति भावे ॥ १४११ ॥
श्रावकभार्या साप्तपदिकश्च कोङ्कणकदारको नकुलः । कमलामेला शम्बस्य साहसं श्रेणिके कोपः ॥ १४१२ ॥

द्यम्, तद्यथा– बधिरोल्लापः, ग्रामेयकश्च । भावे तु सप्तोदाहरणानि भवन्ति, तद्यथा– श्रावकभार्या, साप्तपदिकः पुरुषः, कोङ्कणकदारकः, नकुलः, कमलामेला, शम्बस्य साहसम्, श्रेणिककोपश्च ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥ १४११ ॥ १४१२ ॥

अथ विस्तरतो 'वच्छगगोणी-' उदाहरणं भाष्यकारः प्राह—

[1]खीरं न देइ सम्मं परवत्थनिओगओ जहा गावी । छड्डेज्ज च परदुद्धं करिज्ज देहोवरोहं वा ॥ १४१३॥

यथा काचिच्छबलादिका गौरन्यस्या बहुलादिकायाः संबन्धिनि गोदोहकेन वत्से निर्युक्ते सत्यननुयोगोऽयमिति कृत्वा तन्नियोगतः क्षीरं दुग्धं सम्यग् न ददाति । अथवा, न तावता तिष्ठेत्, किन्तु परदुग्धमन्यस्या अपि गोः सत्कं दुग्धमग्रेऽपि गोदोहनिकाया व्यवस्थितमुल्लुलन्ती छर्दयेत् त्याजयेत् । यदिवा, देहोपरोधं लताप्रहारादिभिर्जानुभङ्गादिना देहबाधामपि कुर्यादित्यर्थः ॥१४१३॥

तथा किम् ?, इत्याशङ्क्य प्रस्तुतं योजयन्नाह—

[2]तह न चरणं पसूते परपज्जायविणिओगओ दव्वं । पुव्वचरणोवघायं करेइ देहोवरोहं वा ॥ १४१४ ॥

जिणवयणासायणओ उम्माया-ऽऽतंक-मरणवसणाइं । पावेज्ज सव्वलोयं स बोहिलाहोवघायं च ॥१४१५॥

दव्वविवज्जासाउ साहणभेओ तओ चरणभेओ । तत्तो मोक्खाभावो मोक्खाभावेऽफला दिक्खा॥१४१६॥

तथाऽत्रापि व्याख्याता यदा जीवादिद्रव्यमजीवादिधर्मैः प्ररूपयति, अजीवादिद्रव्यं वा जीवादिधर्मैः प्ररूपयति । तदित्थं प्ररूप्यमाणं तद् द्रव्यमनुयोगतो दुग्धस्थानीयं चरणं चारित्रं न प्रसूते– परपर्यायविनियोगतो विपर्यासात् तद्धेतुस्तद् न भवतीत्यर्थः । न चैतावता तिष्ठति, किन्त्वित्थमननुयोगं कुर्वतः पूर्वप्राप्तचरणोपघातं च करोति । तथा, इत्थमविधिप्ररूपणप्रवृत्तस्य रोगाद्युत्पत्तेर्देहस्याप्युपरोधं बाधां विदधाति । किञ्च, इत्थं जिनवचनाशातनोत्पत्तेरुन्मादा-ऽऽतङ्क-मरणव्यसनान्यपि प्राप्नुयात् । तथा, सर्वव्रतलोपम्, बोधिलाभोपघातं च प्राप्नुयादिति । ननु कथं विपर्ययप्ररूपणामात्रादेवैतावन्तो दोषाः स्युः ?, इत्याह– 'दव्वविवज्जासेत्यादि' विपरीतप्ररूपणे हि द्रव्यस्य विपर्यासो भवति, तथा च सति साधनस्य सम्यग्ज्ञानादेर्भेदोऽन्यथाभावो जायते । ततः साधनभेदाच्चरणभेदः,

---

१ क्षीरं न ददाति सम्यक् परवत्सनियोगतो यथा गौः । छर्दयेच्च परदुग्धं कुर्याद् देहोपरोधं वा ॥ १४१३ ॥ × नापत्ते-।

२ तथा न चरणं प्रसूते परपर्यायविनियोगतो द्रव्यम् । पूर्वचरणोपघातं करोति देहोपरोधं वा ॥ १४१४ ॥
जिनवचनाशातनत उन्मादा-ऽऽतङ्क-मरणव्यसनानि । प्राप्नुयात् सर्वलोपं स बोधिलाभोपघातं च ॥ १४१५ ॥
द्रव्यविपर्यासात् साधनभेदस्ततश्चरणभेदः । ततो मोक्षाभावो मोक्षाभावेऽफला दीक्षा ॥ १४१६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तद्भेदात् तत्साध्यस्य मोक्षस्याभावप्रसङ्गः, उपायाभावे उपेयासिद्धेः। ततो मोक्षाभावे निष्फलैव दीक्षा, मोक्षार्थमेव तत्प्रतिपत्तेः, ततस्तदभावे निरर्थकैव सेति। तदेवं द्रव्यानुयोगे निर्दिष्टा दोषाः ॥ १४१४ ॥ १४१५ ॥ १४१६ ॥

अथ द्रव्यस्य सम्यगनुयोगे गुणानाह—

सम्मं पयं पयच्छइ सवत्थविणिओगओ जहा धेणू। तह सयपज्जवजोए दव्वं चरणं ततो मोक्खो ॥१४१७॥

यथा परवत्सपरिहारेण स्ववत्सविनियोगाद् गौः सम्यक् पयः प्रयच्छति, तथा द्रव्यमपि स्वपर्यायविनियोगे सम्यक्चरणं प्रसूते। अनर्थवाप्तिश्च काचिद् न भवति। यतश्चरणात् किम्?, इत्याह— यतोऽचिराद् मोक्षः प्राप्यत इति। तदेवं द्रव्यानुयोगे तदनुयोगे च दोष-गुणयोर्वत्सगोदृष्टान्त उक्तः ॥ १४१७ ॥

अथ क्षेत्राद्यननुयोगे दोषान्, तदनुयोगे तु गुणान् सोदाहरणानतिदिशन्नाह—

एवं खेत्ताईसु वि सधम्मविणिओगओऽणुओग त्ति। विवरीए विवरीओ सोदाहरणोऽणुगंतव्वो ॥१४१८॥

एवमुक्तानुसारेण क्षेत्र-काल-वचन-भावेष्वपि स्वधर्मविनियोगत आत्मोचितधर्मयोजनादनुयोगः विपरीते तु विपरीतधर्मयोजने तु विपरीतोऽननुयोगः सोदाहरणः स्वबुद्ध्या ग्रन्थान्तराच्चानुगन्तव्यो ज्ञातव्यः। तत्रेत्थमतिदिष्टेऽपि मुग्धविनेयानुग्रहार्थं किञ्चिदुच्यते। तत्र क्षेत्रतोऽननुयोगे कुब्जोदाहरणमभिधीयते—

प्रतिष्ठाननगरे सालवाहनो नाम राजा। स च प्रतिवर्षं समागत्य भृगुकच्छे नभोवाहननृपं रुणद्धि। ऋतुबद्धे च काले तत्र स्थित्वा वर्षासु स्वनगरं गच्छति। अन्यदा च रोहके समागते तेन राज्ञा स्वनगरं निर्गमिष्णोऽस्थानसभामण्डपिकायां पतद्ग्रहकमन्तरेणापि भूमौ निष्ठ्यूतम्। तस्य च राज्ञः पतद्ग्रहकधारिणी कुब्जा समास्ते। तया चातीव भावज्ञतया लक्षितम्— नूनं परिजिहीर्षुरिदं स्थानं नरपतिर्यास्यति प्रभाते स्वनगरम्, तेनेत्थमिदं निष्ठीवति। इति संचिन्त्य निर्गादितं कथमप्यात्मपरिचितस्य यानशालिकस्य। ततस्तेन प्रगुणीकृत्य यानान्यगच्छत एव राज्ञः पुरतोऽपि प्रवर्तितानि। तत्पृष्ठतश्च सर्वोऽपि स्कन्धावारः प्रवृत्तो गन्तुम्। व्याप्तं च नभोमण्डलं कटकधूलीनिकरेण। ततश्चिन्तितं विस्मितमनसा नराधिपेन— ननु मया कस्यापि प्रयाणकं न कथितम्, धूलीभयात् किलाहं

× सयच्छ—। १ सम्यक् पयः प्रयच्छति स्ववत्सविनियोगतो यथा धेनुः। तथा स्वपर्याययोगे द्रव्यं चरणं ततो मोक्षः ॥ १४१७ ॥ × दिष्टे—।
२ एवं क्षेत्रादिष्वपि स्वधर्मविनियोगतोऽनुयोग इति। विपरीते विपरीतः सोदाहरणोऽनुगन्तव्यः ॥ १४१८ ॥ ३ क.ग. 'शाल'।

स्वल्पपरिच्छदो भूत्वा सैन्यस्य पुरत एव यास्यामि, एतच्च विपरीतमापन्नम्, तत्कथमिदं कटकलोकेन विज्ञातम्?; इति परम्परया श्रोधयता विज्ञाता कुब्जा। पृष्टया च तया कथितं सर्वमपि यथावृत्तम्। तदत्र सभामण्डपकादिक्षेत्रेण निष्ठीवनस्थानानुयोगः, निष्ठीवनादिरक्षण-प्रमार्जनो-पलेपनादिकस्त्वनुयोगः। एवमेकान्तनित्यम्, एकम्, अप्रदेशं चाकाशं प्ररूपयतोऽननुयोगः, स्याद्वादलाञ्छितं तु तदेव प्ररूपयतोऽनुयोग इति।

कालाननुयोगा-ऽनुयोगयोः स्वाध्यायदृष्टान्तः, तद्यथा—एकः साधुः प्रादोषिककालग्रहणानन्तरं कालिकश्रुतमतीतामपि तद्गुणनवेलामजानानः परावर्तयते। ततः सम्यग्दृष्टिदेवतया चिन्तितम्— बोधयाम्यमुम्, मा भूद् मिथ्यादृष्टिदेवता छलमस्य। ततो मथितकारिकारूपेण मथितभृतमेव घटं मस्तके निधाय तस्यैव साधोरन्तिके गतागतानि कुर्वती 'मथितं लभ्यते' इति महता शब्देन पुनः पुनर्घोषयन्ती परिभ्रमति। ततोऽत्युद्वेजितेन साधुना प्रोक्तम्— अहो! भवत्यास्तक्रविक्रयवेला। ततो मथितकारिकयाऽप्यवाचि— अहो! तवापि स्वाध्यायवेला। ततो विस्मितः साधुरुपयुज्य मिथ्यादुष्कृतं ददाति। ततः 'अकालस्वाध्यायविधानेन मिथ्यादृष्टिदेवतेवाविहितच्छलानि भवन्ति, अतः पुनरप्येवं मा कार्षीस्त्वम्' इत्यादि साधुर्देवतयाऽनुशासित इति। एष स्वाध्यायस्य कालाननुयोगः, काले तु पठतस्तदनुयोगः। प्रस्तुतेऽपि कालधर्माणां वैपरीत्या-ऽवैपरीत्यप्ररूपणेऽननुयोगा-ऽनुयोगौ वाच्याविति।

अथ वचनविषयमननुयोगा-ऽनुयोगयोरुदाहरणद्वयमुच्यते। तत्र प्रथमं बधिरोल्लापः। तत्र चैकस्मिन् ग्रामे बधिरं कुटुम्बं परिवसति— स्थविरः, स्थविरा, पुत्रः, वधूश्च। अन्यदा च पुत्रः क्षेत्रे हलं वाहयन् पथिकैर्मार्गं पृष्टो बधिरतया ब्रवीति— गृहजातौ मम बलीवर्दाविमौ, न पुनरन्यस्य सत्कौ। ततो 'बधिरोऽयम्' इति विज्ञाय गताः पथिकाः। ततो भक्तं गृहीत्वा वधूः समायाता। शृङ्गितौ पथिकैर्बलीवर्दावित्यादि निवेदितं ततस्तस्याः। तया च प्रोक्तम्— 'क्षारमलवणं वेति न जानाम्यहम्, एतत् स्वदीयजन्यैव हि संस्कृतम्। ततो गृहं गतया तयापि क्षारादिभणनव्यतिकरो निवेदितः। स्थविरया च कर्तयन्त्या प्रोक्तम्— स्थूलं सूक्ष्मं वा भवतु, इदं स्थविरस्य परिधानं भविष्यति। निवेदितं चैतत् सानुशयचित्तया स्थविरया गृहमागतस्य स्थविरस्य। तेनापि विभ्यता प्रोक्तम्— तव जीवितं पिबामि, यद्येकमपि तिलमहं भक्षयामीति। एवमेकवचनादिकमप्युक्तं द्विवचनादितया यः शृणोति, तथैव चान्यस्य प्ररूपयति, तस्यानुयोगः, यथावच्छ्रवणप्ररूपणे त्वनुयोग इति।

वचनानुयोगस्यैवेह प्राधान्यख्यापनार्थं वचनविषयमेव द्वितीयं ग्रामेयकोदाहरणमुच्यते— तत्र चैकस्मिन् नगरे कस्याश्चिद् महि-

---

१ क.ग.छ. 'प्रदोषिका'।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लाया भर्ता मृतः। ततस्तत्रेन्धन-जलादिकष्टेन बाधिताऽनिर्वहन्ती लघुना निजतनयेन सह ग्रामं गताऽसौ। ततो वृद्धिं गतेन पुत्रेण सा पृष्टा– मदीयपितुः का जीविकाऽऽसीत्?। तया प्रोक्तम्– राजसेवा। तेनोक्तम्– अहमपि तां करोमि। तया प्रोक्तम्– पुत्र! दुष्करोऽसौ महता विनयेन क्रियते। कीदृशः पुनरसौ विनयः?। तया प्रोक्तम्– सर्वस्यापि दृष्टस्य प्रणामः कार्यः, नीचैर्वृत्त्या सर्वस्यापि प्रवर्तितव्यम्, परच्छन्दानुवृत्तिपरैश्च सर्वत्र भवितव्यम्। 'एवं करिष्यामि' इत्यभ्युपगम्य चलितोऽयं राजधानीसंमुखः। मार्गे च हरिणेष्वागच्छत्सु वृक्षमूलेष्वाकृष्टधनुर्यष्टयो निलीना व्याधा दृष्टाः। तेषां च तेन महता शब्देन योत्कारः कृतः। ततस्त्रस्ताः प्रपलाय्य गता हरिणाः। ततो व्याधैः कुट्टयित्वा बद्धोऽसौ। ततस्तेनोक्तम्– जनन्याहं शिक्षितः– 'दृष्टस्य सर्वस्यापि योत्कारः कर्तव्यः' इत्यादि। ततश्च 'ऋजुरयम्' इति ज्ञात्वा मुक्तस्तैः। शिक्षितश्च यथा– 'ईदृशेष्टे निलीनैरवनतैः शब्दमकुर्वद्भिः, शनैर्वा जल्पद्भिर्निभृतमागम्यते'। तदभ्युपगम्य पुरतो गन्तुं प्रवृत्तोऽसौ। दृष्टाश्च वस्त्राणि क्षालयन्तो रजकाः। तेषां च वस्त्राणि तस्करैर्नित्यमपहियन्ते। ततस्तत्र दिने लगुडादिव्यग्रपाणयो रजकाः प्रच्छन्नोपविष्टा हेरयन्तस्तिष्ठन्ति। आगतश्चाजल्पन्नवनतगात्रो निलीयमानः शनैः स तत्र ग्रामेयकः। 'स एष चौरः' इति मत्वा कुट्टयित्वा बद्धोऽसौ रजकैः। सद्भावे च कथिते मुक्तस्तैः। शिक्षितश्च यथा– 'ईदृशे कस्मिंश्चिद् दृष्ट एवमुच्यते, यथा– ऊषं क्षारोऽत्र पततु, शुद्धं च भवतु' इति। इदं चाभ्युपगम्य प्रवृत्तः पुरतो गन्तुम्। ततो दृष्टं कंचिद् ग्रामे बहुभिर्मङ्गलैः प्रथमं हलवाहनस्य दिवसकरणं क्रियमाणम्। तत उक्तम्– ऊषमित्यादि। ततस्तैरपि कृपीवलैः पिट्टितः, बद्धश्च। सद्भावे ज्ञाते मुक्तः। शिक्षितश्च यथा– 'ईदृशे कापि दृष्टे प्रोच्यते, यथा–गन्त्र्योऽत्र म्रियन्ताम्, वह्नत्र भवतु, सदैव चेदमस्तु' इति। अभ्युपगतं च तेनेदम्। अन्यत्र च मृतके वहिर्नीयमाने प्रोक्तमिदम्। तत्रापि कुट्टितः, बद्धश्च। सद्भावकथने च मुक्तः। शिक्षितश्च यथा– 'ईदृशं मा भूद् भवतां कदाचिदपि, वियोगश्चेदृशेनास्तु' इति। एतच्चान्यत्र विवाहे प्रोक्तम्। तत्रापि तथैव बद्धः। सद्भावे परिज्ञाते मुक्तः। शिक्षितश्च यथा– 'ईदृशे प्रोच्यते– सदैव पश्यन्त्वीदृशानि भवन्तः, शाश्वतश्च भवत्वेतत्संबन्धः, मा भूदिह वियोगः' इति। इदं चान्यत्र कचिद् निगडबद्धं राजानमवलोक्य ब्रुवाणस्तथैव कदर्थयित्वा मुक्तः। शिक्षितश्च यथा– 'ईदृशे वियोगः शीघ्रं भवत्वनेन, एवंविधं च मा भूत् कदाचिदपि' इत्यभिधीयते। एतच्चान्यत्र क्वचिद् राज्ञां संधौ जल्प्यमाने प्रोक्तम्। ततस्तत्रापि तथैव कदर्थितः। एवं स्थाने स्थाने कदर्थ्यमानोऽन्यदा कस्यापि विभवविप्रमुक्तठक्कुरस्य सेवां विधातुमारब्धः। तत्र चान्यदा गृहे आम्लखलिकायां सिद्धायां ग्रामसभाजनसमूहमध्ये उपविष्टस्य ठक्कुरस्य 'शीतलीभूतैषा भोक्तुमयोग्या भविष्यति' इति भार्यया तदाकारणाय प्रेषितो ग्रामेयकः। तेनापि जनसमूहस्य शृण्वतो महता शब्देनोक्तम्– आगच्छ ठक्कुर! शीघ्रमेव गृहम्, भुङ्क्ष्व आम्लखलिकाम्, शीतलीभवति लग्नाऽसौ। ततो लज्जितष्ठक्कुरो गृहं गतः। ततोऽगाढं ताडयित्वा शिक्षितः, यथा–'नेत्थं पूत्कुर्वाणैर्गृहप्रयोजनानि भण्यन्ते, किन्तु वस्त्रेण मुखं स्थगयित्वा कर्णाभ्यर्णे च स्थित्वा शनैः कथ्यन्ते। ततोऽन्यदा वह्निदीप्ते गृहे गतोऽसौ राजसभायां शनैरग्रतः स्थित्वा वस्त्रं च मुखद्वारे दत्त्वा कथितं च तस्य कर्णे। ततः संभ्रमाद् धावितो गृहाभिमुखं ठक्कुरः। दग्धं च ससर्वस्वं सर्वमपि गृहम्। ततः कुपितेन बाढं ताडितोऽसौ ठक्कुरेण। भणितश्च– निर्लक्षण! प्रथममेव धूमे निर्गते जलाचाम्ल-धूलि-भस्मादिकं किमिति त्वया न निक्षिप्तम्?, महता च शब्देन किमिति त्वया न पूत्कृतम्?। तेनोक्तम्– अन्यदेत्थं करिष्यामीति। ततः कदाचिद् विहितस्नानो धूपनायोपविष्टष्ठक्कुरः। निर्गता च प्रच्छादनपट्टस्योपर्यगुरुधूमशिखा। दृष्टा च ग्रामेयकेण। क्षिप्ता चोत्पाट्य तदुपर्याचाम्लभृतमहास्थाली, जल-धूली-भस्मादिकं च, तथा च पूत्कृतं महद्भिः शब्दैरिति। ततः 'अयोग्योऽयम्' इति निष्काशितो गृहात्। एवं शिष्योऽपि यावन्मात्रं वचनं गुरुः कथयति, तावन्मात्रमेव स्वयं द्रव्य-क्षेत्र-काल-पराभिप्रायौचित्यपरिज्ञानशून्यो यो वक्ति तस्य वचनाननुयोगः, यस्तु द्रव्य-क्षेत्राद्यौचित्येन वक्ति तस्य तदनुयोग इति।

भावानुयोगा-नुयोगयोः सप्तोदाहरणानि– तत्र श्रावकभार्योदाहरणमुच्यते– एकेन गृहीताणुव्रतेन तरुणश्रावकेणातीव रूपवती, कृतोद्भटरूपशृङ्गारा निजपत्न्या एव सखी कदाचिद् दृष्टा, गाढमध्युपपन्नश्च तस्याम्, पुरं लज्जादिना किमपि वक्तुमशक्नुवंस्तत्प्राप्तिचिन्तया च प्रतिदिनमतीव दुर्बलीभवति। निर्बन्धेन पृष्टं कारणं स्वभार्यया। कथितं च कथं कथमपि तेन। तया चातीव दक्षतया प्रोक्तम्– एतावन्मात्रेऽप्यर्थे किं खिद्यते?, प्रथममेव ममैतत् किं न कथितम्?, स्वाधीना हि मम सा, आनयामि सत्वरमेवेति। ततोऽन्यदिने भणितो भर्ता– अभ्युपगतं सहर्षया तया युष्मत्समीहितम्, प्रदोषे चागमिष्यति, परं लज्जालुतया वासभवनप्रविष्टमात्रापि प्रदीपं विध्यापयिष्यति। तेनोक्तम्– एवं भवतु। किमित्थं विनश्यति?! ततो वयस्यायाः सकाशात् किञ्चिद् निमित्तमुद्ग्राह्य याचितानि तया तदीयानि स्वभर्तृदृष्टपूर्वाणि प्रधानवस्त्राणि, आभरणानि च। ततो गुटिकादिप्रयोगतो विहितसखीसदृशस्वरादिस्वरूपा, तथैव कृतशृङ्गारा तत्सदृशललितेन, विलासैश्चान्विता तस्यैव श्राद्धस्य भार्या संनिहितधरकुसुम-ताम्बूल-श्रीखण्ड-ऽगुरु-कर्पूर-कस्तूरिकादिसमस्तभोगाङ्गा विहितामलप्रदीपालोके रमणीये वासभवने सविलासमन्वविशत्। ततो दृष्टा सोत्कण्ठविस्फारितदृशा त्रिदशकल्लोलिनीपुलिनप्रतिस्पर्धिपल्यङ्कोपविष्टेन झगित्येव नयन-मनसोरमृततृष्टिमिवादधाना तेनैषा। तथा च दृष्टमात्रया विध्यापितः प्रदीपः। क्रीडितं च विविधगोष्ठीप्रबन्धपूर्वकं तया सह निर्भरं तेन। गतायां च तस्यां प्रत्युषसि चिन्तितमनेन—

"सयलसुरा-ऽसुरपणमियचलणेहिं जिणेहिं जं हियं भणियं। तं परभवसंबलयं अहह! मए हारिअं सीलं॥ १॥"

× वाटे-।• डी-। १ सकलसुरा-ऽसुरप्रणतचरणैर्जिनैर्यद्धितं भणितम्। तत् परभवशम्बलकमहह! मया हारितं शीलम्॥ १॥ + पृष्टः -।क्र तत्-।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादिसंवेगवशोत्पन्नपश्चात्तापमहानलल्लुप्यमानान्तःकरणः प्रतिदिनमधिकतरं दुर्बलीभवत्यसौ । ततो निर्बन्धेन स्वभार्यया पृष्टो निःश्वस्य सखेदं ब्रवीति– प्रिये ! यतश्चिरकालानुपालितस्वर्गा-ऽपवर्गनिबन्धनव्रतखण्डनेनाधुना कृतं मया तदकर्तव्यं यद् बालिशानामप्यविधेयम् । ततः कृशीभवाम्यहमनया चिन्तया । ततो भार्यया संवेगवशीभूतं व्यावृत्तं च तच्चेतो विज्ञाय कथितः सर्वोऽपि यथावृत्तः सद्भावः । साभिज्ञानकथनादिभिश्च समुत्पादिता प्रतीतिस्तस्य । ततः स्वस्थीभूतोऽयमिति । तदेवं स्वकलत्रमपि परकलत्राभिप्रायेण भुञ्जानस्य तस्य भावाननुयोगः, यथावस्थितावगमे तु भावानुयोगः । एवमौदयिकादिभावान् स्वरूपवैपरीत्येन प्ररूपयतो भावाननुयोगः, यथावस्थिततत्प्ररूपणे तु भावानुयोग इति ।

सप्तभिः पदैर्व्यवहरतीति साप्तपदिकः, तदुदाहरणमुच्यते— एकस्मिन् प्रत्यन्तग्रामे कोऽपि सेवकपुरुषो वसति स्म । स च साध्वादिदर्शनिनां संबन्धिनं धर्मं न कदाचिदपि शृणोति, न च तदन्तिके कदाचिदपि व्रजति, न च कस्याप्युपाश्रयं ददाति, यतो दयालुतां, परधन-परकलत्रनिवृत्त्यादिगुणप्रतिपत्तिं चैतेऽमी करिष्यन्ति, न च तां पालयितुमहं शक्नोमीति । अन्यदा च वर्षासप्तमायातास्तत्र कथमपि साधवः । तेषां च तत्र वसतिमन्वेषयतां कौतुकं दिदृक्षुभिः सेवकनरमित्रैर्ग्रामणीभिरुक्तम्– अत्रेत्थंभूतो भवतामतीव भक्तोऽमुकगृहे श्रावकस्तिष्ठति । वसत्यादिना न किञ्चित् क्षणं करिष्यति, तद् गच्छत तत्रेति । कृतं तत् तथैव तैः । स च तेषां पुरतोऽपि स्थितानां संमुखमपि नावलोकयति । तत एकेन साधुना शेषसाधूनामभिमुखमुक्तम्– स एष न भवति, वञ्चिता वा तैर्ग्रामेयकैर्वयम् । ततस्तेन संभ्रान्तेनोक्तम्– किं किं भणथ यूयम् ? । ततस्तैः कथितं सर्वमपि तद्ग्राम्यभाषितम् । ततस्तेन चिन्तितम्– अहो ! मत्तोऽपि ते निकृष्टा यैरेतेऽपि प्रवञ्चिताः । तस्माद् मा भूवन्नमी, अहं च तदुपहासपात्रम् । अतोऽनिष्टमपि करोम्येतत् । इति विचिन्त्योक्तम्– तिष्ठत मम निराकुलाः शालायामेतस्याम्, परं मम धर्माक्षरं न कथनीयम् । प्रतिपन्नमेतत् तैः । स्थिताश्च सुखेन तत्र चतुर्मासकात्ययं यावत् । ततो विजिहीर्षुभिस्तैरनुव्रजनार्थमागतस्य शय्यातरस्य कल्पोऽयमिति दत्ताऽनुशास्तिः । ततो मद्य-मांस-जीवघातादिविरतिं कर्तुमशक्नुवतस्तस्यातिशयज्ञानितयाऽग्रे प्रतिबोधगुणं पश्यद्भिर्गुरुभिः साप्तपदिकं व्रतं दत्तम्– कञ्चित् पञ्चेन्द्रियप्राणिनं जिघांसुना यावता कालेन सप्त पदान्यवष्टभ्यन्ते तावन्तं कालं प्रतीक्ष्य हन्तव्योऽसाविति । प्रतिपन्नमेतत् तेन । गताश्च साधवोऽन्यत्र । अन्यदा चासौ सेवकनरश्चौर्यार्थं गतः क्वापि । ततोऽपशकुनादिकारणेन स्वल्पेनैव कालेन प्रतिनिवृत्तः । कीदृशो मत्परोक्षे मदीयगृहे समाचार इति जिज्ञासुर्निशीथे प्रच्छन्न एव प्रविष्टो निजगृहे । तस्मिंश्च दिने तस्य भगिनी ग्रामान्तरादागता । तया च केनापि हेतुना विहितपुरुषनेपथ्यया नटा नृत्यन्ती निरीक्षिताः । ततोऽतीवप्रबलनिद्रावशात् कृतपुरुषवेषैव भ्रातृजायासमीपे मदीपालोकादिरम्यवासभवनगतपल्यङ्क एव निर्भरं प्रसुप्ता । तेनापि च तद्बन्धुनाऽकस्मादेव गृहमविष्टेन दृष्टं तत् तादृशम् । ततश्चिन्तितमनेन– अहो ! विनष्टं मद्गृहम्, विटः कोऽप्ययं मद्भार्यासमीपे प्रसुप्तस्तिष्ठति । इति कोपावेशादाकृष्टः कृपाणः । ततः स्मृतं व्रतम् । विलम्बितं च सप्तपदापसरणकालम् । अत्रान्तरे तद्भगिनी बाहुलतिका निद्रावशेन तद्भार्याया मस्तकेनाक्रान्ता । ततः पीड्यमानया तद्भगिन्या प्रोक्तम्– हले ! मुञ्च मम बाहुम्, दूयेऽत्यर्थमहम् । ततः स्वरविशेषेण ज्ञाताऽनेन स्वभगिनी । अहो ! निकृष्टोऽहम्, मनागेव मया न कृतमिदमकार्यम्, तत उत्थिते ससंभ्रमं भगिनी-भार्ये इति । कथितश्च सर्वैः स्वव्यतिकरः परस्परम् । ततो यथोक्ताभिग्रहमात्रस्याऽप्येवंभूतं फलमुद्दीक्ष्य संविग्नः प्रव्रजितोऽसाविति । तदत्र स्वभगिनीमपि परपुरुषाभिप्रायेण जिघांसोस्तस्य भावाननुयोगः, यथावस्थितावगमे तु भावानुयोगः । प्रस्तुतयोजना तु श्रावकभार्योदाहरणवदिति ।

कोङ्कणकदारकोदाहरणं यथा– कोङ्कणकविषये एकस्य पुरुषस्य लघुदारकोऽस्ति । भार्या तु मृता । अन्यां च परिणेतुमिच्छताऽपि सपत्नीपुत्रोऽस्याऽस्तीति न कोऽपि ददाति । अन्यदा च सहैव तेन दारकेणासावरण्ये काष्ठानयनाय गतः । तत्र च कस्यापि पित्रा काण्डं मुक्तम् । तदानयनाय च दारकः प्रेषितः, गतश्चायम् । अत्रान्तरे दुष्पितुस्तस्य चलितं चित्तम्, यदस्य दारकस्य सत्ककारणेनाऽन्यां भार्यां मम न कोऽपि ददाति । ततोऽन्यं काण्डं क्षिप्त्वा विद्धोऽसौ दारकः । ततो महता स्वरेणोक्तं बालकेन– तात ! किमेतत् काण्डं त्वया मुक्तम् ?, विद्धोऽस्म्यनेनाऽहम् । ततो निर्घृणेन पित्राऽन्यत् काण्डं मुक्तम् । ततो ज्ञातं दारकेण– 'हन्त ! चुक्को मारयत्येष माम् , इति विस्वरं रटन् निकृष्टेन तेन मारितोऽसाविति । पूर्वमन्यस्य बाणं मुञ्चता पित्राऽनाभोगत एवाऽहं विद्ध इत्यवबुध्यमानस्य भावाननुयोगः, पश्चाद् यथावस्थिताधिगमे तस्य भावानुयोगः । अथवा, 'संरक्षणार्थमपि तं बालकं मारयामि' इत्यध्यवस्यतः पितुर्भावाननुयोगः, तद्रक्षाध्यवसाये तु भावानुयोगः । एवं विपरीतभावप्ररूपणे भावाननुयोगः, अविपरीतभावप्ररूपणे तु भावानुयोग इति ।

अथ नकुलोदाहरणम्– पदातेः कस्यचिद् भार्या गुर्विणी जाता । नकुलिका च काचित् तद्गृहं हृत्याश्रिता गुर्विणी पदातिभार्यया सहैकस्यां रजन्यां प्रसूता । तस्या नकुलो जातः । इतरस्यास्तु पुत्रः । ततोऽस्य समीपे स्थितो नकुलः सदैव तिष्ठति । अन्यदा च पदातिभार्यायां द्वारे खण्डयन्त्यां मध्ये मञ्चिकायां स्थितो बालकः सर्पेण दष्टः, मृतश्च । ततो मञ्चिकाया उत्तरन् नकुलेन दष्टो विषधरः, खण्डशः कृत्वा मारितश्च । ततो द्वारे पदातिभार्यायाः समीपे गत्वा शोणितोपलिप्तवक्त्राद्यवयवोऽसौ चाटूनि कर्तुमारब्धः, दृष्टश्च

१ क.ख. 'कदेश ए' । × चुक्को– मुक्को– । + संरक्षणार्हमपि– । ५ हृत्याश्रि– ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तया । ततो 'नूनं मदीयपुत्रो मारयित्वा भक्षितोऽनेन' इति विचिन्त्य कोपावेशाद् मुसलेन हत्वा मारितो नकुलः, गता च पुत्रसमीपे । दृष्टश्च पुत्रेण सह विनष्टः सर्पः । ज्ञातं च यथा सर्पेण पुत्रः, नकुलेन तु सर्पो निहतः । ततो हन्त ! इत्थं निरपराधोऽपि, उपकार्यपि मया निकृष्टया हतो वराको नकुल इति विचिन्त्य द्विगुणतरं शोकमापन्ना । पूर्वमनपराधिनमप्यपराधिनं विज्ञाय नकुलं घ्नत्यास्तस्या भावाननुयोगः, यथावत्परिज्ञाने तु भावानुयोग इति । प्रस्तुतयोजना त्वनन्तरोक्तवदिति । [× लिख्यन्]

अथ कमलामेलोदाहरणम्– तत्र द्वारवत्यां नगर्यां बलदेवपुत्रो निषधः । तस्यापि पुत्रः सागरचन्द्रः । स च रूपेणातीवोत्कृष्टः, शम्बादीनां च कुमाराणां सर्वेषामप्यतिप्रियः । तस्यामेव च द्वारवत्यां नगर्यामन्यस्य राज्ञो दुहिता कमलामेला नाम समस्ति । सा चोग्रसेनतनयस्य नभःसेनकुमारस्य दत्ता, अवृता च तिष्ठति । अन्यदा च तत्र नारदः सागरचन्द्रस्य समीपं गतः । तेनाऽभ्युत्थित उपवेश्य प्रणम्य च पृष्टः– दृष्टं भगवन् ! आश्चर्यं किमपि क्वापि ? । नारदेनोक्तम्– दृष्टं कमलामेलाभिधानराजपुत्रिकाया न खलु यमेव, किन्तु भुवनत्रयस्याऽप्याश्चर्यकारि रूपम् । सागरचन्द्रेणोक्तम्– किं दत्ता कस्यचित् सा ?। नारदेनोक्तम्– दत्ता, परं नाद्यापि परिणीता । कथं पुनर्मम सा संपत्स्यते ? इति सागरचन्द्रेणोक्ते 'न जानाम्येतदहम्' इत्यभिधाय गतो नारदः । सागरचन्द्रस्तु तद्दिनादारभ्य न शयानो नाप्यासीनः क्वापि रतिं लभते । तामेव कन्यकां फलकादिष्वालिखत् । तन्नाममन्त्रजापं चानवरतं कुर्वन्नास्ते । नारदोऽपि कमलामेलान्तिकं गतः । तयापि तथैवाश्चर्यं किमपि दृष्टमिति पृष्टः फलहदर्शनप्रियतया स प्राह– दृष्टमाश्चर्यद्वयं मया, सागरचन्द्रे सुरूपत्वम्, नभःसेने तु कुरूपत्वम् । ततो झगित्येव सा विरक्ता नभःसेने, अनुरक्ता च सागरचन्द्रे । तत्प्राप्तिचिन्तातुरा च समाश्वासिता नारदेन सा । वत्से ! स्थिरीभव, संपत्स्यतेऽचिरादेव तवाऽयम् । इत्युक्त्वा गतः सागरचन्द्रसमीपे 'वत्स ! इच्छति त्वां सा' इत्यभिधाय च गतः । ततो विरहावस्थाव्यथिते प्रलपति च सागरचन्द्रे आर्तः सर्वोऽपि मात्रादिस्वजनवर्गः । खिद्यन्ते यादवाः । तदन्तरे समायातः कथमपि सागरचन्द्रसमीपे शम्बकुमारः । दृष्टश्च तेनाऽसौ तदवस्थः । ततः पृष्ठतस्तस्य स्थित्वा हस्तद्वयेनाच्छादिते तदक्षिणी शम्बेन । सागरचन्द्रेणोक्तम्– किं कमलामेला ?। शम्बेनोक्तम्– नाहं कमलामेला, किन्तु कमलामेलोऽहम् । ततः सागरचन्द्रेण 'शम्बोऽयम्' इति ज्ञात्वा प्रोक्तम्– सत्यमेतत्, त्वमेव मम कमलदीर्घलोचनां कमलामेलां मेलयिष्यसि, कोऽन्यार्थेऽन्यः समर्थः ? इति । ततोऽन्यैर्यदुकुमारैः पीतमद्यः परवशीभूतः शम्बो ग्राहितस्तदापनप्रतिज्ञाम् । उत्तीर्णे च मदभावे विचिन्तितं शम्बेन– अहो ! आलं मयाऽभ्युपगतम्, अशक्यं ह्येतद् वस्तु, कथमियं प्रतिज्ञा निर्वाहयिष्यते ?। ततः प्रद्युम्नपार्श्वात् प्रज्ञप्तिविद्या याचिता शम्बेन । विवाहदिवसे च बहुभिर्यादवकुमारैः परिवृतेन तेन सुरङ्गां पातयित्वा पितृगृहादाकृष्य नीता बहिरुद्याने कमलामेला । नारदं च साक्षिणं कृत्वा कारितस्तत्पाणिग्रहणसंबन्धः सागरचन्द्रस्य । ततः सर्वेऽपि कृतविद्याधरस्वरूपाः क्रीडन्तस्तिष्ठन्ति उद्याने । पितृ-श्वशुरपाक्षिकैश्चान्वेषयद्भिर्दृष्टा कृतविद्याधररूपा नवपरिणीतवेषधारिणी च क्रीडन्ती कमलामेला । विद्याधरैरपहृत्य परिणीता कमलामेलेति कथितं तैर्वासुदेवस्य । निर्गतश्च विद्याधरोपरि कुपितः सबलवाहनोऽसौ । लग्नं च महदायोधनं तावत्, यावत् पश्चाच्छम्बः परिहृतवैक्रियरूपः पतितो जनकस्यांहियुग्मे । ततश्चोपसंहृतः संग्रामः । दत्ता च कृष्णेन कमलामेला सागरचन्द्रस्यैव । गताश्च सर्वे स्वस्थानम् । तत्र सागरचन्द्रस्य शम्बं कमलामेलां मन्यमानस्य भावाननुयोगः, यथावस्थितावगमे तु भावानुयोगः । विपरीतादिप्ररूपणयोजना तु प्रस्तुता पूर्ववदिति ।

अथ शम्बस्योदाहरणम्– वासुदेवात्, शेषजनाच्च सदैव शृणोति जाम्बवती, समस्तानामप्यालीनां मन्दिरं त्वत्पुत्रः शम्ब इति । ततो जाम्बवत्या विष्णुरभिहितः– मया पुत्रसत्कैकाऽप्यालिर्न दृष्टा । विष्णुना प्रोक्तम्– आगच्छ, येनाऽद्य दर्शयामि । ततो जाम्बवती उत्कृष्टलावण्यमाभीरीरूपं कारिता । स्वयं पुनराभीररूपं कृत्वा दण्डहस्तः स्वयं पृष्ठे व्यवस्थितः, अग्रतस्तु मस्तकन्यस्तदधिहण्डिका जाम्बवती कृता । प्रविष्टोऽथ दधिविक्रयार्थं नगरीमध्ये । दृष्टा च शम्बेन माता तदोत्कृष्टरूपाऽऽभीरीति विज्ञाय प्रोक्ता शम्बेनैषा । आगच्छ मद्गृहम्, सर्वस्यापि त्वदीयदध्नो यावन्मात्रं मूल्यं याचसे, तदहं दास्यामि, इत्यग्रतः स्वयम्, पृष्ठतस्त्वाभीरी, पश्चात् स्वाभीरः । ततः शून्यदेवकुलिकायामेकस्यां गत्वा प्रोक्ता शम्बेनाभीरी– प्रविशैतन्मध्ये, मुञ्च दधि, तया च विरूपाभिप्रायं तं विज्ञाय प्रोक्तम्– नाहमत्र प्रविशामि, द्वारस्थिताया एव गृहाण दधि, प्रयच्छ मूल्यम् । बलादपि प्रवेशयिष्यामीत्यभिधाय गृहीता शम्बेन बाहौ । ततो धावित्वा द्वितीयबाहौ लग्न आभीरः । द्वयोरपि चाकर्षण-विकर्षणं कुर्वतोर्भग्नं भण्डनम् । ततः कृतं सहजरूपमात्मनः, जाम्बवत्याश्च विष्णुना । तच्च दृष्ट्वा लज्जितो नष्टः शम्बः । नागच्छति चावसरेऽपि लज्जया राजकुले । ततोऽन्यदिवसे विष्णुनियुक्तबृहत्पुरुषैः कष्टेनानीयमानः क्षुरिकया वंशकीलकं घटयन्नागच्छत्यसौ । प्रणामे च कृते पृष्टो वासुदेवेन– शम्ब ! किमेतत् क्षुरिकया घट्यते ?। तेनोक्तम्– कीलकोऽयम् । किमर्थः पुनरसौ ?। यः पर्युषितानतीतजल्पान् वदिष्यति तन्मुखे आहननार्थ इति । तदत्र शम्बस्य मातरमप्याभीरीं मन्यमानस्य भावाननुयोगः, पश्चाद् यथावदवगमे तु भावानुयोगः । प्रस्तुतयोजना तु पूर्ववदिति ।

अथ श्रेणिककोपोदाहरणम्– राजगृहे नगरे समवसृतस्य भगवतः श्रीमन्महावीरस्य श्रेणिकनराधिपो राज्ञ्या चेल्लणया सह माघमासे हिमकणप्रवर्षिणि महाशीते पतिते वन्दनार्थं गतः । ततो निवर्तमानस्य च तस्य राज्ञ्या चेल्लणया मार्गासन्नस्तपःकर्षितशरीरः

१ क. ग. छ. 'शम्ब' । २ क. ग. घ. 'धमिति' । × मध्यं–।फ्र प्रत्यन्तरे जाम्बवतीति नाम ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वथाप्यनावरणो मेरुशिखरमिव निष्कम्पः प्रतिमाप्रतिपन्नोऽभिभवकायोत्सर्गे स्थितः संध्यायां दृष्टः कोऽपि तपस्वी। गताऽसौ तद्गुणानेव मनसि ध्यायन्ती गृहम्। सुप्ता च रजन्यामनेकशीतार्तेपहर्तृप्रावरणप्रावृता पल्यङ्के। निर्गतश्च प्रावरणेभ्यो बहिस्तात् कथमप्येकः करः। शीताभिभूतश्चायमतीव स्तब्धीभूतः। तदनुसारेण च समस्तमपि शरीरं तथा व्याप्तं शीतेन, यथा निद्राभरेऽपि जागरितं तया। ततः क्षिप्तो हस्तः प्रावरणमध्ये। स्थितश्च हृदये स तथाकायोत्सर्गस्थायी महामुनिः। ततस्तद्गुणोत्पन्नातुच्छबहुमानया विस्मितया च प्रोक्तं तया– 'स तपस्वी किं करिष्यति?' इति। 'यद्येकेनाप्यावरणबहिर्निर्गतेन हस्तेनाऽहमेतावतीं शीतबाधां प्राप्ता, तर्हि बहुष्वे निरावरणो रूक्षस्तपःकर्षितश्चैवंविधमहाशीतबाधितः स तपस्वी किं करिष्यति?' इति तस्याश्चित्ताभिप्रायः। अयं चेष्यालुतया श्रेणिकनृपपत्न्यान्यथा परिणतः– 'नूनमनया कस्यापि संकेतो दत्तः, तदन्तिके च मयि संनिहिते गन्तुं न शक्नोति, ततस्तच्चित्तखेदं चेतसि निधायैतदुक्तम्।' ततो महता खेदेन तस्य विभाता रजनी। चलितः श्रीमन्महावीरस्यान्तिकम्। गच्छता चातिक्रोपावेशाद् निरूपितोऽभयकुमारः– सर्वाभिरेवान्तःपुरिकाभिः सह प्रदीप्य सर्वाण्यप्यन्तःपुरगृहाणि। ततोऽभयकुमारेण चिन्तितम्– केनाऽप्यभिनवोत्पन्नक्रोपावेशेनैवमसौ वक्ति। प्रथमकोपे च यदुच्यते तत् क्रियमाणं न खलु परिणतौ सुखयति। अथवा, अनुवर्तनीयं गुरूणां वचनम्। अतः शून्यां हस्तिशालामेकां प्रदीप्य प्रस्थितः सोऽपि भगवद्वन्दनार्थम्। इतश्च भगवान् पृष्टः श्रेणिकराजेन– भगवन्! चेल्लणा किमेकपत्नी, अनेकपत्नी वा?। भगवता प्रोक्तम्– एकपत्नीति। ततो निवृत्तः सत्वरमेव गृहाभिमुखमभयकुमारनिवारणाय। मार्गे चागच्छन् वीक्षितोऽसौ। पृष्टश्च– किं दग्धमन्तःपुरम्?। तेनोक्तम्– दग्धम्। राज्ञा कुपितेनाभ्यधायि– त्वमपि तत्रैव प्रविश्य किं न दग्धोऽसि?। कुमारेण प्रोक्तम्– किं मयाग्निप्रवेशेन, व्रतमेव ग्रहीष्याम्यहम्। ततो मा भूदस्य महान् खेद इति कथितं यथावदेवेति। तदत्र सुशीलामपि चेल्लणां कुशीलां मन्यमानस्य राज्ञो भावानुयोगः, यथावदवगमे च तदनुयोगः। एवमौदयिकादिभावान् विपरीतस्वरूपान् प्ररूपयतो भावानुयोगः, यथावस्थितस्वरूपांस्तु तान् प्ररूपयतो भावानुयोग इति। तदेवमर्थैकार्थिकानि प्रतिपादयता यदुक्तम्– 'अणुओगो य निओगो भास-विभासा य' इत्यादि, तत्र सनिक्षेपः, सोदाहरणश्चाभिहितोऽनुयोगः, तत्प्रतिपक्षत्वेनाननुयोगश्च ॥ १४१८ ॥

साम्प्रतं नियोगस्वरूपमभिधित्सुर्भाष्यकारः प्राह—

[2]नियओ व निच्छिओ वा हिओ व जोगो मओ निओगो त्ति। नेओ सभेअ-लक्खण-सोदाहरणोऽणुओगो व्व॥१४१९॥

---

१ गाथा १३८५। २ नियतो वा निश्चितो वा हितो वा योगो मतो नियोग इति। ज्ञेयः सभेद-लक्षण-सोदाहरणोऽनुयोग इव ॥ १४१९ ॥ * नामहर्तृ-।

नियतो निश्चितो हितो वाऽनुकूलः सूत्रस्याभिधेयेन सह यः खलु योगः संबन्धः स नियोगो मतः। अयं च सभेदः सलक्षणः सोदाहरणश्चानुयोगवदेव विज्ञेय इति ॥ १४१९ ॥

अथ भाषास्वरूपमभिधित्सुराह—

भासा वत्ता वाया सुयवत्तीभावमित्तयं सा य। सुयभावमित्तयं जह सामाइयमिहेवमाईयं ॥ १४२० ॥

'भाष व्यक्तायां वाचि' भाषणं भाषा व्यक्ता वागित्यर्थः। सा चेह व्यक्तिः श्रुतस्य व्यक्तिभावमात्ररूपैव गृह्यते, न त्वशेषविशेषरूपा विभाषा, वार्तिकविषयत्वात् तस्याः। अत्रोदाहरणमाह– यथाऽव्यक्तमनवबुद्धविशेषरूपं तत् श्रुतभावमात्रमविज्ञातव्यक्तरूपस्य विनेयस्य भाषकेन व्याख्यात्रा व्यक्तीक्रियते। कथम्?, इत्याह– सामायिकमिदं शास्त्रपरिज्ञा, अध्ययनं वा, एतस्य च सामायिकादेरयं शब्दार्थ इत्यादि। इदमुक्तं भवति– भाषक-विभाषक-वार्तिककारभेदात् त्रिविधाः श्रुतस्य व्याख्यातारः। तत्र भाषकोऽविज्ञातविशेषस्वरूपस्य श्रुतमात्रस्य सव्युत्पत्तिकविशेषनाममात्रकथनेन व्यक्तिमात्रं कृत्वा चरितार्थो भवति। यथा समस्याऽऽयः सामायिकमित्यादि। तदेवं भाषकसंबन्धिन्या भाषायाः स्वरूपमुक्तम् ॥ १४२० ॥

अथ विभाषकप्रणीतविभाषायाः स्वरूपमाह—

[2]विविहा विसेसओ वा होइ विभासा दुगाइपज्जाया। जह सामइयं समओ सामाओ वा समाओ वा ॥१४२१॥

विविधा भाषाऽनेकपर्यायैः श्रुतस्य व्यक्तीकरणं विभाषा, विशेषतो वा भाषा विभाषा, भाषापेक्षया सविशेषं श्रुतस्य व्यक्तीकरणमित्यर्थः। एतदेवाह– द्व्यादयः पर्याया यस्यां सा द्व्यादिपर्याया विभाषेत्यर्थः। अत्राप्युदाहरणमाह– यथा 'करेमि भंते! सामाइयं' इत्यादि श्रुतमिदं सामायिकमुच्यते– सर्वेषामपि मुमुक्षूणां समये संकेते भवं सामायिकमित्यर्थः। सर्वेऽपि हि मुमुक्षवः सर्वसावद्यविरमणरूपेऽस्मिन्नेवागत्य प्रथमं तिष्ठन्ति, तत उत्तरोत्तरगुणप्राप्त्या सर्वक्लेशेभ्यो मुच्यन्त इति भावः। अथवा, 'समओ त्ति' सम्यगयनं मुक्तिमार्गे प्रवर्तनं यस्मात् तत् समयः सामायिकमेवोच्यते। यदिवा, 'सामाउ त्ति' साम सर्वेषामपि जीवानां प्रियं तस्य सान्न आयः प्राप्तिः सामायः सामायिकमभिधीयते। अथवा 'समाउ त्ति' समस्य राग-द्वेषविरहितस्याऽऽयः प्रतिसमयमपूर्वापूर्वकर्मनिर्ज-

---

१ भाषा व्यक्ता वाक् श्रुतव्यक्तीभावमात्रकं सा च। श्रुतभावमात्रकं यथा सामायिकमिहैवमादिकम् ॥ १४२० ॥

२ विविधा विशेषतो वा भवति विभाषा द्विकादिपर्याया। यथा सामयिकं समयः सामायो वा समायो वा ॥ १४२१ ॥ ३ करोमि भगवन्! सामायिकम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राया लाभः समायः स एव सामायिकम् । इत्यादिका सर्वाऽपि विभाषाऽभिधीयत इति ॥ १४२१ ॥

अथ वार्तिकस्वरूपमाह—

[1]वित्तीए वक्खाणं वत्तियमिह सव्वपज्जवेहिं वा । [2]वित्तीओ वा जायं जम्मि वा जह वत्तए सुत्ते ॥१४२२॥

वृत्तेः सूत्रविवरणस्य व्याख्यानं भाष्यं वार्तिकमुच्यते । यथेदमेव विशेषावश्यकम् । अथवा, उत्कृष्टश्रुतवतो गणधरादेर्भगवतः सर्वपर्यायैर्यद् व्याख्यानं तद् वार्तिकम् । वृत्तेर्वा सूत्रविवरणाद् [*]यदायातं सूत्रार्थानुकथनरूपं तद् वार्तिकम् । यदिवा, यस्मिन् सूत्रे यथा वर्तते सूत्रस्यैवोपरि गुरुपारम्पर्येणायातं व्याख्यानं तद् वार्तिकमिति ॥ १४२२ ॥

एवं च सति यस्य संबन्धि व्याख्यानं वार्तिकमुच्यते, तदाह—

[3]उक्कोसयसुयनाणी निच्छयओ वत्तियं वियाणाइ । जो वा जुगप्पहाणो तओ व जो गिण्हए सव्वं॥१४२३॥

उत्कृष्टश्रुतज्ञान्येव निश्चयनयमतेन तावद् वार्तिकं कर्तुं विजानाति, नान्यः । यो वा यस्मिन् युगे प्रधानो भद्रबाहुस्वाम्यादिर्भवति । ततो वा युगप्रधानाद् यः स्थूलभद्रस्वाम्यादिः सर्वं श्रुतं गृह्णाति स वार्तिककृदिति ॥ १४२३ ॥

अथ भाषक-विभाषक-वार्तिकविद एवान्यथा प्रतिपिपादयिषुराह—

[4]ऊणं सममहियं वा भणियं भासंति भासगाइया । अहवा [5]तिण्णवि साहेज्ज कट्ठकम्माइनाएहिं ॥१४२४॥

अनुयोगाचार्येण यद् भणितं व्याख्यातं तस्मादूनं योऽन्यस्य भाषते व्याचष्टे स भाषक उच्यते । तद्व्याख्यातस्य समं तु भाषमाणो विभाषकः । प्रज्ञातिशयवांस्तदधिकं भाषमाणो वार्तिककृदिति । अथवा, किमेतेन बहुना ?, त्रीनप्येतान् भाषकादीननन्तरवक्ष्यमाणकाष्ठकर्मादिभिर्ज्ञातैरुदाहरणैः साधयेत् कथयेदिति । अनन्तरनिर्युक्तिगाथामस्तावनेयम् ॥ इति द्वादशगाथार्थः ॥ १४२४ ॥

तान्येव काष्ठकर्मोदाहरणान्याह—

[6]कट्ठे पोत्थे चित्ते सिरिघरिए पोंड-देसिए चेव । भासग-विभासए वा वत्तीकरणे य आहरणा ॥ १४२५ ॥

---

१ वृत्तेर्व्याख्यानं वार्तिकमिह सर्वपर्यायैर्वा । वृत्तितो वाऽऽयातं यस्मिन् वा यथा वर्तते सूत्रे ॥ १४२२ ॥ २ ख. 'वत्ती' । ग. तिण्णि- ।

३ उत्कृष्टश्रुतज्ञानी निश्चयतो वार्तिकं विजानाति । यो वा युगप्रधानस्ततो वा यो गृह्णाति सर्वम् ॥ १४२३ ॥ ४ क.ग.घ. 'थवा भा' ।

५ ऊनं सममधिकं वा भणितं भाषन्ते भाषकादिकाः । अथवा त्रीनपि कथयेत् काष्ठकर्मादिज्ञातैः ॥ १४२४ ॥ × यद् ज्ञातं- ।

६ काष्ठे पुस्ते चित्रे श्रीगृहिके पोण्ड-देशिकयोश्चैव । भाषक-विभाषकयोर्वा वृत्तिकरणे चोदाहरणानि ॥ १४२५ ॥ + क्वचिदिति- ।

'काष्ठे' इति काष्ठविषयो दृष्टान्तः । यथा काष्ठे कश्चिद् रूपकार आकारमात्रमेवोन्मीलयति, कश्चित् तु तत्रैव स्थूलावयवं रूपं किञ्चिद् निष्पादयति, अपरस्तु सुविभक्तविचित्रोत्कृष्टनिःशेषाङ्गोपाङ्गावयवयुक्तं निर्वर्तयति । एवं काष्ठकल्पं सामायिकादिसूत्रम् । तत्र भाषकः किञ्चिदर्थमात्रमेव व्याचष्टे । विभाषकस्तु तस्यैवानेकप्रकारैरर्थमाख्याति । वार्तिककरस्तु निरवशेषैरपि व्याख्याप्रकारैस्तदर्थं प्रतिपादयति । पुस्तं लेप्यम्, तद्दृष्टान्तेऽपि काष्ठवदेव सर्वं वाच्यम् । चित्रदृष्टान्ते तु— यथा कोऽपि चित्रकारो वर्तिकाभिः कुड्यादिषु रूपस्याकारमात्रं लिखति । कश्चित्तु तत्रैव हरितालादिवर्णकैर्गौरवर्णादिभावान् दर्शयति । कश्चित्तु निरवशेषानपि तद्गतभावान् सत्यापयति । दार्ष्टान्तिकयोजना तु तथैवेति । श्रीगृहं भाण्डागारम्, तदस्यास्तीति श्रीगृहिको भाण्डागारिकः । तत्र कोऽप्यसौ 'अत्र भाजने रत्नानि सन्ति' इत्येतावन्मात्रमेव जानाति, अपरस्तु तज्जाति-माने अपि वेत्ति, अन्यस्तु सर्वांस्तद्गुण-दोषानप्यवबुध्यत एव । एवं प्रथम-द्वितीय-तृतीयश्रीगृहिकतुल्या यथासंख्यं भाषक-विभाषक-वार्तिककरा विज्ञेयाः । पोण्डमविकसितावस्थं कमलम् । तच्च यथेषद्विकसिता-ऽर्धविकसित-सर्वविकसितभेदात् त्रिधा भवति, एवं भाषकादिव्याख्यानमपीति । देशनं देशः कथनं सोऽस्यास्तीति देशिकः, तत्र यथा कश्चिद् देशिकः पन्थानं पृष्टो दिङ्मात्रोपदेशेनैव तं कथयति, कश्चित्तु तत्रावस्थितग्राम-नगरादिभेदेन, अपरस्तु समस्ततदुत्थगुण-दोषाख्यानद्वारेणापि तमुपदिशति । दार्ष्टान्तिकयोजना तथैव । एवमेतानि भाषक-विभाषक-व्यक्तीकरविषयाण्युदाहरणानि प्रतिपादितानि । इति निर्युक्तिगाथासंक्षेपार्थः ॥ १४२५ ॥

विस्तरार्थं भाष्यकारः प्राह—

पढमो रूवागारं थूलावयवोवदंसणं बीओ । तइओ सव्वावयवे निद्दोसे सव्वहा कुणइ ॥ १४२६ ॥

कट्ठसमाणं सुत्तं तदत्थरूवेगभासणं भासा । थूलत्थाण विभासा सव्वेसिं वत्तियं नेयं ॥ १४२७ ॥

प्रथमगाथायां प्रथम-द्वितीय-तृतीयशब्दवाच्यो रूपकारः, द्वितीयगाथायां तु दार्ष्टान्तिकयोजना । तत्र काष्ठस्थानीयं सूत्रम् । 'तदत्थरूवेगभासणं ति' तस्य च सूत्रस्यार्थस्तदर्थस्तस्य चानन्तरूपत्वाद् यदेकरूपभाषणं सा भाषा— स भाषकव्यापार इत्यर्थः । स्थूलार्थानां तु कियतामपि भाषणं विभाषा, सर्वेषां तु निरवशेषाणामर्थानां भाषणं वार्तिकं ज्ञेयमिति ॥ १४२६॥१४२७ ॥

---

१ प्रथमो रूपाकारं स्थूलावयवोपदर्शनं द्वितीयः । तृतीयः सर्वावयवान् निर्दोषान् सर्वथा करोति ॥ १४२६ ॥

काष्ठसमानं सूत्रं तदर्थरूपैकभाषणं भाषा । स्थूलार्थानां विभाषा सर्वेषां वार्तिकं ज्ञेयम् ॥ १४२७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुस्तदृष्टान्तं व्याख्यातुमाह—

[1]पोत्थं दिट्ठागारं दिट्ठावयवं समत्तपज्जायं । जह, तह सुत्तं भासा विभासणं वत्तियं चेव ॥ १४२८ ॥

यथा पुस्तं लेप्यं प्रथममिन्द्रादिसंबन्धिरूपस्य दृष्टाकारमात्रं भवति । ततः क्रमेण दृष्टतदवयवम्, ततोऽपि क्रमाद् निर्वर्तित-निःशेषतत्पर्यायं संपद्यते, तथा सूत्रमाश्रित्य भाषा, विभाषा, वार्तिकं च जघन्य-मध्यमो-त्तमव्याख्यानरूपं यथासङ्ख्यं ज्ञेयमिति ॥१४२८॥

चित्रदृष्टान्तं विवरीषुराह—

[2]कुड्डे वत्तीलिहियं वण्णुब्भिन्नं समत्तपज्जायं । जह, तह सुत्तं भासा विभासणं वत्तियं चरिमं ॥ १४२९॥

यथा किञ्चिदिह मसृणं धवलं कुड्यम् । तच्च प्रथमं वर्तिकाभिस्तदालेख्यरूपकाणां लिखिताकारमात्रं भवति । ततश्च वर्ण-कोद्भिन्नं संपद्यते, हरितालादिवर्णकैरुन्मीलितं गौरवर्णादिस्वरूपं भवतीत्यर्थः । ततः समस्ताः समाप्ता वा पर्याया आलेख्यधर्मा निष्पन्ना यत्र तत् समस्तपर्यायम्, समाप्तपर्यायं वा भवति– सर्वात्मना निष्पन्नं भवतीत्यर्थः । तथाच कुड्यस्थानीयं सूत्रम् । तत्र भाषा, विभाषा, वार्तिकं च चरमं तृतीयं भवतीति ॥ १४२९ ॥

श्रीगृहिकोदाहरणार्थमाह—

[3]भाणे जाई-माणं गुणे य रयणाणं मुणइ सिरिघरिओ । जह, तह सुयभाणे भासगादओऽत्थरयणाणं ॥१४३०॥

श्रीगृहिको भाण्डागारिकः, स च यथा कश्चिद् 'रत्नान्यत्र ताम्रकरण्डिकादिभाजने सन्ति' इत्येवं शृणोतीति सोपस्कारं व्याख्ये-यम् । अपरस्तु तेषामेव रत्नानां जातिं मानं च जानाति । अन्यस्तु ज्वरादिरोगापहर्तृत्व-क्षुत्-पिपासा-श्रमापनेतृत्वादींस्तद्गुणानपि वेत्ति । अथवा, अन्यथा योज्यते– यथा श्रीगृहिकः कश्चिद् रत्नभाजने मरकतादिकां तज्जातिं जानाति, अपरस्तु माष-वल्ल-गदियाणादि-कादिकं तन्मानमपि बुध्यते; अन्यस्तु पूर्वोक्तांस्तद्गुणानपि समस्तान् वेत्ति; तथा रत्नभाजनस्थानीये श्रुते स्तोक-बहु-बहुतरार्थवेत्तारो भाषकादयो विज्ञेया इति ॥ १४३० ॥

---

१ पुस्तं दृष्टाकारं दृष्टावयवं समस्तपर्यायम् । यथा, तथा सूत्रं भाषा विभाषणं वार्तिकं चैव ॥ १४२८ ॥

२ कुड्ये वर्तिलिखितं वर्णोद्भिन्नं समस्तपर्यायम् । यथा, तथा सूत्रं भाषा विभाषणं वार्तिकं चरमम् ॥ १४२९ ॥

३ भाजने जाति-माने गुणांश्च रत्नानां जानाति श्रीगृहिकः । यथा, तथा श्रुतभाजने भाषकादयोऽर्थरत्नानाम् ॥ १४३० ॥

पोण्डदृष्टान्तव्याख्यामाह—

[1]वोंडं विभिन्नमीसं दरफुल्लं वियसियं विसेसेण । जह कमलं चउरूवं सुत्ताइचउक्कमप्पेवं ॥ १४३१ ॥

पोण्डमविकसितावस्थं कमलम् । तस्य च पश्चात् तिस्रोऽवस्था जायन्ते, तद्यथा– 'विभिन्नमीसं ति' ईषद्विभिन्नमित्यर्थः । तथा, 'दरफुल्लं ति' अर्धविकसितमित्यर्थः । तथा, 'वियसियं विसेसेण त्ति' सर्वात्मना विकसितमित्यर्थः । एवं च सति यथा कमलं चतू-रूपमुक्तम्, तथा सूत्रादिचतुष्कमपि विज्ञेयम्– अविवृतं मुकुलितं सूत्रम्, तथा, अल्प-बहु-बहुतरव्याख्यानरूपास्तस्य तिस्रोऽवस्थाः, इत्येवं चतूरूपतेति ॥ १४३१ ॥

अथ देशिकदृष्टान्तव्याख्यामाह—

[2]पंथो दिसाविभागो गाम-पुराइगुण-दोसपेयालं । जह, पहदेसणमेवं सुत्तं भासाइतियं च ॥ १४३२ ॥

इह पन्थाः कश्चिद् ग्राम-नगरादीनां भवति । तं च पृष्टः कोऽपि दिग्विभागमात्रमेव कथयति, अन्यस्तु तद्व्यवस्थितग्राम-नगरादीन् कथयति, अपरस्तु मार्गगतनिःशेषगुण-दोषविचारमपि कथयति । इत्थं यथा पथो मार्गस्य देशनं त्रिविधं प्रवर्तते, एवं भाषा-विभाषा-वार्तिकलक्षणमपि त्रितयमवगन्तव्यम् । तदिह सर्वेष्वपि काष्ठादिदृष्टान्तेष्वयं परमार्थः– जघन्य-मध्यमो-त्कृष्टव्याख्यातारो भाषक-विभाषक-व्यक्तीकरा उच्यन्त इति । तदेवं जिनप्रवचनोत्पत्तिः, प्रवचनैकार्थिकानि, तद्विभागश्चोक्तः ॥ १४३२ ॥

अथ क्रमप्राप्तमपि द्वारविधिं 'दोरविही वि महत्था तत्थ वि वक्खाणविहिविवज्जासो, मा होज्ज' इत्यादिपूर्वोक्तकारणादुल्लङ्घ्य, व्याख्यानविधिमेवेह तावदभिधित्सुः प्रस्तावनामाह—

[3]ऐयस्स को णु जोग्गो [4]वत्तुं सोउं च, केण विहिणा वा ? । पुव्वोइयसंबंधो वक्खाणविही विभागाओ ॥ १४३३ ॥

एतस्य च वक्ष्यमाणस्य 'उद्देसे निद्देसे य' इत्यादिद्वारविधेः, सर्वस्य वाऽनुयोगस्य को वक्तुं योग्यो गुरुः ?, कश्च श्रोतुं योग्यः श्रोता ?, केन वा विधिनाऽसौ वक्तव्यः ? इत्येतदभिधानीयम्। अत एव तस्मात् प्रवचनैकार्थिकविभागादनन्तरं 'दोरविही वि महत्था' इत्यादिना

---

१ क. 'बोण्ड' । २ पोण्डं विभिन्नमीषदर्धफुल्लं विकसितं विशेषेण । यथा कमलं चतूरूपं सूत्रादिचतुष्कमप्येवम् ॥ १४३१ ॥ ✱ व्यक्तिकरा-।+वोत्तुं-।

३ पन्था दिग्विभागो ग्राम-पुरादिगुण-दोषविचारम् । यथा पथदेशनमेवं सूत्रं भाषादित्रितयं च ॥ १४३२ ॥ ४ गाथा १३६० ।

५ एतस्य को नु योग्यो वक्तुं श्रोतुं च केन विधिना वा ? । पूर्वोदितसंबन्धो व्याख्यानविधिर्विभागात् ॥ १४३३ ॥ ६ गाथा ९७३ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वप्रतिपादितसंबन्धो व्याख्यानविधिरुच्यते । पाठान्तरं वा 'विभासाउ त्ति' सामान्येन पूर्वमुद्दिष्टस्येदानीं व्याख्यानविधिर्विशेषेण भाषणं भाषा भणनं 'क्रियते' इति शेषः ॥ इति गाथाष्टकार्थः ॥ १४३३ ॥

तमेव व्याख्यानविधिमाह—

[1]गोणी चंदणकंथा चेडीओ सावए बहिरगोहे । टंकणओ ववहारो पडिवक्खे आयरिय-सीसे ॥१४३४॥

आचार्य-शिष्ययोर्योग्या-ऽयोग्यविचारे 'गोणी' गौस्तदुदाहरणं वक्तव्यम् । तथा, चन्दनकन्थानिदर्शनम् । तथा, चेट्यौ जीर्णा-ऽभिनवश्रेष्ठिपुत्रिके, तद्दृष्टान्तो वाच्यः । तथा, श्रावकोदाहरणम् । तथा, बधिरगोदोहनिदर्शनम् । तथा, टङ्कणकव्यवहारः षष्ठमुदाहरणम् । एतेषु षट्स्वप्युदाहरणेषु शिष्या-ऽऽचार्ययोः साक्षादयोग्यत्वमभिधाय ततः प्रतिपक्षे योग्यत्वं योजनीयम् । अथवा, एषां षण्णामप्युदाहरणानां मध्ये योग्या-ऽयोग्ययोर्विकल्पेनैकमुदाहरणमाचार्यस्य, एकं तु शिष्यस्य, इत्येवं योजनीयम् ॥ इति निर्युक्ति-गाथासंक्षेपार्थः ॥ १४३४ ॥

विस्तरतस्तु गोदृष्टान्तं भाष्यकारः प्राह—

[2]भग्गनिविट्ठं गोणिं केउं दंतो व्व न सुयमायरिओ । एवं मए वि गहियं गिण्हि तुमं पि त्ति जंपंतो ॥ १४३५ ॥
आविगलगोविकेया व जो वि मदक्खमो सुगंभीरो । अक्खेवनिण्णयपसंगपारओ सो गुरू जोग्गो ॥१४३६॥
सीसो वि पहाणयरो णेगंताणावियारियग्गाही । सुपरिच्छियकेया इव त्थाणवियारक्खमो इट्ठो ॥ १४३७ ॥

कस्यापि धूर्तस्योपचितसर्वाङ्गसुन्दरस्वरूपापि गौः कथमपि संस्थानीप्रदेशे स्थिता भग्ना । ततश्चोत्थातुं न शक्नोति, इत्युपविष्टैव तिष्ठति । ततस्तेन धूर्तेन कस्यापि मुग्धस्य क्रेतुस्तथैवोपविष्टा मूल्येन प्रदत्ताऽसौ । स्वयं पुनरपसृतः । क्रेतापि यावत् तामुत्थापयति, तावद् न शक्नोत्युत्थातुमसौ । ततस्तथैव स्थिताऽन्यस्य मूल्येन दातुमारब्धा तेनेयम् । स च दक्षत्वादुधःप्रभृत्यवयवानां निरीक्षणार्थं

१ गौश्चन्दनकन्था चेट्यौ श्रावको बधिरगोदोहः । टङ्कणको व्यवहारः प्रतिपक्ष आचार्य-शिष्ययोः ॥ १४३४ ॥ × गोह-।
२ भग्ननिविष्टां गां क्रीत्वा ददद्विव न श्रुतमाचार्यः । एवं मयापि गृहीतं गृहाण त्वमपीति जल्पन् ॥ १४३५ ॥ + योद्वि
आविकलगोविक्रेतेव योऽपि मदक्षमः सुगम्भीरः । आक्षेपनिर्णयप्रसङ्गपारकः स गुरुर्योग्यः ॥ १४३६ ॥
शिष्योऽपि प्रधानतरो नैकान्तेनाऽविचारितग्राही । सुपरीक्षितक्रेतेव स्थानविचारक्षम इष्टः ॥ १४३७ ॥

तामुत्थापयति । मूलक्रेता च तत्कर्तुं न ददाति । वदति च मयोपविष्टैवेयं गृहीता, त्वमप्युपविष्टामेवामुं गृहाण । एवं च न कोऽपि गृह्णाति, उपहसति च तमिति ।

अथ प्रकृते योज्यते– भग्ना सती निविष्टा भग्ननिविष्टा तां भग्ननिविष्टां 'गोणिं' गां यथा मुग्धः कश्चिदुपविष्टामेव क्रीत्वोपविष्टा-मेवाऽन्यस्य ददत् प्रयच्छन् क्रेतोपहासविषयत्वादयोग्यः । 'न सुयमायरिउ त्ति' एवमाचार्योऽपि न नैव योग्यो भवति; किं कुर्वन् ?, श्रुतं ददत् प्रयच्छन् । कथंभूतः सन् ?, इत्याह– 'एवमविचारितमेव मयाऽप्येतत् श्रुतं गृहीतम्, त्वमप्यविचारितमेव गृहाण' इति शिष्यं प्रति जल्पन्निति । इत्थंभूतस्य सूरेः पार्श्वे न श्रोतव्यम्, संशीतिपदेषु निश्चयाभावेन मिथ्यात्वगमनप्रसङ्गात् । अतो व्याख्यान-स्यायमयोग्योऽभिधीयत इति । कथंभूतः पुनर्योग्यः ?, इत्याह– 'अविगलेत्यादि' सुगमा ।

तदेवं गुरोरयोग्यस्य योग्यस्य च स्वरूपमुपदर्श्य शिष्यस्यापि तदाह– 'सीसो वीत्यादि' शिष्योऽपि न नैव प्रधानतरः, किन्त्वयोग्यः । कथंभूतः ?, इत्याह– मुग्धगोक्रेतैवैकान्तेनाऽविचारितग्राही । यस्तु स्थानविचारक्षम आग्रहरहितो विचारयोग्ये वस्तुनि विचारकः स सुपरीक्षितगवादिक्रायिक इव सिद्धान्तश्रवणे इष्टो योग्यः शिष्य इति ॥ १४३५ ॥ १४३६ ॥ १४३७ ॥

अथ चन्दनकन्थादृष्टान्तविवरणमाह—

[1]जो सीसो सुत्तत्थं चंदणकंथं व परमयाईहिं । मीसेइ गलियमहवा सिक्खियमाणेण स न जोग्गो ॥१४३८॥
कंथीकयसुत्तत्थो गुरू वि जोग्गो न भासियव्वस्स । अविणासियसुत्तत्था सीसा-यरिया विणिद्दिट्ठा ॥१४३९॥

इह भावार्थस्तावत् कथानकेनोच्यते– द्वारवत्यां नगर्यां वासुदेवस्य राज्यं पालयतो गोशीर्ष-श्रीखण्डमय्यो देवतापरिगृहीतास्तिस्रो भर्य आसन्, तद्यथा– सांग्रामिकी, औद्भूतिकी, कौमुदिका । तत्र प्रथमा संग्रामकाले समुपस्थिते सामन्तादीनां ज्ञापनार्थं वाद्यते, द्वितीया पुनरुद्भूते– आगन्तुके कस्मिंश्चित् प्रयोजने सामन्ता-ऽमात्यादिलोकस्यैव ज्ञापनार्थं वाद्यते । तृतीया तु कौमुदीमहोत्सवाद्युत्सव-ज्ञापनार्थं वाद्यते । चतुर्ष्वपि गोशीर्ष[2]-श्रीखण्डमयी भेरी तस्यासीत् । इयं तु षट्-षण्मासपर्यन्ते वाद्यते, यश्च तच्छब्दं शृणोति, तस्यातीतम्, अनागतं च प्रत्येकं पाण्मासिकमशिवमुपशाम्यति । इयं च प्रकृतोपयोगिनी चतुर्थी भेरी । इति तदुत्पत्तिर्लिख्यते—

१ यः शिष्यः सूत्रा-ऽर्थौ चन्दनकन्थामिव परमतादिभिः । मिश्रयति गलितमथवा शिक्षितमानेन स न योग्यः ॥ १४३८ ॥
कन्थीकृतसूत्रा-ऽर्थो गुरुरपि योग्यो न भाषितव्यस्य । अविनाशितसूत्रार्थाः शिष्या-ऽऽचार्या विनिर्दिष्टाः ॥ १४३९ ॥ २ घ. छ. 'र्षचन्दनम' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

कदाचित् सौधर्मदेवलोके समस्ताऽमरसभापुरस्सरमभिहितं शक्रेण—

"पेच्छ अहो ! हरिपमुहा सप्पुरिसा दोसलक्खमज्झे वि । गिण्हंति गुणं चिय, तह न नीयजुज्झेण जुज्झंति ॥ १ ॥
एयं असहहंतो कोइ सुरो चिंतए किह णु एयं । संभवइ, जं अगहिउं परदोसं चिट्ठए कोइ ? ॥ २ ॥
इय चिंतिऊण इहइं समागओ तो विउव्वए एसो । बीभत्थकसिणवन्नं अइदुगंधं मयगसुणयं ॥ ३ ॥
तस्स य मुहे विउव्वइ कुंदुज्जलपवरदसणरिंछोलिं । नेमिजिणवन्दणत्थं चलियस्स पहम्मि हरिणो य ॥ ४ ॥
तं उवदंसइ सुणयं भग्गं गंधेण तस्स हरिसेन्नं । सयलं पि उप्पहेणं वच्चइ, कण्हो उण सरूवं ॥ ५ ॥
विविहं भावंतो पोग्गलाण वच्चइ पहेण तेणेव । दट्ठूण य सुणयसवं पभणइ गरुयत्तणेणेवं ॥ ६ ॥
अइमसिणकसिणवत्थंचले व्व वयणे इमस्स पेच्छ अहो ! । मुत्तावलि व्व रेहइ निम्मलजोण्हा दसणपंती ॥ ७ ॥
अह चिंतियं सुरेणं सच्चं जं अमरसामिणा भणियं । नूणं गुणं चिय गरुया पिच्छंति परस्स न हु दोसं ॥ ८ ॥
अह अन्नदिणे देवो तुरयं अवहरइ वल्लहं हरिणो । सिन्नं च तस्स सयलं विणिज्जियं तेण कुटलग्गं ॥ ९ ॥
तो अप्पणा वि विण्हू तुरगस्स कुढावयम्मि पडिलग्गो । अह देवेणं भणियं जिणिउं घेप्पंति रयणाइं ॥ १० ॥

---

१ प्रेक्षस्वाऽहो ! हरिप्रमुखाः सत्पुरुषा दोषलक्षमध्येऽपि । गृह्णन्ति गुणमेव, तथा न नीचयुद्धेन युध्यन्ते ॥ १ ॥
एतदश्रद्दधानः कोऽपि सुरश्चिन्तयति कथं नु एतत् । संभवति, यदगृहीत्वा परदोषं तिष्ठति कोऽपि ? ॥ २ ॥
इति चिन्तयित्वेह समागतस्ततो विकरोत्येषः । बीभत्सकृष्णवर्णमतिदुर्गन्धं मृतकशुनकम् ॥ ३ ॥
तस्य च मुखे विकरोति कुन्दोज्ज्वलप्रवरदशनपङ्क्तिम् । नेमिजिनवन्दनार्थं चलितस्य पथे हरेश्च ॥ ४ ॥
तदुपदर्शयति शुनकं भग्नं गन्धेन तस्य हरिसैन्यम् । सकलमप्युत्पथेन व्रजति, कृष्णः पुनः स्वरूपम् ॥ ५ ॥
विविधं भावयन् पुद्गलानां व्रजति पथेन तेनैव । दृष्ट्वा च शुनकशवं प्रभणति गुरुत्वेनैवम् ॥ ६ ॥
अतिमसृणकृष्णवस्त्राञ्चल इव वदनेऽस्य प्रेक्षस्वाऽहो ! । मुक्तावलिरिव राजते निर्मलज्योत्स्ना दशनपङ्क्तिः ॥ ७ ॥
अथ चिन्तितं सुरेण सत्यं यदमरस्वामिना भणितम् । नूनं गुणमेव गुरुकाः प्रेक्षन्ते परस्य न खलु दोषम् ॥ ८ ॥
अथान्यदिने देवस्तुरगमपहरति वल्लभं हरेः । सैन्यं च तस्य सकलं विनिर्जितं तेन कुटलग्नम् ॥ ९ ॥
ततः आत्मनाऽपि विष्णुस्तुरगस्याकुशग्रहणे प्रतिलग्नः । अथ देवेन भणितं जित्वा गृह्यन्ते रत्नानि ॥ १० ॥

तो जुज्झामो त्ति भणेइ केसवो किंतु रहवरे अहयं । तो गेण्ह तुमं पि रहं जेण समाणं हवइ जुज्झं ॥ ११ ॥
नेच्छइ एयं देवो तुरएहिं गयाइएहिं वि स जुज्झं । जा नेच्छइ ता भणिओ हरिणा तो भणसु तुममेव ॥ १२ ॥
देवेण तओ भणियं परंमुहा दो वि होइऊण पुणो । जुज्झामो पूयघाएहिं, भणइ तो केसवो देवं ॥ १३ ॥
जइ एवं तो विजिओ अहयं तुमए, तुरंगमं नेहि । जुज्झामि पुणो कहमवि न हु एरिसनीयजुज्झेणं ॥ १४ ॥
संजायपच्चओ सो पच्चक्खो होइऊण तो देवो । भणइ अमोहं देवाण दंसणं भणसु किं पि वरं ॥ १५ ॥
अह भणइ केसवो आसिवपसमणिं तो पयच्छ महभेरिं । दिन्ना य सुरेणागमणवइयरं साहिउं थ गओ ॥ १६ ॥
छण्हं छण्हं मासाणं साइवाइज्जए तहिं भेरी । जो सुणइ तीए सद्दं पुव्वोप्पन्नाओ वाहीओ ॥ १७ ॥
नस्संति तस्स अवरा ताउ तह य न हु होंति जाव छम्मासा । अह अन्नया कयाई वणिओ आगंतुओ कोइ ॥ १८ ॥
दाहज्जरेण घणियं अभिभूओ भेरिरक्खयं भणइ । दीणारसयसहस्सं गेण्हसु मह देसु पलमेगं ॥ १९ ॥
भेरीए छिंदिऊणं दिन्नं तेणावि लोभवसगेणं । अन्नेण चंदणेण य भेरीए थिग्गलं दिन्नं ॥ २० ॥
इय अन्नाण विदिंतेण तेण कंथीकया इमा भेरी । अह अन्नया य असिवे हरिणा ताडाविया एसा ॥ २१ ॥

---

१ ततो युध्यावहे इति भणति केशवः किन्तु रथवरेऽहकम् । ततो गृहाण त्वमपि रथं येन समानं भवति युद्धम् ॥ ११ ॥
नेच्छत्येतद् देवस्तुरगैर्गजादिभिरपि स युद्धम् । यावद् नेच्छति तावद् भणितो हरिणा ततो भण त्वमेव ॥ १२ ॥
देवेन ततो भणितं पराङ्मुखौ द्वावपि भूत्वा पुनः । युध्यावहे पूतघातैर्भणति ततः केशवो देवम् ॥ १३ ॥
यद्येवं ततो विजितोऽहकं त्वया, तुरङ्गमं नय । युध्ये पुनः कथमपि न खल्वीदृशनीचयुद्धेन ॥ १४ ॥
संजातप्रत्ययः स प्रत्यक्षो भूत्वा ततो देवः । भणत्यमोघं देवानां दर्शनं भण किमपि वरम् ॥ १५ ॥
अथ भणति केशवोऽशिवप्रशमनीं ततः प्रयच्छ महाभेरीम् । दत्ता च सुरेणागमनव्यतिकरं कथयित्वाऽथ गतः ॥ १६ ॥
षण्णां षण्णां मासानां सातिवाद्यते तत्र भेरी । यः शृणोति तस्याः शब्दं पूर्वोत्पन्ना व्याधयः ॥ १७ ॥
नश्यन्ति तस्याऽपरास्ते तथा च न तु भवन्ति यावत् षड् मासान् । अथान्यदा कदाचिद् वणिगागन्तुकः कोऽपि ॥ १८ ॥
दाहज्वरेण घनमभिभूतो भेरीरक्षकं भणति । दीनारशतसहस्रं गृहाण मम देहि पलमेकम् ॥ १९ ॥
भेर्याः छित्त्वा दत्तं तेनापि लोभवशगेन । अन्येन चन्दनेन च भेर्याः संधानशकलं दत्तम् ॥ २० ॥
इत्यन्येषामपि दत्ता तेन कन्थीकृतेयं भेरी । अथान्यदा चाश्विने हरिणा ताडिताषा ॥ २१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

'कंथत्तणेण तीसे सद्दो सुव्वइ न हरिसभाए वि । कंथीकरणवइयरो विन्नाओ केसवेण तओ ॥ २२ ॥
मारावि ओ य सो भेरिरक्खओ, तेण अट्ठमं काउं । आराहिओ स देवो अन्नं भेरिं च सो देइ ॥ २३ ॥
अन्नो य केसवेण कओ तहिं भेरिपालओ सो य । रक्खइ तं जत्तेणं लहेइ लाभं च तो हरिणो ॥ २४ ॥"

अथ गाथाक्षरार्थः कथ्यते-- स शिष्योऽनुयोगश्रवणस्य न योग्यः । यः, किम् ?, इत्याह- यः सूत्रम्, अर्थं वा चन्दनैकन्यायवत् परमतादिभिर्मिश्रयति । गलितं वा विस्मृतं शिक्षितमानेन शिक्षितत्वाहङ्कारेण परमतादिभिर्मिश्रयित्वा संपूर्णं करोति । इदमुक्तं भवति- यथा भेरीपालकेन गोशीर्ष[3]-श्रीखण्डभेरी इतरचन्दनखण्डैर्मिश्रयित्वा कन्था कृता, एवं यः शिष्यः सूत्रमर्थं वा परमतेन, आदिशब्देन स्वकीयेनैव ग्रन्थान्तरेण मिश्रयित्वा कन्थीकरोति, अथवा, विस्मृतं सूत्रमर्थं वा 'सुशिक्षितः स्वयमेवाहम्, नान्यं कञ्चित् कदाचित् किमपि पृच्छामि' इत्यहङ्कारेण परमतादिभिरपि मिश्रयित्वा संपूर्णं विदधाति, सोऽनुयोगश्रवणस्य न योग्य इति । एवं कन्थीकृतसूत्रार्थो गुरुरप्यनुयोगभाषणस्य न योग्यः, किन्त्वविनाशितसूत्रार्थाः शिष्या-ऽऽचार्या अनुयोगस्य योग्या विनिर्दिष्टा इति ॥ १४३८ ॥ १४३९ ॥

अथ चेटीदृष्टान्तो विव्रियते—

[4]अत्थाणत्थनिउत्ताभरणाणं जिण्णसेट्ठिधूय व्व । न गुरू विहिभणिए वा विवरीयनिओयओ सीसो ॥ १४४० ॥
सत्थाणत्थनिउत्ता ईसरधूया सभूसणाणं व । होइ गुरू सीसोऽवि य विणिओएंतो जहाभणियं ॥ १४४१ ॥

भावार्थः कथानकेनोच्यते- वसन्तपुरे नगरेऽग्रेतनः श्रेष्ठी राज्ञा पदात् स्फेटितोऽन्यो नवश्रेष्ठी विहितः । तथापि जीर्णश्रेष्ठिदुहितुर्नवश्रेष्ठिदुहित्रा सह कथमपि महती प्रीतिः संजाता । परं तथापि जीर्णश्रेष्ठिपुत्रिका हृदये कालुष्यं न मुञ्चति- 'वयमेतैः पदात् परिभ्रंशिताः' इति । अन्यदा च ते द्वे अपि जलाशये कचिद् गते । ततश्चाभरणानि तटे मुक्त्वा नवश्रेष्ठिदुहिता जीर्णश्रेष्ठिपुत्रिकया सहैव

१ कन्थात्वेन तस्याः शब्दः श्रूयते न हरिसभायामपि । कन्थीकरणव्यतिकरो विज्ञातः केशवेन ततः ॥ २२ ॥
मारितश्च स भेरिरक्षकः, तेनाष्टमं कृत्वा । आराधितः स देवोऽन्यां भेरीं च स ददाति ॥ २३ ॥
अन्यश्च केशवेन कृतस्तत्र भेरिपालकः स च । रक्षति तां यत्नेन लभते लाभं च ततो हरेः ॥ २४ ॥ २ क.ग. 'नभेरीक' ।
३ क.ग. 'पंश्रीखण्डभे' । ४ अस्थानार्थनियोक्ताभरणानां जीर्णश्रेष्ठिदुहितेव । न गुरुर्विधिभणिते वा विपरीतनियोजकः शिष्यः ॥ १४४० ॥
अस्वस्थानार्थनियोक्ता ईश्वरदुहिता स्वभूषणानामिव । भवति गुरुः शिष्योऽपि विनियोजयन् यथाभणितम् ॥ १४४१ ॥

मज्जनार्थं प्रविष्टा । ततश्च जीर्णश्रेष्ठिदुहिता झगित्येव जलाद् निर्गत्य नवश्रेष्ठिदुहितुःसत्कान्याभरणानि गृहीत्वा चलिता । इतरया तु जलमध्यगततयाऽज्ञातैः स्वरेण निषिद्धा । ततश्च 'का त्वम् ?, कानि च तानि त्वदीयाभरणानि ?, मया ह्येतान्यात्मीयान्येव गृहीतानि' इत्यादि जल्पन्ती गाढमाक्रोशन्ती च सा गृहं गता । कथितं च निजमाता-पित्रोः । अनुमतं च तत् ताभ्याम् । भणिताऽसौ तूष्णीं विधाय तिष्ठ त्वम् । तत इतरयापि निजपित्रोस्तत् कथितम् । याचितानि च ताभ्यां ताभ्याभरणानि । न समर्पयन्ति चेतराणि । ततो राजकुलव्यवहारो जातः । कारणिकैश्च साक्षी पृष्टः । न च कोऽप्यसौ संजातः । ततस्ते द्वे अपि दारिके आकार्य जीर्णश्रेष्ठिदुहिता प्रोक्ता- यदि त्वदीयान्याभरणानि, तर्हि झगित्येवामून्यस्माकमेव पश्यतां परिधाय दर्शय । यावच्चैषा तानि परिधातुमारब्धा, तावदनभ्यासादन्यस्थानोचितमाभरणमन्यत्र नियोजयति । यदपि किञ्चित् स्थाने नियुक्तं तदप्यश्लिष्टमेवाभाति, क्षुभितत्वेन च न किञ्चिदसौ जानाति । ततो नवश्रेष्ठिदुहिता तैरुक्ता । तया च स्वभ्यस्ततया स्थानौचित्येन सर्वाण्यप्याभरणानि झगित्येव परिहितानि, श्लिष्टानि चातीव शोभन्ते । ततस्तैः पुनरपि सा प्रोक्ता- झगित्येव मुञ्च तानि । तया च क्रमेणावतार्य तथैव मुक्तानि । ततो ज्ञातः कारणिकैः सद्भावः । दण्डितश्च शरीरनिग्रहेण राज्ञा जीर्णश्रेष्ठी । तद्दुहिता चाऽनर्थभाजनं संजाता । एवं जीर्णश्रेष्ठिदुहितेवाभरणानामस्थानेऽर्थानां नियोक्ता न गुरुः- गुरुपदयोग्योऽसौ न भवतीत्यर्थः । ऐहिकामुष्मिकानां निःसंख्यानर्थानां भाजनमसौ संपद्यते । विधिभणिते च- गुरुणा यथावत् प्ररूपिते चाज्ञानादिना विपरीतयोजकः शिष्योऽपि न नैव श्रवणयोग्यः, नापि कल्याणभागित्यर्थः । स्वस्थाने स्वर्थानां नियोक्ता, ईश्वरदुहितेव स्वभूषणानां, गुरुर्योग्यो भवति । शिष्योऽपि गुरुभिर्यथोपदिष्टं तथैव नियोजयन् श्रवणयोग्यः कल्याणभाक् च भवतीति ॥१४४०॥१४४१॥

श्रावकोदाहरणभाष्यम्—

[1]चिरपरिचियं पि न सरइ सुत्तत्थं सावओ सभज्जं व । जो न स जोग्गो सीसो गुरुत्तणं तस्स दूरेणं ॥१४४२॥

इह कथानकं 'सावगभज्जा' इत्यादौ कथितमेव । ततश्च यथा चिरपरिचितामपि स्वभार्यां परकलत्रबुद्ध्या भुञ्जानो न स्मरति, एवं चिरपरिचितमपि सूत्रार्थं यः शून्यहृदयतया न स्मरति, स शिष्यो न योग्यः शिष्यत्वस्यापि, गुरुत्वं तु तस्य दूरेणैवेत्यर्थः ॥ १४४२ ॥ + च शून्यभूतया-।

× झटित्येव-। १ चिरपरिचितमपि न स्मरति सूत्रार्थं श्रावकः स्वभार्यामिव । यो न स योग्यः शिष्यो गुरुत्वं तस्य दूरेण ॥ १४४२ ॥ २ गाथा १४१२ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

अथ बधिरगोदोहोदाहरणम्—

अन्नं पुट्ठो अन्नं जो साहइ सो गुरू न बहिरु व्व । न य सीसो जो अन्नं सुणेइ परिभासए अन्नं ॥ १४४३ ॥

बधिरकथानकं प्रागुक्तमेव । गाथाक्षरार्थस्तु सुगमः । अथवा, बधिरश्चासौ गोदोहश्चेति कर्मधारयो न क्रियते, किन्तु बधिरश्च गोदोहश्चेति द्वन्द्वः । ततो गोदोहो ग्रामेयकः, तत्कथानकं तु भिन्नमेवेह प्रागुक्तं द्रष्टव्यम् । उपनयस्तु स्वयमभ्यूह्यः– यो ग्रामेयकवद् यावन्मात्रमुक्तस्तावन्मात्रमेव स्वयं द्रव्य-क्षेत्र-कालाद्यौचित्यविरहितो वक्ति, स शिष्यस्वेऽप्ययोग्यः, गुरुत्वं तु दूरेणैव तस्येति ॥१४४३॥

अथ टङ्कणकव्यवहारदृष्टान्तभाष्यम्—

एक्खेव-निण्णय-पसंगदाणगहणाणुवत्तिणो दो वि । जोग्गा सीसायरिया टंकण-वणिओवमा समए ॥१४४४॥

अहवा गुरुविणय-सुयप्पयाणभण्डविणिओगओ दो वि । निज्जरलाभयसहिया टंकण-वणिओवमा जोग्गा ॥१४४५॥

इहोत्तरापथे म्लेच्छदेशे क्वचिद् टङ्कणाभिधाना म्लेच्छाः । ते च सुवर्णसट्टेन दक्षिणापथायातानि क्रयाणकानि गृह्णन्ति, परं वाणिज्यकारकास्तद्भाषां न जानन्ति, तेऽपीतरभाषां नावगच्छन्ति । ततश्च कनकस्य क्रयाणकानां च तावत् पुञ्जः क्रियते, यावदुभयपक्षस्यापीच्छापरिपूर्तिः, यावच्चैकस्यापि पक्षस्येच्छा न पूर्यते, तावत् कनकपुञ्जात् क्रयाणकपुञ्जाच्च हस्तै नापसारयन्ति, इच्छापरिपूर्तौ तु तमपसारयन्ति । एवं तेषां परस्परमीप्सितप्रतीप्सितो व्यवहारः । अथोपनयगाथाद्वयं व्याख्यायते, तद्यथा– टङ्कणाश्च वणिजश्च तेषामुपमैवं समये वर्णिता यथैते टङ्कण-वणिजः परस्परमीप्सित-प्रतीप्सितव्यवहारेण व्यवहरन्ति, एवमाक्षेप-निर्णय-प्रसङ्गदान-ग्रहणानुवर्तिनो द्वयेऽपि शिष्या आचार्याश्चानुयोगयोग्या भवन्ति । इदमुक्तं भवति– यथा टङ्कणा वणिजश्च परस्परेच्छापरिपूर्तिं यावत् सुवर्णस्य क्रयाणकस्य च पुञ्जान् करोति, एवं शिष्योऽपि तावदाक्षेपं पूर्वपक्षं करोति यावत् सूत्रार्थमवबुध्यते, न पुनर्भय-लज्जा-ऽहङ्कारादिभिरेवमेवानवगतेनाग्रतो याति, गुरुरपि तावद् निर्णयं प्रयच्छति यावच्छिष्यः सूत्रार्थमवगच्छति, प्रासङ्गिकं च तावद् गुरुः कथयति यावन्मात्रं शिष्योऽवधारयति । शिष्योऽपि यथाशक्ति तत् सर्वं गृह्णातीति । एवं दान-ग्रहणानुवर्तिनो द्वयेऽपि शिष्या-ऽऽचार्या योग्याः । तत्र

× ठोहो–।

१ अन्यत् गृह्णोऽभ्यूह्य यः कथयति स गुरुर्न बधिर इव । न च शिष्यो योऽन्यत् शृणोति परिभाषतेऽन्यत् ॥१४४३॥ + ठोहश्चेति –।

२ आक्षेप-निर्णय-प्रसङ्गदान-ग्रहणानुवर्तिनौ द्वावपि । योग्यौ शिष्या-ऽऽचार्यौ टङ्कण वणिगुपमौ समये ॥ १४४४ ॥ ✠ अट्टेज –।

अथवा गुरुविनय-श्रुतप्रदानभाण्डविनियोगतो द्वावपि । निर्जरालाभसहितौ टङ्कण-वणिगुपमौ योग्यौ ॥ १४४५ ॥

दानं च ग्रहणं च दान-ग्रहणे, प्रसङ्गस्य प्रसङ्गागतस्य दान-ग्रहणे प्रसङ्गदान ग्रहणे; आक्षेपश्च निर्णयश्च प्रसङ्गदान-ग्रहणे च तानि तयेति समासः, तदनुवर्तनशीला द्वयेऽपि शिष्या-ऽऽचार्या योग्या भवन्ति ।

प्रकारान्तरेणापि टङ्कण-वणिगुपमानं भावयति– अहवेत्यादि गाथा । अथवा, शिष्येणौचित्यानतिक्रमात् कर्तव्यः सर्वोऽपि गुरुविनयः, गुरुणापि शिष्यौचित्येन कर्तव्यं सर्वमपि श्रुतप्रदानम् । गुरुविनयश्च श्रुतप्रदानं च, ते एव भाण्डे ग्राह्य-देयक्रयाणके तयोर्विनियोगो विनिमयस्तस्माद् गुरुविनय-श्रुतप्रदानभाण्डविनियोगाद् द्वयेऽपि शिष्या-ऽऽचार्याः कर्मनिर्जरालाभसहितास्टङ्कणवणिगुपमा अनुयोगस्य योग्या भवन्ति । विपर्यये तु विपर्यय इति । तदेवं 'गोणी चंदेण' इत्यादिना योग्या अयोग्याश्चोक्ताः शिष्या-ऽऽचार्याः ॥ १४४४ ॥ १४४५ ॥

इदानीं शिष्यस्य विशेषत एव योग्या-योग्यत्वमभिधित्सुः प्रस्तावनामाह—

अत्थी स एव य गुरू होइ जओ तो विसेसओ सीसो । जोग्गोऽजोग्गो भन्नइ तत्थाजोग्गो इमो होइ ॥१४४६॥

य इदानीं श्रुतस्यार्थं शृणोति स एव शिष्यः कालान्तरेणार्थी अर्थयुक्तोऽवगतसूत्रा-ऽर्थः सन् यस्माद् गुरुर्भवति नान्यः, तस्माद् योग्योऽयोग्यश्च विशेषतः शिष्यो भण्यते । तत्रायोग्यस्तावदयं वक्ष्यमाणो भवति ॥ इति द्वादशगाथार्थः ॥ १४४६ ॥

कस्स न होही देसो अणब्भुवगओ य निरुवगारी य । अप्पच्छंदमईओ पत्थियओ गंतुकामो य ॥१४४७॥

कस्य गुरोर्न भविष्यति द्वेष्योऽप्रीतिकरः शिष्यः, अपितु भविष्यत्येव । किं सर्व एव ?, न, इत्याह– अनभ्युपगतः श्रुतसंपदाऽनुपसंपन्नोऽनिवेदितात्मेत्यर्थः । अनुपसंपन्नत्वेऽपि तथा निरुपकारी गुरूणामनुपकारकः सर्वथा गुरुकुलेष्वप्रवर्तक इत्यर्थः । तत्राप्यात्मच्छन्दमतिः स्वाभिप्रायं कार्यकारीत्यर्थः । तथा, प्रस्थितो यो योऽन्यः कोऽपि शिष्यो जिगमिषुः, तस्य तस्य द्वितीयः । तथा, गन्तुकामश्च सदैव गन्तुमना य आस्ते, वक्ति च– 'कोऽस्य गुरोः संनिधानेऽवतिष्ठते ?, समर्प्यतामेतत् श्रुतस्कन्धादि, ततो यास्यामि' इत्येवंचित्त एव सदैवास्ते । तदेवंभूतः शिष्योऽयोग्य एव श्रवणस्येति भावः ॥ इति निर्युक्तिगाथार्थः ॥ १४४७ ॥

अनभ्युपगतादिस्वरूपं भाष्यकारोऽप्याह—

१ घ.ज. 'पमां भा' । २ गाथा १४३४ । ३ क.ख.ग.घ. 'दनेत्या' । × अनुपसंपन्नत्वेऽपि –। ० समाप्यता –।

४ अर्थी स एव च गुरुर्भवति यतस्ततो विशेषतः शिष्यः । योग्योऽयोग्यो भण्यते तत्रायोग्योऽयं भवति ॥ १४४६ ॥

५ कस्य न भविष्यति द्वेष्योऽनभ्युपगतश्च निरुपकारी च । आत्मच्छन्दमतिकः प्रस्थितको गन्तुकामश्च ॥ १४४७ ॥ ६ घ.ज. 'प्रायका' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

[1]भन्नइ अणब्भुवगओऽणुवसंपन्नो सुउवसंपदया । गुरुणो करणिज्जाइं अकुव्वमाणो निरुवगारी ॥१४४८॥
अप्पच्छंदमईओ सच्छंदं कुणइ सव्वकज्जाइं । पत्थियओ संपत्थियविइज्जओ निच्चगमिउ व्व ॥ १४४९ ॥
गंतुमणो जो जंपइ नवरिं समप्पउ इमो सुयक्खंधो । पढिउं सोउं च तओ गच्छं को अत्थए एत्थ ? ॥१४५०॥

तिस्रोऽपि गतार्थाः । नवरं 'निच्चगमिउ व्व त्ति' यो यः प्रस्थितस्तत्तद्द्वितीयः प्रस्थित उच्यते । क इव ?, नित्यगामीव पथिक इवेत्यर्थः ॥ १४४८ ॥ १४४९ ॥ १४५० ॥

अथ योग्यशिष्यगुणान् दर्शयन्नाह—

[2]विणओणएहिं पंजलियडेहिं छंदमणुयत्तमाणेहिं । आराहिओ गुरुजणो सुयं बहुविहं लहुं देइ ॥१४५१॥

विनयो वन्दनादिलक्षणस्तेनावनता विनयावनतास्तैरित्थंभूतैः सञ्जिः, तथा, पृच्छादिषु कृताः प्राञ्जलयो यैस्ते कृतप्राञ्जलयस्तैः, तथा, छन्दो गुर्वभिप्रायस्तमिङ्गिताकारादिना विज्ञाय तदध्यवसितश्रद्धान-समर्थन-करण-कारणद्वारेणानुवर्तमानैराराधितो गुरुजनः श्रुतं सूत्रा-ऽर्थोभयरूपं बहुविधमनेकप्रकारं लघु शीघ्रं ददाति प्रयच्छति ॥ इति निर्युक्तिगाथार्थः ॥ १४५१ ॥

भाष्यम्—

[3]विणओणओऽभिवंदइ पढए पुच्छए पडिच्छई वा णं । पंजलियडोऽभिमुहो कयंजली पुच्छणाईसु ॥१४५२॥
सद्दहइ समत्थेइ य कुणइ करावेइ गुरुजणाभिमयं । छंदमणुयत्तमाणो स गुरुजणाराहणं कुणइ ॥ १४५३ ॥

उक्तार्थे ॥ १४५२ ॥ १४५३ ॥

---

१ भण्यतेऽनभ्युपगतोऽनुपसंपन्नः श्रुतोपसंपदा । गुरोः करणीयान्यकुर्वन् निरुपकारी ॥ १४४८ ॥ × भच्छए-।
आत्मच्छन्दमतिकः स्वच्छन्दं करोति सर्वकार्याणि । प्रस्थितकः संप्रस्थितद्वितीयको नित्यगामीव ॥ १४४९ ॥
गन्तुमना यो जल्पति नवरं समर्प्यतामयं श्रुतस्कन्धः । पठित्वा श्रुत्वा च ततो गमिष्यामि कोऽर्थस्तेऽत्र ? ॥ १४५० ॥

२ विनयावनतैः कृतप्राञ्जलिभिश्छन्दमनुवर्तमानैः । आराधितो गुरुजनः श्रुतं बहुविधं लघु ददाति ॥ १४५१ ॥

३ विनयावनतोऽभिवन्दते पठति पृच्छति प्रतीच्छति वा । कृतप्राञ्जलिरभिमुखः कृताञ्जलिः पृच्छादिषु ॥ १४५२ ॥
श्रद्धत्ते समर्थयते च करोति कारयति गुरुजनाभिमतम् । छन्दमनुवर्तमानः स गुरुजनाराधनां करोति ॥ १४५३ ॥ ४ क.ग. 'इ ठाणं' ।

अथ प्रकारान्तरेणापि योग्या-ऽयोग्यशिष्यानुपदर्शयन्नाह—

[1]सेलघण-कुडग-चालणि-परिपूणग-हंस-महिस-मेसे य । मसग-जलूग-बिराली जाहग-गोभेरी आहेरी ॥१४५४॥

'सेल त्ति' शैलः पाषाणविशेषः, घनो मेघः, शैलश्च घनश्च तदुदाहरणं प्रथमम्, कुटो घटः, चालनी प्रतीता, परिपूणकः सुघरी-चिटिकागृहम्, हंस-महिष-मेष-मशक-जलूका-बिडाल्यः प्रतीताः, जाहकः सेहुलकः, गोभेरी, आभेरी चेति योग्या-ऽयोग्यशिष्य-विषयाणि चतुर्दशैतान्युदाहरणानि ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥ १४५४ ॥

उदाहरणं च द्विविधं भवति— चरितं, कल्पितं च । तत्रेह प्रथमं कल्पितमुदाहरणम् । एतच्च भाष्यकारो विवृण्वन्नाह—

[2]ऊल्लेऊण न सक्को गज्जइ इय मुग्गसेलओऽरन्ने । तं संवट्टयमेहो गंतुं तस्सुपरिं पडइ ॥ १४५५ ॥
रविउ त्ति ठिओ मेहो, उल्लोऽम्हि नव त्ति गज्जइ सेलो । सेलसमं गाहिस्सं निव्विज्जइ गाहगो एवं॥१४५६॥

इह क्वचिदरण्ये पर्वतासन्नप्रदेशे समन्ताद् निविडो मुद्गवद् वृत्तत्व-श्लक्ष्णत्वादिधर्मयुक्तः किञ्चिद्भूतले निमग्नः किञ्चित्तु प्रकाशश्चकचिकायमानो बदरादिप्रमाणलघूपलरूपो मुद्गशैलः किलासीत् । स च गर्जति— साक्षेपं जल्पति । कथम् ?, इत्याह— अहमार्द्रीकर्तुं जलेन भेत्तुं केनापि न शक्य इति । तच्च मुद्गशैलस्य संबन्धि गर्ववचः कुतश्चिद् नारदकल्पात् श्रुत्वा संवर्तको नाम महामेघः 'तद्गर्वमपाहमपनयामि' इति संप्रधार्य तं मुद्गशैलं गत्वा संप्राप्य तस्यैवोपरि पतति— निरन्तरं मुशलप्रमाणधाराभिर्वर्षतीत्यर्थः । 'संवर्तकमेघश्चोत्सर्पिण्यां शुभीभवति, काले पूर्वदग्धभूम्याश्वासनार्थं वर्षति' इत्यागमे प्रतिपाद्यते । तस्य च संबन्धि जलमतीव भूम्यादेर्द्रावकं वासकं च भवति, इति विशेषतस्तस्येह ग्रहणम् । एवं— सप्ताहोरात्राणि महावृष्टिं कृत्वा 'ठिओ मेघो त्ति' स्थितो दृष्टेरुपरतोऽसौ मेघः । कया बुद्ध्या ?, इत्याह— 'रविउ त्ति' द्रावितः खण्डशो नीतो मयाऽसौ मुद्गशैल इत्यभिप्रायेणेत्यर्थः । पानीये चापसृते सुतरामुज्जलीभूतोऽसौ चकचिकायमानो मुद्गशैलः पुनरपि गर्जति । कथम् ?, इत्याह—'उल्लोऽम्हि नव त्ति' आर्द्रोऽस्म्यहं नवा ? इति सम्यग् निरीक्षस्व । भोः पुष्करावर्तक ! किमित्येवमेव स्थितोऽसि, तिलतुषत्रिभागमात्रमपि ममाद्यापि न भिद्यत इति भावः । ततो लज्जितो

---

१ शैलघन-कुट-चालनी-परिपूणक-हंस-महिष-मेषाश्च । मशक-जलूका-बिडाल्यो जाहक-गोभेर्यावाभेरी ॥ १४५४ ॥

२ आर्द्रीकर्तुं न शक्यो गर्जतीति मुद्गशैलकोऽरण्ये । तं संवर्तकमेघो गत्वा तस्योपरि पतति ॥ १४५५ ॥
द्रावित इति स्थितो मेघः, आर्द्रोऽस्मि नवेति गर्जति शैलः । शैलसमं ग्राहयिष्ये निर्विशते ग्राहक एवम् ॥१४५६॥ ३ घ. ज. 'लक आसी' ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विलक्षीभूतः स्वस्थानमुपाश्रितो मेघः । तदेवं मुद्गशैलोदाहरणमभिधायोपनयमाह– 'सेलसमम्मित्यादि' यस्य वचनकोटिभिरपि चित्तं न भिद्यते, एकमप्यक्षरं तन्मध्याद् न परिणमतीत्यर्थः, स एवंभूतः शैलसमो मुद्गशैलतुल्य इत्यर्थः, तं तथाभूतं शिष्यं ज्ञात्वापि कश्चिद् ग्राहयतीति ग्राहको गुरुः,

"आचार्यस्यैव तज्जाड्यं यच्छिष्यो नावबुध्यते । गावो गोपालकेनैव कुतीर्थेनावतारिताः ॥ १ ॥"

इत्यादिश्लोकार्थविभ्रमितमतिर्गर्वाद् 'अहममुं ग्राहयिष्ये' इति प्रतिज्ञाय समागतो महता च संरम्भेणाऽध्यापयितुमारब्धः, तथापि स मुद्गशैलोपमः शिष्योऽक्षरमपि न गृह्णाति । न च मनागपि स्वाग्रहग्रस्तत्वेन बुध्यते । ततश्चैवं यथा पुष्करावर्तः, तथैव सुचिरं क्लेशमनुभूय निर्विद्यते पराभज्यते । ततो विलक्षीभूतो लज्जितश्च निवर्तते तद्ग्रहणादयमाचार्य इति । एवंभूतस्य च शिष्यस्य सूत्रा-ऽर्थदान आगमे प्रायश्चित्तमुक्तम् ॥ १४५५ ॥ १४५६ ॥

कुतः ?, इत्याह—

[1]आयरिये सुत्तम्मि य परिवाओ सुत्त-अत्थपलिमंथो । अन्नेसिं पिय हाणी, पुट्ठा वि न दुज्झया वझा ॥१४५७॥

एवं शैलसमस्यापि शिष्यस्य सूत्रा-ऽर्थदाने प्रवृत्ते आचार्ये, सूत्रेऽपि चागमे परिवादोऽवर्णवादो लोकसमुत्थो भवति; तद्यथा– अहो ! नास्य सूरेः प्रतिपादिका शक्तिः, नापि तथाविधं किमपि परिज्ञानं, यतोऽमुमप्येकं शिष्यमवबोधयितुं न क्षमः, आगमोऽप्यवीर्यां संबन्धी निरतिशयो युक्तिविकलश्च, इतरथा कथमयमेकोऽप्यस्माद् नावबुध्यते ? इत्यादि । तथा, सूत्रा-ऽर्थयोरन्तरायसंभवात् परिमन्थनं मर्दनं विनाशनं सूत्रा-ऽर्थपरिमन्थः, तच्छिक्षणप्रवृत्तस्य सूरेरात्मनः सूत्रपठन-परावर्तन-व्याख्यानभङ्गो भवतीत्यर्थः । अपरं च, तद्-ग्राहणप्रसक्ते सूरावन्येषां शिष्याणां सूत्रा-ऽर्थहानिः– तद्ग्रहणभङ्ग इत्यर्थः । न च बहुनापि कालेन तथाविधः शिष्यः किञ्चिदपि ग्राहयितुं शक्यः । कुतः ? इत्याशङ्क्याऽत्रार्थे दृष्टान्तमाह– 'पुट्ठा वीत्यादि' नियमनेन नियन्त्र्य स्तनेषु करैर्बहुधा स्पृष्टापि वन्ध्या गौर्न खलु दुग्धदा भवति, एवं मुद्गशैलसमः शिष्योऽपि ग्राहणकुशलेनापि गुरुणा ग्राह्यमाणोऽपि नाक्षरमपि गृह्णाति । ततस्तादृशस्य सूत्रा-ऽर्थौ न दातव्यौ, ऐहिका-ऽऽमुष्मिकक्लेशादिबहुदोषसंभवात् । ददाति चेत्, तर्हि समयोक्तमायश्चित्तभागिति । अत्राह– ननु प्रोक्तोऽसौ मुद्गशैल-

---

१ आचार्ये सूत्रे च परिवादः सूत्रा-ऽर्थपरिमन्थः । अन्येषामपि च हानिः, पृष्टापि न दुग्धदा वन्ध्या ॥ १४५७ ॥

दृष्टान्तः, केवलं पाषाण-मेघादीनां जल्पः, अभिप्रायपूर्विके च प्रवृत्ति-निवृत्ती, इत्यलौकिकमेवेदम् । सत्यम्, किन्तु पूर्वमुनिभिरेवात्रोक्तं प्रतिविधानम्, तद्यथा—

"[1]चरियं च कप्पियं चिय आहरणं दुविहमेव पन्नत्तं । अत्थस्स साहणट्ठा इंधणमिव ओयणट्ठाए ॥ १ ॥
न वि अत्थि न वि य होही उल्लावो मुग्गसेल-मेहाणं । उवमा खलु एस कया भवियजणविबोहणट्ठाए ॥ २ ॥"

इत्यलं प्रसङ्गेनेति ॥ १४५७ ॥

अथ मुद्गशैलमतिपक्षभूतं घनदृष्टान्तमाह—

[2]वुट्ठे वि दोणमेहे न कण्हभोमाओ लोठए उदयं । गहण-धरणासमत्थे इय देयमच्छित्तिकारिम्मि ॥१४५८॥

यावता वृष्टेनाकाशविन्दुभिर्मेदिनी गर्गरी भ्रियते, तावत्प्रमाणजलवर्षी मेघो द्रोणमेघ उच्यते । तस्मिन् वृष्टेऽपि सति कृष्णा भूमिर्यत्र प्रदेशेऽसौ कृष्णभूमः प्रदेशस्तस्माद् न प्रलोठति– वहति तन्मेघजलं पतितं न लुठित्वाऽन्यत्र गच्छति, किन्तु तत्रैवान्तः प्रवि-शतीति भावः । एवं शिष्योऽपि स कश्चिद् भवति यो गुरुभिरुक्तं बहुष्यवधारयति, न पुनरक्षरमपि पार्श्वतो गच्छतीति । एवंभूते च सूत्रा-ऽर्थग्रहणा-ऽवधारणासमर्थे शिष्ये सूत्रा-ऽर्थयोः शिष्य-प्रशिष्यपरम्परामदानेनाव्यवच्छेदकारिणि देयं सूत्रा-ऽर्थजातम्, नान्यस्मिन्ननन्तराभिहितमुद्गशैलकल्पे । इत्यन्वय-व्यतिरेकात्मकत्वादेकमेवेदमुदाहरणम् ॥ १४५८ ॥

अथ द्वितीयं कुटोदाहरणं विवृण्वन्नाह—

[3]भाविय इयरे य कुडा अपसत्थ-पसत्थभाविया दुविहा । पुप्फाईहिं पसत्था सुर-तेल्लाईहिं अपसत्था ॥१४५९॥
वम्मा अवम्मा वि य पसत्थवम्माओ होंति अगेज्झा । अपसत्थअवम्मा वि य, तप्पडिवक्खा भवे गेज्झा ॥१४६०॥

---

१ चरितं च कल्पितमपिचोदाहरणं द्विविधमेव प्रज्ञप्तम् । अर्थस्य साधनार्थमिन्धनमिवौदनार्थितया ॥ १ ॥ (शेष-1)
नाप्यस्ति नापि च भविष्यत्युल्लापो मुद्गशैल-मेघयोः । उपमा खल्वेष कृता अविकजनविबोधनार्थम् ॥ २ ॥

२ वृष्टेऽपि द्रोणमेघे न कृष्णभूमाल्लोठत्युदकम् । ग्रहण-धारणासमर्थे इति देयमच्छित्तिकारिणि ॥ १४५८ ॥

३ भाविता इतरे च कुटा अप्रशस्त-प्रशस्तभाविता द्विविधाः । पुष्पादिभिः प्रशस्ताः सुरा-तैलादिभिरप्रशस्ताः ॥ १४५९ ॥
ब्राह्म्या अब्राह्म्या अपि च प्रशस्तब्राह्म्या भवन्त्यग्राह्याः । अप्रशस्ताऽब्राह्म्या अपि च, तत्प्रतिपक्षा भवेयुर्ग्राह्याः ॥ १४६० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

कुप्पवयणआसेन्नेहिं भाविया एवमेव भावकुडा । संविग्गेहिं पसत्था वम्मा अवम्मा य तह चेव ॥१४६१॥

कुटा घटाः, ते च तावद् द्विविधाः– एके आपाकोत्तीर्णा नूतना अव्याप्रियमाणत्वादद्यापि पुष्प-जल-तैलादिनाऽभाविताः, अन्ये तु व्याप्रियमाणत्वाद् भाविताः । तत्र भाविता द्विविधाः,– सुरभिपाटलाकुसुम-पटवासादिप्रशस्तवस्तुभिर्भाविताः प्रशस्तभाविताः, सुरा-तैलाद्यप्रशस्तवस्तुभावितास्त्वप्रशस्तभाविताः । प्रशस्तभाविताः पुनरपि द्विविधाः– तज्ज्ञातुं वमयितुं शक्या वाम्याः, तद्विपरीतास्त्ववाम्याः । एवमेवाप्रशस्तभाविता अपि वाम्या-ऽवाम्यभेदद्वयादेव द्विविधाः । तत्र ये प्रशस्तवाम्याः प्रशस्तभावं वमयितुं शक्यास्तेऽग्राह्या भवन्ति, अनादेयाः, असुन्दरा इति यावत् । तथा, येऽप्रशस्तभावं वमयितुमशक्या अप्रशस्तावाम्यास्तेऽप्यग्राह्या भवन्ति । 'तप्पडिवक्खा भवे सेज्झ त्ति' तेषां प्रशस्तवाम्यानाम्, अप्रशस्तावाम्यानां च ये प्रतिपक्षाः प्रशस्तावाम्याः, अप्रशस्तवाम्याश्च ते ग्राह्या आदेयाः सुन्दरा भवन्ति । तदेवं द्रव्यकूटास्तावत् प्ररूपिताः । भावकुटा अपि प्रशस्ता-ऽप्रशस्तगुण-जलाधारत्वाच्छिष्यजीवा एवमेव भाविता-ऽभावितादिभेदाद् द्रष्टव्याः । केवलमत्र पक्षे कुप्रवचनावसन्नादिभिर्भाविताः 'अप्रशस्तभाविता उच्यन्ते' इत्यध्याहारः । ये तु संविग्नैरेव साधुभिर्भावितास्ते प्रशस्ताः प्रशस्तभाविता इत्यर्थः । 'वम्मा अवम्मा य तह चेव त्ति' वाम्या-ऽवाम्यभावना यथा द्रव्यकुटपक्षे तथैव भावकुटपक्षेऽपि द्रष्टव्येत्यर्थः । सा चैवम्– प्रशस्तभाविता वाम्याः, अप्रशस्तभावितास्त्ववाम्याः, एते उभयेऽप्यग्राह्याः । उक्तविपरीतास्तु ग्राह्या इति । तदेवमुक्तो भावितकुटपक्षः ॥ १४५९ ॥ १४६० ॥ १४६१ ॥

अथाभावितकुटपक्षमधिकृत्याह—

[1]जे उण अभाविया ते चउव्विहा, अहाविमो गमो अन्नो । छिड्डकुड-भिन्न-खंडे सगले य परूवणा तेसिं ॥ १४६२ ॥

ये पुनरभाविताः कुटास्ते छिन्न-भिन्न-खण्ड-सकलभेदाच्चतुर्विधाः । अथवा, भाविता-ऽभावितपक्षनिरपेक्ष एवाऽयमन्यश्छिन्न-भिन्नादिको गमः प्रकारो वर्तत इत्यर्थः । तमेवाह– 'छिड्डकुडेत्यादि' इह कुटो घटः कोऽपि तावच्छिद्रो भवति, बुध्ने सच्छिद्रो भवतीत्यर्थः । अन्यस्तु भिन्नो राजिमान् भवति । तृतीयस्तु खण्डो भग्नकर्णः । चतुर्थस्तु सकलः परिपूर्ण एव भवति । एतेषां च चतुर्णामपि कुटभेदानां

१ कुप्रवचनावसन्नैर्भाविता एवमेव भावकुटाः । संविग्नैः प्रशस्ता वाम्या अवाम्याश्च तथैव ॥ १४६१ ॥

२ ये पुनरभावितास्ते चतुर्विधाः, अथवाऽयं गमोऽन्यः । छिद्रकुट-भिन्न-खण्डेषु सकले च प्ररूपणा तेषाम् ॥ १४६२ ॥

दार्ष्टान्तिकमधिकृत्य प्ररूपणा स्वयमेव कार्या, यथा कोऽपि शिष्यः श्रुतग्रहणमाश्रित्य छिद्रघटकल्पो भवति, कश्चित्तु भिन्नघटकल्प इत्यादि वाच्यमिति ॥ १४६२ ॥

अथ क्रमप्राप्तं चालन्युदाहरणमभिधित्सुः, मुद्गशैल-च्छिद्रकुट-चालन्युदाहरणानां परस्परा भेदोद्भावकशिष्यमतं च निराचिकीर्षुराह–

[1]सेले य छिड्ड-चालणि मिहो कहा सोउमुट्ठियाणं तु । छिड्डाह तत्थ विट्ठो सुमरिंसु सरामि नेदाणिं ॥ १४६३ ॥

एगेण विसइ बीएण नीइ कन्नेण चालणी आह । धन्न त्थ आह सेलो जं पविसइ नीइ वा तुज्झं ॥ १४६४ ॥

शैल-च्छिद्रकुट-चालन्युदाहरणैः प्रतिपादिताः शिष्या अप्युपचारात् तथोच्यन्ते, तत्सादृश्यात् । ततश्च शैल-च्छिद्रकुट-चालन्यभिधानानां शिष्याणां गुर्वन्तिके व्याख्यानं श्रुत्वा, उत्थायान्यत्र गतानां मिथः परस्परं कथा समभवत् । कीदृशी ?, इत्याह– 'छिड्डेत्यादि' छिद्रघटकल्पच्छिद्रः शिष्यः प्राह । किम् ?, इत्याह– तत्र गुरुसमीपे उपविष्टस्तदुक्तमस्मार्षमहम्, इदानीं तु न किमपि स्मरामि । छिद्रघटो ह्येवंविध एव भवति । सोऽपि स्थानस्थितो मुद्गादिकं प्रक्षिप्तं धरति, अन्यत्र तूत्क्षिप्य नीतस्य तत्र प्राप्यते, अधश्छिद्रेण गलित्वा निःसृतत्वात्, अतस्तत्कल्पः शिष्योऽपीत्थमाहेति भावः । छिद्रकुटकल्पेन शिष्येणैवमुक्ते चालनीकल्पः प्राह– 'एकेणेत्यादि' चालनीकल्पः शिष्यश्चालनी, स प्राह– भोश्छिद्रकुट ! शोभनस्त्वम्, येन गुरुसमीपस्थेन त्वया तावदवधारितं तद्वचः पश्चादेव विस्मृतम्, मम तु गुर्वन्तिकेऽपि स्थितस्यैकेन कर्णेन विशति, द्वितीयेन तु निर्गच्छति, न पुनः किमपि हृदये स्थितम् । कणिकादिचालन्या अपि हि जलादिकमुपरिभागे निक्षिप्यते, अधोभागेन तु निर्गच्छति, न तु किमपि संतिष्ठते, अतस्तदुपमः शिष्योऽपीत्यमेवाहेति भावः । तदेवं छिद्रकुट-चालनीभ्यामेवमुक्ते मुद्गशैलः प्राह– 'धन्न त्थेत्यादि' मुद्गशैलो वदति– धन्यावत्र युवाम्, यद् यस्मात् कारणाद् युवयोस्तावत्कर्णयोर्गुरूक्तं किमपि प्रविशति, निर्गच्छति च । मम त्वेतदपि नास्ति, तदुक्तस्य सर्वथापि मध्ये प्रवेशाभावात्, उपलस्यैवंविधत्वादेवेति । तदेवं चालन्युदाहरणस्य स्वरूपमुक्तम्, शैल-च्छिद्रघट-चालन्युदाहरणानां परस्परं विशेषश्चाभिहितः ॥१४६३॥१४६४॥

अथ चालनीमतिपक्षमाह—

१ शैले च छिद्र-चालन्योर्मिथः कथा श्रुत्वोत्थितानां तु । छिद्र आह तत्र विष्टोऽस्मार्षं स्मरामि नेदानीम् ॥ १४६३ ॥

एकेन विशति द्वितीयेन निर्गच्छति कर्णेन चालन्याह । धन्यावत्राह शैलो यद् प्रविशति निर्गच्छति वा युवयोः ॥ १४६४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

तावसखउरकठिणयं चालणिपडिवक्खो न सवइ दव्वं पि । परिपूणगम्मि उ गुणा गलंति दोसा य चिट्ठंति ॥१४६५॥

चालनीप्रतिपक्षः 'भवति' इति शेषः । कीदृशः ? इत्याह- तापसानां भोजनादिनिमित्तमुपकरणविशेषः 'खउरकठिनकम्' उच्यते । तच्च किल [1]वंशशुम्बादिकं च द्रव्यमतिश्लक्ष्णं कुट्टयित्वा कमठकाकारं क्रियते । इदं चातिनिबिडत्वाद् द्रव्यं, जलमपि प्रक्षिप्तं न स्रवति, किन्तु सम्यग् धरति । एवं शिष्योऽपि यो गुरुभिराख्यातं सर्वमेव धरति, न विस्मरति, स ग्राह्यः, चालनीसमस्त्वग्राह्य इति भावः ।

अथ परिपूणकोदाहरणमाह- 'परिपूणग-' इत्याद्युत्तरार्धम् । परिपूणको नाम सुघरीचिटिकाविरचितो नीडविशेषः, तेन च किल घृतं गाल्यते, ततस्तत्र कचवरमवतिष्ठते, घृतं गलित्वाऽधः पतति, एवं परिपूणकसदृशः शिष्योऽप्युपचारात् परिपूणकः । तत्र हि श्रुतसंबन्धिनो गुणाः सर्वेऽपि घृतवद् गलन्ति, दोषास्तु घृतगतकचवरवदवतिष्ठन्ते, श्रुतस्य दोषानेव गृह्णाति, गुणांस्तु सर्वथा परिहरत्यसौ, अतोऽयोग्य इति भाव इति ॥ १४६५ ॥

अत्र मेर्यश्रुत्थाप्य परिहरन्नाह—

[2]सव्वण्णुपामन्ना दोसा हु न संति जिणमए केइ । जं अणुवउत्तकहणं अपत्तमासज्ज व हवेज्ज ॥१४६६॥

ननु सर्वज्ञप्रामाण्यात् सर्वज्ञोऽस्य प्रवर्तक इति हेतोर्जिनमते दोषाः केचिदपि न सन्तीत्यर्थः, तत् कथमस्य कोऽपि दोषान् ग्रहीष्यति, असत्त्वादेव ? इति भावः । सत्यम् , किन्तु यद्यपि जिनमते दोषा न सन्ति, तथाऽप्यनुपयुक्तस्य गुरोर्यत् कथनं व्याख्याविधानं तदाश्रित्य दोषा भवेयुरिति संबन्धः । अथवा, अपात्रमयोग्यं शिष्यमङ्गीकृत्य जिनमतेऽपि तदुत्प्रेक्षिता दोषा भवेयुः, निर्दोषेऽपि जिनमतेऽपात्रभूताः शिष्या असतोऽपि दोषानुद्भावयन्त्येवेत्यर्थः । तथाच ते वक्तारो भवन्ति, तद्यथा—

"[3]पोंगयभासनिबद्धं को वा जाणइ पणीयं केणेयं । किंवा चरणेणं णु दाणेण विणा उ हवइ त्ति ॥ १ ॥

[4]कायावया य त चिय ते चेव पमाय-अप्पमाया य । मोक्खाहिगारियाणं जोइसजोणीहिं किं कज्जं ? ॥ २ ॥

---

१ तापस-'खउरकठिनकं' चालनीप्रतिपक्षो न स्रवति द्रव्यमपि । परिपूणके तु गुणा गलन्ति दोषाश्च तिष्ठन्ति ॥ १४६५ ॥ २ क.ग. 'वंशकुन्दादिकं द्र' ।

३ सर्वज्ञप्रामाण्याद् दोषाः खलु न सन्ति जिनमते केचित् । यदनुपयुक्तकथनमपात्रमासाद्य वा भवेयुः ॥ १४६६ ॥

४ प्राकृतभाषानिबद्धं को वा जानाति प्रणीतं केनेदम् ? । किंवा चरणेन नु दानेन विना तु भवतीति ॥ १ ॥
कायापटुश्च ता एव तावेव प्रमादा-ऽप्रमादौ च । मोक्षाधिकारिकाणां ज्योतिर्योनिभिः किं कार्यम् ? ॥ २ ॥ कायाः वयाश्च त-न

को आउरस्स कालो मइलंबरधोयणे य को कालो ? । जइ मोक्खहेउ नाणं को कालो तस्सकालो वा ? ॥ ३ ॥"

इत्यादि । असन्तश्च सर्वेऽप्यमी दोषाः,

"बाल-स्त्री-मूढ-मूर्खाणां नृणां चारित्रकाङ्क्षिणाम् । अनुग्रहार्थं तत्त्वज्ञैः सिद्धान्तः प्राकृतः कृतः ॥ १ ॥"

"[1]पुव्वभणियं पि जं वत्थु भण्णए तत्थ कारणं अत्थि । पडिसेहो य अणुन्ना वत्थुविसेसोवलंभो वा ॥ १ ॥"

इत्यादिना शास्त्रान्तरे विस्तरेण निराकृतत्वादिति ॥ १४६६ ॥

अथ हंसोदाहरणव्याख्यामाह—

[2]अंबत्तणेण जीहाए कूचिया होइ खीरमुदगम्मि । हंसो मुत्तूण जलं आवियइ पयं तह सुसीसो ॥१४६७॥

दुग्धं च जलं च मिश्रयित्वा भाजने व्यवस्थाप्य कोऽपि हंसस्य पानार्थमुपनयति । स च तन्मध्ये चञ्चुं प्रक्षिपति । तस्य च जिह्वा स्वभावत एवाम्ला भवति । तेन च जिह्वाया आम्लत्वेन हेतुभूतेनोदकमध्यगतं दुग्धं विलित्वा कूचिका बिन्दुरूपा बुद्बुदा भवन्तीत्यर्थः । ततश्च जलं मुक्त्वा तद् बुद्बुदीभूतं दुग्धमापिबति हंसः । तथा सुशिष्योऽपि गुरोर्जलस्थानीयान् दोषान् परित्यज्य दुग्धस्थानीयान् गुणान् गृह्णातीत्यर्थ इति ॥ १४६७ ॥

अथ महिषोदाहरणं विवृण्वन्नाह—

[3]सयमवि न पियइ महिसो न य जूहं पियइ लोडियं उदगं । विग्गह-विगहाहि तहा अत्थकुपुच्छाहि य कुसीसो ॥१४६८॥

स्वयूथेन समं वनमहिषो जलाशये क्वचिद् गत्वा तन्मध्ये च प्रविश्योद्वर्तन-परावर्तनादिभिस्तथा तज्जलमालोडयति यथा कलुषितं सद् न स्वयं पिबति, नापि तद्यूथम् । एवं कुशिष्योऽपि व्याख्यामण्डलिकायामुपविष्टो गुरुणा, अन्येन वा शिष्येण सह विग्रहं कलहमुदीरयति, विकथाप्रबन्धं वा किञ्चिच्चालयति, संबद्धा-संबद्धरूपाभिरनवरतमुपर्युपरि पृच्छाभिश्च तथा कथञ्चिद् व्याख्यानमालोडयति, यथा नात्मनः किञ्चित् पर्यवस्यति, नापि शेषविनेयानामिति ॥ १४६८ ॥

---

१ क आतुरस्य कालो मलिनाम्बरधावने च कः कालः ? । यदि मोक्षहेतुर्ज्ञानं कः कालस्तस्याऽकालो वा ? ॥ ३ ॥

२ पूर्वभणितमपि यद् वस्तु भण्यते तत्र कारणमस्ति । प्रतिषेधश्चानुज्ञा वस्तुविशेषोपलम्भो वा ॥ १ ॥ × लितुलित्या, विसुरित्या ।

३ आम्लत्वेन जिह्वायाः कूचिका भवति क्षीरमुदके । हंसो मुक्त्वा जलमापिबति पयस्तथा शिष्यः ॥ १४६७ ॥

४ स्वयमपि न पिबति महिषो न च यूथं पिबति लोडितमुदकम् । विग्रह-विकथाभिस्तथाऽर्थकुपृच्छाभिश्च कुशिष्यः ॥ १४६८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

मेषोदाहरणमाह—

अवि गोपयम्मि पिवे सुढिओ तणुयत्तणेण तुंडस्स । न करेइ कलुसं तोयं मेसो एवं सुसीसो वि ॥१४६९॥

जलभृते क्वचिद् गोष्पदेऽपि 'सुढिउ त्ति' संकुचिताग्रो मेष ऊरणकः पिबेज्जलम्, न च तत् कलुषं करोति । केन हेतुना ? इत्याह तनुकत्वेनाग्रभागे श्लक्ष्णत्वेन तुण्डस्य मुखस्येति । अग्रपादाभ्यामवनम्य तीक्ष्णेन मुखेन तथासौ जलं पिबति यथा सर्वथैव कलुषं न भवति । एवं सुशिष्योऽपि तथा गुरोः सकाशाद् निभृतः श्रुतं गृह्णाति यथा तस्य, परिषदो वा न कस्यचिद् मनोबाधादिकं कालुष्यं भवतीति ॥ १४६९ ॥

मशक-जलूकोदाहरणद्वयविवृतिमाह—

मसउ व्व तुदं जच्चाइएहिं निच्छुब्भए कुसीसो वि । जलुगा व अदूमंतो पिबइ सुसीसो वि सुयनाणं ॥१४७०॥

यथा मशको जन्तूंस्तुदते व्यथयति । ततश्च वस्त्राञ्चलादिभिस्तिरस्कृत्य दूरीक्रियते, तथा कुशिष्योऽपि जात्यादिदोषोद्घाटनैर्गुरुं तुदन् व्यथयमानो निष्कास्यते परिहियत इति । जलूका पुनर्यथाऽसृग् पिबति, न चासृग्गन्तं व्यथयति, तथा सुशिष्योऽपि गुरुभ्यः श्रुतज्ञानं पिबति गृह्णाति न तु जात्युद्घाटनादिना दुनोतीति ॥ १४७० ॥

बिडाल्युदाहरणमाह—

छड्डेउं भूमीए खीरं जह पियइ दुट्ठमज्जारी । परिसदुट्ठियाण पासे सिक्खइ एवं विणयभंसी ॥ १४७१ ॥

यथा दुष्टमार्जारी तथाविधस्वभावतया स्थाल्याः क्षीरं भूमौ छर्दयित्वा पिबति, न पुनस्तत्स्थम् । तथाच सति न तत् तस्यास्तथाविधं किञ्चित् पर्यवस्यति । एवं विनयाद् भ्रश्यतीति विनयभ्रंशी विनयकरणभीरुः कुशिष्यो गोष्ठामाहिलवत् परिषदुत्थितानां विन्ध्यादीनामिव पार्श्वे शिक्षते श्रुतं गृह्णाति, न तु गुरोः समीपे, तद्विनयकरणभयात् । इह च दुष्टमार्जारीस्थानीयः कुशिष्यः, भूमिकल्पस्तु परिषदुत्थिताः शिष्याः, छर्दितदुग्धपानसदृशं तु तद्गतश्रुतश्रवणमिति ॥ १४७१ ॥

---

१ अपि गोष्पदे पिबेद् मेषकस्तनुकत्वेन तुण्डस्य । न करोति कलुषं तोयं मेष एवं सुशिष्योऽपि ॥ १४६९ ॥

२ मशक इव तुदञ्जात्यादिभिर्निष्कास्यते कुशिष्योऽपि । जलूकेवाऽदुनन् पिबति सुशिष्योऽपि श्रुतज्ञानम् ॥ १४७० ॥

३ छर्दयित्वा भूमौ क्षीरं यथा पिबति दुष्टमार्जारी । परिषदुत्थितानां पार्श्वे शिक्षत एवं विनयभ्रंशी ॥ १४७१ ॥

जाहकोदाहरणमाह—

पाउं थोउं थोउं खीरं पासाइं जाहगो जह लिहइ । एमेव जियं काउं पुच्छइ मइमं न खेएइ ॥ १४७२ ॥

यथा भाजनगतं क्षीरं स्तोकं स्तोकं पीत्वा ततो जाहकः सेहलको भाजनस्य पार्श्वानि लेढि, पुनरपि च स्तोकं तत् पीत्वा भाजनपार्श्वानि लेढि, एवं पुनः पुनस्तावत् करोति यावत् सर्वमपि क्षीरं पीतमिति । एवं मतिमान् सुशिष्योऽप्येतत् गृहीतं श्रुतं जितं परिचितं कृत्वा पुनरन्यद् गृह्णाति, एवं पुनः पुनस्तावद् विदधाति यावत् सर्वमपि श्रुतं गुरोः सकाशाद् गृह्णाति, न च गुरुं खेदयतीति ॥ १४७२ ॥

अथ गोदृष्टान्त उच्यते- तत्र च केनापि यजमानेन वेदान्तर्गतग्रन्थविशेषाध्ययननिमित्तचरणशब्दवाच्येभ्यश्चतुर्भ्यो ब्राह्मणविशेषेभ्यो गौः प्रदत्ता । प्रोक्ताश्च तेन ते ब्राह्मणाः- ' वारकेणासौ भवद्भिर्दोग्धव्या' इति । अन्येभ्योऽपि च चतुर्भ्यश्चरणद्विजेभ्यो गौरेका तेन प्रदत्ता । तेऽपि च तेन तथैवोक्ताः । तत्र च प्रथमद्विजानां मध्ये ज्येष्ठब्राह्मणेन केनचिद् गौः स्वग्रहे नीत्वा दुग्धा । ततश्चारीप्रदानवेलायां चिन्तितं तेन । किम् ? इत्याह—

अन्नो दोज्जिइ कल्ले निरत्थियं किं वहामि से चारिं । चउचरणगवी उ मया अवन्न-हाणी य बहुयाणं ॥१४७३॥

तेनैतच्चिन्तितम्- हन्त ! वारकप्राप्तोऽन्यो ब्राह्मणः कल्ये तावदेतां धेनुं धोक्ष्यति, तत् किमद्य निरर्थिकामस्याश्चारीं वहामि । कल्येऽन्योऽपि हि तां दास्यति, इति विनिश्चित्य न तस्याश्चारी प्रदत्ता । ततो द्वितीये दिने द्वितीयेनापि द्विजातीयेन तथैव कृतम् । एवं तृतीये दिने तृतीयेनापि, चतुर्थे दिने चतुर्थेनापि तथैव चेष्टितम् । इत्थं च चारीविरहिता दुह्यमाना कतिपयदिनमध्ये चतुर्णां चरणानां संबन्धिनी सा गौर्मृता । ततश्च तेषां बहूनां गोहत्या समभवत् । जने चावर्णवादो जातः, हानिश्च, तेषां ततो यजमानात्, अन्यस्माद् वा पुनर्गवादिलाभाभावादिति ॥ १४७३ ॥

अन्यैश्च यैश्चतुर्भिश्चरणैर्गौर्लब्धा, तन्मध्ये प्रथमद्विजस्तां दुग्ध्वा चारीप्रदानवेलायामचिन्तयत्, किम् ?, इत्याह—

मा मे होज्ज अवण्णो गोवज्झा वा पुणो वि न दविज्जा । वयमवि दोज्झामो पुणो अणुग्गहो अन्नदुद्धे वि ॥१४७४॥

---

१ पीत्वा स्तोकं स्तोकं क्षीरं पार्श्वानि जाहको यथा लेढि । एवमेव जितं कृत्वा पृच्छति मतिमान् न खेदयति ॥ १४७२ ॥

२ अन्यो धोक्ष्यति कल्ये निरर्थिकां किं वहामि तस्याश्चारीम् । चतुश्चरणगौस्तु मृताऽवर्ण-हान्यौ च बहुकानाम् ॥ १४७३ ॥

३ मा मम भूदवर्णो गोहत्या वा पुनरपि न दास्यति । वयमपि धोक्ष्यामः पुनरनुग्रहोऽन्यदुग्धायामपि ॥ १४७४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

मा भूज्जनमध्ये ममावर्णवादः, गोहत्या वा मा भूत्, इत्यस्याश्चारीं प्रयच्छामि । यदि तु न दास्यामि तदा संजातकलङ्केभ्योऽस्मभ्यं पुनर्मवादिकं किमपि कोऽपि न दास्यति । अपरञ्च, एतस्याश्चारीप्रदाने को दोषः ? प्रत्युत गुण एव, यतश्चारीप्रदानपुष्टामेतां पुनरपि वारकेणागतां वयमेव धोक्ष्यामः । यद्दिवा, अन्येनापि ब्राह्मणेन दुग्धायामेतस्यामस्माकमेवानुग्रह इति ॥ १४७४ ॥

अथोपनयमाह—

[1]सीसा पडिच्छगाणं भरो त्ति ते वियहु सीसगभरो त्ति । न करेंति सुत्तहाणी अन्नत्थ वि दुल्लहं तेसिं ॥१४७५॥

गुरोर्विनयकर्मणि कर्तव्ये स्वगच्छदीक्षिताः शिष्यास्तावच्चिन्तयन्ति । किम् ? इत्याह– प्रतीच्छकानामुपसंपन्नानामागन्तुकशिष्याणामयं गुरोर्विनयकरणलक्षणो भर[2]आचारः, किमस्माकम्, तेषामेव सांप्रतं वल्लभत्वात् ? इति । तेऽपि च प्रतीच्छका एवं संप्रधारयन्ति– निजशिष्याणामेवाऽयं भरः, किमस्माकमागन्तुकानामद्य समागतानामन्येद्युर्जिगमिषूणाम् ? इति । एवं संप्रधार्योभयेऽपि गुरोर्न किञ्चिद् विनय-वैयावृत्त्यादिकं कुर्वन्ति । ततश्च गुरुषु सीदत्सु तेषां सूत्रा-ऽर्थहानिः, अन्यत्रापि च गतानां तेषां दुर्विनीतानां दुर्लभं सूत्रम्, अर्थश्च । उपलक्षणत्वादन्येऽप्यवर्णवादादयो दोषाः स्वयमेवाभ्यूह्याः । अयं च दुर्विनीतशिष्योपनयः कृतः । सुविनीतविनेयोपनयस्तूक्तविपर्ययेण स्वयमेव कर्तव्य इति ॥ १४७५ ॥

भेरीदृष्टान्तमाह—

[3]कोमुइया तह संगामिया य उब्भूइया य भेरीओ । कण्हस्सासिण्हुतया असिवोवसमी चउत्थी उ ॥ १४७६ ॥
सक्कपसंसा गुणगाहि केसवो नेमिवंद-सुणुदंता । आसरयणस्स हरणं कुमारभंगे य पुयजुद्धं ॥ १४७७ ॥
नेहि जिओ म्हि त्ति अहं असिवोवसमीए संपयाणं च । छम्मासियघोसणया पसमइ न य जायए अन्नो ॥१४७८॥
आगंतुवाहिक्खोभो महिड्ढिमुल्लेण कंथ-दंडणया । अट्ठमआराहण अन्नभेरी अन्नस्स ठवणं च ॥ १४७९ ॥

---

१ शिष्याः प्रतीच्छकानां भर इति तेऽपिच खलु शिष्यकभर इति । न कुर्वन्ति सूत्र-हान्यावन्यत्रापि दुर्लभं तेषाम् ॥ १४७५ ॥

२ कौमुदिका तथा सांग्रामिकी चौद्भूतिकी च भेर्यः । कृष्णस्याशिश्नुतयाऽशिवोपशमिनी चतुर्थी तु ॥ १४७६ ॥ × आभारः-।
शक्रप्रशंसा गुणग्राही केशवो नेमिवन्दन-श्वानोदन्तौ । अश्वरत्नस्य हरणं कुमारभङ्गे च पूतयुद्धम् ॥ १४७७ ॥ ※ ऽऽश्लिष्णुतया-।
नय जितोऽस्मीत्यहमशिवोपशमिन्याः संप्रदानं च । षाण्मासिकघोषणया प्रशमति न जायतेऽन्यः ॥ १४७८ ॥
आगन्तुकव्याधिक्षोभो महर्द्धिमूल्येन कन्था-दण्डनते । अष्टमाराधनमन्यभेरी अन्यस्य स्थापनं च ॥ १४७९ ॥

आसां भावार्थः कथानकादवसेयः । तच्च 'गोणी चन्दनकंथा' इत्यत्र सविस्तरं कथितमेव । इह चेत्थमुपनयोऽपि द्रष्टव्यः– यः शिष्योऽशिवोपशमिकां भेरीं प्रथमरक्षक इव जिन-गणधरप्रदत्तां श्रुतरूपां भेरीं परमतादिथिग्गलकैः कन्थीकरोति स न योग्यः, यस्तु नैवं करोति स द्वितीयभेरीरक्षक इव योग्य इति ॥ १४७६ ॥ १४७७ ॥ १४७८ ॥ १४७९ ॥

अथाभीरीदृष्टान्तं विवृण्वन्नाह—

[4]मुक्कं तया अगहिए दुपरिग्गहियं कयं तया, कलहो । पिट्टण-अइचिरविक्कय गएसु चोरा य ऊणग्घे ॥१४८०॥

इह च कथानकेन भावार्थ उच्यते, तद्यथा– कुतश्चिद् ग्रामाद् गोकुलाद् वाऽऽभीरीसहित आभीरो घृतवारकाणां गन्त्रीं भृत्वा विक्रयार्थं पत्तने समागतः । विक्रयस्थाने च गन्त्र्या अधस्ताद् भूमावाभीरी स्थिता । आभीरस्तूपरि स्थितस्तस्या घृतवारकं समर्पयति । ततश्चानुपयोगेन समर्पणे, ग्रहणे वा घृतवारके भग्ने आभीरी प्राह– भग्नाश ! नगरतरुणीनां मुखान्यवलोकयमानेन त्वया घृतवारकोऽयं मयाऽगृहीत एव मुक्तः, ततो भग्नः । आभीरस्त्वाह– रण्डे ! नगरयूनां वदनानि वीक्षमाणया त्वयैव दुष्परिगृहीतोऽयं कृतः, ततो भग्नः, इत्युभयोरपि कलहः समभवत् । पिट्टिता च तेनाभीरी । कलहयतोश्च तयोरन्यदपि घृतं बहु च्छर्दितम् । उद्वरितशेषेण च घृतेनोत्सूरेऽर्धोऽप्यूनो लब्धः । इतरेषु सार्थिकेषु घृतं विक्रीय गतेषु तयोरेकाकिनोर्गच्छतोर्घृतद्रम्मा गन्त्री बलीवर्दाश्च सर्वे तस्करैरपहृतमिति ॥ १४८० ॥

एवं दृष्टान्तमभिधायोपनयमाह—

[5]मा निण्हवइ य दाउं उवजुज्जिय देहि किं विचिंतेसि ? । वच्चामेलियदाणे किलस्ससि तं च हं चेव ॥१४८१॥

चिन्तनिकाद्यवस्थायां वितथं प्ररूपयन्, अधीयानो वा गुरुणा शिक्षितः शिष्यो जगाद– त्वयैव ममेत्थं व्याख्यातं, पाठितो वा त्वयैवैवंविधम्, अतस्तवैव दोषोऽयम्, किं मां शिक्षयसि ? । आचार्यः प्राह– न मयैवमुपदिष्टम् । कुशिष्यो ब्रवीति– हन्त ! साक्षादेव मम पुरस्सरमित्थं सूत्रमर्थं वा दत्त्वा सूरे ! मा निह्नोष्ठास्त्वम् । इत्यमुक्त आचार्यः किमप्यन्तर्ध्यायन् पुनरप्युक्तः शिष्याभासेन– 'किं बलीवर्दात् पातित इव विचिन्तयसि, भव्यगत्योपयुज्योपयुक्तो भूत्वा देहि सूत्रा-ऽर्थौ, व्यत्याम्रेडितदाने क्लिश्यावस्त्वं चाहं चैव ॥ १४८१ ॥

---

१ गाथा १४३४ । २ मुक्तं त्वयाऽगृहीते दुष्परिगृहीतं कृतं त्वया, कलहः । पिट्टना-ऽतिचिरविक्रयौ गतेषु चौराश्चोनार्घः ॥ १४८० ॥
× कृत्वा-। ३ मा निह्नोष्ठाश्च दत्त्वोपयुज्य देहि किं विचिन्तयसि ? । व्यत्याम्रेडितदाने क्लिश्यावस्त्वं चाहं चैव ॥ १४८१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रदाने केवलं त्वम्, अहं च क्लेशमेवानुभवावः। तदित्थं स्वदोषाप्रतिपत्तौ गुरुदोषोद्भावनेनाभीरमिथुनस्यैव गुरु-शिष्ययोः कलह एव प्रवर्तते। तथाच सति व्याख्याव्यवच्छित्ति-सूत्रा-ऽर्थहान्यादयो दोषाः।

अत्र प्रतिपक्षः स्वयमेव द्रष्टव्यः, तथाहि– अन्योऽप्याभीरः किल सकलत्रस्तथैव कापि नगरे घृतविक्रयार्थं गतः। कलत्रस्य च चारके समर्पिते भग्ने 'अहो! मयाऽनुपयुक्तेन समर्पितोऽयम्' इति ब्रुवाणो झागिति गन्त्र्याः समुत्तीर्य कर्परकैर्घृतं संवृणोति। भार्याऽपि 'धिग् मयाऽनुपयुक्तया दुष्परिगृहीतः कृतोऽसौ, तेन भग्नः' इति वदन्ती तथैव तत् संवृणोति। ततश्चान्योन्यं कलहेऽज्ञात उभयसंवृत्त्या घृतं शीघ्रमेव विक्रीतम्। सार्थिकैश्च सह क्षेमेण स्वस्थानं जग्मतुः। एवं गुरु-शिष्या अपि स्वदोषं प्रतिपद्यमानाः परदोषं तु निह्नुवाना येऽन्योन्यं न विवदन्ते, त एव सूत्रा-ऽर्थग्रहण-प्रदानयोर्योग्या भवन्ति, निर्जरादिलाभभागिनश्चेति ॥ १४८१ ॥

तदेवं योग्या-ऽयोग्यान् गुरून् शिष्यांश्चोपदर्श्योपसंहारपूर्वकं तत्फलमाह—

[1]भणिया जोग्गा-ऽजोगा सीसा गुरवो य तत्थ दोण्हं पि। पेयालियगुण-दोसो जोग्गो जोग्गस्स भासेज्जा ॥१४८२॥

भणिता योग्या-ऽयोग्या गुरु-शिष्याः। तत्र द्वयोरपि गुरु-शिष्ययोर्विचारितगुण-दोषो योग्यो गुरुर्योग्याय शिष्याय सूत्रा-र्थौ भाषेतेति ॥ १४८२ ॥

अथ क्रमप्राप्तमुपोद्घातद्वारमभिधित्सुः प्रस्तावनामाह—

[2]केयमंगलोवयारो संपइ वण्णियपसंगवक्खाणो। दाइयवक्खाणविही वोच्छमुवग्घायदारविहिं ॥१४८३॥

तदेवं '[3]तित्थयरे भगवंते' इत्यादिना कृतमङ्गलोपचारो वर्णितप्रसङ्गागतजिनप्रवचनोत्पत्त्यादिव्याख्यानः पूर्वोक्तकारणाद् दर्शितव्याख्यानविधिश्च, सांप्रतं उपोद्घननं व्याख्येयस्य सूत्रस्य व्याख्यानविधिसमीपीकरणमुपोद्घातः, तद्विषयो द्वारविधिस्तं वक्ष्ये ॥ इत्येकोनत्रिंशद्गाथार्थः ॥ १४८३ ॥

स चायं द्वारविधिः। कः? इत्याह—

[4]उद्देसे निद्देसे य निग्गमे खेत्त-काल-पुरिसे य। कारण-पच्चय-लक्खण-नए समोयरणा-णुमए ॥ १४८४ ॥

चारके-। १ भणिता योग्या अयोग्याः शिष्या गुरवश्च, तत्र द्वयोः। विचारितगुण-दोषो योग्यो योग्याय भाषेत ॥ १४८२ ॥ + संवित्या

२ कृतमङ्गलोपचारः संप्रति वर्णितप्रसङ्गव्याख्यानः। दर्शितव्याख्यानविधिर्वक्ष्ये उपोद्घातद्वारविधिम् ॥ १४८३ ॥ ३ गाथा १-२५।

४ उद्देशश्च निर्देशो निर्गमश्च क्षेत्र-काल-पुरुषाश्च। कारण-प्रत्यय-लक्षण-नयाः समवतारा-ऽनुमतौ ॥ १४८४ ॥

[1]किं कइविहं कस्स कहिं केसु कहं केच्चिरं हवइ कालं। कइ संतरमविरहियं भवा-गरिस-फोसणनिरुत्ती ॥१४८५॥

उद्देशनं वस्तुनः सामान्याभिधानमुद्देशः, यथा– 'अध्ययनम्' इति। वक्तव्य इति क्रिया सर्वत्र द्रष्टव्या। तथा, निर्देशनं वस्तुन एव विशेषाभिधानं निर्देशः, यथा 'सामायिकम्' इति। निर्गमनं निर्गमः 'कुतः सामायिकं निर्गतम्' इत्येवंरूपो वक्तव्यः। तथा, क्षेत्र-कालौ च ययोः सामायिकमुत्पन्नं, तौ वक्तव्यौ। यद् वक्ष्यत्यत्रैव–

'[2]वइसाहसुद्धएकारसीए पुव्वण्हदेसकालम्मि। महसेणवणुज्जाणे अणंतरं परंपरं सेसं ॥ १ ॥'

इति। तथा, कुतः पुरुषात् तद् निर्गतमिति वक्तव्यम्। तथा, 'केन कारणेन गौतमादयः सामायिकं भगवतः समीपे शृण्वन्ति' इत्येवंरूपं कारणं वाच्यम्; तथा च वक्ष्यति– '[3]गोयममाई य सामाइयं तु किंकारणं निसामंति' इत्यादि। तथा, प्रत्याययतीति प्रत्ययः स वक्तव्यः, केन प्रत्ययेन भगवता सामायिकमुपदिष्टम्, केन वा प्रत्ययेन गणधरास्तेनोपदिष्टं तत् शृण्वन्ति?, इत्येतद् वाच्यमित्यर्थः। तथाचाभिधास्यति—

'[4]केवलनाणि त्ति अहं अरिहा सामाइयं परिकहेइ। तेसिं पि पच्चओ खलु सव्वण्णू तो निसामंति ॥ १ ॥'

तथा, सम्यक्त्वसामायिकस्य च तत्त्वश्रद्धानं लक्षणं वक्तव्यम्, श्रुतसामायिकस्य जीवादिपरिज्ञानम्, चारित्रसामायिकस्य सावद्यविरतिः, देशविरतिसामायिकस्य तु विरत्य-ऽविरतिस्वरूपं मिश्रलक्षणम्। तथा च सति निर्देक्ष्यति– [5]सद्दहण-जाणणा खलु विरइ मीसं च लक्खणं कहए' इत्यादि। एवं नैगमादयो नया वाच्याः। तेषां च नयानां समवतरणं समवतारो यत्र संभवति तत्र दर्शनीयः। यतोऽभिधास्यति—

'[6]मूढनइयं सुयं कालियं तु न नया समोयरंति इहं। अपुहत्ते समोयारो नत्थि पुहत्ते समोयारो ॥ १ ॥'

इत्यादि। तथा, कस्य व्यवहारादिनयस्य किं सामायिकमनुमतमिति निर्देष्टव्यम्। तथाच निर्देक्ष्यति—

---

१ किं कतिविधं कस्य कुत्र केषु कथं कियच्चिरं भवति कालम्। कति सान्तरमविरहितं भवा-ऽऽकर्ष-स्पर्शननिरुक्तिः ॥ १४८५ ॥

२ वैशाखशुक्लैकादश्यां पूर्वाह्णदेशकाले। महासेनवनोद्यानेऽनन्तरं परंपरं शेषम् ॥ १ ॥

३ गौतमादयश्च सामायिकं तु किंकारणं निशाम्यन्ति?।

४ केवलज्ञानीत्यहमर्हन् सामायिकं परिकथयति। तेषामपि प्रत्ययः खलु सर्वज्ञ इति निशाम्यन्ति ॥ १ ॥

५ श्रद्धान-ज्ञानं खलु विरतिं मिश्रं च लक्षणं कथयति।

६ मूढनयिकं श्रुतं कालिकं तु न नयाः समवतरन्तीह। अपृथक्त्वे समवतारो नास्ति पृथक्त्वे समवतारः ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

'[1]तेण संजमो अणुमओ निग्गंथं पवयणं च ववहारो । सद्दो-ज्जुसुयाणं पुण निव्वाणं संजमो चेव ॥ १ ॥

इति 'किं सामायिकम् ?' इति प्रश्ने प्रत्युत्तरं दास्यति– 'जीवो गुणपडिवन्नो नयस्स दव्वट्ठियस्स सामइयं' इत्यादि । 'कतिविधं च तत् ?, इत्यत्र निर्वचनं वक्ष्यति– 'सामाइयं च तिविहं सम्मत्त सुयं तहा चरित्तं च' इत्यादि । 'कस्य सामायिकम् ? इत्यत्राभिधास्यति– 'जस्स सामाणिओ अप्पा' इत्यादि । 'क्व सामायिकम् ?' इत्येतदपि "खित्त दिसा-काल-गइ-भविय-सन्नि-ऊसास-दिट्ठि-माहारे' इत्यादिना द्वारकलापेन निरूपयिष्यति । 'केषु सामायिकम्' इत्यत्रोत्तरम्– सर्वद्रव्येषु, तथाहि—

'[2]सव्वगयं सम्मत्तं सुए चरित्ते न पज्जवा सव्वे । देसविरइं पडुच्चा दोण्हं वि पडिसेहणं कुज्जा ॥ १ ॥'

इति वक्ष्यति । 'कथं सामायिकमवाप्यते' इत्यत्र 'मणुस्सखेत्तजाई' इत्यादि प्रतिपादयिष्यति । 'कियच्चिरं कालं भवति' इति चिन्तायामभिधास्यति–

'[3]सम्मत्तस्स सुयस्स य छावट्ठी सागरोवमाइं ठिई । सेसाण पुव्वकोडी देसूणा होइ उक्कोसा ॥ १ ॥'

इति । 'कइ त्ति' कियन्तः सामायिकस्य युगपत् प्रतिपद्यमानकाः, पूर्वप्रतिपन्ना वा लभ्यन्ते ? इति वक्तव्यम् । तत्र च वक्ष्यति– 'सम्मत्त-देसविरया पलियस्स असंखभागमेत्ताओ' इत्यादि । सहान्तरेण वर्तत इति सान्तरम्, इति विचारणायां निर्णेष्यति—

'[4]कालमणंतं च सुए अद्धापरियट्टओ च देसूणो । आसायणबहुलाणं उक्कोसं अंतरं होइ ॥ १ ॥'

इति । 'अविरहितं निरन्तरायं कियन्तं कालं सामायिकस्य प्रतिपत्तारो लभ्यन्ते ?' इत्यत्र निर्वचनयिष्यति—

---

१ तपः संयमोऽनुमतो नैर्ग्रन्थं प्रवचनं च व्यवहारः । शब्द-ऋजुसूत्रयोः पुनर्निर्वाणं संयम एव ॥ १ ॥
२ जीवो गुणप्रतिपन्नो नयस्य द्रव्यास्तिकस्य सामायिकम् ।
३ सामायिकं च त्रिविधं सम्यक्त्वं श्रुतं तथा चारित्रं च ।
४ यस्य सामाऽऽनीत आत्मा । ५ क्षेत्र-दिक्-काल-गति-भविक-संज्ञि-उच्छ्वास-दृष्टि-आहारेषु ।
६ सर्वगतं सम्यक्त्वं श्रुते चारित्रे न पर्यवाः सर्वे । देशविरतिं प्रतीत्य द्वयोरपि प्रतिषेधनं कुर्याः ॥ १ ॥ ७ मानुष्यक्षेत्रजातयः ।
८ सम्यक्त्वस्य श्रुतस्य च द्वाषष्टिः सागरोपमाणि स्थितिः । शेषाणां पूर्वकोटिर्देशोना भवत्युत्कृष्टा ॥ १ ॥
९ सम्यक्त्व-देशविरताः पल्यस्यासंख्यभागमात्राः ।
१० कालमनन्तं च श्रुतेऽद्धापरिपतंकश्च देशोनः । आशातनाबहुलानामुत्कृष्टमन्तरं भवति ॥ १ ॥

'[1]सम्म-सुय-अगारिणं आवलियअसंखभागमेत्ताओ । अट्ठ समया चरित्ते सव्वेसु जहण्ण दो समये ॥ १ ॥'

इत्यादि । 'कियतो भवानुत्कृष्टतः सामायिकमवाप्यते ?' इत्यत्रोत्तरमभिधास्यति–

'[2]सम्मत्त-देसविरया पलियस्स असंखभागमेत्ताओ । अट्ठ भवा उ चरित्ते अणंतकालं च सुयसमए ॥ १ ॥'

इति । आकर्षणमाकर्ष एकस्मिन् नानाभवेषु वा पुनः सामायिकस्य ग्रहणं प्रतिपत्तिरिति वाच्यम् । तत्र च

'[3]तिण्हं सहस्सपुहत्तं सयपुहत्तं च होइ विरईए । एगभवे आगरिसा एवइया होंति नायव्वा ॥ १ ॥'

इत्यादि वक्ष्यति । 'फासण त्ति' कियत्क्षेत्रं 'सामायिकवन्तः स्पृशन्ति ?' इत्येतदभिधानीयम् । तत्र च वक्ष्यति–

'[4]सम्मत्त-चरणसहिया सव्वं लोयं फुसंति निरवसेसं । सत्त य चउदस भाए पंच य सुय-देसविरईए ॥ १ ॥'

इत्यादि । तथा, निश्चितोक्तिर्निरुक्तिः सामायिकस्य वक्तव्या । तथा चाभिधास्यति—

'[5]सम्मदिट्ठि अमोहो सोही सब्भावदंसणं बोही । अविवज्जओ सुदिट्ठि त्ति एवमाई निरुत्ताइं ॥ १ ॥'

इत्यादि । इत्युपोद्घातनिर्युक्तिद्वारगाथाद्वयसंक्षेपार्थः ॥ १४८४ ॥ १४८५ ॥

अथ विस्तरार्थमभिधित्सुर्भाष्यकार उद्देश-निर्देशविषयप्रक्षेपं चेतस्याशङ्क्य परिहारं तावदाह—

उद्देट्ठुं निद्दिसइ पायं सामन्नओ विसेसो त्ति । उद्देसो तो पढमं निद्देसोऽणंतरं तस्स ॥ १४८६ ॥

ननु कस्मात् 'प्रथममुद्देशस्ततो निर्देशः ? इत्याशङ्क्य परिहरति– 'उद्देट्ठुमित्यादि' सामान्येन हि पूर्वं वस्तूद्दिश्य ततः पश्चाद् विशेषतो निर्दिश्यते, इति शास्त्रे लोके च स्थितिः । तथा, ज्ञानमपि प्रायः प्रथमं वस्तुनः सामान्याकारग्राहकमुत्पद्यते, ततो

---

१ सम्यक्त्व-श्रुता-ऽगारिणामावलिकाऽसंख्यभागमात्राः । अष्ट समयाश्चारित्रे सर्वेषु जघन्यतो द्वौ समयौ ॥ १ ॥(भा.) २ ध. ज. 'गमित्ता' ।
३ सम्यक्त्व-देशविरतौ पल्यस्यासंख्यभागमात्रान् । अष्ट भवांस्तु चारित्रेऽनन्तकालं च श्रुतसामायिके ।
४ त्रयाणां सहस्रपृथक्त्वं शतपृथक्त्वं च भवति विरतेः । एकभवे आकर्षा एतावन्तो भवन्ति ज्ञातव्याः ॥ १ ॥
५ सम्यक्त्व-चरणसहिताः सर्वं लोकं स्पृशन्ति निरवशेषम् । सप्त च चतुर्दश भागान् पञ्च च श्रुत-देशविरतयोः ॥ १ ॥
६ सम्यग्दृष्टिरमोहः शुद्धिः सद्भावदर्शनं बोधिः । अविपर्ययः सुदृष्टिरित्येवमादीनि निरुक्तानि ॥ १ ॥ ७ ध. छ. 'हरंताव' ।
८ उद्दिश्य निर्दिश्यते प्रायः सामान्यतो विशेष इति । उद्देशस्ततः प्रथमं निर्देशोऽनन्तरं तस्य ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषाकारग्राहकम् । ततस्तस्मात् कारणाद् वस्तुनः सामान्याभिधानलक्षणः प्रथममुद्देशः, ततस्तस्यैव विशेषाभिधानरूपो निर्देशः ॥ इति गाथार्थः ॥ १४८६ ॥

तदेवं स्थापित आदावुद्देशः । अथ 'तत्त्व-भेद-पर्यायैर्व्याख्या' इति कृत्वा तमेव भेदकथनद्वारेण व्याख्यातुमाह—

[1]नामं ठवणा दविए खित्ते काले समासउद्देसे । उद्देसुद्देसम्मि य भावम्मि होइ अट्ठमओ ॥ १४८७ ॥

नामादिभेदादुद्देशोऽष्टविधः, तद्यथा- नामोद्देशः, स्थापनोद्देशः, द्रव्योद्देशः, क्षेत्रोद्देशः कालोद्देशः, समासोद्देशः, उद्देशोद्देशः, भावोद्देशो भवत्यष्टमकः ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥ १४८७ ॥

तत्र नामोद्देशं व्याख्यातुमाह भाष्यकारः—

[2]नामं जस्सुद्देसो नामेणुद्देस एव जो जेणं । उद्देस्सो नामस्स व नामुद्देसोऽभिहाणं ति ॥ १४८८ ॥

यस्य जीवादेर्वस्तुन 'उद्देशः' इति नाम क्रियते स नामोद्देशः, नामरूप उद्देशो नामोद्देशः, यथा गोपालदारकादेरुद्देश इति नाम । 'नामेणुद्देस एव जो जेणं ति' यो घट-पट-स्तम्भादिः पदार्थो येन घट-पट-स्तम्भादिनाम्नोद्दिश्यते प्रतिपाद्यते सोऽपि घट-पटादिपदार्थो नामोद्देश इति उच्यते, उद्दिश्यतेऽभिधीयते प्रतिपाद्यते निजेन नाम्नेति कृत्वा । 'उद्देसो नामस्स व नामुद्देसो त्ति' नाम्नो वा वस्तुसामान्याभिधानस्योद्देशनमुच्चारणं नामोद्देशः । किमुक्तं भवति ?, इत्याह- 'अभिहाणं ति' वस्तुनः सामान्यं यदभिधानं स नामोद्देश इत्यर्थः । यथा- आम्रादेर्वृक्षादि नाम । वाशब्दः सर्वत्र प्रकारान्तरसूचकः ॥ १४८८ ॥

अत्र परोऽतिप्रसङ्गमुद्भावयन्नाह—

[3]एवं ननु सव्वो च्चिय नामुद्देसो जओऽभिहाणं ति । दव्वाईणं तेहिं व तेसु व जं कीरए जस्स ॥१४८९॥

ननु यदि वस्तुनः सामान्याभिधानमात्रमुद्देशोऽभिधीयते, एवं तर्हि सर्व एवायं स्थापना-द्रव्य-क्षेत्र-कालाद्युद्देशो नामोद्देश एव प्राप्नोति; यतो द्रव्याणामपि हेम-रजतादीनां हेमादिकं सामान्याभिधानमस्ति, तैर्वा कुसुम्भ-हरिद्रादिद्रव्यैर्हेतुभूतैर्वस्त्रादीनां रक्तं पीत-

---

१ नाम स्थापना द्रव्ये क्षेत्रे काले समासोद्देशे । उद्देशोद्देशे च भावे च भवत्यष्टमकः ॥ १४८७ ॥

२ नाम यस्योद्देशो नाम्नोद्देश एव यो येन । उद्देशो नाम्नो वा नामोद्देशोऽभिधानमिति ।। १४८८ ॥

३ एवं ननु सर्व एव नामोद्देशो यतोऽभिधानमिति । द्रव्यादीनां तैर्वा तेषु वा यत् क्रियते यस्य ॥ १४८९ ॥

मित्यादि सामान्याभिधानं प्रवर्तते, तेषु वा दण्ड-कुण्डल-किरीटादिद्रव्येषु सत्सु दण्डी, कुण्डली, किरीटीत्यादिकं सामान्याभिधानं प्रवर्तमानं दृश्यते । एवं स्थापना-क्षेत्रादिष्वपि वाच्यम् । ततो य एव द्रव्याद्युद्देशोऽभिमतः स एव सर्वोऽपि नामोद्देशः प्राप्नोति, इत्युद्देशस्यैकविधत्वादष्टविधत्वं विशीर्यत इति ॥ १४८९ ॥

अत्र पराभिहितमभ्युपगम्य परिहारमाह—

[1]सच्चं सव्वाणुगओ नामुद्देसोऽभिहाणमेत्तं जं । नाणत्तं तहवि मयं मइ-किरिया-वत्थुभेएहिं ॥ १४९० ॥

सत्यमुक्तं भवता, यतो यत् सामान्यमभिधानमात्रं नामोद्देशः स खलु सर्वानुगत एव, तथापि नाम-स्थापना-द्रव्याद्युद्देशानां नानात्वं भेदरूपं मतं संमतमेव परमार्थवेदिनाम् । कैः ?, इत्याह- मति-क्रिया-वस्तुभेदैः; तथाहि- यादृशी नामेन्द्रे मतिः, न तादृश्येव स्थापनेन्द्रादिषूत्पद्यते, किन्तु विलक्षणैव; न च यां क्रियां नामेन्द्रः करोति तामेव स्थापना-द्रव्येन्द्रादयः, किन्तु विसदृशीमेव । अत एव नामेन्द्रादिवस्तूनां परस्परं वस्तुभेदो विज्ञेयः, भिन्नमत्यादिहेतुत्वात्, घट-पटादिवस्तुवदिति । एवं प्रस्तुतनाम-स्थापना-द्रव्याद्युद्देशानामपि मत्यादिभेदाद् भेदो योजनीय इति ॥ १४९० ॥

अथ स्थापनाद्युद्देशानाह—

[2]ठवणाए उद्देसो ठवणुद्देसो त्ति तस्स वा ठवणा । तं तेण तओ तम्मि व दव्वाईयाणमुद्देसो ॥ १४९१ ॥

दव्वुद्देसो दव्वं दव्वपई दव्ववं सदव्वो त्ति । एवं खेत्तं खेत्ती खेत्तपई खेत्तजायं ति ॥ १४९२ ॥

स्थापनाया उद्देशनमुच्चारणं सामान्येनाभिधानं स्थापनोद्देशः । तस्य वोद्देशस्य अक्षा-ऽक्षरादिषु स्थापना स्थापनोद्देशः । द्रव्योद्देशमाह- द्रव्यादीनामुद्देशो द्रव्योद्देशः, आदिशब्दाद् द्रव्यपति-द्रव्यवदादिपरिग्रहः । कथा पुनर्व्युत्पत्त्या द्रव्यादयो वाच्या भवन्ति ?, इत्याह- 'तमित्यादि' तदेव द्रव्यमुद्दिश्यते उच्चार्यते 'द्रव्यम्' इत्येवं सामान्येनाभिधीयत इति द्रव्योद्देशः । द्रव्यं च तदुद्देश्येति कर्मधारयसमासः । अत्र च पक्षे द्रव्यमेवोद्देशशब्दवाच्यम् । अत एव द्वितीयगाथायामाह- दव्वमिति । अथवा, तेन द्रव्येण

---

१ सत्यं सर्वानुगतो नामोद्देशोऽभिधानमात्रं यत् । नानात्वं तथापि मतं मति-क्रिया-वस्तुभेदैः ॥ १४९० ॥

२ स्थापनाया उद्देशः स्थापनोद्देश इति तस्य वा स्थापना । तत्तेन ततस्तस्मिन् वा द्रव्यादिकानामुद्देशः ॥ १४९१ ॥
द्रव्योद्देशो द्रव्यं द्रव्यपतिर्द्रव्यवान् सद्द्रव्य इति । एवं क्षेत्रं क्षेत्री क्षेत्रपतिः क्षेत्रजातमिति ॥ १४९२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हेतुभूतेन य उद्दिश्यतेऽभिधीयते स द्रव्योद्देशः, यथा द्रव्यपतिरित्यादि । यदिवा, ततस्तस्माद् द्रव्यादुद्देशोऽभिधानमवृत्तिर्द्रव्योद्देशः, यथा द्रव्यवानित्यादि । अथवा, तस्मिन् द्रव्ये सत्युद्देशोऽभिधानमवृत्तिर्द्रव्योद्देशः, यथा सद्द्रव्य इत्यादिः सिंहासने राजा, चूते कोकिलः, वने मयूर इत्यादि वा । एवमुद्दिश्यते तत्, उद्दिश्यते तेन वेत्यादिव्युत्पत्त्या क्षेत्रम्, क्षेत्री, क्षेत्रपतिः, क्षेत्रे जातं क्षेत्रजमित्यादिकः सर्वोऽपि क्षेत्रोद्देश इति ॥ १४९१ ॥ १४९२ ॥

कालो कालाईयं कालोवेयं ति कालजायं ति । संखेवो त्ति समासो अंगाईणं तओ तिण्हं ॥ १४९३ ॥
अंग-सुयक्खंध-ज्झयणाणं नियनियप्पभेयसंगहओ । होइ समासुद्देसो जहंगमंगी तज्झेया ॥ १४९४ ॥
एमेव य सुयक्खंधो तस्सज्झेया तयत्थविण्णाया । अज्झयणं अज्झयणी तस्सज्झेया तयत्थण्णो ॥१४९५॥

'कालो त्ति' काल एवोद्दिश्यमानत्वादुद्देशः कालोद्देशः । तेन वा कालेनोद्देशः कालोद्देशः, यथा कालातीतं कालातिक्रान्तमिदं वस्त्विति । ततो वा कालादुद्देशः कालोद्देशः, यथा कालोपेतं कालप्राप्तमिति । तस्मिन् वा काले जातं कालजातमित्यादिकः कालोद्देशः । अथ समासोद्देशं विवक्षुराह- 'संखेवो इत्यादि' संक्षेपेण विस्तरवतः संकोचनं समास उच्यते । तकोऽयं चेहाङ्गादीनां त्रयाणां विवक्षितः । एतदेव दर्शयति- 'अङ्गेत्यादि' अङ्गं, श्रुतस्कन्धः, अध्ययनम्, इत्येष समासो भवति । कुतः ?, इत्याह- निजनिजप्रभेदसंग्रहादिति । अस्याङ्गादिसमासस्योद्देशनमभिधानं समासोद्देशः । कः ?, इति दर्शयति- यथा 'अङ्गम्' इति, तदेवोद्दिश्यमानत्वादुद्देश इत्यर्थः । तेन वाऽङ्गरूपसमासेनोद्देशः समासोद्देशः, यथा- अङ्गीति, तस्याङ्गात्मकसमासादुद्देशः, यथा तदध्येता- अङ्गाध्येतेत्यर्थः । एवं श्रुतस्कन्धात्मकसमास एवोद्दिश्यमानत्वादुद्देशः, यथा श्रुतस्कन्ध इति । तेन वोद्देशः- यथा श्रुतस्कन्धीति । तस्माद् वोद्देशः, यथा तस्य श्रुतस्कन्धस्याध्येता । तस्मिन् वोद्देशः, यथा तदर्थविज्ञाता श्रुतस्कन्धार्थज्ञ इत्यादि । एवमध्ययनात्मकसमास एवोद्दिश्यत इत्युद्देशः, यथा- अध्ययनमिति । तेन वोद्देशः, यथा- 'अध्ययनी' इति । तस्माद् वोद्देशः, यथा- तस्याध्ययनस्याध्येता, तस्मिन् वाध्ययने सत्युद्देशः, यथा तदर्थज्ञोऽध्ययनार्थवित्, इत्यादि विवक्षया सर्वं भावनीयमिति ॥ १४९३ ॥ १४९४ ॥ १४९५ ॥

---

१ कालः कालातीतं कालोपेतमिति कालजातमिति । संक्षेप इति समासोऽङ्गादीनां तकस्रयाणाम् ॥ १४९३ ॥
अङ्ग-श्रुतस्कन्धाऽध्ययनानां निजनिजप्रभेदसंग्रहतः । भवति समासोद्देशो यथाङ्गमङ्गी तदध्येता ॥ १४९४ ॥
एवमेव च श्रुतस्कन्धस्तस्याध्येता तदर्थविज्ञाता । अध्ययनमध्ययनी तस्याध्येता तदर्थज्ञः ॥ १४९५ ॥

अथोद्देशोद्देशं भावोद्देशं चाह—

[1]उद्देसो उद्देसी उद्देसण्णो तयत्थवेत्ता वा । उद्देसुद्देसोऽयं भावो भावि त्ति भावम्मि ॥ १४९६ ॥

उद्देशः पुलाकोद्देशकादिः, स एवोद्दिश्यमानत्वादुद्देश उद्देशोद्देशः । स चायं विज्ञेयः । कः ? इत्याह- उद्देश इतिः पुलाकोद्देशकादिक उद्देशोऽप्युद्दिश्यमानत्वेनोद्देशोद्देश उच्यते । तेन वोद्देशेनोद्देशोऽभिधानं, यथा 'उद्देशी' इति । तस्माद् वोद्देशो यथा- उद्देशज्ञः । तस्मिन् वोद्देशो यथा तस्योद्देशकस्यार्थवेत्तेत्यादि । 'भावम्मि त्ति' भावविषय उद्देशो भावोद्देशः । कः ? इत्याह- 'भावो त्ति' औदयिकादिको भाव उद्दिश्यतेऽभिधीयत इत्युद्देशः, भावश्चासावुद्देशश्च भावोद्देश इत्यर्थः । तेन वा भावेनोद्देशो भावोद्देशो यथा 'भावी' इत्यादि पूर्वोक्तानुसारेण वाच्यम् ॥ इति गाथानवकार्थः ॥ १४९६ ॥

अथोद्देशव्याख्यानेन निर्देशमप्यतिदिशन्नाह—

[2]एमेव य निद्देसो अट्ठविहो सो वि होइ नायव्वो । अविसेसियमुद्देसो विसेसिओ होइ निद्देसो ॥१४९७॥

एवमेव यथोद्देश उक्तस्तथा निर्देशोऽप्यष्टविध एव भवति ज्ञातव्यः । सर्वथा सामान्यप्रतिषेधार्थमाह— किन्त्वविशेषितसामान्यनाम-स्थापनादिरूप उद्देशः, विशेषितनामादिरूपस्तु स एव निर्देशो भवतीति विशेषः ॥ इति निर्युक्तिगाथाक्षरार्थः ॥१४९७॥

भावार्थं तु भाष्यकारः प्राह—

[3]नामं जिणदत्ताई ठवणा य विसिट्ठवत्थुनिक्खेवो । दव्वे गोमं दंडी रहि त्ति तिविहो सचित्ताई ॥१४९८॥

वस्तुनः पुरुषादेर्यत् पुरुषादिकं सामान्यनाम स नामोद्देश उक्तः, यत्तु तस्यैव विशेषनाम स इह नामनिर्देश उच्यते, यथा जिनदत्तादि । सामान्यस्य चेन्द्रादेर्वस्तुनः स्थापना स्थापनोद्देश उक्तः, इह तु विशिष्टस्य सौधर्माधिपत्यादिवस्तुनो यः स्थापनारूपो निक्षेपः स स्थापनानिर्देशः । द्रव्यस्यापि त्रिविधस्य सचित्तादेर्विशिष्टस्य यो विशिष्टाभिधानरूपो निर्देशः स इह द्रव्यनिर्देशः । तत्र सचित्तद्रव्यविशेषस्य निर्देशो यथा गौरित्यादि, अचित्तस्य तु दण्ड इत्यादि, मिश्रस्य तु रथ इत्यादि । रथस्य चाश्वादियुक्तस्येह मिश्रता

---

१ उद्देश उद्देशी उद्देशज्ञस्तदर्थवेत्ता वा । उद्देशोद्देशोऽयं भावो भावीति भावे ॥ १४९६ ॥
२ एवमेव च निर्देशोऽष्टविधः सोऽपि भवति ज्ञातव्यः । अविशेषित उद्देशो विशेषितो भवति निर्देशः ॥ १४९७ ॥
३ नाम जिनदत्तादि स्थापना च विशिष्टवस्तुनिक्षेपः । द्रव्ये गोमान् दण्डी रथीति त्रिविधः सचित्तादिः ॥ १४९८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

भावनीयेति । तेन वा सचित्तादिद्रव्यविशेषेण निर्देशः, यथा गोमानित्यादि, दण्डीत्यादि, रथीत्यादि ॥ १४९८ ॥

अथ क्षेत्र-कालनिर्देशावाह—

खेत्ते भरहं तत्थ व भवो त्ति मगह त्ति मागहो व त्ति । सरउ त्ति सारउ त्ति य संवच्छरिउ त्ति कालम्मि ॥१४९९॥

क्षेत्रं क्षेत्रीत्यादिकः क्षेत्रोद्देश उक्तः, इह तु तदेव विशिष्टं क्षेत्रं क्षेत्रनिर्देशः, यथा 'भरतम्' इत्यादि । अथवा, 'मगह त्ति' मगधा जनपद इत्यादि । तस्मिन् वा क्षेत्रविशेषे भवः क्षेत्रनिर्देश उच्यते, यथा भारत इत्यादि । एतच्च स्वयमेव द्रष्टव्यम् । मगधासु भवो मागध इत्यादि । एतत्तु गाथायामप्यस्तीति । 'कालो कालाईयं' इत्यादिकः कालोद्देश उक्तः; इह तु तस्यैव कालस्य विशिष्टस्य विशिष्टमभिधानं स कालनिर्देशः, यथा शरदित्यादि । तत्र वा कालविशेषे भवः कालनिर्देशोऽभिधीयते, यथा शरदि भवः शारदः, संवत्सरे भवः सांवत्सरिक इत्यादि ॥ १४९९ ॥

अथ समासनिर्देशम्, उद्देशनिर्देशं चाह—

[3]आयारो आयारवमायारधरो त्ति वा समासम्मि । आवस्सयमावासइ सुत्तत्थधरोऽहवा यं ति ॥ १५०० ॥

सत्थपरिण्णाई य व अज्झेयाऽयं समासनिद्देसो । उद्देसयनिद्देसो सपएसो पोग्गलुद्देसो ॥ १५०१ ॥

विस्तरवतो वस्तुनः संक्षेपः समासः, तस्य सामान्याभिधानं समासोद्देश उक्तः । इह तु तस्यैव समासस्य विशेषाभिधानं समासनिर्देशः । तत्र चाङ्ग-श्रुतस्कन्धा-ऽध्ययनभेदात् त्रिविधः समासोद्देशः पूर्वमुक्तः । इह तु तेषामेव त्रयाणामङ्गादीनां विशेषाभिधानरूपस्त्रिविध एव समासनिर्देशः । तथा चाह— 'आयारो इत्यादि' आचाररूपेणाऽङ्गविशेषाभिधानेन निर्देश्यमानत्वादाचार इति समासनिर्देशः । तेन वाऽऽचारसमासेन निर्देशो यथा—आचारवानित्यादि । तस्माद्वाऽऽचारसमासाद् निर्देशो यथा—आचारधर इत्यादि । श्रुतस्कन्धसमासनिर्देशो यथा— आवश्यकमिति । तेन वाऽऽवश्यकसमासेन निर्देशो यथा— आवश्यकीति । अथवा, तस्मादावश्यकसमासाद् निर्देशो यथा— आवश्यकसूत्रा-ऽर्थधरोऽयमिति । अध्ययनमाश्रित्य समासनिर्देशः कः ? इत्याह— 'आचाराङ्गे प्रथममध्ययनं

१ क्षेत्रे भरतं तत्र वा भव इति मगधा इति मागधो वेति । शरदिति शारद इति च सांवत्सरिक इति काले ॥ १४९९ ॥ २ गाथा १४९३ ।

३ आचार आचारवानाचारधर इति वा समासे । आवश्यकमावश्यकी सूत्रा-ऽर्थधरोऽथवाऽऽमिति ॥ १५०० ॥
शस्त्रपरिज्ञादिश्च वाऽध्येताऽयं समासनिर्देशः । उद्देशकनिर्देशः सप्रदेशः पुद्गलोद्देशः ॥ १५०१ ॥

शस्त्रपरिज्ञा' इत्यादि । तेन वा शस्त्रपरिज्ञासमासविशेषेण निर्देशो यथा— 'अज्झेयाऽयं ति' शस्त्रपरिज्ञाध्येताऽयमित्यर्थः, इत्यादि समासनिर्देशः । उद्देशनिर्देशस्तु स उच्यते । कः ? इत्याह— 'पएसो त्ति' अध्ययनस्य प्रदेशोऽश इत्यर्थः, यथा भगवत्यां पुद्गलोद्देशकः, तस्य निर्देशोऽभिधानमुद्देशनिर्देश इत्यादीति ॥ १५०० ॥ १५०१ ॥

अथ भावनिर्देशं, यकाभ्यां चोद्देश-निर्देशाभ्यामिहाधिकारस्तदाह—

[1]ओदइओ खइउ त्ति व नाणं चरणं ति भावनिद्देसो । एत्थ विसेसाहिगओ समासउद्देस निद्देसो ॥१५०२॥

अज्झयणं उद्देसो तं चिय सामाइयं ति निद्देसो । बुद्धीए जहासंभवमाजोज्जं सेसएसुं पि ॥ १५०३ ॥

औदयिको भावः, क्षायिको भाव इत्यादि, अथवा, ज्ञानं दर्शनं चारित्रमित्यादिको ज्ञानादीनां क्षयिक-क्षायोपशमिकभाववृत्तित्वाद् भावनिर्देशः । इह च प्रत्येकमष्टविध उद्देशे निर्देशे च समासोद्देशः समासनिर्देशश्च विशेषेणाधिकृतः तथाहि— प्रस्तुते 'अध्ययनम्' इत्येष समासोद्देशः, 'सामायिकम्' इति च विशेषाभिधानरूपत्वात् समासनिर्देशः । एवं स्वबुद्ध्या यथासंभवं शेषेष्वपि श्रुतस्कन्ध-चतुर्विंशतिस्तवाध्ययनेष्वायोज्यम्, यथा श्रुतस्कन्ध इति समासोद्देशः, आवश्यकमिति समासनिर्देश इत्यादि ॥ १५०२ ॥ १५५३ ॥

उत्तरगाथासंबन्धनार्थमाह—

[2]सामाइयं ति नपुंसयमस्स पुमं थी नपुंसगं वावि । निद्दिट्ठा तत्थिच्छइ कं निद्देसं नओ को णु ? ॥१५०४॥

इह सामायिकमिति नपुंसकतया रूढम् । अस्य च त्रिविधो निर्देष्टा— उच्चारयिता, स्त्री-पुं-नपुंसकभेदात् । तत्रेदं नयैर्विचार्यते— 'को नयः कं निर्देशमिच्छति ?— किं निर्देश्यवशात्, निर्देशकवशाद् वा ?' इति विनेयः पृच्छति ॥ इति गाथासप्तकार्थः ॥१५०४॥

अस्मिंश्च प्रश्ने सत्याह—

[3]दुविहं पि नेगमनओ निद्दिट्ठं संगहो य ववहारो । निद्देसयमुज्जुसुओ भयसरिच्छं च सद्दस्स ॥ १५०५ ॥

१ औदयिकः क्षयिक इति वा ज्ञानं चरणमिति भावनिर्देशः । अत्र विशेषाधिकृतौ समासोद्देश-निर्देशौ ॥ १५०२ ॥
अध्ययनमुद्देशस्तदेव सामायिकमिति निर्देशः । बुद्ध्या यथासंभवमायोज्यं शेषकेष्वपि ॥ १५०३ ॥

२ सामायिकमिति नपुंसकमस्य पुमान् स्त्री नपुंसकं वापि । निर्देष्टा तत्रेच्छति कं निर्देशं नयः को नु ? ॥ १५०४ ॥

३ द्विविधमपि नैगमनयो निर्दिष्टं संग्रहश्च व्यवहारः । निर्देशकमृजुसूत्रोभयसदृशं च शब्दस्य ॥ १५०५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

नैके गमा वस्तुधर्मपरिच्छेदा यस्यासौ ककारवर्णनाशाद् नैगमः, अनेकमकारवस्त्वभ्युपगमपर इत्यर्थः, नैगमश्चासौ नयश्च नैगमनयः । स द्विविधमपि 'निर्देश्यवशाद् निर्देशकवशाच्च निर्देशमिच्छति' इति शेषः, लोकव्यवहारपरत्वात्, अनेकगमरूपत्वाच्चास्य नयस्य । लोके च निर्देश्यवशात्, निर्देशकवशाच्च निर्देशप्रवृत्तिर्दृश्यते । तत्र निर्देश्यवशाद् यथा– 'वासवदत्ता, तरङ्गवती, मियदर्शनाकथा' इत्यादि । निर्देष्टृवशात्तु मनुना प्रणीतो ग्रन्थो मनुः, अक्षपादेनोक्तोऽक्षपाद इत्यादि। लोकोत्तरे तु निर्देश्यवशात्, षड्जीवनिकायप्रतिपादकमध्ययनं षड्जीवनिका, साध्वाचारप्रतिपादको ग्रन्थ आचार इत्यादि । तथा, निर्देशकवशाद् निर्देशो यथा– कपिलेन प्रणीतं कापिलीयमध्ययनम्, हरिकेशिना प्रणीतं हरिकेशीयम्, केशि-गौतमाभ्यामभिहितं केशि-गौतमीयम्, नन्दिसंहिता, जिनप्रवचनमित्यादि । एवं सावद्यविरमणरूपं सामायिकं रूढितो नपुंसकमिति कृत्वा निर्देश्यवशाद् नैगमो नपुंसकनिर्देशमेवाऽस्य मन्यते, यथा– सामायिकं नपुंसकमिति । तथा, सामायिकं निर्देष्टुः स्त्री-पुं-नपुंसकलिङ्गत्वात् तद्वशात् सामायिकस्य त्रिलिङ्गताऽप्येतन्मतेन भवति, यथा सामायिकं स्त्री, सामायिकं पुरुषः, सामायिकं नपुंसकमिति; यथा वा देवदत्तादिना घटादिशब्दे समुच्चारिते स घटादिशब्द उच्चारयितृदेवदत्तादिपरिणामत्वाद् देवदत्तादिशब्दत्वेन व्यपदिश्यते; तथा, तदभिधेयपृथुबुध्नोदराद्याकारघटादिपदार्थपरिणामत्वाद् घटादिशब्दत्वेनापि लोके निर्दिश्यते । एवं स्वाभिधेयसावद्यविरमणपर्यायत्वात् सामायिकस्य नैगमो नपुंसकनिर्देशं मन्यते, अभिधायकस्त्री-पुरुषादिपरिणामत्वात्तु लिङ्गत्रयनिर्देशमप्यस्याभ्युपगच्छति, यथा 'सामायिकं स्त्री' इत्यादि (कि नन्दि)

आह– 'दुविहं पि नेगमनओ' एतावन्मात्रोक्तौ 'निर्देश्यवशाद् निर्देशकवशाच्च द्विविधं निर्देशमिच्छति' इति कुतो लभ्यते ? इति । अत्रोच्यते– 'निद्दिट्ठं संग्रहो य ववहारो' इति वचनात् । अत्र हृयमर्थः– निर्दिष्टमभिधेयं वस्त्वङ्गीकृत्य संग्रह-व्यवहारौ निर्देशमिच्छतः, निर्देश्यपर्यायत्वाद् वचनस्य, इत्यादियुक्तिश्च भाष्ये वक्ष्यते । तदिदं 'निर्दिष्टं वस्त्वाश्रित्य' इति वचनात् प्रागपि 'दुविहं पि' इत्यत्र निर्दिष्टनिर्देशकवशाद् निर्देश इति गम्यते । 'निद्देसयमुज्जुसुउ त्ति' निर्दिशतीति निर्देशको वक्ता तमङ्गीकृत्य ऋजुसूत्रो निर्देशमिच्छति, । यथा 'सामायिकं स्त्री' इत्यादिः वक्तृपर्यायत्वाद् वचनस्येत्यादि युक्तिरत्रापि भाष्येऽभिधास्यते । 'उभयसरिच्छं च सद्दस्स त्ति' उभयमिह निर्देश्यं निर्देशकं च वस्तु तस्योभयस्य सदृशं समानलिङ्गमेवाश्रित्य शब्दनयस्य 'निर्देशप्रवृत्तिः' इति गम्यते । यदि हि निर्देश्यं नपुंसकं तदा निर्देष्टाऽपि स्त्री-पुं-नपुंसकलक्षणो नपुंसकमेव, वक्तुर्वाच्योपयोगानन्यत्वेन तद्रूपत्वात् । उपयोगप्रधाना हि शब्दनयाः, ततो यो यत्रोपयुक्तः स तद्रूप एव, यथाऽग्न्युपयुक्तोऽग्निः, तथा च सति स्त्री-पुरुषावपि यदा रूढितो नपुंसके सामायिके उपयुक्तौ भवतः, तदा निर्देश्यनपुंसकोपयुक्तत्वाद् नपुंसकमेव, तदुपयोगानन्यत्वेन तद्रूपत्वादिति । स्त्री पुरुषौ वा नपुंसकं ब्रूत इत्यस्य त्वर्थस्य शब्दनयमतेनाऽसंभव एव ॥ इति निर्युक्तिगाथासंक्षेपार्थः ॥ १५०५ ॥

अथ विस्तरार्थमभिधित्सुर्भाष्यकारः प्राह—

[1]जं संववहारपरो णेगगमो णेगमो तओ दुविहं । इच्छइ, संववहारो दुविहो जं दीसए पायं ॥ १५०६ ॥

यद् यस्माल्लोकव्यवहारपरोऽनेकगमश्च नैगमनयः, ततस्तस्माद् निर्देश्यवशाद् निर्देशकवशाच्च द्विविधमपि निर्देशमिच्छति । लोकव्यवहारश्च प्रायो द्विधा दृश्यते ॥ १५०६ ॥

कथम् ? इत्याह—

[2]छज्जीवणियाऽऽयारो निद्दिट्ठवसेण तह सुयं चण्णं । तं चेव य जिणवयणं सव्वं निद्देसयवसेणं ॥१५०७॥

जह वा निद्दिट्ठवसा वासवदत्ता-तरंगवइयाइं । तह निद्देसगवसओ लोए मणुरक्खवाउ त्ति ॥१५०८॥

लोको द्विधा– अर्हद्दर्शनानुगतो लोकोत्तररूपः, तद्व्यतिरिक्तश्च । तत्र लोकोत्तरे निर्दिष्टार्थवशाद् निर्देशो यथा– षड्जीवनिका नामाध्ययनम्, आचारः, आवश्यकमित्यादि । 'तह सुयं चण्णं तं चेव येत्यादि' तथा, अत्रैव लोकोत्तरे तदन्यच्च श्रुतं निर्देशकवशात् सर्वमपि जिनप्रवचनमुच्यते । तथा, अन्यत् किमपि श्रुतं निर्देशकवशादेवोच्यते, यथा भद्रबाहुनिमित्तम्, नन्दसंहिता, कापिलीयमित्यादि । यथा वा, इतरलोके निर्दिष्टवशाद् वासवदत्ता, तरङ्गवतीत्यादि निर्देशः, निर्देशकवशात्तु मनुः, अक्षपाद इत्यादि ॥ १५०७ ॥ १५०८ ॥

तथा किम् ? इत्याशङ्क्य प्रकृते योजयन्नाह—

[3]तह निद्दिट्ठवसाओ नपुंसगं नेगमस्स सामइयं । थी पुं नपुंसगं वा तं चिय निद्देसयवसाओ ॥१५०९॥

यथा षड्जीवनिका, आचार इत्यादौ निर्दिष्टार्थवशाद् निर्देशः, तथात्रापि सावद्यविरमणलक्षणनिर्दिष्टनपुंसकार्थवशाद्

---

१ यत् संव्यवहारपरो नैकगमो नैगमस्ततो द्विविधम् । इच्छति, संव्यवहारो द्विविधो यद् दृश्यते प्रायः ॥ १५०६ ॥ २ क. ग. ज. 'धापि दृ' ।

३ षड्जीवनिकाऽऽचारो निर्दिष्टवशेन तथा श्रुतं चान्यत् । तदेव च जिनवचनं सर्वं निर्देशकवशेन ॥ १५०७ ॥
यथा वा निर्दिष्टवशाद् वासवदत्ता-तरङ्गवत्यादि । तथा निर्देशकवशतो लोके मनुरक्षपाद इति ॥ १५०८ ॥

४ तथा निर्दिष्टवशाद् नपुंसकं नैगमस्य सामायिकम् । स्त्री पुमान् नपुंसकं वा तदेव निर्देशकवशात् ॥ १५०९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'सामायिकं' इति नपुंसकनिर्देशः, यथा वा मनुः, अक्षपाद इत्यादौ निर्देशकवशाद् निर्देशः, तथाऽत्रापि योषित्-पुरुष-नपुंसकलक्षण-त्रिविधनिर्देशकवशात् तदेव सामायिकं स्त्री-पुं-नपुंसकं भवति- स्त्र्यादित्रिविधनिर्देशकवशाद् नन्दसंहिता-मनु-कापिलीयादिवत् त्रिष्वपि लिङ्गेषु सामायिकस्य निर्देशप्रवृत्तिः, यथा 'सामायिकं स्त्री' इत्यादि ॥ १५०९ ॥

अथ प्रकारान्तरेणापि लोकव्यवहारोपदर्शनेन प्रकृतं समर्थयन्नाह—

अहव व घडाभिहाणं घडसद्दो देवदत्तसद्दो त्ति । उभयमविरुद्धमेवं सामइयं नेगमनयस्स ॥ १५१० ॥

इयं च गाथा, 'यथा वा देवदत्तादिना घटादिशब्दे समुच्चारिते' इत्यादिना व्याख्यातैवेति ॥ १५१० ॥

'निद्दिट्ठं संगहो य ववहारो' इत्येतद् व्याख्यातुमाह—

अत्थाउ व्विय वयणं लहइ सरूवं जओ पईवो व्व । तो संगह-ववहारा भणंति निद्दिट्ठवसगं तं ॥ १५११ ॥

यतो यस्मादर्थादेव वाच्याद् घटादेः सकाशाद् वाचकं वचनं स्वरूपमात्मलाभं लभते, नान्यथा, यथा प्रदीपः; प्रदीपो हि प्रकाश्यमेवार्थं प्रकाशयन् प्रदीपो भण्यते, यदि तु प्रकाश्यं वस्तु न स्यात्, तदा किमपेक्षोऽसौ प्रदीपः स्यात् ?। तस्माद् यथा प्रकाश्यादेवार्थात् प्रदीप आत्मलाभं लभते, तथा वाच्यादेवार्थाद् वचनमात्मस्वरूपमाप्नोति । ततस्तस्मात् संग्रह-व्यवहारनयौ 'निर्दिश्यते' इति निर्दिष्टं वाच्यं वस्तु तद्वशगं तदधीनमेव तद् वचनं भणतो ब्रूतः । वाच्यं चेह सामायिकशब्दस्य सावद्यविरतिरूपस्तदभिधेयोऽर्थः । स च रूढितो नपुंसकतया प्रसिद्ध इति । अतः सामायिकस्य नपुंसकलिङ्गतामेव संग्रह-व्यवहारावभ्युपगच्छतः । अथवा, सामायिकवतां सत्त्वानां स्त्री-पुं-नपुंसकत्वात् तत्परिणामानन्यत्वेन च सामायिकार्थस्य स्त्र्यादिरूपत्वाद् वाच्यवशेन त्रिलिङ्गतापि सामायिकस्य संग्रह-व्यवहारनयमतेन द्रष्टव्येति ॥ १५११ ॥

प्रकारान्तरेणापि निर्दिष्टवशाद् निर्देशं समर्थयन्नाह—

अहव निद्दिट्ठत्थस्स पज्जओ चेव तं सधम्म व्व । तप्पच्चयकारणओ घडस्स रूवाइधम्म व्व ॥१५१२॥

---

१ यथा वा घटाभिधानं घटशब्दो देवदत्तशब्द इति । उभयमविरुद्धमेवं सामायिकं नैगमनयस्य ॥ १५१० ॥ २ गाथा १५०५ ॥

३ अर्थादेव वचनं लभते स्वरूपं यतः प्रदीप इव । ततः संग्रह-व्यवहारौ भणतो निर्दिष्टवशगं तत् ॥ १५११ ॥

४ अथवा निर्दिष्टार्थस्य पर्याय एव तद् स्वधर्म इव । तत्प्रत्ययकारणतो घटस्य रूपादिधर्म इव ॥ १५१२ ॥

अथवा, तद् वचनं निर्दिष्टार्थस्य वाच्यवस्तुनः पर्याय एव, तत्प्रत्ययकारणत्वात्- वाच्यार्थप्रतीतिहेतुत्वात्, यथा तस्यैव निर्देशस्य घटादेरन्ये संस्थानादयो धर्माः । इह यद् यस्य प्रत्ययकारणं तत् तस्य स्वपर्यायः, यथा घटस्य रूपादयः, वचनं च वाच्यार्थस्य प्रत्ययकारणम्, अतस्तत्पर्यायः, पर्यायश्च पर्यायिणोऽधीन एव, इति युक्तो निर्देश्यवशाद् निर्देश इति ॥ १५१२ ॥

स्यादेतत्, असिद्धोऽयं हेतुः- 'एतत्प्रत्ययकारणत्वाद् वचनस्य' इति, एतन्निराकरणार्थमाह—

वयणं विण्णाणफलं जइ तं भणिए वि नत्थि किं तेणं ?। अण्णत्थ पच्चए वा सव्वत्थ वि पच्चओ पत्तो ॥१५१३॥

अभिधेयसंकरो वा वत्तरि पच्चओऽणभिहिए वि । तम्हा निद्दिट्ठवसा नपुंसगं बेंति सामइयं ॥१५१४॥

अर्थविज्ञानफलं हि वचनं, यदि भणितेऽप्युदीरितेऽपि वचने 'तं ति' तदर्थविज्ञानं नास्ति न भवति, तर्हि कण्ठौष्ठशोषमात्रविधायिना किं तेनोक्तेन, निष्फलत्वात् ?। स्यादेतत्, वाच्यादर्थादन्यत्र वक्तृलक्षणेऽर्थे विज्ञानं जनयिष्यति वचनम्; ततश्च विज्ञानफलं च तद् भविष्यति, वाच्येऽर्थे विज्ञानं च न जनयिष्यति, तथा च सति वाच्यार्थपर्यायो वचनं न भविष्यति, इत्याशङ्क्याह- 'सव्वत्थेत्यादि' यदि हि वाच्यमर्थं विहाय वक्तृलक्षणेऽर्थान्तरे प्रत्ययं वचनं जनयेत्, तर्ह्यविशेषेणैव सर्वत्रार्थे प्रत्ययः प्राप्तः, न वा क्वचिदप्यर्थेऽसौ भवेत्, अविशेषादिति- अतत्पर्यायत्वेऽपि तत्प्रत्ययहेतुत्वे सर्वत्रासौ भवेत्, न वा क्वचिद् भवेदिति भावः ।

स्यादेतत्, वचनाद् वक्तरि प्रत्ययो भवत्येव, यथाऽनेनेदमभिहितमिति, तत् किमुच्यते- 'जइ तं भणिए वि नत्थि किं तेणं' इति ? इत्याशङ्क्याह- 'अभिधेयसंकरो वेत्यादि' । अथवा, वाच्यादर्थादन्यत्र प्रत्ययेऽभ्युपगम्यमाने सर्वत्रापि प्रत्ययो न भवेदित्येको दोष उक्तः । अथ दोषान्तरमभिधित्सुराह- 'अभिधेयसंकरो वेत्यादि' यदि हि वक्तर्यनभिहितेऽपि वचनात् तत्र प्रत्ययोऽभ्युपगम्यते, हन्त ! तर्हि वक्तृवदनभिहितानि खरो-ष्ट्र-ढेङ्क-बकादीनि बहूनि वस्तूनि सन्ति, ततो वक्तृवत् तेषामपि श्रोतुः प्रत्यये सत्यभिधेयानां सर्वेषां, अभिधेयेन वा घटादिना सह वक्त्रादीनामन्येषां संकरः, एकस्यां श्रोतृप्रतीतौ सांकर्यं युगपत् तदाकारसंक्रमणं प्राप्नोति, न चैतदस्ति, एकस्माद् वचनादेकस्यैव प्रतिनियतस्य घटाद्याकारस्य संवेदनादिति। तस्मादभिधेयपर्याय एव वचनम्, तत्प्रत्ययकारणत्वात् ! अतो निर्दिष्टमिह सामायिकशब्दस्यार्थरूपं सामायिकं रूढितो नपुंसकम्, तद्वशात् सामायिकशब्दः संग्रह-व्यवहारयोर्नपुंसकलिङ्गवृत्तिः अथवा, सामायिकवतः स्त्री-पुं-नपुंसकत्वात्, तत्परिणामानन्यत्वाच्च सामायिकार्थस्य त्रिलिङ्गतामपि संग्रह-व्यवहारावभ्युपगच्छतः ।

---

१ वचनं विज्ञानफलं यदि तद् भणितेऽपि नास्ति किं तेन ? । अन्यत्र प्रत्यये वा सर्वत्रापि प्रत्ययः प्राप्तः ॥१५१३ ॥
अभिधेयसंकरो वा वक्तरि प्रत्ययोऽनभिहितेऽपि । तस्माद् निर्दिष्टवशाद् नपुंसकं ब्रुवन्ति सामायिकम् ॥ ४५१४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततो निर्दिष्टस्य सामायिकार्थस्य त्रिलिङ्गत्वाद् निर्देश्यवशादपि संग्रह-व्यवहारमतेन सामायिकस्य त्रिलिङ्गतापि भवति, यथा 'सामायिकं स्त्री' इत्यादि, एतच्च स्वयमेव द्रष्टव्यम् ॥ १५१३ ॥ १५१४ ॥

''निद्देसयमुज्जुसुओ' इति व्याचिख्यासुराह—

[1]उज्जुसुओ निद्देसगवसेण सामाइयं विणिद्दिसइ । वयणं वत्तुरहीणं तप्पज्जाओ य तं जम्हा ॥१५१५॥

ऋजुसूत्रनयो निर्देशकवशेनाभिधातृपारतन्त्र्येण सामायिकं निर्दिशति, यदेव निर्देशकस्य लिङ्गं तदेव सामायिकस्यासौ मन्यते, यथा- 'सामायिकं स्त्री' इत्यादि, वचनस्य वक्त्रधीनत्वात्, तत्पर्यायत्वाच्च, विज्ञानवदिति ॥ १५१५ ॥

अथ वचनस्य वक्त्रधीनत्वे युक्तिमाह—

[2]करणत्तणओ मण इव सपज्जयाओ घडाइरूवमिव । साहीणत्तणओ विय सधणं व वओ वयंतस्स ॥१५१६॥

'वदत एव संबन्धि वचः' इति पर्यन्ते प्रतिज्ञा । अत्र सदृष्टान्तान् हेतूनाह- करणत्वात्, मनोवत्; तथा, स्वपर्यायत्वात्, घटादे रूपादिवत्; तथा, स्वाधीनत्वात्, स्वधनवदिति ॥ १५१६ ॥

युक्त्यन्तरमाह—

[3]तेह सुत्त-दुरुत्ताओ तस्सेवाणुग्गहो-वघायाओ । तस्स तयमिंदियं पिव इहरा अकयागमो होज्जा ॥ १५१७ ॥

'तस्यैव वक्तुस्तद् वचः' इति पक्षः, वचनस्य सूक्तत्व-दुरुक्तत्वाभ्यां वक्तुरेवानुग्रहो-पघातदर्शनात्, इह यस्य यन्निमित्तावनुग्रहोपघातौ तस्य तदात्मीयम्, यथा देवदत्तादेरिन्द्रियम्, दृश्येते च वचनसूक्तत्व-दुरुक्तत्वाभ्यां वक्तुरनुग्रहो-पघातौ, तस्मात् तत् तस्यात्मीयम् । विपर्यये बाधकमाह- इतरथा अन्यथा वचनस्य वक्तुरसंबन्धित्वे तस्यानुग्रहो-पघातयोरकृताभ्यागम एव स्यादिति ॥ १५१७ ॥

अत्र परः प्राह—

---

१ गाथा १५०५। २ ऋजुसूत्रो निर्देशकवशेन सामायिकं विनिर्दिशति । वचनं वक्तुरधीनं तत्पर्यायश्च तद् यस्मात् ॥ १५१५ ॥

३ करणत्वतो मन इव स्वपर्यायाद् घटादिरूपमिव । स्वाधीनत्वतोऽपिच स्वधनमिव वचो वदतः ॥ १५१६ ॥

४ तथा सूक्त-दुरुक्ताभ्यां तस्यैवानुग्रहो-पघाताभ्याम् । तस्य तदिन्द्रियमितरथाऽकृतागमो भवेत् ॥ १५१७ ॥

[1]निद्देसस्स वि कस्सचि नणूवघायाइओ तयं जुत्तं । ते तस्स सकारणाओ इहरा थाणुस्स वि हवेज्जा ॥१५१८॥

ननु न केवलं निर्देशकस्य, किन्तु निर्दिष्टस्याप्यभिधेयस्यापि कस्यचित् तस्करादेर्वचनादुपघातादयो दृश्यन्ते, यथा- 'बध्यतां, हन्यतां चायं तस्करः, मुच्यतां चायम्' इत्याद्युक्ते तस्य विषादाद्युत्पत्तेरुपघातादयोऽध्यक्षत एवोपलभ्यन्ते । अतस्तद्दर्शनाद् निर्दिष्टस्यापि संबन्धि तद् वचनं वक्तुं युज्यते । अत्रोत्तरमाह- 'ते इत्यादि' य इष्टा-ऽनिष्टवचनश्रवणात् तस्करादेर्निर्दिष्टस्यानुग्रहादयो दृश्यन्ते ते तस्य स्वकीयश्रवणेन्द्रिय-मनःपुण्य-पापादिकात् कारणादेव मन्तव्याः, न त्विष्टा-ऽनिष्टवचनोक्तिमात्रात्, अन्यथा श्रोत्रादिकरणविकलानां स्थाण्वादीनामपि तदुक्तिमात्रात् ते भवेयुरिति ॥ १५१८ ॥

वक्तृधर्मत्वमेव वचनस्य हेत्वन्तरोक्तेः समर्थयन्नाह—

[2]सरनामोदयजणियं वयणं देहो व्व वत्तुपज्जाओ । तं नाभिधेयधम्मो जुत्तमभावाभिहाणाओ ॥१५१९॥

'वक्तृपर्यायो वचनम्' इति प्रतिज्ञा, स्वररूपनामकर्मोदयजन्यत्वात्, इह यद् नामकर्मोदयजन्यं तत् तस्यैव वक्तुर्देवदत्तादेः पर्यायः, यथा तस्यैव देहः, नामकर्मोदयजन्यं च वचनम्, तस्मात् तस्यैव वक्तुः पर्यायः । तत् तस्माद् न वचनमभिधेयधर्मो युक्तम्, किन्त्वभिधातुरेव । उपचयमाह- अभावस्यापि वचनेनाभिधानात् । इदमुक्तं भवति- अभावोऽपि हि वचनेनाभिधीयते, न च वचनं तद्धर्म इति वक्तुं शक्यते, अभावस्यासत्त्वात्, यदि च वचनं तद्धर्मः स्यात्, तदा सोऽपि भावः स्यात्, वचनाश्रयत्वात्, देवदत्तादिवदिति ॥ १५१९ ॥

यस्यापि च घटादिशब्दाभिधेयस्य घटादेर्भावस्य वचनं तत्प्रत्ययकारणत्वाद् धर्मत्वेनाभ्युपगम्यते, तत्रापि पृच्छ्यते । किम् ? इत्याह—

[3]भावम्मि वि संबद्धं तमसंबद्धं व तं पगासेज्जा । जइ संबद्धं तिहुयणवावि त्ति तयं पगासेउ ॥ १५२० ॥

भावेऽपि घटादिके वचनाभिधेये पृच्छामो भवन्तं- तद् वचनं तत्र भावे किं संबद्धं सत् तं भावं प्रकाशयति, आहोस्विदसंबद्धम् ?

---

१ निर्दिष्टस्यापि कस्यचिद् ननूपघातादितस्तद् युक्तम् । ते तस्य स्वकारणादितरथा स्थाणोरपि भवेयुः ॥ १५१८॥

२ स्वरनामोदयजनितं वचनं देह इव वक्तृपर्यायः । तद् नाभिधेयधर्मो युक्तमभावाभिधानात् ॥ १५१९ ॥

३ भावेऽपि संबद्धं तदसंबद्धं वा तं प्रकाशयेत् । यदि संबद्धं त्रिभुवनव्यापीति तत् प्रकाशयतु ॥ १५२० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति । यदि संबद्धं, तर्हि 'चेउहिं समएहि लोगो भासाए निरन्तरं तु होइ फुडो' इत्यादिवचनात् त्रिभुवनव्यापित्वात् तद्वर्तं समस्तमपि पदार्थजातं प्रकाशयतु, संबद्धत्वाविशेषादिति ॥ १५२० ॥

अथासंबद्धं प्रकाशयति, तत्राह—

[2]निव्विण्णाणत्तणओ नासंबद्धं तयं पईवो व्व । भासयइ असंबद्धं अह तो सव्वं पगासेउ ॥ १५२१ ॥

नासंबद्धं तत् पदार्थान् प्रभासयति । कुतः ? इत्याह– निर्विज्ञानत्वात्– विज्ञानादन्यत्वे सत्यसंबद्धत्वादिति भावः, अयं च हेतुः । प्रदीपवदिति दृष्टान्तः । विज्ञानमसंबद्धमपि वस्तु प्रकाशयति, न च वचनं विज्ञानरूपम्, अतो नासंबद्धमर्थं प्रकाशयति, प्रदीपवत् । अथासंबद्धमपि तद् वस्तु प्रकाशयति, तर्हि सर्वमपि प्रकाशयतु, असंबद्धत्वाविशेषात् । तस्माद् वाच्यमत्ययकारणत्वेन तद्धर्मो वचनमिति ॥ १५२१ ॥

आह– ननूक्तम्– वचनमर्थादात्मलाभं लभते, प्रदीपवत्, अतः कथमिदं वक्तुरेवेष्यते ? इत्याह—

[3]जइ वि वयणिज्ज वत्ता बज्झ-ब्भंतरनिमित्तसामण्णं । वत्ता तहवि पहाणो निमित्तमब्भंतरं जं सो ॥१५२२॥

इह यद्यपि वचनीयं वक्ता च यथासंख्यं बाह्यमभ्यन्तरं च वचनस्य सामान्यं निमित्तं कारणम्, तथापि वक्ता प्रधानः । कुतः ? इत्याह– यद् यस्मादन्तरङ्गं प्रत्यासन्नं निमित्तमसौ । तस्माद् वचनस्य वक्त्रधीनत्वाद् यदेव वक्तुर्लिङ्गं तदेव सामायिकस्य ऋजुसूत्रनयमतेन लिङ्गमिति स्थितम् ॥ १५२२ ॥

'[4]उभयसरिच्छं च सद्दस्स' इत्येतद् व्याचिख्यासुराह—

[5]सद्दो समाणलिंगं निद्देसं भणइ विसरिसमवत्थुं । उवउत्तो निद्दिट्ठा निद्दिस्साओ जओऽणण्णो॥१५२३॥

शब्दप्रधानो नयः शब्दो निर्देशं वचनमिच्छति । किंविशिष्टम् ? इत्याह– समानलिङ्गं निर्देश्य-निर्देशकयोस्तुल्यमेव लिङ्गमसाविच्छतीत्यर्थः । विसदृशं त्वसमानलिङ्गं निर्देशमघटमानकत्वादवस्तुत्वेनैव मन्यते । कुतः ? इत्याह– उपयुक्तो निर्देश्येऽर्थेऽर्पितान्तः-

---

१ गाथा ३७५ । २ निर्विज्ञानत्वतो नासंबद्धं तत् प्रदीप इव । भासयत्यसंबद्धमथ ततः सर्वं प्रकाशयतु ॥ १५२१ ॥

३ यद्यपि वचनीयं वक्ता बाह्याऽभ्यन्तरनिमित्तसामान्यम् । वक्ता तथापि प्रधानो निमित्तमभ्यन्तरं यत् सः ॥ १५२२ ॥ ४ गाथा १५०५ ।

५ शब्दः समानलिङ्गं निर्देशं भणति विसदृशमवस्तु । उपयुक्तो निर्देष्टा निर्देश्याद् अतोऽनन्यः ॥ १५२३ ॥

करणो निर्देष्टा । यद् यस्माद् निर्देश्यादनन्योऽभिन्नः । इदमुक्तं भवति– वक्तुर्लिङ्गवतोऽपि पुमांसमभिदधतः पुंनिर्देश एव, स्त्रियं प्रतिपादयतः स्त्रीनिर्देश एव, नपुंसकं निर्दिशतो नपुंसकनिर्देश एव, वाच्यः उपयुक्तस्य वक्तुर्वाच्यादभिन्नत्वादिति ॥ १५२३ ॥

तथाचाह—

[1]थीं निद्दिसइ जइ पुमं थी चेव तओ जओ तदुवउत्तो । थीविन्नाणाणन्नो निद्दिट्ठसमाणलिङ्गो त्ति ॥१५२४॥

स्त्यादेः समानलिङ्गं स्त्यादिकं निर्दिशतः स्त्यादिनिर्देश इति तावत् किल प्रतीतमेव । यद्यपि च पुमान् कर्ता स्त्रियं कर्मतापन्नां निर्दिशति, यथा– 'वासवदत्ते ! इदमित्थं विधेहि' इति; तदपि तकोऽसौ निर्देष्टा पुरुषः स्त्येव भवति । कुतः ? इत्याह– यतो यस्मात् तदुपयुक्तः स्त्युपयुक्तः स्त्रीविज्ञानाद् वासवदत्ताध्यवसायादनन्योऽभिन्नः सन् निर्दिष्टया स्त्रिया समानलिङ्गः पुरुषो भवति । ततश्च यदा पुरुषो नपुंसकमभिधत्ते तदापि निर्दिष्टसमानलिङ्गत्वाद् नपुंसकमेवासौ । एवं स्त्रियां नपुंसके च निर्देष्टरि निर्दिष्टसमानलिङ्गता योजनीयेति ॥ १५२४ ॥

ननु कथं स्त्रीविज्ञानादनन्यः स पुरुषोऽपि स्त्येव भवति, न पुरुषोऽपि स्यात् ? इत्याह—

[2]जइ स पुमं तो नत्थी अह थी न पुमं नवा तदुवउत्तो । जो थीविण्णाणमओ नो थी सो सव्वहा नत्थि॥१५२५॥

यदि स निर्देष्टा पुमान्, ततो न स्त्री– न खल्वसौ स्त्युपयोगवानित्यर्थः । अथासौ स्त्युपयोगोपयुक्तत्वात् स्त्रीत्यभ्युपगम्यते, तर्हि न पुमान्– न पुंस्त्वेनायमेष्टव्यः, किन्तु स्त्युपयोगोपयुक्तत्वात् स्त्येवासौ मन्तव्य इत्यर्थः । अथ नैवम्, तर्हि नवा न खल्वसौ तदुपयुक्तः स्त्युपयुक्तः, तदुपयुक्तस्य सर्वथैव पुंस्त्वविरोधात् । किं बहुना ?, यः स्त्रीविज्ञानमयः स्त्युपयोगोपयुक्तोऽपि न स्त्री, किन्तु पुमान् नपुंसकं वा, स एवंभूतः पदार्थः सर्वथा नास्ति– असन्नेव, खरविषाणवदिति ॥ १५२५ ॥

अर्थानुपयुक्तः स्त्रियं भाषमाणोऽपि पुरुषो भविष्यतीत्याशङ्क्याह—

[3]भासइ वाणुवउत्तो जइ अन्नाणी तओ न तव्वयणं । निद्देसो जेण मयं निच्छियदेसो त्ति निद्देसो ॥१५२६॥

---

१ स्त्रियं निर्दिशति यदि पुमान् स्त्येव सको यतस्तदुपयुक्तः । स्त्रीविज्ञानानन्यो निर्दिष्टसमानलिङ्ग इति ॥ १५२४ ॥

२ यदि स पुमांस्ततो न स्त्री अथ स्त्री न पुमान् नवा तदुपयुक्तः । यः स्त्रीविज्ञानमयो नो स्त्री स सर्वथा नास्ति ॥ १५२५ ॥

३ भाषते वानुपयुक्तो यद्यज्ञानी सको न तद्वचनम् । निर्देशो येन मतं निश्चितदेश इति निर्देशः ॥ १५२६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

द्रव्याद् द्रव्यस्य वा निर्गमो द्रव्यनिर्गमः। स च सचित्तादिद्रव्यसंबन्धित्वात् सचित्तादिस्त्रिविधः। तस्य च त्रिविधस्य सचित्तादेस्त्रिविधादेव सचित्तादेर्द्रव्यात् संभव उत्पादो ज्ञेय इति ॥ १५३४ ॥

तथाहि--

पभवो सचित्ताओ भूमेरंकुर-पयंग-बप्फाई। किमि-गब्भ-सोणियाई मीसाओ थीसरीराओ ॥ १५३५ ॥

किमि-घुण-घुणचुण्णाई दारुओ जं व निग्गयं जत्तो। दव्वं विगप्पवसओ जहसब्भावो-वयारेहिं ॥१५३६॥

सचित्ताद् भूमिद्रव्यात् सचित्तद्रव्यस्याङ्कुरस्य प्रभवो निर्गमो ज्ञातव्यः, मिश्रस्य तु पतङ्गद्रव्यस्य, तस्य हि पक्षादिप्रदेशा अचित्ताः, शेषं तु सचित्तमिति मिश्रता; अचित्तस्य तु बाष्पद्रव्यस्य। तदेवं सचित्ताद् सचित्तादेस्त्रिविधस्य निर्गम इत्युक्तम्। अथ मिश्रात् स्त्रीशरीरद्रव्यात् सचित्तद्रव्यस्य कृमेर्निर्गमो वेदितव्यः, मिश्रस्य तु गर्भद्रव्यस्य डिम्भरूपस्य, तद्गतकेशादीनामचित्तत्वात्, क्षेत्रस्य तु सचित्तत्वाद् मिश्रता; अचित्तस्य तु शोणितद्रव्यस्य। मिश्रात् सचित्तादेर्निर्गम इत्यपि भावितम्। अचित्तद्रव्याद् दारुणः काष्ठात् सचित्तस्य कृमिद्रव्यस्य निर्गमः, मिश्रस्य तु घुणस्य, पतङ्गवदस्यापि मिश्रत्वात्; अचित्तस्य तु घुणचूर्णस्य, घुणाकृष्टश्लक्ष्णतद्वयवनिवहस्येत्यर्थः। अचित्तात् सचित्तादेर्निर्गम इत्यपि गतम्।

तथा, 'जं वेत्यादि' यद् वा द्रव्यं यस्माद् द्रव्याद् विकल्पवशतो मानसकल्पनासमारोपाद् यथासद्भावेन सद्भूतप्रकारेण, उपचारेण वा निर्गतं, सोऽपि द्रव्याद् निर्गमो द्रव्यनिर्गम उच्यते। तत्र यथासद्भावेन विकल्पवशाद् यथा दुग्धादिद्रव्याद् घृतादिद्रव्यस्य निर्गमः। अत्र हि भूमेः संमूर्च्छजचटकन्यायेन दुग्धाद् घृतादिनिर्गमो न दृश्यत इति 'विकल्पवशतः' इत्युच्यते, दुग्धस्य च घृतादिभावेन परिणामिकारणता समीक्ष्यते, इत्येतावता 'यथासद्भावेन' इत्यभिधीयते। उपचारेण तु रूपकादेर्द्रव्याद् भोजनादेर्निर्गम इत्यादि सर्वं यथासंभवमन्यदपि स्वबुद्ध्याऽभ्यूह्य वक्तव्यमिति ॥ १५३५ ॥ १५३६ ॥

क्षेत्रनिर्गममाह—

[2]खेत्तस्स विनिग्गमणं सरूवओ नत्थि तं जमक्किरियं। खेत्ताओ खेत्तम्मि वि हवेज्ज दव्वाइनिग्गमणं॥१५३७॥

---

१ प्रभवः सचित्ताद् भूमेरङ्कुर-पतङ्ग-बाष्पादयः। कृमि-गर्भ-शोणितादयो मिश्रात् स्त्रीशरीरात् ॥ १५३५ ॥
कृमि-घुण-घुणचूर्णादयो दारुणो यद्वा निर्गतं यतः। द्रव्यं विकल्पवशतो यथासद्भावो-पचाराभ्याम् ॥ १५३६ ॥

२ क्षेत्रस्य विनिर्गमनं स्वरूपतो नास्ति तद् यदक्रियम्। क्षेत्रात् क्षेत्रेऽपि भवेद् द्रव्यादिनिर्गमनम् ॥ १५३७ ॥

[1]उवयारओ खेत्तस्स निग्गमो लोगनिक्खुडाणं च। लद्धं विनिग्गयं ति य जह खेत्तं राउलाउ त्ति॥१५३८॥

यथा द्रव्यस्यापि कचित् कल्पनया निर्गम उच्यते, न तु स्वरूपतः, एवं क्षेत्रस्यापि स्वरूपेण कुतोऽपि निर्गमो नास्ति, तस्याक्रियत्वेन तदयोगात्। क्षेत्रात् पुनर्निर्गमोऽस्ति, यथाऽऽयुःक्षयादिसमय ऊर्ध्वा-ऽधोलोकादिक्षेत्राद् देव-नारकद्रव्यादेर्निर्गमः। क्षेत्रेऽपि धान्यादेर्निर्गमो द्रष्टव्यः। न तु क्षेत्रस्य स्वरूपेण निर्गमः। किं सर्वथा नास्ति? इत्याह— उपचारतः कल्पनामात्रेण क्षेत्रस्यापि निर्गमः समस्त्येव, यथा लोकक्षेत्राद् निष्कुटा निर्गता इति, तेषां स्वरूपेणावस्थितानां निर्गमक्रियाऽभावेऽपि निर्गता इव निर्गता इति निर्गमोपचारः। तथा, लब्धं विनिर्गतं क्षेत्रं राजकुलात्, निर्गतं भरतादिक्षेत्रं दुःषमादिकालाद् दुर्भिक्षा-ऽशिवादेर्वेत्यादीति ॥१५३७॥ १५३८ ॥

कालनिर्गममाह—

[2]कालो वि दव्वधम्मो निक्किरिओ तस्स निग्गमो पभवो। तत्तो च्चिय दव्वाओ पभवइ काले व जं जम्मि॥१५३९॥

उवयारओ व सरओ विणिग्गओ निग्गओ य तत्तोऽहं। अहवा दुक्कालाओ नरो व बालाइकालाओ॥१५४०॥

कालोऽपि वर्तनारूपो द्रव्यधर्म एव। स च स्वरूपेण निष्क्रियः, द्रव्यद्वारेणैव तत्क्रियावत्त्वतः। तस्य च तत एव स्वाश्रयभूताद् द्रव्याद् निर्गमः प्रभव उत्पत्तिः। यथा हरितादिकं यस्मिन् वर्षादिके काले प्रभवत्युत्पद्यते स कालनिर्गम इति। अथवा, उपचारतोऽपि कालनिर्गमो यथा— शरत्समयोऽसौ निर्गत आविर्भूतः, ततो वा शरत्कालाद् दुष्कालाद् वा निर्गतो निस्तीर्णोऽहम्, बालावस्थातो वा नरो निर्गत इत्याद्युपचारतः कालनिर्गम इति ॥ १५३९ ॥ १५४० ॥

अथ भावनिर्गममाह—

[3]भावो वि दव्वधम्मो तत्तो च्चिय तस्स निग्गमो पभवो। दव्वस्स व भावाओ विणिग्गमो भावओऽवगमो॥१५४१॥

---

१ उपचारतः क्षेत्रस्य निर्गमो लोकनिष्कुटानां च। लब्धं विनिर्गतमिति च यथा क्षेत्रं राजकुलादिति ॥ १५३८ ॥

२ कालोऽपि द्रव्यधर्मो निष्क्रियस्तस्य निर्गमः प्रभवः। तत एव द्रव्यात् प्रभवति काले वा यद् यस्मिन् ॥ १५३९ ॥
उपचारतो वा शरद् विनिर्गता निर्गतश्च ततोऽहम्। अथवा दुष्कालाद् नर इव बालादिकालात् ॥ १५४० ॥

३ भावोऽपि द्रव्यधर्मस्तत एव तस्य निर्गमः प्रभवः। द्रव्यस्य वा भावाद् विनिर्गमो भावतोऽपगमः ॥ १५४१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषा०

रूवाई पोग्गलाओ कसाय-नाणादओ य जीवाओ । निंति पभवंति ते वा तेहिंतो तव्विओगम्मि ॥ १५४२ ॥

भावोऽपि कालवद् द्रव्यधर्म एव । तस्य च ततो द्रव्याद् यो निर्गमः प्रभवः स भावनिर्गमः, द्रव्यस्य वा भावाद् निर्गमो भावनिर्गमः । कः ? इत्याह— भावतो भावमाश्रित्य यो द्रव्यस्यापगमो विनाशः । इदमुक्तं भवति— यदा द्रव्यं पूर्वपर्यायेण विनश्यति, अपूर्वपर्यायेण तूत्पद्यते, तदा पूर्वपर्यायात् प्राक्तनभावाद् द्रव्यस्य निर्गतत्वाद् भावाद् निर्गमो भावनिर्गम इत्युच्यते । तथा, रूपादयो भावाः पुद्गलद्रव्यात्, कषाय-ज्ञानादयश्च जीवाद् निर्गच्छन्ति प्रभवन्तीति भावानां निर्गमो भावनिर्गम उच्यते । 'तं वा तेहिंतो त्ति' अथवा ते पुद्गल-जीवादयः पदार्थास्तेभ्यो रूपादिभ्यः कषायादिभ्यश्च भावेभ्यस्तद्वियोगे प्राक्तनभावविनाशे निर्गच्छन्तीति भावेभ्यो निर्गमो भावनिर्गम इत्युच्यत इति । तदेवं विनेयमतिव्युत्पादनार्थमभिहितः षड्विधो निर्गमः ॥ १५४१ ॥ १५४२ ॥

इदानीं प्रकृते यावता प्रयोजनं तदुपदर्शयितुम्, प्रशस्तभावनिर्गमस्वरूपं तावद् दर्शयन्नाह—

[1]तेत्थ पसत्थं मिच्छत्तण्णाणाविरइभावनिग्गमणं । जीवस्स संभवंति य जं सम्मत्तादओ तत्तो ॥१५४३॥

तत्रानन्तरोक्ते भावनिर्गमे प्रशस्तं शुभं निर्गमनम् । किम् ? इत्याह— मिथ्यात्वा-ऽज्ञाना-ऽविरतिलक्षणादप्रशस्तभावाद् यन्निर्गमनं निःसरणं जीवस्य । किमिति ? इत्याह— यद् यस्मात् संभवन्त्येव ततो मिथ्यात्वाद्यप्रशस्तभावनिर्गमाज्जीवस्य मुक्तिपदप्राप्तिहेतवः सम्यक्त्वादयो गुणा इति ॥ १५४३ ॥

भवत्वेवम्, प्रस्तुते केन प्रयोजनम् ? इत्याह—

[2]ऐत्थ उ पसत्थभावप्पसूइमेत्तं विसेसओऽहिगयं । अपसत्थावगमो विय सेसा वि तदंगभावाओ ॥१५४४॥

इह च प्रक्रमे सामायिकाध्ययनं प्रस्तुतम् । तच्च क्षायोपशमिके भावे वर्तते । अत इह तस्यैव प्रशस्तक्षायोपशमिकभावस्य या प्रसूतिर्महावीरात् तन्निर्गमरूपा, तयैव विशेषतोऽधिकृतमधिकारः । तथा, अप्रशस्तमिथ्यात्वादिविषयौदयिकभावस्य योऽपगमो विनाशस्तेनापि चाधिकारः, तदपगमाभावे प्रशस्तभावप्रसूतेरेवायोगादिति । शेषास्तु निर्गमभेदास्तदङ्गभावेन प्रशस्तभावनिर्गमकारणतयाऽऽनन्तर्येण पारम्पर्येण वा कोऽपि कथञ्चिद् व्याप्रियत इतीह निर्दिष्टा इति ॥ १५४४ ॥

१ रूपादयः पुद्गलात् कषाय-ज्ञानादयश्च जीवात् । निर्गच्छन्ति प्रभवन्ति ते वा तेभ्यस्तद्वियोगे ॥ १५४२ ॥

२ तत्र प्रशस्तं मिथ्यात्वा-ऽज्ञाना-ऽविरतिभावनिर्गमनम् । जीवस्य संभवन्ति च यत् सम्यक्त्वादयस्ततः ॥ १५४३ ॥

३ अत्र तु प्रशस्तभावप्रसूतिमात्रं विशेषतोऽधिकृतम् । अप्रशस्तापगमोऽपिच शेषा अपि तदङ्गभावात् ॥ १५४४ ॥

तदङ्गत्वमेव द्रव्यादीनां दर्शयति—

[1]वीरो दव्वं खेत्तं महसेणवणं पमाणकालो य । भावो य भावपुरिसो समासओ निग्गमंगाइं ॥ १५४५ ॥

यतो द्रव्यात् सामायिकं निर्गतं तद् द्रव्यमत्र श्रीमन्महावीरो मन्तव्यः । यस्मिंश्च क्षेत्रे तद् निर्गतं तदिह महसेनवनमवगन्तव्यम् । कालस्तु प्रथमपौरुषीलक्षणः प्रमाणकालः । भावस्तु भावपुरुषो वक्ष्यमाणलक्षणः । एतानि समासतः संक्षेपतः सामायिकस्य निर्गमाङ्गानीति ॥ १५४५ ॥

एतदेव दर्शयति—

[2]सामइयं वीराओ महसेणवणे पमाणकाले य । भावपुरिसा हि भावो विणिग्गओ वक्खमाणोऽयं ॥१५४६॥

गतार्था । नवरं श्रीमन्महावीरजीवलक्षणाद् भावपुरुषादयं वक्ष्यमाणविस्तरस्वरूपः सामायिकलक्षणो भावो विनिर्गतः । इह च क्षायोपशमिके भावे वर्तमानत्वात् 'सामायिकं भावः' इत्युक्तम् ॥ १५४६ ॥

अथ महावीरलक्षणस्य द्रव्यस्य निर्गमं तावदभिधित्सुराह—

[3]इच्चेवमाइं सव्वं दव्वाहीणं जओ जिणस्सेव । तो निग्गमणं वोत्तुं वोच्छं सामाइयस्स तओ ॥ १५४७ ॥

इत्येवमादिकं क्षेत्र-कालनिर्गमनादिकं सामायिकाध्ययना-ऽऽवश्यकश्रुतस्कन्धा-ऽऽचारादिकं वा सर्वमपि यतो यस्माद् द्रव्यस्य महावीरलक्षणस्याधीनम् । ततस्तस्यैव महावीरजिनस्य निर्गमनमुक्त्वा ततः सामायिकस्य निर्गमनं वक्ष्य इति ॥ १५४७ ॥

ननु महावीरजिनस्यापि निर्गमनं कथं वक्तव्यम् ? इत्याह—

[4]मिच्छत्ताइतमाओ स निग्गओ जह य केवलं पत्तो । जह य पसूयं तत्तो सामइयं तं पवक्खामि ॥१५४८॥

तमिति तदेतत् सर्वं प्रवक्ष्यामि ॥ इति गाथापञ्चदशकार्थः ॥ १५४८ ॥

१ वीरो द्रव्यं क्षेत्रं महासेनवनं प्रमाणकालश्च । भावश्च भावपुरुषः समासतो निर्गमाङ्गानि ॥ १५४५ ॥

२ सामायिकं वीराद् महासेनवने प्रामाणकाले च । भावपुरुषाद्धि भावो विनिर्गतो वक्ष्यमाणोऽयम् ॥ १५४६ ॥

३ इत्येवमादि सर्वं द्रव्याधीनं यतो जिनस्यैव । ततो निर्गमनमुक्त्वा वक्ष्ये सामायिकस्य ततः ॥ १५४७ ॥

४ मिथ्यात्वादितमसः स निर्गतो यथा च केवलं प्राप्तः । यथा च प्रसूतं ततः सामायिकं तन् प्रवक्ष्यामि ॥ १५४८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत ऊर्ध्वं 'पंथ किरदेसित्ता' इत्यादिका सर्वापि निरगमवक्तव्यता सूत्रसिद्धैव। यच्चेह दुरवगमं तद् मूलावश्यकविवरणादवगन्तव्यं तावत् यावत् प्रथमगणधरवक्तव्यतायां भाष्यम् ।

विशेषावश्यकभाष्यम् ।

॥ प्रथमो भागः समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

⊞ विशेष बात ⊞

१. विशेषावश्यक भाष्य संपूर्ण गाथा का अकारादिक्रमो भाग-२ में दिया है।

२. भाग-१ में मुद्रणदोष से पेज नंबर-२६-२२०-२२९-२६०-व २९७ जो छपने के रहगयें है वे नीचे दिये मुताबिक समझ लेना।

संदुज्जुसुया पज्जायवायगा भावसंगहं बेंति। उवरिमया विवरीआ भावं भिंदंति तो निययं ॥ ७७ ॥

यद् यस्मात् कारणात् संग्रहनयः सामान्यग्राही सामान्यवादी, तेन कारणेन संगृह्णात्येकत्वेनाऽध्यवस्यति प्रत्येकं त्रितयं नाम-स्थापना-द्रव्यनिक्षेपलक्षणं यानि कानिचिद् नाममङ्गलानि तत् सर्वमप्येकं नाममङ्गलम्, तथा स्थापनामङ्गलान्यशेषाण्यप्येकं स्थापनामङ्गलम्, एवं द्रव्यमङ्गलान्यपरिशिष्टान्यप्येकं द्रव्यमङ्गलमित्यर्थः। व्यवहारनयस्तु येन कारणेन विशेषग्राही, ततो नामादिनिक्षेपान् विशेषयति भेदेनेच्छति- नाममङ्गलानि सर्वाण्यपि पृथग् नाममङ्गलत्वेनेच्छति, एवं स्थापनादिनिक्षेपेष्वपि वाच्यम्। 'सद्दुज्जुसुयेत्यादि' शब्द-ऋजुसूत्रनयौ पुनः पर्यायैरेकार्थभिन्नाभिधानैर्वस्तु वक्तुं शीलं ययोस्तौ पर्यायवाचिनौ सन्तौ नाम-स्थापना-द्रव्यनिक्षेपपरिहारेणैकस्यैव भावस्य भावनिक्षेपस्य संगृहीतिः संग्रहोऽभिन्नत्वमेकत्वं भावसंग्रहस्तं ब्रूतः प्रतिपादयतः; इदमुक्तं भवति- ऋजुसूत्र-शब्दनयौ पूर्वनयेभ्यो विशुद्धत्वाद् नाम-स्थापना-द्रव्यनिक्षेपं तावद् नेच्छतः, किन्त्वेकमेव भावनिक्षेपमभ्युपगच्छतः, केवलं समभिरूढै-वंभूतनयाऽपेक्षयाऽविशुद्धत्वाद् विभिन्नानेकपर्यायाभिधेयत्वेऽपि भावनिक्षेपस्य संग्रहमेकत्वमेव प्रतिपद्येते, न भिन्नत्वमिति भावः। ततश्चैतन्मतेन यदेव मङ्गलशब्दवाच्यं भावमङ्गलं प्रत्यूहोपशमका-ऽनिष्टविघातकृद्-विघ्नापहरणादिशब्दानामपि तदेव वाच्यम्, न भिन्नम्, इति तात्पर्यम्। 'उवरिमया विवरीएत्यादि' उपरितनौ तु समभिरूढै-वंभूतौ नयौ ऋजुसूत्र-शब्दनयाऽपेक्षया विपरीतौ भिन्नानेकपर्यायाऽभिधेयस्य भावस्यैकत्वं नेच्छतः, किन्तु भिन्नत्वमभ्युपगच्छतः, तथाहि- समभिरूढमतेनाऽन्यदेव मङ्गलशब्दवाच्यं भावमङ्गलम्, अन्यच्च प्रत्येकं प्रत्यूहोपशमकादिपर्यायवाच्यम्। एवम्भूतस्याऽप्येवमेव, केवलमयं पूर्वस्माद् विशुद्धत्वादेकपर्यायाभिधेयमपि भावमङ्गलं भावमङ्गलकार्यं कुर्वदेव मन्यते, नाऽन्यदा, यथा धर्मोपकरणान्वितः सम्यक्चारित्रोपयोगे वर्तमानः साधुरिति। तदेवमृजुसूत्र-शब्दनयाऽभ्युपगमापेक्षया विपरीताभ्युपगमपरत्वाद् विपरीतावेतौ। 'तो त्ति' तस्माद् भावं भावमङ्गलादिकमर्थं नियतं निश्चितं पर्यायभेदाद् भिन्तः-भेदेनेच्छत इत्यर्थः, यदि हि पर्यायभेदेऽपि वस्तुनो न भेदः, तर्हि घट-पटादीनामपि स न स्यादित्यादियुक्तेः पर्यायभेदेन भिन्नमेव भावमङ्गलमभ्युपगच्छत इति भावः ॥ इति गाथाद्वयार्थः ॥ ७६ ॥७७॥

तदेवमवसितं प्रासङ्गिकम्। प्रकृतमुच्यते, तच्चेदम्- पूर्वं नोआगमतो भावमङ्गलं नोशब्दस्य सर्वनिषेधवचनत्वे विशुद्धः क्षायिकादिर्भाव उक्तः, मिश्रवचनत्वे तस्य ज्ञान-दर्शन-चारित्रोपयोगः, एकदेशवचनत्वे पुनस्तस्याऽर्हन्नमस्कारादिज्ञान-क्रियाविमिश्रपरिणामः प्रोक्तः। साम्प्रतं नोशब्दस्यैकदेशवाचित्वे नोआगमतो भावमङ्गलं ज्ञानपञ्चकरूपा नन्द्यपि भवतीति दर्शयन्नाह-

---

१ शब्द-ऋजुसूत्रौ पर्यायवाचकौ भावसंग्रहं ब्रूतः। उपरितनौ विपरीतौ भावं भिन्नस्तस्माद् नियतम् ॥ ७७ ॥ + धात्त-11

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अभिधाय च निर्गतः। ततो गतश्च गङ्गायाम्, निरीक्षिता चासौ स्वयम्, पृष्ट्वा च परेभ्यः, शुष्कतृणादिवहनेन चान्वय-व्यतिरेकाभ्यां तस्याः पूर्वाभिमुखवाहित्वं निश्चित्य निवेदितमागत्य गुरुभ्यः– इत्थमित्थं च निश्चिता मया पूर्वाभिमुखी वहति गङ्गा, तत्त्वं तु गुरवो विदन्ति। प्रच्छन्नहेरिकेण चास्यापि संबन्धिनी चेष्टा सर्वापि राज्ञे निवेदिता। ततश्चाभ्युपगतं सहर्षेण राज्ञा गुरुवचनमिति ॥ ९३२ ॥ ९३३ ॥ ९३४ ॥

तदेवं गुरुभावोपक्रमे युक्ततयाऽत्र व्यवस्थापिते सति परः प्राह—

[1]जुत्तं गुरुमयगहणं को सेसोवक्कमोवओगोऽत्थ ?। गुरुचित्तपसायत्थं ते वि जहाजोगमाओज्जा ॥ ९३५ ॥

ननूक्तन्यायेन युक्तं तर्हि गुरुमतग्रहणं– गुरुभावोपक्रमणम्, शेषाणां तु नाम-स्थापना-द्रव्याद्युपक्रमाणां क इहोपयोगः, येन ते[2] उपन्यस्ताः ?। अत्रोत्तरमाह– ननु गुरुचित्तप्रसादनार्थं तेऽपि शेषोपक्रमा यथायोगं यथाप्रस्तावमायोज्याः सप्रयोजनत्वेनाऽभ्यूह्या इति ॥ ९३५ ॥

तदेवं द्रव्याद्युपक्रमाणां गुरुचित्तप्रसादनोपयोगित्वमाह—

[3]परिकम्म-नासणाओ देसे काले य जा जहा जोग्गा। ताओ दव्वाईणं कज्जाहाराइकज्जेसु ॥ ९३६ ॥

उवहियजोग्गदव्वो देसे काले परेण विणएणं। चित्तण्णू अणुकूलो सीसो सम्मं सुयं लहइ ॥ ९३७ ॥

याः काश्चिद् देशे मरुमण्डलादौ, काले ग्रीष्मादौ येन[4] केनचित् प्रकारेण योग्या उचिताः परिकर्म-नाशनाः परिकर्म-विनाशा भवन्ति, ता द्रव्य-क्षेत्र-कालानां गुरोराहारादिकार्येषु शिष्येण तच्चित्तप्रसादनार्थं कर्तव्याः। तत्र द्रव्यस्य दधि-क्षीर-नीरादेर्गुड-शुण्ठ्यु-शीर-मुस्तादिक्षेपेण परिकर्म भावनीयम्। क्षेत्रस्योपाश्रयादेरुपलेपनादिना। कालस्य मुहूर्तादेः शिक्षकदीक्षादौ घटिकादिनेति। विनाशोऽपि द्रव्यादीनां द्रव्यान्तरसंयोगादिना भावनीय इति। तत इत्थं गुरुचित्तं प्रसादयन् शिष्यः किमाप्नोति ?, इत्याह– 'उवहिएत्यादि' उपहितानि गुरोराहाराद्यर्थं ढौकितानि कृतपरिकर्माणि योग्याऽशन-पान-वस्त्र-पात्रौषधादीनि द्रव्याणि येन, असावुपहितयोग्यद्रव्यः शिष्यः। शेषं सुगमम् ॥ ९३६ ॥ ९३७ ॥

१ युक्तं गुरुमतग्रहणं कः शेषोपक्रमोपयोगोऽत्र ?। गुरुचित्तप्रसादार्थं तेऽपि यथायोगमायोज्याः ॥ ९३५ ॥
२ परिकर्म-नाशना देशे काले च या यथा योग्याः। ता द्रव्यादीनां कार्या आहारादिकार्येषु ॥ ९३६ ॥
उपहितयोग्यद्रव्यो देशे काले परेण विनयेन। चित्तज्ञोऽनुकूलः शिष्यः सम्यक् श्रुतं लभते ॥ ९३७ ॥ ३ क. ग. 'न प्र'।

अथ निर्गमनं निर्गमः। स च 'कुतः सामायिकं निर्गतम् ?' इत्येवंरूपो वक्ष्यते। अत्राक्षेप-परिहारौ प्राह—

[1]णणु निग्गमो गउ च्चिय अत्ता-णंतर-परंपरागमओ। तित्थयराईहिंतो आगयमेयं परंपरया ॥ ९८१ ॥

ननु पूर्वमागमद्वार एवात्मा-ऽनन्तर-परम्परागमतस्तीर्थकरादिभ्यः परम्परया समागतमेतत् सामायिकमित्यभिधानात् तीर्थकरादिभ्यो निर्गमनमस्य, इत्यवगतत्वाद् गतार्थ एव निर्गमः, किं पुनरिहोपात्तः ? इति ॥ ९८१ ॥

परिहारमाह—

[2]इह तेसिं चिय भण्णइ निद्देसो निग्गमो जहा तं च। उवयातं तेहिंतो खेत्ताइविसेसियं बहुहा ॥ ९८२ ॥

तेषामेव तीर्थकरादीनां सामान्योद्देशमात्रेण प्रागवगतानामिह विशेषाभिधानरूपो निर्देशो भण्यते, यथा श्रीमन्महावीरतीर्थकरादेतत् सामायिकमर्थतो निर्गतम्, सूत्रतस्तु गौतमादिगणधरेभ्यो निर्गतम्, तथा निर्गमश्चेह मिथ्यात्वाविरत्यादितमसस्तेषां तीर्थकरादीनामत्रोच्यते '[3]अवरविदेहे गामस्स चिंतओ' इत्यादिना ग्रन्थेन। तथा, तच्च सामायिकं बहुधाऽनेकशः क्षेत्र-काल-पुरुष-कारण-प्रत्ययविशेषितं तेभ्यस्तीर्थकरादिभ्यो यथोपयातमागतम्, तच्चेह भण्यत इति विशेषः ॥ ९८२ ॥

अथ लक्षणद्वारविषयमाक्षेपमाह—

[4]अज्झयणलक्खणं नणु खओवसमियं गुणप्पमाणे वा। नाणागमाइगहणे भणियं किमिहं पुणो गहणं ? ॥९८३॥

लक्ष्यतेऽनेनेति लक्षणम्, तच्च '[5]सद्दहण-जाणणा खलु' इत्यादिना सामायिकस्य सावद्ययोगविरत्यादिकं वक्ष्यति। अत्र परः प्रेरयति– नन्वध्ययनस्याऽस्य क्षायोपशमिको भावो लक्षणम्, इति प्रागुपक्रमभेदरूपे षड्नाम्नि क्षायोपशमिके भावे समवतारादर्थापत्त्या भणितमेव। अथवा, 'गुणप्रमाणे ज्ञानमिदम्, तत्राप्यागमः' इत्याद्यभिधानादिदं क्षायोपशमिकभावरूपं लक्षणमर्थापत्त्याऽभिहितमेव ?, आगमस्य क्षायोपशमिकभावलक्षणत्वात्, किमिहानुगमे लक्षणस्य पुनर्ग्रहणम् ? इति ॥ ९८३ ॥

१ ननु निर्गमो गत एवाऽऽत्मा-ऽनन्तर-परम्परागमतः। तीर्थकरादिभ्य आगतमेतत् परम्परया ॥ ९८१ ॥
२ इह तेषामेव भण्यते निर्देशो निर्गमो यथा तच्च। उपयातं तेभ्यः क्षेत्रादिविशेषितं बहुधा ॥ ९८२ ॥ ३ अपरविदेहे ग्रामस्य चिन्तकः।
४ अध्ययनलक्षणं ननु क्षायोपशमिकं गुणप्रमाणे वा। ज्ञाना-ऽऽगमादिग्रहणे भणितं किमिह पुनर्ग्रहणम् ? ॥ ९८३ ॥ ५ श्रद्धान-ज्ञाने खलु।

For Private and Personal Use Only